CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

3.5

॥ श्रीपरब्रह्मणे नमः ॥

ऋग्वेदः ।

श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धर—
श्रीविप्रकुलतिलकसायणाचार्य-
कृत-संस्कृतभाष्यसहितः

केवलमावरणपृष्ठं

काश्यां

संस्कृत-बुक-डिपोऽध्यक्षैः

मास्टर खेलाड़ीलाल ऐण्ड सन्स्

महोदयैः

काश्यां रामघट्टे 'हितचिन्तका'भिध-
मुद्रणालये प्राकाश्यं नीतः

१९३३ खीष्टाब्दाः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ॐ

॥ श्रीगणेशाय नमः ॥

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥

अथ पंचमाष्टके प्रथमोऽध्याय आरभ्यते। षष्ठमंडलस्य षष्ठेऽनुवाके चतुर्दश सूक्तानि। तत्र स्तुषे नरेत्येकादशर्चं प्रथमं सूक्तं। अत्रेयमनुक्रमणिका। स्तुषे एकादशाश्विनं त्विति। मंडलद्रष्टा बार्हस्पत्यो भरद्वाज ऋषिः। अनुक्तत्वात्त्रिष्टुप्। अश्विनौ देवता॥ प्रातरनुवाक आश्विने क्रताविदमादिके द्वे सूक्ते। आश्विनशस्त्रे चैते एव। सूत्रितं च। स्तुषे नरेति सूक्ते। आ० ४. १५.। इति॥

॥ तत्र प्रथमा ॥

स्तुषे नरा दिवो अस्य प्रसंताश्विना हुवे जरमाणो अर्कैः।
या सद्य उस्रा व्युषि ज्मो अंतान्युयूषतः पर्युरू वरांसि॥ १

स्तुषे। नरा। दिवः। अस्य। प्रऽसंता। अश्विना। हुवे।
जरमाणः। अर्कैः।
या। सद्यः। उस्रा। विऽउषि। ज्मः। अंतान्। युयूषतः।
परि। उरु। वरांसि॥ १

दिवो द्युलोकस्य नरा नेतारावस्य भुवनस्य प्रसंता प्रसंतौ प्रभवंतावीश्वरावश्विनावश्वैरन्वितौ स्तुषे। प्रगीतमंत्रसाध्यैः स्तोत्रैः स्तोतुमर्कैरर्चनीयमंत्रसाध्यैः शस्त्रैर्जरमाणः स्तुतिं कुर्वन्हुवे। आह्वयामि। कीदृशावित्यपेक्षायां। या यौ सद्य

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यशोऽस्मा यत्नूनां निवारको भुवि व्यूढो निमायाः समाप्तो जमः पृथिव्या अन्तान्
पर्यन्तानुच्छन्ति वरांसि रूपस्य वरकाणि तमांसि च परि परितो युयूषतः पृथक्कुरुतः।
अथवा वरांसि तेजांसि तमोनिवारणात्परियुयूषतः। विस्तारयतः॥

॥ अथ द्वितीया॥

ता यज्ञमा शुचिभिश्चक्रमाणा रथस्य भानुं रुरुचू रजोभिः।
पुरु वरांस्यमिता मिमानापो धन्वान्यति याथो अज्रान्॥ २

ता। यज्ञं। आ। शुचिऽभिः। चक्रमाणा। रथस्य। भानुं।
रुरुचुः। रजःऽभिः।
पुरु। वरांसि। अमिता। मिमाना। अपः। धन्वानि।
अति। याथः। अज्रान्। २

किंच ता तौ प्रसिद्धावश्विनौ यज्ञमस्मदीयं यागमाचक्रमाणावाक्रममाणौ
शुचिभिर्निर्मलै रजोभिः दीप्यैस्तेजोभिः। रजो रजतेर्ज्योती रज उच्यते। नि०
४. १९.। इति यास्केनोक्तत्वात्। रथस्य स्वकीयस्य रथस्य भानुं दीप्तं रुरुचुः।
रोचयेते। अपि च पुरु बहूनि वरांसि तमोनिवारकाणि तेजांस्यमितापरिमितानि
मिमाना निर्मिमाणावप उदकस्य धन्वानि मरुप्रदेशानज्रान् स्वकीयानश्वानतियाथः।
अतिक्रामयथः॥

॥ अथ तृतीया॥

ता ह त्यद्वर्तिर्यदरध्रमुग्रेत्था धियं ऊहथुः शश्वदश्वैः।
मनोजवेभिरिषिरैः शयध्यै परि व्यथिर्दाशुषो मर्त्यस्य॥ ३

ता। ह। त्यत्। वर्तिः। यत्। अरध्रं। उग्रा। इत्था।
धियं। ऊहथुः। शश्वत्। अश्वैः।
मनःऽजवेभिः। इषिरैः। शयध्यै। परि। व्यथिः। दाशुषः।
मर्त्यस्य। ३

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

ता ह त्यौ खलूपोपावश्विनौ युवां यदरभ्रमसश्चदं त्वद्वर्तिर्यजमानस्य गृहं सममधियिं गच्छथः । किंचेत्थंत्वं धियः स्तोतृनिपिरैरेषणीयैः कास्यैर्गनौजरैभिगंनोपेगैरश्वैः क्षीयैरश्वैः यम्वत्पर्मदोहशुः । स्वर्गं प्रापयथः । गत्थैश्च मनुष्यस्य दाशुषो यजमानस्य व्ययिष्ठिसकः परिशयथ्यै परिशयनाय दोर्घनिद्रायै युवाभ्यां क्रियतां ॥

॥ अथ चतुर्थी ॥

ता नव्यसो जरमाणस्य मन्मोपं भूषतो युयुजानसप्ती ।

शुभं पृक्षमिषमूर्जं वहंता होता यक्षत्प्रत्नो अध्रुग्युवाना ॥ ४

ता । नव्यसः । जरमाणस्य । मन्म । उप । भूषतः ।

युयुजानसप्ती इति युयुजानऽसप्ती ।

शुभं । पृक्षं । इषं । ऊर्जं । वहंता । होता । यक्षत् । प्रत्नः ।

अध्रुक् । युवाना ॥ ४

ता ताविश्विनौ युयुजानसप्ती रथे युज्यमानाश्वौ शुभं शोभनं पृक्षमन्नं । पयः इत्यन्ननामसु पाठात् । इषं पुष्टिमूर्जं रसं च वहंता वहंतौ नव्यसो नवतरस्य जरमाणस्य स्तुतिं कुर्वतो मन्म मननीयं स्तोत्रमुपभूषतः । उपगच्छतः । यद्वा स्तोत्रसमीपे भवतः । किंच युवाना नित्यतरुणौ तौ होता देवानामाह्वाताध्रुगद्रोग्धा प्रियः प्रत्नः पुराणोऽग्निर्यक्षत् । यजतु ॥

॥ अथ पंचमी ।

ता वल्गू दस्रा पुरुशाकतमा प्रत्ना नव्यसा वचसा विवासे ।

या शंसते स्तुवते शंभविष्ठा बभूवतुर्गृणते चित्रराती ॥ ५

ता । वल्गू इति । दस्रा । पुरुशाकऽतमा । प्रत्ना । नव्यसा ।

वचसा । विवासे ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

या । शंसंते । स्तुवते । शंऽभविष्ठा । बभूवतुः । गृणते ।

चित्ररांती इति चित्रऽरांती ॥ ५

या यौ शंसते मन्त्रैः स्तुतिं कुर्वते स्तुवते स्तोत्रैः स्तुतिं कुर्वते जनाय शंभविष्ठातिशयेन सुखस्य भावयितारावतिशयेन सुखस्वरूपौ वा गृणते स्तोत्रशस्त्रव्यतिरिक्तलौकिकस्तुतिभिः स्तुवते च चित्ररातौ विचित्रदानौ बभूवतुः ता तौ पत्न्या गमनशीलौ ऋषिरौ वा पुरुशाकतमातिशयेन बहुकर्माणौ बहुसहायौ वा पत्ना पत्नौ पुराणौ। प्रत्नं प्रदिव इति पुराणनामसु पाठात् । दस्रा दर्शनीयावश्विनौ नव्यसा नवतरेण वचसा स्तुत्याभिवासे । परिचरामि ॥

॥ इति पंचमस्य प्रथमे प्रथमो वर्गः ॥

॥ अथ षष्ठी ।

ता भुज्युं विभिरद्भ्यः समुद्रात्तुग्रस्य सूनुमूहथू रजोभिः ।

अरेणुभिर्योजनेभिर्भुजंता पतत्रिभिरर्णसो निरुपस्थात् ॥ ६

ता । भुज्युं । विऽभिः । अत्ऽभ्यः । समुद्रात् । तुग्रस्य ।

सूनुं । ऊहथुः । रजःऽभिः ।

अरेणुऽभिः । योजनेभिः । भुजंता । पतत्रिऽभिः । अर्णसः ।

निः । उपऽस्थात् ॥ ६

तौ तावश्विनौ युवां तुग्रस्य सूनुं पुत्रं भुज्युं नामकं समुद्रमध्ये मग्नतायं राजंसा रचंतावरेणुभी रेणुरहितैरांतरिक्षे रजोभिर्मार्गैर्योजनेभी रथयुक्तैः पतत्रिभिः पतनवद्भिर्विभिरश्वैरर्णसो जलस्योपस्थाद्योनेः समुद्रादद्भ्यो निरूहथुः । निरगमयतं । समुद्रादद्भ्य इति प्रयोगो भावगंभीरादग्रचछतीतिवत् ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ सप्तमी ॥

वि जयुषा रथ्या यातमद्रिं श्रुतं हवं वृषणा वध्रिमत्याः।

दशस्यंता शयवे पिप्यथुर्गामिति च्यवाना सुमतिं भुरण्यू ॥ ७

वि। जयुषा। रथ्या। यातं। अद्रिं। श्रुतं। हवं। वृषणा।

वध्रिऽमत्याः ॥

दशस्यंता। शयवे। पिप्यथुः। गां। इति। च्यवाना।

सुऽमतिं। भुरण्यू इति ॥ ७

रथ्या हे पथारूढावश्विनौ जयुषा जयशीलेन रथेनाद्रिं मार्गे स्थितं पर्वतं वियातं। व्यवधेयां। यानिरत्र वधकतौ। तथा च निगमांतरं। विबिंदुना नासत्या रथेन वि पर्वताँ अजरयू अयातं। ऋग्वे० १. ११६. २०.। इति। वृषणा कामानां वर्षितारौ वध्रिमत्याः पुत्राभिन्या आह्वानं श्रुतं। अशृणुतं। दशस्यंता कामेभ्यः कामान्प्रयच्छंतौ शयवे युवां स्तुवते गां निवृत्तप्रसवां पिप्यथुः। क्षीरेणाप्यायथतं। तथा च निगमांतरं। शयवे चिन्नासत्या शचीभिर्जसुरये स्तर्यं पिप्यथुर्गां। ऋग्वे० १. ११६. २२.। इति। इत्थं सुमतिं सुष्टुतिं च्यवाना गच्छंतौ भुरण्यू सर्वत्र गंतारौ यज्ञस्य भर्तारौ वा भवतं ॥

॥ अथाष्टमी ॥

यद्रोदसी प्रदिवो अस्ति भूमा हेळो देवानामुत मर्त्यत्रा।

तदादित्या वसवो रुद्रियासो रक्षोयुजे तपुरघं दधात ॥ ८

यत्। रोदसी इति। प्रऽदिवः। अस्ति। भूम। हेळः।

देवानां। उत। मर्त्यऽत्रा।

तत्। आदित्याः। वसवः। रुद्रियासः। रक्षःऽयुजे। तपुः।

अघं। दधात ॥ ८

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

रोदसी हे द्यावापृथिव्यौ हे आदित्या हे वसवो रुद्रियासो हे रुद्रपुत्रा मरुतो मर्त्यंशा मर्त्येष्वश्विनोः परिचारकेषु देवानां मध्ये ऽहः क्रोधो भूत यद्यानन्ति सपेडुक्त-पुत्रायकं रक्षोयुजे रक्षोभियुक्ताय रक्षसां स्वामिने प्रेरकाय मानमानंह दधात कुरुत । अथवा रक्षोयुजे रक्षोभियुक्ताय यज्वनेऽयमानंह कुरुत ॥

॥ अथ नवमी ॥

य ईं राजानावृतुथा विदधद्रजसो मित्रो वरुणश्चिकेतत् ।
गंभीराय रक्षसे हेतिमस्य द्रोघाय चिद्वचस आनवाय ॥ ९

यः । ईं । राजानौ । ऋतुऽथा । विऽदधत् । रजसः । मित्रः । वरुणः । चिकेतत् ।
गंभीराय । रक्षसे । हेतिं । अस्य । द्रोघाय । चित् । वचसे । आनवाय ॥ ९

यो नरो रजसः समस्तस्य लोकस्य । लोका रजांस्युच्यन्त इति यास्केनोक्तत्वात् । राजानावीशितारावश्विनावृतुथा काले काले विदधत् परिचरति तं मित्रो वरुणश्च चिकेतत् । जानीयात् । मित्रवरुणप्रमुखो देवा एनं विदुरित्यर्थः । किंचायं परिचारको गंभीराय महाबलाय रक्षसे राक्षसाय हेतिं घातकमायुधमस्य । अस्यति । क्षिपति ॥ प्रथमपुरुषस्य मध्यमपुरुषेण व्यत्ययः ॥ द्रोघायाभिद्रोहात्मकायानवाय मनुष्यसंबंधिने वचसे चित् वचनायैव हेतिमस्यति । मनुष्याणामभिद्रोहायैनमास्कंदतीति ॥

॥ अथ दशमी ॥

अंतरैश्चक्रैस्तनयाय वर्तिर्द्युमता यातं नृवता रथेन ।
सनुत्येन त्यजसा मर्त्यस्य वनुष्यतामपि शीर्षा ववृक्तं ॥ १०

अंतरैः । चक्रैः । तनयाय । वर्तिः । द्युऽमता । आ । यातं ।
नृऽवता । रथेन ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सह्रुत्येन । त्यजसा । मर्त्यस्य । वनुष्यतां । अपि । शीर्षा ।

ववृक्तं ॥ १०

हे अश्विनावंतरैरनिकृष्टैश्चक्रैर्युक्तेन द्युमता दीप्तिमता न्वता नेत्रा सारथिना युक्तेन यद्वाश्वयुक्तेन । पतंगा नर इत्यश्वनामसु पाठात् । रथेन वर्तिरस्मदीयं गृहं तनयाय तनयार्थं दातुमायातं । अपि च सह्रुत्येन तिरोहितेन त्यजसा क्रोधेन । हृणिस्त्यज इति क्रोधनामसु पाठात् । मर्त्यस्य वनुष्यतां बाधमानानां । वनुष्यतिर्हंतिकर्मेति यास्केनोक्तत्वात् । शीर्षा शिरांस्यपिवृक्तं । वृक्तं ॥

॥ अथैकादशी ॥

आ परमाभिरुत मध्यमाभिर्नियुद्भिर्यातमवमाभिरर्वाक् ।

दृळ्हस्य चिद्गोमतो वि व्रजस्य दुरो वर्तं गृणते चित्रराती ॥ ११

आ । परमाभिः । उत । मध्यमाभिः । नियुत्ऽभिः । यातं ।

अवमाभिः । अर्वाक् ।

दृळ्हस्य । चित् । गोऽमतः । वि । व्रजस्य । दुरः । वर्तं ।

गृणते । चित्ररातीइति चित्रऽराती ॥ ११

हे अश्विनौ परमाभिरुत्कृष्टाभिरुतापि च मध्यमाभिरनुत्कृष्टाभिरवमाभिर्निकृष्टाभिश्च नियुद्भिरश्वैरर्वागस्मदभिमुखमायातं । दृळ्हस्य चिद्दृढापिधानस्यापि गोमतो गोयुक्तस्य व्रजस्य गोष्ठस्य दुरो द्वाराणि विवर्तं । विवृणुतं । किंच गृणते स्तुवते मह्यं चित्ररातौ विचित्रदानौ भवतं ॥

॥ इति पंचमस्य चतुर्थे द्वितीयो वर्गः ॥

क्व त्येत्येकादशर्चं द्वितीयं सूक्तं भरद्वाजस्यार्षं । अत्रेयमनुक्रमणिका । क्व त्यैकपदांतं त्रैष्टुभमिति । या वां सन्ति इत्येकादश्येकपदा त्रिष्टुप् शिष्टास्त्रिष्टुभः । आश्विनं त्वित्युक्तत्वादस्यापि सूक्तस्याश्विनौ देवता ॥ प्रातरनुवाकाश्विनशस्त्रयोस्त्रैष्टुभे छंदसि विनियोगः ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तत्र प्रथमा ॥

क्व१ त्या वल्गू पुरुहूताद्य दूतो न स्तोमोऽविदन्नमस्वान्।

आ यो अर्वाङ्नासत्या ववर्त प्रेष्ठा ह्यसथो अस्य मन्मन् ॥ १

क्व। त्या। वल्गू इति। पुरुऽहूता। अद्य। दूतः। न।

स्तोमः। अविदत्। नमस्वान्।

आ। यः। अर्वाक्। नासत्या। ववर्त। प्रेष्ठा। हि। असथः।

अस्य। मन्मन् ॥ १

क्व कुत्र स्थितौ वल्गू रुचिरौ पुरुहूता बहुभिराहूतौ त्या तावश्विनौ नमस्वान्हविषा युक्तः। नम आयुरित्यन्ननामसु पाठात्। स्तोमः पंचदशादिः स्तोमोऽद्य दूतो न प्रेरितो दूत इवाविदत्। विंदत्। यः स्तोमोऽर्वागभिमुखं नासत्यावश्विनावाववर्त आवर्तयत्। हे अश्विनौ युवामस्य स्तोतुर्मन्मन् स्तोत्रे प्रेष्ठा हि प्रियतमौ ह्यसथः। भवथः॥

॥ अथ द्वितीया ॥

अरं मे गंतं हवनायास्मै गृणाना यथा पिबाथो अंधः।

परि ह त्यद्वर्तिर्याथो रिषो न यत्परो नांतरस्तुतुर्यात् ॥ २

अरं। मे। गंतं। हवनाय। अस्मै। गृणाना। यथा।

पिबाथः। अंधः।

परि। ह। त्यत्। वर्तिः। याथः। रिषः। न। यत्। परः।

न। अंतरः। तुतुर्यात् ॥ २

हे अश्विनौ युवां मे मदीयायास्मै हवनायाह्वानायारं पर्याप्तं गंतं गच्छतं। गृणाना स्तूयमानावंधः सोमं यथा पिबाथः पिबतं। रिषो हिंसकस्य मर्त्योऽस्य वर्तिं त्यदिदं परि याथः परितो याथः यद्वर्तिः परो विप्रकृष्टो न तुतुर्यात् न हिंस्यात्।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ऽन्तरः संनिकृष्टोऽपि न तुतुर्यात्। यद्वा त्यद्भूतिं तदस्मदीयं स्तवं रिपो हिंसकात्परि-याथः। त्यद्भूतिं परो विप्रकृष्टोऽन्तरः संनिकृष्टोऽपि न तुतुर्यात्। अयं भावः। अस्मदीयं स्तवं दूरस्थः संनिकृष्टोऽपि न हिंस्यात्तथा रक्षां कुरुथ इति ॥

॥ अथ तृतीया ॥

अक्रारि वामंधसो वरीमन्नस्तारि बर्हिः सुप्रायणतमं ।

उत्तानहस्तो युवयुर्ववंदा वां नक्षंतो अद्रय आंजन् ॥ ३

अकारि । वां । अंधसः । वरीमन् । अस्तारि । बर्हिः ।

सुप्रऽअयनतमं ।

उत्तानऽहस्तः । युवयुः । ववंद । आ । वां । नक्षंतः ।

अद्रयः । आंजन् ॥ ३

वां युवयोरंधसः सोमस्य वरीमन् विस्तीर्णेऽभिषवादौ यत्कृत्यमस्ति तदकारि। कृतं। सुप्रायणतमं स्वद्गतमं बर्हिरस्तारि। स्तीर्णं। उत्तानहस्तः कृतांजलिर्युव-युर्वां कामयमानो होता ववंद। स्तौमि। वां युवां नक्षंतो व्याप्नुवंतः ॥ नक्ष इत्य नक्ष गतावित्ति धातुः ॥ अद्रयो ग्रावाण आंजन्। सोमरसेन समंतादभ्यक्तानकुर्वंत ॥

। अथ चतुर्थी ।

ऊर्ध्वो वामग्निरध्वरेष्वस्थात्प्र रातिरेति जूर्णिनी घृताची ।

प्र होता गूर्तमना उराणोऽयुक्त यो नासत्या हवीमन् ॥ ४

ऊर्ध्वः । वां । अग्निः । अध्वरेषु । अस्थात् । प्र । रातिः ।

एति । जूर्णिनी । घृताची ।

प्र । होता । गूर्तऽमनाः । उराणः । अयुक्त । यः । नासत्या ।

हवीमन् । ४

२

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अग्निर्वां युवयोर्यज्ञार्थमूर्ध्वोऽस्थात् । उदतिष्ठत् । अध्वरेषु यज्ञेषु प्रैति । समिद्ध आहवनीयं गच्छति च । रातिर्धनं जूर्णिनौ प्रगामिनौ । जूर्णिर्जवतेरिति यास्केनोक्तत्वात् ॥ घृताची घृतेनाक्ता । उपस्तीर्णाभिघारितेत्यर्थः । किंच होतोराध्य उरु कुर्याथः प्रगूर्णमनाः प्रकर्षेणोद्युक्तमना भवति यो होता नासत्यावश्विनौ स्तोमवाह्वाने स्तोत्रे वायुक्त योजयति ॥

॥ अथ पंचमी ॥

अधि श्रिये दुहिता सूर्यस्य रथं तस्थौ पुरुभुजा शतोतिं ।
प्र मायाभिर्मायिना भूतमत्र नरा नृतू जनिमन्यज्ञियानां ॥ ५

अधि । श्रिये । दुहिता । सूर्यस्य । रथं । तस्थौ । पुरुऽभुजा ।
शतऽऊतिं ।
प्र । मायाभिः । मायिना । भूतं । अत्र । नरा । नृतू इति ।
जनिमन् । यज्ञियानां ॥ ५

पुरुभुजा हे पूर्णभुजौ बहूनां रक्षकावश्विनौ युवयोः शतोतिं बहुरक्षकं बहुगमनं वा रथं सूर्यस्य दुहिता सूर्या श्रिये श्रयितुमधितस्थौ । अध्यतिष्ठत् । अपि च यज्ञियानां देवानामत्र जनिमन्नस्मिन् जन्मनि प्रादुर्भावे मायाभिः प्रज्ञानैः ॥ शची मायेति प्रज्ञानामसु पाठात् ॥ मायिनौ प्रज्ञावन्तौ नरा नेतारौ नृतू नृत्यन्तौ भूतं । भवतं । यद्वा हे मायिनौ प्राज्ञौ नरौ नेतारौ नृतू नृत्यन्तावश्विनौ यज्ञियानां देवानामत्र जनिमन् जन्मनि प्रादुर्भावे प्रभूतं प्राप्तममृतत्वादिकं देवं मायाभिः प्रज्ञानैः कौशलैर्वा जितवन्तौ स्थ इत्यर्थः । अयमर्थः प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत्सूर्यां सावित्रीं । ऐ० ब्रा० ४. ७. । इत्यादिना स्पष्टीकृतः ॥

॥ इति पंचमस्य प्रथमे तृतीयो वर्गः ॥

॥ अथ षष्ठी ॥

युवं श्रीभिर्दर्शताभिराभिः शुभे पुष्टिमूहथुः सूर्यायाः ।
प्र वां वयो वपुषेऽनु पप्तन्नक्षद्वाणी सुष्टुता धिष्ण्या वां ॥ ६

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

युवं। श्रीभिः। दर्शताभिः। आभिः। शुभे। पुष्टिं।

ऊहथुः। सूर्यायाः।

प्र। वां। वयः। वपुषे। अनुं। पप्तन्। नक्षंत्। वाणीं।

संऽस्तुता। धिष्ण्या। वां॥ ६

हे अश्विनौ युवं युवां दर्शताभिर्दर्शनीयाभिराभिः श्रीमतां परिदृश्यमानाभिः श्रीभिर्लक्ष्मीभिः कांतिभिर्वा सूर्याया सूर्यस्य पत्न्याः शुभे शोभनार्थं पुष्टिं पूर्तिमूहथुः। प्रापयथः। किंच वां युवां वयोऽश्वा वपुषे शोभायै प्रानुपप्तन्। प्रकर्षेणान्वपतन्। अपि च हे धिष्ण्या स्तुत्यावश्विनौ वां युवां सुष्टुता वाण्यपी वां स्तुतिर्नक्षत्। व्याप्नोति॥

॥ अथ सप्तमी॥

आ वां वयोऽश्वासो वहिष्ठा अभि प्रयो नासत्या वहंतु।

प्र वां रथो मनोजवा असर्जीषः पृक्ष इषिधो अनु पूर्वीः॥ ७

आ। वां। वयः। अश्वासः। वहिष्ठाः। अभि। प्रयः।

नासत्या। वहंतु।

प्र। वां। रथः। मनःऽजवाः। असर्जि। इषः। पृक्षः।

इषिधः। अनुं। पूर्वीः॥ ७

हे नासत्यौ वां युवां वयो गंतारो वहिष्ठा वोढृतमा अश्वाःसोऽश्वाः प्रयः सोमलक्षणमन्नमभ्यावहंतु। प्रापयंतु। वां युवयोर्मनोजवा मनोवेगो रथः पृक्षः संपर्चनीय इषिध एषणीयाः पूर्वीर्बह्वीरिषोऽन्नानि सोमाननूपासर्जि। विसृष्टः॥

॥ अथाष्टमी॥

पुरु हि वां पुरुभुजा देष्णं धेनुं न इषं पिन्वतमसंक्राः।

स्तुतश्च वां माध्वी सुष्टुतिश्च रसाश्च ये वामनु रातिमग्मन्॥ ८

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

पुरु। हि। वां। पुरुऽभुजा। देष्णं। धेनुं। नः। इषं।

पिन्वतं। असंक्रां।

स्तुतः। च। वां। माध्वी इति। सुऽस्तुतिः। च। रसाः।

च। ये। वां। अनु। रातिं। अग्मन्॥ ८

पुरुभुजा हे पूर्णभुजौ बहुपालकौ वां युवयोर्देष्णं दातव्यं धनं पुरु बहु हि भवति। अतः कारणान्नोऽस्मभ्यं धेनुं प्रीणयित्रीमसक्रां सक्तोऽन्यत्रासंक्रमणीं। असक्रामसंक्रमणीं। नि० ६. २९.। इति यास्केनोक्तत्वात्। इषमन्नं पिन्वतं। प्रयच्छतं। यद्वेषमेनमणीयां धेनुमित्यन्वयः। किंच वां स्तुतः। स्तुवंतीति स्तुतः स्तोतारः। संति। माध्वी मदयितारावश्विनौ सुष्टुतिः शोभना स्तुतिश्च स्तोतृषु भवति। रसाः सोमरसाश्च संति। ये रसा वां युवयो रातिं दानमनूद्दिश्याग्मन् देवयजनं प्राप्ताः। अयं भावः। सुष्टुतिं श्रुत्वा देवयजनं प्राप्तान् सोमरसान् पीत्वा स्तोतृभ्यः कामान्प्रयच्छतमिति शेषः॥

॥ अथ नवमी॥

उत मे ऋज्रे पुरयस्य रघ्वी सुमीळ्हे शतं पेरुके च पक्वा।

शांडो दाद्धिरणिनः स्मद्दिष्टीन्दश वशासो अभिषाचं ऋष्वान्॥ ९

उत। मे। ऋज्रे इति। पुरयस्य। रघ्वी इति। सुऽमीळ्हे।

शतं। पेरुके। च। पक्वा।

शांडः। दात्। हिरणिनः। स्मत्ऽदिष्टीन्। दश। वशासः।

अभिऽसाचः। ऋष्वान्। ९

अपि च पुरयस्य पुरयनामकस्य संभूते ऋज्रे ऋजुगमने रघ्वी क्षिप्रगामिन्यौ वडवे मेऽश्विनोः स्तुतिं कुर्वतो ममाभूतां। सुमीळ्हे राज्ञि विद्यमाने मतः शतं गावो ममाभूवन्। पेरुके राज्ञि विद्यमानानि पक्वा पक्वान्यन्नानि ममासन्। शांडश्च राजा हिरणिनो हिरण्मयवतः स्मद्दिष्टीन् प्रशस्तदर्शनाननुघानश्वान्वा दश दशसंख्या-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

काम्यमानोऽस्तुत्यानभिधाय यत्नू वाजभिभावुकान्स्वान्दयनीयान्पुरुपान्श्विनोः स्तोतृभ्यो दात्। ददातु॥

॥ अथ दशमी ॥

सं वां शता नासत्या सहस्राश्वानां पुरुपंथा गिरे दात्।

भरद्वाजाय वीर नू गिरे दाद्धता रक्षांसि पुरुदंससा स्युः॥ १०

सं। वां। शता। नासत्या। सहस्रा। अश्वानां। पुरुऽपंथाः।

गिरे। दात्।

भरत्ऽवाजाय। वीर। नु। गिरे। दात्। हता। रक्षांसि।

पुरुऽदंससा। स्युरिति स्युः॥ १०

नासत्या हे अश्विनौ वां युवयोर्गिरे। गृणातीति गीः स्तोता। तस्मा अश्वानां शता शतानि सहस्रा सहस्राणि पुरुपंथाः पुरुपंथा नाम राजा संदात्। संददाति। वीर हे वीरावश्विनौ॥ द्विवचनस्य लुक्॥ गिरे युवयोः स्तोत्रे भरद्वाजाय मह्यमपि नु क्षिप्रं दात्। ददातु। किंच हे पुरुदंससा बहुकर्माणावश्विनौ युवयोरनुग्रहाद्रक्षांसि हता हतानि स्युः॥

॥ अथैकादशी ॥

आ वां सुम्ने वरिमन्त्सूरिभिः ष्यां॥ ११

आ। वां। सुम्ने। वरिमन्। सूरिऽभिः। स्यां॥ ११

हे अश्विनौ वरिमन्विस्तृते सुम्ने वां युवाभ्यां दत्ते सुखावहे धने। अत्रायं सुम्नमिति सुखनामसु पाठात्। सूरिभिर्विद्वद्भिः सह आ समंतात्स्यां। भवेयं॥

॥ इति पंचमस्य चतुर्थे चतुर्थो वर्गः॥

° उदु श्रिय इति षड्वं तृतीयं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमश्विदेवताकं। अनुक्रम्यते च। उदु श्रिये षड् वसुं त्विति॥ प्रातरनुवाक उपस्थे क्रतौ त्रैष्टुभे छंदस्याश्विनशस्त्रे चैतदादिके द्वे सूक्ते। सूत्र्यते हि। उदु श्रिय इति सूक्ते। आ० ४, १४,। इति॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तत्र प्रथमा ॥

उदु श्रिय उषसो रोचमाना अस्थुरपां नोर्मयो रुशन्तः ।

कृणोति विश्वा सुपथा सुगान्यभूदु वस्वी दक्षिणा मघोनी ॥ १

उत् । ऊं इति । श्रिये । उषसः । रोचमानाः । अस्थुः ।

अपां । न । ऊर्मयः । रुशन्तः ।

कृणोति । विश्वा । सुऽपथा । सुऽगानि । अभूत् । ऊं इति ।

वस्वी । दक्षिणा । मघोनी ॥ १

रोचमाना दीप्यमाना रुशन्त शुक्लवर्णाः ॥ रुशदिति वर्णनामेति यास्कः ॥ उषसः श्रिये जगतः शोभायै जगद्वासं नापामूर्मयो न उदकसंबंधिनस्तरंगा इवोदस्थुः । उत्तिष्ठंति । अनंतरमेकवचिगमः । उषा विश्वा विश्वानि स्थानानि सुपथा सुमार्गाणि सुगानि सुखेन गम्यानि कृणोति । करोति । अपि च मघोनी धनवत्युषा वस्वी प्रशस्ता दक्षिणा समर्धयित्री चाभूत् ॥

॥ अथ द्वितीया ॥

भद्रा ददृक्ष उर्विया वि भास्युत्ते शोचिर्भानवो द्यामपप्तन् ।

आविर्वक्षः कृणुषे शुम्भमानोषो देवि रोचमाना महोभिः ॥ २

भद्रा । ददृक्षे । उर्विया । वि । भासि । उत् । ते । शोचिः ।

भानवः । द्यां । अपप्तन् ।

आविः । वक्षः । कृणुषे । शुम्भमाना । उषः । देवि ।

रोचमाना । महःऽभिः ॥ २

हे उषा देवि भद्रा कल्याणी ददृक्षे । दृश्यसे । उर्विया विस्तीर्णा च विभासि । ते तव शोचिः शोचिषः । नश्च लुक् ॥ दीप्यमाना भानवो रश्मयो द्यामंतरिक्ष-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मुदपप्तन्। उत्पतन्ति। किंच हे उषो देवि वक्षोभिस्तेजोभिः शुंभमाना शोभमाना रोचमाना दीप्यमाना वचस्त्वदीयं रूपमाविष्कृणुषे। प्रकटीकरोषि॥

॥ अथ तृतीया॥

वहंति सीमरुणासो रुशंतो गावः सुभगामुर्विया प्रथानां।
अपेजते शूरो अस्तेव शत्रून्बाधते तमो अजिरो न वोड़्हा॥३

वहंति। सीं। अरुणासः। रुशंतः। गावः। सुऽभगां।
उर्विया। प्रथानां।
अप। एजते। शूरः। अस्ताऽइव। शत्रून्। बाधते। तमः।
अजिरः। न। वोड़्हा॥३

अरुणासो लोहितवर्णा रुशंतो दीप्यमाना गावो रश्मयः॥ किरणा गाव इति रश्मिनामसु पाठात्॥ सुभगामुर्वियोर्वी विस्तीर्णां प्रथानां प्रथमानं सीमेनामुषो-देवतां वहंति। सेयमुषोदेवता शूरोऽस्तेव योरः क्षेप्तेव शत्रून् तमोऽपेजते। अप-गमयति। वोड़्हा सेनाया अजिरो न क्षिप्रगामी शत्रून्यथा बाधते तथा तमांसि बाधते च॥

॥ अथ चतुर्थी॥

सुगोत ते सुपथा पर्वतेष्ववाते अपस्तरसि स्वभानो
सा न आ वह पृथुयामन्नृष्वे रयिं दिवो दुहितरिषयध्यै॥४

सुऽगा। उत। ते। सुऽपथा। पर्वतेषु। अवाते। अपः।
तरसि। स्वभानो इति स्वऽभानो।
सा। नः। आ। वह। पृथुऽयामन्। ऋष्वे। रयिं। दिवः।
दुहितः। इषयध्यै॥४

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे उषो देवि पर्वतेषूत दुर्गेष्वप्यगाते गमनसाधनरहिते देशे सुपथा सुपथानि मार्गाणि सुगा सुगानि सुखेन गम्यानि ते तव भवंति। स्वभानो हे स्वप्रकाशेऽपोऽंतरिक्षमाकाशं ॥ आप इत्यंतरिक्षनामसु पाठात् ॥ सा ऋद्धिकीरपो वा तरसि। पृथुयामन् पृथुरथ ऋष्वे दर्शनीये दिवो दुहितरंतरिक्षसुते हे उषो देवि सा त्वमिष- यध्य। एषणीयं धनं नोऽस्मभ्यमावह ॥

॥ अथ पंचमी ॥

सा वह योक्षभिरवातोषो वरं वहसि जोषमनु ।

त्वं दिवो दुहितर्या ह देवी पूर्वहूतौ मंहना दर्शता भूः ॥ ५

सा । आ । वह । या । उक्षऽभिः । अवाता । उषः । वरं ।

वहसि । जोषं । अनु ।

त्वं । दिवः । दुहितः । या । ह । देवी । पूर्वऽहूतौ ।

मंहना । दर्शता । भूः ॥ ५

हे उषः सा त्वं वरं धनं अस्मभ्यमावह । या त्वमवाताप्रतिगता जोषं प्रीतिमनूक्षभिरनडुद्भिरश्वैर्वा स्तोतृभ्यो वरं वहसि। किंच हे दिवो दुहितरंतरिक्षसुते या त्वं देवी द्योतमाना पूर्वहूतौ प्रथमाह्वाने प्रातरनुवाके मंहना पूजनीया भवसि सा त्वं दर्शता दर्शनीयाभूरिति योजना। या दर्शता भूरित्यन्वये यच्छब्देन सामानाधिकरण्याद् भूरित्यस्य निघातो न स्यात् ॥

॥ अथ षष्ठी ॥

उत्ते वयश्चिद्वसतेरपप्तन्नरश्च ये पितुभाजो व्युष्टौ ।

अमा सते वहसि भूरि वाममुषो देवि दाशुषे मर्त्याय ॥ ६

उत् । ते । वयः । चित् । वसतेः । अपप्तन् । नरः । च । ये ।

पितुऽभाजः । विऽउष्टौ ।

अमा । सते । वहसि । भूरि । वामं । उषः । देवि । दाशुषे ।

मर्त्याय ॥ ६

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

हे उषो देवि ते तव व्युष्टौ सत्यां वयश्चित्पक्षिणोऽपि पतत्रिणो निवासस्थानादुदपप्तन्। उत्पतंति। ये पितुभाजो हविषां संभक्तारोऽन्नस्योपार्जका वा॥ पितुरित्यन्ननामसु पाठात्॥ नरश्च तेऽपि चोत्पतंति। किंच हे उषो देवि त्वममा समीपे सते वर्तमानाय दाशुषे हविषां प्रदात्रे मर्त्याय भूरि प्रभूतं वामं धनं वहसि॥

॥ इति पंचमस्य प्रथमे पंचमो वर्गः॥

एषां स्येति षडृचं चतुर्थं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभं। अनुक्रम्यते च। एषा स्येति। उषस्यं त्विति पूर्वसूक्त उक्तत्वादिदमप्युषोदेवताकं॥ प्रातरनुवाकाश्विन-शस्त्रयोरुक्तो विनियोगः॥

॥ तत्र प्रथमा।

एषा स्या नो दुहिता दिवोजाः क्षितीरुच्छंती मानुषीरजीगः।

या भानुना रुशता राम्यास्वज्ञायि तिरस्तमसश्चिदक्तून्॥ १

एषा। स्या। नः। दुहिता। दिवऽजाः। क्षितीः। उच्छंती।

मानुषीः। अजीगरिति।

या। भानुना। रुशता। राम्यासु। अज्ञायि। तिरः।

तमसः। चित्। अक्तून्॥

एषा स्या सा दिवोजा दिवो जाता अत एव दुहिता दिवः पुत्र्युषा नोऽस्मदर्थं-उच्छंती तमांसि वर्जयंती क्षितीः प्रजा मानुषीरजीगः। उद्गिरति॥ जीरातिर्गिरति-कर्मा वेति यास्कः॥ प्रकाशयतीति यावत्। या रुशता दीप्यमानेन भानुना युक्ता राम्यासु याम्यासु रात्रिषु॥ रेफयकारयोर्व्यत्ययः॥ अक्तूनंचनादिंतजांसि तमसश्चित् तमांसि च तिरस्तिरस्कुर्वंत्यज्ञायि दृश्यते॥

॥ अथ द्वितीया॥

वि तद्ययुररुणयुग्भिरश्वैश्चित्रं भांत्युषसश्चंद्ररथाः।

अग्रं यज्ञस्य बृहतो नयंतीर्वि ता बाधंते तम ऊर्म्यायाः॥ २

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

वि । तत् । ययुः । अरुणयुक्ऽभिः । अश्वैः । चित्रं । भांति ।
उषसः । चंद्रऽरथाः ।

अग्रं । यज्ञस्य । बृहतः । नयंतीः । वि । ताः । बाधंते ।
तमः । ऊर्म्यायाः ॥ २

चंद्ररथाः कांतिरथाः ॥ चंद्रचदतेः कांतिकर्मणः । नि० ११. ५. । इति यास्कः ॥ ता उषसस्तदानीं प्रातःकाले बृहतो प्रौढस्य यज्ञस्याग्रं मुखं नयंतीः संपादयंत्योऽरुणयुग्भिररुणवर्णयुक्तैरश्वैर्वि ययुः । विस्तीर्णं यांति । चित्रं यथा भवति तथा भांति च । ऊर्म्याया रात्रेः ॥ ऊर्म्या रात्रिनामसु पाठात् ॥ तमो वि बाधंते । सम्यगपनयंति च ।

। अथ तृतीया ।

श्रवो वाजमिषमूर्जं वहंतीर्नि दाशुष उषसो मर्त्याय ।
मघोनीर्वीरवत्पत्यमाना अवो धात विधते रत्नमद्य ॥ ३

श्रवः । वाजं । इषं । ऊर्जं । वहंतीः । नि । दाशुषे । उषसः ।
मर्त्याय ।

मघोनीः । वीरऽवत् । पत्यमानाः । अवः । धात । विधते ।
रत्नं । अद्य ॥ ३

हे उषसो दाशुषे हविषां दात्रे मर्त्याय श्रवः कीर्तिं वाजं बलमिषमन्नमूर्जं रसं च वहंतीर्वहंत्यो यूयं मघोनीर्धनवत्यः पत्यमानाः गच्छंत्योऽद्य विधते परिचरते मह्यं वीरवत्पुत्रपौत्रादिसहितमवोऽन्नं ॥ विनमव इत्यन्ननामसु पाठात् रत्नं धनं च ॥ श्रात्रं रत्नमिति धननामसु पाठात् ॥ निधात । नितरां धत्त ॥

। अथ चतुर्थी ।

इदा हि वो विधते रत्नमस्तीदा वीराय दाशुष उषासः ।
इदा विप्राय जरते यदुक्था नि ष्म मावते वहथा पुरा चित् ॥ ४

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

इदा। हि। वः। विधते। रत्नं। अस्ति। इदा। वीराय।
दाशुषे। उषसः।
इदा। विप्राय। जरते। यत्। उक्था। नि॥ स्म। माऽवते।
वहथ। पुरा। चित्॥ ४

हे उषस इदा इदानीमेव वो युष्माकं विधते परिचरते दातुं रत्नं धनमस्ति। इदा इदानीमेव वीराय प्रेरयित्रे हविषां दाशुषे यजमानाय दातुं यो रत्नमस्ति। इदा इदानीमेव विप्राय प्राज्ञाय जरते स्तुवते दातुं यो रत्नमस्ति। यच्चास्मिन्विप्र उक्थोक्थनामकानि स्तोत्राणि विद्यंते मावते मत्सदृशाय यजमानाय तद्रत्नं वहथो। पुरा चित् पुरापि रत्नं मह्यं दत्तं॥

॥ अथ पंचमी॥

इदा हि त उषो अद्रिसानो गोत्रा गवामंगिरसो गृणंति।
व्य१र्केण विभिदुर्ब्रह्मणा च सत्या नृणामभवद्देवहूतिः॥ ५

इदा। हि। ते। उषः। अद्रिसानो इत्यद्रिऽसानो। गोत्रा।
गवां। अंगिरसः। गृणंति।
वि। अर्केण। विभिदुः। ब्रह्मणा। च। सत्या। नृणां।
अभवत्। देवऽहूतिः॥ ५

हे उषोऽद्रिसानो आदृतसानो ते तव प्रसादादिदा हि इदानीमेव गवां गोत्रा संघानंगिरसो गृणंति। उद्गृणंति। तथा च निगमांतरं। गवां गोत्रमुदसृजो यदंगिरः। ऋग्वे० २, २३, १८, । इति। अर्केणार्चनीयेन ब्रह्मणा स्तोत्रेण विविभिदुः। तमांसि विदारयंति च। नृणां नेतॄणां तेषामंगिरसां देवहूतिर्देवविषया स्तुतिः सत्या सत्यफलाभवत्॥

॥ अथ षष्ठी॥

उच्छा दिवो दुहितः प्रत्नवन्नो भरद्वाजवद्विधते मघोनि।
सुवीरं रयिं गृणते रिरीह्युरुगायमधि धेहि श्रवो नः॥ ६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उच्छ। दिवः। दुहितरिति। प्रत्नऽवत्। नः। भरद्वाजऽवत्।

विधते। मघोनि।

सुऽवीरं। रयिं। गृणते। रिरीहि। उरुऽगायं। अधि।

धेहि। श्रवः। नः॥६

हे दिवो दुहितरुषः प्रत्नवत्पुरातनेभ्य इव नोऽस्मदर्थमुच्छ। तमांसि वर्जय। हे मघोनि भरद्वाजवद्विधते परिचरते। भरद्वाजवदिति वचनादन्योऽप्यस्ति भरद्वाजः। तथा च ब्राह्मणं। प्राणो वै भरद्वाज इति। गृणते स्तुतिं कुर्वते मह्यं सुवीरं कल्याणपुत्रपौत्रादियुक्तं रयिं धनं रिरीहि। देहि। किंच नोऽस्मभ्यमुरुगायं बहुभिर्गंतव्यं श्रवोऽन्नमधि धेहि। अधिकं प्रयच्छ॥

॥ इति पंचमस्य प्रथमे षष्ठो वर्गः॥

वपुर्न्विति एकादशर्चं पंचमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभं मारुतं। तथा चानुक्रम्यते। वपुर्न्वेकादश मारुतमिति॥ व्यूळ्हे दशरात्रे पंचमेऽहन्याग्निमारुत इदं सूक्तं मारुतनिविद्धानं। सूत्रितं च। ऋविष्मांतं वपुर्नु तत्। आ० ८.८.। इति॥ वैश्वदेवे पर्वणि मारुतसप्तकपालस्य प्र चित्रमर्कमिति याज्या। प्र चित्रमर्कं गृणते नवानुयाज्याः। आ० २.१६.। इति॥ एकादशिने मारुते पशौ प्र चित्रमर्कमित्येषैव याज्या। सूत्रितं च। प्र चित्रमर्कं गृणते तुरायाय इत्येकादशमा अंत्या। आ० ३.७.। इति॥

॥ तत्र प्रथमा॥

वपुर्नु तच्चिकितुषे चिदस्तु समानं नाम धेनु पत्यमानं।
मर्तेष्वन्यद्दोहसे पीपाय सकृच्छुक्रं दुदुहे पृश्निरूधः॥१

वपुः। नु। तत्। चिकितुषे। चित्। अस्तु। समानं। नाम।

धेनु। पत्यमानं।

मर्तेषु। अन्यत्। दोहसे। पीपाय। सकृत्। शुक्रं। दुदुहे।

पृश्निः। ऊधः॥१

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

तत्सर्वं समानमेकरूपं। मरुतः सर्वदा समानरूपाः। तथा च निगमांतरं अज्येष्ठासो अकनिष्ठास एते। ऋग्वे० ५. ६०. ६.। इति। नाम स्थिरायामपि नामकं धेनु प्रीणयितृ पत्यमानं सर्वदा गच्छद्बहुपुरुहूतां रूपं चिकितुषे विदुषे स्तोत्रे तु चिदस्तु। प्रादुर्भवतु। चिदिति पूरकं। किंच तद्रूपं मर्त्येषु मर्त्यलोकेऽन्यदोषधि-वनस्पत्यादिकं दोहसे कामान्दोग्धुं पीपाय। आप्याययति। किंच रुद्रमासेन निर्दं-मत्पृश्निरंतरिक्षं सकृत्संवत्सरस्य मध्ये शुक्रं शुक्लवर्णमूधः उदकं दुदुहे। क्षरति॥

॥ अथ द्वितीया ॥

ये अग्नयो न शोशुचन्निधाना द्विर्यत्त्रिर्मरुतो वावृधंत।
अरेणवो हिरण्ययास एषां साकं नृम्णैः पौंस्येभिश्च भूवन्॥ २

ये। अग्नयः। न। शोशुचन्। इधानाः। द्विः। यत् त्रिः।
मरुतः। वावृधंत।
अरेणवः। हिरण्ययासः। एषां। साकं। नृम्णैः। पौंस्येभिः।
च। भूवन्॥ २

ये मरुत इधाना अग्नयो न समिध्यमाना अग्नय इव शोशुचन् दीप्यंते। यद्ये मरुतो द्विर्द्विगुणं त्रिस्त्रिगुणं च वावृधंत इच्छानुरूपं वर्धंते॥ संहितायां दीर्घश्छांदसः॥ एषां मरुतां रथा अरेणवो रेणुरहिता हिरण्ययासो हिरण्मयालंकाराश्च भवंति। ते मरुतो नृम्णैर्धनैः पौंस्येभिर्बलैश्च साकं सार्धं भूवन्। प्रादुर्भवंति। तथा च निगमांतरं। ये पृषतीभिर्ऋष्टिभिः। ऋग्वे० १. ३७. २.। इति॥

॥ अथ तृतीया ॥

रुद्रस्य ये मीळ्हुषः संति पुत्रा यांश्चो नु दाधृविर्भरध्यै।
विदे हि माता महो मही षा सेत्पृश्निः सुभ्वे३ गर्भमाधात्॥ ३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

रुद्रस्य । ये । मीळ्हुषः । संति । पुत्राः । यान् । चो इति ।

नु । दाधृविः । भरध्यै ।

विदे । हि । माता । महः । मही । सा । सा । इत् ।

पृश्निः । सुऽभ्वे । गर्भं । आ । अधात् ॥ ३

मीळ्हुषः सेक्तू रुद्रस्य पुत्रा ये मरुतः संति दाधृविर्धारयित्री पृश्निरंतरिक्षं याश्चां नु यांश्च मरुतो नु भरध्यै भर्तुं क्षमा भवति। विदे हि सर्वज्ञाता हि महो महतां तेषां माता सा पृश्निर्मही महती। किंच सा पृश्निः सुभ्वे ब्द्यां सम्यक् भवनाय गर्भमुदकमाधात्। आदधाति ॥

॥ अथ चतुर्थी ॥

न य ईषंते जनुषोऽया न्वं१'तः संतोऽवद्यानि पुनानाः ।

निर्यद्दुह्रे शुचयोऽनु जोषमनु श्रिया तन्वमुक्षमाणाः ॥ ४

न । ये । ईषंते । जनुषः । अया । नु । अंतरिति । संतः ।

अवद्यानि । पुनानाः ।

निः । यत् । दुह्रे । शुचयः । अनु । जोषं । अनु । श्रिया ।

तन्वं । उक्षमाणा ॥ ४

ये प्रसिद्धा मरुतो जनुषो जनान् स्तोतॄन्प्रत्ययायेन गमनसाधनेन नेषंते न गच्छंति। किं तेषां रक्षणीयत्वाभावाद्गमनाभावो नेत्याह। अंतः संतः सर्वेषां हृदि वर्तमाना एवावद्यानि पापानि पुनानाः शोधयंतः। तथा च निगमांतरं। प्राणा वै मरुतः स्वापय इति। अतः सर्वप्राणिनां हृदि वर्तमानानां तेषां गमनं नाप्नोति। अध्यात्मं प्राणरूपेणावस्थानं दर्शितं भवति शोभनगामित्वं तु तेषामधिदैवतरूपेणेति द्रष्टव्यं। यद्यदा शुचयो दीप्यमाना मरुतो जोषमनु स्तोतॄणां काममनु निर्दुह्रे निर्गतं दुहंत्युदकं। तथा श्रिया दीप्त्यानुगतास्तन्वमात्मीयं शरीरं प्रकाशयंतः उक्षमाणा भूमिं सिंचंतो भवंति। यद्वा तन्वं विस्तीर्णं यथा भवति तथोक्षमाणा भूमिं सिंचंतो भवंतीत्यर्थः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ पंचमी ।

मक्षु न येषु दोहसे चिदया आ नाम धृष्णु मारुतं दधानाः।
न ये स्तौना अयासो मह्ना नू चित्सुदानुरव यासदुग्रान् ॥ ५

मक्षु। न। येषु। दोहसे। चित्। अयाः। आ। नाम।
धृष्णु। मारुतं। दधानाः।
न। ये। स्तौनाः। अयासः। मह्ना। नु। चित्। सुऽदानुः।
अव। यासत्। उग्रान् ॥ ५

येषु प्रसिद्धेषु मरुत्सु धृष्णु धर्षकं मारुतं नाम मरुत्संबन्धकं यशस्तमादधाना उच्चारयंतोऽया उपगच्छंतः स्तोतारो मक्षु क्षिप्रं दोहसे कामान्दोग्धुं क्षमा भवंति। नेति संप्रत्यर्थे। ये स्तौनाः स्तेनास्तिरोहिता वा स्तोतृधनानामपहर्तारोऽयासो गंतारो भवंति। मह्ना महत्त्वेन युक्ताश्च भवंति उग्रानुद्गूर्णान् सुदानुः शोभनहविर्दानो यजमानोऽवयासत्। अवयजते। अपगतक्रोधान् करोति। नेति संप्रत्यर्थे॥

॥ इति पंचमस्य प्रथमे सप्तमो वर्गः ॥

॥ अथ षष्ठी ।

त इदुग्राः शवसा धृष्णुषेणा उभे युजंत रोदसी सुमेके।
अध स्मैषु रोदसी स्वशोचिरामवत्सु तस्थौ न रोकः ॥ ६

ते। इत्। उग्राः। शवसा। धृष्णुऽसेनाः। उभे इति। युजंत।
रोदसी इति। सुमेके इति सुऽमेके।
अध। स्म। एषु। रोदसी। स्वऽशोचिः। आ। अमवत्ऽसु।
तस्थौ। न। रोकः ॥ ६

ते मरुत उग्रा शवसा बलेन वेगेन युक्ता धृष्णुषेणा धर्षकसेनाः सुमेके सुरूपे उभे रोदसी द्यावापृथिव्यौ युजंत। योजयंति। इच्छा पृथिवी तर्पयंतीत्यभिप्रायः।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अध वापि येषु येषु मरुत्सु रोदसी रुद्रस्य पत्नी माध्यमिका वाक् अशोचिः अदीप्ति- मंतंतेऽभवत् अवतस्थ तेषु रोको दीप्तिर्बाधको वा नातस्थौ। न तिष्ठति। न निःसरत्येवेत्यर्थः॥

॥ अथ सप्तमी ॥

अनेनो वो मरुतो यामो अस्त्वनश्वश्चिद्यमजत्यरथीः।
अनवसो अनभीशू रजस्तूर्वि रोदसी पथ्या याति साधन्॥ ७

अनेनः। वः। मरुतः। यामः। अस्तु। अनश्वः। चित्।
यं। अजति। अरथीः।
अनवसः। अनभीशुः। रजःऽतूः। वि। रोदसी इति।
पथ्याः। याति। साधन्॥ ७

हे मरुतो वो युष्माकं संबंधी यामो रथोऽनेनः पापरहितं यथा भवति तथास्तु। प्रादुर्भवतु। किंच यं याममरथीः। रथिः सारथिः। न रथिररथीः। असारथिरपि स्तोताजति प्रेरयति स रथोनश्वश्चिदश्वरहितोऽप्यनवसः पथ्यदनरहितोऽनभीशुः पाशरहितोऽपि रजस्तूरुदकस्य प्रेरकः साधन् स्तोतॄणां कामान् साधयन् रोदसी द्यावापृथिव्यौ पथ्याः पथः अंतरिक्षमार्गान् वि याति विविधं गच्छति॥

॥ अथाष्टमी ॥

नास्य वर्ता न तरुता न्वस्ति मरुतो यमवथ वाजसातौ।
तोके वा गोषु तनये यमप्सु स व्रजं दर्ता पार्ये अध द्योः॥ ८

न। अस्य। वर्ता। न। तरुता। नु। अस्ति। मरुतः। यं।
अवथ। वाजऽसातौ।
तोके। वा। गोषु। तनये। यं। अप्ऽसु। सः। व्रजं।
दर्ता। पार्ये। अध। द्योः॥ ८

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे मरुतो वाजसातौ संग्रामे यमवथ रक्षथ तस्य जनस्य हंता प्रेरको नास्ति। तस्य तरुता तु हिंसिता च नास्ति। तथापि च तोके पुत्रे तनये पौत्रे धने वा गोषु अप्सु वा निमित्तभूतेषु यमवथ स पार्ये संग्रामे द्योर्दीप्तस्यापि विजिगीषोर्वा ऊर्वमूर्जं गवां संघं दर्ता दारयिता भवति ॥

॥ अथ नवमी ॥

प्र चित्रमर्कं गृणते तुराय मारुताय स्वतवसे भरध्वं ।
ये सहांसि सहसा सहंते रेजंते अग्ने पृथिवी मखेभ्यः ॥ ९

प्र । चित्रं । अर्कं । गृणते । तुराय । मारुताय । स्वऽतवसे ।
भरध्वं ।
ये । सहांसि । सहसा । सहंते । रेजंते । अग्ने । पृथिवी ।
मखेभ्यः ॥ ९

हे अग्ने गृणते शब्दं कुर्वते स्तूयमानाय वा तुराय त्वरिताय स्वतवसे स्वभूतबलाय मारुताय मरुतां गणाय चित्रं दर्शनीयमर्कमर्चं हविः ॥ अर्क इत्यन्ननामसु पाठात् ॥ प्रभरध्वं । त्वत्सहायभूता ऋत्विजस्त्वं च सर्वे यूयं प्रभरत ॥ यथा लोके बहुष्वेककार्यकरेषु मुख्यमेकं संबोध्य यूयमेवं कुरुतेति प्रार्थना तद्वदत्रापि मुख्यमग्निमेकमेव संबोध्य प्रभरध्वमिति बहुवचनप्रयोगः ॥ ये मरुतः सहांसि शत्रूणां बलानि सहसा बलेन सहंते अभिभवंति मखेभ्यो मंहनीयेभ्यो मरुद्भ्यो भयात्पृथिवी रेजते। कंपते ॥ मारुतायेति तद्धितप्रत्ययांतर्भूतानामपि मरुतां बुद्ध्या प्रविभागात् च इति प्रत्यवमर्शः । यथा महाभाष्ये। अथ शब्दानुशासनं। केषां शब्दानामिति। यथा वा लोके। राजपुरुष इत्युक्ते कस्य राज्ञ इति ॥

॥ अथ दशमी ॥

त्विषीमंतो अध्वरस्येव दिद्युत्तृषुच्यवसो जुह्वो३ नाग्नेः ।
अर्चत्रयो धुनयो न वीरा भ्राजज्जन्मानो मरुतो अधृष्टाः ॥ १०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

त्विषिऽमंतः । अध्वरस्यऽइव । दिद्युत् । तृषुऽच्यवसः ।

जुह्वः । न । अग्नेः ।

अर्चत्रयः । धुनयः । न । वीराः । भ्राजत्ऽजन्मानः । मरुतः ।

अधृष्टाः ॥ १०

मरुतोऽध्वरस्येव यज्ञस्येव दिद्युत् द्योतमानास्तृषुच्यवसः क्षिप्रगमना अग्नेर्जुह्वो न रश्मय इव त्विषीमंतो दीप्तिमंतोऽर्चत्रयोऽर्चनीया धुनयो न सपत्नान्कंपयंत इव वीराः शूरा भ्राजज्जन्मानो दीप्तशरीरा अधृष्टाः परैरनभिभूताश्च भवंति ॥

॥ अथैकादशी ॥

तं वृधंतं मारुतं भ्राजदृष्टिं रुद्रस्य सूनुं हवसा विवासे ।

दिवः शर्धाय शुचयो मनीषा गिरयो नाप उग्रा अस्पृध्रन् ॥ ११

तं । वृधंतं । मारुतं । भ्राजत्ऽऋष्टिं । रुद्रस्य । सूनुं ।

हवसा । आ । विवासे ।

दिवः । शर्धाय । शुचयः । मनीषाः । गिरयः । न । आपः ।

उग्राः । अस्पृध्रन् ॥ ११

तं प्रसिद्धं वृधंतं वर्धमानं भ्राजदृष्टिं भ्राजमानर्ष्टिं रुद्रस्य सूनुं पुत्रं मारुतं मरुद्रूपं हवसा स्तोत्रेणाविवासे । परिचरामि । किंच दिवः स्तोतुः शुचयो निर्मला मनीषाः स्तुतय उग्रा उद्गूर्णाः शर्धाय मारुताय बलाय ॥ शर्धः शर्ध इति बलनामसु पाठात् ॥ आप आप्नुवंतो गिरयो न मेघा इव ॥ गिरिर्व्रज इति मेघनामसु पाठात् ॥ अस्पृध्रन् । अस्पर्धंत ॥

॥ इति पंचमस्य प्रथमेऽष्टमो वर्गः ॥

विश्वेषां च इत्येकादशर्चं षष्ठं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभं मैत्रावरुणं । तथा चानुक्रम्यते । विश्वेषां मैत्रावरुणमिति ॥ सूक्तविनियोगो लैंगिकः । मैत्रावरुणे पशौ आ यातं मित्रावरुणेति पशुपुरोडाशस्यानुवाक्या । सूत्रितं च । आ यातं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मित्रावरुणा युवमस्या नो मित्रावरुणा चव्युष्टिं । आ० ३. ८. । इति ॥ व्यूढ़े दशरात्रे सप्तमेऽहनि प्रउगशस्त्रे प्र यज्ञमिति मैत्रावरुणस्तृतीयस्तृचः । सूत्रितं च । प्र यद्वां मित्रावरुणा स्पूर्धंता गोमता नासत्या रथेन । आ० ८. ६. । इति ॥

॥ तत्र प्रथमा ॥

विश्वेषां वः सतां ज्येष्ठतमा गीर्भिर्मित्रावरुणा वावृधध्यै ।

सं या रश्मेव यमतुर्यमिष्ठा द्वा जनाँ असमा बाहुभिः स्वैः ॥ १

विश्वेषां । वः । सतां । ज्येष्ठऽतमा । गीःऽभिः ।

मित्रावरुणा । ववृधध्यै ।

सं । या । रश्माऽइव । यमतुः । यमिष्ठा । द्वा । जनान् ।

असमा । बाहुऽभिः । स्वैः ॥ १

विश्वेषां सतां मध्ये ज्येष्ठतमा ज्येष्ठतमौ मित्रावरुणौ वो वां गीर्भिः स्तुतिभिर्वं-वृधध्यै वर्धयितुं प्रवृत्तोऽस्मि । या यौ द्वा द्वौ अविताथसमा विषमौ । त्रिरश्रिं हंति चतुरश्रिरुग्रः । ऋग्वे० १. १५२. २. । इति निगमांतरेणासाम्यं दर्शितं । यमिष्ठा यंतृतमौ स्वैरात्मीयैर्बाहुभी रश्मेव रश्मिनेवाश्वान् जनान् संयमतुः संयच्छतः । बाहुभिरिति बहुवचनं पूजार्थं ॥

॥ अथ द्वितया ॥

इयं मद्वां प्र स्तृणीते मनीषोप प्रिया नमसा बर्हिरच्छं ।

यंतं नो मित्रावरुणावधृष्टं छर्दिर्यद्वां वरूथ्यं सुदानू ॥ २

इयं । मत् । वां । प्र । स्तृणीते । मनीषा । उप । प्रिया ।

नमसा । बर्हिः । अच्छं ।

यंतं । नः । मित्रावरुणौ । अधृष्टं । छर्दिः । यत् । वां ।

वरूथ्यं । सुदानू इति सुऽदानू ॥ २

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

हे मित्रावरुणौ वां युवां मत् मदीयं मनीषा स्तुतिः प्रस्तृणीते । प्रच्छादयति । प्रिया हे प्रियौ युवां नमसान्नेन हविषा सहोपगच्छति च । युवयोर्बर्हिर्यज्ञमच्छाभिगच्छति च । हे मित्रावरुणौ नोऽस्मभ्यमष्टष्टमनभिभूतं वरूथं गृहं यंतं । प्रयच्छतं । हे सुदानू शोभनदानौ वां युवयोः संबंधि युवाभ्यां देयं यद्वरूथं वरूथ्यं शीतवातातपानां वारयितृ भवति ॥

॥ अथ तृतीया ॥

आ यातं मित्रावरुणा सुशस्त्युप प्रिया नमसा हूयमाना ।

सं यावप्नःस्थो अपसेव जनाञ्छ्रुधीयतश्चिद्यतथो महित्वा ॥ ३

आ । यातं । मित्रावरुणा । सुऽशस्ति । उप । प्रिया ।

नमसा । हूयमाना ।

सं । यौ । अप्नःऽस्थः । अपसाऽइव । जनान् । श्रुधिऽयतः ।

चित् । यतथः । महिऽत्वा । ३

हे मित्रावरुणौ सुशस्ति शोभनशंसनं नमसान्नेन हविषा स्तोत्रेण वा हूयमाना हूयमानौ प्रिया विश्वस्य प्रियावुपायातं । उपागच्छतं । यौ महित्वा महत्त्वेन युक्तौ युवां श्रुधीयतः श्रुधिमर्चं यशो पालन इच्छतो जनान् अप्नःस्थः कर्मण्यधिष्ठितः पुरुषः ॥ अप अप्न इति कर्मनामसु पाठात् ॥ अपसेव कर्मणेव संयतथः संगच्छथः ॥

। अथ चतुर्थी ।

अश्वा न या वाजिना पूतबंधू ऋता यद्गर्भमदितिर्भरध्यै ।

प्र या महि महांता जायमाना घोरा मर्ताय रिपवे

नि दीधः ॥ ४

अश्वा । न । या । वाजिना । पूतबंधू इति पूतऽबंधू । ऋता ।

यत् । गर्भं । अदितिः । भरध्यै ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्र। या। महि। महान्ता। जायमाना। घोरा। मर्ताय।

रिपवे। नि। दीधरिति दीधः ॥ ४

या यावश्वा नाश्वाविव वाजिना वाजिनौ बलिनौ पूतबंधू पूतस्तोत्रावृता सत्यौ च। यद् यौ गर्भं गर्भभूतावदितिर्देवी भरध्यै बभार। किंच या यौ जायमाना जायमानावेव मंहि महान्तौ महान्ता महत्तरौ प्रभूतौ मित्रावरुणौ मर्ताय मर्त्याय रिपवे हिंसकाय घोरा घोरौ घातकौ निदीधः निदधारादितिः स्वोदरे ॥

॥ अथ पंचमी ॥

विश्वे यद्वां मंहना मंदमानाः क्षत्रं देवासो अदधुः सजोषाः ।

परि यद्भूथो रोदसी चिदुर्वी संति स्पशो अदब्धासो अमूराः ॥ ५

विश्वे। यत्। वां। मंहना। मंदमानाः। क्षत्रं। देवासः।

अदधुः। सऽजोषाः।

परि। यत्। भूथः। रोदसी इति। चित्। उर्वी इति।

संति। स्पशः। अदब्धासः। अमूराः ॥ ५

विश्वे सर्वे देवासो देवाः सजोषाः परस्परं प्रीतियुक्ता यद्यौ वां युवां मंहना महत्त्वेन मंदमानाः स्तुवंतः क्षत्रं बलमदधुः धत्तवंतः। किंच यद्यौ युवामुर्वी विस्तीर्णे रोदसी द्यावापृथिव्यौ परिभूथः परिभवथः तयोर्युवयोरदब्धासोऽहिंसिता अमूरा अमूढाः स्पशो रश्मयश्चरा वा संति ॥

॥ इति पंचमस्य प्रथमे नवमो वर्गः ॥

॥ अथ षष्ठी ॥

ता हि क्षत्रं धारयेथे अनु द्यून्दृंहेथे सानुमुपमादिव द्योः ।

दृळ्हो नक्षत्र उत विश्वदेवो भूमिमातान्द्यां धासिनायोः ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

ता। हि। क्षत्रं। धारयेथे इति। अनु। द्यून्। दृंहेथे इति।

सानुं। उपमात्ऽइव। द्योः।

दृळ्हः। नक्षत्रः। उत। विश्वऽदेवः। भूमिं। आ। अतान्।

द्यां। धासिना। आयोः॥ ६

ता तौ मित्रावरुणौ युवामनु द्यून् दिवसे दिवसे क्षत्रं बलं धारयेथे हि। द्योरंतरिक्षस्य सानुं समुच्छ्रितप्रदेशं मेघं सूर्यं वा दृंहेथे। दृढीकुरुतं। उपमादिव। उपमीयते प्रक्षिप्यंत इत्युपमात्स्थूणा। सा यथा वंशं धारयति तद्वदित्यर्थः। दृळ्हो युवाभ्यां दृढीकृतश्च मेघो नक्षत्रोऽतरिक्षं व्याप्नुवान उतापि च विश्वदेवः सूर्यो भूमिं द्यां दिवं चायोर्मनुष्यस्य॥ आयव इति मनुष्यनामसु पाठात्॥ धासिनान्नेन हविषा॥ धासिरित्यन्ननामसु पाठात्॥ आप्यायितः सन् आतान्। आतनोति युवाभ्यां दृढीकृत एव॥

॥ अथ सप्तमी॥

ता विप्रं धैथे जठरं पृणध्या आ यत्सद्म सभृतयः पृणंति।

न मृष्यंते युवतयोऽवाता वि यत्पयो विश्वजिन्वा भरंते॥ ७

ता। विप्रं। धैथे इति। जठरं। पृणध्यै। आ। यत्।

सद्म। सऽभृतयः। पृणंति।

न। मृष्यंते। युवतयः। अवाताः। वि। यत्। पयः।

विश्वऽजिन्वा। भरंते॥ ७

ता तौ मित्रावरुणौ युवां विप्रं प्राज्ञं यजमानं॥ विप्रो विप्र इति मेधाविनामसु पाठात्॥ धैथे धारयथो जठरमुदरं पृणध्यै सोमेन पूरयितुं। यद्यदा सभृतयः सह भ्रियमाणा ऋत्विजः सद्म यज्ञसदनमापृणंति आपूरयंति। विश्वजिन्वा हे विश्वजिन्वानौ यद्यदा पयो जलं अवकाशं प्रक्षिप्तं तदा युवतयो नद्यो दिशो वा न मृष्यंते। रजसा नाभिभूयंते। अवाता अनुपक्षीणा वि भरंते। विभूतिं धारयंति॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथाष्टमी ॥

ता जिह्वया सदमेदं सुमेधा आ यद्वां सत्यो अरतिर्ऋते भूत्।

तद्वां महित्वं घृतान्नावस्तु युवं दाशुषे वि चयिष्टमंहः ॥ ८

ता। जिह्वया। सदं। आ। इदं। सुऽमेधाः। आ। यत्।

वां। सत्यः। अरतिः। ऋते। भूत्।

तत्। वां। महिऽत्वं। घृतऽअन्नौ। अस्तु। युवं। दाशुषे।

वि। चयिष्टं। अंहः ॥ ८

ता तौ मित्रावरुणौ युवां सुमेधाः प्राज्ञो जिह्वया वाचा सदं सर्वदेदं जगदा याचते। आ इत्युपसर्गदर्शनाद्योग्यक्रियाध्याहारादायाचत इत्याध्याह्रियते। पुंस्त्वा-स्वपि जगतस्य प्रकृतत्वात् दुष्टो विपरिणतेनार्थं जगदिदंशब्देन परामृश्यते। यद्यदा वां युवयोररतिरभिगंता ऋते यज्ञे सत्यो नाथारहित आभूत् आभवति हे घृतान्नौ तन्महित्वमपेक्षितप्रदातृत्वलक्षणं वां युवयोरस्तु। किंच युवं युवां दाशुषे दाश्वुषो यजमानस्य ॥ षष्ठ्यर्थे चतुर्थी ॥ अंहः पापं विचयिष्टं। विनाशयतमित्यर्थः ॥

॥ अथ नवमी ॥

प्र यद्वां मित्रावरुणा स्पूर्धन्प्रिया धाम युवधिता मिनंति।

न ये देवास ओहसा न मर्ता अयज्ञसाचो अप्यो न पुत्राः ॥ ९

प्र। यत्। वां। मित्रावरुणा। स्पूर्धन्। प्रिया। धाम।

युवऽधिता। मिनंति।

न। ये। देवासः। ओहसा। न। मर्ताः। अयज्ञऽसाचः।

अप्यः। न। पुत्राः ॥ ९

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे मित्रावरुणौ वां युवयोः प्रिया प्रियाणि धाम धामानि कर्माणि युष्मिता युवाभ्यां मिहितानि यद्योऽयजंतो जनाः स्पृधं स्पर्धमानाः प्रमिनंति हिंसंति। ये च देवासो देवा धीऽहसा यज्ञसाधनेन स्तोत्रेण न युज्यंते । मर्ता मनुष्याधीऽहसा न युज्यंते। ये चाध्यः। अपः कर्म। तद्वंतोऽयज्ञसाचो न यज्ञयुक्ताः। वृथाकर्माणि कुर्वंत इत्यर्थः। ये च न पुत्राः। दर्पंतीति पुत्राः। न पुत्रा अदर्पंत इत्यर्थः। तान् सर्वान्विचयिष्टमित्यनुषज्यते ॥

॥ अथ दशमी ॥

वि यद्वाचं॑ कीस्तासो॒ भर॑न्ते॒ शंस॑न्ति॒ के चि॑न्नि॒विदो॑ मना॒नाः ।
आद्वां॑ ब्रवाम स॒त्यान्यु॒क्था नकि॑र्दे॒वेभि॑र्यतथो महि॒त्वा ॥ १०

वि । यत् । वाच॑म् । की॒स्तासः॑ । भर॑न्ते । शंस॑न्ति । के । चि॒त् ।
नि॒ऽविदः॑ । म॒ना॒नाः ।
आत् । वा॒म् । ब्र॒वा॒म॒ । स॒त्यानि॑ । उ॒क्था । नकिः॑ । दे॒वेभिः॑ ।
य॒त॒थः॒ । म॒हि॒ऽत्वा ॥ १०

यद्यदा कीस्तासो मेधाविन उद्गातारः ॥ उशिजः कीस्तास इति मेधाविनामसु पाठात् ॥ वाचं स्तुतिं वि भरंते पृथक् उच्चारयंति तदा केचिद्वसूधा मनाना अभ्यादीन् स्तुवंतो निविदः शंसंति। आत्तथा सति वां युवाभ्यां सत्यान्युक्थानि स्तोत्राणि वयं ब्रवाम। महित्वा महत्त्वेन देवेभिरन्यैर्देवैः सह नकिर्यतथः। न गच्छथः ॥

॥ अथैकादशी ॥

अ॒वोरि॒त्था वां॑ छ॒र्दिषो॑ अ॒भिष्टौ॑ यु॒वोर्मि॑त्रावरुणा॒वस्कृ॑धोयु ।
अनु॒ यद्गावः॑ स्फु॒रान्नृ॑जि॒प्यं धृ॒ष्णुं यद्रणे॒ वृष॑णं यु॒नज॑न् ॥ ११

अ॒वोः । इ॒त्था । वा॒म् । छ॒र्दिषः॑ । अ॒भिष्टौ॑ । यु॒वोः ।
मि॒त्रा॒व॒रु॒णौ॒ । अस्कृ॑धोयु ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अनु। यत्। गावः। स्फुरान्। ऋजिप्यं। धृष्णुं। यत्।

रणे। वृषणं। युनजन् ॥ ११

हे मित्रावरुणावनयोरेतयोर्वा युवयोरभिष्टावभिगमने प्रदिवो महाय सखाय या ॥ चतुर्थ्यर्थे षष्ठी ॥ युवामभिगतेषु स्तोतृषु युवोर्युवयोः संबंधि युवाभ्यां देयं सद्म छादिकमस्तृभोऽव्यविच्छिन्नं भवति। तथा च यास्कः। अस्तृभोऽयुरसध्वायुः। अध्विति सुखनाम निरुक्तं भवति। नि० ६. २.। इति। इत्था सत्यमेव। कदा मित्रावरुणयोरभिगमनमित्यत आह। यद्यदा गावः स्तुतयोऽनुस्फुरान् अनुस्फुरेयुः। यदा च ऋजिप्यमृजुगामिनं धृष्णुं शत्रूणां धर्षकं वृषणं कामानां वर्षितारं सोमं रणे रमणे यज्ञे युनजन् यजमाना युंज्युः ॥

॥ इति पंचमस्य प्रथमे दशमो वर्गः ॥

श्रुष्टी वामित्येकादशर्चं सप्तमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रावरुणं। तथा चानुक्रम्यते। श्रुष्टी वामैंद्रावरुणमुपांत्ये जगत्याविति। प्र सम्राज इंद्रावरुणा सुत-पाविश्येते जगत्यौ शिष्टास्त्रिष्टुभः। इंद्रावरुणौ देवता॥ आभिप्लविकेषूक्थ्येषु तृतीयसवने होत्रकशस्त्रेषु स्तोत्रवत्सु मैत्रावरुणस्येदमाद्यपाद्यं सूक्तं। सूत्रितं च। श्रुष्टी वां यज्ञो युवां नरा। आ० ७. ८.। इति॥ तृतीयसवन इंद्रावरुणा सुतपाविमं सुतमिति प्रशास्तुः प्रस्थितयाज्या। सूत्रितं च। इंद्रावरुणा सुतपाविमं सुतमिंद्रश्च सोमं पिबतं बृहस्पते। आ० ५. ५.। इति॥ उक्थ्ये तृतीयसवन इंद्रावरुणा मधुमत्तमस्येति मैत्रावरुणस्य यक्षयाज्या। सूत्रितं च। इंद्रावरुणा मधुमत्तमस्येति याज्या। आ० ६. १.। इति ॥

॥ तत्र प्रथमा ॥

श्रुष्टी वां यज्ञ उद्यतः सजोषा मनुष्वद्वृक्तबर्हिषो यजध्यै।

आ य इंद्रावरुणाविषे अद्य महे सुम्नाय मह आववर्तत् ॥ १

श्रुष्टी। वां। यज्ञः। उत्ऽयतः। सऽजोषाः। मनुष्वत्।

वृक्तऽबर्हिषः। यजध्यै।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

आ। यः। इंद्रावरुणौ। इषे। अद्य। महे। सुम्नाय।

महे। आऽववर्तत्॥ १

महे मंहनीयौ हे इंद्रावरुणौ वां युवयोरर्थं श्रुष्टी क्षिप्रः। तथा च यास्कः। श्रुष्टीति क्षिप्रनाम श्रु अष्टीति। यज्ञः सोमः सजोषा ऋत्विग्भिः सहितोऽद्य संगता-दुद्यतः प्रवृत्तः। यः सोमो मनुष्वत् मनोरिव वृक्तबर्हिषः स्तीर्णबर्हिषो यजमानस्ये-षेऽन्नार्थं महे महते सुम्नाय सुखाय च यजध्यै यष्टुं युवामाववर्तत् आवर्तयति॥

॥ अथ द्वितीया॥

ता हि श्रेष्ठा देवताता तुजा शूराणां शविष्ठा ता हि भूतं।

मघोनां मंहिष्ठा तुविशुष्म ऋतेन वृत्रतुरा सर्वसेना॥ २

ता। हि। श्रेष्ठा। देवऽताता। तुजा। शूराणां। शविष्ठा।

ता। हि। भूतं।

मघोनां। मंहिष्ठा। तुविऽशुष्मा। ऋतेन। वृत्रऽतुरा।

सर्वऽसेना॥ २

हे इंद्रावरुणौ ता तौ प्रसिद्धौ युवां श्रेष्ठा श्रेष्ठौ देवताता देवतातौ यज्ञे॥ इष्टिर्देवतातेति यज्ञनामसु पाठात्॥ तुजा धनानां प्रेरकौ हि भूतं। भवतं। किंच ता तौ हि युवां शूराणां मध्ये शविष्ठातिशयेन बलवंतौ भूतं। किंच मघोनां दानवतां मंहिष्ठा दातृतमौ तुविशुष्मा बहुबलावृतेन सत्येन वृत्रतुरा शत्रूणां हिंसकौ सर्वसेना सर्वसेनौ च भूतमिति॥

॥ अथ तृतीया॥

ता गृणीहि नमस्येभिः शूषैः सुम्नेभिरिंद्रावरुणा चकाना।

वज्रेणान्यः शवसा हंति वृत्रं सिषक्त्यन्यो वृजनेषु विप्रः॥ ३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ता । गृणीहि । नमस्येभिः । शूषैः । सुम्नेभिः । इंद्रावरुणा । चकाना ।

वज्रेण । अन्यः । शवसा । हंति । वृत्रं । सिसक्ति । अन्यः । वृजनेषु । विप्रः ॥ २

हे भरद्वाज नमस्येभिः स्तुत्यैः शूषैर्बलैः ॥ शूषमिति बलनामसु पाठात् ॥ सुम्नेभिः सुखैश्च सहैव चकाना स्तुतौ ॥ कायतिः शब्दकर्मा । तस्य लिटः कानचि रूपमिदं ॥ ता ताविंद्रावरुणौ गृणीहि । स्तुहि । अन्यस्तयोरन्य इंद्रो वृत्रं हननशीलं असुरं वज्रेण हंति । अन्यो वरुणो विप्रः प्राज्ञो वृजनेषु स्तोतृणामुपद्रवेषु रक्षितुं शवसा बलेन सिषक्ति । संगच्छते ॥

॥ अथ चतुर्थी ॥

ग्नाश्च यन्नरश्च वावृधंत विश्वे देवासो नरां स्वगूर्ताः ।
प्रैभ्य इंद्रावरुणा महित्वा द्यौश्च पृथिवि भूतमुर्वी ॥ ४

ग्नाः । च । यत् । नरः । च । वावृधंत । विश्वे । देवासः ।

नरां । स्वऽगूर्ताः ।

प्र । एभ्यः । इंद्रावरुणा । महिऽत्वा । द्यौः । च । पृथिवि ।

भूतं । उर्वी इति ॥ ४

नरां नराणां मनुष्याणां मध्ये ग्नाश्च स्त्रियश्च ॥ मेना ग्ना इति स्त्रीणामिति यास्कवचनात् ॥ नरश्च पुरुषाश्च विश्वे सर्वे देवासो देवाः ॥ देवाश्च इत्यत्र पुमान् स्त्रियेत्येकशेषात् देव्यश्च देवाश्च देवाश्च इति निर्देशः पुंवन्निर्देशः ॥ स्वगूर्ताः स्वयमुद्यता यद्यदा वावृधंत स्तुतिभिर्वर्धयंति तदा हे इंद्रावरुणौ महित्वा महत्त्वयुक्तावेभ्यः स्तोतृभ्यः प्रभूतं । प्रभवतं । हे द्यौः पृथिवि यौच उर्वी विस्तीर्णे युवामेभ्यः प्रभूतमित्यनुषंग ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ पंचमी ॥

स इत्सुदानुः स्ववाँ ऋतावेंद्रा यो वां वरुण दाशति त्मन्।
इषा स द्विषस्तरेद्दास्वान्वंसद्रयिं रयिवतश्च जनान्॥ ५

सः। इत्। सुऽदानुः। स्वऽवान्। ऋतऽवा। इंद्रा। यः। वां। वरुणा। दाशति। त्मन्।
इषा। सः। द्विषः। तरेत्। दास्वान्। वंसत्। रयिं। रयिऽवतः। च। जनान्॥ ५

हे इंद्रेंद्रो वरुणा हे वरुणौ॥ इतरेतरयोगादुभयत्र द्विवचनप्रयोगः वरुणेत्यत्र संहितायां छांदसः॥ वां युवाभ्यां यो यजमानस्त्मन् आत्मनैव दाशति। हवींषि ददाति। स इत् स एव सुदानुः शोभनदानो भवति। स्ववान् धनवांश्च ऋतावान् यज्ञवांश्च भवति। किंच स दाश्वान् दानवान् द्विषो द्वेष्टॄन् रिपोंश्च जयपक्षेन सह तरेत्। प्राप्नेत्। अपि च रयिं धनं रयिवतो धनवतो जनान् पुत्रांश्च वंसत्। संभजेत्॥

॥ इति पंचमस्य प्रथमे एकादशो वर्गः॥

॥ अथ षष्ठी ॥

यं युवं दाश्वध्वराय देवा रयिं धत्थो वसुमंतं पुरुक्षुं।
अस्मे स इंद्रावरुणावपि ष्यात्प्र यो भनक्ति वनुषामशस्तीः॥ ६

यं। युवं। दाश्वऽअध्वराय। देवा। रयिं। धत्थः। वसुऽमंतं। पुरुऽक्षुं।
अस्मे इति। सः। इंद्रावरुणा। अपि। स्यात्। प्र। यः। भनक्ति। वनुषां। अशस्तीः॥ ६

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

देवा देवौ स्तूयमानौ हे इंद्रावरुणौ युवं युवां दास्वध्वराय दत्तहविष्काय यजमानाय वसुमंतं धनानुबंधिनं पुरुक्षुं बहुधनं पूर्णयवसं वा यं यादृशं रयिं धनं धत्थः प्रयच्छथः । योऽपि च वसुनां हिंसकानामप्यस्तोरकीर्त्तिः । यत् कृताभ्यवयासीत्यर्थः । प्रधनक्ति प्रवृजति स तादृशो रयिरस्मे अस्मासु स्यात् । भूयात् ॥

॥ अथ सप्तमी ॥

उत नः सुत्रात्रो देवगोपाः सूरिभ्य इंद्रावरुणा रयिः ष्यात् ।

येषां शुष्मः पृतनासु साह्वान्प्र सद्यो द्युम्ना तिरते ततुरिः ॥ ७

उत । नः । सुऽत्रात्रः । देवऽगोपाः । सूरिऽभ्यः । इंद्रावरुणा ।

रयिः । स्यात् ।

येषां । शुष्मः । पृतनासु । सह्वान् । प्र । सद्यः । द्युम्ना ।

तिरते । ततुरिः ॥ ७

उतापि चेंद्रावरुणा हे इंद्रावरुणौ सूरिभ्यः स्तोतृभ्यो नोऽस्मभ्यं सुत्रात्रः सुरक्षी देवगोपाः । देवा गोपा गोप्तारो यस्य स तथाविधः । रयिर्धनं स्यात् । भूयात् । किंच येषामस्माकं शुष्मो बलं पृतनासु युद्धेषु साह्वान् शत्रूणामभिभवित् ततुरिर्हिंसकश्च सन् द्युम्ना यशांसि सद्य एव प्रतिरते सम्यक्विस्तारं कुर्यात् ॥

॥ अथाष्टमी ॥

नू न इंद्रावरुणा गृणाना पृंक्तं रयिं सौश्रवसाय देवा ।

इत्था गृणंती महिनस्य शर्धोऽपो न नावा दुरिता तरेम ॥ ८

नु । नः । इंद्रावरुणा । गृणाना । पृंक्तं । रयिं ।

सौश्रवसाय । देवा ।

इत्था । गृणंतः । महिनस्य । शर्धः । अपः । न । नावा ।

दुःऽइता । तरेम ॥ ८

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे इंद्रावरुणाविंद्रावरुणौ ऋषाना स्तूयमानौ युवां मेऽस्मभ्यं सौश्रवसाय। सुश्रवसो भावः सौश्रवसं। तस्मै सुश्रवस्त्वाय रयिं धनं तु चित्रं पूज्यं। प्रयच्छतं किंच हे देवा देवौ महिनस्य महतोर्युवयोः यधौ बलमित्येतं ऋषयंतः स्तुवंतो वयं दुरिता दुरितानि नावापो न उदकानीव तरेम॥

॥ अथ नवमी ॥

प्र सम्राजे बृहते मन्म नु प्रियमर्च देवाय वरुणाय सप्रथः।
अयं य उर्वी महिना महिव्रतः क्रत्वा विभात्यजरो न
शोचिषा॥ ९

प्र। सम्ऽराजे। बृहते। मन्म। नु। प्रियं। अर्च। देवाय।
वरुणाय। सऽप्रथः।
अयं। यः। उर्वी इति। महिना। महिऽव्रतः। क्रत्वा।
विऽभाति। अजरः। न। शोचिषा॥ ९

हे स्तोतः सम्राज सम्यक् राज्ञां शासकाय बृहते परिवृढाय देवाय द्योतमानाय वरुणाय प्रियं मनोहरं सप्रथः सर्वतः पृथु। तथा च यास्कः। सप्रथाः सर्वतः पृथुरिति। मन्म स्तोत्रं तु अद्य प्रार्च। प्रोच्चारय। अयं यो योऽयं वरुणो महिना महिम्ना युक्तो महिव्रतो महाकर्मा क्रत्वा प्रज्ञया च युक्तः शोचिषा तेजसा युक्तोऽजरो न जरारहितश्चोर्वी विस्तीर्णे द्यावापृथिव्यौ विभाति विभासयति॥

॥ अथ दशमी ।

इंद्रावरुणा सुतपाविमं सुतं सोमं पिबतं मद्यं धृतव्रता।
युवो रथो अध्वरं देववीतये प्रति स्वसरमुप याति पीतये॥ १०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

इंद्रावरुणा। सुतऽपौ। इमं। सुतं। सोमं। पिबतं मद्यं।
धृतऽव्रता।

युवोः। रथः। अध्वरं। देवऽवीतये। प्रति। स्वसरं। उपं।
याति। पीतये। १०

इंद्रावरुणा हे इंद्रावरुणौ सुतपौ सुतस्य सोमस्य पातारौ युवां मद्यं मदकरं सुतमभिषुतमिमं सोमं पिबतं। किंच हे धृतव्रता धृतकर्माणौ युवयोर्युवयो रथोऽध्वरमुद्दिश्य देववीतये देवानां पानार्थं पीतये युवयोरपि सोमपानार्थं स्वसरं मार्गं प्रत्युपयाति॥

॥ अथैकादशी॥

इंद्रावरुणा मधुमत्तमस्य वृष्णः सोमस्य वृषणा वृषेथां।
इदं वामंधः परिषिक्तमस्मे आसद्यास्मिन्बर्हिषि मादयेथां॥ ११

इंद्रावरुणा। मधुमत्ऽतमस्य। वृष्णः। सोमस्य। वृषणा।
आ। वृषेथां।

इदं। वां। अंधः। परिऽसिक्तं। अस्मे इति। आऽसद्य।
अस्मिन्। बर्हिषि। मादयेथां॥ ११

इंद्रावरुणा हे इंद्रावरुणौ वृषणा कामानां वर्षितारौ युवां मधुमत्तमस्यातिशयेन मधुमंतं रसवंतं वृष्णो वर्षितारं सोमस्य सोममावृषेथां। आसिंचतं। तथा च शतपथब्राह्मणं। यथाभागमावृषायध्वमिति यथाभागमश्नीतेत्येवैतदाह। २. ४. २. २०। इति। वां युवयोरयं इदमंधः सोमरूपमन्नमस्मे अस्माभिः परिषिक्तं पात्रेषु। अत आसद्योपविश्यास्मिन्बर्हिषि यज्ञे मादयेथां सोमपान इति शेषः॥

॥ इति पंचमस्य प्रथमे द्वादशो वर्गः॥

सं वां कर्मणेत्यष्टर्चमष्टमं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमैंद्रावैष्णवं। अनुक्रम्यते च। सं वामष्टावैंद्रावैष्णवमिति॥ उक्थ्ये तृतीयसवनेऽच्छावाकशस्त्र एतत्सूक्तं।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri.

सूत्यते हि। सं वां कर्मणेंद्राविष्णू मदपती मदानामिति याज्या। आ० ६. १.। इति॥ सोमातिरेके प्रातःसवने नैमित्तिके यज्ञे परिदृष्टे सति गायत्रारिभते सं वामिति तस्य यज्ञयाज्या। सूत्रितं च। ऐंद्रावैष्णव्येति गायत्रारिदैवतप्रधानत्वात्सं वां कर्मणा समिषा हिनोमि। आ० ६. ७.। इति॥ सोमातिरेके माध्यंदिनसवने या विश्वासामित्येषा यज्ञयाज्या। सूत्रितं च। या विश्वासां जनितारा मतीनामिति याज्या। आ० ६. ७.। इति॥ उक्थ्ये तृतीयसवनेऽच्छावाकस्येंद्राविष्णू मदपती इति यज्ञयाज्या। सूत्रं तूदाहृतं॥ तृतीयसवनेऽच्छावाकस्येंद्राविष्णू पिबतमिति प्रस्थितयाज्या। सूत्रितं च। इंद्राविष्णू पिबतं मध्वो अस्येमं स्तोममर्हते जातवेदसे। आ० ५. ५.। इति॥

॥ तत्र प्रथमा ॥

सं वां कर्मणा समिषा हिनोमींद्राविष्णू अपसस्पारे अस्य।
जुषेथां यज्ञं द्रविणं च धत्तमरिष्टैर्नः पथिभिः पारयंता॥ १

सं। वां। कर्मणा सं। इषा। हिनोमि। इंद्राविष्णू इति।
अपसः। पारे। अस्य।
जुषेथां। यज्ञं। द्रविणं। च। धत्तं। अरिष्टैः। नः।
पथिऽभिः। पारयंता॥ १

हे इंद्राविष्णू वां युवां कर्मणा स्तोत्रेणैषा हविषा च सं हिनोमि। सम्यक् प्रेरयामि। अपसः कर्मणोऽस्योक्थस्य पारे समाप्तौ यज्ञं जुषेथां। सेवेथां। किंचारिष्टैरनुपद्रवैः पथिभिर्मार्गैर्नोऽस्मान्पारयंता पारं नयंतौ युवां द्रविणं धनं धत्तं। अस्मभ्यं दत्तं॥

॥ अथ द्वितीया ॥

या विश्वासां जनितारा मतीनामिंद्राविष्णू कलशा सोमधाना।
प्र वां गिरः शस्यमाना अवंतु प्र स्तोमासो गीयमानासो अर्कैः॥ २

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

या। विश्वासां। जनितारा। मतीनां। इंद्राविष्णू इति।
कलशा। सोमऽधाना।

प्र। वां। गिरः। शस्यमानाः। अवंतु। प्र। स्तोमासः।
गीयमानासः। अर्कैः॥ २

या यौ प्रसिद्धाविंद्राविष्णू विश्वासां सर्वासां मतीनां स्तुतीनां जनितारा जनितारौ॥ जन जनन इत्यस्माद्धातोस्तृचीदं रूपं। यद्वा जनी प्रादुर्भाव इत्यस्माद्धातोरेव तृचि जनिता मंत्र इति निपातनाण्णिलोपः॥ कलशा कलशौ सोमधाना सोमस्य निधानभूतौ च स्यातां। अथ प्रत्यक्षस्तुतिः। हे इंद्राविष्णू वां युवां शस्यमाना उच्चार्यमाणाः शस्त्ररूपा गिरो वाचः प्रावंतु। प्राप्नुवंतु। अर्कैः स्तोतृभिर्गीयमानासो गीयमाना स्तोमासः स्तोमाः स्तोत्राणि च प्रावंतु। प्राप्नुवंतु॥

॥ अथ तृतीया ॥

इंद्राविष्णू मदपती मदानामा सोमं यातं द्रविणो दधाना।
सं वामंजंत्वक्तुभिर्मतीनां संस्तोमासः शस्यमानास उक्थैः॥ ३

इंद्राविष्णू इति। मदपती इति मदऽपती। मदानां। आ।
सोमं। यातं। द्रविणो इति। दधाना।
सं। वां। अंजंतु। अक्तुऽभिः। मतीनां। सं। स्तोमासः।
शस्यमानासः। उक्थैः॥ ३

हे इंद्राविष्णू मदानां सोमानां मदपती स्वामिनौ। मदपती इत्यत्र मदयत्स्तोऽनुवादः।॰द्रविणो द्रविणानि धनान्यपि॥ द्रविणा उ इति पदद्वयमेकीभूय द्रविणो इति पदं निष्पन्नं॥ दधाना ददानौ युवां सोममभ्यायातं। मतीनां स्तोतॄणां स्तोमासः स्तोत्राण्युक्थैः शस्त्रैः सार्धं शस्यमानास उच्चार्यमाणा वां युवामक्तुभिस्तेजोभिः समंजंतु। समर्धयंतु। सं समिति द्विरुक्तिरादरार्था॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

। अथ चतुर्थी ।

आ वामश्वासो अभिमातिषाह इंद्राविष्णू सधमादो वहंतु ।
जुषेथां विश्वा हवना मतीनामुप ब्रह्माणि शृणुतं गिरो मे ॥ ४

आ । वां । अश्वासः । अभिमातिऽसहः । इंद्राविष्णू इति ।
सधऽमादः । वहंतु ।
जुषेथां । विश्वा । हवना । मतीनां । उप । ब्रह्माणि ।
शृणुतं । गिरः । मे ॥ ४

हे इंद्राविष्णू वां युवामभिमातिषाहोऽभिमातीनां हिंसकानामभिभवितारः सधमादः सह माद्यंतोऽश्वासोऽश्वा आवहंतु । मतीनां स्तोतॄणां विश्वा विश्वानि हवना हवनानि स्तोत्राणि जुषेथां । सेवेथां । तदर्थं मे मदीयानि ब्रह्माणि स्तोत्राणि गिरः यज्ञरूपा वाचश्चोपशृणुतं ॥

। अथ पंचमी ।

इंद्राविष्णू तत्पनयाय्यं वां सोमस्य मद उरु चक्रमाथे ।
अकृणुतमंतरिक्षं वरीयोऽप्रथतं जीवसे नो रजांसि ॥ ५

इंद्राविष्णू इति । तत् । पनयाय्यं । वां । सोमस्य । मदे ।
उरु । चक्रमाथे इति ।
अकृणुतं । अंतरिक्षं । वरीयः । अप्रथतं । जीवसे । नः ।
रजांसि ॥ ५

हे इंद्राविष्णू वां युवयोस्तत्कर्म पनयाय्यं स्तुत्यं । किं तत्कर्मेत्यत आह । सोमस्य मदे सति यदुरु विस्तीर्णं चक्रमाथे विचक्रमाथे । यद्यपि विष्णोरेव विक्रमकर्तृत्वमेकार्थत्वादुभयोरित्युच्यते । यच्चांतरिक्षं वरीय उरुतरमकृणुतं अकुरुतं । यदपि

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

च रजांसि लोकान् सर्वान्। लोका रजांस्युच्यंत इति यास्कः। नोऽस्माकं जीवसे जीवनायाप्रथत् अप्रथयतं ॥

॥ अथ षष्ठी ।

इंद्राविष्णू हविषा वावृधानाग्रांद्वाना नमसा रातहव्या ।

घृतासुती द्रविणं धत्तमस्मे समुद्रः स्थः कलशः सोमधानः ॥ ६

इंद्राविष्णू इति । हविषा । वावृधाना । अग्र॑ऽअद्वाना ।

नमसा । रातऽहव्या ।

घृतासुती इति घृतऽआसुती । द्रविणं । धत्तं । अस्मे इति ।

समुद्रः । स्थः । कलशः । सोमऽधानः ॥ ६

घृतासुती घृताद्याविंद्राविष्णू युवां हविषा सोमेन वावृधाना वर्धमानावग्राद्वाना सोमाग्रस्य भुक्तारावादौ नमसा नमस्कारेण रातहव्या दत्तहविष्कौ यजमानैरस्मे अस्मभ्यं द्रविणं धनं धत्तं। प्रयच्छतं। किंच युवां समुद्र उदधिरिव स्थः। भवथः। यतः सोमधानः सोमनिधानः कलशो भवथः ॥

। अथ सप्तमी ॥

इंद्राविष्णू पिबतं मध्वो अस्य सोमस्य दस्रा जठरं पृणेथां ।

आ वामंधांसि मदिराण्यग्मन्नुप ब्रह्माणि शृणुतं हवं मे ॥ ७

इंद्राविष्णू इति । पिबतं । मध्वः । अस्य । सोमस्य । दस्रा ।

जठरं । पृणेथां ॥

आ । वां । अंधांसि । मदिराणि । अग्मन् । उप । ब्रह्माणि ।

शृणुतं । हवं । मे ॥ ७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दस्रा हे दर्शनीयाविंद्राविष्णू युवां मध्वोऽस्य मदकरं सोमस्य सोमं पिबतं। किंच जठरमुदरं पृणेथां। सोमेन पूरयेथां। हे इंद्राविष्णू वां युवां मदिराणि मदकराण्यंधांसि सोमात्मकान्यन्नान्यग्मन्। अभिगच्छंतु। मे मदीयानि ब्रह्माणि स्तोत्राणि हवं मदीयमाह्वानं चोपशृणुतं॥

॥ अथाष्टमी॥

उभा जिग्यथुर्न परा जयेथे न परा जिग्ये कतरश्चनैनोः।
इंद्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथां॥ ८

उभा। जिग्यथुः। न। परा। जयेथे इति। न। परा।
जिग्ये। कतरः। चन। एनोः।
इंद्रः। च। विष्णो इति। यत्। अपस्पृधेथां। त्रेधा।
सहस्रं। वि। तत्। ऐरयेथां॥ ८

हे इंद्राविष्णू उभावुभौ युवां जिग्यथुः। शत्रूनजैष्टं। न पराजयेथे। न पुनः कदाचन पराजयेथे। एनोरेनयोर्युवयोर्मध्ये कतरश्चनैकतरोऽपि न पराजिग्ये। न पराजैष्ट। हे विष्णो इंद्रश्च त्वं च युवां यद्यदा खलु प्रत्यपस्पृधेथां असुरैः सहास्पृधेथां त्रेधा लोकवेदवागात्मना त्रिधा स्थितं सहस्रसंमितं च वि तदैरयेथां। व्यक्रमेथामित्यर्थः॥ तथा च ब्राह्मणं। उभा जिग्यथुरित्यच्छावाकस्योभौ हि तौ जिग्यथुर्न पराजयेथे न पराजिग्य इति न हि तयोः कतरश्चन पराजिग्य इंद्रश्च विष्णो यदपस्पृधेथां त्रेधा सहस्रं वि तदैरयेथामितींद्रश्च ह वै विष्णुश्चासुरैर्युयुधाते तान्ह स्म जित्वोचतुः कल्पामहा इति ते ह तथेत्यसुरा ऊचुः सोऽब्रवीदिंद्रो यावदेवायं विष्णुस्त्रिर्विक्रमते तावदस्माकमथ युष्माकमितरदिति स इमांल्लोकान्विचक्रमेऽथो वेदानथो वाचं तदाहुः किं तत्सहस्रमितीमे लोका इमे वेदा अथो वागिति ब्रूयादैरयेथामैरयेथां। ऐ० ब्रा० ६. १५.। इति॥ यद्वा तत्सहस्रं गवां सहस्रं त्रेधा व्यैरयेथामित्यर्थः॥

॥ इति पंचमस्य प्रथमे त्रयोदशो वर्गः॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

घृतवती भुवनानामिति षडृचं नवमं सूक्तं भरद्वाजस्यार्षं जागतं द्यावापृथिवी-देवताकं। तथा चानुक्रम्यते। घृतवती षट् द्यावापृथिवीयं जागतमिति॥ आभि-प्लविके पंचमेऽहनि वैश्वदेवशस्त्र आद्यस्तृचो द्यावापृथिव्यनिविद्धानार्थः। सूत्रितं च। घृतवती भुवनानामभिश्रियेंद्र ऋभुभिर्वाजवद्भिरिति तृचौ। आ० ७. ६.। इति॥ उपसत्संस्थेऽपि वैश्वदेवशस्त्र एष तृचः। सूत्रितं च। आ० ९. ५.॥ आभिप्लविके तृतीयेऽहनि वैश्वदेवशस्त्रे घृतेन द्यावापृथिवी इति तिस्रो द्यावापृथिव्यनिविद्धानार्थाः सूत्रितं च। घृतेन द्यावापृथिवी इति तिस्रोऽनश्वो जातः। आ० ७. ७.। इति॥

॥ तत्र प्रथमा ॥

घृतवंती भुवंनानामभिश्रियोर्वी पृथ्वी मधुदुघे सुपेशसा।
द्यावापृथिवी वरुणस्य धर्मणा विष्कंभिते अजरे भूरिरेतसा॥ १

घृतवंती इतिं घृतऽवंती भुवंनानां। अभिऽश्रिया। उर्वी इतिं।
पृथ्वी इतिं। मधुदुघे इतिं मधुऽदुघे। सुऽपेशसा।
द्यावापृथिवी इतिं वरुणस्य। धर्मणा। विस्कंभिते इति
विऽस्कंभिते। अजरे इतिं। भूरिंऽरेतसा॥ १

द्यावापृथिवी हे द्यावापृथिव्यौ घृतवती दीप्तिमत्यावुदकवत्यौ वा॥ घनं घृत-मित्युदकनामसु पाठात्॥ भवत इति शेषः। भुवनानां भूतानामभिश्रियाभिश्रयणीये भवत इति पर्यंतानुसंधानीयं। उर्वी विस्तीर्णे पृथ्वी बहुकार्यरूपेण प्रथिते च मधुदुघे मधुन उदकस्य दोग्ध्र्यौ सुपेशसा सुरूपे वरुणस्य सर्वस्य नियामकस्य धर्मणा धारणेन विष्कभिते पृथग्धारिते अजरे नित्ये भूरिरेतसा बहुरेतस्के बहुकार्ये वा भवतः। अत्र साक्षात् द्यावापृथिव्योः स्तुतिप्रसंगाद्वरुणस्येति द्रष्टव्यं॥

॥ अथ द्वितीया ॥

असंश्चंती भूरिंधारे पयंस्वती घृतं दुंहाते सुकृते शुचिंव्रते।
राजंती अस्य भुवंनस्य रोदंसी अस्मे रेतंः सिंचतं यन्मनुंर्हितं॥ २

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

असंश्चंती इति॑ । भूरि॑धारे इति॒ भूरि॑ऽधारे । पय॑स्वती इति॑ ।
घृतं । दुहाने इति॑ । सुऽकृते॑ । शुचि॑व्रते इति॒ शुचि॑ऽव्रते ।
राजं॑ती इति॑ । अस्य । भुव॑नस्य । रोदसी इति॑ । अस्मे इति॑ ।
रेतः॑ । सिंचतं॑ । यत् । मनु॑ःऽहितं ॥ २

असश्चंती असज्यमाने व्युदस्यंत्यौ वा भूरिधारे बहुधारे । दिवो वृष्टिधाराः पृथिव्यायाश्चान्नस्तम्भरसधाराः । एवमुभयोरपि बहुधारत्वं । पयस्वती उदकवत्यौ । तथा च यास्कः । असज्यमाने इति वा व्युदस्यंत्याविति वा बहुधारे उदकवत्यौ । नि० ५. २. । इति । शुचिव्रते शुचिक्रिये द्यावापृथिव्यौ सुकृते शोभनकारिणे यजमानाय घृतं सस्यादिसमृद्धिहेतूदकं दुहाने । अथ प्रत्यक्षस्तुतिः । रोदसी हे द्यावापृथिव्यावस्य भुवनस्य भूतजातस्य राजंती ईशाने युवामस्मे अस्मासु रेतः प्रजननसमर्थं वीर्यं सिंचतं । यद्रेतो मनुर्हितं मनुष्येभ्यो हितं ॥

॥ अथ तृतीया ॥

यो वा॑मृजवे॑ क्रमणाय रोदसी मर्तो॑ द॒दाश॑ धिषणे॒ स सा॑धति ।
प्र प्र॒जाभि॑र्जायते॒ धर्म॑ण॒स्परि॑ यु॒वोः सि॒क्ता विषु॑रूपाणि॒ सव्र॑ता ॥ ३

यः । वा॑ । ऋजवे॑ । क्रमणाय । रोदसी इति॑ । मर्तः॑ ।
द॒दाश॑ । धिषणे इति॑ । सः । साधति ।
प्र । प्रऽजाभि॑ः । जायते । धर्म॑णः । परि॑ । युवोः । सिक्ता ।
विषु॑ऽरूपाणि । सऽव्र॑ता ॥ ३

धिषणे धृष्टे सर्वस्य भुवनस्य निवासभूते वा हे रोदसी वां युवाभ्यां यो मर्तो मनुष्य ऋजवे क्रमणाय युवयोः सुखगमनाय ददाश हवींषि ददाति स मर्त्यः साधति । कामान् साधयति । किंच प्रजाभिः पुत्रपौत्रादिभिः प्रजायते । प्रवृद्धो भवति । धर्मणः कर्मणः पर्युपरि युवोर्युवयोः सिक्ता सिक्तानि रेतांसि विषुरूपाणि नानारूपाणि सव्रता समानकर्माणि भूतानि जायंते ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ चतुर्थी ॥

घृतेन द्यावापृथिवी अभिवृ॑ते घृतश्रिया घृतपृचा घृतावृधा ।
उर्वी पृथ्वी होतृवूर्ये॑ पुरोहि॑ते ते इद्विप्रा ईळते सुम्नमिष्टये ॥ ४

घृतेन॑ । द्यावापृथिवी इति॑ । अभिवृ॑ते इत्यभिऽवृ॑ते ।
घृतऽश्रिया । घृतऽपृचा । घृतऽवृधा ।
उर्वी इति॑ । पृथ्वी इति॑ । होतृऽवूर्ये॑ । पुरोहि॑ते इति॑
पुरःऽहि॑ते । ते इति॑ । इत् । विप्राः । ईळते । सुम्नं॑ ।
इष्टये ॥ ४

द्यावापृथिवी द्यावापृथिव्यौ घृतेनोदकेनाभिवृते आवृते भवतः। घृतश्रियोदकं श्रयंत्यौ च घृतपृचा घृतसंपृक्ते च घृतावृधा घृतं वर्धयंत्यौ चोर्वी विस्तीर्णे पृथ्वी प्रथिते च भवतः। होतृवूर्ये यज्ञे पुरोहिते यजमानैः पुरस्कृते च भवतः। विप्राः प्राज्ञाः स्तोतारस्ते इत् द्यावापृथिव्यावेवेष्टये यज्ञाये॥ होत्वेष्टिरिति यज्ञनामसु पाठात्॥ सुम्नं सुखमीडते। याचंते। सुखे सति हि यागाः प्रवर्तंते॥

॥ अथ पंचमी ॥

मधु॑ नो द्यावापृथिवी मिमिक्षतां मधुश्चुता मधुदुघे मधुव्रते ।
दधाने यज्ञं द्रविणं च देवता महि श्रवो वाजमस्मे सुवीर्यं ॥ ५

मधु॑ । नः । द्यावापृथिवी इति॑ । मिमिक्षतां । मधुऽश्चुता ।
मधुदुघे इति॑ मधुऽदुघे । मधुव्रते इति मधुऽव्रते ।
दधाने इति॑ । यज्ञं । द्रविणं । च । देवता । महि । श्रवः ।
वाजं । अस्मे इति॑ । सुऽवीर्यं ॥ ५

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मधुश्चुतोदकस्य क्षारं यत्यौ मधुदुघे उदकदोग्ध्र्यौ मधुव्रते उदकार्दकर्मण्यौ देवता देवताभूते अस्मे अस्मासु यज्ञं द्रविणं धनं च महि महत् श्रवः यशो वाजमन्नं सुवीर्यं सुवीरत्वं च दधाने ददत्यौ द्यावापृथिवी द्यावापृथिव्यौ नोऽस्मान्मधु मधुना ॥ तृतीयैकवचनस्य लुक् ॥ मिमिक्षतां । सिंचतां ॥

॥ अथ षष्ठी ॥

ऊर्जं नो द्यौश्च पृथिवी च पिन्वतां पिता माता विश्वविदा सुदंससा ।
संरराणे रोदसी विश्वशंभुवा सनिं वाजं रयिमस्मे समिन्वतां ॥ ६

ऊर्जं । नः । द्यौः । च । पृथिवी । च । पिन्वतां । पिता । माता । विश्वऽविदा । सुऽदंससा ।
संरराणे इति संऽरराणे । रोदसी इति । विश्वऽशंभुवा । सनिं । वाजं । रयिं । अस्मे इति । सं । इन्वतां ॥ ६

पिता वर्षस्य सेक्तृत्वेन पितृभूता द्यौश्च माता धारकत्वेन मातृभूता पृथिवी चोभे नोऽस्मभ्यमूर्जमन्नं पिन्वतां । वर्धतां । किंच विश्वविदा विश्वं जानंत्यौ विश्वस्य वेदयित्र्यौ वा सुदंससा सुकर्माणौ संरराणे परस्परोपकार्योपकारकभावेन सह रममाणे विश्वशंभुवा सर्वस्य भावयित्र्यौ रोदसी द्यावापृथिव्यावस्मे अस्मासु सनिं संभजनीयं पुत्रादिकं वाजं बलं रयिं धनं च समिन्वतां । संप्रेरयतां ॥

॥ इति पंचमस्य प्रथमे चतुर्दशो वर्गः ॥

उदु ष्य देव इति षडृचं दशमं सूक्तं भरद्वाजस्यार्षं सवितृदेवताकं । आद्यास्तिस्रो जगत्यश्चतुर्थ्याद्यास्तिस्रस्त्रिष्टुभः । तथा चानुक्रांतं । उदु ष्य सावित्रं त्रिष्टुबंतमिति ॥ सूक्तविनियोगो लैंगिकः ॥ चातुर्विंशिकेऽहनि वैश्वदेवशस्त्र आद्यस्तृचः सावित्रसूक्तस्थान आवपनीयः । सूत्रितं च । उदु ष्य देवः सविता हिरण्ययेति तिस्रस्ते हि द्यावापृथिवी । आ० ७, ४, । इति ॥ [illegible]सवेऽपि वैश्वदेवशस्त्रे सावित्रसूक्तस्थान एषस्तृचः । सूत्रितं च । उदु ष्य देवः सविता हिरण्ययेत्यनूच्येद्वृ आ० ८, ५, । इति ॥ व्यूढे पंचमेऽहनि वैश्वदेवशस्त्र उदु ष्य देवः सविता दमूना

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इति तृचः सावित्रनिविद्धानार्थः। सूत्रितं च। उदु ष्य देवः सविता दमूना इति तिस्रः। आ० ८. ८.। इति॥ वैश्वदेवपर्वणि सावित्रद्वादशकपालस्य उदु ष्येति याज्या। सूत्रितं च। याममद्य सवितर्भागस्य वः पूषणा नमते यथं। आ० २. १६.। इति॥

॥ तत्र प्रथमा ॥

उदु ष्य देवः सविता हिरण्यया बाहू अयंस्त सवनाय सुक्रतुः।
घृतेन पाणी अभि प्रुष्णुते मखो युवा सुदक्षो रजसो विधर्मणि॥१

उत्। ऊं इति। स्यः। देवः। सविता। हिरण्यया।
बाहू इति। अयंस्त। सवनाय। सुऽक्रतुः।
घृतेन। पाणी इति। अभि। प्रुष्णुते। मखः। युवा।
सुऽदक्षः। रजसः। विऽधर्मणि॥ १

देवो द्योतमानः सुक्रतुः सुकर्मा स्य स प्रसिद्धः सविता हिरण्यया हिरण्मयावात्मीयौ बाहू सवनाय सवनाय दानाय चोदयंस्तु। उद्यच्छति। किंच मखो मंहनीयो युवा नित्यतरुणः सुदक्षः सवक्षो रजसो लोकस्योदकस्य वा विधर्मणि विधारणे स्थितो घृतेनोदकेन पूर्णौ स्वौ पाणी अभिप्रुष्णुते। अभिप्रेरयति॥

॥ अथ द्वितीया ॥

देवस्य वयं सवितुः सवीमनि श्रेष्ठे स्याम वसुनश्च दावने।
यो विश्वस्य द्विपदो यश्चतुष्पदो निवेशने प्रसवे चासि भूमनः॥२

देवस्य। वयं। सवितुः। सवीमनि। श्रेष्ठे। स्याम। वसुनः।
च। दावने।
यः। विश्वस्य। द्विऽपदः। यः। चतुःऽपदः। निऽवेशने।
प्रऽसवे। च। असि। भूमनः॥ २

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

तस्य देवस्य सवितुः प्रेरकस्य सवीमनि प्रसवेऽनुज्ञाने। तथा च यास्कः। सवीमनि प्रसवे। नि० ६. ७.। इति। श्रेष्ठे ऽतिशयेन प्रशस्ते वसुनो धनस्य दावने दाने च स्याम। समर्था भूयास्म। यस्त्वं विश्वस्य सर्वस्य द्विपदो निवेशने स्थितौ प्रसवे च स्वतंत्रोऽसि। यस्त्वं भूमनो भूरेचतुष्पदो निवेशने प्रसवे च स्वतंत्रोऽसि॥

॥ अथ तृतीया॥

अदब्धेभिः सवितः पायुभिष्ट्वं शिवेभिरद्य परि पाहि नो गयं।
हिरण्यजिह्वः सुविताय नव्यसे रक्षा माकिर्नो अघशंस ईशत। ३

अदब्धेभिः। सवितरिति। पायुऽभिः। त्वं। शिवेभिः।
अद्य। परि। पाहि। नः। गयं।
हिरण्यऽजिह्वः। सुविताय। नव्यसे। रक्ष। माकिः। नः।
अघऽशंसः। ईशत॥ ३

हे सवितरदब्धेभिरहिंसितैः पायुभिस्त्वोभी रक्षणसाधनैर्वा शिवेभिः सुख-कारिभिर्नोऽस्माकं गयं स्वगृहं धनं वा॥ गयः इदर इति स्वपनामस्तु धीडुं ऊं गय इति धननामसु पाठात्॥ अद्य परिपाहि। रक्ष। हिरण्यजिह्वो हितरमणीयवाक् त्वं। तथा च यास्कः। हिरण्यं कस्मादित्युपक्रम्य हितरमणं भवतीति वेति। सुविताय सुखाय नव्यसे नवतराय भव। रक्ष। अस्मान्पालय च। नोऽस्माकमघशंसोऽनर्थशंसनानः यत्नमाकिरीशत। मेशत॥

॥ अथ चतुर्थी॥

उदु ष्य देवः सविता दमूना हिरण्यपाणिः प्रतिदोषमस्थात्।
अयोहनुर्यजतो मंद्रजिह्व आ दाशुषे सुवति भूरि वामं॥ ४

उत्। ऊं इति। स्यः। देवः। सविता। दमूनाः।
हिरण्यऽपाणिः। प्रतिऽदोषं। अस्थात्।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अयःऽहनुः । यजतः । मंद्रऽजिह्वः । आ । दाशुषे । सुवति ।
भूरि । वामं ॥ ४

देवो द्योतमानो दमूना दममना दानमना वा । तथा च यास्कः । दमूना दममना वा दानमना वा दांतमना वेति । हिरण्यपाणिर्हिरण्मयपाणिरयोहनुर्हिरण्मयहनुः ॥ अयस्मय इति हिरण्यनामसु पाठात् ॥ यजतो यष्टव्यो मंद्रजिह्वो मोदमानवाक् स्य स सविता प्रतिदोषं प्रतिरात्रं रात्रेरवसान उदस्थात् । उत्तिष्ठतु । नो दाशुषे यजमानाय बह्वं भूरि प्रभूतं वामं वननीयं संभजनीयमन्नं वामं वननीयमिति यास्कः आसुवति प्रेरयति ॥

॥ अथ पंचमी ॥

उदू अयाँ उपवक्तेव वाहू हिरण्यया सविता सुप्रतीका ।
दिवो रोहांस्यरुहत्पृथिव्या अरीरमत्पतयत्कच्चिदभ्वं ॥ ५

उत् । ऊं इति । अयान् । उपवक्ताऽइव । वाहू इति ।
हिरण्यया । सविता । सुऽप्रतीका ।
दिवः । रोहांसि । अरुहत् । पृथिव्याः । अरीरमत् ।
पतयत् । कत् । चित् । अभ्वं ॥ ५

सवितोपवक्तेवाध्वर्युरिव हिरण्यया हिरण्मयौ सुप्रतीका शोभनावयवौ वाहू उदयान् । उद्यच्छतु । योऽयं पृथिव्याः पृथिवीपर्यंताद्दिवोऽंतरिक्षस्य रोहांस्यु-च्छ्रितप्रदेशानरुहत् रोहति । पतयत् गच्छत् कच्चित् यत्किंचिदभ्वं महत्सर्वं वस्तुजातं तिरोहितमरीरमत् रमयति च ॥

॥ अथ षष्ठी ॥

वाममद्य सवितर्वाममु श्वो दिवेदिवे वाममस्मभ्यं सावीः ।
वामस्य हि क्षयस्य देव भूरेरया धिया वामभाजः स्याम ॥ ६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वामं । अद्य । सवितः । वामं । ऊं इति । श्वः । दिवेऽदिवे ।

वामं । अस्मभ्यं । सावीः ।

वामस्य । हि । क्षयस्य । देव । भूरेः । अया । धिया ।

वामऽभाजः । स्याम ॥ ६

हे सवितरस्मभ्यं वामं धनमद्य सावीः । सुव । श्वश्च वामं धनं प्रसुव । किं बहुना । दिवे दिवे प्रतिदिनं वामं धनं प्रसुव । हे देव हि यस्मात् क्षयस्य निवासभूतस्य भूरेः प्रभूतस्य वामस्य दातासि अतो वयमयानया धिया स्तुत्या वामभाजो धनवंतः स्याम । भूयास्म ॥

॥ इति पंचमस्य प्रथमे पंचदशो वर्गः ॥

इंद्रासोमा महीति पंचर्चमेकादशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभमिंद्रासोमदेवताकं । इंद्रासोमा पंचेंद्रासोममित्यनुक्रांतं ॥ सूक्तविनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

इंद्रासोमा महि तद्वां महित्वं युवं महानि प्रथमानि चक्रथुः ।

युवं सूर्यं विविदथुर्युवं स्व१र्विश्वा तमांस्यहतं निदश्च ॥ १

इंद्रासोमा । महि । तत् । वां । महिऽत्वं । युवं । महानि ।

प्रथमानि । चक्रथुः ।

युवं । सूर्यं । विविदथुः । युवं । स्वः । विश्वा । तमांसि ।

अहतं । निदः । च ॥ १

इंद्रासोमा हे इंद्रासोमौ वां युवयोस्तन्महित्वं महत्त्वं महि महत् । किं तदित्यत आह । यद्युवां महानि महांति प्रथमानि प्रतमानि मुख्यानि वा भूतानि प्रथम इति मुख्यनाम प्रतमो भवतीति यास्कः । चक्रथुः । अकार्ष्टं । किंच युवं युवां

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सूर्यं विविदथुः । अलंभयतं च जनान् । युवं युवां स्वरुदकं च विविदथुः ॥ छेन स्वरित्युदकनामसु पाठात् ॥ अपि च विश्वा विश्वानि तमांसि निदथ निंदितॄन् असुरांश्चाहतं । अहिंस्तं ॥

॥ अथ द्वितीया ॥

इंद्रासोमा वासयथ उषासमुत्सूर्यं नयथो ज्योतिषा सह ।
उप द्यां स्कंभथुः स्कंभनेनाप्रथतं पृथिवीं मातरं वि ॥ २

इंद्रासोमा । वासयथः । उषसं । उत् । सूर्यं । नयथः ।
ज्योतिषा । सह ।
उप । द्यां । स्कंभथुः । स्कंभनेन । अप्रथतं । पृथिवीं ।
मातरं । वि ॥ २

इंद्रासोमा हे इंद्रासोमावुषसं वासयथः । निवासयथः । उषसं व्युच्छंतीं कारयथ इत्यर्थः । किंच सूर्यं ज्योतिषा तेजसा सहोन्नयथः । अपि च द्यां दिवं स्कंभनेन स्कंभनहेतुनांतरिक्षेण मध्ये स्थापितेनोपस्कंभथुः । अस्तंभयतं । मातरं विश्वस्य मातृभूतां पृथिवीं व्यप्रथतं । व्यप्रथयतं ॥

॥ अथ तृतीया ॥

इंद्रासोमावहिमपः परिष्ठां हथो वृत्रमनु वां द्यौरमन्यत ।
प्रार्णांस्यैरयतं नदीनामा समुद्राणि पप्रथुः पुरूणि ॥ ३

इंद्रासोमा । अहिं । अपः । परिऽस्थां । हथः । वृत्रं ।
अनु । वां । द्यौः । अमन्यत ।
प्र । अर्णांसि । ऐरयतं । नदीनां । आ । समुद्राणि ।
पप्रथुः । पुरूणि ॥ ३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे इंद्रासोमावपिहितं जगत आच्छादयितारमपो मेघस्थान्युदकानि परिष्ठां परिवृत्य स्थितं वृत्रमसुरं युवं युवां हथः । हतं । तदानीं द्यौर्वां युवामन्वमन्यत । किंच नदीनामर्णांस्युदकानि प्रैरयतं । पुरूणि बहूनि ॥ पुरूणि पुर्विति बहुनामसु पाठात् ॥ समुद्राण्युदकस्थानान्यापप्रथुः । उदकैरापूरयतं च । अथवा समुद्रंतीत्युदकान्येव समुद्राणि । तानि रसेनापूरयतमित्यर्थः । तथा च यास्कः । समुद्रः कस्मात्समुद्द्रवंत्यस्मादापः समभिद्रवंत्येनमापः संमोदंतेऽस्मिन्भूतानि समुदको भवति समुनत्तीति वेति ॥

॥ अथ चतुर्थी ॥

इंद्रासोमा पक्वमामास्वंतर्नि गवामिद्दधथुर्वक्षणासु ।
जगृभथुरनपिनद्धमासु रुशच्चित्रासु जगतीष्वंतः ॥ ४

इंद्रासोमा । पक्वं । आमासु । अंतः । निः । गवां । इत् ।
दधथुः । वक्षणासु ।
जगृभथुः । अनपिऽनद्धं । आसु । रुशत् । चित्रासु ।
जगतीषु । अंतरिति ॥ ४

इंद्रासोमा हे इंद्रासोमावामास्वपक्वासु गवां वक्षणासूधःसंबंधे पक्वं पयो निदधथुः । किंच चित्रासु नानावर्णासु जगतीषु गोषु ॥ इडा जगतीति गोनामसु पाठात् ॥ अंतर्मध्येऽनपिनद्धं केनाप्यबद्धं रुशत् शुक्लवर्णं पयो जगृभथुः । यथा दोग्धव्यां स्वयं न चरति तथा धारितवंतावित्यर्थः । इदिति पूरकः ॥

॥ अथ पंचमी ॥

इंद्रासोमा युवमंग तरुत्रमपत्यसाचं श्रुत्यं रराथे ।
युवं शुष्मं नर्यं चर्षणिभ्यः सं विव्यथुः पृतनाषाहमुग्रा ॥ ५

इंद्रासोमा । युवं । अंग । तरुत्रं । अपत्यऽसाचं । श्रुत्यं ।
रराथे इति ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

युवं। शुष्मं। नर्यं। चर्षणिऽभ्यः। सं। विव्यथुः।

पृतनाऽसहं। उग्रा॥ ५

इंद्रासोमा हे इंद्रासोमौ युवं युवां तद्वत्तं तारकमपत्यसाचं संतानयुक्तं श्रुत्यं श्रवणीयं रयिं धनमस्मे क्षिप्रं रराथे। अस्मभ्यं धत्तः। किंचोग्रा हे उद्गूर्णाविंद्रासोमौ युवं युवां नर्यं नृभ्यो हितं पृतनासहं शत्रुसैन्याभिभावुकं शुष्मं बलं चर्षणिभ्यो मनुष्येभ्यः॥ कृष्टयश्चर्षणय इति मनुष्यनामसु पाठात्॥ संविव्यथुः समतनुतं। परिवेष्टयथो वा॥

॥ इति पंचमस्य प्रथमे षोडशो वर्गः॥

यो अद्रिभिदिति त्र्यृचं द्वादशं सूक्तं बार्हस्पत्यं भरद्वाजस्यार्षं त्रैष्टुभं। तथा चानुक्रांतं। यो अद्रिभित्तृचं बार्हस्पत्यमिति॥ आभिप्लविकेषूक्थ्येषु तृतीयसवने ब्राह्मणाच्छंसिशस्त्रे स्तोमातिशंसनार्थमिदं सूक्तं। सूत्र्यते हि। यो अद्रिभिद्यचे दिव इति सूक्ते। आ० ७. ९.॥ वाजपेये बार्हस्पत्ये चरौ बृहस्पतिः समजयद्-वसूनीति — — — त्वामीळते अजिरं दूत्याय। आ० ९. ९.। इति॥

॥ तत्र प्रथमा॥

यो अद्रिभित्प्रथमजा ऋतावा बृहस्पतिरांगिरसो हविष्मान्।

द्विबर्हज्मा प्राघर्मसत्पिता न आ रोदसी वृषभो रोरवीति॥ १

यः। अद्रिऽभित्। प्रथमऽजाः। ऋतऽवा। बृहस्पतिः।

आंगिरसः। हविष्मान्।

द्विबर्हऽज्मा। प्राघर्मऽसत्। पिता। नः। आ। रोदसी इति।

वृषभः। रोरवीति॥ १

यो बृहस्पतिरद्रिभिदद्रिभिर्विततानां शिलोच्चयानां भेत्ता मेघानां विदारको वा॥ अद्रिग्रावेति मेघनामसु पाठात्॥ प्रथमजाः प्रजापतेर्वीर्यात् प्रथमं जात ऋतावा सत्यवान् उदकवान्वांगिरसः पश्चाज्जातः। तथा च निगमः। येऽङ्गारा

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आसंस्तेऽङ्गिरसोऽभवन्यदङ्गाराः पुनरवशांता उददीप्यंत तद्बृहस्पतिरभवत् । ऐ० ब्रा० ३. ३४. । इति । हविष्मान् यज्ञभागवान् द्विबर्हंजमा द्वयोर्लोकयोर्द्विगतगमनः प्राघर्मसत् प्रकर्षेण दीप्तस्थाने वर्तमानो नोऽस्माकं पिता पालयिता भवति स बृहस्पतिर्वृषभो वर्षकः सन् रोदसी द्यावापृथिव्यावारोरवीति । अभिगर्जति ॥

॥ अथ द्वितीया ॥

जनाय चिद्य ईवत उ लोकं बृहस्पतिर्देवहूतौ चकार ।

घ्नन्वृत्राणि वि पुरो दर्दरीति जयञ्छत्रूँरमित्रान्पृत्सु साहन् ॥ २

जनाय । चित् । यः । ईवते । ऊं इति । लोकं । बृहस्पतिः ।

देवऽहूतौ । चकार ।

घ्नन् । वृत्राणि । वि । पुरः । दर्दरीति । जयन् । शत्रून् ।

अमित्रान् । पृत्ऽसु । सहन् ॥ २

अपि च यो बृहस्पतिर्देवहूतौ यज्ञे वर्तमानायेवत उपगच्छते स्तोत्रे जनाय लोकं स्थानं चकार करोति । चिदिति पूरणः । स वृत्राण्यावरकाणि तमांसि प्रविदारयन् पृत्सु युद्धेषु शत्रून् जयन् अमित्रान् सहन् अभिभवन् पुर आसुरीः पुरोविदर्दरीति । भृशं विदारयति ॥

॥ अथ तृतीया ॥

बृहस्पतिः समजयद्वसूनि महो व्रजान् गोमतो देव एषः ।

अपः सिषासन्त्स्वरप्रतीतो बृहस्पतिर्हन्त्यमित्रमर्कैः ॥ ३

बृहस्पतिः । सं । अजयत् । वसूनि । महः । व्रजान् ।

गोऽमतः । देवः । एषः ।

अपः । सिसासन् । स्वः । अप्रतिऽइतः । बृहस्पतिः । हंति ।

अमित्रं । अर्कैः ॥ ३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

देवो द्योतमान एव प्रसिद्धो बृहस्पतिर्वसूनि पणीनामसुराणां पशुरूपाणि वा धनानि महो महतो गोमतो गोसहितान् व्रजांश्च समनयत् । तथा च निगमो । बृहस्पति-र्गोवपुषो वलस्य निर्मज्जानं न पर्वणो जभार । ऋग्वे० १०. ६८. ९. । इति । दूरमित पणयो वरीय उद्गावो यंतु मिनतीर्ऋतेन । बृहस्पतिर्या अविंदन्निगूळ्हाः सोमो ग्रावाण ऋषयश्च विप्राः । ऋग्वे० १०. १०८. ११. । इति । किंच बृहस्पतिरप्रतीतः केनाप्यप्रतिगतः सिषासन् संभक्तुकामः सः अर्कैर्ज्योतिर्मद्भिर्मरुद्भिरर्चनसाधनैर्मंत्रै-र्वेति । अर्को मंत्रो भवति यदेनेनार्चंति । नि० ५. ४. । इति यास्कः ॥

॥ इति पंचमस्य प्रथमे सप्तदशो वर्गः ॥

सोमारुद्रेति चतुर्ऋचं त्रयोदशं सूक्तं भरद्वाजस्यार्षं त्रैष्टुभं सोमारुद्रदेवताकं । अनुक्रम्यते च । सोमारुद्रा चतुष्कं सोमारौद्रमिति ॥ विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

सोमा॑रुद्रा धा॒रये॑थामसु॒र्यं१॒॑ प्र वा॑मि॒ष्टयो॒ऽर॑मश्नुवंतु ।

दमे॑दमे स॒प्त रत्ना॒ दधा॑ना॒ शं नो॑ भूतं द्वि॒पदे॒ शं चतु॑ष्पदे ॥ १

सोमा॑रुद्रा । धा॒रये॑थां । अ॒सु॒र्यं॑ । प्र । वा॒ं । इ॒ष्टयः॑ । अरं॑ ।

अ॒श्नु॒वं॒तु ।

दमे॑ऽदमे । स॒प्त । रत्ना॑ । दधा॑ना । शं । नः॒ । भू॒तं । द्वि॒ऽपदे॑ ।

शं । चतुः॑ऽपदे ॥ १

सोमारुद्रा हे सोमारुद्रावसुर्यमसुरसंबंधि बलमस्मासु धारयेथां किंच दमे दमे सर्वेष्वस्मद्गृहेष्विष्टयो यज्ञा वां युवामरमलं पर्याप्तं प्राश्नुवंतु । प्रकर्षेण व्याप्नुवंतु । अपि च युवां सप्त रत्ना रत्नानि दधाना धारयंतौ नोऽस्मभ्यं शं सुखकरौ सुखरूपौ वा भूतं । भवतं । द्विपदेऽस्मदीयाय पुत्रादये चतुष्पदे पश्वादये च शं भूतं । भवतं ॥

॥ अथ द्वितीया ॥

सोमा॑रुद्रा॒ वि वृ॑हतं॒ विषू॑ची॒ममी॑वा॒ या नो॒ गय॑मावि॒वेश॑ ।

आ॒रे बा॑धेथां॒ निर्ऋ॑तिं परा॒चैर॒स्मे भ॒द्रा सौ॑श्रव॒सानि॑ संतु ॥ २

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

सोमारुद्रा । वि । वृहतं । विषूचीं । अमीवा । या । नः ।
गयं । आऽविवेशं ।
आरे । बाधेथां । निःऽऋतिं । पराचैः । अस्मे इति । भद्रा ।
सौश्रवसानि । संतु ॥ २

सोमारुद्रा हे सोमारुद्रौ नोऽस्माकं गयं गृहं गृहगतं प्राणिजातं वा यामीवा यो रोग आविवेश तां विषूचीं विष्वक् सर्वतो गच्छंतीममीवां विवृहतं । वियोजयतं । अपि च निर्ऋतिमलक्ष्मीं पराचैः पराङ्मुखा भवति तथारे दूरे बाधेथां । निवारयतं । अस्मे अस्माकं भद्रा भद्राणि सौश्रवसान्यन्नानि यशांसि च संतु । भवंतु । सुश्रवसो भाव सौश्रवसं । अपरोऽसं यशश्च ॥

॥ अथ तृतीया ॥

सोमारुद्रा युवमेतान्यस्मे विश्वा तनूषु भेषजानि धत्तं ।
अव स्यतं मुंचतं यन्नो अस्ति तनूषु बद्धं कृतमेनो अस्मत् ॥ ३

सोमारुद्रा । युवं । एतानि । अस्मे इति । विश्वा । तनूषु ।
भेषजानि । धत्तं ।
अव । स्यतं । मुंचतं । यत् । नः । अस्ति । तनूषु । बद्धं ।
कृतं । एनः । अस्मत् ॥ ३

हे सोमारुद्रौ युवं युवामस्मे अस्माकं तनूषु शरीरेष्वेतानि प्रसिद्धानि विश्वा सर्वाणि भेषजानि धत्तं । धारयतं । किंच नोऽस्माकं तनूषु शरीरेष्वात्मभिः कृतं बद्धं च यदेनः पापमस्ति विद्यते तत्पापमवस्यतं । अपयतं । क्षपयतं । शिथिलबंधं कुरुतमित्यर्थः । अस्मदस्मत्तो मुंचतं च ॥

॥ अथ चतुर्थी ।

तिग्मायुधौ तिग्महेती सुशेवौ सोमारुद्राविह सु मृळतं नः ।
प्र नो मुंचतं वरुणस्य पाशाद्गोपायतं नः सुमनस्यमाना ॥ ४

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

तिग्मऽआयुधौ। तिग्मऽहेती इति। तिग्मऽहेती। सुऽशेवौ।

सोमारुद्रौ। इह। सु। मृळतं। नः।

प्र। नः। मुंचतं। वरुणस्य। पाशात्। गोपायतं। नः।

सुऽमनस्यमाना ॥ ४

हे सोमारुद्रा तिग्मायुधौ दीप्तधनुष्कौ तिग्महेती तीक्ष्णशरौ सुशेवौ शोभनसुखप्रदौ सुमनस्यमाना शोभनं मनः स्तोतृष्विच्छंतौ सुमनस्यमानौ स्तूयमानौ सुमनसौ वा संतौ युवामिह लोके नोऽस्मान् सु अत्यंतं मृळतं। सुखयतं। नोऽस्मान्वरुणस्य पाशात्प्रमुंचतं। नोऽस्मान् गोपायतं। आपद्भ्यो रक्षतं च ॥

॥ इति पंचमस्य प्रथमेऽष्टादशो वर्गः ॥

जीमूतस्येत्येकोनविंशत्यृचं चतुर्दशं सूक्तं भरद्वाजस्य पायोरार्षं। अनुक्रम्यते च। जीमूतस्यैकोना पायुर्भारद्वाजः संग्रामांगान्यृक्शोऽभितुष्टाव वर्म धनुर्ज्यार्त्न्यौ इषुधिं जगत्यर्द्धं सारथिमर्द्धं रश्मीनश्वान् रथं रथगोपान् जगत्यादि लिंगोक्तदेवता द्वाभ्यामिषूः प्रतोदं हस्तघ्नं द्वाभ्यामिषूः पराः पंक्त्यादयो लिंगोक्तदेवताः संग्रामाशिषोंऽत्याऽनुष्टुब्जीत आजंघंति च द्वे द्वे इति। रथे तिष्ठन् ब्राह्मणास इति चतुर्दशम्यौ जगत्यावंत्या यो नः स्व इत्येषानुष्टुब्जीत आ जंघंत्यारत्नीनावष्टौ यो न स्व इति पंचानुष्टुभो यत्र बाणा इति पंक्तिः शिष्टास्त्रिष्टुभः। आद्यया वर्म स्तूयते द्वितीयया धनुस्तृतीयया ज्या चतुर्थ्यार्त्नी पंचम्येषुधिः। अतः पंचानां वर्माद्या देवताः। षष्ठ्याः पूर्वार्धेन सारथिः स्तूयते। अतः सोऽर्द्धर्चस्तद्देवताकः। उत्तरार्धेन रश्मयः स्तूयंते। सप्तम्यामश्वा अष्टम्या रथो नवम्या रथगोपाः। अतस्तास्तद्देवताकाः। ब्राह्मणास इत्यस्यां ब्राह्मणपितरसोम्यद्यावापृथिवीपूषाणो लिंगोक्तदेवताः। एकादशीद्वादश्याविषुस्तुतिरूपत्वादिषुदेवताके। त्रयोदश्या प्रतोदः। चतुर्दश्या हस्तघ्नः। पंचदशीषोडश्याविषुदेवताके। सप्तदश्या युधभूमिब्रह्मणस्पत्यदितिरूपा लिंगोक्तदेवताः। अष्टादश्याः कवचसोमवरुणा देवताः। अंत्याया देवा ब्रह्म च देवताः ॥ युद्धेऽनेन सूक्तेन राजानं संनाहयेत्। तथा चाश्वलायनः। ईयाभि सत्रपोढ़े राजानं संनाहयेदा त्वाहार्षमंतरभूरिति पश्चाद्रथस्यावस्थाय जीमूतस्येव भवति प्रतीकमिति कवचं प्रयच्छेद् उत्तरया धनुरुत्तरां वाचयेत्स्वयं चतुर्थीं वाचयेत्पंचम्येषुधिं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रयच्छेदभिप्रवर्तमाने पश्चौ सप्रज्याश्वानष्टमीजिष्णुर्येनमाधं वाचयत्यहिरिव भोगैः पर्येति बाहुमिति तलं नह्यमानं । आ० सू० ३. ११. । इति । तथा चावसृष्टा परा पतेतीषून्विसर्गेऽत्र बाणाः संपतंति युध्यमानेषु जपेत्संग्रामिव्याहा । आ० सू० ३. ११. । इति ॥ अध्यायोपाकरणोत्सर्जनयोर्मंडलांत्यहोमे यो नः स्व इत्येषा । आ० सू० ३.५. ॥

॥ तत्र प्रथमा ॥

जीमूतस्येव भवति प्रतीकं यद्वर्मी याति समदामुपस्थे ।
अनाविद्धया तन्वा जय त्वं स त्वा वर्मणो महिमा पिपर्तु ॥ १

जीमूतस्यऽइव । भवति । प्रतीकं । यत् । वर्मी । याति । सऽमदां । उपऽस्थे ।
अनाविद्धया । तन्वा । जय । त्वं । सः । त्वा । वर्मणः । महिमा । पिपर्तु ॥ १

समदां संग्रामाणामुपस्थ उपस्थाने सति यद्यदायं राजा वर्मी कवची याति तदा लोहमयेन वर्मणा संनद्धस्य राज्ञः प्रतीकं रूपं जीमूतस्येव मेघस्येव भवति । मेघस्य यादृशं रूपं तादृशमस्य भवतीत्यर्थः । हे राजन् त्वमनाविद्धया शत्रुभिरपीडितया तन्वा शरीरेण शत्रून् जय । वर्मणः स तादृशो महिमा त्वा त्वां पिपर्तु । पालयतु ॥

॥ अथ द्वितीया ॥

धन्वना गा धन्वनाजिं जयेम धन्वना तीव्राः समदो जयेम ।
धनुः शत्रोरपकामं कृणोति धन्वना सर्वाः प्रदिशो जयेम ॥ २

धन्वना । गाः । धन्वना । आजिं । जयेम । धन्वना । तीव्राः । सऽमदः । जयेम ।
धनुः । शत्रोः । अपऽकामं । कृणोति । धन्वना । सर्वाः । प्रऽदिशः । जयेम ॥ २ ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

धन्वना चापेन गाः पणीनां जयेम। वयं वशीकरवाम। धन्वनाजिं संग्रामं च जयेम। धन्वना तीव्राः उद्धताः समदोऽहंकृतं मदवतीः शत्रुसेनाश्च जयेम। तथा च यास्कः। समदः समदो वात्तेः संमदो वा मदतेः। नि० ९.१७। इति। धनु शत्रोरपकामं कामस्यापायं कृणोति। करोतु। किंच धन्वना वयं सर्वाः प्रदिशः सर्वासु दिक्षु वर्तमानान् शत्रून् जयेम। प्रदिक्शब्दो लक्षणया तत्स्थेषु पुरुषेषु वर्तते मंचाः क्रोशंतीतिवत्। धन्वन्शब्दस्य जयतेश्चाद्युदात्तादयो ॥

॥ अथ तृतीया ॥

वक्ष्यंतीवेदा गनीगंति कर्णं प्रियं सखायं परिषस्वजाना।
योषेव शिंक्ते वितताधि धन्वन् ज्या इयं समने पारयंती ॥ ३

वक्ष्यंतीऽइव। इत्। आ। गनीगंति। कर्णं। प्रियं। सखायं।
परिऽसस्वजाना।
योषाऽइव। शिंक्ते। विऽतता। अधि। धन्वन्। ज्या।
इयं। समने। पारयंती ॥ ३

पूर्वस्य ऋग्द्वयेन कवचधनुषो स्तुते। अत्र ज्यास्तुतिः। इयं ज्या समने संग्रामे धन्वन् धन्वनि। अधीति सप्तम्यर्थानुवादः। वितता विस्तृता पारयंती पारं नयंती प्रियं प्रियकरं वाक्यं वक्ष्यंतीव कर्णं धन्विनो राज्ञः कर्णप्रदेशमागनीगंति। आगच्छति। इदिति पूरणः। योषा नारी सखायं पतिमिव परिष्वजमानेव परिष्वजमाना शिंक्ते। शब्दायते च। तथा च यास्कः। वक्ष्यंतीवागच्छति कर्णं प्रियमिव सखायमिषुं परिष्वजमाना योषेव शिंक्ते शब्दं करोति विततादि धनुषि ज्येयं समने संग्रामे पारयंती पारं नयंती। नि० ९.१८। इति ॥

॥ अथ चतुर्थी ॥

ते आचरंती समनेव योषा मातेव पुत्रं बिभृतामुपस्थे।
अप शत्रून्विध्यतां संविदाने आर्त्नी इमे विस्फुरंती अमित्रान् ॥ ४

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

ते इति॑ । आ॒चर॑न्ती॒ इत्या॑ऽचर॑न्ती । स॒मना॑ऽइव । योषा॑ ।

मा॒ताऽइ॑व । पु॒त्रम् । बि॒भृ॒ताम् । उ॒पऽस्थे॑ ।

अप॑ । शत्रू॑न् । वि॒ध्य॒ता॒म् । सं॒वि॒दा॒ने इति॑ स॒म्ऽवि॒दा॒ने ।

आर्त्नी॒ इति॑ । इ॒मे इति॑ । वि॒स्फु॒रन्ती॒ इति॑ वि॒ऽस्फु॒रन्ती॑ ।

अ॒मित्रा॑न् ॥ ४

अत्र धनुःकोट्योः स्तुतिः । ते धनुःकोटी समनेव समनस्केव योषा पतिसमीपं न त्यजति तद्वदाचरन्तो अभितश्चरन्त्यावुपस्थ उपस्थाने मातेव पुत्रं यथा माता पुत्रं धारयति तद्वद्बिभृतां । राजानं धारयेतां । किंचेमे धनुःकोट्यौ संविदाने संजानाने विसंवादरहिते आर्त्नी गच्छन्त्यौ ॥ ऋ गताविति धातोर्युवं गिभ्यां निरिति वाहुल-कात् निप्रत्ययो धातोरःतंभावश्च । ततः ऋदिकारादक्तिन इति ङीष् । द्विवचनस्य पूर्वसवर्णः ॥ अस्य राज्ञोऽमित्रान् विस्फुरन्ती विहिंसन्त्यौ शत्रूंश्चापविध्यतां । तथा च यास्कः । ते आचरन्ती समनसाविव योषे मातेव पुत्रं बिभृतामुपस्थ उपस्थानेऽपविध्यतां शत्रून् संविदाने आर्त्न्याविमे विघ्नत्यामित्रान् । नि० ९, ३९, । इति ॥

॥ अथ पंचमी ॥

ब॒ह्वी॒नां पि॒ता ब॒हुर॑स्य पु॒त्रश्चि॒श्चा कृ॑णोति॒ सम॑नाव॒गत्य॑ ।

इ॒षु॒धिः संकाः॒ पृत॑नाश्च॒ सर्वाः॑ पृ॒ष्ठे निन॑द्धो जयति॒ प्रसू॑तः ॥ ५

ब॒ह्वी॒नाम् । पि॒ता । ब॒हुः । अ॒स्य॒ । पु॒त्रः । चि॒श्चा । कृ॒णो॒ति॒ ।

सम॑ना । अ॒व॒ऽगत्य॑ ।

इ॒षु॒ऽधिः । संकाः॑ । पृत॑नाः । च॒ । सर्वाः॑ । पृ॒ष्ठे । निऽन॑द्धः ।

ज॒य॒ति॒ । प्रऽसू॑तः ॥ ५

इषुधिरत्र स्तूयते । इषुधिर्बह्वीनामिषूणां पिता भवति । रक्ष्यत्वात्पितेत्युच्यते । इषुशब्दस्योभयलिंगत्वाद्बह्वीनामिति प्रयोगः । अस्येषुधेः पुत्र इषवो बहवो भवन्ति । यथ

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

इषवो यैषुधौ निधीयंते। इषूणां निधानत्वादिषुधिः । तथा च यास्कः। इषुधिरिषूणां निधानं । नि० ९. १३. । इति । चिंचा कृणोति । चिंचेति शब्दानुकृतिः । इषुपूर्द्ध्व-वायैष्विषुधिश्चिंचाशब्दं करोति । किंचेषुधिः पृष्ठे निनद्धो धन्विनो राज्ञः पृष्ठभागे बद्धः सन्ना युद्धान्यवगत्य प्राप्य प्रसूतः प्रसुवन् ॥ कर्तरि निष्ठा ॥ इषून्प्रेरयन् संकाः । सच कायति शब्दायंत इति संकाः पृतनाः । सर्वाः सेनाः जयति ॥

॥ इति पंचमस्य प्रथम एकोनविंशो वर्गः ॥

॥ अथ षष्ठी ॥

रथे तिष्ठन्नयति वाजिनः पुरो यत्रयत्र कामयंते सुषारथिः ।
अभीशूनां महिमानं पनायत मनः पश्चादनु यच्छंति रश्मयः॥६

रथे । तिष्ठन् । नयति वाजिनः । पुरः । यत्रऽयत्र ।
कामयंते । सुऽसारथिः ।
अभीशूनां । महिमानं । पनायत । मनः । पश्चात् । अनु ।
यच्छंति । रश्मयः ॥ ६

अत्र पूर्वार्धे सारथिस्तुतिरुत्तरार्धेऽभीशूनां स्तुतिः । सुषारथिः शोभनसारथी रथे तिष्ठन् पुरः पुरस्ताद्वर्तमानान्वाजिनोऽश्वान्यत्र यत्र नेतुं कामयते तत्र तत्र नयति । ये रथे रश्मयोऽश्वचोदाभ्यां व्याप्य वर्तमानाः पाशाः पश्चात् रथस्य पृष्ठभागे विद्यमाना अश्वान् मनः सारथेर्मनोऽनुकूलमनुयच्छंति । नियच्छंति । तेषामभीशूनां रश्मीनां महिमानं महत्त्वं पनायत । हे जनाः स्तुत । तथा च यास्कः । रथे तिष्ठन्नयति वाजिनः पुरस्तात्सतो यत्र यत्र कामयते सुषारथिः कल्याणसारथिरभीशूनां महिमानं पूजयत मनः पश्चात्सतोऽनुयच्छंति रश्मयः । नि० ९. १६. । इति ॥

॥ अथ सप्तमी ॥

तीव्रान्घोषान्कृण्वते वृषपाणयोऽश्वा रथेभिः सह वाजयंतः ।
अवक्रामंतः प्रपदैरमित्रान् क्षिणंति शत्रूँरनपव्ययंतः ॥ ७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तीव्रान् । घोषान् । कृण्वते । वृषऽपाणयः । अश्वाः ।

रथेभिः । सह । वाजयंतः ।

अवऽक्रामंतः । प्रऽपदैः । अमित्रान् । क्षिणंति । शत्रून् ।

अनपऽव्ययंतः । ७

अश्वस्तुतिः । अश्वा वृषपाणयः पांसूनां वर्षकखुरा रथेभी रथैः सह वाजयंतो वेगमाचरंतस्तीव्रान् उच्चतरान्घोषान् शब्दान् कृण्वते । कुर्वंते । किंचानपव्ययंतोऽपलायमाना अमित्रान् हिंसकान् शत्रून् प्रपदैः पादाग्रैरवक्रामंतः क्षिणंति । हिंसंति ॥

॥ अथाष्टमी ॥

रथवाहनं हविरस्य नाम यत्रायुधं निहितमस्य वर्म ।

तत्रा रथमुप शग्मं सदेम विश्वाहा वयं सुमनस्यमानाः ॥ ८

रथऽवाहनं । हविः । अस्य । नाम । यत्र । आयुधं ।

निऽहितं । अस्य । वर्म ।

तत्र । रथं । उप । शग्मं । सदेम । विश्वाहा । वयं ।

सुऽमनस्यमानाः ॥ ८

अस्य राज्ञो रथवाहनं शत्रून् जित्वा रथेनोह्यमानं धनं हविर्भवति । अग्नेर्हविरिव वर्धकं भवतीत्यर्थः । नामेति संगतिः । यत्र रथेऽस्य राज्ञ आयुधं धनुःशरादिकं वर्म कवचं च निहितं भवति तत्र तं ॥ तत्रेत्यव्ययस्य सर्वविभक्तिकत्वात् ॥ शग्मं सुखकरं विश्वाहा सर्वदा सुमनस्यमानाः सुखमनसो भवंतो वयं पायवो भरद्वाजा उपसदेम । उपगच्छेम ॥

॥ अथ नवमी ॥

स्वादुषंसदः पितरो वयोधाः कृच्छ्रेश्रितः शक्तीवंतो गभीराः ।

चित्रसेना इषुबला अमृध्राः सतोवीरा उरवो व्रातसाहाः ॥ ९

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्वादुऽसंसदः । पितरः । वयःऽधाः । कृच्छ्रेऽश्रितः ।

शक्तिऽवन्तः । गभीराः ।

चित्रऽसेनाः । इषुऽबलाः । अमृध्राः । सतःऽवीराः । उरवः ।

व्रातऽसहाः ॥ ९

अत्र रथगोपस्तुतिः। पितरो रथस्य पालयितारः स्वादुसंसदः शत्रूणां स्वादुन्यन्ने संसीदंतः शत्रूणामशमनसादयंतो वा वयोधा अन्नस्य दातारः कृच्छ्रेश्रित आपदि श्रयंतः शक्तीवंतः । शक्तिरायुधविशेषः । तद्वंतः । शक्तीवंतः शक्तोपेता इति यावत् । यद्वा शक्तिर्बलं । तद्वंतः । गभीरा अनाधृष्या चित्रसेना दर्शनीयसेना इषुबला बाणबला अमृध्रा किंचिदुपगयकाः सतोवीराः प्राप्तवीर्याः । तथा च यास्कः । तिरः सत इति प्राप्तस्य तिरस्तीर्णं भवति सतः संसृतं भवतीति। उरवो महांतो व्रातसाहाः शत्रूणानामभिभवितारो भवंतीति ॥

॥ अथ दशमी ॥

ब्राह्मणास पितरः सोम्यासः शिवे नो द्यावापृथिवी अनेहसा ।

पूषा नः पातु दुरितादृतावृधो रक्षा माकिर्नो अघशंस

ईशत ॥ १०

ब्राह्मणासः । पितरः । सोम्यासः । शिवे इति । नः ।

द्यावापृथिवी इति । अनेहसा ।

पूषा । नः । पातु । दुःऽइतात् । ऋतऽवृधः । रक्ष । माकिः ।

नः । अघऽशंसः । ईशत ॥ १०

ब्राह्मणासो ये ब्राह्मणाः पितर ऋतावृध ऋतस्य यज्ञस्य सत्यस्य वा वर्धयितार सोम्याः सोमार्हाः सोमसंपादिनो वा । तथा च यास्कः । सोम्याः सोमसंपादिनः । नि० ११, १८ । इति । नोऽस्मान्पातु । रक्षेत्युपरितनमेकवचनांतं सत्यपि व्यवधाने

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वञ्चयनीयतया विपरिणतं सदत्र संबध्यतेऽध्याहारस्याभिजघन्यत्वात्। किंचानेहसापापे द्यावापृथिवी द्यावापृथिव्यौ नोऽस्माकं शिवे सुखतमे भवतां। पूषा पोषको देवोऽपि नोऽस्मान्दुरिताद्दुष्कृतात्पापाद्रक्षतु। नोऽस्माकमघशंसः पापशंसः शत्रुरपि माकिरीशत। ईशेत॥

॥ इति पंचमस्य प्रथमे विंशो वर्गः॥

॥ अथैकादशी॥

सुपर्णं वस्ते मृगो अस्या दंतो गोभिः संनद्धा पतति प्रसूता।
यत्रा नरः सं च वि च द्रवंति तत्रास्मभ्यमिषवः शर्म यंसन्॥ ११

सुऽपर्णम्। वस्ते। मृगः। अस्याः। दंतः। गोभिः। संऽनद्धा। पतति। प्रऽसूता।
यत्र। नरः। सम्। च। वि। च। द्रवंति। तत्र। अस्मभ्यम्। इषवः। शर्म। यंसन्॥ ११

अथास्मादिषवः स्तूयंते। सुपर्णं शोभनं वाजं पक्षं वस्ते। इषुर्धारयति। अस्या इषोर्मृगो मृगावयवः शृंगं दंतो भवति। इषवः काश्चिद्दंतमुखा भवंति हि। अथवास्या दंतो मृगः मृगशृंगमयो भवति। किंच गोभिर्गोविकारैः स्नायुभिः संनद्धा सम्यग्बद्धा। अथवा गौरिति ज्यानाम। तया संबद्धा। अत्र वचनव्यत्ययः। तथा च निगमः। वृक्षे वृक्षे नियता मीमयद्गौः॥ ऋग्० १०. २७. २२.। इति। अस्यायमर्थः। वृक्षे वृक्षे धनुषि धनुषि गौर्ज्या नियता मीमयत् शब्दं करोतीति। तथा च यास्कः। वृक्षे वृक्षे धनुषि धनुषि। वृक्षो व्रश्चनाद्वृत्वा क्षां तिष्ठतीति वा। क्षा क्षियतेर्निवासकर्मणः। नियता मीमयद्गौः शब्दं करोति। मीमयतिः शब्दकर्मा। नि० २. ६.। इति प्रसूता प्रेरिता सती पतति। यत्र युद्धे नरः सं च सह च वि च पृथक्च द्रवंति चरंति तत्रास्मभ्यमिषवः शराः शर्म सुखं यंसन्। प्रयच्छंतु। तथा च यास्कः। सुपर्णं वस्त इति वाजानभिप्रेत्य मृगमयोऽस्या दंतो मृगयतेर्वा गोभिः संनद्धा पतति प्रसूतेति व्याख्यातं। यत्र नराः संद्रवंति च निद्रवंति च तत्रास्मभ्यमिषवः शर्म शरणं प्रयच्छंतु। नि० ९. १९.। इति॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ द्वादशी ॥

ऋजीते परि वृंधि नोऽश्मा भवतु नस्तनूः

सोमो अधि ब्रवीतु नोऽदितिः शर्म यच्छतु ॥ १२

ऋजीते । परि । वृंधि । नः । अश्मा । भवतु । नः । तनूः ।

सोमः । अधि । ब्रवीतु । नः । अदितिः । शर्म । यच्छतु ॥ १२

ऋजीते। ऋजु गच्छतीत्यृजीतिरिषुः। हे इषो नोऽस्मान्परिवृंधि। परितो वर्जय। नोऽस्माकं तनूः शरीरमश्मा भवतु। अश्मवद्दृढा भवतु। किंच नोऽस्मभ्यं सोमोऽधिब्रवीतु। पक्षपातेन ब्रवीतु। अदितिरपि शर्म सुखं यच्छतु ॥

॥ अथ त्रयोदशी ॥

आ जंघंति सान्वेषां जघनाँ उप जिघ्नते ।

अश्वाजनि प्रचेतसोऽश्वान्त्समत्सु चोदय ॥ १३

आ । जंघंति । सानु । एषां । जघनान् । उप । जिघ्नते ।

अश्वऽअजनि । प्रऽचेतसः । अश्वान् । समत्ऽसु । चोदय ॥ १३

अश्वाजन्यश्वानां क्षेप्त्रि कशे यया त्वया प्रचेतसः प्रकृष्टज्ञानाः सादिनः सारथयो वैषामश्वानां सानु सानूनि सक्थीन्याजंघंति आघ्नंति। जघनान् जघनान्युपजिघ्नते उपजिघ्नंति सा त्वं समत्सु संग्रामेष्वश्वान् चोदय। प्रेरय। तथा च यास्कः। आघ्नंति सानून्येषां सरणानि सक्थीनि। सक्थि सचतेरासक्तोऽस्मिन् कायः। जघनानि चोपघ्नंति। जघनं जंघन्यतेः। अश्वाजनि प्रचेतसः प्रवृद्धचेतसोऽश्वान् समत्सु समरणेषु संग्रामेषु चोदय। नि० ८. २०.। इति ॥

॥ अथ चतुर्दशी ॥

अहिरिव भोगैः पर्येति बाहुं ज्याया हेतिं परिबाधमानः ।

हस्तघ्नो विश्वा वयुनानि विद्वान्पुमान्पुमांसं परि पातु

विश्वतः ॥ १४

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अहिःऽइव । भोगैः । परि । एति । बाहुं । ज्यायाः । हेतिं ।
परिऽबाधमानः ।
हस्तऽघ्नः । विश्वा । वयुनानि । विद्वान् । पुमान् । पुमांसं ।
परि । पातु । विश्वतः ॥ १४

अत्र धन्विनः प्रकोष्ठे बंधनीयस्य हस्तघ्नस्य स्तुतिः । हस्तघ्नः । हस्ते हस्तसमीपे वर्तिनि प्रकोष्ठे स्थितः सन् ज्यया हन्यत इति हस्तघ्नः ॥ घञर्थे कविधानमिति कः ॥ ज्याया हेतिं ज्याहेतुकां हिंसां परिबाधमानो निवारयन् भोगैः शरीरैः । वचनव्यत्ययः । अहिरिव सर्प इव बाहुं प्रकोष्ठं । लक्षणया बाहुशब्दः प्रकोष्ठे वर्तते । पर्येति । परिवेष्टयति । किंच विश्वा विश्वानि वयुनानि ज्ञानानि ज्ञातव्यानि ॥ मायावयुनमिति तन्नामसु पाठात् ॥ विद्वान् जानन् पुमान्पौरुषोपेतः सन् पुमांसं धन्विनं विश्वतः सर्वतः परिपातु । रक्षतु । तथा च यास्कः अहिरिव भोगैः परिवेष्टयति बाहुं ज्याया वधात्परित्रायमाणो हस्तघ्नः सर्वाणि प्रज्ञानानि प्रजानन् पुमान्पुरुमना भवति पुंसतेर्वा । नि० ९. १५. । इति ॥

॥ अथ पंचदशी ॥

आलांक्ता या रुरुंशीर्ष्ण्यथो यस्या अयो मुखं ।
इदं पर्जन्यरेतस इष्वै देव्यै बृहन्नमः ॥ १५

आलंऽअक्ता । या । रुरुंऽशीर्ष्णी । अथो इति । यस्याः ।
अयः । मुखं ।
इदं । पर्जन्यऽरेतसे । इष्वै । देव्यै । बृहत् । नमः ॥ १५

येषुरालाक्तालेन विषेणाक्ता रुरुशीर्ष्णी भ्रंशितशिरस्का ॥ वर्तेर्हिंसाकर्मणो रुरुशब्दोत्पत्तिः ॥ शृंगशीर्ष्णी वा । अथो किंच यस्या इषोर्मुखमयोऽयोमयं भवति पर्जन्यरेतसे । पर्जन्यरेतो यस्याः सा पर्जन्यरेताः । तस्यै पर्जन्यकार्यभूतायै । शरकांडस्य पर्जन्यजन्यत्वात् । बृहत् बृहत्यै तस्यै देव्या इष्वा इदं नमः क्रियत इति ॥

॥ इति पंचमस्य प्रथमे एकविंशो वर्गः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ षोडशी ॥

अवसृष्टा परा पत शरव्ये ब्रह्मसंशिते।

गच्छामित्रान्प्र पद्यस्व मामीषां कं चनोच्छिषः॥ १६

अवऽसृष्टा। परा। पत। शरव्ये ब्रह्मऽसंशिते।

गच्छ। अमित्रान्। प्र। पद्यस्व। मा। अमीषां। कं।

चन। उत्। शिषः॥ १६

ब्रह्मसंशिते मंत्रेण तीक्ष्णीकृते शरव्ये हिंसाकुशले इषो त्वमवसृष्टा क्षिप्ता परा॰ पत। परागच्छ। इतो देशाद्गच्छ च। अमित्रान्हिंसकान्प्रपद्यस्व। प्राप्नुहि च। अमीषामभित्राणां मध्ये कं चन कंचिदपि मोच्छिषः। अवशिष्टं मा कुरु॥

॥ अथ सप्तदशी ॥

यत्र बाणाः संपतंति कुमारा विशिखा इव।

तत्रा नो ब्रह्मणस्पतिरदितिः शर्म यच्छतु विश्वाहा शर्म यच्छतु॥ १७

यत्र। बाणाः। संऽपतंति। कुमाराः। विशिखाःऽइव।

तत्र। नः। ब्रह्मणः। पतिः। अदितिः। शर्म। यच्छतु।

विश्वाहा। शर्म। यच्छतु॥ १७

यत्र युद्धे कुमारा विशिखा इव मुंडिता इव बाणाः संपतंति तत्र नोऽस्मभ्यं ब्रह्मणस्पतिः शर्म सुखं विश्वाहा सर्वदा यच्छतु। अदितिश्च शर्म यच्छतु। द्विरभ्यासादरार्थः॥

॥ अथाष्टादशी ॥

मर्माणि ते वर्मणा छादयामि सोमस्त्वा राजामृतेनानु वस्तां।

उरोर्वरीयो वरुणस्ते कृणोतु जयंतं त्वानु देवा मदंतु॥ १८

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

मर्माणि। ते। वर्मणा। छादयामि। सोमः। त्वा। राजा।
अमृतेन। अनु। वस्तां।
उरोः। वरीयः। वरुणः। ते। कृणोतु। जयंतं। त्वा।
अनु। देवाः। मदंतु॥ १८

हे राजन् ते त्वदीयानि मर्माणि। येषु स्थानेषु विद्धः सद्यो म्रियते तानि मर्माणि। वर्मणा कवचेन आच्छादयामि। सोमो राजा त्वा त्वामनु वर्मच्छादनानंतरममृतेन वस्तां। आच्छादयतु। किंच वरुणोऽपि ते तव उरोर्वरीय उरुतरं सुखं कृणोतु। करोतु। जयंतं त्वा त्वां देवाः सर्वेऽप्यनुमदंतु। अनुहृष्यंतु॥

॥ अथैकोनविंशी ॥

यो नः स्वो अरणो यश्च निष्ट्यो जिघांसति।
देवास्तं सर्वे धूर्वंतु ब्रह्म वर्म ममांतरं॥ १९
यः। नः। स्वः। अरणः। यः। च। निष्ट्यः। जिघांसति।
देवाः। तं। सर्वे। धूर्वंतु। ब्रह्म। वर्म। मम। अंतरं॥ १९

यः स्वो ज्ञातिररणोऽरममाणो यश्च निष्ट्यस्तिरोभूतो दूरे स्थितो नोऽस्मान् जिघांसति हंतुमिच्छति तं देवाः सर्वे देवा धूर्वंतु। हिंसंतु। ब्रह्म मंत्रो ममांतरं शराणां निवारकं वर्म विद्यते॥

॥ इति पंचमस्य प्रथमे द्वाविंशो वर्गः॥

॥ इति सायणाचार्यविरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये षष्ठे मंडले पंचसप्ततितमं सूक्तं समाप्तम्॥

॥ इति सायणाचार्यविरचिते ग्रामतय्याः षष्ठे मंडले षष्ठोऽनुवाकः समाप्तं मंडलं च॥

———

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

अथ सप्तमं मंडलं।

—o—

अथ सप्तमं मंडलमारभ्यते। तस्मिन्मंडले षडनुवाकाः। प्रथमेऽनुवाके सप्तदश सूक्तानि। तत्राग्निं नर इति पंचविंशत्यृचं प्रथमं सूक्तं। अत्रेयमनुक्रमणिका। अग्नि पंचाधिका विराजोऽष्टादशाद्या इति। सप्तमं मंडलं वसिष्ठोऽपश्यदित्युक्तत्वान्मंडलद्रष्टा वसिष्ठ ऋषिः। आदितोऽष्टादश विराजस्त्र्येकादशकाः शिष्टा अनादेशपरिभाषया त्रिष्टुभः। मंडलादिपरिभाषयाग्निर्देवता॥ विश्वजितीदं सूक्तमाज्यशस्त्रं। सूत्रितं च। विश्वजितोऽग्निं नर इत्याज्यं। आ० ८. ७.। इति॥ अत्र चतुर्वीराख्ये चतूरात्रे चतुर्थेऽहनीदमेव सूक्तमाज्यशस्त्रं। सूत्र्यते हि। अग्निं नर इति चतुर्थं। आ० १०. २.। इति॥ व्यूढे दशरात्रे चतुर्थेऽहनीदं सूक्तं जातवेदस्यनिविद्धानं। सूत्रितं च। अग्निं नर इत्याग्निमारुतं। आ० ८. ८.। इति॥ महाव्रतेऽपीदमाज्यशस्त्रं। तत्रैव पंचमारण्यके सूत्र्यते। आज्यप्रउगे विश्वजितः। ऐ० आ० ५. १.। इति॥ प्रातरनुवाके त्वमग्ने वसूनित्यादीनामनुष्टुभां स्थान आद्यस्तृचः प्रक्षेपणीयः। सूत्र्यते हि। दशमेऽहन्यनुष्टुभां स्थानेऽग्निं नरो दीधितिभिररण्योरिति तृचमाग्नेये क्रतौ। आ० ८. १२.। इति॥ आद्याः षडृचस्त्वग्नेरन्याग्निमारुते शस्त्रे स्तोत्रियानुरूपार्थाः। सूत्रितं च अग्निं नरो दीधितिभिररण्योरिति स्तोत्रियानुरूपौ। आ० ८. १२.। इति॥ मंडलादिहोमेऽप्येषा॥ आधाने तृतीयायामिष्टौ प्रेद्ध इति स्विष्टकृतोऽनुवाक्या॥ सूत्रितं च। प्रेद्धो अग्न इमो अग्न इति संयाज्ये। आ० २. १.। इति॥ एवमन्यत्रापि दीक्षणीयादिषु स्विष्टकृतोऽनुवाक्या। प्रायणीयेष्टौ सेदग्निरग्नीनित्यादिके द्वे स्विष्टकृतो याज्यानुवाक्ये सूत्रितं च। सेदग्निरग्नीँरत्यस्त्वन्यानिति द्वे संयाज्ये। आ० ४. ३.। इति॥ आधाने तृतीयायामिष्टाविमो अग्न इति स्विष्टकृतो याज्या। सूत्रितं च। इमो अग्न इति संयाज्ये। आ० २. १.। इति॥ एवमन्यत्रापि दीक्षणीयादिष्वेषा स्विष्टकृतो याज्या॥ प्रातरनुवाक आग्नेये क्रतौ त्रैष्टुभे छंदस्याश्विनशस्त्रे च त्वमग्ने सुहव इत्याद्याः पंचर्चः। सूत्रितं च। त्वमग्ने सुहवो रण्वसंदृक्। आ० ४. १३.। इति॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तत्र प्रथमा ॥

अग्निं नरो दीधितिभिररण्योर्हस्तच्युती जनयंत प्रशस्तं।

दूरेदृशं गृहपतिमथर्युं ॥ १

अग्निं। नरः। दीधितिऽभिः। अरण्योः। हस्तऽच्युती।

जनयंत। प्रऽशस्तं।

दूरेऽदृशं। गृहऽपतिं। अथर्युं ॥ १

नरो नेतार ऋत्विजः प्रशस्तं प्रकर्षेण स्तुतं दूरेदृशं दूरे दृश्यमानं दूरे पश्यंतं वा गृहपतिं गृहाणां पालकमथर्युं गमनवंतमग्निमरण्योर्विद्यमानं हस्तच्युती हस्तप्रच्युत्या हस्तगत्या दीधितिभिरंगुलिभिर्जनयंत। दीधितयोऽङ्गुलयो भवंति धीयंते कर्मसु। अरणी प्रत्यृत एने अग्निः समरणाज्जायत इति वा। हस्तच्युती हस्तप्रच्युत्याजनयंत प्रशस्तं दूरेदर्शनं गृहपतिमतनवंतं। नि० ५. १०. । इति ॥

॥ अथ द्वितीया ॥

तमग्निमस्ते वसवो न्यृण्वन्त्सुप्रतिचक्षमवसे कुतश्चित्।

दक्षाय्यो यो दम आस नित्यः ॥ २

तं। अग्निं। अस्ते। वसवः। नि। ऋण्वन्। सुऽप्रतिचक्षं।

अवसे। कुतः। चित्।

दक्षाय्यः। यः। दमे। आस। नित्यः ॥ २

योऽग्निर्दमे गृहे दक्षाय्यः पूजनीयो ऋत्विग्भिः समर्धनीयो वा नित्योऽजस्र आस बभूव तं सुप्रतिचक्षं सुप्रतिदर्शनमग्निं कुतश्चित् सर्वस्मादपि भयहेतोरवसे रक्षणाय वसवो वासका ये वसिष्ठा अस्ते गृहे न्यृण्वन्। न्यदधुः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

। अथ तृतीया ।

प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ ।

त्वां शश्वंत उप यंति वाजाः ॥ ३

प्रऽइद्धः । अग्ने । दीदिहि । पुरः । नः । अजस्रया । सूर्म्या ।

यविष्ठ ।

त्वां । शश्वंतः । उप । यंति । वाजाः ॥ ३

यविष्ठ युवतम हे अग्ने प्रेद्धः प्रकर्षेण समिद्धस्त्वमजस्रया अनुपक्षीणया सूर्म्या ज्वालया नोऽस्मदर्थं पुरः पुरस्तादाहवनीयायतने दीदिहि । दीप्यस्व । त्वां शश्वंतो बहवो वाजा अन्नानि हवींष्युपयंति । उपगच्छंति ॥

। अथ चतुर्थी ।

प्र ते अग्नयोऽग्निभ्यो वरं निः सुवीरासः शोशुचंत द्युमंतः ।

यत्रा नरः समासते सुजाताः ॥ ४

प्र । ते । अग्नयः । अग्निऽभ्यः । वरं । निः । सुऽवीरासः ।

शोशुचंत । द्युऽमंतः ।

यत्र । नरः । संऽआसते । सुऽजाताः ॥ ४

अग्निभ्यो लौकिकेभ्योऽग्निभ्यो वरं श्रेष्ठं द्युमंतो दीप्तिमंतः सुवीरासः कल्याणपुत्रपौत्रप्रदास्तेऽग्नयो प्र निः शोशुचंत । प्रकर्षेण नितरां दीप्यंते । यत्र येष्वग्निषु सुजाताः सुजन्मानो नरः कर्मणां नेतारो यजमाना ऋत्विजो वा समासते सहासते ॥

। अथ पंचमी ।

दा नो अग्ने धिया रयिं सुवीरं स्वपत्यं सहस्य प्रशस्तं ।

न यं यावा तरति यातुमावान् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दाः । नः । अग्ने । धिया । रयिं । सुऽवीरं । सुऽअपत्यं ।

सहस्य । पऽशस्तं ।

न । यं । यावा । तरति । यातुऽमावान् ॥ ५

सहसाभिभवनकुशल हे अग्ने सुवीरं शोभनपुत्रपौत्रोपेतं स्वपत्यं शोभनपौत्रोपेतं प्रशस्तं श्रेष्ठं रयिं धनं धिया स्तोत्रेण नोऽस्मभ्यं दाः । देहि । यं रयिं यावाभिगंता यातुमावान् हिंसाया निर्मातः । नलोपाभावश्छांदसः ॥ यद्वा हिंसायुक्तः ॥ परो मतिमंत्वर्थीयः पूरकः ॥ न तरति न बाधते ॥

॥ इति पंचमस्य प्रथमे त्रयोविंशो वर्गः ॥

॥ अथ षष्ठी ॥

उप यमेति युवतिः सुदक्षं दोषा वस्तोर्हविष्मती घृताची ।

उप स्वैनमरमतिर्वसूयुः ॥ ६

उप । यं । एति । युवतिः । सुऽदक्षं । दोषा । वस्तोः ।

हविष्मती । घृताची ।

उप । स्वा । एनं । अरमतिः । वसुऽयुः ॥ ६

सुदक्षं सुबलं यमग्निं हविष्मती हविषा युक्ता घृताची । घृतमंचतीति घृताची स्रुक् । युवतिरग्निना नित्ययुक्ता दोषा वस्तो रात्रावहनि चोपैति उपगच्छति तमेनं स्वा स्वकीयारमतिर्दीप्तिर्वसूयुः स्तोतॄणां धनमिच्छंत्युपैति ॥

॥ अथ सप्तमी ॥

विश्वा अग्नेऽप दहारातीर्येभिस्तपोभिरदहो जरूथं ।

प्र निस्वरं चातयस्वामीवां ॥ ७

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

विश्वा । अग्ने । अप । दह । अरातीः । येभिः । तपःऽभिः ।

अदहः । जरूथं ।

प्र । निऽस्वरं । चातयस्व । अमीवां ॥ ७

हे अग्ने विश्वा विश्वानरातीः शत्रून् तपोभिस्तेजोभिरपदह । येभिर्यैस्तपोभिर्ज-रूथं परुषशब्दकारिणं राक्षसं ॥ रूपातेरूथन्प्रत्यये सति जरूथशब्दनिष्पत्तिः ॥ अदहः दहसि । किंचामीवां रोगं निस्वरं व्यक्तोपतापं यथा भवति तथा ॥ स्वृ शब्दोपतापयोरिति धातुः ॥ प्र चातयस्व । प्रकर्षेण नाशय ॥ चततिर्गत्यर्थो वेति भट्टभास्करमिश्रः ॥

॥ अथाष्टमी ॥

आ यस्ते अग्न इधते अनीकं वसिष्ठ शुक्र दीदिवः पावक ।

उतो न एभिः स्तवथैरिह स्याः ॥ ८

आ । यः । ते । अग्ने । इधते । अनीकं । वसिष्ठ । शुक्र ।

दीदिऽवः । पावक ।

उतो इति । नः । एभिः । स्तवथैः । इह । स्याः ॥ ८

वसिष्ठ श्रेष्ठ शुक्र शुभ्र दीदिवो दीप्त पावक शोधक हे अग्ने ते तवानीकं तेजो य इधते समेधयति तस्येव नोऽस्माकमुतो अपि चैभिः स्तवथैः स्तोत्रैरिहास्मिन्यज्ञे स्याः । भव ॥

॥ अथ नवमी ॥

वि ये ते अग्ने भेजिरे अनीकं मर्ता नरः पित्र्यासः पुरुत्रा ।

उतो न एभिः सुमना इह स्याः ॥ ९

वि । ये । ते । अग्ने । भेजिरे । अनीकं । मर्ताः । नरः ।

पित्र्यासः । पुरुऽत्रा ।

उतो इति । नः । एभिः । सुऽमनाः । इह । स्याः ॥ ९

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे अग्ने ते तवामीके तेजः पित्यासः पितृस्थिता आर्यया वा मतो मनुष्या नरः कर्मणां नेतारो ये यजमानाः पुरुत्रा बहुषु देशेषु विभेजिरे विभजंते । आदधुरिति यावत् । तेषामिव नोऽस्माकमुतो अप्येभिः स्तुतैः सह स्तोत्रैर्वा सुमना अनुग्राह-कमनाः तनू इह यज्ञे स्याः । भव ॥

॥ अथ दशमी ॥

इमे नरो वृत्रहत्येषु शूरा विश्वा अदेवीरभि संतु मायाः ।

ये मे धियं पनयंत प्रशस्तां ॥ १०

इमे । नरः । वृत्रऽहत्येषु । शूराः । विश्वाः । अदेवीः ।

अभि । संतु । मायाः ।

ये । मे । धियं । पनयंत । प्रऽशस्तां ॥ १०

ये मनुष्या मे मदीयां प्रशस्तां प्रकृष्टां धियं कर्म स्तुतिं वा पनयंत स्तुवंति ब्रुवंति वा त इमे मयि स्निग्धा नरो मनुष्या वृत्रहत्येषु संग्रामेषु शूरा अदेवीरासुरीर्विश्वाः सर्वा माया अभिसंतु । अभिभवंतु ॥

॥ इति पंचमस्य प्रथमे चतुर्विंशो वर्गः ॥

॥ अथैकादशी ॥

मा शूने अग्ने नि षदाम नृणां माशेषसोऽवीरता परि त्वा ।

प्रजावतीषु दुर्यासु दुर्य ॥ ११

मा । शूने । अग्ने । नि । सदाम । नृणां । मा । अशेषसः ।

अवीरता । परि । त्वा ।

प्रजाऽवतीषु । दुर्यासु । दुर्य ॥ ११

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

हे अग्ने शून्ये शून्ये पुत्रादिरहिते गृहे मा निषदाम। न निवसाम। गृहाणामन्येषां च गृहे मा निषदाम। दुर्यं गृहेभ्यो हित हे अग्ने अवीरतोऽपुत्राः। तोकस्य शेष इति पुत्रनामसु पाठात्। अवीरतावीरतया शुश्रूषाय संसक्ता त्वां परिचरंतः प्रजावतीष्वेव दुर्यासु गृहेषु निवसाम॥

॥ अथ द्वादशी॥

यमश्वी नित्यमुपयाति यज्ञं प्रजावंतं स्वपत्यं क्षयं नः।
स्वजंन्मना शेषसा वावृधानं॥ १२

यं। अश्वी। नित्यं। उपऽयाति। यज्ञं। प्रजाऽवंतं।
सुऽअपत्यं। क्षयं। नः।
स्वऽजंन्मना। शेषसा। ववृधानं॥ १२

यं यज्ञं यष्टव्यमश्व्यश्ववानग्निर्नित्यमुपयाति तं प्रजावंतं भृत्यादिसहितं स्वपत्यं शोभनसंतानोपेतं स्वजन्मनौरसेन शेषसा पुत्रेण ववृधानं वर्धमानं क्षयं गृहं नोऽस्मभ्यं हे अग्ने देहीति शेषः॥

॥ अथ त्रयोदशी॥

पाहि नो अग्ने रक्षसो अजुंष्टात्पाहि धूर्तेररंरुषो अघायोः।
त्वा युजा पृंतनायूँरभि ष्यां॥ १३

पाहि। नः। अग्ने। रक्षसः। अजुंष्टात्। पाहि। धूर्तेः।
अररुषः। अघऽयोः।
त्वा। युजा। पृतनाऽयून्। अभि। स्यां॥ १३

हे अग्ने नोऽस्मानजुष्टादप्रीतिविषयाद्रक्षसो राक्षसात्पाहि। रक्ष। किंचाररुषोऽदातुरघायोः पापमिच्छतो धूर्तेर्हिंसकात्पाहि। अपि च त्वा त्वया युजा सहायभूतेन पृतनायून् पृतनाकामानभिष्यां। अभिभवेयं॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ चतुर्दशी ॥

सेद॒ग्निर॒ग्नीँरत्य॑स्त्व॒न्यान्यत्र॑ वा॒जी तन॑यो वी॒ळुपा॑णिः ।

स॒हस्र॑पाथा अ॒क्षरा॑ स॒मेति॑ ॥ १४

सः । इत् । अ॒ग्निः । अ॒ग्नीन् । अति॑ । अ॒स्तु॒ । अ॒न्यान् ।

यत्र॑ । वा॒जी । तन॑यः । वी॒ळुऽपा॑णिः ।

स॒हस्र॑ऽपाथाः । अ॒क्षरा॑ । स॒म्ऽएति॑ ॥ १४

स इद् स एवाग्निराहवनीयादिरस्मदीयोऽन्यानितरानन्यदीयानग्नीनत्यस्तु । अतिभवतु । यत्र यस्मिन्नग्नौ वाज्यन्नवान् बलवान्वा वीळुपाणिर्दृढहस्तः । वीळु च्यौत्नमिति बलनामसु पाठात् । सहस्रपाथा बह्वन्नो बहुस्थानो वा बहूदको वा तनयोऽस्मत्पुत्रोऽक्षराक्षरेण स्वरसहितेन स्तोत्रेण समेति सम्यक् परिचरतीति । तमेवंभूतमेवाग्निरन्यदीयानग्नीनभिभवतीति भावः ॥

॥ अथ पंचदशी ॥

सेद॒ग्निर्यो व॑नुष्य॒तो नि॒पाति॑ स॒मेद्धा॑र॒मंह॑स उरु॒ष्यात् ।

सु॒जा॒तासः॒ परि॑ चरंति वी॒राः ॥ १५

सः । इत् । अ॒ग्निः । यः । व॒नु॒ष्य॒तः । नि॒ऽपाति॑ । स॒म्ऽए॒द्धार॑म् ।

अंह॑सः । उ॒रु॒ष्यात् ।

सु॒ऽजा॒तास॑ः । परि॑ । च॒रं॒ति॒ । वी॒राः ॥ १५

यः समेद्धारं प्रबोधकं वनुष्यतो हिंसकात् । वनुष्यतिर्हंतिकर्मेति यास्कः । उरुष्यात् अधिकादंहसः पापाच्च निपाति अत्यंतं रक्षति । यं च सुजातासः सुजन्मान एव वीराः स्तोतारः सुता वा परिचरंति स इद् स एवाग्निः ॥

॥ इति पंचमस्य प्रथमे पंचविंशो वर्गः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ षोडशी ॥

अयं सो अग्निराहुतः पुरुत्रा यमीशानः समिदिंधे हविष्मान्।

परि यमेत्यध्वरेषु होता॥ १६

अयं। सः। अग्निः। आऽहुतः। पुरुऽत्रा। यं। ईशानः।

सं। इत्। इंधे। हविष्मान्।

परिं। यं। एतिं। अध्वरेषु। होता॥ १६

यमग्निमीशानः सन्नेव ऐश्वर्यमिच्छन् वा हविष्मान् यजमानः समिंधे सम्यक् दीपयति। यं चाध्वरेषु हिंसारहितेषु यज्ञेषु होता देवानामाह्वाता पर्येति परिगच्छति सोऽयमग्निः पुरुत्रा बहुषु देशेषु बहुषु यज्ञेषु वाहुत आहुतिभिरभिहुतः॥

॥ अथ सप्तदशी ॥

त्वे अंग्न आहवंनानि भूरीशानास आ जुहुयाम नित्या।

उभा कृण्वंतो वहतू मियेधे॥ १७

त्वे इतिं। अग्ने। आऽहवंनानि। भूरिं। ईशानासः। आ।

जुहुयाम। नित्या।

उभा। कृण्वंतः। वहतू इति। मियेधे॥ १७

हे अग्ने त्वे त्वयीशानासो धनानामीश्वराः संतो नित्या नित्यान्यग्निहोत्रादीन्युभौ वहतू वहनहेतू स्तोत्रं यज्ञं च कृण्वंतः कुर्वंतो मियेधे यज्ञे भूरि बह्वन्याहवनानि हवींष्याजुहुयाम। आजुहुयाम॥

॥ अथाष्टादशी ॥

इमो अंग्ने वीततंमानि हव्याजंस्रो वक्षि देवतांतिमच्छं।

प्रति न ईं सुरभीणिं व्यंतु॥ १८

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

द्यूमो द्रुतिं। अग्ने। वीतऽतमानि। हव्या। अजस्रः।
वक्षि। देवऽतांतिं। अच्छं।
प्रति। नः। ईं। सुरभीणि। व्यंतु॥ १८

हे अग्ने त्वमजस्रोऽनवरतः सन् द्रुमो द्रुमानि वीततमान्यतिशयेन कांतानि हव्या हव्यानि देवतातिं देवानां समूहमभि वक्षि। वह। अच्छ गच्छ च। नोऽस्मदीयानि सुरभीणि शोभनानीमेतानि हव्यानि देवाः प्रतिः प्रति व्यंतु। प्रत्येकं कामयंतां॥

॥ अथैकोनविंशी ॥

मा नो अग्नेऽवीरते परा दा दुर्वाससेऽमतये मा नो अस्यै।
मा नः क्षुधे मा रक्षस ऋतावो मा नो दमे मा वन आ
जुहूर्थाः॥ १९

मा। नः। अग्ने। अवीरते। परा। दाः। दुःऽवाससे।
अमतये। मा। नः। अस्यै।
मा। नः। क्षुधे। मा। रक्षसे। ऋतऽवः। मा। नः। दमे।
मा। वने। आ। जुहूर्थाः॥ १९

हे अग्ने नोऽस्मानवीरतेऽपुत्रतायै मा परादाः। मा देहि। दुर्वाससे दुष्टवस्त्राय च नो मा परादाः। अपि अमतयेऽभिशान्त्यै नोऽस्मान्मा परादाः। क्षुधेऽशनायायै नोऽस्मान्मा च परादाः। रक्षसे यक्षिने चास्मान्मा परादाः। हे ऋतावः सत्यवन्नग्ने नोऽस्मान् दमे गृहे मा जुहूर्थाः। मा हिंसीः॥ हुर्च्छा कौटिल्ये इति धातुः॥ वने चास्मान्मा जुहूर्थाः॥

॥ अथ विंशी ॥

नू मे ब्रह्माण्यग्न उच्छशाधि त्वं देव मघवद्भ्यः सुषूदः।
रातौ स्यामोभयास आ ते यूयं पात स्वस्तिभिः सदा नः॥ २०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

नु। मे। ब्रह्माणि। अग्ने। उत्। शशाधि। त्वं। देव।

मघवत्ऽभ्यः। सुसूदः।

रातौ। स्याम। उभयासः। आ। ते। यूयं। पात।

स्वस्तिऽभिः। सदा। नः॥ २०

हे अग्ने मे मम मदर्थं ब्रह्माण्यन्नानि नु क्षिप्रमुच्छशाधि। उत्कर्षेण शोधितानि कुरु। किंच हे देव द्योतमानाग्ने मघवद्भ्यो हविष्मद्भ्योऽस्मभ्यं सुषूदः। अन्नानि प्रेरय। ते त्वदीयायां रातौ दाने उभयासः स्तोतारः यष्टारश्च वयम स्तुवंतो यजमानाश्च वयमा स्याम। अन्वयं भवेम। नोऽस्मान्यूयं त्वं त्वत्परिवाराश्च सर्वे स्वस्तिभिरविनाशिभिर्मंगलैः। तथा च यास्कः। स्वस्तीत्यविनाशनामास्तिरभि॰ पूजितः स्वस्तीति। सदा पात। रक्षत॥

॥ इति पंचमस्य प्रथमे षड्विंशो वर्गः॥

॥ अथैकविंशी॥

त्वमग्ने सुहवो रण्वसंदृक्सुदीती सूनो सहसो दिदीहि।

मा त्वे सचा तनये नित्य आ धङ्मा वीरो अस्मन्नर्यो वि

दासीत्॥ २१

त्वं। अग्ने। सुऽहवः। रण्वऽसंदृक्। सुऽदीती। सूनो इति।

सहसः। दिदीहि।

मा। त्वे इति। सचा। तनये। नित्ये। आ। धक्। मा।

वीरः। अस्मत्। नर्यः। वि। दासीत्॥ २१

सहसः सूनो सहसः सुत हे अग्ने सुहवः स्वाह्वानो रण्वसंदृक् रमणीयसंदर्शनस्त्वं सुदीती शोभनया दीप्त्या दिदीहि। दीप्यस्व। किंच तनये नित्य औरसे पुत्रे त्वे त्वं सचा सहायभूतो माधक्। माभिधाक्षीः। अपि चास्मद् युष्मद्भूतोऽस्माकं वा॥ षष्ठ्यर्थे पंचमी॥ वीरः पुत्रो नर्यो नरहितो मा विदासीत्। मोपक्षीयत॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ द्वाविंशी ॥

मा नो अग्ने दुर्भृतये सचैषु देवेद्धेष्वग्निषु प्र वोचः ।

मा ते अस्मान्दुर्मतयो भृमाच्चिद्देवस्य सूनो सहसो नशंत ॥ २२

मा । नः । अग्ने । दुःऽभृतये । सचा । एषु । देवऽइद्धेषु

अग्निषु । प्र । वोचः ।

मा । ते । अस्मान् । दुःऽमतयः । भृमात् । चित् । देवस्य ।

सूनो इति । सहसः । नशंत ॥ २२

हे अग्ने सखा सहायभूतस्त्वं देवेभ्यृत्विग्भिः समिद्धेष्वेष्वग्निषु दुर्भृतये दुष्टभरणाय नोऽस्मान्मा प्रवोचः । न ब्रूहि । त्वत्सहायभूता अग्नयो यथा पापकृद्भ्यो बिभ्युस्तथा ब्रूहीत्यर्थः । किंच सहसः सूनो हे बलस्य पुत्राग्ने देवस्य द्योतमानस्य ते तव दुर्मतयो निग्रहबुद्धयो भृमाच्चित् भ्रमादपि ॥ अत्र संप्रसारणं छांदसं ॥ प्रमादादपीत्यर्थः । अस्मान्मा नशंत । मा व्याप्नुवंतु ॥ नशदिति व्याप्तिकर्मसु पाठात् ॥

॥ अथ त्रयोविंशी ॥

स मर्तो अग्ने स्वनीक रेवानमर्त्ये य आजुहोति हव्यं ।

स देवता वसुवनिं दधाति यं सूरिरर्थी पृच्छमान एति ॥ २३

सः । मर्तः । अग्ने । सुऽअनीक । रेवान् । अमर्त्ये । यः

आऽजुहोति । हव्यं ।

सः । देवता । वसुऽवनिं । दधाति । यं । सूरिः । अर्थी ।

पृच्छमानः । एति ॥ २३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यस्मीक स्तोतुः हे अग्ने अमर्त्येऽमनुष्ये देवतात्मनि त्वयि हव्यं हविर्यं आप्नोति स मर्तो मनुष्यो देवान् धनदानाय इति । तं मर्त्यं स्तुतिः प्राप्नोऽर्थी धनादिकामः पृच्छमानोऽस्मादुदारः क्वास्त इति पृच्छति अभिगच्छति स एव मनुष्यो देवता देवताभ्यो मनुष्यनिं धनपोषं ददाति । धारयति । यद्वा स देवताग्निर्मनुष्यनि धनधानं दधाति धारयति दयति सूरिः स्तोतार्थी प्रयोजनवान् पृच्छमानः कोऽसावग्निरिति पृच्छमान इति ॥

॥ अथ चतुर्विंशी ॥

महो नो अग्ने सुवितस्य विद्वान्रयिं सूरिभ्य आ वहा बृहन्तं ।

येन वयं संहसावन्मदेमाविंक्षितास आयुषा सुवीराः ॥ २४

महः । नः । अग्ने । सुवितस्य । विद्वान् । रयिं । सूरिऽभ्यः ।

आ । वह । बृहन्तं ।

येन । वयं । सहसाऽवन् । मदेम । अविंऽक्षितासः । आयुषा ।

सुऽवीराः ॥ २४

हे अग्ने नोऽस्मदीयस्य महो महतः सुवितस्य कल्याणस्य कर्मणो विद्वान् । अस्मदीयं कल्याणं कर्म जानन्नित्यर्थः । त्वं सूरिभ्यः स्तोतृभ्योऽस्मभ्यं बृहन्तं महान्तं रयिं धनमावह । रयिमेव विशिनष्टि । हे सहसावन् बलवन्नग्ने येन धनेन वयं स्तोतारोऽविक्षितासोऽविक्षीणा आयुषा पूर्णायुषः सुवीराः कल्याणपुत्रपौत्राश्च सन्तो मदेम हृष्येम ॥

॥ अथ पंचविंशी ॥

नू मे ब्रह्माण्यग्न उच्छशाधि त्वं देव मघवद्भ्यः सुषूदः ।

रातौ स्यामोभयास आ ते यूयं पात स्वस्तिभिः सदा नः ॥ २५

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

शु। मे। ब्रह्माणि। अग्ने। उत्। शशाधि। त्वं। देव।
मघवत्ऽभ्यः। सुसूदः।
रातौ। स्याम। उभयासः। आ। ते। यूयं। पात।
स्वस्तिऽभिः। सदा। नः॥ २५

इयमृक् प्रागेव व्याख्याता॥

॥ इति पंचमस्य प्रथमे सप्तविंशो वर्गः॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये पंचमाष्टके प्रथमोऽध्यायः समाप्तः॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri.

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥

जुषस्व न इत्येकादशर्चं द्वितीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं। आप्रीसूक्तत्वादिदं तनूनपाद्वर्जितं। समिद्धाद्या अग्निविशेषाः प्रत्यृचं देवता उक्ताः। तथा चानुक्रम्यते। जुषस्वैकादशाप्रियमिति॥ पशाविष्टाविदमाप्रीसूक्तं। सूत्रितं च। जुषस्व न समिधमिति वसिष्ठानां। आ० ३. २। इति॥ पत्नीसंयाजे त्वाष्ट्रयागस्य याज्या त्वाष्ट्रे पशावपि पुरोडाशस्यानुवाक्येयमिति पूर्वमुक्तं॥

॥ तत्र प्रथमामृचमाह ॥

जुषस्व नः समिधमग्ने अद्य शोचा बृहद्यजतं धूममृण्वन्।
उप स्पृश दिव्यं सानु स्तूपैः सं रश्मिभिस्ततनः सूर्यस्य॥ १

जुषस्व। नः। सम्ऽइधं। अग्ने। अद्य। शोच। बृहत्।
यजतं। धूमं। ऋण्वन्।
उप। स्पृश। दिव्यं। सानु। स्तूपैः। सं। रश्मिऽभिः।
ततनः। सूर्यस्य॥ १

हे अग्ने नोऽस्माकं समिधमद्य जुषस्व। सेवस्व। यजतं यजनीयं प्रशस्तं धूममृण्वन् प्रेरयन् बृहदत्यंतं शोच। दीप्यस्व च। किंच दिव्यमंतरिक्षभवं सानु समुच्छ्रितं स्तूपैस्त्वं रश्मिभिरुपस्पृश। अपि च सूर्यस्य रश्मिभिस्तेजोभिः संततनः। संगच्छस्व॥

॥ अथ द्वितीया॥

नराशंसस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैः।
ये सुक्रतवः शुचयो धियंधाः स्वदंति देवा उभयानि हव्या॥ २

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

नराशंसस्य। महिमानं। एषां। उपं। स्तोषाम।
यजतस्यं। यज्ञैः।
ये। सुऽक्रतवः। शुचयः। धियंऽधाः। स्वदंति। देवाः।
उभयानि। हव्या॥ २

ये देवाः सुक्रतवः सुप्रज्ञाः सुकर्माणो वा शुचयो दीप्तिमंतो धियंधाः कर्मणां धारयितार उभयानि सौमिकानि च हविःसंस्थादीनि च हव्या हव्यानि स्वदंति स्वदयंति भक्षयंति तेषामेषां मध्ये यज्ञैर्यजनीयैः स्तोत्रैर्वा यजतस्य यजनीयस्य नराशंसस्य नरैः प्रशंसनीयस्याग्निविशेषस्य महिमानं महत्त्वमुपस्तोषाम। वयमुपस्तुमः। तथा च यास्कः। नरा आसीनाः शंसंति। अग्निरिति शाकपूणिर्नरैः प्रशस्यो भवति। तस्यैषा भवति। नराशंसस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैर्ये सुकर्माणः शुचयो धियं धारयितारः स्वदयंतु देवा उभयानि हवींषि सोमं चेतराणि च। नि० ८. ६.। इति॥

॥ अथ तृतीया॥

ईळेन्यं वो असुरं सुदक्षमंतर्दूतं रोदसी सत्यवाचं।
मनुष्वदग्निं मनुना समिद्धं समध्वराय सदमिन्महेम॥ ३

ईळेन्यं। वः। असुरं। सुऽदक्षं। अंतः। दूतं।
रोदसी इति। सत्यऽवाचं।
मनुष्वत्। अग्निं। मनुना। संऽइद्धं। सं। अध्वरायं।
सदं। इत्। महेम॥ ३

हे अध्वर्यवो वो यूयमीळेन्यं स्तुत्यमसुरं बलवंतं सुदक्षं सुप्रज्ञं रोदसी रोदस्योरंतर्मध्ये दूतं देवानां हविर्वहनार्थं चरंतं सत्यवाचं मनुष्वन्मनुष्यवन्मनुना समिद्धं यथेदानीं मनुष्यैः समिध्यते तथा पूर्वं मनुना प्रजापतिना समिद्धमग्निमध्वराय यज्ञाय सदमित्सदैव संमहेम। संपूजयत॥ मध्यमपुरुषस्य व्यत्ययेनोत्तमपुरुषत्वं॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ चतुर्थी ॥

सपर्यवो भरमाणा अभिज्ञु प्र वृंजते नमसा बर्हिरग्नौ ।

आजुह्वाना घृतपृष्ठं पृषद्वदध्वर्यवो हविषा मर्जयध्वं ॥ ४

सपर्यवः । भरमाणाः । अभिऽज्ञु । प्र । वृंजते । नमसा । बर्हिः । अग्नौ ।

आऽजुह्वानाः । घृतऽपृष्ठं । पृषत्ऽवत् । अध्वर्यवः । हविषा । मर्जयध्वं ॥ ४

सपर्यवः परिचरणमिच्छंतोऽभिज्ञु अभिगतजानुकं भरमाणाः पादैर्भरंतो बर्हिर्नमसा हविषा सहाग्नौ प्रवृंजते । प्रभरंति । तदेव विशदयति । हे अध्वर्यवो घृतपृष्ठं घृतसंसिक्तपृष्ठं पृषद्वत् स्थूलबिंदुभिर्युक्तं बर्हिर्हविषा सहाजुह्वाना मर्जयध्वं । अग्निं परिचरत ॥

॥ अथ पंचमी ॥

स्वाध्यो वि दुरो देवयंतोऽशिश्रयू रथयुर्देवताता ।

पूर्वी शिशुं न मातरा रिहाणे समग्रुवो न समनेष्वंजन् ॥ ५

सुऽआध्यः । वि । दुरः । देवऽयंतः । अशिश्रयुः । रथऽयुः । देवऽताता ।

पूर्वी इति । शिशुं । न । मातरा । रिहाणे इति । सं । अग्रुवः । न । समनेषु । अंजन् ॥ ५

स्वाध्यः सुकर्माणो देवयंतो देवकामा यजमाना रथयू रथकामाश्च ॥ अपि पूर्वसवर्णो छांदसः ॥ देवताता देवतातौ यज्ञे दुरो यज्ञगृहस्य द्वाराणि व्यशिश्रयुः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

श्राश्रितयः। किंच समनेषु यज्ञेषु पूर्वी प्राचीने प्रागग्रे जुहूपभृतौ धियं न मत्समिव मातरौ गावौ रिहाणे अग्निं लिहाने यद् यो न यथा नद्यः चेका समुद्रेण तद्वत्संगतम्। अध्वर्यव आज्येन समंजंति ॥

॥ इति पंचमस्य द्वितीये प्रथमो वर्गः ॥

॥ अथ षष्ठी ॥

उत योषणे दिव्ये मही न उषासानक्ता सुदुघेव धेनुः ।

बर्हिषदा पुरुहूते मघोनी आ यज्ञिये सुविताय श्रयेतां ॥ ६

उत । योषणे इति । दिव्ये इति । मही इति । नः ।

उषसानक्ता । सुदुघाऽइव । धेनुः ।

बर्हिऽसदा । पुरुहूते इति पुरुऽहूते । मघोनी इति । आ ।

यज्ञिये इति । सुविताय । श्रयेतां ॥ ६

उतापि च योषणे युवत्यौ स्वारूपे वा दिव्ये दिवि भवे मही महत्यौ बर्हिषदा बर्हिषि सीदंत्यौ पुरुहूते बहुभिः स्तुते मघोनी धनवत्यौ यज्ञिये यज्ञार्हे उषासानक्ताऽहोरात्रे सुदुघेव धेनुः कामदुग्धेनुरिव नोऽस्मान् सुविताय कल्याणायाश्रयेतां ॥

॥ अथ सप्तमी ॥

विप्रा यज्ञेषु मानुषेषु कारू मन्ये वां जातवेदसा यजध्यै ।

ऊर्ध्वं नो अध्वरं कृतं हवेषु ता देवेषु वनथो वार्याणि ॥ ७

विप्रा । यज्ञेषु । मानुषेषु । कारू इति । मन्ये । वां ।

जातऽवेदसा । यजध्यै ।

ऊर्ध्वं । नः । अध्वरं । कृतं । हवेषु । ता । देवेषु । वनथः ।

वार्याणि ॥ ७

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

हे दैव्यौ होतारौ विप्रा मेधाविनौ जातवेदसा जातधनौ मानुषेषु मनुष्यैः क्रियमाणेषु यज्ञेषु कारू कर्मणां कर्तारौ वां युवां यजध्यै यष्टुं मन्ये। स्तौमि। किंच हवेषु ह्वानेषु स्तोत्रेषु सत्सु नोऽस्माकमध्वरमकुटिलं यज्ञमूर्ध्वं देवाभिमुखं कृतं। कृणुतं च। अपि च ता तौ युवां देवेषु विद्यमानानि वार्याणि धनानि वनथः। संभजथः। तान्यस्मभ्यं संप्रयच्छथ इत्यर्थः॥

॥ अथाष्टमी ॥

आ भारती भारतीभिः सजोषा इळा देवैर्मनुष्येभिरग्निः।
सरस्वती सारस्वतेभिरर्वाक् तिस्रो देवीर्बर्हिरेदं सदंतु॥ ८

आ। भारती। भारतीभिः। सऽजोषाः। इळा। देवैः।
मनुष्येभिः। अग्निः।
सरस्वती। सारस्वतेभिः। अर्वाक्। तिस्रः। देवीः। बर्हिः।
आ। इदं। सदंतु॥ ८

एतदाद्यमृक्चतुष्टयं द्वितीयाष्टकस्याष्टमाध्याये। म० १, ४, ८,। यद्यपि व्याख्यातं तथापि व्यवधानात्प्रचेपतोऽत्रापि व्याख्यायते। भारती भरतस्यादित्यस्य पत्नी भारतीभिः सजोषाः सहितेळा मनुष्येभिर्मनुष्यलोकभवैर्देवैः सार्धमग्निरागच्छतु। सरस्वती सारस्वतेभिः सारस्वतैर्मध्यमस्थानैर्देवैः सार्धमर्वागस्मदभिमुखमागच्छतु। आगत्य तिस्रो देवीर्देव्यः॥ प्रथमार्थे द्वितीया॥ बर्हिरिदमासदंतु॥

॥ अथ नवमी ॥

तन्नस्तुरीपमध पोषयित्नु देव त्वष्टर्वि रराणः स्यस्व।
यतो वीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः॥ ९

तत्। नः। तुरीपं। अध। पोषयित्नु। देव। त्वष्टः। वि।
रराणः। स्यस्वेति स्यस्व।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

यतः। वीरः। कर्मण्यः। सुऽदक्षः। युक्तऽग्रावा। जायते।

देवऽकामः॥ ९

देव द्योतमान हे त्वष्टः रराणो रममाणस्त्वं नोऽस्माकं तुरीपं त्वरितमाप्नु यत् पोषयित्नु पोषकरं तद्रेतो वि स्य। विशेषेणावसानं प्रापय। विमोचयेत्यर्थः। यतो रेतसः कर्मण्यः कर्मसु साधुः सुदक्षः सुबलो युक्तग्रावा सोमसुद् देवकामो वीरः पुत्रो जायते॥

॥ अथ दशमी॥

वनस्पतेऽव सृजोप देवानग्निर्हविः शमिता सूदयाति।

सेदु होता सत्यतरो यजाति यथा देवानां जनिमानि वेद॥ १०

वनस्पते। अव। सृज। उप। देवान्। अग्निः। हविः।

शमिता। सूदयाति।

सः। इत्। ऊं इति। होता। सत्यऽतरः। यजाति। यथा।

देवानां। जनिमानि। वेद॥ १०

हे वनस्पते देवानुपावसृज। अथ परोक्षस्तुतिः। अग्निर्वनस्पतिः शमिता शामित्ररूपः सन् हवि सूदयाति। प्रेरयतु। सेदु एव वनस्पतिर्होता देवानामाह्वाता सत्यतरोऽपि सन् यजाति। यजतु। देवानां जनिमानि जननानि यथा स्वयं वेद तथा॥

॥ अथैकादशी॥

आ याह्यग्ने समिधानो अर्वाङिन्द्रेण देवैः सरथं तुरेभिः।

बर्हिर्न आस्तामदितिः सुपुत्रा स्वाहा देवा अमृता मादयंतां॥ ११

आ। याहि। अग्ने। सम्ऽइधानः। अर्वाङ्। इन्द्रेण। देवैः।

सऽरथं। तुरेभिः।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

बर्हिः। नः। आस्तां। अदितिः। सुऽपुत्रा। स्वाहां। देवाः।

अमृताः। मादयंतां ॥ ११

हे अग्ने सन्निधान अस्रोगमदभिमुखमस्वभिंद्रेण त्वरेभिरुदितैर्देवैश्च सरथं समान-रथं यथा भवति तथायाहि। आगच्छ। नोऽस्माकं बर्हिरभ्यास्तामदितिश्च सुपुत्रा कल्याणपुत्रा। स्वाहा देवाश्च सर्वेऽमृताः संतो मादयंतामिति ॥

॥ इति पंचमस्य द्वितीये द्वितीयो वर्गः ॥

अग्निं वो देवमिति दशर्चं तृतीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयं। अत्रेयमनु-क्रमणिका। अग्निं वो दशेति ॥ अग्निं वो देवमित्येतदादीनि दश सूक्तानि तृतीयचतुर्थवर्जितानि प्रातरनुवाक आग्नेये क्रतौ त्रैष्टुभे छंदस्याश्विनशस्त्रे च विनियुक्तानि। सूत्रितं च। अग्निं वो देवमिति दशानां तृतीयचतुर्थे उद्धरेत्। आ० ४. १३. । इति ॥ कुंडपायिनामयन उपसदांक्रमेऽप्येतदेव सूक्तमाज्यशस्त्रं। सूत्र्यते हि। द्वितीयस्याग्निं वो देवमित्याज्यं। आ० १२. १०. । इति ॥

॥ तत्र प्रथमा ॥

अग्नि वो देवमग्निभिः सजोषा यजिष्ठं दूतमध्वरे कृणुध्वं।

यो मर्त्येषु निध्रुविर्ऋतावा तपुर्मूर्धा घृतान्नः पावकः ॥ १

अग्निं। वः। देवं। अग्निऽभिः। सऽजोषाः। यजिष्ठं। दूतं।

अध्वरे। कृणुध्वं।

यः। मर्त्येषु। निऽध्रुविः। ऋतऽवा। तपुःऽमूर्धा। घृतऽअन्नः।

पावकः ॥ १

हे देवा वो यूयं देवं द्योतमानमग्निमिरन्यैरग्निभिः सजोषाः सजोषसः संगताः ॥ द्वितीयार्थे प्रथमा ॥ यजिष्ठं यष्टृतममग्निमध्वरे कौटिल्यरहिते यज्ञे दूतं कृणुध्वं। कुरुत। योऽग्निर्देवोऽपि सन् मर्त्येषु निध्रुविर्नितरां ध्रुवस्तिष्ठति ऋतावा यज्ञवान् सत्यवान्वा तपुर्मूर्धा तापकतेजा घृतान्नः पावकः शोधकश्च भवति ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ द्वितीया ॥

प्रोथदश्वो न यवसेऽविष्यन्यदा महः संवरणाद्व्यस्थात्।

आदस्य वातो अनु वाति शोचिरध स्म ते व्रजनं कृष्णमस्ति ॥२

प्रोथत्। अश्वः। न। यवसे। अविष्यन्। यदा। महः।

संऽवरणात्। वि। अस्थात्।

आत्। अस्य। वातः। अनु। वाति। शोचिः। अध। स्म।

ते। व्रजनम्। कृष्णम्। अस्ति॥ २

यवसे घासेऽविष्यन् भक्षयन् प्रोथत् शब्दं कुर्वन् संचरन्नश्वो न अश्व इव महो महतः संवरणान्निरोधात्। दावरूपोऽग्निर्यदा व्यस्थात् अतसेषु वृक्षेषु वितिष्ठते आत्तदानीमस्याग्नेः शोचिर्दीप्तिरनु वातो वाति। अनु प्रत्यक्षस्तुतिः। अधानंतरं हे अग्ने ते तव व्रजनं वर्त्म कृष्णमस्ति। भवति। स्मेति पूरणः॥

॥ अथ तृतीया ॥

उद्यस्य ते नवजातस्य वृष्णोऽग्ने चरन्त्यजरा इधानाः।

अच्छा द्यामरुषो धूम एति सं दूतो अग्न ईयसे हि देवान् ॥ ३

उत्। यस्य। ते। नवऽजातस्य। वृष्णः। अग्ने। चरन्ति।

अजराः। इधानाः।

अच्छ। द्याम्। अरुषः। धूमः। एति। सम्। दूतः। अग्ने।

ईयसे। हि। देवान्॥ ३

हे अग्ने नवजातस्य नवप्रादुर्भावस्य वृष्णो वर्षितुर्यस्य ते तवाजरा जरारहिता ज्वाला इधाना उच्चरंति उद्गच्छंति अरुषा आरोचमानो धूमो द्यामच्छ दिवमभ्येति। गच्छति हे अग्ने त्वं दूतः सन् देवान् समीयसे हि। संप्राप्नोषि च॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ चतुर्थी ॥

वि यस्य ते पृथिव्यां पाजो अश्रेत्तृषु यदन्ना समवृक्त जंभैः।

सेनेव सृष्टा प्रसितिष्ट एति यवं न दस्म जुह्वा विवेक्षि॥ ४

वि। यस्य। ते। पृथिव्यां। पाजः। अश्रेत्। तृषु। यत्।
अन्ना। संऽअवृक्त। जंभैः।

सेनाऽइव। सृष्टा। प्रऽसितिः। ते। एति। यवं। न। दस्म।
जुह्वा। विवेक्षि॥ ४

हे अग्ने यस्य दाहरूपस्य ते तव पाजस्तेजः पृथिव्यां भूम्यां तृषु क्षिप्रं व्यश्रेद् विश्रयति यद्यदान्नानि काष्ठादीनि जंभैर्दंष्ट्रैः। ज्वालाभिरित्यर्थः। समवृक्त वर्जते खादति। तदा सेनेव सृष्टोद्युक्ता ते तव प्रसितिर्ज्वालैति। गच्छति। दस्म हे दर्शनीयाग्ने त्वं यवं न यवमिव जुह्वा ज्वालया विवेक्षि। काष्ठादीनि भक्षयसि व्याप्नोषि वा॥

॥ अथ पंचमी ॥

तमिद्दोषा तमुषसि यविष्ठमग्निमत्यं न मर्जयंत नरः।

निशिशाना अतिथिमस्य योनौ दीदाय शोचिराहुतस्य वृष्णः॥ ५

तं। इत्। दोषा। तं। उषसि। यविष्ठं। अग्निं। अत्यं।
न। मर्जयंत। नरः।

निऽशिशानाः। अतिथिं। अस्य योनौ। दीदाय। शोचिः।
आऽहुतस्य। वृष्णः॥ ५

यविष्ठं युवतममतिथिवदतिथिवत्पूज्यं तमित्तमेवाग्निं दोषा दोषायां रात्रावुषसि प्रातरेऽपि तमेवस्याग्नेर्योनौ स्थान आहवनीयायतने धिष्ण्ये वा निशिशाना दीपयंतो नरो मनुष्या अत्यं न सततगमनयुक्तं घोटारमश्वमिव मर्जयंत। परिचरंति। आहुतस्य च वृष्णः कामानां वर्षितुरग्नेस्तस्य शोचिर्ज्वाला दीदाय। दीप्यते॥

॥ इति पंचमस्य द्वितीये तृतीयो वर्गः॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ षष्ठी ॥

सुसंदृक्ते स्वनीक प्रतीकं वि यद्रुक्मो न रोचस उपाके।
दिवो न ते तन्यतुरेति शुष्मश्चित्रो न सूरः प्रति चक्षि भानुं ॥ ६

सुऽसंदृक्। ते। सुऽअनीक। प्रतीकं। वि। यत्। रुक्मः।
न। रोचसे। उपाके।
दिवः। न। ते। तन्यतुः। एति। शुष्मः। चित्रः। न।
सूरः। प्रति। चक्षि। भानुं ॥ ६

स्वनीक हे सुतेजस्काग्ने यद्यदा रुक्मो न सूर्य इव। सूर्यमिव वा उपाकेऽन्तिकेऽपि रोचसे विशेषेण दीप्यसे तदा ते तव प्रतीकं रूपमङ्गं वा सुसंदृक् सुसंदर्शनं भवति। किंच ते तव शुष्मो दिवोऽन्तरिक्षात्तन्यतुर्नाशनिरिवैति। निर्गच्छति। चित्रो दर्शनीयः सूरो न सूर्य इव भानुं स्वां दीप्तिं प्रतिचक्षि प्रदर्शयसि ॥

॥ अथ सप्तमी ॥

यथा वः स्वाहाग्नये दाशेम परीळाभिर्घृतवद्भिश्च हव्यैः।
तेभिर्नो अग्ने अमितैर्महोभिः शतं पूर्भिरायसीभिर्नि पाहि ॥ ७

यथा। वः। स्वाहा। अग्नये। दाशेम। परि। इळाभिः।
घृतवत्ऽभिः। च। हव्यैः।
तेभिः। नः। अग्ने। अमितैः। महःऽभिः। शतं। पूःऽभिः।
आयसीभिः। नि। पाहि ॥ ७

हे अग्ने अग्नयेऽस्मै नेत्रे वस्तुभ्यं स्वाहा स्वाहुतं हविः। किंच यथा वयमिळाभिर्गोभिर्गोविकारैः क्षीरादिभिर्घृतवद्भिर्घृतसहितैर्हव्यैः पुरोडाशादिभिश्च दाशेम परिचरेम तथा त्वमपि तेभिः प्रसिद्धैरमितैरपरिमितैर्महोभिस्तेजोभिः शतमपरिमिताभिरायसीभिर्हिरण्मयीभिः। अयस इति हिरण्यनामसु पाठात्। पूर्भिर्नगरीभिर्नोऽस्मान् नि पाहि। नितरां रक्ष ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथाष्टमी ॥

या वां ते संतिं दाशुषे अधृष्टा गिरो वा याभिर्नृवतीरुरुष्याः ।
ताभिर्नः सूनो सहसो नि पाहि स्मत्सूरीञ्जरितॄञ्जातवेदः ॥ ८

याः । वा । ते । संति । दाशुषे । अधृष्टाः । गिरः । वा ।
याभिः । नृऽवतीः । उरुष्याः ।
ताभिः । नः । सूनो इति । सहसः । नि । पाहि । स्मत् ।
सूरीन् । जरितॄन् । जातऽवेदः ॥ ८

सहसः सूनो हे बलस्य पुत्र जातवेदोऽग्ने दाशुषे दास्वते तव या वा याश्च ज्वालाः संति । अधृष्टा रक्षोभिरधृष्टमिता गिरो या गिरश्च संति । याभिर्गीर्भिर्नृवतीः पुत्रवतीः प्रजा उरुष्या रक्षेः ताभिरुभयीभिर्नोऽस्मान् । स्मदिति प्रशस्तवचनः । प्रशस्तान् सूरीन् हविषां प्रेरकान् जरितॄन् स्तोतॄंश्च नि पाहि । नितरां रक्ष ॥

॥ अथ नवमी ॥

निर्यत्पूतेव स्वधितिः शुचिर्गात्स्वया कृपा तन्वा३ रोचमानः ।
आ यो मात्रोरुशेन्यो जनिष्ट देवयज्याय सुक्रतुः पावकः ॥ ९

निः । यत् । पूताऽइव । स्वऽधितिः । शुचिः । गात् । स्वया ।
कृपा । तन्वा । रोचमानः ।
आ । यः । मात्रोः । उशेन्यः । जनिष्ट । देवऽयज्याय ।
सुऽक्रतुः । पावकः ॥ ९

यद्यदा शुचिरग्निः स्वया स्वकीयया तन्वा ततया कृपा कृपया दीप्त्या रोचमानः पूतेव स्वधितिस्तीक्ष्णीकृता स्वधितिरिव निर्गात् काष्ठान्निर्गच्छति तदानीं देवयज्याय भवति । तदेव विशदयति । योऽग्निरुशेन्यः कमनीयः सुक्रतुः सुकर्मा पावकः शोधकश्च मात्रोररण्योराजनिष्ट आजायत स देवयज्याय भवतीति ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ दशमी ॥

एता नो अग्ने सौभगा दिदीह्यपि क्रतुं सुचेतसं वतेम ।
विश्वा स्तोतृभ्यो गृणते च संतु यूयं पात स्वस्तिभिः सदा
नः ॥ १०

एता । नः । अग्ने । सौभगा । दिदीहि । अपि । क्रतुं ।
सुऽचेतसं । वतेम ।
विश्वा । स्तोतृऽभ्यः । गृणते । च । संतु । यूयं । पात ।
स्वस्तिऽभिः । सदा । नः ॥ १०

हे अग्ने एतैतानि परिदृश्यमानानि सौभगा सौभगानि शोभनानि धनानि नोऽस्मभ्यं दिदीहि। दीपय। देहि वा। अप्यपि च क्रतुं कर्म यज्ञानां कर्तारं वा सुचेतसं शोभनप्रज्ञानयुक्तं सपत्नानां पुत्रं वा वतेम। संभजेमहि॥ वनतेः संभजनार्थस्य वर्णांतरागमे इति रूपं॥ विश्वा विश्वानि धनानि स्तोतृभ्य उद्गातृभ्यो गृणते शंसते च संतु। यूयं त्वत्परिवाराश्च सर्वे यूयं नोऽस्मान् स्वस्तिभिः क्षेमैः सदा सर्वदा पात। रक्षत ॥

॥ इति पंचमस्य द्वितीये चतुर्थो वर्गः ॥

प्र वः शुक्रायेति दशर्चं चतुर्थं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयं। प्र व इत्यनुक्रांतं॥ प्रातरनुवाकाश्विनशस्त्रयोर्दशसूक्तमध्ये द्वितीयत्वेनोक्तः सूक्तविनियोगः। आ० ४, १३,॥ एकादशिन आग्नेये पशौ प्र वः शुक्रायेत्येषा वपाया याज्या। सूत्रितं च। प्र वः शुक्राय भानवे भरध्वं यथा विप्रस्य मनुषो हविर्भिः। आ० ३, ७,। इति ॥

॥ तत्र प्रथमा ॥

प्र वः शुक्राय भानवे भरध्वं हव्यं मतिं चाग्नये सुपूतं ।
यो दैव्यानि मानुषा जनूंष्यंतर्विश्वानि विद्मना जिगाति ॥ १

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

प्र। वः। शुक्राय॑। भानवे॑। भरध्व॑म्। हव्यं। मतिं। च।
अग्नये॑। सुऽपू॑तं।

यः। दैव्या॑नि। मानु॑षा। जनूं॑षि। अंतः। विश्वा॑नि।
विद्मना॑। जिगा॑ति॥ १

हे ऋत्विजो स्तोतारो वा यूयं शुक्राय शुभ्राय भानवे दीप्तायाग्नये सुपूतं सुशुद्धं हव्यं मतिं स्तुतिं च प्रभरध्वं। योऽग्निर्दैव्यानि मानुषा मानुषाणि च विश्वा विश्वानि जनूंषि जातान्यंतरंतरा विद्मना प्रज्ञानेन मार्गेण वा जिगाति गच्छति देवान्मनुष्यांश्चांतरा दूतोऽपि नेतुं यसंत इत्यर्थः॥

॥ अथ द्वितीया॥

स गृत्सो॑ अग्निस्तरु॑णश्चिदस्तु यतो॒ यवि॑ष्ठो॒ अजा॑निष्ट मा॒तुः।
सं यो वना॑ युवते॒ शुचि॑दन्भूरि॑ चिदन्ना॑ समिद॑त्ति स॒द्यः॥ २

सः। गृत्स॑ः। अग्निः। तरु॑णः। चित्। अस्तु। यतः।
यविष्ठः। अजा॑निष्ट। मातुः।

सं। यः। वना॑। युवते॑। शुचिऽदन्। भूरि॑। चित्। अन्ना॑।
सं। इत्। अत्ति। सद्यः॥ २

स चित्स एव गृत्सो मेधावी। तथा च यास्कः। गृत्स इति मेधाविनाम। अग्निस्तरुणस्तारको भवति। तदा यतो यदा मातुररण्या यविष्ठो युवतमः सन् अजनिष्ट। योऽग्निः शुचिदन् दीप्तदंतो वना वनानि संयुवते आत्मना संयोजयति। किंच भूरि चित् भूरीण्यप्यन्ना स्तोत्राण्यन्नानि सद्य इत्सद्य एव समत्ति सम्यग्भक्षयति॥

॥ अथ तृतीया॥

अस्य देवस्य॑ संसद्यनी॑के यं मर्ता॑सः श्येतं ज॑गृभ्रे।
नि यो गृभं पौरु॑षेयीमु॒वोच॑ दुरोक॑मग्निरा॒यवे॑ शुशोच॥ ३

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

अस्य । देवस्य । सम्ऽसदि । अनीके । यं । मर्तासः । श्येतं ।
जगृभ्रे ।

नि । यः । गृभं । पौरुषेयीं । उवोच दुःऽओकं । अग्निः ।
आयवे । शुशोच ॥ ३

अस्य देवस्याग्नेरनीके मुखे संसदि स्थाने श्येतं श्वेतं शुभ्रं यमग्निं मर्तासो मनुष्या जगृभ्रे परिगृह्णंति । यश्चाग्निः पौरुषेयीं पुरुषैः क्रियमाणां गृभं गृभीतं न्युवोच ॥ अत्र वचिः सेवार्थे वर्तते । नियमेन सेवत इत्यर्थः । सोऽग्निरायवे मनुष्यार्थं ॥ द्रुह्यव आयव इति मनुष्यनामसु पाठात् ॥ दुरोकं सपत्नैर्दुःसेवं यथा भवति तथा शुशोच । दीप्यते ॥

। अथ चतुर्थी ।

अयं कविरकविषु प्रचेता मर्तेष्वग्निरमृतो नि धायि ।
स मा नो अत्र जुहुरः सहस्वः सदा त्वे सुमनसः स्याम ॥ ४

अयं । कविः । अकविषु । प्रऽचेताः । मर्तेषु । अग्निः ।
अमृतः । नि । धायि ।

सः । मा । नः । अत्र । जुहुरः । सहस्वः । सदा । त्वे इति ।
सुऽमनसः । स्याम ॥ ४

कविः क्रांतदृक् प्रचेताः प्रकाशकोऽमृतो मरणधर्मरहितोऽयमग्निरकविष्वक्रांतदृक्षु मर्तेषु मरणधर्मकेषु निधायि । निहितः । अथ प्रत्यक्षस्तुतिः । हे सहस्वो बलवन्नग्ने त्वे यस्मिन् त्वयि सदा वयं सुमनसः सुमतयः स्याम स त्वमत्रास्मिँल्लोके नोऽस्मान्मा जुहुरः । मा हिंसीः ॥

। अथ पंचमी ।

आ यो योनिं देवकृतं ससाद क्रत्वा ह्यग्निरमृताँ अतारीत् ।
तमोषधीश्च वनिनश्च गर्भं भूमिश्च विश्वधायसं बिभर्ति ॥ ५

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

आ । यः । योनिं । देवऽकृतं । ससाद । क्रत्वा । हि ।

अग्निः । अमृतान् । अतारीत् ।

तं । ओषधीः । च । वनिनः । च । गर्भं । भूमिः । च ।

विश्वऽधायसं । बिभर्ति । ५

योऽग्निर्देवकृतं देवैः कल्पितं योनिं स्थानमाससाद अध्यास्ते। किमर्थं देवाः स्थानं कल्पयंत्यग्नेरित्यत आह। हि यस्मात्कारणादग्निः क्रत्वा प्रज्ञयामृतान् देवानतारीत्। विश्वधायसं विश्वस्य धारकमोषधीरोषधयो वनिनश्च वृक्षाश्च गर्भं गर्भत्वं गतं तं बिभ्रति। भूमिश्च बिभर्ति॥ स्तुतमेव बिभर्तीति पदं बहुवचनांततया विपरिणतं सदोषधयो बिभ्रति वनिनश्च संबध्यते॥

॥ इति पंचमस्य द्वितीये पंचमो वर्गः ॥

॥ अथ षष्ठी ॥

ईशे ह्य१ग्निरमृतस्य भूरेरीशे रायः सुवीर्यस्य दातोः ।

मा त्वा वयं सहसावन्नवीरा माप्सवः परि सदाम मादुवः ॥ ६

ईशे । हि । अग्निः । अमृतस्य । भूरेः । ईशे । रायः ।

सुऽवीर्यस्य । दातोः ।

मा । त्वा । वयं । सहसाऽवन् । अवीराः । मा । अप्सवः ।

परि । सदाम । मा । अदुवः ॥ ६

अमृतस्याक्षयस्योदकस्य वा॥ द्वितीयार्थे षष्ठी॥ भूरेरधिकं दातोर्दातुमग्निरीशे। ईष्टे हि। सुवीर्यस्य शोभनवीर्ययुक्तं रायो धनं दातुमीशे। ईष्टे। अथ प्रत्यक्षस्तुतिः। सहसावन् हे बलवन्नग्ने वयं वसिष्ठा अवीराः पुत्रादिरहिताः संतो मा परिषदाम। मा पर्युपविशाम। अप्सवो रूपरहिताश्च संतो मा परिषदाम। तथा च यास्कः। अप्स इति रूपनामेति। अदुवः परिचरणहीनाश्च मा परिषदाम॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ सप्तमी ॥

परिषद्यं ह्यरणस्य रेक्णो नित्यस्य रायः पतयः स्याम ।
न शेषो अग्ने अन्यजातमस्त्यचेतानस्य मा पथो वि दुक्षः ॥ ७

परिऽसद्यं । हि । अरणस्य । रेक्णः । नित्यस्य । रायः ।
पतयः । स्याम ।
न । शेषः । अग्ने । अन्यऽजातं । अस्ति । अचेतनास्य । मा ।
पथः । वि । दुक्षः ॥ ७

अरणस्यान्यस्य रेक्णो धनं परिषद्यं पर्याप्तं भवति हि । अतो नित्यस्यापुनर्देयस्य रायो धनस्य पतयः स्याम । यद्वारणस्य रेक्णो धनं परिषद्यं परिहर्तव्यं भवति । अतो नित्यस्यौरसस्य रायः पुत्राख्यस्य धनस्य पतयः स्याम । हे अग्ने अन्यजातमनौरसं शेषोऽपत्यं नास्ति । न भवति । अचेतानस्याविदुषः पथो मार्गान् पुत्रोत्पादन प्रख्यान्मार्गान् मा विदुक्षः । मा विदूदुषः ॥ दुष वैकृत्ये इति धातुः ॥ तथा च यास्कः । परिहर्तव्यं हि नोपसर्तव्यमरणस्य रेक्णोऽरणोऽपार्णो भवति रेक्ण इति धननाम रिच्यते प्रयतः । नित्यस्य रायः पतयः स्याम । न शेषो अग्ने अन्यजातमस्ति । शेष इत्यपत्यनाम शिष्यते प्रयतोऽचेतयमानस्य तत्प्रमत्तस्य भवति मा नः पथो विदूदुषः । नि० ३. २. । इति ॥

॥ अथाष्टमी ॥

नहि ग्रभायारणः सुशेवोऽन्योदर्यो मनसा मन्तवा उ ।
अधा चिदोकः पुनरित्स एत्या नो वाज्यभीषाळेतु नव्यः ॥ ८

नहि । ग्रभाय । अरणः । सुऽशेवः । अन्यऽउदर्यः । मनसा ।
मन्तवै । ऊँ इति ।
अध । चित् । ओकः । पुनः । इत् । सः । एति । आ । नः ।
वाजी । अभीषाट् । एतु । नव्यः ॥ ८

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

पूर्वस्या ऋच उक्त एवार्थोऽत्र प्रपंच्यते। अरणोऽरमणोऽन्योदर्यः सुशेवः सुखतमो सन् ग्रभाय पुत्रत्वेन ग्रहणाय मनसा मंतवा उ मनसापि मंतव्यो न भवति हि। अध चिदपि च सोऽन्योदर्य ओक इव संस्थानमेव पुनरेति। प्राप्नोति। अतो वाज्यन्नवानभीषाट् शत्रूणामभिभविता नव्यो नवजातः पुत्रो नोऽस्मानैतु। आगच्छतु॥

॥ अथ नवमी॥

त्वमग्ने वनुष्यतो नि पाहि त्वमु नः सहसावन्नवद्यात्।
सं त्वा ध्वस्मन्वदभ्येतु पाथः सं रयिः स्पृहयाय्यः सहस्री॥ ९

त्वं। अग्ने। वनुष्यतः। नि। पाहि। त्वं। ऊं इति। नः।
सहसाऽवन्। अवद्यात्।
सं। त्वा। ध्वस्मन्ऽवत्। अभि। एतु। पाथः। सं। रयिः।
स्पृहयाय्यः। सहस्री॥ ९

हे अग्ने त्वं वनुष्यतो हिंसकाच्चोऽस्मान्निपाहि। त्वमु त्वमेवावद्यात्पापात् नोऽस्मानभिपाहि। त्वा त्वां ध्वस्मन्वत् ध्वस्तदोषं पाथोऽन्नं हविः समभ्येतु। सम्यक् प्राप्नोतु। अपि चास्मान् स्पृहयाय्यः स्पृहणीयः सहस्री सहस्रसंख्याको रयिरभ्येतु॥

॥ अथ दशमी॥

एता नो अग्ने सौभगा दिदीह्यपि क्रतुं सुचेतसं वतेम।
विश्वा स्तोतृभ्यो गृणते च संतु यूयं पात स्वस्तिभिः सदा नः॥ १०

एता। नः। अग्ने। सौभगा। दिदीहि। अपि। क्रतुं।
सुऽचेतसं। वतेम।
विश्वाः। स्तोतृऽभ्यः। गृणते। च। संतु। यूयं। पात।
स्वस्तिऽभिः। सदा। नः॥ १०

एषा व्याख्याता॥

॥ इति पंचमस्य द्वितीये षष्ठो वर्गः॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्राग्नये तवस इति नवर्चं पंचमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वानराग्निदेवताकं तथा चानुक्रांतं । प्राग्नये नव वैश्वानरीयं त्विति ॥ विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

प्राग्नये॑ त॒वसे॑ भरध्वं॒ गिरं॑ दि॒वो अ॑र॒तये॑ पृथि॒व्याः ।

यो विश्वे॑षाम॒मृता॑नामु॒पस्थे॑ वैश्वान॒रो वा॑वृ॒धे जा॑गृ॒वद्भिः॑ ॥ १

प्र । अ॒ग्नये॑ । त॒वसे॑ । भ॒र॒ध्व॒म् । गिर॑म् । दि॒वः । अ॒र॒तये॑ ।

पृ॒थि॒व्याः ।

यः । विश्वे॑षाम् । अ॒मृता॑नाम् । उ॒पऽस्थे॑ । वै॒श्वा॒न॒रः ॥ व॒वृ॒धे ।

जा॒गृ॒वत्ऽभिः॑ ॥ १

हे स्तोतारस्तवसे प्रवृद्धाय दिवोऽन्तरिक्षस्य पृथिव्याश्चारतये गंत्रेऽग्नये वैश्वानर संज्ञकायाग्नये गिरस्तुतिं प्रभरध्वं । यो वैश्वानरो विश्वनरहितोऽग्निर्विश्वेषां सर्वेषामऽमृतानां देवानामुपस्थ उपस्थाने यज्ञे जागृवद्भिः प्रबुद्धैर्देवैः सहितः सन् वावृधे स्तुतिभिर्हविर्भिश्च वर्धते ॥

॥ अथ द्वितीया ॥

पृ॒ष्टो दि॒वि धाय्य॒ग्निः पृ॑थि॒व्यां ने॒ता सिन्धू॑नां वृष॒भः स्तिया॑नाम् ।

स मानु॑षीर॒भि वि॒शो वि भा॑ति वैश्वान॒रो वा॑वृधा॒नो वरे॑ण ॥ २

पृ॒ष्टः । दि॒वि । धायि॑ । अ॒ग्निः । पृ॒थि॒व्याम् । ने॒ता । सिन्धू॑नाम् ।

वृ॒ष॒भः । स्तिया॑नाम् ।

सः । मानु॑षीः । अ॒भि । वि॒शः । वि । भा॒ति । वै॒श्वा॒न॒रः ।

व॒वृ॒धा॒नः । वरे॑ण । २

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

सिंधूनां नदीनां नेता स्त्यायनामपां। स्त्या आपो भवंति स्त्यायनादिति यास्कवचनात्। नि० ६, १७. ।"वृषभो वर्षिता इष्टोऽर्चितस्तेजसा संदृष्टो वा योऽग्निर्दिव्यंतरिक्षे पृथिव्यां च धायि न्यधायि स वैश्वानरो विश्वनरहितोऽग्निर्वरेण श्रेष्ठेन वृणिया तेजसा वा वावृधानो वर्धमानः सन् मानुषीर्विशोऽपि मानुषीः प्रजाः प्रति विभाति ॥

॥ अथ तृतीया ॥

त्वद्भिया विश आयन्नसिक्नीरसमना जहतीर्भोजनानि।
वैश्वानर पूरवे शोशुचानः पुरो यदग्ने दरयन्नदीदेः ॥ ३

त्वत्। भिया। विशः। आयन्। असिक्नीः। असमनाः।
जहतीः। भोजनानि।
वैश्वानर। पूरवे। शोशुचानः। पुरः। यत्। अग्ने।
दरयन्। अदीदेः ॥ ३

हे वैश्वानर विश्वनरहिताग्ने त्वत्तो भिया भीत्यासिक्नीरसितवर्णा राक्षसः ॥ प्रथमार्थे द्वितीया ॥ विशः प्रजा असमनाः परस्परमसंगता भोजनानि धनानि जहतीस्त्यजंत्य आयन्। आगच्छन्। कदा त्यत आह। यद्यदा पूरवे राज्ञे शोशुचानो दीप्यमानः पुरस्तेषां शत्रूणां पुरो दरयन् दारयन्नदीदेः अज्वलः। तथा च निगमः। अंहो राजन्वरिवः पूरवे कः। ऋग्वे० १, ६३, ७, । इति ॥

। अथ चतुर्थी ।

तव त्रिधातु पृथिवी उत द्यौर्वैश्वानर व्रतमग्ने सचंत।
त्वं भासा रोदसी आ ततंथाजस्रेण शोचिषा शोशुचानः ॥ ४

तव। त्रिऽधातु। पृथिवी। उत। द्यौः। वैश्वानर। व्रतं।
अग्ने। सचंत।
त्वं। भासा। रोदसी इति। आ। ततंथ। अजस्रेण।
शोचिषा। शोशुचानः। ॥ ४

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे वैश्वानर विश्वेषां नराणां नेतरग्ने। तथा च यास्कः। वैश्वानरः कस्माद्विश्वान्नरान्नयति विश्व एनं नरा नयंतीति वेति। तव व्रतं तल्लोकितकरं कर्म त्रिधात्वंतरिक्षं पृथिवी च उतापि च द्यौरिति त्रयो लोकाः सचंत। सेवंते। त्रैलोक्यवर्तिन्यः प्रजास्त्वदर्थं कर्म कुर्वंतीत्यर्थः। अपि च त्वमजस्रेण शोचिषा प्रकाशेन शोशुचानो दीप्यमानो भासा दीप्त्या रोदसी द्यावापृथिव्यौ चाततंथ। विस्तारयसि॥

॥ अथ पंचमी ॥

त्वाम॑ग्ने ह॒रितो॑ वावशा॒ना गिरः॑ सचंते धुन॑यो घृ॒ताचीः॑।

पतिं॑ कृ॒ष्टीनां॑ र॒थ्यं॑ रयी॒णां वै॑श्वान॒रमु॒षसां॑ के॒तुमह्नां॑ ॥ ५

त्वां। अ॒ग्ने। ह॒रितः॑। वा॒व॒शा॒नाः। गिरः॑। स॒चं॒ते।

धु॒न॑यः। घृ॒ताचीः॑।

पतिं॑। कृ॒ष्टीनां॑। र॒थ्यं॑। र॒यी॒णां। वै॒श्वा॒न॒रं। उ॒षसां॑।

के॒तुं॑। अह्नां॑ ॥ ५

हे अग्ने कृष्टीनां प्रजानां। चितयः कृष्टय इति मनुष्यनामसु पाठात्। पतिं स्वामिनं रयीणां धनानां रथ्यं नेतारमुषसामह्नां बहूनां केतुं प्रज्ञापकं वैश्वानरं विश्वनरहितं त्वां हरितोऽश्वा वावशानाः कामयमानाः सचंते। सेवंते। तथा गिरो स्तुत्यां स्तुतिरूपा वाचो धुनयः पापं धुन्वाना घृताचीर्घृतमंचंत्यः। हविषा सहिता द्रावरः। सचंते॥

॥ इति पंचमस्य द्वितीये सप्तमो वर्गः ॥

॥ अथ षष्ठी ॥

त्वे अ॑सु॒र्यं१ वस॑वो॒ न्य॑ृण्वन्क्रतुं॑ हि ते॑ मित्रमहो जुषंत॑।

त्वं दस्यूँ॑रोक॑सो अग्न आज उरु ज्योति॑र्ज॒नय॑न्नार्या॑य ॥ ६

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

त्वे इति॑। वसुयुँ। वसं॑व। नि ऋण्वन्। क्रतुं॑ हि। ते।

मित्रऽमहः। जुषंत।

त्वं। दस्यू॑न्। ओकंसः। अग्ने। आजः। उरु। ज्योतिः।

जनयंन्। आर्यांय। ६

हे मित्रमहो मित्राणां पूजयितरग्ने त्वे त्वयि वसवो वासका देवा वसुयुं धनं न्यृण्वन्। न्यगमयन्। ते क्रतुं त्वत्प्रीतिकरं कर्म जुषंत। असेवंत हि। किंच त्वमार्याय कर्मवते जनायोरु ज्योतिरधिकं तेजो जनयन् दस्यून् कर्महीनानोकसः स्थानादाजः। निरगमयः॥

॥ अथ सप्तमी ॥

स जायमानः परमे व्यो॑मन्वायुर्न पाथः परि॑ पासि सद्यः।

त्वं भुवंना जनयंन्नभि क्रन्नपंत्याय जातवेदो दशस्यन्॥ ७

सः। जायमानः। परमे। विऽओ॑मन्। वायुः। न। पाथः।

परि॑। पासि। सद्य।

त्वं। भुवंना। जनयंन्। अभि। क्रन्। अपंत्याय।

जातऽवेदः। दशस्यन्॥ ७

हे वैश्वानर स प्रसिद्धस्त्वं परमे दूरस्थे व्योमन्यंतरिक्षे जायमानः सूर्यरूपेण प्रादुर्भवन् वायुर्न यथा वायुर्हि देवतास्वग्रेषु प्रथमं सोम पिबति तथा पाथः सोमं सद्यः परिपासि। परिपिबसि। यद्वा वायुरिव पाथो जलं परिपासि। परिपिबसि। योपयसीत्यर्थः। किंच हे जातवेदो जातधनाग्ने त्वं भुवना भुवनान्युदकानि॥ भुवनमित्युदकनामसु पाठात्॥ जनयन्नपत्यायापत्यवत्स्थानीयाय यजमानाय दशस्यन् प्रयच्छन् अभिक्रन्। वैद्युतात्मनाभिक्रंदसि अभिगर्जसि वा॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथाष्टमी ॥

तामग्ने अस्मे इषमेरयस्व वैश्वानर द्युमतीं । जातवेदः ।
यया राधः पिन्वसि विश्ववार पृथु श्रवो दाशुषे मर्त्याय ॥ ८

तां । अग्ने । अस्मे इति । इषं । आ । ईरयस्व । वैश्वानर ।
द्युऽमतीं । जातऽवेदः ।
यया । राधः । पिन्वसि । विश्वऽवार । पृथु । श्रवः । दाशुषे ।
मर्त्याय । ८

हे जातवेदो जातप्रज्ञ वैश्वानर विश्वनरहिताग्ने ते त्वमस्मेषणीयां इषं द्युमतीं दीप्तिमतीमस्मे अस्मभ्यमेरयस्व । प्रेरयस्व । इष्या हैतेषः द्योतते हि । यद्वा द्युमतीं सामिषमन्नमेरयस्व । तथा च श्रूयते । तस्मादप्स्वेव भूयिष्ठमन्नं भवति य एवं भूयिष्ठं लोके विराजतीति । अथ वैषमेषणीयां तां द्युमतीं भास्वतीं दीप्तिमेरयस्व । ययेषा रायो धनं पिन्वसि पालयसि । अपि च हे विश्ववार विश्वैर्वरणीयाग्ने पृथु विस्तीर्णं श्रवो यशो दाशुषे मर्त्याय यजमानाय पिन्वसि ॥

॥ अथ नवमी ॥

तं नो अग्ने मघवद्भ्यः पुरुक्षुं रयिं नि वाजं श्रुत्यं युवस्व ।
वैश्वानर महि नः शर्म यच्छ रुद्रेभिरग्ने वसुभिः सजोषाः ॥ ९

तं । नः । अग्ने । मघवत्ऽभ्यः । पुरुऽक्षुं । रयिं । नि ।
वाजं । श्रुत्यं । युवस्व ।
वैश्वानर । महि । नः । शर्म । यच्छ । रुद्रेभिः । अग्ने ।
वसुऽभिः । सऽजोषाः ॥ ९

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

हे अग्ने मघवद्भ्यो धनवद्भ्यः। हविष्मद्भ्य इत्यर्थः। नोऽस्मभ्यं पुरुक्षुं बह्वन्नं बहुयशस्कं वा तं प्रसिद्धं रयिं श्रुत्यं श्रवणीयं वाजं बलं च नि युवस्व। नितरां मिश्रयस्व। किंच हे वैश्वानर विश्वनरहिताग्ने त्वं रुद्रेभी रुद्रैर्वसुभिश्च देवैः सजोषाः सहितश्च सन् नोऽस्मभ्यं महि महत् शर्म सुखं यच्छ। प्रयच्छ॥

॥ इति पंचमस्य द्वितीयेऽष्टमो वर्गः॥

प्र सम्राज इति सप्तर्चं षष्ठं सूक्तं वसिष्ठस्यार्षं। अनुक्रम्यते च। प्र सम्राजः सप्त। वैश्वानरीयं त्वित्युक्तत्वादस्यापि वैश्वानरोऽग्निर्देवता॥ विनियोगो लैंगिकः॥

॥ तत्र प्रथमा॥

प्र सम्राजो असुरस्य प्रशस्तिं पुंसः कृष्टीनामनुमाद्यस्य।
इंद्रस्येव प्र तवसस्कृतानि वंदे दारुं वंदमानो विवक्मि॥ १

प्र। सम्ऽराजः। असुरस्य। प्रऽशस्तिं। पुंसः। कृष्टीनां।
अनुऽमाद्यस्य।
इंद्रस्यऽइव। प्र। तवसः। कृतानि। वंदे। दारुं। वंदमानः।
विवक्मि॥ १

दारुं पुरां भेत्तारं वंदे। वंदमानः सन् सम्राजः सर्वस्य भुवनस्येश्वरस्यासुरस्य बलवतः पुंसो वीरस्य। पौंस्यमिति वीर्यमुच्यते। तथा च यास्कः। पुमान् पुंसना भवति पुंसतेर्वेति। कृष्टीनां जनानामनुमाद्यस्य स्तुत्यस्य तवसो बलवत इंद्रस्येव तस्य वैश्वानरस्य प्रशस्तिं स्तुतिं कृतानि कर्माणि च प्रविवच्मि। प्रब्रवीमि॥

॥ अथ द्वितीया॥

कविं केतुं धासिं भानुमद्रेर्हिन्वंति शं राज्यं रोदस्योः।
पुरंदरस्य गीर्भिरा विवासेऽग्नेर्व्रतानि पूर्व्या महानि॥ २

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कविं। केतुं। धासिं। भानुं। अद्रेः। हिन्वन्ति। शं।
राज्यं। रोदस्योः।

पुरम्ऽदरस्य। गीःऽभिः। आ। विवासे। अग्नेः। व्रतानि।
पूर्व्या। महानि। २

कविं प्राज्ञं केतुं विश्वस्य प्रज्ञापकं धासिमद्रेर्भेत्तारमादत्तं स्तोतृणां भानुं भासकं शं सुखकरं रोदस्योर्द्यावापृथिव्यो राज्यं राजानं वैश्वानरमग्निं हिन्वंति। मदीयाः प्रीणयंति प्रेरयंति वा इमाः। अहं च पुरंदरस्य पुरां दारयितुरग्नेः पूर्व्या पूर्व्याणि पुरातनानि महानि महांति व्रतानि कर्माणि गीर्भिराविवासे। परिचरामि॥

॥ अथ तृतीया॥

न्यक्रतून्ग्रथिनो मृध्रवाचः पणीँरश्रद्धाँ अवृधाँ अयज्ञान्।
प्रप्र तान्दस्यूँरग्निर्विवाय पूर्वश्चकारापराँ अयज्यून्॥ ३

नि। अक्रतून्। ग्रथिनः। मृध्रऽवाचः। पणीन्। अश्रद्धान्।
अवृधान्। अयज्ञान्।

प्रऽप्र। तान्। दस्यून्। अग्निः। विवाय। पूर्वः। चकार।
अपरान्। अयज्यून्॥ ३

अक्रतूनयज्ञान् ग्रथिनो जल्पकान्मृध्रवाचो हिंसितवचस्कान् पणीन् पणिनाम-कान्वर्धुषिकानश्रद्धानयजनादिषु श्रद्धारहितानवृधान् स्तुतिभिरग्निमवर्धयतोऽयज्ञान्यज्ञ-हीनान् तान्दस्यून् यथा कालस्य नेतुरग्निः प्रप्र अत्यंतं नि विवाय। नितरां गमयेत। मदीयाः। अग्निः पूर्वो मुख्यः सन् अयज्यूनयजमानानपरान् जघन्यान् चकार॥

॥ अथ चतुर्थी।

यो अपाचीने तमसि मदन्तीः प्राचीश्चकार नृतमः शचीभिः।
तमीशानं वस्वो अग्निं गृणीषेऽनानतं दमयन्तं पृतन्यून्॥ ४

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

यः। अपाचीने। तमसि। मदंतीः। प्राचीः। चकार।

नृऽतमः। शचीभिः।

तं। ईशानं। वस्वः। अग्निं। गृणीषे। अनानतं। दमयंतं।

पृतन्यून्॥ ४॥

नृतमो नेतृतमो योऽग्निरपाचीनेऽप्रकाशमाने तमसि निमग्नाः प्रजा मदंतीः स्तुवंतीः शचीभिः कर्मभिः प्रज्ञाभिः प्राचीः प्रगताश्चकार। यद्वा नेतृतमो योऽग्निरपाचीने तमसि निशायां मदंतीर्माद्यंतीरुषसः शचीभिः प्रज्ञाभिः प्राचीश्चकारेत्यर्थः। तं वस्वो धनस्येशानमनानतमप्रह्वं पृतन्यून् युद्धकामांश्च दमयंतमग्निं गृणीषे। स्तौमि॥

॥ अथ पंचमी ॥

यो देह्यो३ अनमयद्वधस्नैर्यो अर्यपत्नीरुषसश्चकार।

स निरुध्या नहुषो यह्वो अग्निर्विशश्चक्रे बलिहृतः सहोभिः॥ ५

यः। देह्यः। अनमयत्। वधऽस्नैः। यः। अर्यऽपत्नीः।

उषसः। चकार।

सः। निऽरुध्य। नहुषः। यह्वः। अग्निः। विशः। चक्रे।

बलिऽहृतः। सहःऽभिः॥ ५.

योऽग्निर्देह्यो देहीरुपचिता आसुरीर्विशा वधस्नैर्वधैरायुधैर्वानमयत् क्षीणा अकरोत्। यश्चार्यपत्नीः। अर्यः सूर्यः पतिर्यासां ता अर्यपत्न्यः। ता उषसश्चकार अकरोत् स यह्वो महानग्निर्विशः। प्रजाः सहोभिर्बलैर्निरुध्य नहुषो राज्ञो बलिहृतः करप्रदाश्चक्रे॥

॥ अथ षष्ठी ॥

यस्य शर्मन्नुप विश्वे जनास एवैस्तस्थुः सुमतिं भिक्षमाणाः।

वैश्वानरो वरमा रोदस्योराग्निः ससाद पित्रोरुपस्थं॥ ६

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

यस्य। शर्मन्। उप। विश्वे। जनासः। एवैः। तस्थुः।

सुऽमतिं। भिक्षमाणाः।

वैश्वानरः। वरं। आ। रोदस्योः। आ। अग्निः। ससाद।

पित्रोः। उपऽस्थं॥ ६

विश्वे सर्वे जनासो जनाः शर्मन् शर्मणि सुखनिमित्तं यस्य वैश्वानरस्य सुमतिं भिक्षमाणाः प्रार्थमाना एवैः कर्मभिर्हविर्भिर्वोपतस्थुः यमेवोपतिष्ठंते स वैश्वानरो विश्वनरहितोऽग्निः वरं श्रेष्ठः सन्। पित्रोर्मातापित्रो रोदस्योर्द्यावापृथिव्योर्वरमुत्कृष्टमुपस्थं मध्यमंतरिक्षमाससाद। आगच्छत्॥

॥ अथ सप्तमी॥

आ देवो ददे बुध्न्या३ वसूनि वैश्वानर उदिता सूर्यस्य।

आ समुद्रादवरादा परस्मादाग्निर्ददे दिव आ पृथिव्याः॥ ७

आ। देवः। ददे। बुध्न्या। वसूनि। वैश्वानरः। उत्ऽइता।

सूर्यस्य।

आ। समुद्रात्। अवरात्। आ। परस्मात्। आ। अग्निः।

ददे। दिवः। आ। पृथिव्याः॥ ७

वैश्वानरो विश्वनरहितोऽग्निर्देवो द्योतमानो बुध्न्या बुध्न्यान्यंतरिक्षाणि। बुध्नमंतरिक्षं। तथा च यास्कः। बुध्नमंतरिक्षं बद्धा अस्मिन्धृता आप इति वा। नि० १०. ४४.। इति। वसून्याच्छादकानि तमांसि॥ वस आच्छादन इति धातुः। सूर्यस्योदितोदितावुदये सत्याददे। समुद्रादंतरिक्षात्॥ समुद्र इत्यंतरिक्षनामसु पाठात्॥ अवरात्पृथिव्यास्तमांस्याददे। समुद्रात्परस्माद्दिवोऽपि तमांस्याददे। तदेव दर्शयति। अग्निर्दिवस्तमांस्याददे पृथिव्याश्च तमांस्याददे॥

॥ इति पंचमस्य द्वितीये नवमो वर्गः॥

प्र वो देवमिति सप्तर्चं सप्तमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयं। प्र वो देवमित्यनुक्रांतं। प्रातरनुवाकाश्विनशस्त्रयोर्दंयसूक्त उक्तो विनियोगः॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तत्र प्रथमा ॥

प्र वो देवं चित्सहसानमग्निमश्वं न वाजिनं हिषे नमोभिः ।

भवा नो दूतो अध्वरस्य विद्वांत्मना देवेषु विविदे मितद्रुः ॥ १

प्र । वः । देवं । चित् । सहसानं । अग्निं । अश्वं । न ।

वाजिनं । हिषे । नमःऽभिः ।

भव । नः । दूतः । अध्वरस्य । विद्वान् । त्मना । देवेषु ।

विविदे । मितऽद्रुः ॥ १

हे अग्ने यस्त्वां देवं द्योतमानादिगुणयुक्तं सहसानं राक्षसानभिभवंतं यज्ञमाचरंतं अग्निमध्वरस्य नेतारमश्वं न अश्वमिव वाजिनं वेगवंतं बलवंतं वा नमोभि स्तुतिभिर्हविर्भिर्वा प्रहिषे । हे अग्ने त्वां चित्त्वहिषोस्येत् । किंच हे अग्ने त्वं विद्वान् जानन् नोऽस्माकमध्वरस्य यज्ञस्य दूतो भव । अथ परोक्षस्तुतिः । त्मनात्मना स्वयमेव देवेषु मितद्रुर्दग्धद्रुमोऽग्निरिति विविदे । प्रख्यायते ॥

॥ अथ द्वितीया ॥

आ याह्यग्ने पथ्या३ अनु स्वा मंद्रो देवानां सख्यं जुषाणः ।

आ सानु शुष्मैर्नदयंपृथिव्या जंभेभिर्विश्वमुशधग्वनानि ॥ २

आ । याहि । अग्ने । पथ्याः । अनु । स्वाः । मंद्रः । देवानां ।

सख्यं । जुषाणः ।

आ । सानु । शुष्मैः । नदयन् । पृथिव्याः । जंभेभिः । विश्वं ।

उशधक् । वनानि ॥ २

हे अग्ने त्वं मंद्रो मदयिता स्तुत्यो वा देवानां सख्यं । देवैः सह सख्यमित्यर्थः । जुषाणः सेवमानः पृथिव्याः सानु समुच्छ्रितं स्थाणुगुल्मादिकं शुष्मैः शोषकैर्दाहकैस्तेजोभिर्नदयन् शब्दायमानः । दह्यमानं हि शब्दायते । जंभेभिर्दंष्ट्राभिः । ज्वाला-

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

भिरित्यर्थः। विश्वं विश्वानि वनान्यूधवक् कामयमानो दहन् स्वाः पथ्या पद्ध। स्वैर्मार्गैरित्यर्थः। आ आयाहि। आकारस्तु पुनर्वचनमादरार्थं॥

॥ अथ तृतीया ॥

प्राचीनो यज्ञः सुधितं हि बर्हिः प्रीणीते अग्निरीळितो न होता।
आ मातरा विश्ववारे हुवानो यतो यविष्ठ जज्ञिषे सुशेवः॥ ३

प्राचीनः। यज्ञः। सुऽधितं। हि। बर्हिः। प्रीणीते। अग्निः। ईळितः। न। होता।
आ। मातरा। विश्ववारे इति विश्वऽवारे। हुवानः। यतः। यविष्ठ। जज्ञिषे। सुऽशेवः॥ ३

अयं यज्ञ प्राचीनः। सम्यगनुष्ठीयत इत्यर्थः। यद्वा यज्ञे यष्टा होता प्राचीनः। यद्वा यज्ञो हविः प्राचीनः प्राचीनं प्राङ्मुखमासन्नं। बर्हिर्हि बर्हिश्च सुधितं सुनिहितं। ईळितः स्तुतोऽग्निः प्रीणीते। तृप्तश्च भवति। होता न होता च। नेति चार्थे। विश्ववारे विश्वैर्वरणीये मातरा द्यावापृथिव्याविडायामाहुवानो भवति। यदेत्यत्राह। यतो यदा यविष्ठ हे युवतमाग्ने त्वं सुशेवः सुसुखो जज्ञिषे जायसे॥

॥ अथ चतुर्थी ॥

सद्यो अध्वरे रथिरं जनंत मानुषासो विचेतसो य एषां।
विशामधायि विश्पतिर्दुरोणे३ऽग्निर्मंद्रो मधुवचा ऋतावा॥ ४

सद्यः। अध्वरे। रथिरं। जनंत। मानुषासः। विऽचेतसः। यः। एषां।
विशां। अधायि। विश्पतिः। दुरोणे। अग्निः। मंद्रः। मधुऽवचाः। ऋतऽवा॥ ४

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विचेतसो विविक्तमनसा मानुषासो मनुष्या अध्वरे यज्ञे रथिरं रथिनं नेतारमग्निं यज्ञो जनंत। जनयंति। य एतां द्यविवेद्विति सोऽयमग्निर्विश्पतिर्विशां पतिविंश्वस्य पतिर्यो मंद्रो मदयिता मधुरवा मादयितृस्वरस्य मदाया- यज्ञवान् विशां मनुष्याणां दुरोणे स्वस्थेऽसादि। स्थापितः॥

॥ अथ पंचमी॥

असादि वृतो वह्निराजगन्वानग्निर्ब्रह्मा नृषद्ने विधर्ता।

द्यौश्च यं पृथिवी वावृधाते आ यं होता यजति विश्ववारं॥ ५

असादि। वृतः। वह्निः। आऽजगन्वान्। अग्निः। ब्रह्मा।

नृऽसद्ने। विऽधर्ता।

द्यौः। च। यं। पृथिवी। ववृधाते इति। आ। यं। होता।

यजंति। विश्वऽवारं॥ ५

वृतो होतृत्वेन वह्निर्हविषां वोढा ब्रह्मा परिवृढो विधर्ता विश्वस्य धारकोऽग्नि-राजगन्वान् द्युलोकादागत आगमनशील वा नृषदने होतुः स्थानेऽसादि। उपविष्टः। यमग्निं द्यौश्च पृथिवी चोभे ववृधाते वर्धयतः। यं च विश्ववारं विश्वैर्वरणीयं होता मानुष आयजति॥

॥ अथ षष्ठी॥

एते द्युम्नेभिर्विश्वमातिरंत मंत्रं ये वारं नर्या अतक्षन्।

प्र ये विशस्तिरंत श्रोषमाणा आ ये मे अस्य दीधयन्नृतस्य॥ ६

एते। द्युम्नेभिः। विश्वं। आ। अतिरंत। मंत्रं। ये। वा।

अरं। नर्याः। अतक्षन्।

प्र। ये। विशः। तिरंत। श्रोषमाणाः। आ। ये। मे।

अस्य। दीधयन्। ऋतस्य॥ ६

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

एते मदीयाः पुरुषा द्युम्नेभिर्धनैर्विश्वं पोष्यवर्गमातिरंत । वर्धयंति । अथवा द्युम्नैर्यशोभिर्विश्वं जगदातिरंत । अभ्यगच्छन्नित्यर्थः । क इत्यत आह । ये नर्या मनुष्या मंत्रं स्तोत्रं स्तुत्यं वारं वरणीयमतक्षन् समस्कुर्वन् । येति समुच्चये । ये च विशो जनाः श्रोषमाणाः ॥ शृणोतेः सन्यङोरिति द्वित्वं इको झलिति सनः कित्त्वं च सर्वे विधयश्छंदसि विकल्प्यंत इति न भवतः । ज्ञाश्रुस्मृदृशां सन इत्यात्मनेपदं च ॥ अतिरंत वर्धयंति । मे मदीया ये ना ऋतस्यास्य सत्यभूतमग्निं ॥ कर्मणि षष्ठी । मानुषाणामश्नीयादितिवत् ॥ आदीधयन् आदीपयन् ॥

॥ अथ सप्तमी ॥

नू त्वामग्न ईमहे वसिष्ठा ईशानं सूनो सहसो वसूनां ।

इषं स्तोतृभ्यो मघवद्भ्य आनड्यूयं पात स्वस्तिभिः सदा नः ॥ ७ ॥

नु । त्वां । अग्ने । ईमहे । वसिष्ठाः । ईशानं । सूनो इति ।

सहसः । वसूनां ।

इषं । स्तोतृऽभ्यः । मघवत्ऽभ्यः । आनट् । यूयं । पात ।

स्वस्तिऽभिः । सदा । नः ॥ ७

सहसः सूनो बलस्य पुत्राग्ने वसिष्ठा वयं वसूनामीशानं त्वामस्मदीयेभ्यः स्तोतृभ्यो मघवद्भ्यो हविष्मद्भ्यश्चेषमन्नं नु क्षिप्रमद्य आनट् । प्रापयेः ॥ नशेर्व्याप्तिकर्मणोऽसर्वी- तवव्ययोस्तु ङि छंदस्यपि दृश्यत इत्याडागमः ॥ यूयं त्वत्परिवाराश्च सर्वे यूयं नोऽस्मान् सदा स्वस्तिभिः पातेत्येवमीमहे । याचामहे ॥

॥ इति पंचमस्य द्वितीये दशमो वर्गः ॥

इधे राजेति सप्तर्चमष्टमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयं । इंधे राजेत्यनुक्रांतं ॥ प्रातरनुवाकाश्विनशस्त्रयोर्विनियोगः ॥ आदित्यायां प्रायणमग्निरिति स्विष्टकृतो याज्या । सूत्रितं च । प्रायणमग्निर्भरतस्य शृण्व इति संयाज्ये आ० ४. ५. इति ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तत्र प्रथमा ॥

इंधे राजा समर्यो नमोभिर्यस्य प्रतीकमाहुतं घृतेन।

नरो हव्येभिरीळते सबाध आग्निरग्र उषसामशोचि ॥ १

इंधे। राजा। सं। अर्यः। नमःऽभि। यस्य। प्रतीकं।

आऽहुतं। घृतेन।

नरः। हव्येभिः। ईळते। सऽबाधः। आ। अग्निः। अग्रे।

उषसां। अशोचि ॥ १

राजा दीप्तोऽयं स्वामी हविषां प्रेरको वाग्निर्नमोभिः स्तुतिभिः सह समिंधे। समिध्यते। यस्याग्नेः प्रतीकं रूपं घृतेनाहुतं भवति। नरश्च नोऽस्मदीयाः सबाधः संश्लिष्टाः संजातबाधा वा हव्येभिर्हव्यैः सार्द्रमीळते स्तुवंति। सोऽग्निरुषसामग्र आशोचि। आदीप्यते ॥

॥ अथ द्वितीया ॥

अयमु ष्य सुमहाँ अवेदि होता मंद्रो मनुषो यह्वो अग्निः।

वि भा अकः ससृजानः पृथिव्यां कृष्णपविरोषधीभिर्ववक्षे ॥ २

अयं। ऊं इति। स्यः। सुऽमहान्। अवेदि। होता।

मंद्रः। मनुषः। यह्वः। अग्निः।

वि। भाः। अकरित्यकः। ससृजानः। पृथिव्यां। कृष्णऽपविः।

ओषधीभिः। ववक्षे ॥ २

स सोऽयं होता देवानामाह्वाता मंद्रो मदयिता यह्वो महानग्निर्मनुषो मनुष्यस्य सुमहानवेदि। सुमहत्त्वेन प्रज्ञायते। अपि च सोऽयं भा दीप्तीरकः विकरोत्यंतरिक्षे। किंच सोऽयं कृष्णपविः कृष्णमार्गोऽग्निः पृथिव्यां ससृजानः सृज्यमानः सन्नोषधीभिर्ववक्षे। वर्धते ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ तृतीया ॥

कया नो अग्ने वि वसः सुवृक्तिं कामु स्वधामृणवः शस्यमानः ।
कदा भवेम पतयः सुदत्र रायो वन्तारो दुष्टरस्य साधोः ॥ ३

कया । नः । अग्ने । वि । वसः । सुऽवृक्तिम् । काम् । ऊँ इति ।
स्वधाम् । ऋणवः । शस्यमानः ।
कदा । भवेम । पतयः । सुऽदत्र । रायः । वन्तारः ।
दुस्तरस्य । साधोः ॥ ३

हे अग्ने त्वं कया स्वधया धिया नोऽस्माकं सुवृक्तिं स्तुतिं विवसः । व्यावृणे आच्छादयसि वा ॥ काम् कां च स्वधां शस्यमानः स्तूयमानस्त्वमृणवः । प्राप्नुयाः । हे सुदत्र शोभनदानाग्ने । तथा च यास्कः । सुदत्रः कल्याणदान इति एवं कदा दुष्टरस्य शत्रुभिर्दुर्हिंसकस्य साधोः समीचीनस्य रायो धनस्य पतयः स्वामिनो भवेम । वंतारः संभक्तारश्च कदा भवेम ॥

॥ अथ चतुर्थी ॥

प्रप्रायमग्निर्भरतस्य शृण्वे वि यत्सूर्यो न रोचते बृहद्भाः ।
अभि यः पूरुं पृतनासु तस्थौ द्युतानो दैव्यो अतिथिः शुशोच ॥ ४

प्रऽप्र । अयम् । अग्निः । भरतस्य । शृण्वे । वि । यत् । सूर्यः ।
न । रोचते । बृहत् । भाः ।
अभि । यः । पूरुम् । पृतनासु । तस्थौ । द्युतानः । दैव्यः ।
अतिथिः । शुशोच ॥ ४

अयं प्रसिद्धोऽग्निर्भरतस्य यजमानस्य मम प्रप्रात्यंतं शृण्वे । प्रथितो भवति । कर्तव्यत्वात् । यद्यदा सूर्यो न सूर्य इव बृहद्भा बृहद्भासमानो विरोचते प्रकाशते । किंच योऽग्निः पृतनासु संग्रामेषु पूरुं पूरुनामकमसुरमभितस्थौ अभिपत्य सोऽयं द्युतानो दीप्यमानो दैव्योऽतिथिर्देवानामतिथिवत्पूज्यः सन् शुशोच । जज्वाल ॥

CC0: Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ पंचमी ॥

असन्नित्त्वे आहवनानि भूरि भुवो विश्वेभिः सुमना अनीकैः।
स्तुतश्चिदग्ने शृण्विषे गृणानः स्वयं वर्धस्व तन्वं सुजात ॥ ५

असन्। इत्। त्वे इति। आऽहवनानि। भूरि। भुवः।
विश्वेभिः। सुऽमनाः। अनीकैः।
स्तुतः। चित्। अग्ने। शृण्विषे। गृणानः। स्वयं। वर्धस्व।
तन्वं। सुऽजात ॥ ५

हे अग्ने त्वे त्वय्याहवनानि हवींष्याहवनयोग्यानि भूरि बहून्यसन्नित्। असन्त्येव। त्वं च विश्वेभिर्विश्वैरनीकैस्तेजोभिस्तद्विभूतिभिरग्निभिर्वा सह सुमना भुवः। भव। हे अग्ने स्तुतः स्तोतुः। स्तौतीति स्तुत्। स्तोत्रं शृण्विषे। शृणु। हे सुजात कल्याणप्रादुर्भावाग्ने गृणानः स्तूयमानस्त्वं स्वयं स्वयमेव तन्वं स्वां तनुं तव तनुं वा वर्धस्व। वर्धयस्व ॥

॥ अथ षष्ठी ॥

इदं वचः शतसाः संसहस्रमुदग्नये जनिषीष्ट द्विबर्हाः।
शं यत्स्तोतृभ्य आपये भवाति द्युमदमीवचातनं रक्षोहा ॥ ६

इदं। वचः। शतऽसाः। संऽसहस्रं। उत्। अग्नये।
जनिषीष्ट। द्विऽबर्हाः।
शं। यत्। स्तोतृभ्यः। आपये। भवाति। द्युऽमत्।
अमीवऽचातनं। रक्षःऽहा ॥ ६

शतसा शतानां शतस्य संभक्ता संसहस्रं शतानां सहस्रेण च संयुक्तो द्विबर्हा द्वाभ्यां विद्याकर्मभ्यां वृद्धः परिवृढो द्वयोः स्थानयोर्द्युलोकयोर्व्याप्ता। तथा च यास्कः। द्विबर्हा द्वयोः स्थानयोः परिवृढ इति। इदं वच इदं स्तोत्रमग्नय उज्जनिषीष्ट।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

चदजीजनत्। किं तदित्यत आह। यद्रोचिरमवत् दीप्तिमवत्। यचस्करमित्थं॰। अमीवचातनं रोगाणां निवारकं रक्षोहा रक्षसां हंतृ च स्तोतृभ्य आपये तद्बंधवे पुत्रादिकायापि यं सुखदं अभाति अवेत्॥

॥ अथ सप्तमी॥

नू त्वामग्न ईमहे वसिष्ठा ईशानं सूनो सहसो वसूनां।
इषं स्तोतृभ्यो मघवंद्भ्य आनड्यूयं पात स्वस्तिभिः सदा नः॥ ७

नु। त्वां। अग्ने। ईमहे। वसिष्ठाः। ईशानं। सूनो इति। सहसः। वसूनां।
इषं। स्तोतृभ्यः। मघवंत्ऽभ्यः। आनट्। यूयं। पात। स्वस्तिऽभिः। सदा। नः॥ ७

इयमृक् प्रागेव व्याख्याता॥

॥ इति पंचमस्य द्वितीय एकादशो वर्गः॥

अबोधि जार इति षड्चं नवमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयं। अबोधि षडित्यनुक्रांतं॥ प्रातरनुवाकाश्विनशस्त्रयोरंयसूक्तमध्य उक्तो विनियोगः॥

॥ तत्र प्रथमा॥

अबोधि जार उषसामुपस्थाद्धोता मंद्रः कवितमः पावकः।
दधाति केतुमुभयस्य जंतोर्हव्या देवेषु द्रविणं सुकृत्सु॥ १

अबोधि। जारः। उषसां। उपऽस्थात्। होता। मंद्रः।
कविऽतमः। पावकः।
दधाति। केतुं। उभयस्य। जंतोः। हव्या। देवेषु। द्रविणं।
सुकृत्ऽसु॥ १

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

जारः सर्वेषां प्राणिनां जरयिता होता देवानामाह्वाता च मंद्रो मदयिता स्तुत्यो वा कवितमः प्राज्ञतमः पावकः शोधकोऽग्निरुषसामुपस्थात् मध्येऽबोधि। अबुध्यत। किंचोभयस्य द्विपदश्च चतुष्पदश्च दैव्यस्य मानुषस्य वा जंतोः प्राणिनः केतुं प्रज्ञानं दधाति। विदधाति। देवेषु च हव्या हव्यानि दधाति। सुक्रतुर्यजमानेषु च द्रविणं धनं दधाति॥

॥ अथ द्वितीया ॥

स सुक्रतुर्यो वि दुरः पणीनां पुनानो अर्कं पुरुभोजसं नः।

होता मंद्रो विशां दमूनास्तिरस्तमो ददृशे राम्याणां॥ २

सः। सुऽक्रतुः। यः। वि। दुरः। पणीनां। पुनानः। अर्कं। पुरुऽभोजसं। नः।

होता। मंद्रः। विशां। दमूनाः। तिरः। तमः। ददृशे। राम्याणां॥ २

सोऽग्निः सुक्रतुः सुकर्मा सुप्रज्ञो वा भवति। योऽग्निः पणीनामसुराणां दुरो द्वाराणि गवां पिधानानि विवृतवान्। पुरुभोजसं बहुक्षीरमर्कमर्चनीयं गवां संघं नोऽस्मदर्थं पुनानः शोधयन्। हरन्नित्यर्थः। होता देवानामाह्वाता मंद्रो मदयिता स्तुत्यो वा दमूना दांतमना दममना दानमना वा राम्याणां रात्रीणां रमयित्रीणां वा विशां जनानां यजमानानां वा तमोऽधकारं तिरस्कुर्वन् ददृशे दृश्यते च। यद्वा तमस्तिरो ददृशे। नाशयतीत्यर्थः॥

॥ अथ तृतीया ॥

अमूरः कविरदितिर्विवस्वान्त्सुसंसन्मित्रो अतिथिः शिवो नः।

चित्रभानुरुषसां भात्यग्रेऽपां गर्भः प्रस्व१ आ विवेश॥ ३

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

अमूरः । कविः । अदितिः । विवस्वान् । सुऽसंसत् । मित्रः ।
अतिथिः । शिवः । नः ।
चित्रऽभानुः । उषसां । भाति । अग्रे । अपां । गर्भः ।
प्रऽस्वः । आ । विवेश ॥ ३

योऽग्निरमूरोऽमूढः कविः प्राज्ञोऽदितिरदीनो विवस्वान्दीप्तिमान् सुसंसत् शोभनसदनः शोभनसंवेदनो वा मित्रः प्रमीतेस्त्राता सर्वेषामतिथिरतिथिवत्पूज्यः शिवः शिवकरो जगच्चित्रभानुश्चित्रदीप्तिरुषसामग्रे मुखे भाति योऽयमपां गर्भः सन् प्रस्वो जायमाना ओषधीराविवेश ॥

॥ अथ चतुर्थी ॥

ईड़ेन्यो वो मनुषो युगेषु समनगा अशुचज्जातवेदाः ।
सुसंदृशा भानुना यो विभाति प्रति गावः समिधानं बुधंत ॥ ४

ईड़ेन्यः । वः । मनुषः । युगेषु । समनऽगाः । अशुचत् ।
जातऽवेदाः ।
सुऽसंदृशा । भानुना । यः । विऽभाति । प्रति । गावः ।
संऽइधानं । बुधंत ॥ ४

हे अग्ने वस्त्वं ॥ अत्र विभक्तिवचनव्यत्ययः ॥ मनुषो मनुष्यस्य युगेषु यागकालेषु सर्वेष्वपि दिवसेषु ईड़ेन्यः स्तुत्यः। अतः परं परोक्षस्तुतिः। योऽग्निर्जातवेदा जातधनः समनगा युद्धेषु संगंता सन् अशुचत् दीप्यते। सुसंदृशा सुसंदर्शनेन भानुना तेजसा विभाति च। तमग्निं समिधानं समिध्यमानं गावः स्तुतयः प्रतिबुधंत। प्रतिबोधयंति ॥

वैश्वदेवे पशावग्ने याहीति चतस्रो याज्या। सूत्रितं च। अग्ने याहि दूत्यं मा रिषण्य इंद्रं नरो नेमधिता हवंत इति तिस्रः। आ० ३, ७। इति ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथात्र पंचमी ॥

अग्ने याहि दूत्यं१ मा रिषण्यो देवाँ अच्छा ब्रह्मकृता गणेन।
सरस्वतीं मरुतो अश्विनापो यक्षि देवान्रत्नधेयाय विश्वान् ॥ ५

अग्ने। याहि। दूत्यं। मा। रिषण्यः। देवान्। अच्छ।
ब्रह्मऽकृता। गणेन।
सरस्वतीं। मरुतः। अश्विना। अपः। यक्षि। देवान्।
रत्नऽधेयाय। विश्वान् ॥ ५

हे अग्ने दूत्यं दूतस्य कर्म हविर्वहनादि याहि। देवानच्छाभिगच्छ। गणेन संघेन सह ब्रह्मकृता ब्रह्मकृतोऽस्मानस्मदीयांश्च त्वं स्तोतॄन्मा रिषण्यः। मा हिंसीः। सरस्वतीं मरुतोऽश्विनाविश्विनावपश्च एतान् देवान् रत्नधेयायास्मभ्यं रत्नदानाय यक्षि च॥

॥ अथ षष्ठी ॥

त्वामग्ने समिधानो वसिष्ठो जरूथं हन्यक्षि राये पुरंधिं।
पुरुणीथा जातवेदो जरस्व यूयं पात स्वस्तिभिः सदा नः ॥ ६

त्वां। अग्ने। संऽइधानः। वसिष्ठः। जरूथं। हन्। यक्षि।
राये। पुरंऽधिं।
पुरुऽनीथा। जातऽवेदः। जरस्व। यूयं। पात। स्वस्तिऽभिः।
सदा। नः ॥ ६

हे अग्ने त्वां वसिष्ठ ऋषिः समिधानो भवति। त्वं च जरूथं परुषभाषिणं जरणीयं वा रक्षोगणं हन्। जहि। राये धनवते यजमानाय पुरंधिं बहुधियं देवगणं। यथा च यास्कः। पुरंधिर्बहुधीरिति। यक्षि। यज। किंच हे जातवेदोऽग्ने पुरुणीथा पुरुणीथेन बहुना स्तोत्रेण जरस्व। देवान् स्तुहि। यद्वा पुरुणीथानेकगामीषि रक्षांसि जरयेत्यर्थः॥

॥ इति पंचमस्य द्वितीये द्वादशो वर्गः॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उषो न जार इति पंचर्चं दशमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयं। तथा चानुक्रांतं। उषो न पंचेति॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः॥

॥ तत्र प्रथमा ॥

उषो न जारः पृथु पाजो अश्रेद्दविद्युतद्दीद्यच्छोशुचानः॥

वृषा हरिः शुचिरा भाति भासा धियो हिन्वान

उशतीरजीगः॥ १

उषः। न। जारः। पृथु। पाजः। अश्रेत्। दविद्युतत्।

दीद्यत्। शोशुचानः।

वृषा। हरिः। शुचिः। आ। भाति। भासा। धियः।

हिन्वानः। उशतीः। अजीगरिति॥ १

अग्निरुषो न जार उषसो जारः सूर्यस्तद्वत् पृथु विस्तीर्णं पाजस्तेजोऽश्रेत्। श्रयति। किंच दविद्युतत् दीद्यत् शोशुचान इति त्रयोऽपि शब्दा यद्यपि दीप्तिकर्माणस्तथापि दीप्तेर्भूयस्त्वज्ञापनाय प्रयुक्ता इति न पुनरुक्तिः। अत्यंतं दीप्यमान इत्यर्थः। वृषा कामानां वर्षिता हरिर्हविषां प्रेरकः शुचिः शुद्धिसदग्निर्धियः कर्माणि हिन्वानः प्रेरयन् भासा दीप्त्याभाति। प्रकाशते। अपि चोशतीः कामयमाना अजीगः। जागरयति। तमसा तिरोहिताः प्रजा उद्गिरति वा॥

॥ अथ द्वितीया ॥

स्व१र्ण वस्तोरुषसामरोचि यज्ञं तन्वाना उशिजो न मन्म।

अग्निर्जन्मानि देव आ वि विद्वान्द्रवद्दूतो देवयावा वनिष्ठः॥ २

स्वः। न। वस्तोः। उषसां। अरोचि। यज्ञं। तन्वानाः।

उशिजः। न। मन्म।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

अग्निः। जन्मानि। देवः। आ। वि। विद्वान्। द्रवत्।

दूतः। देवऽयावा। वनिष्ठः॥ २

अग्निर्वस्तोरहनि। स्वर्णो स्वरित्यादित्यनामसु पाठात्। उषसामध्ये स्वयं आदित्य इव। तथा च यास्कः स्वरादित्यो भवति सुअरणः सुईरण इति। अरोचि। दीप्यते। उशिजो न ऋत्विजश्च यज्ञ तन्वाना विस्तारयंतो मन्म मन्मानि मननीयानि स्तोत्राणि पठंतीति शेषः। नेति संप्रत्यर्थः। अपि च विद्वान् जानन् दूतो देवानां देवयावा देवान् प्रति गच्छन् वनिष्ठो दातृतमोऽग्निर्ज्योतिर्द्रवत्। विविधमाद्रवति॥

। अथ तृतीया।

अच्छा गिरो मतयो देवयंतीरग्निं यंति द्रविणं भिक्षमाणाः।

सुसंदृशं सुप्रतीकं स्वंचं हव्यवाहमरतिं मानुषाणां॥ ३

अच्छ। गिरः। मतयः। देवऽयंतीः। अग्निं। यंति।

द्रविणं। भिक्षमाणाः।

सुऽसंदृशं। सुऽप्रतीकं। सुऽअंचं। हव्यऽवाहं। अरतिं।

मानुषाणां॥ ३

मतयः स्तुतिरूपा देवयंतीर्देवानिच्छंत्यो द्रविणं धनं भिक्षमाणा याचमाना गिरो वाचः सुसंदृशं कल्याणसंदर्शनं सुप्रतीकं सुरूपं शोभनांगं वा स्वंचं सुष्ठु गच्छंतं हव्यवाहं हव्यानां वोढारं मानुषाणामरतिं स्वामिनमग्निमच्छाभि यंति। अभिगच्छंति॥

। अथ चतुर्थी।

इंद्रं नो अग्ने वसुभिः सजोषा रुद्रं रुद्रेभिरा वहा बृहंतं।

आदित्येभिरदितिं विश्वजन्यां बृहस्पतिमृक्वभिर्विश्ववारं॥ ४

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

इंद्रं । नः । अग्ने । वसुऽभिः । सऽजोषाः । रुद्रं । रुद्रेभिः ।
आ । वह । बृहंतं ।
आदित्येभिः । अदितिं । विश्वऽजन्यां । बृहस्पतिं ।
ऋक्वऽभिः । विश्वऽवारं ॥ ४

हे अग्ने वसुभिर्देवैः सजोषाः संगतस्त्वं नोऽस्मदर्थमिंद्रमावह । रुद्रेभी रुद्रैर्देवैः संगतो बृहंतं महांतं रुद्रं चावह । आदित्येभिरादित्यैर्देवैः संगतो विश्वजन्यां विश्वजनहितामदितिं चावह । ऋक्वभिः स्तुत्यैरंगिरोभिर्देवैः संगतो विश्ववारं विश्वैः संभजनीयं बृहस्पतिं चावह ॥

॥ अथ पंचमी ॥

मंद्रं होतारमुशिजो यविष्ठमग्निं विश ईळते अध्वरेषु ।
स हि क्षपावाँ अभवद्रयीणामतंद्रो दूतो यजथाय देवान् ॥ ५

मंद्रं । होतारं । उशिजः । यविष्ठं । अग्निं । विशः । ईळते । अध्वरेषु ।
सः । हि । क्षपाऽवान् । अभवत् । रयीणां । अतंद्रः । दूतः । यजथाय । देवान् ॥ ५

उशिजः कामयमाना विशो मनुष्या मंद्रं स्तुत्यं होतारमाह्वातारं यविष्ठं युवतममग्निमध्वरेषु यागेष्वीळते । स्तुवंति । हि यस्मात्कारणादसावग्निः क्षपावान् रात्रिमान् । रात्रौ खल्वग्नयेऽग्निहोत्रं हूयते । रयीणां स्वयंस्य रयिमतो हविष्मतां यजमानानां देवान्यजथाय यष्टुमतंद्रस्तंद्रारहितोऽभवत् । तथा च श्रूयते । यस्माद्दूतोऽभवत्तस्माद्धियस्तयध्वर ईळत इति ॥

॥ इति पंचमस्य द्वितीये त्रयोदशो वर्गः ॥

महाँ असीति पंचर्चमेकादशं सूक्तं गाथिनस्सार्षं त्रैष्टुभमाग्नेयं । महानित्यनुक्रांतं ॥ प्रातरनुवाकाश्विनशस्त्रयोरस्य विनियोगः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तत्र प्रथमा ॥

महाँ असि अध्वरस्य प्रकेतो न ऋते त्वदमृता मादयंते

आ विश्वेभिः सरथं याहि देवैर्न्यग्ने होता प्रथमः सदेह ॥ १

महान् । असि । अध्वरस्य । प्रऽकेतः । न । ऋते । त्वत् । अमृताः । मादयंते ।

आ । विश्वेभिः । सऽरथं । याहि । देवैः । नि । अग्ने । होता । प्रथमः । सद । इह ॥ १

हे अग्ने त्वमध्वरस्य प्रकेतः प्रज्ञापनः सन् महानसि । त्वदृते त्वया विनामृता देवा न मादयंते । न माद्यंति । विश्वेभिर्विश्वैर्देवैः सरथं यथा भवत्यायाहि च । इह स्तीर्णे बर्हिषि प्रथमो मुख्यो होताह्वाता सन् निषद । निषीद च ॥

वाजपेये याज्यंसत्यपरोः खिष्टकृतोऽनुवाक्या । सूत्रितं च । त्वामीळते अजिरं दूत्यायाग्निं सुदीतिं सुदृशं दृशपंतः । आ० ६. ६. । इति ॥

॥ सैषात्र द्वितीया ॥

त्वामीळते अजिरं दूत्याय हविष्मंतः सदमिन्मानुषासः ।

यस्य देवैरासदो बर्हिरग्नेऽहान्यस्मै सुदिना भवंति ॥ २

त्वां । ईळते । अजिरं । दूत्याय । हविष्मंतः । सदं । इत् । मानुषासः ।

यस्य । देवैः । आ । असदः । बर्हिः । अग्ने । अहानि । अस्मै । सुऽदिना । भवंति ॥ २

हे अग्ने अजिरं गमनशीलं त्वां मानुषासो मानुषा हविष्मंतो यजमानाः सदमित्सदैव दूत्याय दूतकर्मणे हविर्वहनायेळते । याचंते । किमर्थमित्यत आह । यस्य हविषमतो यजमानस्य बर्हिर्देवैः सार्धमासदः त्वमधितिष्ठसि अस्मै हविष्मतेऽहानि सुदिना सुदिनानि शोभनदिनानि भवंति ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ तृतीया ॥

त्रिश्चिदक्तोः प्र चिकितुर्वसूनि त्वे अंतर्दाशुषे मर्त्याय ।

मनुष्वदग्न इह यक्षि देवान्भवा नो दूतो अभिशस्तिपावा ॥ ३

त्रिः । चित् । अक्तोः । प्र । चिकितुः । वसूनि । त्वे इति ।

अंतः । दाशुषे । मर्त्याय ।

मनुष्वत् । अग्ने । इह । यक्षि । देवान् । भव । नः । दूतः ।

अभिशस्तिऽपावा ॥ ३

हे अग्ने त्वे त्वय्यंतर्मध्येऽक्तोरह्नः । यद्यप्यक्तुरिति रात्रेर्नाम तथाप्यक्तोऽज्यंते अज्यंते रूपादीन्यस्मिन्नित्यह्नो नाम । त्रिश्चित्रिवारं त्रिषु सवनेषु वसूनि धनानि दाशुषे हविषां प्रदात्रे मर्त्याय मनुष्याय । तदर्थमित्यर्थः । प्र चिकितुः । प्रवेदयंत्यृत्विजः । यद्वाक्तोरह्नि त्रिश्चिन्नित्यमप्यजस्रं च त्वय्यंतर्निहितानि प्रचिकितुः । अपिदधतीत्यर्थः । अपि च मनुष्वत् मनोरिवेह मनाग्निन्यस्ते दूतस्त्वं देवान्यक्षि । यज । नोऽस्माकमभिशस्तिपावाभिशस्तेरभिशंसकात् पातकात्पाता रक्षिता भव ॥

॥ अथ चतुर्थी ॥

अग्निरीशे बृहतो अध्वरस्याग्निर्विश्वस्य हविषः कृतस्य ।

क्रतुं ह्यस्य वसवो जुषंताथा देवा दधिरे हव्यवाहं ॥ ४

अग्निः । ईशे । बृहतः । अध्वरस्य । अग्निः । विश्वस्य ।

हविषः । कृतस्य ।

क्रतुं । हि । अस्य । वसवः । जुषंत । अथ । देवाः ।

दधिरे । हव्यऽवाहं ॥ ४

बृहतो महतोऽध्वरस्य कौटिल्यरहितस्य यज्ञस्याग्निरीशे । ईष्टे । विश्वस्य सर्वस्य कृतस्य संस्कृतस्य हविषश्चाग्निरेवेष्टे । हि यस्मादस्याग्नेः क्रतुं कर्म वसवो देवा जुषंत सेवंते । अथापि च देवा अग्निं हव्यवाहं हव्यानां वोढारं दधिरे चक्रिर इत्यर्थः ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ पंचमी ॥

आग्ने वह हविरद्याय देवानिंद्रज्येष्ठास इह मादयंतां ।

इमं यज्ञं दिवि देवेषु धेहि यूयं पात स्वस्तिभिः सदा नः ॥ ५

आ । अग्ने । वह । हविःऽअद्याय । देवान् । इंद्रंऽज्येष्ठासः ।

इह । मादयंतां ।

इमं । यज्ञं । दिवि । देवेषु । धेहि । यूयं । पात ।

स्वस्तिऽभिः । सदा । नः ॥ ५

हे अग्ने हविरद्याय हविषां भक्षणाय देवानावह । किमर्थमत्यिल्याह । इहास्मिन्यज्ञ इंद्रज्येष्ठास इंद्रप्रमुखा देवा मादयंतां । इमं यज्ञमिदं यष्टव्यं हविर्दिवि स्थितेषु देवेषु धेहि । निधेहि । देवान्वेह नयेदं हविर्वा देवेषु नयेति भावः । अंतिमः पादो व्याख्यातचरः ॥

॥ इति पंचमस्य द्वितीये चतुर्दशो वर्गः ॥

अगन्म महेति दृचात्मकं द्वादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाग्नेयं । तथा चानुक्रांतं । अगन्म दृचमिति ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥ व्यूढे दशरात्रे नवमेऽहनीदं सूक्तमाज्यशस्त्रं । सूत्रितं च । दृतीयस्यागन्म महेत्याज्यं । आ० ८. ११. । इति ॥

॥ तत्र प्रथमा ॥

अगंन्म महा नमसा यविष्ठं यो दीदाय समिद्धः स्वे दुरोणे ।

चित्रभानुं रोदसी अंतरुर्वी स्वाहुतं विश्वतः प्रत्यंचं ॥ १

अगंन्म । महा । नमसा । यविष्ठं । यः । दीदाय । संऽइद्धः ।

स्वे । दुरोणे ।

चित्रऽभानुं । रोदसी इति । अंतः । उर्वी इति । सुऽआहुतं ।

विश्वतः । प्रत्यंचं ॥ १

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

योऽग्निः स्वे दुरोणे स्वे स्थान आहवनीये समिद्धः काष्ठैः समिद्धः सन् दीदाय दीप्यते तमिमं यविष्ठं युवतममुर्वी विस्तीर्णयो रोदसी रोदस्योर्द्यावापृथिव्योरंतर्मध्येऽन्तरिक्षे चित्रभानुं चित्रज्वालं स्वाहुतं सुष्ठ्वाहुतिभिर्हुतं तं विश्वतः सर्वतः प्रत्यंचं प्रतिगच्छंतमग्निं मह्ना महता नमसा नमस्कारेणागन्म । वयमुपगच्छाम ॥

॥ अथ द्वितीया ॥

स मह्ना विश्वा दुरितानि साह्वानग्निः ष्टवे दम आ जातवेदाः ।

स नो रक्षिषद्दुरितादवद्यादस्मान्गृणत उत नो मघोनः ॥ २

स । मह्ना । विश्वा । दुःऽइतानि । सह्वान् । अग्निः । स्तवे ।

दमे । आ । जातऽवेदाः ।

सः । नः । रक्षिषत् । दुःऽइतात् । अवद्यात् । अस्मान् ।

गृणतः । उत । नः । मघोनः ॥ २

योऽग्निर्मह्ना महत्त्वेन विश्वा विश्वानि दुरितानि सह्वानभिभवन् जातवेदा जातधनो जातप्रज्ञो वा दमे यज्ञगृहे स्तवे अस्माभिः स्तूयते सोऽग्निरस्माद्दुरितात्पापादवद्यात् निंदितात्कर्मणो रक्षिषत् । रक्षतु । अस्मान् गृणतः स्तुवतोऽपि रक्षिषत् । उतापि च सोऽग्निर्नो मघोनो हविष्मतो रक्षिषत् ॥

॥ अथ तृतीया ॥

त्वं वरुण उत मित्रो अग्ने त्वां वर्धंति मतिभिर्वसिष्ठाः ।

त्वे वसु सुषणनानि संतु यूयं पात स्वस्तिभिः सदा नः ॥ ३

त्वं । वरुणः । उत । मित्रः । अग्ने । त्वां । वर्धंति ।

मतिऽभिः । वसिष्ठाः ।

त्वे इति । वसु । सुऽसननानि । संतु । यूयं । पात ।

स्वस्तिऽभिः । सदा । नः ॥ ३

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

हे अग्ने त्वं वरुणोऽसि । उतापि च त्वं मित्रोऽसि जगतः प्रमीतेस्त्रातासि । त्वां वसिष्ठा मतिभिः स्तुतिभिर्वर्धयंति । वर्धयंति । ते त्वयि विद्यमानानि वसु वसूनि सुखननानि सुसंभजनानि संत्विति । स्पष्टमन्यत् ॥

॥ इति पंचमस्य द्वितीये पंचदशो वर्गः ॥

प्राग्नय इति त्र्यृचं त्रयोदशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वानराग्निदेवताकं तथा चानुक्रांतं । प्राग्नये वैश्वानरीयमिति ॥ विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

प्राग्नये विश्वशुचे धियंधेऽसुरघ्ने मन्म धीतिं भरध्वं ।

भरे हविर्न बर्हिषि प्रीणानो वैश्वानराय यतये मतीनां ॥ १

प्र । अग्नये । विश्वऽशुचे । धियंऽधे । असुरऽघ्ने । मन्म ।

धीतिं । भरध्वं ।

भरे । हविः । न । बर्हिषि । प्रीणानः । वैश्वानराय ।

यतये । मतीनां ॥ १

हे सखाया विश्वशुचे विश्वं यो दीपयति तस्मै धियंधे धियां कर्मणां यो धाता तथा असुरघ्नेऽसुराणां यो हंता तस्मा अग्नये मन्म माननीयं स्तोत्रं धीतिं कर्म च प्रभरध्वं । मतीनामभिमतानां कामानां यतये दात्रे वैश्वानराय विश्वनरहितायाग्निविशेषाय बर्हिषि यज्ञे हविर्न हविरिव स्तुतिं प्रीणानः प्रीयमाणोऽहं भरे । भरामि । यद्वा हविः प्रीणानः प्रीणयन्नहं बर्हिषि हविर्भरे । संभरामि । नेति संप्रत्यर्थे ॥

॥ अथ द्वितीया ॥

त्वमग्ने शोचिषा शोशुचान आ रोदसी अपृणा जायमानः ।

त्वं देवाँ अभिशस्तेरमुंचो वैश्वानर जातवेदो महित्वा ॥ २

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

त्वं। अग्ने। शोचिषा। शोशुचानः। आ। रोदसी इति।
अपृणाः। जायमानः।

त्वं। देवान्। अभिऽशस्तेः। अमुंचः। वैश्वानर।
जातऽवेदः। महिऽत्वा ॥ २

हे अग्ने त्वं शोचिषा दीप्त्या शोशुचानो दीप्यमानो जायमानो जायमान एव रोदसी द्यावापृथिव्यावापृणाः। आपूरयः। अपि च जातवेदो जातप्रज्ञ जातधन वा वैश्वानर विश्वनरहित हे अग्ने त्वं देवान्महित्वा महत्त्वेनाभिशस्तेरभिशंसकाच्छत्रोरमुंचः। अमोचयः ॥

॥ अथ तृतीया ॥

जातो यदग्ने भुवना व्यख्यः पशून्न गोपा इर्यः परिज्मा।
वैश्वानर ब्रह्मणे विंद गातुं यूयं पात स्वस्तिभिः सदा नः ॥ ३

जातः। यत्। अग्ने। भुवना। वि। अख्यः। पशून्। न।
गोपाः। इर्यः। परिऽज्मा।
वैश्वानर। ब्रह्मणे। विंद। गातुं। यूयं। पात। स्वस्तिऽभिः।
सदा। नः ॥ ३

हे अग्ने जातः स्वात्मना जातस्त्वमिर्यः स्वामी प्रेरयन्वा परिज्मा परितो गंता सन् पशून्न गोपाः। यथा गवां पालकः पशून्पश्यति तद्वत्। यद्यदा भुवना भूतानि व्यख्यः रक्षार्थं पश्यसि तदा ब्रह्मणे। ब्रह्म स्तोत्रं। तदर्थं गातुं गतिं फलप्राप्तिं विंद। यद्वा ब्रह्मणे ब्राह्मणार्थं गातुं विंद। येन ब्राह्मणोपद्रवाद्विर्गच्छंति तं गातुं विंदेत्यर्थः। स्पष्टमन्यत्।

॥ इति पंचमस्य द्वितीये षोडशो वर्गः ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

समिधा जातवेदस इति तृचं पञ्चदशं सूक्तं वसिष्ठस्यार्षमाग्नेयं। आद्या बृहती द्वितीयातृतीये त्रिष्टुभौ। तथा चानुक्रम्यते। समिधा तृचत्वादीति॥ विनियोगो लैंगिकः॥

॥ तत्र प्रथमा॥

समिधा जातवेदसे देवाय देवहूतिभिः।

हविर्भिः शुक्रशोचिषे नमस्विनो वयं दाशेमाग्नये।

सम्ऽइधा। जातऽवेदसे। देवाय। देवहूतिऽभिः।

हविःऽभिः। शुक्रऽशोचिषे। नमस्विनः। वयं। दाशेम।

अग्नये॥ १

जातवेदसे जातवेदसं जातप्रज्ञमग्नयेऽग्निं समिधा वयं वसिष्ठा दाशेम। परिचरेम देवाय देवं स्तुत्यमग्निं देवहूतिभिर्देवस्तुतिभिर्दाशेम। शुक्रशोचिषे शुक्रशोचिषं शुभ्रदीप्तिं नमस्विनो हविष्मंतो वयं हविर्भिर्दाशेम॥ अत्र दाशतियोगात्कर्मणि चतुर्थी। प्रायेण सर्वत्र दाशतियोगे कर्मणि चतुर्थी दृश्यते॥

॥ अथ द्वितीया॥

वयं ते अग्ने समिधा विधेम वयं दाशेम सुष्टुती यजत्र।

वयं घृतेनाध्वरस्य होतर्वयं देव हविषा भद्रशोचे॥ २

वयं। ते। अग्ने। सम्ऽइधा। विधेम। वयं। दाशेम।

सुऽस्तुती। यजत्र।

वयं। घृतेन। अध्वरस्य। होतः। वयं। देव। हविषा।

भद्रऽशोचे॥ २

हे अग्ने ते त्वां वयं वसिष्ठाः समिधा विधेम। परिचरेम। हे यजत्र यष्टव्याग्ने वयं सुष्टुती शोभनया स्तुत्या दाशेम। त्वां परिचरेम। अध्वरस्य यज्ञस्य होतरग्ने

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

वयं एतेनाज्येन त्वां दाशेम। हे भद्रशोचे कल्याणज्वाल देव द्योतमानाग्ने त्वां वयं हविषा दाशेम॥

॥ अथ तृतीया॥

आ नो देवेभिरुप देवहूतिमग्ने याहि वषट्कृतिं जुषाणः।
तुभ्यं देवाय दाशतः स्याम यूयं पात स्वस्तिभिः सदा नः॥ ३

आ। नः। देवेभिः। उप। देवऽहूतिं। अग्ने। याहि।
वषट्ऽकृतिं। जुषाणः।
तुभ्यं। देवाय। दाशतः। स्याम। यूयं। पात।
स्वस्तिऽभिः। सदा। नः॥ ३

हे अग्ने नोऽस्माकं देवहूतिं स्तोत्रं यज्ञं वा देवेभिर्देवैः सार्धं वषट्कृतिं हविर्जुषाणः सेवमानस्त्वमुपायाहि। देवाय द्योतमानाय तुभ्यं वयं दाशतः परिचरंतः स्याम। भवेम। सिद्धमन्यत्॥

॥ इति पंचमस्य द्वितीये सप्तदशो वर्गः॥

उपसद्यायेति पंचदशर्चं पंचदशं सूक्तं वसिष्ठस्यार्षं गायत्रमाग्नेयं। तथा चानुक्रांतं। उपसद्याय पंचोना गायत्रमिति॥ प्रातरनुवाक आग्नेये क्रतौ गायत्रे छंदस्याश्विनशस्त्रे चेदं सूक्तं। सूत्रितं च। उपसद्याय त्वमग्ने यज्ञानामिति तिस्र उत्तमा उद्धरेत्। आ० ४. १३.। इति॥ उपसदि पौर्वाह्णिक्यामुपसद्यायेत्याद्यास्तिस्र ऋचः सामिधेन्यः। सूत्यते च। उपसद्याय मीळ्हुष इति तिस्र एकैकां त्रिरनवानं। आ० ४. ८.। इति॥ पवित्रेष्ट्यामग्ने रक्षांसीत्येषा प्रथमाज्यभागानुवाक्या। सूत्रितं च। पावकवंतावाज्यभागावग्नी रक्षांसि सेधति। आ० २. १२.। इति॥ अन्वारंभणीयायामग्ने भंगिनो याज्या। सूत्रितं च। आ नूनं सवितुर्या स नो राधांस्या भर। आ० २. ८.। इति॥ स्वस्त्ययन्यामिष्टावग्ने रक्षा ण इति प्रथमाज्यभागानुवाक्या। सूत्रितं च। स्वस्त्ययन्यां रक्षितवंतावग्ने रक्षा णो अंहसः। आ० २. १०.। इति॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तत्र प्रथमा ॥

उपसद्याय मीळ्हुषं आस्ये जुहुता हविः।

यो नो नेदिष्ठमाप्यं ॥ १

उपऽसद्याय। मीळ्हुषे। आस्ये। जुहुत। हविः।

यः। नः। नेदिष्ठं। आप्यं ॥ १

हे अध्वर्यव उपसद्यायोपसदनीयाय मीळ्हुषे कामानां वर्षित्रेऽग्नये तत्प्रीत्यर्थं आस्ये तस्यैव मुखे हविर्जुहुत। योऽग्निर्नेदिष्ठमासन्नतममाप्यं भवति। आसन्नतमो बंधुर्भवतीत्यर्थः ॥ आप्यमिति स्वार्थिकस्तद्धितः ॥

॥ अथ द्वितीया ॥

यः पंच चर्षणीरभि निषसाद दमेदमे।

कविर्गृहपतिर्युवा ॥ २

यः। पंच। चर्षणीः। अभि। निऽससाद। दमेऽदमे।

कविः। गृहऽपतिः। युवा ॥ २

योऽग्निः कविः प्राज्ञो गृहपतिर्गृहाणां पालयिता युवा नित्यतरुणः सन् पंच चर्षणीः पंच जनान् मनुष्यानभि अभिमुखं दमे दमे गृहे गृहे निषसाद निषीदति। उत्तरथा वाक्यपरिसमाप्तिः ॥

॥ अथ तृतीया ॥

स नो वेदो अमात्यमग्नी रक्षतु विश्वतः।

उतास्मान्पात्वंहसः ॥ ३

सः। नः। वेदः। अमात्यं। अग्निः। रक्षतु। विश्वतः।

उत। अस्मान्। पातु। अंहसः ॥ ४

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

सोऽग्निर्नोऽस्माकं वेदो धनसमात्यंतिके भवं सदृभूतं वा विभ्वतः सर्वतो बाधकाद्रक्षतु । उतापि चास्मान्विशानंहसः पापात्पातु । रक्षतु ॥

॥ अथ चतुर्थी ॥

नवं नु स्तोममग्नये दिवः श्येनाय जीजनं ।

वस्वः कुविद्वनाति नः ॥ ४

नवं । नु । स्तोमं । अग्नये । दिवः श्येनाय । जीजनं ।

वस्वः । कुवित् । वनाति । नः ॥ ४

दिवो द्युलोकस्य श्येनाय श्येनसदृशाय नु क्षिप्रं गंतेऽग्नये यस्मै नवं नूतनं स्तोमं जीजनं जनयामि सोऽग्निर्नोऽस्मभ्यं कुविद्बहु वस्वो वसु धनं॥ कर्मणि षष्ठी ॥ वनाति । ददात्वित्यर्थः ॥

॥ अथ पंचमी ॥

स्पार्हा यस्य श्रियो दृशे रयिर्वीरवतो यथा ।

अग्रे यज्ञस्य शोचतः ॥ ५

स्पार्हाः । यस्य । श्रियः दृशे । रयिः । वीरऽवतः । यथा ।

अग्रे । यज्ञस्य । शोचतः ॥ ५

यज्ञस्याग्रे पुरस्ताद्भागे शोचतो दीप्यमानस्य यस्याग्नेः श्रियो दीप्तयो वीरवतः पुत्रवतो रयिर्धनं यथा तद्वद् दृशे द्रष्टुं चक्षुषे वा स्पार्हाः स्पृहणीया भवंति तस्मै नवं स्तोमं जीजनमित्यनुषंगः । उत्तरत्र संबंधो वा ॥

॥ इति पंचमस्य द्वितीयेऽष्टादशो वर्गः ॥

॥ अथ षष्ठी ॥

सेमां वेतु वषट्कृतिमग्निर्जुषत नो गिरः ।

यजिष्ठो हव्यवाहनः ॥ ६

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

सः । इमाम् । वेतु । वषट्ऽकृतिम् । अग्निः । जुषत । नः । गिरः ।

यजिष्ठः । हव्यऽवाहनः ॥ ६

यजिष्ठो यजनीयतमो यष्टृतमो वा हव्यवाहनो हव्यानां हविषां वोढा सोऽग्निरिमां वषट्कृतिमस्माभिर्दीयमानामाहुतिं वेतु । कामयतां । भक्षयतु वा नोऽस्माकं गिरः स्तुतीश्च जुषत । सेवतां ॥

॥ अथ सप्तमी ॥

नि त्वा नक्ष्य विश्पते द्युमन्तं देव धीमहि ।

सुवीरमग्न आहुत ॥ ७

नि । त्वा । नक्ष्य । विश्पते । द्युऽमंतं । देव । धीमहि ।

सुऽवीरं । अग्ने । आऽहुत ॥ ७

नक्ष्योपगंतव्य । नक्षतिर्व्याप्तिकर्मा । विश्पते विशां पते देव द्योतमानाहुत सर्वैर्यजमानैरभिहुत हे अग्ने द्युमंतं दीप्तिमंतं सुवीरं कल्याणस्तोत्रिकं त्वा त्वां वयं निधीमहि । निहितवंतः ॥

॥ अथाष्टमी ॥

क्षप उस्रश्च दीदिहि स्वग्नयस्त्वया वयं ।

सुवीरस्त्वमस्मयुः ॥ ८

क्षपः । उस्रः । च । दीदिहि । सुऽअग्नयः । त्वया । वयं ।

सुऽवीरः । त्वं । अस्मऽयुः ॥ ८

हे अग्ने त्वं क्षपो रात्रीरुस्रोऽहानि च । सर्वदेति यावत् । दीदिहि । दीप्यस्व । दीप्यमानेन त्वया वयं वसिष्ठाः स्वग्नयः शोभनाग्नयो भवाम । अस्मयुरस्मान् कामयमानः ॥ सुप आत्मनः क्यजिति क्यचि कृते क्याच्छंदसीत्युप्रत्ययः । इकारलोपश्छांदसः ॥ तथा च यास्कः । अस्मयुरस्मान् कामयमान इति ॥ त्वं सुवीर सुस्तोत्रिको भव ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ नवमी ॥

उपं त्वा सातये नरो विप्रासो यंति धीतिभिः।

उपाक्षरा सहस्रिणी ॥ ९

उपं। त्वा। सातयें। नरः। विप्रासः। यंति। धीतिऽभिः।

उपं। अक्षरा। सहस्रिणी ॥ ९

हे अग्ने त्वा त्वां नरो नेतारो यजमाना विप्रासो विप्रा मेधाविनो धीतिभिः कर्मभिः सातये धनाय कामानां लाभाय वोपयंति। उपगच्छंति। सहस्रिणी सहस्रसंख्याकाक्षरा क्षयरहिता स्तुतिरूपास्मदीया वाक् त्वामुपयाति च ॥

॥ अथ दशमी ॥

अग्नी रक्षांसि सेधति शुक्रशोचिरमर्त्यः।

शुचिः पावक ईड्यः ॥ १०

अग्निः। रक्षांसि। सेधति। शुक्रऽशोचिः। अमर्त्यः।

शुचिः। पावकः। ईड्यः ॥ १०

शुक्रशोचिः शुभ्रज्वालोऽमर्त्यो मरणरहितो देवतात्मा शुचिः स्वयं शुद्धः पावकोऽन्येषामपि शोधक ईड्यः स्तुत्योऽग्नी रक्षांसि राक्षसान् सेधति। बाधतां ॥

॥ इति पंचमस्य द्वितीये एकोनविंशो वर्गः ॥

॥ अथैकादशी ॥

स नो राधांस्या भरेशानः सहसो यहो।

भगश्च दातु वार्यं ॥ ११

सः। नः। राधांसि। आ। भर। ईशानः। सहसः।

यहो इति।

भगः। च। दातु। वार्यं ॥ ११

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे सहसो यहो बलस्य पुत्राग्ने स प्रसिद्धस्त्वमीशानः सर्वस्य जगत ईश्वरः सन् नोऽस्मभ्यं राधांसि धनानि ॥ राधो राध इति धननामसु पाठात् ॥ आभर। आहर। भगश्च भगो देवोऽपि वार्यं धनं दातु। अस्मभ्यं ददातु ॥ अस्यामुखोपन्त्यांदसः ॥ भगोऽत्र सूक्ते निपातभागिनो देवता ॥

॥ अथ द्वादशी ॥

त्वमंग्ने वीरवद्यशो देवश्च सविता भगः।
दितिश्च दाति वार्यं ॥ १२

त्वं। अग्ने। वीरऽवत्। यशः। देवः। च। सविता। भगः।
दितिः। च। दाति। वार्यं ॥ १२

हे अग्ने त्वं वीरवत्पुत्रपौत्रोपेतं यशोऽन्नं देहीति शेषः। देवश्च सविता सविता देवोऽपि वार्यं वरणीयं धनं दाति। ददातु भगश्च देवोऽपि ददातु। दितिश्च दितिरपि देवी ददातु। सवित्रादिः सूक्ते निपातभागिनो देवता ॥

॥ अथ त्रयोदशी ॥

अग्ने रक्षा णो अंहसः प्रति ष्म देव रीषतः।
तपिष्ठैरजरो दह ॥ १३

अग्ने। रक्ष। नः। अंहसः। प्रति। स्म। देव। रिषतः।
तपिष्ठैः। अजरः। दह ॥ १३

हे अग्ने त्वं नोऽस्मानंहसः पापाद्रक्ष। पाहि ॥ संहितायां दीर्घश्छान्दसः ॥ अपि च हे देव द्योतमानाग्ने अजरो जरारहितस्त्वं रिषतो हिंसतः शत्रून् तपिष्ठैरतिशयेन तापकैस्तेजोभिर्दह। भस्मीकुरु ॥

॥ अथ चतुर्दशी ॥

अधा मही न आयस्यनाधृष्टो नृपीतये।
पूर्भवा शतभुजिः ॥ १४

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

अधं। मही। नः। आयसी। अनाधृष्टः। नृऽपीतये।

पूः। भव। शतऽभुंजिः॥ १४

अधाधुना हे अग्ने अनाधृष्टोऽप्रतिधर्षणीयस्त्वं नोऽस्माकं नृपीतये नृणां रक्षणार्थं मही महत्यायस्ययसा निर्मिता शतभुजिरत्यंतं विस्तृता शतगुणा पूः पुरी। तद्रक्षासाधनभूतप्रकारादिर्वा पूरुच्यते। भव। यथायसा निर्मिता पुरी तद्रक्षासाधनभूतप्रकारादिर्वा शत्रुभ्यो भीतान्रक्षति तद्वद्राक्षसेभ्यो भीतानस्मान् पाहीत्यर्थः॥

॥ अथ पंचदशी॥

त्वं नः पाह्यंहसो दोषावस्तरघायतः।

दिवा नक्तमदाभ्य॥ १५

त्वं। नः। पाहि। अंहसः। दोषाऽवस्तः। अघऽयतः।

दिवा। नक्तं। अदाभ्य॥ १५

हे अदाभ्याहिंस्य दोषावस्तः रात्रेराच्छादयितः। तमसो वारयितरित्यर्थः। अग्ने त्वं नोऽस्मानंहसः पापादघायतः पापमिच्छतः शत्रोश्च दिवा नक्तमहनि रात्रौ च सर्वदा पाहि। रक्ष॥

॥ इति पंचमस्य द्वितीये विंशो वर्गः॥

एना व इति द्वादशर्चं षोडशं सूक्तं वसिष्ठस्यार्षमाग्नेयं। अयुजो बृहत्यो युजः सतोबृहत्यः। तथा चानुक्रांतं। एना वो द्वादश प्रागाथमिति॥ प्रातरनुवाके आग्नेये क्रतौ बार्हते छंदस्याश्विनशस्त्रे चेदं सूक्तं। सूत्रितं च। एना वो अग्निं प्र वो यद्वं। आ० ४, १२,। इति॥ आग्निमारुतशस्त्रे देवो वो द्रविणोदा इति प्रगाथोऽनुरूपः। सूत्रितं च। [देवो वो द्रविणोदा इति प्रगाथो स्तोत्रियानुरूपौ। आ० ५, ३०,। इति॥

॥ तत्र प्रथमा॥

एना वो अग्निं नमसोर्जो नपातमा हुवे।

प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतं॥ १

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एना । वः । अग्निं । नमसा । ऊर्जः । नपातं । आ । हुवे ।

प्रियं । चेतिष्ठं । अरतिं । सुऽअध्वरं । विश्वस्य । दूतं ।

अमृतं ॥ १

ऊर्जो बलस्य नपातं पुत्रं ॥ ऊर्जोनपादित्यपत्यनामसु पाठात् ॥ प्रियं प्रियतमं चेतिष्ठमतिशयेन ज्ञातारं प्रज्ञापकं वारतिं गंतारं स्वामिनं वा स्वध्वरं सुयज्ञं विश्वस्य सर्वस्य यजमानजनस्य दूतममृतं नित्यमग्निमेनेनानेन नमसा स्तोत्रेण ॥ यद्यप्यन्वादेशो नास्ति तथापि छांदसत्वादिदंशब्दस्यैनादेशः । यद्वैनेनेत्यग्नेर्विशेषणं । समानार्थत्वात्पूर्वेषु सूक्तेष्वादिष्टत्वाद्वाऽस्मिन्नेनान्वादिश्यते ॥ वो युष्मदर्थमाहुवे । आह्वयामि ॥

॥ अथ द्वितीया ॥

स योजते अरुषा विश्वभोजसा स दुद्रवत्स्वाहुतः ।

सुब्रह्मा यज्ञः सुशमी वसूनां देवं राधो जनानां ॥ २

सः । योजते । अरुषा । विश्वऽभोजसा । सः । दुद्रवत् ।

सुऽआहुतः ।

सुऽब्रह्मा । यज्ञः । सुऽशमी । वसूनां । देवं । राधः ।

जनानां ॥ २

सोऽग्निररुषारोचमानौ विश्वभोजसा विश्वस्य पालयितारावश्वौ योजते । रथे युनक्ति । यद्वा सोऽरुषारोचमानेन तेजसा विश्वभोजसा विश्वस्य रक्षकेण योजते । अयुज्यत । किंच सोऽग्निर्दुद्रवत् । आनेतुं देवान् प्रति भृशं द्रवतु द्रवति वा । स्वाहुतः सुष्ठ्वाहुतः सुब्रह्मा सुस्तुतिः शोभनान्नो वा यज्ञो यष्टव्यः सुशमी सुकर्मा च भवति । तमिमं देवं द्योतमानं वसूनां वासकानां जनानां यष्टॄणां राधो धनिरभिगच्छत्विति शेषः । यद्वैवंगुणविशिष्टोऽग्निर्वसूनां धनानां मध्ये देवमत्यंतं प्रकाशमानं राधो धनं जनानां यजमानानां धनवत् प्रियतम इत्यर्थः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ तृतीया ॥

उदस्य शोचिरस्थादाजुह्वानस्य मीळ्हुषः।

उद्धूमासो अरुषासो दिविस्पृशः समग्निमिन्धते नरः ॥ ३

उत्। अस्य। शोचिः। अस्थात्। आऽजुह्वानस्य। मीळ्हुषः।

उत्। धूमासः। अरुषासः। दिविऽस्पृशः। सं। अग्निं।

इन्धते। नरः ॥ ३

मीळ्हुषः कामानां वर्षितुराजुह्वानस्याभिहूयमानस्याग्नेः शोचिस्तेज उदस्थात्। उत्तिष्ठति। अरुषास आरोचमाना दिविस्पृशोऽन्तरिक्षस्पृशो धूमासो धूमाश्चोदस्थुः। अस्मादिवैकवचनांतं बहुवचनांततया विपरिणतं सदत्रान्वेति। तमिममग्निं नरः कर्मणां नेतार ऋत्विजः समिंधते। सम्यक् दीपयंति ॥

॥ अथ चतुर्थी ॥

तं त्वा दूतं कृण्महे यशस्तमं देवाँ आ वीतये वह।

विश्वा सूनो सहसो मर्तभोजना रास्व तद्यत्त्वेमहे ॥ ४

तं। त्वा। दूतं। कृण्महे। यशःऽतमं। देवान्। आ।

वीतये। वह।

विश्वा। सूनो इति। सहसः। मर्तऽभोजना। रास्व। तत्।

यत्। त्वा। ईमहे ॥ ४

हे सहसः सूनो बलस्य पुत्राग्ने यशस्तममतिशयेन यशस्विनं तं प्रसिद्धं त्वा त्वां दूतं कृण्महे कुर्मः। स त्वं देवान्वीतये हविषां भक्षणायावह। किंच यद्यदा त्वा त्वामीमहे याचामहे तदैव विश्वा विश्वानि मर्तभोजनानि मनुष्याणां भोग्यानि तत्तादृशानि धनानि रास्व। अस्मभ्यं देहि ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ पंचमी ॥

त्वमग्ने गृहपतिस्त्वं होता नो अध्वरे।
त्वं पोता विश्ववार प्रचेता यक्षि वेषि च वार्यं॥ ५

त्वं। अग्ने। गृहऽपतिः। त्वं। होता। नः। अध्वरे।
त्वं। पोता। विश्वऽवार। प्रऽचेताः। यक्षि। वेषि। च।
वार्यं॥ ५

हे विश्ववार विश्वैर्वरणीयाग्ने त्वं नोऽस्माकमध्वरे यागे गृहपतिरसि। यजमानोऽसि। त्वं होता देवानामाह्वाता। त्वं त्वमेव पोतासि। अतः प्रचेताः प्रकृष्टज्ञानस्त्वं वार्यं वरणीयं हविर्यक्षि। यज। वेषि च। कामयस्व। भक्षय वा॥

॥ अथ षष्ठी ॥

कृधि रत्नं यजमानाय सुक्रतो त्वं हि रत्नधा असि।
आ न ऋते शिशीहि विश्वमृत्विजं सुशंसो यश्च दक्षते॥ ६

कृधि। रत्नं। यजमानाय। सुक्रतो इति सुऽक्रतो। त्वं।
हि। रत्नऽधाः। असि।
आ। नः। ऋते। शिशीहि। विश्वं। ऋत्विजं। सुऽशंसः।
यः। च। दक्षते॥ ६

हे सुक्रतो शोभनकर्मन्नग्ने यजमानाय मह्यं रत्नं धनं॥ श्वात्रं रत्नमिति धननामसु पाठात्॥ कृधि। कुरु। देहीत्यर्थः। हि यस्मात्त्वं रत्नधा रत्नस्य दातासि। नोऽस्माकमृते यज्ञे विश्वं सर्वमृत्विजमाशिशीहि। तीक्ष्णीकुरु। किंच यः सुशंसः सुस्तुतिरग्नेस्त्वां दक्षते वर्धयते तं वर्धय। यद्वा यः सुशंसो होता वर्धते तं वर्धयेत्यर्थः। होतुः पृथगुपादानमादरार्थं॥

॥ इति पंचमस्य द्वितीय एकविंशो वर्गः॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ सप्तमी ॥

त्वे अंग्ने स्वाहुत प्रियासः संतु सूरयः।

यंतारो ये मघवानो जनानामूर्वान्दयंत गोनां ॥ ७

त्वे इति। अग्ने। सुऽआहुत। प्रियासः। संतु। सूरयः।

यंतारः। ये। मघऽवानः। जनानां। ऊर्वान्। दयंत।

गोनां ॥ ७

हे अग्ने स्वाहुत यजमानैः सुष्ठ्वाहुत त्वे तव सूरयः प्रेरकाः स्तोतारो वा प्रियासः प्रियाः संतु। भवंतु। किंच ये मघवानो धनवंतो यंतारः प्रदातारो जनानामस्मदीयानामूर्वान् समूहान् गोनां गवां चोर्वान्दयंत प्रयच्छंति ते च तव प्रियासः संत्विति पूर्वेणान्वयः ॥

॥ अथाष्टमी ॥

येषामिड़ा घृतहस्ता दुरोण आँ अपि प्राता निषीदति।

ताँस्त्रायस्व सहस्य द्रुहो निदो यच्छा नः शर्म दीर्घऽश्रुत् ॥ ८

येषां। इड़ा। घृतऽहस्ता। दुरोणे। आ। अपि। प्राता।

निऽसीदति।

तान्। त्रायस्व। सहस्य। द्रुहः। निदः। यच्छ। नः। शर्म।

दीर्घऽश्रुत् ॥ ८

येषां दुरोणे गृहे घृतहस्ता। घृतयुक्तो हस्तो यस्या असौ घृतहस्ता। एतेनाभिधारितेयं। इड़ाचरूपा हविर्लक्षणा देवी॥ दुरोणैत्यवचनस्य पाठात् ॥ प्राता पूर्णा निषीदति आसीदति। अपीति पूरणः। तान्दयिष्यतो यजमानान् हे सहस्य सहसे बलाय हितान्ने द्रुहो द्रोग्धुर्निंदो निंदकाच्च शत्रोस्त्रायस्व। नोऽस्मभ्यं दीर्घश्रुद् दीर्घकालं श्रोतव्यं शर्म सुखं गृहं वा यच्छ च। देहि ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ नवमी ॥

स मंद्रया च जिह्वया वह्निरासा विदुष्टरः।

अग्ने रयिं मघवंद्भ्यो न आ वह हव्यदातिं च सूदय ॥ ९

सः। मंद्रया। च। जिह्वया। वह्निः। आसा। विदुःऽतरः।

अग्ने। रयिं। मघवत्ऽभ्यः। नः। आ। वह। हव्यऽदातिं।

च। सूदय ॥ ९

हे अग्ने मंद्रया च मोदयित्र्या देवानामासाख्यस्थानीयया जिह्वया ज्वालया आकर्षयिता वोढा विदुष्टरो विद्वत्तरः स प्रसिद्धस्त्वं मघवद्भ्यो हविष्मद्भ्यो नोऽस्मभ्यं रयिं धनमावह च। हव्यदातिं। हव्यानि ददातीति हव्यदातिर्यजमानः। तं। तथा च वाजसनेयिन आमनंति। यजमानो वै हव्यदातिरिति। सूदय च। कर्मसु प्रेरय च॥

॥ अथ दशमी ॥

ये राधांसि ददत्यश्व्या मघा कामेन श्रवसो महः।

ताँ अंहसः पिपृहि पर्तृभिष्ट्वं शतं पूर्भिर्यविष्ठ्य ॥ १०

ये। राधांसि। ददति। अश्व्या। मघा। कामेन।

श्रवसः। महः।

तान्। अंहसः। पिपृहि। पर्तृऽभिः। त्वं। शतं। पूःऽभिः।

यविष्ठ्य ॥ १०

हे यविष्ठ्य युवतमाग्ने त्वं ये यजमाना मह्नो महतः श्रवसो यशसः कामेनेच्छया। यशस्कामाः संत इत्यर्थः। राधांसि साधकान्यश्वाद्यात्मकानि मघा मघानि ददति तान्दातॄनंहसः पापात् मह्नो वा पर्तृभी रक्षासाधनभूतैः शततमपरिमिताभिः पूर्भिर्नगरीभिश्च पिपृहि। पालय॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथैकादशी ॥

देवो वो द्रविणोदाः पूर्णां विवष्ट्यासिचं।

उद्वा सिंचध्वमुप वा पृणध्वमादिद्वो देव ओहते ॥ ११

देवः। वः। द्रविणःऽदाः। पूर्णां। विवष्टि। आऽसिचं।

उत्। वा। सिंचध्वं। उप। वा। पृणध्वं। आत्। इत्।

वः। देव। ओहते॥ ११

द्रविणोदा धनानां दाता देवोऽग्निर्वो युष्मदीयां पूर्णां हविषाभिचमासिक्तां स्रुचं विवष्टि। कामयते। अत उत्सिंचध्वं वा सोमेन पात्रं। उपपृणध्वं वा सोमं॥ वाशब्दौ समुच्चयार्थौ॥ अनु पश्चात् होतृचमसं पूरयत चाग्नये सोमं प्रयच्छत चेत्यर्थः॥ आदिदनंतरमेव देवोऽग्निर्वो युष्मानोहते। वहति॥

॥ अथ द्वादशी ॥

तं होतारमध्वरस्य प्रचेतसं वह्निं। देवा अकृण्वत।

दधाति रत्नं विधते सुवीर्यमग्निर्जनाय दाशुषे॥ १२

तं। होतारं। अध्वरस्य। प्रऽचेतसं। वह्निं। देवाः।

अकृण्वत।

दधाति। रत्नं। विधते। सुऽवीर्यं। अग्निः। जनाय।

दाशुषे। १२

देवाः प्रचेतसं प्रकृष्टज्ञानमग्निमध्वरस्य यज्ञस्य वह्निं वोढारं होतारं चाकृण्वन्। अकुर्वन्। किमर्थमित्यत आह। स चाग्निर्विधते परिचरते दाशुषे हवींषि प्रदात्रे जनाय सुवीर्यं शोभनवीर्योपेतं रत्नं रमणीयं धनं दधाति। ददातीत्यर्थः॥

॥ इति पंचमस्य द्वितीये द्वाविंशो वर्गः॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अग्ने भव सुषमिधेति सप्तर्चं सप्तदशं सूक्तं वसिष्ठस्यार्षमग्निदेवताकं। सप्तापि द्विपदाविराट् छंदः। तथा चानुक्रम्यते। अग्ने भव सप्त द्वैपदं त्वैष्टुभमिति॥ अतिरात्रे षष्ठेऽहनि तृतीयसवने मैत्रावरुणशस्त्रेऽग्ने भवेति तृचोऽनुरूपः। सूत्र्यते हि। अग्ने त्वं नो अंतमोऽग्ने भव सुषमिधा समिद्ध इति स्तोत्रियानुरूपौ। आ० ८. २.। इति॥

॥ तत्र प्रथमा ॥

अग्ने भवं सुषमिधा समिद्ध उत बर्हिरुर्विया वि स्तृणीतां ॥ १

अग्नें। भवं। सुऽसमिधां। संऽइंद्धः। उत। बर्हिः।

उर्विया। वि। स्तृणीतां ॥ १

हे अग्ने सुषमिधा शोभनया समिधा समिद्धो भव। सम्यग्दीप्तो भव। उतापि च बर्हिरुर्विया विस्तीर्णमुपस्तृणीतामध्वर्युः॥

॥ अथ द्वितीया ॥

उत द्वार उशतीर्वि श्रयंतामुत देवाँ उशत आ वहेह ॥ २

उत। द्वारः। उशतीः। वि। श्रयंतां। उत। देवान्।

उशतः। आ। वह। इह ॥ २

उतापि चोशतीर्देवान् कामयमाना द्वारो यज्ञगृहस्य देव्यो वा॥ तथा च यास्कः द्वारो जवतेर्वा द्रवतेर्वा वारयतेर्वा। नि० ८. ९.। इति॥ विश्रयंतां। उतापि चोशतो यज्ञं कामयमानान्देवानिह यज्ञ आवह॥

॥ अथ तृतीया ॥

अग्ने वीहि हविषा यक्षि देवान्त्स्वध्वरा कृणुहि जातवेदः ॥ ३

अग्नें। वीहि। हविषां। यक्षि। देवान्। सुऽअध्वरा।

कृणुहि। जातऽवेदः ॥ ३

हे जातवेदो जातधनाग्ने वीहि। देवानभिगच्छ। हविषा देवान्यक्षि। यज च। स्वध्वरा स्वध्वरान् शोभनयज्ञांश्च कृणुहि। कुरु॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथैकादशी ॥

देवो वो द्रविणोदाः पूर्णां विवष्ट्यासिचं।
उद्वा सिंचध्वमुप वा पृणध्वमादिद्वो देव ओहते ॥ ११

देवः। वः। द्रविणःऽदाः। पूर्णाम्। विवष्टि। आऽसिचं।
उत्। वा। सिंचध्वं। उप। वा। पृणध्वं। आत्। इत्।
वः। देवः। ओहते ॥ ११

द्रविणोदा धनानां दाता देवोऽग्निर्वो युष्मदीयां पूर्णां हविषाभिपूर्णामासिक्तां स्रुचं विवष्टि। कामयते। अत उत्सिंचध्वं वा सोमेन पात्रं। उपपृणध्वं वा सोमं॥ वाशब्दौ समुच्चयार्थौ॥ ऋत्विजो यूयं होत्रकचमसं पूरयत चाग्नये सोमं प्रयच्छत चेत्यर्थः॥ आदिदनंतरमेव देवोऽग्निर्वो युष्मानोहते। वहति॥

॥ अथ द्वादशी ॥

तं होतारमध्वरस्य प्रचेतसं वह्निं। देवा अकृण्वत।
दधाति रत्नं विधते सुवीर्यमग्निर्जनाय दाशुषे ॥ १२

तं। होतारं। अध्वरस्य। प्रऽचेतसं। वह्निं। देवाः।
अकृण्वत।
दधाति। रत्नं। विधते। सुऽवीर्यं। अग्निः। जनाय।
दाशुषे ॥ १२

देवाः प्रचेतसं प्रकृष्टज्ञानमग्निमध्वरस्य यज्ञस्य वह्निं वोढारं होतारं चाकृण्वन्। अकुर्वन्। किमर्थं क्रियत आह। स चाग्निर्विधते परिचरते दाशुषे हविषां प्रदात्रे जनाय सुवीर्यं शोभनवीर्योपेतं रत्नं रमणीयं धनं दधाति। ददातीत्यर्थः॥

॥ इति पंचमस्य द्वितीये द्वाविंशो वर्गः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अग्ने भव सुषमिधेति सप्तर्चं सप्तमं सूक्तं वसिष्ठस्यार्षमाग्नेयं । सप्तापि द्विपदास्त्रिष्टुभः । तथैवानुक्रम्यते । अग्ने भव सप्त द्वैपदं त्रैष्टुभमिति ॥ अतिरात्रे षष्ठेऽहनि तृतीयसवने मैत्रावरुणशस्त्रेऽग्ने भवेति तृचोऽनुरूपः । सूत्र्यते हि । अग्ने त्वं नोऽन्तमोऽग्ने भव सुषमिधा समिद्ध इति स्तोत्रियानुरूपौ । आ० ८. २. । इति ॥

॥ तत्र प्रथमा ॥

अग्ने भवं सुषमिधा समिद्ध उत बर्हिरुर्विया वि स्तृणीतां ॥ १

अग्ने । भवं । सुऽसमिधा । संऽइद्धः । उत । बर्हिः ।

उर्विया । वि । स्तृणीतां ॥ १

हे अग्ने सुषमिधा शोभनया समिधा समिद्धो भव । सम्यग् दीप्तो भव । उतापि च बर्हिरुर्विया विस्तीर्णमुपस्तृणीतामध्वर्युः ॥

॥ अथ द्वितीया ॥

उत द्वार उशतीर्वि श्रयंतामुत देवाँ उशत आ वहेह ॥ २

उत । द्वारः । उशतीः । वि । श्रयंतां । उत । देवान् ।

उशतः । आ । वह । इह ॥ २

उतापि चोशतीर्देवान् कामयमाना द्वारो यज्ञगृहस्य देव्यो वा ॥ तथा च यास्कः द्वारो जवतेर्वा द्रवतेर्वा वारयतेर्वा । नि० ८. ९. । इति ॥ विश्रयंतां । उतापि चोशतो यज्ञं कामयमानान्देवानिह यज्ञ आवह ॥

॥ अथ तृतीया ॥

अग्ने वीहि हविषा यक्षि देवान्त्स्वध्वरा कृणुहि जातवेदः ॥ ३

अग्ने । वीहि । हविषा । यक्षि । देवान् । सुऽअध्वरा ।

कृणुहि । जातऽवेदः ॥ ३

हे जातवेदो जातधनाग्ने वीहि । देवानभिगच्छ । हविषा देवान्यक्षि । यज च । स्वध्वरा स्वध्वरान् शोभनयज्ञांश्च कृणुहि । कुरु ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ चतुर्थी ॥

स्वध्वरा करति जातवेदा यक्षद्देवाँ अमृतान्पिप्रयच्च ॥ ४

सुऽअध्वरा । करति । जातऽवेदाः । यक्षत् । देवान् ।
अमृतान् । पिप्रयत् । च ॥ ४

जातवेदा जातधनोऽग्निरमृतान्मरणरहितान्देवान् स्वध्वरा स्वध्वरान् शोभनयज्ञान् करति । करोतु । यक्षत् । हविषा यजतु च । पिप्रयत् । स्तोत्रैः प्रीणयतु च ॥

॥ अथ पंचमी ॥

वंस्व विश्वा वार्याणि प्रचेतः सत्या भवंत्वाशिषो नो अद्य ॥ ५

वंस्व । विश्वा । वार्याणि । प्रचेत इति प्रऽचेतः । सत्याः ।
भवंतु । आऽशिषः । नः । अद्य ॥ ५

हे प्रचेतः प्रकृष्टमतिमन्नग्ने विश्वा विश्वानि वार्याणि वरणीयानि धनानि वंस्व । अस्मभ्यं देहि । नोऽस्माकमाशिषोऽद्य सत्या यथार्था भवंतु ॥

॥ अथ षष्ठी ॥

त्वामु ते दधिरे हव्यवाहं देवासो अग्न ऊर्ज आ नपातं ॥ ६

त्वां । ऊं इति । ते । दधिरे । हव्यऽवाहं । देवासः । अग्ने ।
ऊर्जः । आ । नपातं ॥ ६

हे अग्ने ऊर्जो बलस्य नपातं पुत्रं ॥ छन्दसि नपादित्यपत्यनामसु पाठात् । त्वामु त्वामेव ते प्रसिद्धा देवासो देवा हव्यवाहं हविषो वोढारमादधिरे । अकुर्वन्नित्यर्थः ॥

॥ अथ सप्तमी ॥

ते ते देवाय दाशतः स्याम महो नो रत्ना वि दध इयानः ॥ ७

ते । ते । देवाय । दाशतः । स्याम । महः । नः । रत्ना ।
वि । दध । इयानः ॥ ७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे अग्ने देवाय द्योतमानाय ते तुभ्यं ते प्रसिद्धा वसिष्ठा वयं दामतो दद्मीति दद्तः स्याम । भवेम । अतो मह्नो महांस्त्वमियान उपगम्यमानो याच्यमानो दा नोऽस्मभ्यं रत्ना रत्नानि रमणीयानि धनानि विदधः । विधत्स्व ॥

॥ इति पंचमस्य द्वितीये त्रयोविंशो वर्गः ॥

॥ इति सप्तमे मंडले प्रथमोऽनुवाकः ॥

द्वितीयेऽनुवाके षोडश सूक्तानि । तत्र त्वे ह यत्पितर इति पंचविंशत्यृचं प्रथमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैंद्रदेवताकं । द्वाविंशादिभिश्चतसृभिः सुदासनाम्नो राज्ञो दानं स्तूयते । अतस्तास्तद्देवताकाः । अनुक्रम्यते हि । त्वे ह पंचाधिकैंद्रं सुदासः पैजवनस्य चतस्रोऽन्त्या दानस्तुतिरिति ॥ महाव्रत आदितः पंचदशर्चः शंसनीयाः । तथैव पंचमारण्यके सूत्रितं त्वे ह यत्पितरश्चिन्न इंद्रेति पंचदश । ऐ० आ० ५. २. १ इति ॥

॥ तत्र प्रथमा ॥

त्वे ह यत्पितरश्चिन्न इंद्र विश्वा वामा जरितारो असन्वन् ।
त्वे गावः सुदुघास्त्वे ह्यश्वास्त्वं वसु देवयते वनिष्ठः ॥ १

त्वे इति । ह । यत् । पितरः । चित् । नः । इंद्र । विश्वा ।
वामा । जरितारः । असन्वन् ।
त्वे इति । गावः । सुऽदुघाः । त्वे इति । हि । अश्वाः । त्वं ।
वसु । देवऽयते । वनिष्ठः ॥ १

हे इंद्र त्वे ह त्वय्येव नोऽस्माकं पितरश्चित् पितरोऽपि जरितारः स्तोतारः संतो यद्यस्मात्कारणाद्विश्वा विश्वानि वामा वामानि वननीयानि धनानि । तथा च यास्कः । वामं वननीयं भवतीति । असन्वन् अलभंत तस्मादयमपि धनकामास्त्वां स्तुमः । तदुक्तं । हि यस्मात्कारणाच्च त्वयि गावः सुदुघा दोग्धुं सुशकाः संति त्वे त्वय्यश्वाः संति त्वं वसु धनं देवयते देवं त्वामिच्छते यजमानाय वनिष्ठो दातृतमो भवसि ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ द्वितीया ॥

राजेव हि जनिभिः क्षेष्येवाव द्युभिरभि विदुष्कविः सन् ।
पिशा गिरो मघवन्गोभिरश्वैस्त्वायतः शिशीहि राये अस्मान् ॥ २

राजाऽइव । हि । जनिऽभिः । क्षेषि । एव । अव । द्युऽभिः ।
अभि । विदुः । कविः । सन् ।
पिशा । गिरः । मघऽवन् । गोभिः । अश्वैः । त्वाऽयतः ।
शिशीहि । राये । अस्मान् ॥ २

हे इंद्र त्वं जनिभिर्जायाभी राजेव द्युभिर्दीप्तिभिः सह क्षेष्येव । निवसस्येव । अवेति पूरणः । किंच हे मघवन् धनवन्निंद्र विदुर्विद्वान् कविः क्रांतकर्मा क्रांतप्रज्ञो वा सन् गिरः स्तोतॄनस्मान् पिशा रूपेण हिरण्यादिना वा गोभिरश्वैश्चाभि अभितो रक्ष । त्वायतस्त्वत्कामानस्मान् राये शिशीहि । धनार्थं च संस्कुरु ॥

॥ अथ तृतीया ॥

इमा उ त्वा पस्पृधानासो अत्र मंद्रा गिरो देवयंतीरुप स्थुः ।
अर्वाची ते पथ्या राय एतु स्याम ते सुमताविंद्र शर्मन् ॥ ३

इमाः । ऊं इति । त्वा । पस्पृधानासः । अत्र । मंद्राः ।
गिरः । देवऽयंतीः । उप । स्थुः ।
अर्वाची । ते । पथ्या । रायः । एतु । स्याम । ते । सुऽमतौ ।
इंद्र । शर्मन् ॥ ३

हे इंद्र त्वा त्वाम् अत्र यज्ञे स्तोतरि वा प्रयतमानाः पस्पृधानाः स्पर्धमाना मंद्रा मोदमाना इमा गिरः स्तुतय उपस्थुः । उपतिष्ठंति । अतस्ते तव रायो धनस्य पथ्या प्राप्तिरर्वाच्यस्मदभिमुख्येतु । गच्छतु । हे इंद्र वयं च ते सुमतौ सुष्टुतौ वर्तमानाः शर्मन् शर्मणि सुखे स्याम । भूयास्म ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ चतुर्थी ॥

धेनुं न त्वां सूयवसे दुदुक्षन्नुप ब्रह्माणि ससृजे वसिष्ठः ।

त्वामिन्मे गोपतिं विश्व आहा न इंद्रः सुमतिं गंत्वच्छ ॥ ४

धेनुं । न । त्वा । सुऽयवसे । दुधुक्षन् । उप । ब्रह्माणि ।

ससृजे । वसिष्ठः ।

त्वां । इत् । मे । गोऽपतिं । विश्वः । आह । आ । नः ।

इंद्रः । सुऽमतिं । गंतु । अच्छ ॥ ४

हे इंद्र सुयवसे सुतृणे गोष्ठे वर्तमानां धेनुं न धेनुमिव दुग्धमिच्छो यजमानस्त्वष्टे । दृष्टांतसामर्थ्याद्दार्ष्टांतिकलाभः । वर्तमानं त्वां दुधुक्षन् ॥ संहितायां व्यत्ययेन दकारः ॥ कामान् दोग्धुमिच्छन्वसिष्ठो ब्रह्माणि मंत्रस्थानीयानि स्तोत्राण्युपससृजे । उपसृजते । मे मम विश्वः सर्वो जगत्स्वामित्वेन गोपतिं गवां स्वामिनमाह । ब्रवीति । अथ परोक्षस्तुतिः । नोऽस्माकं सुमतिं सुष्टुतिमच्छाभि इंद्र आगंतु । आगच्छतु ॥

॥ अथ पंचमी ॥

अर्णांसि चित्पप्रथाना सुदास इंद्रो गाधान्यकृणोत्सुपारा ।

शर्धंतं शिम्युमुचथस्य नव्यः शापं सिंधूनामकृणोदशस्तीः ॥ ५

अर्णांसि । चित् । पप्रथाना । सुऽदासे । इंद्रः । गाधानि ।

अकृणोत् । सुऽपारा ।

शर्धंतं । शिम्युं । उचथस्य । नव्यः । शापं । सिंधूनां ।

अकृणोत् । अशस्तीः ॥ ५

नव्यः स्तुत्य इंद्रोऽर्णांसि यत्रुभिर्विदारितायाः परुष्ण्या उदकानि पप्रथाना चित् प्रथमानान्यपि सुदासे राज्ञे गाधानि सुपारा सुपाराणि पारयितुं संतर्तुं योग्यानि

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रासयोत् । अकरोत् । अपि च यधंमत्तस्याह्वमानं शिस्युं बोधमानं भागं विश्वरूपोद्गमात्मनोऽभियापनयस्तीरभिमस्तोचोचयस्य स्तोतः . सिंधूनां नदीनामसयोत् । अकरोत् ॥

॥ इति पंचमस्य द्वितीये चतुर्विंशो वर्गः ॥

॥ अथ षष्ठी ॥

पुरोळा इत्तुर्वशो यक्षुरासीद्राये मत्स्यासो निशिता अपीव ।
श्रुष्टिं चक्रुर्भृगवो द्रुह्यवश्च सखा सखायमतरद्विषूचोः ॥ ६

पुरोळाः । इत् । तुर्वशः । यक्षुः । आसीत् । राये ।
मत्स्यासः । निःशिताः । अपिऽइव ।
श्रुष्टिं । चक्रुः । भृगवः । द्रुह्यवः । च । सखा । सखायं ।
अतरत् । विषूचोः ॥ ६

यक्षुर्यष्टृनामसु पठितः ॥ यजेः सन्प्रत्ययो न तु सनंतः । अतो न द्विर्भावः ॥ पुरोळाः पुरोगामी पुरोदाता वा । इदिति पूरणः । तुर्वशो नाम राजासीत् । स तुर्वशो राये धनप्राप्त्यै इंद्रस्य सखायं सुदासं जगाम । मत्स्यास इव जले निहिता मत्स्या इव निशिता निर्यत्रिता अपि भृगवो द्रुह्यवश्च योधाय सुदासस्तुर्वशस्य च श्रुष्टिमाशुप्राप्तिं चक्रुः । विषूचोर्विष्वगंचतोरुभयोर्मध्ये सखा सुदासश्चेंद्रः सखायं सुदासमतरत् । अतारयत् । तुर्वशं चापभीदित्यर्थः । यद्वा यक्षुर्यज्ञशीलः पुरोळाः पुरोदाता तुर्वशो नाम राजासीत् । तेन मत्स्यासो मत्स्यजनपदा निशिता बाधिता आसन् । अपि च भृगवो द्रुह्यवश्च श्रुष्टिं सुखं तुर्वशस्य चक्रुः । विषूचोर्विष्वगंचतोरुभयोर्मध्ये सखा तुर्वशस्य सखेंद्रः सखायं राजानमतरत् । अतारयत् ॥

॥ अथ सप्तमी ॥

आ पक्थासो भलानसो भनंतालिनासो विषाणिनः शिवासः ।
आ योऽनयत्सधमा आर्यस्य गव्या तृत्सुभ्यो अजगन्युधा नृन् ॥ ७

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

आ । पक्थासः । भलानसः । भनंत । आ । अलिनासः ।

विषाणिनः । शिवासः ।

आ । यः । अनंयत् । सधऽमाः । आर्यस्य । गव्या । तृत्सुऽभ्यः ।

अजगन् । युधा । नॄन् ॥ ७

पक्थासः पक्तारो हविषां पाचका भलानसो भद्रमुखाः । भलेति भद्रवाची । अलिनासोऽखिनाः । तपोभिरप्रहता इत्यर्थः । विषाणिनः कंडूयनार्थं कृष्णविषाणहस्ताः । दीक्षिता इत्यर्थः । शिवासः शिवा यागादिना सर्वस्य लोकस्य शिवकराः । यागेन हि शिवं भवति लोकस्य । आभनंत । अभिष्टुवंति तमिंद्रं ॥ भनति शब्दकर्मा नौति भनतीति शब्दकर्मसु पाठात् ॥ य इंद्रः सधमाः । सोमपानेन सह माद्यतीति सधमादः । सधमाद एव सधमाः । आर्यस्य कर्मयोक्तस्य गव्या गोसंघान् तृत्सुभ्यो हिंसकेभ्य आनयत् । अजगन् अजगत् स्वयं च गोसंघान् लेभे । युधा युद्धेन तांश्च नॄन् मर्त्यान् जघान चेति शेषः ॥

॥ अथाष्टमी ॥

दुराध्यो३ अदितिं स्रेवयंतोऽचेतसो वि जगृभ्रे परुष्णीं ।

मह्नाविव्यक्पृथिवीं पत्यमानः पशुष्कविरशयच्चायमानः ॥ ८

दुःऽआध्यः । अदितिं । स्रेवयंतः । अचेतसः । वि । जगृभ्रे । परुष्णीं ।

मह्ना । अविव्यक् । पृथिवीं । पत्यमानः । पशुः । कविः । अशयत् । चायमानः ॥ ८

दुराध्यो दुष्टाभिसंधयोऽचेतसो मंदमतयः सुदासः शत्रवोऽदितिमदीनां परुष्णीं नदीं स्रेवयंतो विजगृभ्रे । विग्रहः कूलभेदः । तमकुर्वन् । परुष्ण्याः कूलं बिभिदुरित्यर्थः । स सुदासो महेंद्रप्रसादलब्धेन महिम्ना पृथिवीमविव्यक् । तदेव व्याप्नोत् । न पुनरुदकेनाबाध्यत । ततः सुदासः शत्रुश्चायमानश्चयमानस्य पुत्रः कविः कविनामा पत्यमानः पात्यमानः पशुर्यागे संज्ञप्तः पशुरिवाशयत् । अशेत । सुदासा निहत इत्यर्थः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ नवमी ॥

ईयुरर्थं न न्यर्थं परुष्णीमाशुश्चनेदभिपित्वं जगाम ।

सुदास इंद्रः सुतुकाँ अमित्रानरंधयन्मानुषे वध्रिवाचः ॥ ९

ईयुः । अर्थं । न । निऽअर्थं । परुष्णीं । आशुः । चन । इत् ।

अभिऽपित्वं । जगाम ।

सुऽदासे । इंद्रः । सुऽतुकान् । अमित्रान् । अरंधयत् ।

मानुषे । वध्रिऽवाचः ॥ ९

अथेंद्रः परुष्ण्या भिन्नानि पर्णानि संदधे । ततः परुष्ण्या आपो यथापूर्वमर्थं गंतव्यमेव प्रचदेशं प्रति परुष्णीमीयुः । आययां चक्रुः ॥ इण् गताविति धातोरसं-योगितस्ययोत् लिटोयुरिति । अतो द्विकर्मकमाख्यातं ॥ न्यर्थमगंतव्यं परुष्ण्याः पार्श्वयोः स्थितं निम्नं देशं प्रति परुष्णीं नेयुः । आशुश्चन राज्ञः सुदासोऽश्वोऽप्यभि-पित्वमभिप्राप्तव्यमेव जगाम । इंद्रश्च सुदासे राज्ञे मानुषे लोके वध्रिवाचो जल्पकान-मित्रान् सतु नु सुतुकान् सुतोकान् ॥ तुक् तोकमित्यपत्यनामसु पाठात् ॥ अरंधयत् वशमानयत् ॥

॥ अथ दशमी ॥

ईयुर्गावो न यवसादगोपा यथाकृतमभि मित्रं चितासः ।

पृश्निगावः पृश्निनिप्रेषितासः श्रुष्टिं चक्रुर्नियुतो रंतयश्च ॥ १०

ईयुः । गावः । नः । यवसात् । अगोपाः । यथाऽकृतं ।

अभि । मित्रं । चितासः ॥

पृश्निऽगावः । पृश्निऽनिप्रेषितासः । श्रुष्टिं । चक्रुः । निऽयुतः ।

रंतयः । च ॥ १०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यदेंद्रः सुदासो रक्षणार्थमागच्छति तदा श्वित्निप्रेषिताः श्वित्निप्रेषिताः श्वयुरा माता नितरां प्रवृत्ताधिताशः संहता जानंतो वा श्वित्नगावः । श्वित्नवर्णो गावोऽश्वा येषां ते श्वित्नगावो बहवो यथाशक्तमिंद्रस्य साहाय्यं करवामेति यथा पूर्वं चययः समस्तं समयमनतिक्रम्य मित्रमिंद्रं यन्सात् ॥ निमित्तार्थे पंचमी ॥ यवसं निमित्तोत्पादगोपा गोपालेनारक्षिता गावो न गाव इवाभीयुः । अभिजग्मुः । रंतयो रक्षणीया नियुतो मरुतामश्वाश्च स्तुतिं मीत्रप्राप्तिं चक्रुः । तस्मिन्युद्धे मरुत इंद्रं साहाय्यार्थमभ्यगच्छन्नित्यर्थः ॥

॥ इति पंचमस्य द्वितीये पंचविंशो वर्गः ॥

॥ अथैकादशी ॥

एकं च यो विंशतिं च श्रवस्या वैकर्णयोर्जनान्राजा न्यस्तः ।
दस्मो न सद्मन्नि शिशाति बर्हिः शूरः सर्गमकृणोदिंद्र एषां ॥ ११

एकं । च । यः । विंशतिं । च । श्रवस्या । वैकर्णयोः ।
जनान् । राजा । नि । अस्तरित्यस्तः ।
दस्मः । न । सद्मन् । नि । शिशाति । बर्हिः । शूरः । सर्गं ।
अकृणोत् इंद्रः । एषां ॥ ११

यो सुदासो राजा श्रवस्या यशस इच्छयान्नेच्छया वा परुष्णयाः पार्श्वस्ययोर्वैकर्णयोर्जनपदयोर्विद्यमानानेकं च विंशतिं च जनान् न्यस्तः आत्मनाहन् स राजा दस्मो न दर्शनीयो युवाध्वर्युरिव सद्मन्यज्ञगृहे बर्हिर्यस्मिन्युद्धे सपत्नानि शिशाति नितरां लुनाति तस्मिन्युद्धे शूर इंद्र एषां मरुतां सर्गं प्रसवमकृणोत् सुदासः साहाय्यार्थमकरोत् ॥

॥ अथ द्वादशी ॥

अध श्रुतं कवषं वृद्धमप्स्वनु द्रुह्युं नि वृणग्वज्रबाहुः ।
वृणाना अत्र सख्याय सख्यं त्वायंतो ये अमदन्ननु त्वा ॥ १२

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

अर्ध। श्रुतं। कवषं। वृद्धं। अप्ऽसु। अनुं। द्रुह्युं। नि।
वृणक्। वज्रंऽबाहुः।

वृणानाः। अत्रं। सख्याय। सख्यं। त्वाऽयंतः। ये। अमंदन्।
अनुं। त्वा॥ १२

अधापि च वज्रबाहुरिंद्रः श्रुतं कवषं च वृद्धं च त्रीन् तथा द्रुह्युमप्यानुपूर्वेणाप्सूदकेषु निवृणक्। न्यमज्जयदित्यर्थः। अत्रास्मिन्नवसरे ये त्वायंतस्त्वां कामयमानास्त्वामन्वमदन्नस्तुवन् ते सखायः सख्याय सख्यार्थं त्वां वृणानाः सख्यं लेभिर इति शेषः॥

॥ अथ त्रयोदशी॥

वि सद्यो विश्वा दृंहितान्येषामिंद्रः पुरः सहसा सप्त दर्दः।
व्यानवस्य तृत्सवे गयं भाग्जेष्म पूरुं विदथे मृध्रवाचं॥ १३

वि। सद्यः। विश्वा। दृंहितानि। एषां। इंद्रः। पुरः।
सहसा। सप्त। दर्दरिति दर्दः।

वि। आनवस्य। तृत्सवे। गयं। भाक्। जेष्म। पूरुं।
विदथे। मृध्रऽवाचं॥ १३

एषां कवषादीनां विश्वा विश्वानि दृंहितानि दृढानि दुर्गाणि पुरो नगरीश्च तद्वासाधनभूतान् सप्त प्रकारानिंद्रः सहसा बलेन सद्य एव विदर्दः। विदारयामास। अपि चानवस्यानोः संबंधिनो यदस्यानोः पुत्रस्य वा गयं गृहं धनं वा तृत्सवे तृत्सुनामकाय राज्ञे तृत्सूनां गणाय वा विभाक्। व्यभजत्। अदादित्यर्थः। इत्थमिंद्रं स्तुवंतो वयं विदथे युद्धे मृध्रवाचं बाधवाचं पूरुं मनुष्यं जेष्म। जयेम॥

॥ अथ चतुर्दशी॥

नि गव्यवोऽनवो द्रुह्यवश्च षष्टिः शता सुषुपुः षट् सहस्रा।
षष्टिर्वीरासो अधि षट् दुवोयु विश्वेदिंद्रस्य वीर्या कृतानि॥ १४

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

नि । गव्यवः । अनवः । द्रुह्यवः । च । षष्टिः । शता ।

सुसुपुः । षट् । सहस्रा ।

षष्टिः । वीरासः । अधि । षट् । दुवःऽयु । विश्वा । इत् ।

इंद्रस्य । वीर्या । कृतानि । १४

गव्यवो गोकामा अनवोऽनोः संबंधिनो द्रुह्यवो द्रुह्योः संबंधिनश्च वीरासो वीराः षष्टिः शता शतानि सहस्रार्थोत्थरः । षट् सहस्रा सहस्राणि च षष्ट्यधि षडधिकाः षट् च दुवोयु दुवोयुवे ॥ चतुर्थी लुक् ॥ परिचरणकामाय सुदासे ॥ नमस्यति दुवस्यतीति परिचरणकर्मसु पाठात् ॥ नि सुसुपुः । नितरां शेरते । निहता इत्यर्थः । तान्येतानि विश्वा विश्वानि कृतानि कार्याणींद्रस्येत् इंद्रस्यैव वीर्या वीर्याणीति ॥

॥ अथ पंचदशी ॥

इंद्रेणैते तृत्सवो वेविषाणा आपो न सृष्टा अधवंत नीचीः ।

दुर्मित्रासः प्रकलविन्मिमाना जहुर्विश्वानि भोजना सुदासे ॥१५

इंद्रेण । एते । तृत्सवः । वेविषाणाः । आपः । न । सृष्टाः ।

अधवंत । नीचीः ।

दुःऽमित्रासः । प्रकलऽवित् । मिमानाः । जहुः । विश्वानि ।

भोजना । सुऽदासे । १५

कदाचिदिंद्रेण रक्षिता अप्यन्यदा तेनैव बाध्यंते । एते तृत्सवो दुर्मित्रासो दुष्टमित्राः प्रकलविदजानंत इंद्रेण वेविषाणा युद्धार्थं संगताः सृष्टा पलायनार्थमुद्युक्ता नीची नीचीना आपो न आप इवाधवंत । अधावंत । ततो मिमानाः सुदासा बाध्यमाना विश्वा विश्वानि भोजना भोग्यानि धनानि सुदासे राज्ञे जहुः ॥

॥ इति पंचमस्य द्वितीये षड्विंशो वर्गः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ षोडशी ॥

अर्धं वीरस्य शृतपामनिंद्रं परा शर्धंतं नुनुदे अभि क्षां।
इंद्रो मन्युं मन्युम्यो मिमाय भेजे पथो वर्तनिं पत्यमानः॥ १६

अर्धं। वीरस्य। शृतऽपां। अनिंद्रं। परा। शर्धंतं। नुनुदे।
अभि। क्षां।
इंद्रः। मन्युं। मन्युऽम्यः। मिमाय। भेजे। पथः। वर्तनिं।
पत्यमानः॥ १६

इंद्रोऽभि क्षां भूमिमभि। भूम्यामित्यर्थः। वीरस्य वीर्ययुक्तस्य सुदासोऽर्धं हिंसकं॥ अर्धं हिंसाकर्म योऽर्धं शब्दस्य निष्पत्तिः॥ अनिंद्रं। यस्य तुष्टाविंद्रो नास्त्यसावनिंद्रः। तं। इंद्रमगणयंतमित्यर्थः। शृतपां शृतस्य चौरादेर्हविषः पातारं शर्धंतमुत्सहमानं परानुनुदे। किंच मन्युम्यो मन्युकर्तॄन्मन्युना मिनतो हिंसतो वा शत्रोर्मन्युं क्रोधं मिमाय। बबाधे। अथ सुदासः शत्रुः पथो मार्गान् पत्यमानो गच्छन् वर्तनिं पलायनमार्गं भेजे। आप॥

॥ अथ सप्तदशी ॥

आध्रेण चित्तद्वेकं चकार सिंह्यं चित्पेत्वेना जघान।
अव स्रक्तीर्वेश्यावृश्चदिंद्रः प्रायच्छद्विश्वा भोजना सुदासे॥ १७

आध्रेण। चित्। तत्। ऊं इति। एकं। चकार। सिंह्यं।
चित्। पेत्वेन। जघान।
अव। स्रक्तीः। वेश्या। अवृश्चत्। इंद्रः। प्र। अयच्छत्।
विश्वा। भोजना। सुऽदासे॥ १७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इंद्रस्तदाभ्रेण चित् दरिद्रेणापि सुदासैकं सुख्यं दानकर्म चकार। कारयामास। सिंह्यं चित्। प्रत्ययाः सिंहः सिंह्यः। तमपि पेत्वेन छागेन जघान। घातयामास। वेश्या। वेशी सूची। तया स्रक्तीर्यूपादेरश्रीन्यवृश्चत्। अवृश्चयत्। वेश्यादेः सत्यं सूच्यैवाकरोदित्यर्थः। साध्येतानि त्रीणि कर्माण्यसंभावितानीति नाशंकनीयानींद्रस्य शक्तितोऽधिकत्वात्। विश्वा विश्वानि भोजना भोजनानि भोज्यानि धनानि सुदासे राज्ञे प्रायच्छत्। प्रदाश्च॥

॥ अथाष्टादशी॥

शश्वंतो हि शत्रवो रारधुष्टे भेदस्य चिच्छर्धतो विंद रंधिं।
मर्ताँ एनः स्तुवतो यः कृणोति तिग्मं तस्मिन्नि जहि
वज्रमिंद्र॥ १८

शश्वंतः। हि। शत्रवः। ररधुः। ते। भेदस्य। चित्।
शर्धतः। विंद। रंधिं।
मर्तान्। एनः। स्तुवतः। यः। कृणोति। तिग्मं। तस्मिन्।
नि। जहि। वज्रं। इंद्र॥ १८

हे इंद्र ते तव शत्रवोऽरयः शश्वंतो बहवो ररधुः। वशमीयुः। चिदपि च शर्धंत उत्सहमानस्य भेदस्य। भिनत्ति मर्यादा इति भेदो नास्तिकः। तस्य। यद्वा भेदो नाम सुदासः शत्रुः कश्चित्। तस्येत्यर्थः। रंधिं वशीकरं विंद। लभ। यो भेदः स्तुवतस्त्वां स्तुवतो मर्तान्मनुष्यान् प्रत्येनः पापं कृणोति करोति तस्मिन् भेदे तिग्मं निशितं योद्धारमुत्साहयंतं। तथा च यास्कः। तिग्मं तेजतेरुत्साहकर्मणः। [नि० १०. ६.। इति। वज्रं। वजति गच्छत्येव शत्रुं न प्रतिहन्यत इति वज्रः। तं॥ वज्रशब्दो ऋजेंद्राग्र्यवज्रविप्रेत्यादिना रन्प्रत्ययांतो निपातितः॥ नि जहि। वज्रेण भेदं प्रहरेत्यर्थः॥

॥ अथैकोनविंशी॥

आवदिंद्रं यमुना तृत्सवश्च प्रात्र भेदं सर्वताता मुषायत्।
अजासश्च शिग्रवो यक्षवश्च बलिं शीर्षाणि जभ्रुरश्व्यानि॥ १९

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

आवत् । इंद्रं । यमुना । तृत्सवः । च । प्र । अत्र । भेदं ।
सर्वऽताता । मुषायत् ।
अजासः । च । शिग्रवः । यक्षवः । च । बलिं । शीर्षाणि ।
जभ्रुः । अश्व्यानि ॥ १९

अत्रास्मिन् सर्वताता सर्वताते युद्धे य इंद्रो भेदं नास्तिकं भेदनामकं वा सुदासः शत्रुं प्रमुषायत् प्रामुष्णात् । अवधीदित्यर्थः । तमिंद्रं यमुनावत् । अतोषयत् । तत्तीरवासी जनः सर्वोऽप्यतोषयदित्यर्थः । तृत्सवश्च । तृत्सवोऽप्यतोषयन् आवदित्येकवचनं बहुवचनांततया विपरिणत सदत्र संबध्यते । किंचाजासोऽजा जनपदाः शिग्रवो जनपदा यक्षवश्च जनपदा अश्व्यान्यश्वसंबंधीनि शीर्षाणि शिरांसि । युद्धे हतानामश्वानां शिरांसीत्यर्थः । बलिमुपहारं तथा इंद्रायोपजभ्रुः । उपजह्रुः । यद्वाश्व्यानि शीर्षाणि युद्धे गृहीतान्युत्तमानश्वानिंद्रायोपहारं जह्रुरित्यर्थः ॥

॥ अथ विंशी ॥

न त इंद्र सुमतयो न रायः संचक्षे पूर्वा उषसो न नूत्नाः ।
देवकं चिन्मान्यमानं जघंथाव त्मना बृहतः शंबरं भेत् ॥ २०

न । ते । इंद्र । सुऽमतयः । न । रायः । संऽचक्षे । पूर्वाः ।
उषसः । न । नूत्नाः ।
देवकं । चित् । मान्यमानं । जघंथ । अव । त्मना । बृहतः ।
शंबरं । भेत् ॥ २०

हे इंद्र ते तव पूर्वाः पुरातनाः सुमतयः शोभनमतयो रायो धनानि चोषसो न उषस इव न संचक्षे संख्यातुं न शक्याः । न नूत्ना नूतनाश्च सुमतयो रायश्च न संचक्षे । किंच त्वं मान्यमानं मन्यमानस्य पुत्रं देवकं देवनामानं शत्रुं जघंथ । अवधीः । त्मना स्वयमेव बृहतो महतः शैलात् शंबरं चावभेत् । अवाभैत्सीरिति ॥

॥ इति पंचमस्य द्वितीये सप्तविंशो वर्गः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथैकविंशी ॥

प्र ये गृहादममदुस्त्वाया पराशरः शतयातुर्वसिष्ठः ।

न ते भोजस्य सख्यं मृषंताधा सूरिभ्यः सुदिना व्युच्छान् ॥ २१

प्र । ये । गृहात् । अममदुः । त्वाऽया । पराऽशरः ।

शतऽयातुः । वसिष्ठः ।

न । ते । भोजस्य । सख्यं । मृषंत । अध । सूरिऽभ्यः ।

सुऽदिना । वि । उच्छान् ॥ २१

हे इंद्र पराशरः शतयातुर्वसिष्ठश्च । बहूनि रक्षांसि यातयितुं यं कामयंते स शतयातुर्बहूनां रक्षसां यातयिता वा । शक्तिपौत्रवसिष्ठप्रमादयो ये ऋषयस्त्वाया त्वदिच्छया गृहाद्गृहं प्राप्य ॥ ल्यब्लोपे द्वितीयार्थे पंचमी । पा० २, ३, २८, १, ॥ यद्वा गृहात् गृहे ॥ सप्तम्यर्थे पंचमी ॥ प्राममदुः त्वां प्रहृष्टाः प्रकर्षेण तर्पितवंतो वा ते पराशरप्रभृतयो भोजस्य भोजकस्य पालकस्य ते तव सख्यं सख्युः कर्म स्तोत्रं यजनं वा न मृषंति । न विस्मरंति । अध अथ । अधो अथेषां । तत्र कुर्वंतीत्यर्थः यतो न विस्मरंत्यथातो हेतोः सूरिभ्यः सूरीणां स्तोतॄणामेषां ॥ अत्र विभक्तिव्यत्ययः सुदिना सुदिनानि व्युच्छान् । उच्छंति । निवसंति । उपगच्छंतीत्यर्थः ॥

॥ अथ द्वाविंशी ॥

द्वे नप्तुर्देववतः शते गोर्द्वा रथा वधूमंता सुदासः ।

अर्हन्नग्ने पैजवनस्य दानं होतेव सद्म पर्येमि रेभन् ॥ २२

द्वे इति । नप्तुः । देवऽवतः । शते इति । गोः । द्वा । रथा ।

वधूऽमंता । सुऽदासः ।

अर्हन् । अग्ने । पैजऽवनस्य । दानं । होताऽइव । सद्म ।

परि । एमि । रेभन् ॥ २२

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

देववतो राज्ञो नप्तुः पौत्रस्य पैजवनस्य पिजवनपुत्रस्य सुदासो राज्ञो गोमंतां द्वे शते वधूमंता वधूसंयुक्तौ द्वा द्वौ रथा रथौ च देयं दानं दानभूतान् रेभन् इंद्र स्तुवन् अत एवाहं योग्योऽहं वसिष्ठो हे अग्ने सद्म यज्ञगृहं होतेव वषट्कर्तेव पर्येमि। अत्राग्नेः संबोधनं सर्वदेवस्तुत्यत्वप्रतिपादनार्थं न तु देवतात्वज्ञापनार्थमसद्देवताकत्वादस्य सूक्तस्य ॥

॥ अथ त्रयोविंशी ॥

चत्वारो मा पैजवनस्य दानाः स्मद्दिष्टयः कृशनिनो निरेके ।
ऋज्रासो मा पृथिविष्ठाः सुदासस्तोकं तोकाय श्रवसे वहंति । २३

चत्वारः । मा । पैजऽवनस्य । दानाः । स्मत्ऽदिष्टयः । कृशनिनः । निःऽरेके ।
ऋज्रासः । मा । पृथिविऽस्थाः । सुऽदासः । तोकं । तोकायं । श्रवसे । वहंति । २३

पैजवनस्य पिजवनपुत्रस्य सुदासो राज्ञः स्मद्दिष्टयः प्रशस्तातिसर्जनस्वत्वादिदानांगयुक्ताः कृशनिनो हिरण्यालंकारवंतो निरेके दुर्गतौ सत्यामृज्राश्च ऋजुगामिनः पृथिविष्ठाः पृथिव्यां सुप्रतिष्ठिता दाना देयभूताश्चत्वारोऽश्वास्तोकं पुत्रवत्पालनीयं मां वसिष्ठं रथे स्थितं तोकाय तोकस्य पुत्रस्य ॥ षष्ठ्यर्थे चतुर्थी ॥ श्रवसेऽन्नाय यशसे वा वहंति । पुनंतीति पूरवः ॥

॥ अथ चतुर्विंशी ॥

यस्य श्रवो रोदसी अंतरुर्वी शीर्ष्णेशीर्ष्णे विबभाजा विभक्ता ।
सप्तेदिंद्रं न स्रवतो गृणंति नि युध्यामधिमशिशादभीके ॥ २४

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

यस्य। श्रवः। रोदसी इति। अंतः। उर्वी इति। शीर्ष्णेऽशीर्ष्णे।
विऽबभाज। विऽभक्ता।

सप्त। इत्। इंद्रं। न। स्रवतः। गृणंति। नि। युध्यामधिं।
अशिशात्। अभीके॥ २४

यस्य सुदासः श्रवो यश उर्वी विस्तीर्णे रोदसी द्यावापृथिव्यावंतः। विस्तीर्णयोर्द्यावापृथिव्योर्मध्ये वर्तत इत्यर्थः। यश्च सुदा विभक्ता धनस्य प्रदाता शीर्ष्णेशीर्ष्णे श्रेष्ठाय श्रेष्ठाय विबभाज धनं प्रददौ तं सुदासं सप्तेत् सप्तैव लोका इंद्रं न इंद्रमिव गृणंति। स्तुवंति। किंच स्रवतो नद्योऽभीके युद्धे युध्यामधिं युध्यामधिनामकं शत्रुं न्यशिशात्। न्यवधीत्॥

॥ अथ पंचविंशी॥

इमं नरो मरुतः सश्चतानु दिवोदासं न पितरं सुदासः।
अविष्टना पैजवनस्य केतं दूणाशं क्षत्रमजरं दुवोयु॥ २५

इमं। नरः। मरुतः। सश्चत। अनु। दिवःऽदासं। न।
पितरं। सुऽदासः।

अविष्टन। पैजवनस्य। केतं। दुःऽनशं। क्षत्रं। अजरं।
दुवःऽयु॥ २५

हे नरो नेतारो मरुत इमं सुदासं राजानं सुदासो राज्ञः पितरं दिवोदासं न दिवोदासमिव। दिवोदास इति पिजवनस्यैव नामांतरं। अनुसश्चत। अनुसेवध्वं। किंच दुवोयु परिचरणकामस्य॥ षष्ठ्या लुक्॥ पैजवनस्य पिजवनपुत्रस्य सुदासः केतं गृहं यज्ञं वाविष्टन। रक्षत। अपि चास्य सुदासः क्षत्रं बलं दूणाशं दुर्नश-मविनाश्यमजरमक्षयितं चास्तु॥

॥ इति पंचमस्य द्वितीयेऽष्टाविंशो वर्गः॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

यस्तिग्मशृंग इत्येकादशर्चं द्वितीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैंद्रं। तथा चानुक्रांतं। यस्तिग्मशृंग एकादशेति ॥ आभिप्लविके पंचमेऽहन्येतन्निविद्धानं। सूत्रितं च। कया शुभा यस्तिग्मशृंग इति माध्यंदिनः। आ० ७. ७. । इति ॥ विषुवति निष्केवल्यशस्त्रेऽप्येतत्सूक्तं। सूत्रितं च। यस्तिग्मशृंगोऽभि त्यं मेषं। आ० ८. ६. । इति ॥ महाव्रते निष्केवल्येऽप्येतत्सूक्तं। सूत्रितं च। यस्तिग्मशृंगो वृषभो न भीम उग्रो जज्ञे वीर्याय स्वधावान्। ऐ० आ० ५. ८. । इति ॥ आयुष्कामेष्ट्यां मा ते अस्यामितींद्रस्य याज्या। सूत्रितं च। मा ते अस्यां सहसावन्परिष्टौ पाहि नो अग्ने पायुभिः। आ० २. १०. । इति ॥

॥ तत्र प्रथमा ॥

यस्तिग्मशृंगो वृषभो न भीम एकः कृष्टीश्च्यावयति प्र विश्वाः।
यः शश्वतो अदाशुषो गयस्य प्रयंतासि सुष्वितराय वेदः ॥ १

यः। तिग्मऽशृंगः। वृषभः। न। भीमः। एकः। कृष्टीः।
च्यवयति। प्र। विश्वाः।
यः। शश्वतः। अदाशुषः। गयस्य। प्रऽयंता। असि।
सुस्विंऽतराय। वेदः ॥ १

य इंद्रस्तिग्मशृंगस्तीक्ष्णशृंगो वृषभो न वृषभ इव भीमो भयंकरः सन् एकोऽसहाय एव विश्वाः सर्वान् कृष्टीः शत्रुजनान् स्थानात् प्रच्यावयति। यश्चेंद्रोऽदाशुषोऽयजमानस्य शश्वतो बहोर्गयस्य गृहस्य धनस्य वापहर्ता भवतीति शेषः। हे इंद्र स त्वं सुष्वितरायातिशयेन सोमाभिषवं कुर्वते जनाय वेदो धनं प्रयंता प्रदातासि ॥ तृनंतत्वादत्र षष्ठ्या अभावः। असीत्यस्याख्यातस्यानुदात्तत्वाद्यद्वृत्तयोगाच्चानुदात्तत्वासंभवात् यद्वृत्तयुक्तमाख्यातांतरमध्याहृत्य योजना कृता ॥

॥ अथ द्वितीया ॥

त्वं ह त्यदिंद्र कुत्समावः शुश्रूषमाणस्तन्वा समर्ये।
दासं यच्छुष्णं कुयवं न्यस्मा अरंधय आर्जुनेयाय शिक्षन् ॥ २

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

त्वं। ह। त्यत्। इंद्र। कुत्सं। आवः। शुश्रूषमाणः।

। तन्वा। सऽमर्ये।

दासं। यत्। शुष्णं। कुयवं। नि। अस्मै। अरंधयः।

आर्जुनेयाय। शिक्षन् ॥ २

हे इंद्र त्वं ह त्वं खलु त्यत्तदा तन्वा शरीरेण शुश्रूषमाणः उपासनं कुर्वन् समर्ये मर्यैर्वीरैर्मनुष्यैः सहिते युद्धे कुत्समावः। अरक्षः कर्तव्यमाह। यदा आर्जुनेयाय अर्जुन्याः पुत्रायास्मै कुत्साय शिक्षन् धनं प्रयच्छन् दासं दासनामकमसुरं शुष्णं च कुयवं च न्यरंधयः नितरां वशमानयः॥

॥ अथ तृतीया ॥

त्वं धृष्णो धृषता वीतहव्यं प्रावो विश्वाभिरूतिभिः सुदासं।

प्र पौरुकुत्सिं त्रसदस्युमावः क्षेत्रसाता वृत्रहत्येषु पूरुं ॥ ३

त्वं धृष्णो इति। धृषता। वीतऽहव्यं। प्र। आवः। विश्वाभिः।

ऊतिऽभिः। सुऽदासं।

प्र। पौरुऽकुत्सिं। त्रसदस्युं। आवः। क्षेत्रऽसाता।

वृत्रऽहत्येषु। पूरुं। ३

हे धृष्णो शत्रूणां धर्षकेंद्र धृषता धर्षकेण वज्रेण बलेन वा वीतहव्यं दत्तहविष्कं प्रजनितहविष्कं वा सुदासं राजानं विश्वाभिः सर्वाभिरूतिभी रक्षाभिः प्रावः प्रकर्षेणारक्षः। किंच वृत्रहत्येषु युद्धेषु क्षेत्रसाता क्षेत्रसातौ क्षेत्रस्य भूमेर्भजने निमित्ते पौरुकुत्सिं पुरुकुत्सस्यापत्यं त्रसदस्युं पूरुं च प्रावः॥

॥ अथ चतुर्थी ॥

त्वं नृभिर्नृमणो देववीतौ भूरीणि वृत्रा हर्यश्व हंसि।

त्वं नि दस्युं चुमुरिं धुनिं चास्वापयो दभीतये सुहंतु ॥ ४

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

त्वं। नृऽभिः। नृऽमनः। देवऽवीतौ। भूरीणि। वृत्रा।
हरिऽअश्व। हंसि।
त्वं। नि। दस्युं। चुमुरिं। धुनिं। च। अस्वापयः।
दभीतये। सुऽहंतु॥ ४

हे नृमणो नृभिर्यज्ञानां नेतृभिः स्तोतृभिर्मननीय स्तोतव्येंद्र। नृषु मनो यस्येति वा। देववीतौ यज्ञे क्रियमाणे सति संग्रामे वा। देवा विजिगीषवो यस्मिन् विंयंति गच्छंतीति संग्रामो देववीतिः। नृभिर्मरुद्भिः सह भूरीणि बहूनि वृत्रा वृत्राणि शत्रून् हंसि। नाशितवानसि। किंच हे हर्यश्वेंद्र त्वं दभीतये दभीतिनामकाय राजर्षये। तदर्थमित्यर्थः। दस्युं चुमुरिं च धुनिं च सुहंतु सुहंतुना वज्रेण नि नितरामस्वापयः। नाशितवानसीत्यर्थः॥

॥ अथ पंचमी।

तव च्यौत्नानि वज्रहस्त तानि नव यत्पुरो नवतिं च सद्यः।
निवेशने शततमाविवेषीरहंन् च वृत्रं नमुचिमुताहंन्॥ ५
तव। च्यौत्नानि। वज्रऽहस्त। तानि। नव। यत्। पुरः।
नवतिं। च। सद्यः।
निऽवेशने। शतऽतमा। अविवेषीः। अहंन्। च। वृत्रं।
नमुचिं। उत। अहन्॥ ५

हे वज्रहस्त तव च्यौत्नानि बलानि तानि प्रख्यानि। यद्यदा त्वं शंबरस्य नव नवतिं च पुरः सद्यो युगपदेव विदारितवानसीति शेषः। तदा निवेशने निवेशनार्थं शततमा शततमीं पुरमविवेषीः। व्याप्नोः। वृत्रं चाहन्। उतापि च नमुचिमहन्॥

॥ इति पंचमस्य द्वितीये एकोनत्रिंशो वर्गः॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ षष्ठी ॥

सना ता त इंद्र भोजनानि रातहव्याय दाशुषे सुदासे।

वृष्णे ते हरी वृषणा युनज्मि व्यंतु ब्रह्माणि पुरुशाक वाजं॥ ६

सना। ता। ते। इंद्र। भोजनानि। रातऽहव्याय। दाशुषे।

सुऽदासे।

वृष्णे। ते। हरी इति। वृषणा। युनज्मि। व्यंतु।

ब्रह्माणि। पुरुऽशाक। वाजं॥ ६

हे इंद्र ते तव रातहव्याय दत्तहव्याय दाशुषे यजमानाय सुदासे ता तानि त्वया दत्तानि भोजनानि भोग्यानि धनानि सना सनानि सनातनानि बभूवुरिति शेषः। हे पुरुशाक बहुकर्मन्निंद्र वृष्णे कामानां वर्षित्रे ते तुभ्यं। त्वां यानेतुमित्यर्थः। वृषणा वृषणौ हरी अश्वौ युनज्मि। रथे योजयामि। ब्रह्माण्यस्मदीयानि स्तोत्राणि वाजं बलिनं त्वां व्यंतु। गच्छंतु॥

॥ अथ सप्तमी ॥

मा ते अस्यां सहसावन्परिष्टावघाय भूम हरिवः परादै।

त्रायस्व नोऽवृकेभिर्वरूथैस्तव प्रियासः सूरिषु स्याम॥ ७

मा। ते। अस्यां। सहसाऽवन्। परिष्टौ। अघाय। भूम।

हरिऽवः। पराऽदै।

त्रायस्व। नः। अवृकेभिः। वरूथैः। तव। प्रियासः।

सूरिषु। स्याम॥ ७

हे सहसावन् बलवन् हरिवो हरिवन्निंद्र ते तवास्यां स्तोत्रैरस्माभिः क्रियमाणायां परिष्टावन्वेषणायां परादै परादानायाघायाघंत्रे वयं मा भूम। किंच नोऽस्मान-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हवेभिराह्वानैर्वचनैः । पारयंत्यपद्भ्य इति वरूथानि रक्षणानि । तैस्त्रायस्व । पाहि । तत्र सूरिषु स्तोतृषु मध्ये वयं प्रियासः प्रियाः स्याम । भूयास्म ॥

॥ अथाष्टमी ॥

प्रियास इत्ते मघवन्नभिष्टौ नरो मदेम शरणे सखायः ।
नि तुर्वशं नि याद्वं शिशीह्यतिथिग्वाय शंस्यं करिष्यन् ॥ ८

प्रियासः । इत् । ते । मघऽवन् । अभिष्टौ । नरः । मदेम ।
शरणे । सखायः ।
नि । तुर्वशम् । नि । याद्वम् । शिशीहि । अतिथिऽग्वाय ।
शंस्यम् । करिष्यन् ॥ ८

हे मघवन् धनवन्निंद्र ते तवाभिष्टावभ्येषणे नरः स्तोत्राणां नेतारो वयं सखायः समानख्यातयः प्रियास प्रियाश्च संतः शरण इव गृह एव मदेम । मोदेम । किंचातिथिग्वाय । पूजयातिथीन् गच्छतीत्यतिथिग्वः । तस्मै सुदासे दिवोदासाय पाञ्चदोयाय राज्ञे शंस्यं शंसनीयं सुखं करिष्यन् कुर्वन् तुर्वशं राजानं निशिशीहि । वशं कुरु । याद्वं च राजानं निशिशीहीत्यर्थः ॥

॥ अथ नवमी ॥

सद्यश्चिन्नु ते मघवन्नभिष्टौ नरः शंसन्त्युक्थशास उक्था ।
ये ते हवेभिर्वि पणीँरदाशन्नस्मान्वृणीष्व युज्याय तस्मै ॥ ९

सद्यः । चित् । नु । ते । मघऽवन् । अभिष्टौ । नरः ।
शंसंति । उक्थऽशासः । उक्था ।
ये । ते । हवेभिः । वि । पणीन् । अदाशन् । अस्मान् ।
वृणीष्व । युज्याय । तस्मै ॥ ९

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे मघवन् धनवन्निंद्र ते तव तु अद्य अभिष्टावभ्येषणे ये नर उक्थशासः उक्थानां शंसितार उक्थोक्थानि शस्त्राणि सद्यश्चित् सद्य एव शंसंति। किंच ते तव हवेभिः ह्वानैः पणीनप्रदानशीलान् वणिजोऽपि व्यदायन्। धनानि विशेषेणादापयन्नित्यर्थः। तानस्मान् तस्मै युज्याय सख्याय तत्सख्यमनुवर्तयितुं वृणीष्व। परिरक्षाय॥

॥ अथ दशमी ॥

एते स्तोमा नरां नृतम तुभ्यमस्मद्र्यंचो ददतो मघानि।
तेषामिंद्र वृत्रहत्ये शिवो भूः सखा च शूरोऽविता च नृणां॥ १०

एते। स्तोमाः। नरां। नृऽतम। तुभ्यं। अस्मद्र्यंचः। ददतः।
मघानि।
तेषां। इंद्र। वृत्रऽहत्ये। शिवः। भूः। सखा। च। शूरः।
अविता। च। नृणां॥ १०

हे नृतम नेतृतमेंद्र तुभ्यं नरां नेतॄणां य एते स्तोमाः संघाः मघानि मंहनीयानि धनान्यपि ददतो ददंतोऽस्मद्र्यंचोऽस्मदभिमुखा अभूवन्निति शेषः। तेषां नृणां वृत्रहत्ये संग्रामे शिवः कल्याणकृद् भूः। भव। सखा च भूः। अविता रक्षिता च भूः॥

॥ अथैकादशी ॥

नू इंद्र शूर स्तवमान ऊती ब्रह्मजूतस्तन्वा वावृधस्व।
उप नो वाजान्मिमीह्युप स्तीन्यूयं पात स्वस्तिभिः सदा नः॥ ११

नु। इंद्र। शूर। स्तवमानः। ऊती। ब्रह्मऽजूतः। तन्वा।
ववृधस्व।
उप। नः। वाजान्। मिमीहि। उप। स्तीन्। यूयं।
पात। स्वस्तिऽभिः। सदा। नः॥ ११

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

हे शूरेंद्र तु अद्य स्तवमानः स्तूयमानो ब्रह्मजूतो ब्रह्मणा स्तोत्रेण प्रेरितस्त्वं शरीरेण वर्धस्व । अपि च नोऽस्मभ्यं वाजानन्नान्युपाभिमीहि । प्रयच्छेत्यर्थः स्तोतॄंश्चोपनिमीहि । सुगमन्यत् ॥

॥ इति पंचमस्य द्वितीये त्रिंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये पंचमाष्टके द्वितीयोऽध्यायः समाप्तः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ॐ

॥ श्रीगणेशाय नमः ॥

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे।
यं नत्वा कृतकृत्याः स्युस्तं नमामि गजाननं॥
यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥

उग्रो जज्ञ इति दशर्चं तृतीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैंद्रं। तथा चानुक्रांतं। उग्रो दशेति॥ अभिप्लविके चतुर्थेऽहनि निष्केवल्य एतत्सूक्तं निविद्धानं। सूत्रितं च। चतुर्थस्योग्रो जज्ञ इति निष्केवल्यं। आ० ७. ७.। इति॥ महाव्रतेऽपि निष्केवल्य एतत्सूक्तं। तथैव पंचमारण्यके सूत्रितं। उग्रो जज्ञे वीर्याय स्वधावानुद्ध मध्याध्यैरत श्रद्धा। ऐ० आ० ५. ८.। इति॥ शोभिकपालुन [illegible] तेषु वैश्वदेवस्य स्थाने प्रथमं छन्दोमः। तत्रापि निष्केवल्य एतत्सूक्तं निविद्धानं। सूत्रितं च। जनिष्ठा उग्र उग्रो जज्ञ इति मध्यंदिनः। आ० ८. २.। इति॥

॥ तत्र प्रथमा ॥

उग्रो जज्ञे वीर्याय स्वधावाञ्चक्रिरपो नर्यो यत्करिष्यन्।
जग्मिर्युवा नृषदनमवोभिस्त्राता न इंद्र एनसो महश्चित्॥ १

उग्रः। जज्ञे। वीर्याय। स्वधाऽवान्। चक्रिः। अपः। नर्यः।
यत्। करिष्यन्।
जग्मिः। युवा। नृऽसदनं। अवःऽभिः। त्राता। नः। इंद्रः।
एनसः। महः। चित्॥ १

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्वभावात् बलवानुग्र ओजस्युग्रः पूर्वो येन्द्रो वीर्याय वीर्यं कर्तुं जज्ञे। बभूव। नर्यो नरहितः सन् यत्कर्म करिष्यन् भवति तदपः कर्म चक्रिः कर्तैव॥ चक्रिरिति किन्प्रत्ययस्य लिडुक्तालोकाव्ययनिष्ठाखलर्थतृनामिति षष्ठीप्रतिषेधः॥ अपि अन्वपदनं यज्ञसदनं युवा नित्यतरुणः सन् अवोभी रक्षणैः सार्धं जग्मिर्गन्ता महः स्विदाधतोऽप्येनसः पापाद्योऽस्माकं त्राता रक्षिता च भवेति॥

॥ अथ द्वितीया ॥

हन्ता वृत्रमिन्द्रः शूशुवानः प्रावीन्नु वीरो जरितारमूती।
कर्ता सुदासे अह वा उ लोकं दाता वसु मुहुरा दाशुषे भूत्॥ २

हन्ता। वृत्रम्। इन्द्रः। शूशुवानः। प्र। आवीत्। नु। वीरः। जरितारम्। ऊती।
कर्ता। सुऽदासे। अह। वै। ऊं इति। लोकम्। दाता। वसु। मुहुः। आ। दाशुषे। भूत्॥ २

इन्द्रः शूशुवानो वर्धमानः सन् वृत्रमसुरं हन्ता भवति॥ हन्तेस्तृन्नन्तत्वादत्र षष्ठ्यभावः॥ वीरो वीरः सन् जरितारं स्तोतारं नु क्षिप्रमूती ऊत्या रक्षया प्रावीत्। प्रारक्षत्। सुदासे राज्ञे लोकं जनपदं कर्ता च। यद्वा सुदासे कल्याणप्रदानाय यजमानाय लोकं कर्ता च भवति॥ दृशाद्युत्तरत्रापि तृन्नन्तत्वात्षष्ठ्यभावः। अह वा उ इति त्रयः पूरणाः॥ दाशुषे यजमानाय वसु धनं मुहुर्भूयो भूयो दाता च भूत्। अभूत्॥ आ इति चार्थे॥

॥ अथ तृतीया ॥

युध्मो अनर्वा खजकृत्समद्वा शूरः सत्राषाड् जनुषेमषाळ्हः।
व्यास इन्द्रः पृतनाः स्वोजा अधा विश्वं शत्रूयन्तं जघान॥ ३

युध्मः। अनर्वा। खजऽकृत्। समत्ऽवा। शूरः। सत्राऽसाट्।
जनुषा। ईम्। अषाळ्हः।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

वि । आसे । इंद्रः॑ । पृत॑नाः । सुऽओजाः॑ । अध । विश्वं॑ ।
शत्रुऽयंतं॑ । जघान ॥ ३

युध्मो योद्धानयोभिर्गंहर्षितो युद्धेष्वपराङ्मुखो वा सहमद्युरसत् । सत्ते सघः इति युद्धनामसु पाठात् । समदा । समत् कलहः । महान् शूरः शौर्योपेतो जनुषा जन्मना स्वभावत एव सत्वापाद् यज्ञानामभिभविताषाड् ऋः स्वयं च केनाप्यनभिभूतः स्वोजा सुबल ईदृशयमिंद्रः पृतनाः शत्रूणां सेना व्यासे । विक्षिपति । अथापि च शत्रूयंतं आत्मनआचरंतं विश्वं सर्वं जघान । हंति ॥

॥ अथ चतुर्थी ॥

उभे चि॑दिंद्र रोद॑सी महित्वा प॑प्राथ तवि॑षीभिस्तुविष्मः ।
नि वज्रमिंद्रो हरि॑वान्मिमि॑क्षन्त्समंध॑सा मदे॑षु वा उ॑वोच ॥ ४

उभे इति॑ । चित् । इंद्र । रोद॑सी इति॑ । महिऽत्वा । आ ।
पप्राथ । तवि॑षीभिः । तुविष्मः ।
नि । वज्र॑ं । इंद्रः॑ । हरि॑ऽवान् । मिमि॑क्षन् । सं । अंध॑सा ।
मदे॑षु । वै । उवोच ॥ ४

हे तुविष्मो बहुधनेंद्र महित्वा महत्त्वेन तविषीभिर्बलैश्चोभे चिदुभे अपि रोदसी द्यावापृथिव्यावापप्राथ । आपूरितवानसि । अथ परोक्षस्तुतिः । हरिवानश्ववानिंद्रो वज्रं निमिमिक्षन् शत्रुषु प्रापयन् मदेषु यज्ञेषु निमित्तेष्वंधसा सोमेन समुवोच । संश्लेष्यते संगच्छते वा ॥ उच समवाय इति धातुः । वा इति पूरणः ॥

॥ अथ पंचमी ॥

वृषा॑ जजान वृष॑णं रणा॑य तमु॑ चिन्नारी नर्यं॑ ससूव ।
प्र यः से॑नानीरध नृभ्यो अस्तीनः सत्वा गवेष॑णः स धृष्णुः ५

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वृषा । जजान । वृषणं । रणाय । तं । ऊं इति । चित् । नारी । नर्यं । ससूव ।

प्र । यः । सेनाऽनीः । अर्ध । नृऽभ्यः । अस्ति । इनः । सत्वा । गोऽएषणः । सः । धृष्णुः ॥ ५

वृषा सेक्ता पिता अस्य यो वृषणं कामानां वर्षितारमिंद्रं रणाय युद्धार्थं जजान ॥ जन जनन इति धातुः ॥ नर्यं नरहितं तमु तमेवेंद्रं नारी चिददितिरपि ससूव । सुषुवे । अथापि च यः इंद्रो नृभ्यो नृणां सेनानीः सेनानां नेता सन् प्रास्ति प्रभवति स इंद्र इनः सर्वस्य जगत ईश्वरो भवति ॥ नियुत्वानिन इतीश्वरनामसु पाठात् ॥ सत्वा शत्रूणां सादकश्च गवेषणो गवामन्वेष्टा च धृष्णुः शत्रूणां धर्षकश्च भवतीति शेषः ॥

॥ इति पंचमस्य तृतीये प्रथमो वर्गः ॥

॥ अथ षष्ठी ॥

नू चित्स भ्रेषते जनो न रेषन्मनो यो अस्य घोरमाविवासात् ।
यज्ञैर्य इंद्रे दधते दुवांसि क्षयत्स राय ऋतपा ऋतेजाः ॥ ६

नु । चित् । सः । भ्रेषते । जनः । न । रेषत् । मनः । यः ।
अस्य । घोरं । आऽविवासात् ।
यज्ञैः । यः । इंद्रे । दधते । दुवांसि । क्षयत् । सः । राये ।
ऋतऽपाः । ऋतेऽजाः ॥ ६

यो जनोऽस्येंद्रस्य घोरं शत्रूणां बाधकं मनो यज्ञैराविवासात् परिचरति स जनः । नु इति प्रतिषेधे वर्तते । चिदित्येवकारार्थे । नूचित् नैव भ्रेषते । स्थानात् न भ्रश्यति । न रेषत् । नैव हीयेत । अपि च यो जनो दुवांसि परिचरणसाधनानि सोमलक्षणानींद्रे दधते निधत्ते तस्मै जनाय ऋतपा यज्ञपाता ऋतेजा यज्ञे जातश्च स इंद्रो राये धनाय क्षयत् । निवसति । भवेदित्यर्थः ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ सप्तमी ॥

यदिंद्र पूर्वो अपराय शिक्षन्नयज्ज्यायान्कनीयसो देष्णं।
अमृत इत्पर्यासीत दूरमा चित्र चित्र्यं भरा रयिं नः॥ ७

यत्। इंद्र। पूर्वः। अपराय। शिक्षन्। अयत्। ज्यायान्।
कनीयसः। देष्णं।
अमृतः। इत्। परि। आसीत। दूरं। आ। चित्र।
चित्र्यं। भर। रयिं। नः॥ ७

हे चित्र चायनीयेंद्र यद्धनं पूर्वः पिता ज्येष्ठो भ्राता वापराय पुत्राय कनीयसे वा शिक्षन् प्रयच्छन्॥ शिक्षतिर्दानकर्मा प्रीणाति शिक्षतीति दानकर्मसु पाठात्॥ भवतीति शेषः। यच्च देष्णं देयं धनं ज्यायान् ज्येष्ठः कनीयसोऽयत् प्राप्नुयात्। यच्चापि धनं पितृतो लब्ध्वा पुत्रोऽमृत इत् अमृत एव सन् पितृदत्तं विहाय दूरं पर्यासीत पर्यासीत तत् त्रिविधं चित्र्यं चायनीयं रयिं धनं नोऽस्मभ्यमाभर। आहर॥

॥ अथाष्टमी ॥

यस्त इंद्र प्रियो जनो ददाशदसन्निरेके अद्रिवः सखा ते।
वयं ते अस्यां सुमतौ चनिष्ठाः स्याम वरूथे अघ्नतो नृपीतौ॥ ८

यः। ते। इंद्र। प्रियः। जनः। ददाशत्। असत्। निरेके।
अद्रिऽवः। सखा। ते।
वयं। ते। अस्यां। सुऽमतौ। चनिष्ठाः। स्याम। वरूथे।
अघ्नतः। नृऽपीतौ॥ ८

हे इंद्र यस्ते तुभ्यं प्रियः सखा जनो ददाशत् हवींषि दद्यात् हे अद्रिवः व सखा ते तव निरेके दानेऽसत्। स्यात्। वयं च वसिष्ठा अघ्नतोऽहिंसतस्ते तवास्यां सुमता-

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

मनुष्यकृतो वर्तमानार्थनिष्ठाः स्तुतिमत्तरा अतिशयेनाश्रयंतो वा। यतोऽस्य'। स्वपीतो ऽस्यां रचको यद्वये ऽष्टे पदपीये वा धने स्याम। वसेम भवेम वा ॥

॥ अथ नवमी ॥

एष स्तोमो अचिक्रदद्वृषा त उत स्तामुर्मघवन्नक्रपिष्ट ।

रायस्कामो जरितारं त आगन्त्वमंग शक्र वस्व आ शको नः॥ ९

एषः। स्तोमः। अचिक्रदत्। वृषा। ते। उत। स्तामुः।

मघऽवन्। अक्रपिष्ट।

रायः। कामः। जरितारं। ते। आ। अगन्। त्वं। अंग।

शक्र। वस्वः। आ। शकः। नः॥ ९

हे मघवन् धनवन्निंद्र ते त्वदर्थं वृषा सेक्तैष स्तोमः सोमः स्तूयमानोऽचिक्रदत्। क्रंदति। उतापि च स्ताद्यः स्तोताक्रपिष्ट। अस्तौत्। अपि च हे शक्र ते तव जरितारं स्तोतारं मां रायो धनस्य कामोऽभिलाष आगन्। आगतः। अतस्त्वं वस्वो धनं॥ कर्मणि षष्ठी॥ नोऽस्मभ्यमंग क्षिप्रमाशकः। देहि॥

॥ अथ दशमी ॥

स न इंद्र त्वयंताया इषे धास्त्मना च ये मघवानो जुनंति। ?

वस्वी षु ते जरित्रे अस्तु शक्तिर्यूयं पात स्वस्तिभिः सदा नः॥ १०

सः। नः। इंद्र। त्वऽयंतायै। इषे। धाः। त्मना। च। ये।

मघऽवानः। जुनंति।

वस्वी। सु। ते। जरित्रे। अस्तु। शक्तिः। यूयं। पात।

स्वस्तिऽभिः। सदा। नः॥ १०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

हे इंद्र स त्वं त्वयतायाः इषे त्वया दत्तमन्नं भोक्तुं नोऽस्मान् धाः। धारय। ये च मघवानो हविष्मंतस्त्वना स्वयमेव पुनंति इषोऽपि त्वां प्रति प्रेरयंति तानपि त्वयतायाः इषे धाः। अपि च यशोऽत्यर्थं प्रयस्तासु स्तुतिषु ते तव जरित्रे स्तोत्रे मह्यं शक्तिः सामर्थ्यमस्तु। यद्वा जरित्रे मह्यं ते तव शक्ती सु प्रयस्ता शक्तिर्दानमस्तु। स्पष्टमन्यत्॥

॥ इति पंचमस्य तृतीये द्वितीयो वर्गः॥

असावि देवमिति दशर्चं चतुर्थं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैंद्रं। तथा चानुक्रांतं। असावीति॥ माध्यंदिनसवने मैत्रावरुणस्योचीयमानमिदं सूक्तं। असावि देवमिन्द्रोप यातेष्वनुवचनं। आ० ५. ५.। इति॥ इंद्रस्य वृत्रघ्नः पशावभि क्रत्वेति वपाया अनुवाक्या। सूत्रितं च। अभि क्रत्वेंद्र भूरध ज्मन् त्वं महाँ इंद्र तुभ्यं ह क्षाः। आ० ३. ८.। इति॥

॥ तत्र प्रथमा॥

असावि देवं गोऋजीकमंधो न्यस्मिन्निंद्रो जनुषेमुवोच।
बोधामसि त्वा हर्यश्व यज्ञैर्बोधा नः स्तोममंधसो मदेषु॥ १

असावि। देवं। गोऽऋजीकं। अंधः। नि। अस्मिन्। इंद्रः।
जनुषा। ईं। उवोच।
बोधामसि। त्वा। हरिऽअश्व। यज्ञैः। बोध। नः।
स्तोमं। अंधसः। मदेषु॥ १

देवं दीप्तं गोऋजीकं गोभिः संस्कृतं। गव्येन मिश्रितमित्यर्थः। अंधः सोमरूपमन्नमसावि। अभिषुतं। ईमयमिंद्रोऽस्मिन्नभिषुते सोमरूपेऽन्धसि जनुषा स्वभावत एव न्युवोच। नितरां संगतो भवति। अथ प्रत्यक्षस्तुतिः। हे हर्यश्व त्वा त्वां यज्ञैः स्तोत्रैर्हविर्भिर्वा बोधामसि। बोधयामः। अंधसः सोमस्य मदेषु नोऽस्माकं स्तोमं स्तोत्रं बोध। बुध्यस्व च॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ द्वितीया ॥

प्र यंति यज्ञं विपयंति बर्हिः सोममादो विदथे दुध्रवाचः।
न्यु भ्रियंते यशसो गृभादा दूरउपब्दो वृषणो नृषाचः॥ २

प्र। यंति। यज्ञं। विपयंति। बर्हिः। सोमऽमादः। विदथे।
दुध्रऽवाचः।
नि। ऊं इति। भ्रियंते। यशसः। गृभात्। आ।
दूरेऽउपब्दः। वृषणः। नृऽसाचः॥ २

यज्ञं प्रयंति यष्टारो बर्हिश्च विपयंति। स्तृणंति॥ विपिः स्तरणकर्मा॥ विदथे यज्ञे सोममादो ग्रावाणश्च दुध्रवाचो दुर्धरवाचो भवंति। अपि च यशसो यशस्विनो दूरउपब्दः। दूरे उपब्दिः शब्दो येषां ते दूरउपब्दः। नृषाचः। नृभिर्ऋत्विग्भिः सचंत इति नृषाचः। वृषणो ग्रावाणो गृभाद्ग्राहात्। गृह्यमाणयावा। तस्मात्। आ इति चार्थे। निभ्रियंते। अभिषववेलायां निगृह्यंते। उ इति पूरणः॥

॥ अथ तृतीया ॥

त्वमिंद्र स्रवितवा अपस्कः परिष्ठिता अहिना शूर पूर्वीः।
त्वद्वावक्रे रथ्यो३ न धेना रेजंते विश्वा कृत्रिमाणि भीषा॥ ३

त्वं। इंद्र। स्रवितवै। अपः। करिति कः। परिऽस्थिताः।
अहिना। शूर। पूर्वीः।
त्वत्। वावक्रे। रथ्यः। न। धेनाः। रेजंते। विश्वा।
कृत्रिमाणि। भीषा॥ ३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे शूरेंद्र त्वमहिना वृत्रेण परिष्ठिता आक्रांताः पूर्वीर्बह्वीरप उदकानि स्रवितवै स्रवितुं कः। अकार्षीः। धेना नद्यश्च त्वत्तो हेतो रथ्यो न रथिन इव वावक्रे। निर्गच्छंति॥ वकि कौटिल्य इति धातुः॥ विश्वा विश्वानि कृत्रिमाणि भुवनानि च भीषा त्वत्तो भीत्या रेजंते। कंपंते॥

॥ अथ चतुर्थी॥

भीमो विवेषायुधेभिरेषामपांसि विश्वा नर्याणि विद्वान्।

इंद्रः पुरो जर्हृषाणो वि दूधोद्वि वज्रहस्तो महिना जघान॥४

भीमः। विवेष। आयुधेभिः। एषां। अपांसि। विश्वा।

नर्याणि। विद्वान्।

इंद्रः। पुरः। जर्हृषाणः। वि। दूधोत्। वि। वज्रऽहस्तः।

महिना। जघान॥ ४

इंद्रो नर्याणि नरहितानि विश्वा विश्वान्यपांसि कर्माणि विद्वान् जानन् आयुधेभिरायुधैर्भीमो भयंकरः सन् एषां॥ कर्मणि षष्ठी॥ एतानसुरान् विवेष। व्याप्नवान्। पुरश्च तेषां विदूधोत्। अकंपयत्। अपि च जर्हृषाणो हृष्यन् महिना महिम्ना युक्तो वज्रहस्तः सन् तान्विजघान॥

॥ अथ पंचमी॥

न यातव इंद्र जूजुवुर्नो न वंदना शविष्ठ वेद्याभिः।

स शर्धदर्यो विषुणस्य जंतोर्मा शिश्नदेवा अपि गुर्ऋतं नः॥ ५

न। यातवः। इंद्र। जूजुवुः। नः। न। वंदना। शविष्ठ।

वेद्याभिः।

सः। शर्धत्। अर्यः। विषुणस्य। जंतोः। मा। शिश्नऽदेवाः।

अपि। गुः। ऋतं। नः॥ ५

२७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे इंद्र यातवो राक्षसा नोऽस्माद्य जूजुवुः । न हिंसुः । जूजुवुरिति हिंसाक्रियः पृथक्करणक्रियो वा । अपि च हे यविष्ठ बलवत्तमेंद्र वंदना वंदनानि रक्षांसि वेद्याभिर्वेद्याभ्यः प्रजाभ्यो नोऽस्माच्च जूजुवुः । न पृथक्कुर्वंतु । किंचार्थः स्वामी स इंद्रो विषुणस्य विषमस्य जंतोः प्राणिनः शासने शर्धत् । उत्सहेत । अपि च शिश्नदेवाः । शिश्नेन दीव्यंति क्रीडंत इति शिश्नदेवाः । अब्रह्मचर्या इत्यर्थः । नोऽस्माकमृतं यज्ञं सत्यं वा मापिगुः । मापिगमन् । तथा च यास्कः । स उत्सहतां यो विषुणस्य जंतोर्विषमस्य वा शिश्नदेवा अब्रह्मचर्याः । शिश्नं श्नथतेः । अपिगुर्ऋतं नः सत्यं वा यज्ञं वा । नि० ४. १९. । इति ॥

॥ इति पंचमस्य तृतीये तृतीयो वर्गः ॥

॥ अथ षष्ठी ॥

अभि क्रत्वेंद्र भूरध ज्मन्न ते विव्यङ्महिमानं रजांसि ।
स्वेना हि वृत्रं शवसा जघंथ न शत्रुरंतं विविदद्युधा ते ॥ ६

अभि । क्रत्वा । इंद्र । भूः । अध । ज्मन् । न । ते । विव्यक् ।
महिमानं । रजांसि ।
स्वेन । हि । वृत्रं । शवसा । जघंथ । न । शत्रुः । अंतं ।
विविदत् । युधा । ते ॥ ६

हे इंद्र त्वं क्रत्वा कर्मणा ज्मन् पृथिव्यां वर्तमानान् जंतून्यभिभूः । अभ्यभूः । अथापि च ते तव महिमानं रजांसि सर्वे लोका न विव्यक् ॥ व्यचिर्व्याप्तिकर्मा ॥ न व्याप्नुवंतीत्यर्थः । स्वेन स्वकीयेन च शवसा बलेन वृत्रं जघंथ । त्वमवधीः । शत्रुश्च युधा युद्धेन ते तवांतं हिंसां न विविदत् । न लब्धवान् ॥

॥ अथ सप्तमी ।

देवाश्चित्ते असुर्याय पूर्वेऽनु क्षत्राय ममिरे सहांसि ।
इंद्रो मघानि । दयते विषह्येंद्रं वाजस्य जोहुवंत सातौ ॥ ७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

देवाः। चित्। ते। असुर्याय। पूर्वे। अनु। क्षत्राय।
ममिरे। सहांसि।
इंद्रः। मघानि। दयते। विऽसह्य। इंद्रं। वाजस्य।
जोहुवंत। सातौ॥ ७

पूर्वे देवाश्चिदसुरा अप्यसुर्याय बलाय क्षत्राय॥ क्षदिर्हिंसाकर्मा॥ बलं हिंसां चोभे कर्तुमित्यर्थः। हे इंद्र ते तव सहांसि बलान्यनुममिरे। हीने। पा० १. ४. ८६.। इत्यनुः कर्मप्रवचनीयः॥ तव बलेभ्यो हीना ममिर इत्यर्थः। तथा च निगमांतरं। अनु ते द्यौर्बृहती वीर्यं ममे। ऋग्वे० १. ५७. ५.। इति। अथ परोक्षस्तुतिः। इंद्रः शत्रून्विषह्य मघानि मंहनीयानि धनानि दयते। भक्तेभ्यः प्रयच्छति। अपि चेंद्रं वाजस्यान्नस्य सातौ लाभार्थं जोहुवंत। स्तुवंति स्तोतार आह्वयंति वा॥

॥ अथाष्टमी॥

कीरिश्चिद्धि त्वामवसे जुहावेशानमिंद्र सौभगस्य। भूरेः।
अवो बभूथ शतमूते अस्मे अभिक्षत्तुस्त्वावतो वरूता॥ ८

कीरिः। चित्। हि। त्वां। अवसे। जुहाव। ईशानं।
इंद्र। सौभगस्य। भूरेः।
अवः। बभूथ। शतंऽऊते। अस्मे इति। अभिऽक्षत्तुः।
त्वाऽवतः। वरूता॥ ८

हे इंद्र ईशानं त्वां कीरिः स्तोता॥ कारुः कीरिरिति स्तोतृनामसु पाठात्॥ वसिष्ठोऽवसे रक्षणाय जुहाव हि। स्तौति हि ह्वयति वा। चिदिति पूरणः। अपि च हे शतमूते बहुरक्षेंद्र अस्मे अस्माकं भूरेः प्रभूतस्य सौभगस्य धनस्यावो रक्षा बभूथ। बभूविथ। अभिक्षत्तुरभिहिंसकस्य त्वावतस्त्वत्सदृशस्य वरूता वारयिता च भव॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ नवमी ॥

सखायस्त इंद्र विश्वह स्याम नमोवृधासो महिना तरुत्र।

वन्वंतु स्मा तेऽवसा समीकेऽभीतिमर्यो वनुषां शवांसि ॥ ९

सखायः। ते। इंद्र। विश्वह। स्याम। नमःऽवृधासः।

महिना। तरुत्र।

वन्वंतु। स्म। ते। अवसा। संऽईके। अभिऽइतिं। अर्यः।

वनुषां। शवांसि ॥ ९

हे इंद्र ते तव नमोवृधासो नमसा स्तुत्या हविषा वा वर्धयितारो वयं विश्वह सर्वदा सखायः स्याम। भवेम। महिना महिम्ना तरुत्र तारकेंद्र ते तवावसा रक्षणेन समीके संग्रामेऽर्योऽभीतिमभिगमनं वनुषां हिंसकानां शवांसि बलानि च वन्वंतु। स्तोतारो हिंसंतु॥

॥ अथ दशमी ॥

स न इंद्र त्वयताया इषे धास्त्मना च ये मघवानो जुनंति।

वस्वी षु ते जरित्रे अस्तु शक्तिर्यूयं पात स्वस्तिभिः सदा नः ॥ १०

सः। नः। इंद्र। त्वऽयताये। इषे। धाः। त्मना। च। ये।

मघऽवानः। जुनंति।

वस्वी। सु। ते। जरित्रे। अस्तु। शक्तिः। यूयं। पात।

स्वस्तिऽभिः। सदा। नः ॥ १०

इयमृक् व्याख्यातचरा॥

॥ इति पंचमस्य तृतीये चतुर्थो वर्गः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पिबा सोममिंद्र मंदतु त्वेति नवर्चं पंचमं सूक्तं। अनुक्रम्यते च। पिब नव वैराजमन्तेऽन्त्यावीति। वसिष्ठ ऋषिः। आदितोऽष्टौ विराजो नवमी त्रिष्टुप्। इंद्रो देवता॥ दशरात्रे चतुर्थेऽहनि निष्केवल्यशस्त्रे पिबा सोममिंद्रेति षट् स्तोत्रियानुरूपौ। सूत्रितं च। वैराजं चेत्पृष्ठं पिबा सोममिंद्र मंदतु त्वेति षट् स्तोत्रियानुरूपौ। आ० ७. ८.। इति॥ महाव्रतेऽपि निष्केवल्य आद्याः षडृचः। सूत्रितं च। पिबा सोममिंद्रं मंदतु त्वेति षट्। ऐ० आ० ५. १२.। इति॥ आद्या निष्केवल्यपक्षे याज्या। सूत्रितं च। पिबा सोममिंद्र मंदतु त्वेति याज्या। आ० ५. १५। इति॥ चतुर्थेऽहनि माध्यंदिनसवने होत्रकशस्त्रेषु सप्त विराजस्तोत्तृचान् सत्यैकैकस्तृचः शंसनीयः। तत्र न ते गिर इत्याद्यचतस्र शस्यः। सूत्रितं च। न ते गिरो अपि मृष्ये तुरस्य प्र वो महे महिवृधे भरध्वं। आ० ७. ११.। इति॥

॥ तत्र प्रथमा ॥

पिबा सोममिंद्र मंदतु त्वा यं ते सुषाव हर्यश्वाद्रिः।

सोतुर्बाहुभ्यां सुयतो नार्वा॥ १

पिब। सोमं। इंद्र। मंदतु। त्वा। यं। ते। सुसाव।

हरिऽअश्व। अद्रिः।

सोतुः। बाहुऽभ्यां। सुऽयतः। न। अर्वा॥ १

हे इंद्र सोमं पिब। स सोमस्त्वा त्वां मंदतु। मादयतु। हे हर्यश्व ते त्वदर्थं सोतुरभिषवकर्तुर्बाहुभ्यामर्वा न रश्मिभ्यामश्व इव सुयतः सुष्ठु परिगृहीतोऽद्रिर्ग्रावा यं सोमं सुषाव॥

॥ अथ द्वितीया ॥

यस्ते मदो युज्यश्चारुरस्ति येन वृत्राणि हर्यश्व हंसि।

स त्वामिंद्र प्रभूवसो ममत्तु॥ २

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

यः । ते । मदः । युज्यः । चारुः । अस्ति । येन । वृत्राणि ।

हरिऽअश्व । हंसि ।

सः । त्वां । इंद्र । प्रभुवसो इति प्रभुऽवसो । ममत्तु ॥ २

हे हर्यश्व ते तव यो युज्योऽयुयुक्षयारुः समीचीनो मदो मदकरः सोमोऽस्ति वर्तते । येन च पीतेन सोमेन वृत्राणि हंसि हे प्रभूवसो प्रभूतधनेंद्र त्वां स सोमो ममत्तु । मादयतु ॥

॥ अथ तृतीया ॥

बोधा सु मे मघवन्वाचमेमां यां ते वसिष्ठो अर्चति प्रशस्तिं ।

इमा ब्रह्म सधमादे जुषस्व ॥ ३

बोध । सु मे मघऽवन् । वाचं । आ । इमां । यां ते ।

वसिष्ठः । अर्चति । प्रऽशस्तिं ।

इमा । ब्रह्म सधऽमादे । जुषस्व ॥ ३

हे मघवन् धनवन्निंद्र ते तव प्रशस्तिं स्तुतिरूपां यां वाचं वसिष्ठोऽर्चति वदति तामिमां मे वसिष्ठस्य संबंधिनीं वाचं स्वाबोध । सुष्ठु अभिबुध्यस्व । किंचेमानि ब्रह्म ब्रह्माणि सधमादे यज्ञे जुषस्व । सेवस्व ॥

॥ अथ चतुर्थी ॥

श्रुधी हवं विपिपानस्याद्रेर्बोधा विप्रस्यार्चतो मनीषां ।

कृष्वा दुवांस्यंतमा सचेमा ॥ ४

श्रुधि । हवं । विऽपिपानस्य । अद्रेः । बोध । विप्रस्य ।

अर्चतः । मनीषां ।

कृष्व । दुवांसि । अंतमा । सचा । इमा ॥ ४

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

हे इंद्र पिपिपानस्य पिपीलवतो पिपिवतो वा ममाद्रेर्ग्राव्णो ह्वयमाह्वानं श्रुधि। शृणु। तथा च निगमांतरं। ग्रावभ्यो वाचं वदता वदद्भिः। ऋग्वे० १०. ९४. १.। इति। विप्रस्य प्राज्ञस्य यतिरस्यार्चतः स्तुवतो मनीषां स्तुतिं बोध। बुध्यस्व च। इमेमानि क्रियमाणानि दुवांसि परिचरणान्यंतमांतिकतमानि वृधिस्यानि सचा सह सहायभूतः सन्था कृण्व। कुरु च॥

॥ अथ पंचमी॥

न ते गिरो अपि मृष्ये तुरस्य न सुष्टुतिमसुर्यस्य विद्वान्।
सदा ते नाम स्वयशो विवक्मि॥ ५

न। ते। गिरः। अपि। मृष्ये। तुरस्य। न। सुऽस्तुतिं।
असुर्यस्य। विद्वान्।
सदा। ते। नाम। स्वऽयशः। विवक्मि॥ ५

हे इंद्र तुरस्य शत्रूणां हिंसकस्य ते तव गिरः स्तुतीरसुर्यस्य॥ द्वितीयार्थे षष्ठी॥ त्वदीयमसुर्यं बलं विद्वान् जानन्नहं नापिमृष्ये॥ मृषिर्बाधनकर्मा॥ न बाधयामि। न परित्यजामीत्यर्थः। सुष्टुतिं शोभनां स्तुतिं च नापिमृष्ये। मृषेर्वर्जनकर्मत्वमन्यत्रापि दृश्यते। तद्यथा। मा नो अग्ने सख्या पित्र्याणि प्र मर्षिष्ठाः। ऋग्वे० १. ७१. १०.। इति। किंतु स्वयशोऽसाधारणयशस्के तव नाम स्तोत्रं सदैव विवक्मि। ब्रवीमि॥

॥ इति पंचमस्य तृतीये पंचमो वर्गः॥

॥ अथ षष्ठी॥

भूरि हि ते सवना मानुषेषु भूरि मनीषी हवते त्वामित्।
मारे अस्मन्मघवञ्ज्योक्कः॥ ६

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

भूरिं । हि । ते । सवंना । मानुंषेषु । भूरिं । मनीषी ।

हवते । त्वां । इत् ।

मा । आरे । अस्मत् । मघऽवन् । ज्योक् । करितिं कः ॥

हे मघवन् ते तव सवना सवनानि सोमाभिषवणानि भूरि भूरीणि मानुषेष्वासु वर्तंत इति शेषः । मनीषी स्तोता त्वामित्वामेव भूरि हवते । नितरां ह्वयति । स्तौति । अतोऽस्मदस्मत्त आरे दूरे ज्योक् चिरकालं मा कः । आत्मानं मा कार्षीः । क्षिप्रमात्मानमस्मदासत्तं कुर्वित्यर्थः ॥

॥ अथ सप्तमी ॥

तुभ्येदिमा सवंना शूर विश्वा तुभ्यं ब्रह्मांणि वर्धंना कृणोमि ।
त्वं नृभिर्हव्यो विश्वधांसि ॥ ७

तुभ्यं । इत् । इमा । सवंना । शूर । विश्वां । तुभ्यं ।
ब्रह्मांणि । वर्धंना । कृणोमि ।
त्वं । नृऽभिंः । हव्यंः । विश्वधां । असि ॥ ७

हे शूर तुभ्येत्तुभ्यमेवेमेमानि विश्वा विश्वानि सवना सोमाभिषवणानि मया क्रियंत इति शेषः । तुभ्यं त्वदर्थमेव वर्धना वर्धनानि ब्रह्माणि स्तोत्राणि कृणोमि । करोमि । त्वमेव नृभिर्यजमानैर्नेतृभिर्विश्वधा सर्वप्रकारैर्हव्यो ह्वातव्य स्तुत्यो वासि ॥

॥ अथाष्टमी ॥

नू चिन्नु ते मन्यंमानस्य दस्मोदंश्नुवंति महिमानंमुग्र ।
न वीर्यंमिंद्र ते न राधंः ॥ ८

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नु। चित्। नु। ते। मन्यमानस्य। दस्म। उत्। अश्नुवंति।
महिमानं। उग्र।
न। वीर्यं। इंद्र। ते। न। राधः॥ ८

हे दस्म दर्शनीय मन्यमानस्य स्तूयमानस्य ते तव महिमानं। नू चिदिति प्रतिषेधार्थः। नु क्षिप्रं नूचिदुदश्नुवंति। केचन न प्राप्नुवंति। हे उग्रोद्गूर्ण ते तव राधो धनं नोदश्नुवंति॥

॥ अथ नवमी॥

ये च पूर्व ऋषयो ये च नूत्ना इंद्र ब्रह्माणि जनयंत विप्राः।
अस्मे ते संतु सख्या शिवानि यूयं पात स्वस्तिभिः सदा नः॥ ९

ये। च। पूर्वे। ऋषयः। ये। च। नूत्नाः। इंद्र। ब्रह्माणि।
जनयंत। विप्राः।
अस्मे इति। ते। संतु। सख्या। शिवानि। यूयं। पात।
स्वस्तिऽभिः। सदा। नः॥ ९

ये च पूर्वे प्राक्तना ऋषयो ये च नूत्ना नूतना विप्रा मेधाविन ऋषयो ब्रह्माणि स्तोत्राणि जनयंत अजनयंत तेभ्यश्चास्मे अस्मास्वपि हे इंद्र ते तव सख्या सख्यानि शिवानि भद्राणि संतु। स्पष्टमन्यत्॥

॥ इति पंचमस्य तृतीये षष्ठो वर्गः॥

उदु ब्रह्माणीति षडृचं षष्ठं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैंद्रं। अनुक्रम्यते च। उदु षडिति॥ अग्निष्टोमे माध्यंदिने सवने ब्राह्मणाच्छंसिशस्त्र एतत्सूक्तं। सूत्रितं च। उदु ब्रह्माण्यूनोषी मध्वो वृषभस्तुराषाडिति याज्या। आ० ५. १६.। इति॥ चातुर्विंशिकेऽहनि माध्यंदिनसवने ब्राह्मणाच्छंसिशस्त्र एतदहरहःशस्यं त्रैष्टुभं सूक्तं। सूत्रितं च। उदु ब्रह्माण्यभि तष्टेवेत्याहरहःशस्ये। आ० ७. ४.। इति॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

षडहेषु द्वितीयादिष्वहःस्वेतदेव सूक्तं ॥ महाव्रतेऽपि निष्केवल्य एतत्सूक्तं । सूचितं च । उदु ब्रह्माण्यैरत श्रवस्या ते मह इंद्रोत्युग्रो मे हि पंच सूक्तानि । ऐ० आ० ५. ८. । इति ॥

॥ तत्र प्रथमा ॥

उदु ब्रह्माण्यैरत श्रवस्येंद्रं समर्ये महया वसिष्ठ ।

आ यो विश्वानि शवसा ततानोपश्रोता म ईवतो वचांसि ॥ १

उत् । ऊं इति । ब्रह्माणि । ऐरत । श्रवस्या । इंद्रं ।

सऽमर्ये । महय । वसिष्ठ ।

आ । यः । विश्वानि । शवसा । ततान । उपऽश्रोता ॥ मे ।

ईवतः । वचांसि ॥ १

श्रवस्यायेच्छया ब्रह्माणि स्तोत्राणि हवींषि चेंद्रार्थमुदैरत स्व ऋषय इति शेषः । उ इति पूरणः । हे वसिष्ठ त्वमपि समर्ये यज्ञ इंद्रं महय । स्तोत्रेण हविषा च पूजय । अपि च य इंद्रो विश्वानि भुवनानि शवसा बलेनाततान स ईवत उपगमनवतो मे मम वचांसि स्तुतिरूपाणि वाक्यान्युपश्रोता भवतु ॥

॥ अथ द्वितीया ॥

अयामि घोष इंद्र देवजामिरिरज्यंत यच्छुरुधो विवाचि ।

नहि स्वमायुश्चिकिते जनेषु तानीदंहांस्यति पर्ष्यस्मान् ॥ २

अयामि । घोषः । इंद्र । देवऽजामिः । इरज्यंत ।

यत् । शुरुधः । विऽवाचि ।

नहि । स्वं । आयुः । चिकिते । जनेषु । तानि । इत् ।

अंहांसि । अति । पर्षि । अस्मान् ॥ २

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

: यद्यदा युद्धः । युधं गं ह धंतीति युद्धम ओषधयः । इरज्यंत वर्धंते तदा हे इंद्र मदर्थं विनाधि स्तोतरि देवजातिदेवानां मधुर्जीयः । स्तुतिरूपः मन्द्रो घोषः । प्रयाति । चकारि । अपि च जनेषु मध्ये केनापि स्वमायुः स्वजीवितं नहि चिकितेः न ज्ञायते । वैरायुः चीयते तानीतानि मनोवेदांसि पापान्यचानतिपर्षि । अतिपारय ॥

॥ अथ तृतीया ॥

युजे रथं गवेषणं हरिभ्यामुप ब्रह्माणि जुजुषाणमस्थुः ।
वि बाधिष्ट स्य रोदसी महित्वेंद्रो वृत्राण्यप्रती जघन्वान् ॥ ३

युजे । रथं । गोऽएषणं । हरिऽभ्यां । उप । ब्रह्माणि ।
जुजुषाणं । अस्थुः ।
वि । बाधिष्ट । स्यः । रोदसी इति । महिऽत्वा । इंद्रः ।
वृत्राणि । अप्रति । जघन्वान् ॥ ३

गवेषणं गणं प्रापकमिंद्रस्य रथं हरिभ्यामिंद्रस्याश्वाभ्यां युजे । स्तोतेत्येवं युनज्मि । ब्रह्माणि स्तोत्राणि जुजुषाणं परिचारैः सेव्यमानमिंद्रमुपस्थुः । उपातिष्ठंत । स्यः सोऽयमिंद्रो महित्वा महत्त्वेन रोदसी द्यावापृथिव्यौ वियाधिष्ट । व्यबाधिष्ट च । अपि चेंद्रो वृत्राणि शत्रूनप्रति द्वंद्वानि जघन्वान् हतवान् ॥

॥ अथ चतुर्थी ॥

आपश्चित्पिप्युः स्तर्यो३ न गावो नक्षन्नृतं जरितारस्त इंद्र ।
याहि वायुर्न नियुतो नो अच्छा त्वं हि धीभिर्दयसे वि वाजान् ॥ ४

आपः । चित् । पिप्युः । स्तर्यः । न । गावः । नक्षन् ।
ऋतं । जरितारः । ते । इंद्र ।
याहि । वायुः । न । निऽयुतः । नः । अच्छ । त्वं । हि ।
धीभिः । दयसे । वि । वाजान् ॥ ४

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे इंद्र त्वत्प्रसादादापश्चित् आपः सर्यो न गावः सर्यो यथा गाव इव पिप्युः। अवर्धंत। अवत्सला गावो वात्सला भवंति हि। ते तव जरितारः स्तोतारश्च ऋतमुदकं सचन्। व्याप्नुवन्। अपि च त्वं नोऽस्मान्नियुतो वायुर्न वायुरिवाच्छ याहि। अभियाहि। त्वं हि धीभिः प्रज्ञाभिः कर्मभिर्वा वाजानन्नानि विदयसे। स्तोतृभ्यः प्रयच्छसि ॥

॥ अथ पंचमी ॥

ते त्वा मदा इंद्र मादयंतु शुष्मिणं तुविराधसं जरित्रे।

एको देवत्रा दयसे हि मर्तानस्मिञ्छूर सवने मादयस्व ॥ ५

ते। त्वा। मदाः। इंद्र। मादयंतु। शुष्मिणं। तुविऽराधसं। जरित्रे।

एकः। देवऽत्रा। दयसे। हि। मर्तान्। अस्मिन्। शूर। सवने। मादयस्व ॥ ५

हे इंद्र त्वा त्वां त एते मदा मदकराः सोमा मादयंतु। अपि च जरित्रे स्तोत्रे शुष्मिणं बलवंतं तुविराधसं बहुधनं पुत्रं प्रयच्छतीति शेषः। हे शूर त्वं देवत्रा देवेष्वेक एव मर्तान्मनुष्यान् दयसे हि। दयतिरनुकंपार्थः। अस्मिन् सवने यज्ञे मादयस्व ॥

॥ अथ षष्ठी ॥

एवेदिंद्रं वृषणं वज्रबाहुं वसिष्ठासो अभ्यर्चंत्यर्कैः।

स नः स्तुतो वीरवद्धातु गोमद्यूयं पात स्वस्तिभिः सदा नः ॥ ६

एव। इत्। इंद्रं। वृषणं। वज्रऽबाहुं। वसिष्ठासः। अभि। अर्चंति। अर्कैः।

सः। नः। स्तुतः। वीरऽवत्। धातु। गोऽमत्। यूयं। पात। स्वस्तिऽभिः। सदा। नः ॥ ६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वसिष्ठासो वसिष्ठा यज्ञवाहं यज्ञकल्पनाहं वृषभं कामानां वर्षितारमिंद्रमं-
बेदुक्तेन प्रकारेण वाकैरर्चनीयैः स्तोत्रैरभ्यर्चति । अभिपूजयंति । स्तुतः स इंद्रो
नोऽस्मभ्यं वीरवत्पुत्रादियुक्तं गोमद्गोयुक्तं च धनं धातु । ददातु । स्पष्टमन्यत् ॥

॥ इति पंचमस्य तृतीये सप्तमो वर्गः ॥

योनिष्ट इंद्र सदने अकारीति षडृचं सप्तमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैंद्रं ।
अनुक्रम्यते च । योनिरिति ॥ महाव्रते निष्केवल्य एतत्सूक्तं । सूत्रितं च । योनिष्ट
इंद्र सदने अकारीत्येतस्य चतस्रः मध्योत्तमाद्युपसंतन्योपोत्तमया परिदधाति ॥
ऐ० आ० ५. १२. । इति ॥

॥ तत्र प्रथमा ॥

योनिष्ट इंद्र सदने अकारि तमा नृभिः पुरुहूत प्र याहि ।

असो यथा नोऽविता वृधे च ददो वसूनि ममदश्च सोमैः ॥ १

योनिः । ते । इंद्र । सदने । अकारि । तं । आ । नृऽभिः ।

पुरुऽहूत । प्र । याहि ।

असः । यथा । नः । अविता । वृधे । च । ददः । वसूनि ।

ममदः । च । सोमैः ॥ १

हे इंद्र ते तव सदने सदनार्थं योनिः स्थानमकारि । हे पुरुहूत नृभिर्नेतृभिः
सार्धं तं योनिमाप्रयाहि । नोऽस्माकं यथाविता रक्षितासः भवसि । नोऽस्माकं
वृधे वर्धनाय चासः । तथा च वसूनि ददः । अस्मभ्यं देहि । सोमैरस्मदीयैर्मदः ।
मादयस्व च ॥

॥ अथ द्वितीया ॥

गृभीतं ते मन इंद्र द्विबर्हाः सुतः सोमः परिषिक्ता मधूनि ।

विसृष्टधेना भरते सुवृक्तिरियमिंद्रं जोहुवती मनीषा ॥ २

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

गृभीतं। ते। मनः। इंद्र। द्विऽबर्हाः। सुतः। सोमः।

परिऽसिक्ता। मधूनि।

विसृष्टऽधेना। भरते। सुऽवृक्तिः। इयं। इंद्रं। जोहुवती।

मनीषा॥ २

हे इंद्र द्विबर्हाः। मत्वर्थे प्रथमा। द्विबर्हसो द्वयोः स्थानयोः परिवृढस्य ते तव मनो गृभीतमस्माभिः परिगृहीतं। सोमश्च सुतोऽभिषुतः। मधूनि च परिषिक्ता पात्रेषु परिषिक्तानि। विसृष्टधेना विसृष्टजिह्वा मध्यमस्वरेणोच्चार्यमाणा सुवृक्तिः सुवृक्ताभिरियं मनीषा स्तुतिरिंद्रं जोहुवती भृशमाह्वयंती भरते। संभ्रियते च॥

॥ अथ तृतीया॥

आ नो दिव आ पृथिव्या ऋजीषिन्निदं बर्हिः सोमपेयाय

याहि।

वहंतु त्वा हरयो मद्र्यंचमांगूषमच्छा तवसं मदाय॥ ३

आ। नः। दिवः। आ। पृथिव्याः। ऋजीषिन्। इदं।

बर्हिः। सोमऽपेयाय याहि।

वहंतु। त्वा। हरयः। मद्र्यंचं। आंगूषं। अच्छ। तवसं।

मदाय॥ ३

हे ऋजीषिन्निंद्र नोऽस्माकमिदं बर्हिरिमं यज्ञं सोमपेयाय दिवः स्वर्गादायाहि। आगच्छ। पृथिव्या अंतरिक्षाच्च। आपः पृथिवीत्यंतरिक्षनामसु पाठात्। आयाहि। अपि च तवसं प्रवृद्धं यजमानं मा मद्र्यंचं मदभिमुखं त्वा त्वामांगूषं स्तोत्रमच्छाभि मदाय, मदार्थं हरयोऽश्वा वहंतु॥

॥ अथ चतुर्थी॥

आ नो विश्वाभिरूतिभिः सजोषा ब्रह्म जुषाणो हर्यश्व याहि।

वरीवृजत्स्थविरेभिः सुशिप्रास्मे दधद्वृषणं शुष्ममिंद्र॥ ४

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आ। नः। विश्वाभिः। ऊतिऽभिः। सऽजोषाः। ब्रह्म।

जुषाणः। हरिऽअश्व। याहि।

वरीवृजत्। स्थविरेभिः। सुऽशिप्र। अस्मे इति। दधत्।

वृषणं। शुष्मं। इंद्र॥ ४

हे हर्यश्व हरिनामकाश्व सुशिप्र शोभनहनो इंद्र विश्वाभिः सर्वाभिरूतिभी रक्षाभिः सजोषाः संगतः स्थविरेभिर्वृद्धैर्मरुद्भिः सह वरीवृजत् वर्जयन् शत्रून् हिंसन् अस्मे अस्मभ्यं वृषणं कामानां वर्षितारं शुष्मं बलवंतं पुत्रं दधत् प्रयच्छन् ब्रह्म स्तोत्रं जुषाणः सेवमानो नोऽस्मानायाहि॥

॥ अथ पंचमी॥

एष स्तोमो मह उग्राय वाहे धुरीइवात्यो न वाजयन्नधायि।

इंद्र त्वायमर्क ईट्टे वसूनां दिवीव द्यामधि नः श्रोमतं धाः॥ ५

एषः। स्तोमः। महे। उग्राय। वाहे। धुरिऽइव। अत्यः।

न। वाजयन्। अधायि।

इंद्र। त्वा। अयं। अर्कः। ईट्टे। वसूनां। दिविऽइव।

द्यां। अधि। नः। श्रोमतं। धाः॥ ५

महे महत उग्रायोद्गूर्णायौजस्विने वा वाहे विश्वस्य वोढ्र इंद्राय धुरीव रथस्यात्यो न अश्व इव वाजयन् बलं कुर्वन् एष स्तोमोऽधायि। व्यधायि। अथ प्रत्यक्षस्तुतिः। हे इंद्र यं त्वामयमर्कः स्तोता वसूनां वसूनि धनानीट्टे याचते स त्वं नोऽस्मासु द्यां दिवीव श्रोमतं श्रवणीयमन्नं पुत्रं वाधिधाः। अधिधेहि॥

॥ अथ षष्ठी॥

एवा न इंद्र वार्यस्य पूर्धि प्र ते महीं सुमतिं वेविदाम।

इंद्रं पिन्व मघवद्भ्यः सुवीरां यूयं पात स्वस्तिभिः सदा नः॥ ६

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

एष। नः। इंद्र। वार्यस्य। पूर्धि। प्र। ते। महीम्।

सुऽमतिम्। वेविदाम।

इषम्। पिन्व। मघवत्ऽभ्यः। सुऽवीराम्। यूयम्। पात।

स्वस्तिऽभिः। सदा। नः॥ ८

हे इंद्र नोऽस्मानेवं स्तवाय॥ स्तोत्रार्थं महो॥ वरणीयेन धनेन पूर्धि। पूरय। ते तव महीं महतीं सुमतिमनुग्रहबुद्धिं वेविदाम। लभेमहि। मघवद्भ्यो हविष्मद्भ्योऽस्मभ्यं सुवीरं शोभनपुत्रादियुक्तामिषमन्नं पिन्व। प्रयच्छेत्यर्थः। स्पष्टमन्यत्॥

॥ इति पंचमस्य तृतीयेऽष्टमो वर्गः॥

आ ते मह इंद्रेति पंचर्चमष्टमं सूक्तं मानस्यार्षं त्रैष्टुभमैंद्रं। आ त इत्यनुक्रांतं॥ महाव्रते निष्केवल्य इदमादीनि पंच सूक्तानि। सूत्रितं च। आ ते मह इंद्रोत्युग्रेति पंच सूक्तानि। ऐ० आ० ५, ८। इति॥

॥ तत्र प्रथमा॥

आ ते मह इंद्रोत्युग्र समन्यवो यत्समरंत सेनाः।

पताति दिद्युन्नर्यस्य बाह्वोर्मा ते मनो विष्वद्र्यग्वि चारीत्॥ १

आ। ते। महः। इंद्र। ऊती। उग्र। सऽमन्यवः। यत्।

सम्ऽअरंत। सेनाः।

पताति। दिद्युत्। नर्यस्य। बाह्वोः। मा। ते। मनः।

विष्वद्र्यक्। वि। चारीत्॥ १

हे उग्रोद्गूर्णबलेंद्र यद्यदा समन्यवः समानो मन्युरभिमानो यासां ताः समन्यवः। सेनाः समरंत युध्यंते संगच्छंते वा तदा नर्यस्य नरहितस्य महो महतस्ते तव बाह्वोः स्थिता दिद्युदायुधं॥ दिद्युदिति वज्रनामसु पाठात्॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अतो अस्या अस्मदूरक्षाया आपतति । आपततु । तथ विष्वद्र्यक् विश्वगंत मनश्च पर पिचारीत् । अस्मास्वेव स्थिरं भवतु ॥

॥ अथ द्वितीया ॥

नि दुर्ग इंद्र श्नथिह्यमित्राँ अभि ये नो मर्तासो अमंति ।
आरे तं शंसं कृणुहि निनित्सोरा नो भर संभरणं वसूनां ॥ २

नि । दुःऽगे । इंद्र । श्नथिहि । अमित्रान् । अभि । ये । नः ।
मर्तासः । अमंति ।
आरे । तं । शंसं । कृणुहि । निनित्सोः । आ । नः । भर ।
संऽभरणं । वसूनां ॥ २

हे इंद्र दुर्गे युद्धे ये मर्तासो मर्ता अभ्यभिमुखाः संतो नोऽस्मानमंति अभिभवंति तानमित्रान् शत्रून् निश्नथिहि । निजहि । अपि च निनित्सोरस्मान्निंदितुमिच्छतो नरस्य तं शंसमाशंसनमारे दूरे कृणुहि । कुरु । अपि च नोऽस्मभ्यं वसूनां धनानां संभरणं समूहमाभर । आहर ॥

॥ अथ तृतीया ॥

शतं ते शिप्रिन्नूतयः सुदासे सहस्रं शंसा उत रातिरस्तु ।
जहि वधर्वनुषो मर्त्यस्यास्मे द्युम्नमधि रत्नं च धेहि ॥ ३

शतं । ते । शिप्रिन् । ऊतयः । सुऽदासे । सहस्रं । शंसाः ।
उत । रातिः । अस्तु ।
जहि । वधः । वनुषः । मर्त्यस्य । अस्मे इति । द्युम्नं । अधि ।
रत्नं । च । धेहि ॥ ३

हे शिप्रिन् शोभनहनुमन्निंद्र ते त्वदीयाः शतं बहव ऊतयो रक्षाः सुदासे शोभनदानाय मह्यं संतु । सहस्रं शंसाः शंसनीयाः कामाश्च संतु । उतापि च रातिर्धन-

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

मस्तु। वतुषो हिंसकस्य मर्त्यस्य वधो हिंसासाधनमायुधं च जहि। अपि चास्मे अस्मभ्यं द्युम्नं द्योतमानं यशो वा रत्नं च धेहि। तथा च यास्कः। द्युम्नं द्योततेर्यशो वान्नं वा। अस्मे द्युम्नमधि रत्नं च धेहि। अस्मासु द्युम्नं च रत्नं च धेहि। नि० ५. ५.। इति ॥

॥ अथ चतुर्थी ॥

त्वावतो हींद्र क्रत्वे अस्मि त्वावतोऽवितुः शूर रातौ ।
विश्वेदहानि तविषीव उग्रँ ओकः कृणुष्व हरिवो न मर्धीः ॥४

त्वाऽवतः । हि । इंद्र । क्रत्वे । अस्मि । त्वाऽवतः । अवितुः ।
शूर । रातौ ।
विश्वा । इत् । अहानि । तविषीऽवः । उग्र । ओकः ।
कृणुष्व । हरिऽवः । न । मर्धीः ॥ ४

हे इंद्र त्वावतस्त्वत्सदृशस्य क्रत्वे कर्मणेऽस्मि। भवामि हि। हे शूर अवितुर्विश्वस्य रक्षितुस्त्वावतस्त्वत्सदृशस्य रातौ दाने चास्मीति शेषः। हे तविषीवो बलवन् उग्रो-द्गूर्णबलेंद्र विश्वेत् विश्वान्येवाहान्योकोऽस्माकं स्थानं कृणुष्व। कुरु। हे हरिवो हरिवन् न मर्धीः। अस्मान् हिंसीः ॥

॥ अथ पंचमी ॥

कुत्सा एते हर्यश्वाय शूषमिंद्रे सहो देवजूतमियानाः ।
सत्रा कृधि सुहना शूर वृत्रा वयं तरुत्राः सनुयाम वाजं ॥ ५

कुत्साः । एते । हरिऽअश्वाय । शूषं । इंद्रे । सहः ।
देवऽजूतं । इयानाः ।
सत्रा । कृधि । सुऽहना । शूर । वृत्रा । वयं । तरुत्राः ।
सनुयाम । वाजं ॥ ५

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एते वयं वसिष्ठा हर्यश्वाय हरिनामकाश्वायेंद्राय शूषं सुखकरं स्तोत्रं कृण्वाः कुर्वाणाः ॥ करोतेः कृत्सयन्ट् निष्पत्तिः ॥ इंद्रे देवजूतं देवैः प्रेरितं सद्यो यशसियाना याचमानास्त्वत्ता दुर्गाणि तीर्णाः संतो वाजं यशं सनुयाम। लभेमहि। अपि च हे शूर इत्था इत्थानि यन्तॄ हडना त्वं सुखकानि सत्वा यदा इधि। कृद ॥

॥ अथो षष्ठी ॥

एवा नं इंद्र वार्यस्य पूर्धि प्र ते महीं सुमतिं वेविदाम।
इषं पिन्व मघवंद्भ्यः सुवीरां यूयं पात स्वस्तिभिः सदा नः ॥ ६

एव। नः। इंद्र। वार्यस्य। पूर्धि। प्र। ते। महीं।
सुऽमतिं। वेविदाम।
इषं। पिन्व। मघवंत्ऽभ्यः। सुऽवीरां। यूयं। पात।
स्वस्तिऽभिः। सदा। नः ॥ ६

इयं व्याख्यातचरा ॥

॥ इति पंचमस्य तृतीये नवमो वर्गः ॥

न सोम इंद्रमिति पंचर्चं नवमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैंद्रं। तथा चानुक्रम्यते। न सोमः पंचेति ॥ महाव्रत उक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

न सोम इंद्रमसुतो ममाद नाब्रह्माणो मघवानं सुतासः।
तस्मा उक्थं जनये यज्जुजोषन्नृवन्नवीयः शृणवद्यथा नः ॥ १

न। सोमः। इंद्रं। असुतः। ममाद। न। अब्रह्माणः।
मघऽवानं। सुतासः।
तस्मै। उक्थं। जनये। यत्। जुजोषत्। नृऽवत्। नवीयः।
शृणवत्। यथा। नः ॥ १

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

मघवानं धनवंतमिंद्रमसुतो नाभिषुतः सोमो न ममाद। न तर्पयति। सुतासोऽभिषुता अपि सोमा अब्रह्माणः स्तोत्ररहिता न ममदुः। ममादेरेतदाख्यातं बहुवचनांततया विपरिणतं सदत्र संपद्यते। अत एव त्रिष्वपि सवनेषु पावमानैः स्तोत्रैः स्तुता एव सोमा हूयंते। अपि च तोऽस्मदीयं यदुक्थमिंद्रो जुजोषत् सेवेत। यथा च नृवत् राजेवादरेण शृणवत् शृणुयात् तथा नवीयो नवतरमुक्थं यस्तं तस्मा इंद्राय जनये। पठामीत्यर्थः॥

॥ अथ द्वितीया॥

उक्थउंक्थे सोम इंद्रं ममाद नीथेनीथे मघवानं सुतासः।

यदीं सबाधः पितरं न पुत्राः समानदक्षा अवसे हवंते॥ २

उक्थेऽउंक्थे। सोमः। इंद्रं। ममाद। नीथेऽनीथे।
मघऽवानं। सुतासः।

यत्। ईं। सऽबाधः। पितरं। न। पुत्राः। समानऽदक्षाः।
अवसे। हवंते॥ २

यद्यस्मादुक्थउक्थे यज्ञे यज्ञे क्रियमाणे सोमो मघवानमिंद्रं ममाद मादयति। नीथे नीथे स्तोत्रे स्तोत्रे क्रियमाणे सुतासोऽभिषुताः सोमा मादयंति तस्मादीमेनमिंद्रं सबाधः परस्परं मिलिताः समानदक्षाः समानोत्साहा ऋत्विजः पुत्राः पितरं न पितरमिवावसे तर्पणाय रक्षणाय वा हवंते। यज्ञैः स्तोत्रैश्च स्तुवंति॥

॥ अथ तृतीया॥

चकार ता कृणवंन्नूनमन्या यानि ब्रुवंति वेधसः सुतेषु।

जनीरिव पतिरेकः समानो नि मामृजे पुर इंद्रः सु सर्वाः॥ ३

चकार। ता। कृणवत्। नूनं। अन्या। यानि। ब्रुवंति।
वेधसः। सुतेषु।

जनीःऽइव। पतिः। एकः। समानः। नि। ममृजे।
पुरः। इंद्रः। सु। सर्वाः॥ ३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वेधसः स्तोतॄणां विधातारः सुतेषु सोमेष्वभिषुतेषु यानि कर्माणि ब्रुवंति तानि वृत्रवधादीनि कर्माणींद्र पूर्वस्मिन्काले चकार। नूनं संप्रत्यप्यन्यान्यपि कर्माणि करवत्। कुर्यात्। अपि च स इंद्रः सर्वाः पुरः शत्रुनगरीः समानः समहस्तिरेकोऽसहायः पतिर्जनीरिव जाया इव सु निमाष्टे। सम्यक् शोधयेत्॥

॥ अथ चतुर्थी॥

एवा तमाहुरुत शृण्व इंद्र एको विभक्ता तरणिर्मघानां।

मिथस्तुर ऊतयो यस्य पूर्वीरस्मे भद्राणि सश्चत प्रियाणि॥ ४

एव। तं। आहुः। उत। शृण्वे। इंद्रः। एकः। विऽभक्ता।

तरणिः। मघानां।

मिथःऽतुरः। ऊतयः। यस्य। पूर्वीः। अस्मे इति। भद्राणि।

सश्चत। प्रियाणि॥ ४

यस्येंद्रस्य मिथः परस्परं तुरो बाधमानाः हिंसन्तो वा पूर्वीः पूर्व्यो बह्व्य ऊतयो रक्षाः संति। तमेवैनमुक्तगुणमाहुः पूर्वं ऋषयः। उतापि चाद्यापि स इंद्रो मघानां मंहनीयानां धनानां विभक्ता दातेति तरणिरापदस्तारयितेति शृण्वे। श्रूयते। तस्य च प्रसादादस्मे अस्मान् प्रियाणि भद्राणि कल्याणानि सश्चत। सेवंतां॥

॥ अथ पंचमी॥

एवा वसिष्ठ इंद्रमूतये नॄन्कृष्टीनां वृषभं सुते गृणाति।

सहस्रिण उप नो माहि वाजान्यूयं पात स्वस्तिभिः सदा नः॥ ५

एव। वसिष्ठः। इंद्रं। ऊतये। नॄन्। कृष्टीनां। वृषभं।

सुते। गृणाति।

सहस्रिणः। उप। नः। माहि। वाजान्। यूयं। पात।

स्वस्तिऽभिः। सदा। नः॥ ५

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

वसिष्ठो नूनं स्तौति ॥ पश्चाद्ध्वे द्वितीया ॥ ऊतये रक्षायै कृष्टीनां प्रजानां वृषणं कामानां वर्षितारमिंद्रमेवमेवं पूर्वोक्तप्रकारेण स्तौति । स्तौति । अथ प्रत्यक्षस्तुतिः । हे इंद्र नोऽस्मभ्यं सहस्रिणः सहस्रसंख्याकान्वाजानन्नान्युपमाहि । प्रयच्छेत्यर्थः । स्पष्टमन्यत् ॥

॥ इति पंचमस्य तृतीये दशमो वर्गः ॥

इंद्रं नर इति पंचर्चं दशमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैंद्रं । इंद्रं नर इत्यनुक्रांतं ॥ अत्राग्रते निष्केवल्य एतत्सूक्तमुक्तं तृतीयस्येन ॥ इंद्रे पशौ वपापुरोडाशहविषामाद्यास्तिस्रः क्रमेणानुवाक्याः । सूत्रितं च । इंद्रं नरो नेमधिता हवंत इत्युक्तो लोकमनु नेषि विद्वान् । आ० ३. ७. । इति ॥

॥ तत्र प्रथमा ॥

इंद्रं नरो नेमधिता हवंते यत्पार्या युनजंते धियस्ताः ।
शूरो नृषाता शवसश्चकान आ गोमति व्रजे भजा त्वं नः ॥ १

इंद्रं । नरः । नेमऽधिता । हवंते । यत् । पार्याः । युनजंते ।
धियः । ताः ।
शूरः । नृऽसाता । शवसः । चकानः । आ । गोऽमति ।
व्रजे । भज । त्वं । नः ॥ १

यद्यदा पार्या युद्धमरणनिमित्तास्ताः प्रसिद्धा धियः कर्माणि युनजते प्रयुज्यंते तदा नरो नेतारो यमिंद्रं नेमधिता नेमधितौ संग्रामे हवंते ह्वयंति स त्वं शूरो नृषाता नृणां संभक्ता च शवसो बलस्य बलं चकानः कामयमानश्च सन् गोमति व्रजे गोष्ठे गोसमूहे नोऽस्मानाभज । प्रापय ॥

॥ अथ द्वितीया ॥

य इंद्र शुष्मो मघवन्ते अस्ति शिक्षा सखिभ्यः पुरुहूत नृभ्यः ।
त्वं हि दृळ्हा मघवन्विचेता अपा वृधि परिवृतं न राधः ॥ २

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

यः। इंद्र। शुष्मः। मघऽवन्। ते। अस्ति। शिक्ष।

सखिऽभ्यः। पुरुऽहूत। नृऽभ्यः।

त्वं। हि। दृळ्हा। मघऽवन्। विऽचेताः। अप। वृधि।

परिऽवृतं। न। राधः॥ २

हे पुरुहूत बहुभिराहूतेंद्र ते तव यः शुष्मो बलमस्ति तं शुष्मं सखिभ्यः स्तोतृभ्यो नृभ्यः शिक्ष। देहि। अपि च हे मघवन् हि यस्माद्दृळ्हा दृढानि पुरां द्वाराणि विभेदिथेति शेषः। तस्मात्त्वं विचेता विविक्तप्रज्ञः सन् परिवृतं तिरोहितं राधो धनमपवृधि। अपावृणु। नेति संप्रत्यर्थे॥

॥ अथ तृतीया॥

इंद्रो राजा जगतश्चर्षणीनामधि क्षमि विषुरूपं यदस्ति।

ततो ददाति दाशुषे वसूनि चोदद्राध उपस्तुतश्चिदर्वाक्॥ ३

इंद्रः। राजा। जगतः। चर्षणीनां। अधि। क्षमि।

विषुऽरूपं। यत्। अस्ति।

ततः। ददाति। दाशुषे। वसूनि। चोदत्। राधः।

उपऽस्तुतः। चित्। अर्वाक्॥ ३

स इंद्रो जगतो जंगमस्य पश्वादेर्यस्तो राजेश्वरो भवति। चर्षणीनां मनुष्याणां च राजा भवति। अधि क्षमि क्षमायां विषुरूपं नानारूपं यद्धनमस्ति तस्यापि राजा भवति ततो दाशुषे यजमानाय वसूनि धनानि ददाति। स इंद्रोऽस्माभिरुपस्तुत एव सन् राधो धनमस्मांगमदभिमुखं चोदत्। प्रेरयतु॥

॥ अथ चतुर्थी॥

नू चिन्न इंद्रो मघवा सहूती दानो वाजं नि यमते न ऊती।

अनूना यस्य दक्षिणा पीपाय वामं नृभ्यो अभिवीता सखिभ्यः॥ ४

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नु । चित् । नः । इंद्रः । मघऽवा । सऽहूती । दानः ।
वाजं । नि । यमते । नः । ऊती ।

अनूना । यस्य । दक्षिणा । पीपाय । वामं । नृऽभ्यः ।
अभिऽवीता । सखिऽभ्यः ॥ ४

मघवा धनवान् दानो ददानः स इंद्रो नोऽस्माकं सहूती सहूत्या यष्टृभिः सहाह्वानेन वाजमन्नं नोऽस्मभ्यमूती ऊत्यै रक्षायै नू चित् क्षिप्रमेव नियमते। प्रयच्छतु। यस्येंद्रस्यानूना संपूर्णाभिवीताभिप्राप्ता दक्षिणा दानं सखिभ्यः स्तोतृभ्यो नृभ्यो वामं वननीयं धनं पीपाय दोग्धि ॥

॥ अथ पंचमी ॥

नू इंद्र राये वरिवस्कृधी न आ ते मनो ववृत्याम मघाय ।
गोमदश्वावद्रथवद्व्यंतो यूयं पात स्वस्तिभिः सदा नः ॥ ५

नु । इंद्र । राये । वरिवः । कृधि । नः । आ । ते । मनः ।
ववृत्याम । मघाय ।
गोऽमत् । अश्वऽवत् । रथऽवत् । व्यंतः । यूयं । पात ।
स्वस्तिऽभिः । सदा । नः ॥ ५

हे इंद्र नोऽस्मभ्यं राये धनप्राप्तये नु क्षिप्रं वरिवो धनं। वेदो वरिव इति धननामसु पाठात्। त्वं कृधि। देहि। वयं ते तव मनो मघाय मंहनीयाय स्तुत्या आववृत्याम। आवर्तयाम। स्पष्टमन्यत् ॥

॥ इति पंचमस्य तृतीये एकादशो वर्गः ॥

वृष्णा त इंद्रेति पंचर्चमेकादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैंद्रं। वृष्णा त इत्यनुक्रांतं ॥ महाव्रते निष्केवल्ये पंचदशेनास्य सूक्तस्य विनियोग उक्तः। षष्ठेऽहनि प्रउगशस्त्र आद्यस्तृच ऐंद्रः। आ० ८, ११, ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तत्र प्रथमा ॥

ब्रह्मा ण इंद्रोपं याहि विद्वानर्वांचस्ते हरयो संतु युक्ताः।

विश्वे चिद्धि त्वां विहवंत मर्ता अस्माकमिच्छृणुहि

विश्वमिन्व ॥ १

ब्रह्मं। नः। इंद्र। उपं। याहि। विद्वान्। अर्वांचः। ते।

हरंयः। संतु। युक्ताः।

विश्वे। चित्। हि। त्वा। विऽहवंत। मर्ताः। अस्माकं।

इत्। शृणुहि। विश्वंऽइन्व ॥ १

हे इंद्र त्वं विद्वान् जानन् नोऽस्माकं ब्रह्म स्तोत्रमुपयाहि। ते तव हरयोऽश्वा अर्वांचोऽस्मदभिमुखा युक्ताः संतु। हे विश्वमिन्व विश्वप्रीणयितरिंद्र त्वा त्वां विश्वे सर्वे मर्ता मनुष्याश्चिद्धि यद्यपि विहवंत पृथक् हवंते तथाप्यस्माकमिदस्माकमेव हवं शृणुहि। शृणु ॥

॥ अथ द्वितीया ॥

हवं त इंद्र महिमा व्यानड्ब्रह्म यत्पासि शवसिन्नृषीणां।

आ यद्वज्रं दधिषे हस्त उग्र घोरः सन्क्रत्वा जनिष्ठा

अषाढः ॥ २

हवं। ते। इंद्र। महिमा। वि। आनट्। ब्रह्मं। यत्।

पासि। शवसिन्। ऋषीणां।

आ। यत्। वज्रं। दधिषे। हस्ते। उग्र। घोरः। सन्।

क्रत्वा। जनिष्ठाः। अषाढः ॥ २

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

हे मघवन् मघवन्निंद्र यद्यदा ऋषीणां ब्रह्म स्तोत्रं पासि रक्षसि। स्तोत्रस्य रक्षणं नाम फलप्रदानं। तदा ते तव महिमा इयं। इयः स्तोता। तं व्यानट्। व्याप्नोतु। हे उग्रौजस्विन्निंद्र यद्यदा हस्ते पाणौ वज्रमादधिषे धारयसि तदा क्रत्वा मन्त्रवधादिना कर्मणा घोरः सन् अषाढ्‌ इः शत्रुभिरनभिभूतो जनिष्ठाः। अजनिष्ठाः। अभवः।

॥ अथ तृतीया ॥

तव प्रणीतींद्र जोहुवानान्त्सं यन्नॄन्न रोदसी निनेथं।

महे क्षत्राय शवसे हि जज्ञेऽतूतुजिं चित्तूतुजिरशिश्नत् ॥ ३

तव। प्रऽनीती। इंद्र। जोहुवानान्। सं। यत्। नॄन्।

न। रोदसी इति। निनेथ।

महे। क्षत्राय। शवसे। हि। जज्ञे। अतूतुजिं। चित्।

तूतुजिः। अशिश्नत् ॥ ३

हे इंद्र यद्यस्त्वं तव प्रणीती प्रणीत्या प्रणयनेन जोहुवानान् भृशं स्तुवतो नॄन् रोदसी द्यावापृथिव्यौ न संनिनेथ संगमयसि। दिवि पृथिव्यां च स्तोतॄन् प्रतिष्ठापयसीत्यर्थः। स त्वं महे महते क्षत्राय धनाय॥ रयिः क्षत्रमिति धननामसु पाठात्॥ शवसे बलाय च। यजमानेभ्यो महद्धनं बलं च दातुमित्यर्थः। जज्ञे। जज्ञिषे। हीति हेत्वर्थे। यत एवमतः कारणादतूतुजिमदातारमयजमानं तूतुजिर्दाता यजमानोऽशिश्नत्॥ श्नथतिर्हिंसाकर्मा। तस्माल्लङर्थे लुङ्॥ हिनस्ति। चिदित्येवकारार्थे॥

॥ अथ चतुर्थी ॥

एभिर्न इंद्राहभिर्दशस्य दुर्मित्रासो हि क्षितयः पवंते।

प्रति यच्चष्टे अनृतमनेना अव द्विता वरुणो मायी

नः सात् ॥ ४

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एभिः । नः । इंद्र । अहंऽभिः । दशस्य । दुःऽमित्रासः ।

हि । क्षितयः । पवंते ।

प्रति । यत् । चष्टे । अनृतं । अनेनाः । अव । द्विता ।

वरुणः । मायी । नः । सात् ॥ ४

हे इंद्र दुर्मित्रासो दुष्टमित्रभूता बाधकाः क्षितयो जनाः पवंते । अभिगच्छंति ॥ पवतिर्गतिकर्मा ॥ तेभ्यो जनेभ्यश्छित्त्वा नोऽस्मभ्यमेभिः सात्त्विकैरहभिरहोभिर्दशस्य । देहि । किंचानेना एनसां निहंता मायी प्रज्ञावान् वरुणो यदनृतं नोऽस्माकं प्रतिचष्टे अभिपश्यति तदनृतं हे इंद्र त्वत्प्रसादात् द्विता द्विधावसात् । अवस्यतु । विमोचयतु । तथा च यास्कः । स्यतिरुपसृष्टो विमोचन इति ॥

॥ अथ पंचमी ॥

वोचेमेदिंद्रं मघवानमेनं महो रायो राधसो यद्ददन्नः ।

यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः ॥ ५

वोचेम । इत् । इंद्रं । मघऽवानं । एनं । महः । रायः ।

राधसः । यत् । ददत् । नः ।

यः । अर्चतः । ब्रह्मंऽकृतिं । अविष्ठः । यूयं । पात ।

स्वस्तिऽभिः । सदा । नः ॥ ५

यत् य इंद्रो महो महतो राधसः संराधकस्य रायो धनस्य ॥ द्वितीयार्थे षष्ठी ॥ संराधकं महद्धनं नोऽस्मभ्यं ददत् प्रायच्छत् । यश्चेंद्रोऽर्चतः स्तुवतो ब्रह्मकृतिं क्रियमाणं ब्रह्म स्तोत्रमविष्ठोऽतिशयेन रक्षिता गंता भवति तमेनं मघवानं धनवंतमिंद्रं वोचेमेत् । स्तुवेमैव । स्पष्टमन्यत् ॥

॥ इति पंचमस्य तृतीये द्वादशो वर्गः ॥

अयं सोम इंद्रेति पंचर्चं द्वादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैंद्रं । अयं सोम इत्यनुक्रांतं ॥ व्यूळ्हे दशरात्रे नवमेऽहन्ययं सोम इंद्रेति प्रउगशस्त्र ऐंद्रतृचः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सूचितं च । अयं सोम इंद्र तुभ्यं सुन्व आ तु ब्रह्माणः । आ० ८. ११. । इति ॥ षोडशियक्षे ब्रह्मन्वीर इत्येषा त्रिष्टुप् । सूचितं च । ब्रह्मन्वीर ब्रह्मकृतिं जुषाण इति त्रिष्टुप् । आ० ६. २. । इति ॥

॥ तत्र प्रथमा ॥

अयं सोम इंद्र तुभ्यं सुन्व आ तु प्र याहि हरिवस्तदोकाः ।
पिबा त्वस्य सुषुतस्य चारोर्ददो मघानि मघवन्नियानः ॥ १

अयं । सोमः । इंद्र । तुभ्यं । सुन्वे । आ । तु । प्रयाहि ।
हरिऽवः । तत्ऽओकाः ।
पिब । तु । अस्य । सुऽसुतस्य । चारोः । ददः । मघानि ।
मघऽवन् । इयानः ॥ १

हे इंद्र तुभ्यं त्वदर्थमयमेष सोमः सुन्वे । अभिषुतोऽभवत् । हे हरिवो हरिवन्निंद्र तदोकाः । सवनीयो यस्यासौ तदोकाः । तु क्षिप्रमाप्रयाहि । सुषुतस्य सम्यगभिषुतस्य चारोः शोभनस्यास्य सोमस्य ॥ द्वितीयार्थे षष्ठी ॥ सम्यगभिषुतं शोभनमित्यर्थः । तु क्षिप्रं पिब च । अपि च हे मघवन् इयान उपगम्यमानो याच्यमानो वा त्वं मघानि धनानि ददः । प्रयच्छ देहि ॥

॥ अथ द्वितीया ॥

ब्रह्मन्वीर ब्रह्मकृतिं जुषाणोऽर्वाचीनो हरिभिर्याहि तूयं ।
अस्मिन्नू षु सवने मादयस्वोप ब्रह्माणि शृणव इमा नः ॥ २

ब्रह्मन् । वीर । ब्रह्मऽकृतिं । जुषाणः । अर्वाचीनः ।
हरिऽभिः । याहि । तूयं ।
अस्मिन् । ऊं इति । सु । सवने । मादयस्व । उप ।
ब्रह्माणि । शृणवः । इमा । नः ॥ २

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

हे ब्रह्मन् परिवृढ धीरेंद्र ब्रह्मकृतिं क्रियमाणं स्तोत्रं जुषाणः सेवमानोऽर्वाचीनोऽस्मदभिमुखः सन् हरिभिरश्वैस्तूयं क्षिप्रं याहि । अस्मिन्नु अस्मिन्नेव सवने यज्ञे सु सुष्ठु मादयस्व च । नोऽस्मदीयानीमानि ब्रह्माणि स्तोत्राणि चोपशृणवः । उपशृणु ॥

॥ अथ तृतीया ॥

का ते अस्त्यरंकृतिः सूक्तैः कदा नूनं ते मघवन्दाशेम ।
विश्वा मतीरा ततने त्वायाधा म इंद्र शृणवा हवेमा ॥ ३

का । ते । अस्ति । अरंऽकृतिः । सुऽउक्तैः । कदा । नूनं ।
ते । मघऽवन् । दाशेम ।
विश्वाः । मतीः । आ । ततने । त्वाऽया । अध । मे । इंद्र ।
शृणवः । हवा । इमा ॥ २

हे इंद्र ते तव सूक्तैरस्माभिः क्रियमाणैः स्तोत्रैररंकृतिरलंकृतिः कास्ति । कीदृशी भवति । हे मघवन् ते तव कदा नूनं कदा खलु दाशेम । प्रीतियुक्तं दद्येम । त्वाया त्वत्कामनयैव विश्वा मतीः सर्वाः स्तुतीराततने । करोमि । अधातः कारणात् हे इंद्र मे मदीयानीमानि हवा हवानि स्तोत्राणि शृणवः । शृणु ॥

॥ अथ चतुर्थी ॥

उतो घा ते पुरुष्या इदासन्येषां पूर्वेषामशृणोर्ऋषीणां ।
अधाहं त्वा मघवञ्जोहवीमि त्वं न इंद्रासि प्रमतिः पितेव ॥ ४

उतो इति । घ । ते । पुरुष्याः । इत् । आसन् । येषां ।
पूर्वेषां । अशृणोः । ऋषीणां ।
अध । अहं । त्वा । मघऽवन् । जोहवीमि । त्वं । नः ।
इंद्र । असि । प्रऽमतिः । पिताऽइव ॥ ४

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तुगापि च । चेति पूरणः । हे मघवन् . येषां पूर्वेषामस्मदीयानां स्तुतीरशृणोः ते पूर्वे ऋषयः पुरुध्या इत् पुरुभ्यो हिता एवासन् । अथातोऽहं त्वा त्वां जोहवीमि । भृशं स्तौमि । अपि च हे इंद्र त्वं नोऽस्माकं पितेव जनक इव प्रमतिर्बुद्धिः ॥

॥ अथ पंचमी ॥

वोचेमेदिंद्रं मघवानमेनं महो रायो राधसो यद्ददन्नः ।

यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः ॥ ५

वोचेम । इत् । इंद्रं । मघऽवानं । एनं । महः । रायः ।

राधसः । यत् । ददत् । नः ।

यः । अर्चतः । ब्रह्मऽकृतिं । अविष्ठः । यूयं । पात ।

स्वस्तिऽभिः । सदा । नः ॥ ५

इयं व्याख्याततरा ॥

॥ इति पंचमस्य तृतीये त्रयोदशो वर्गः ॥

आ नो देवेति पंचर्चं त्रयोदशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैंद्रं आ नो देवेत्यनुक्रांतं ॥ प्रथमे छंदोमे प्रउगशस्त्र आ न इत्ययमैंद्रस्तृचः । सूत्र्यते हि । आ नो देव शवसा याहि शुष्मिन् प्र वो यज्ञेषु देवयंतो अर्चन् । आ० ८. ९. । इति ॥

॥ तत्र प्रथमा ॥

आ नो देव शवसा याहि शुष्मिन्भवा वृध इंद्र रायो अस्य ।

महे नृम्णाय नृपते सुवज्र महि क्षत्राय पौंस्याय शूर ॥ १

आ । नः । देव । शवसा । याहि । शुष्मिन् । भव । वृधः ।

इंद्र । रायः । अस्य ।

महे । नृम्णाय । नृऽपते । सुऽवज्र । महि । क्षत्राय ।

पौंस्याय । शूर ॥ १

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे देव द्योतमान शुष्मिन् बलवन्निंद्र नोऽस्मान् अवसा बलेन सार्धमायाहि। अस्माभ्यं देयस्य रायो धनस्य वृधो वर्धयिता च भव। हे नृपते सुवज्र महे महते नृम्णाय बलाय च भव॥ नाम्नो नृम्णमिति बलनामसु पाठात्॥ हे शूर महे महते वधाय शत्रूणां हिंसकाय। वदिर्हिंसाकर्मा। पौंस्याय वीर्याय च भव॥

॥ अथ द्वितीया॥

हवंत उ त्वा हव्यं विवाचि तनूषु शूराः सूर्यस्य सातौ।
त्वं विश्वेषु सेन्यो जनेषु त्वं वृत्राणि रंधया सुहंतु॥ २

हवंते। ऊं इति। त्वा। हव्यं। विऽवाचि। तनूषु। शूराः।
सूर्यस्य। सातौ।
त्वं। विश्वेषु। सेन्यः। जनेषु। त्वं। वृत्राणि। रंधय। सुऽहंतु॥ २

हे इंद्र हव्यं ह्वातव्यं त्वा त्वां विवाचि विविधा वाचो यस्मिन् प्रादुर्भवंति तस्मिन्युद्धे शूराः पुरुषास्तनूष्वंगेषु रक्षणीयासु सूर्यस्य सातौ संभजने। सरति गच्छतीत्यायुरत्र सूर्यो विवक्षितः। तस्य चिरकालं प्राप्त्यर्थं हवंते। ह्वयंति विश्वेषु सर्वेषु जनेषु त्वमेव सेन्यः सेनार्होऽसि। अपि च त्वं वृत्राणि शत्रून् सुहंतु सुहंतुनाम्ना वज्रेण रंधय। अस्मभ्यं वशीकुरु॥

॥ अथ तृतीया॥

अहा यदिंद्र सुदिना व्युच्छान्दधो यत्केतुमुपमं समत्सु।
न्यग्निः सीददसुरो न होता हुवानो अत्र सुभगाय देवान्॥ ३

अहा। यत्। इंद्र। सुऽदिना। विऽउच्छान्। दधः। यत्।
केतुं। उपऽमं। समत्ऽसु।
नि। अग्निः। सीदत्। असुरः। न। होता। हुवानः।
अत्र। सुऽभगाय। देवान्॥ ३

हे इंद्र यद्यदाहानि सुदिना सुदिनानि व्युच्छान् व्युच्छेयुः। यद्यदा च समत्सु संग्रामेषु केतुं प्रज्ञानमुपमं अंतिकं दधः धारयेः तदासुरो बलवान् होता देवानामाह्वा-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तामिः शुभगायाश्चाकं शोभनगायाश्चाकं शोभनवनप्राप्तये देवान् ह्वयानो.ह्वयन् अत्र.अिस्मन्ने निषीदत्। न्यषीदत् ॥

॥ अथ चतुर्थी ॥

वयं ते त इंद्र ये च देव स्तवंत शूर ददंतो मघानि ।
यच्छा सूरिभ्य उपमं वरूथं स्वाभुवो जरणामश्नवंत ॥ ४

वयं । ते । ते । इंद्र । ये । च । देव । स्तवंते । शूर । ददंतः
मघानि ।
यच्छ । सूरिऽभ्यः । उपऽमं । वरूथं । सुऽआभुवः । जरणां ।
अश्नवंत ॥

हे देव शूरेंद्र ते तव वयं वशिनः स्वभूताः । ये जना मदीयपुत्रपौत्रादयो मघानि धनानि हवींषि ददतः प्रयच्छंतः स्तवंत स्तुवंत ते ऽपि तव स्वभूताः । तेभ्य उभयेभ्यः सूरिभ्यः स्तोतृभ्य उपमं श्रेष्ठं वरूथं गृहं यच्छ । प्रयच्छ । अपि च त उभे स्वाभुवः सुखहराः संतो जरणां जरामश्नवंत । प्राप्नुवंतु ॥

॥ अथ पंचमी ॥

वोचेमेदिंद्रं मघवानमेनं महो रायो राधसो यद्ददन्नः ।
यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः ॥ ५

वोचेम । इत् । इंद्रं । मघऽवानं । एनं । महः । रायः ।
राधसः । यत् । ददत् । नः ।
यः । अर्चतः । ब्रह्मऽकृतिं । अविष्ठः । यूयं । पात ।
स्वस्तिऽभिः । सदा । नः ॥ ५

गता । विवृता ॥

॥ इति पंचमस्य तृतीये चतुर्दशो वर्गः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्र व इंद्रायेति द्वादशर्चं नवमं सूक्तं वसिष्ठस्यार्षमैंद्रं। दशम्याद्यास्तिस्रो विराजः शिष्टा गायत्र्यः। तथा चानुक्रांतं। प्र वो द्वादश गायत्रं त्रिविराडंतमिति॥ सूक्तविनियोगो लैंगिकः॥ प्रथमे रात्रिपर्याये मैत्रावरुणशस्त्रे प्र व इंद्रायेत्याद्यस्तृचः स्तोत्रियः। सूत्रितं च। प्र व इंद्राय मादनं प्र कृतान्यृजीषिणः। आ० ६. ४.। इति॥ अतिरात्रे प्रथमे पर्याये ब्राह्मणाच्छंसिशस्त्रे वयमिंद्र त्वायवोऽभीत्यनुरूपः। तथा च सूत्रितं। वयमिंद्र त्वायवोऽभि' पार्वंत्यायेत्युत्तमाद्दरेव। आ० ६. ४.। इति॥ चतुर्थेऽहनि माध्यंदिनसवने होत्रकशस्त्रे आरंभणीयाभ्य ऊर्ध्वं वैराज एकाहश्च आवपनीयः। तदर्थाः प्र वो महे महिवृधे भरध्वमित्याद्यास्तिस्रः। सूत्रितं च। प्र वो महे महिवृधे भरध्वमिति चतस्रस्तिस्रश्च विराजः। आ० ७. ११.। इति॥

॥ तत्र प्रथमा॥

प्र व इंद्राय मादनं हर्यश्वाय गायत।
सखायः सोमपाव्ने॥ १

प्र। वः। इंद्राय। मादनं। हरिऽअश्वाय। गायत।
सखायः। सोमऽपाव्ने॥ १

हे सखायो ये यूयं हर्यश्वाय सोमपाव्ने सोमानां पात्र इंद्राय मादनं मदकरं स्तोत्रं प्रगायत॥

॥ अथ द्वितीया॥

शंसेदुक्थं सुदानव उत द्युक्षं यथा नरः।
चकृमा सत्यराधसे॥ २

शंस। इत्। उक्थं। सुऽदानवे। उत। द्युक्षं। यथा। नरः।
चकृम। सत्यऽराधसे। २

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

उतापि च हे स्तोतः सुदानवे शोभनदानाय सत्यराधसे सत्यधनायेंद्रायोक्थं स्तोत्रं यथा नरोऽन्ये स्तोतारो द्युम्नं दीप्तेः साधनभूतं स्तोत्रं शंसंति तद्वत्त्वमपि शंस । उच्चारय । इदिति पूरणः । वयं च यजाम । स्तोत्रं करवाम ॥

॥ अथ तृतीया ॥

त्वं नं इंद्र वाजयुस्त्वं गव्युः शतक्रतो ।

त्वं हिरण्ययुर्वसो ॥ ३

त्वं । नः । इंद्र । वाजऽयुः । त्वं । गव्युः ।

शतक्रतो इति शतऽक्रतो ।

त्वं । हिरण्यऽयुः । वसो इति ॥ ३

हे इंद्र त्वं नोऽस्माकं वाजयुरन्नकामो भव । हे शतक्रतो त्वं नोऽस्माकं गव्युर्गोकामो भव । हे वसो वासयितरिंद्र त्वं हिरण्ययुर्हिरण्यकामोऽपि भव ॥ छंदसि परेच्छायामपि दृश्यते क्यजिति क्यच् ॥

॥ अथ चतुर्थी ॥

वयमिंद्र त्वायवोऽभि प्र णोनुमो वृषन् ।

विद्धि त्व१स्य नो वसो ॥ ४

वयं । इंद्र । त्वाऽयवः । अभि । प्र । नोनुमः । वृषन् ।

विद्धि । तु । अस्य । नः । वसो इति ।

हे वृषन् कामानां वर्षितरिंद्र त्वायवस्त्वत्कामा वयं त्वामभिप्रणोनुमः । प्रकर्षेण स्तुमः । हे वसो वासयितरिंद्र अस्येदमस्मदीयं स्तोत्रं तु क्षिप्रं विद्धि । अवधारय ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ पंचमी ॥

मा नों निदे च वक्तवेऽर्यो रंधीरराव्णे।

त्वे अपि क्रतुर्मम॥ ५

मा। नः। निदे। च। वक्तवे। अर्यः। रंधीः। अराव्णे।

त्वे। इति। अपि। क्रतुः। मम॥ ५

हे इंद्र अर्यः स्वामी त्वं वक्तवे परुषवाक्यानां वक्त्रे निदे निंदित्रेऽराव्णेऽदात्रे नोऽस्मान् मा रंधीः। वशं मा कार्षीः। अपि च त्वे त्वयि मम क्रतुः मदीयं स्तोत्र-लक्षणं कर्म गच्छत्विति शेषः। अस्मदीयं स्तोत्रं भवच्चित्ते प्रविशत्वित्यर्थः॥

॥ अथ षष्ठी ॥

त्वं वर्मासि सप्रथः पुरोयोधश्च वृत्रहन्।

त्वया प्रति ब्रुवे युजा॥ ६

त्वं। वर्म। असि। सऽप्रथः। पुरःऽयोधः। च। वृत्रऽहन्।

त्वया। ब्रुवे। प्रति। युजा॥ ६

हे वृत्रहन् शत्रूणां हिंसकेंद्र त्वं वर्म कवचमसि। कवचवद्रक्षकोऽसीत्यर्थः। सप्रथः सर्वतः पृथुरसि। पुरोयोधश्च पुरो योद्धा चासि। त्वया युजा त्वया सहायेन प्रतिब्रुवे। शत्रून् प्रतिब्रवीमि। प्रतिवच्मीत्यर्थः॥

॥ इति पंचमस्य तृतीये पंचदशो वर्गः॥

॥ अथ सप्तमी ॥

महाँ उतासि यस्य तेऽनु स्वधावरी सहः।

मम्नाते इंद्र रोदसी॥ ७

महान् । उत । असि । यस्य॑ । ते । अनु॑ ।

स्वधाव॑री इति॑ स्वधाऽव॑री । सह॑ः ।

मम्नाते इति॑ । इ॒न्द्र॒ । रोद॑सी इति॑ ॥ ७

उतापि च हे इंद्र त्वं महानसि । सर्वाधिकोऽसि । हे इंद्र यस्य ते तव सहो बलं स्वधावरी अन्नवत्यौ रोदसी द्यावापृथिव्यावनुमम्नाते अनुमन्येते । त्वदीयं सहः सर्वाधिकमित्यलोकावपि लोकौ विसंवादं न कुरुत इत्यर्थः ॥

॥ अथाष्टमी ॥

तं त्वा मरुत्वंती परि भुवद्वाणी सयावरी ।

नक्षमाणा सह द्युभिः ॥ ८

तं । त्वा । मरुत्व॑ती । परि॑ । भुव॑त् । वाणी॑ । सऽयाव॑री ।

नक्ष॑माणा । सह । द्युऽभिः॑ ॥ ८

हे इंद्र तमुक्तगुणविशिष्टं त्वा त्वां सयावरी त्वया सह गंत्री । सुत्र यत्र त्वं यासि तत्र तत्र यांतीत्यर्थः । द्युभिस्तेजोभिर्नक्षमाणा व्याप्नुवंती मरुत्वती । मरुतः स्तोतारः । तद्वती वाणी स्तुतिः परिभुवत् । परिभवतु । परिभवतिरत्र परिग्रहार्थीयः । परिगृह्णात्वित्यर्थः ॥

॥ अथ नवमी ॥

अपांसस्त्वामिंदवो युवन्दस्मसुप द्यवि ।

सं ते नमंत कृष्टयः ॥ ९

अपांस॑ः । त्वा । अनु॑ । इंद॑वः । भुव॑न् । द॒स्मं । उप॑ । द्यवि॑ ।

सं । ते । नमंत । कृष्टयः ॥ ९

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे इंद्र उप द्यवि सुखोकसलोके स्थितं दक्षं दर्शनीयं त्वा त्वामनूदिश्योदीच्य जघ्नुं इंदवोऽस्मदीयः सोमा सृजन्। अर्चंति। ऋत्विजः प्रजाश्च ते तुभ्यं संनमंति। अपि सोमास्त्वदर्थमेव जायंते प्रजाश्च त्वामेव प्रणमंतीतींद्रस्तुतिः॥

॥ अथ दशमी॥

प्र वो महे महिवृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वं।
विशः पूर्वीः प्र चरा चर्षणिप्राः॥ १०

प्र। वः। महे। महिऽवृधे। भरध्वं। प्रऽचेतसे। प्र।
सुऽमतिं। कृणुध्वं।
विशः। पूर्वीः। प्र। चर। चर्षणिऽप्राः॥ १०

हे मदीयाः पुरुषा यो यूयं महिवृधे महतां धनानां वर्धयित्रे महे महत इंद्राय प्रभरध्वं। सोमान्प्रयच्छत। प्रचेतसे प्रकृष्टमतय इंद्राय सुमतिं सुष्टुतिं च प्रकृणुध्वं। प्रकुरुत। अथ प्रत्यक्षस्तुतिः। हे इंद्र चर्षणिप्राः कामैः प्रजानां पूरयिता त्वं पूर्वीर्बह्वीर्विशः पूरयितृणोर्विशः प्रजाः प्रचर। अभिगच्छ॥

॥ अथैकादशी॥

उरुव्यचसे महिने सुवृक्तिमिंद्राय ब्रह्म जनयंत विप्राः।
तस्य व्रतानि न मिनंति धीराः॥ ११

उरुऽव्यचसे। महिने। सुऽवृक्तिं। इंद्राय। ब्रह्म। जनयंत।
विप्राः।
तस्य। व्रतानि। न। मिनंति। धीराः॥ ११

उरुव्यचसे पृथुव्याप्तये महिने महते यथा इंद्राय सुवृक्तिं स्तुतिं ब्रह्मार्थं हविश्च विप्राः प्राज्ञा जनयंत जनयंति तस्येंद्रस्य व्रतानि रक्षणादीनि कर्माणि धीराः प्राज्ञा देवा अपि न मिनंति। न हिंसंति॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ द्वादशी ॥

इंद्रं वाणीरनुत्तमन्युमेव सत्रा राजानं दधिरे सहध्यै।

हर्यश्वाय बर्हया समापीन्॥ १२

इंद्रं। वाणीः। अनुत्तऽमन्युं। एव। सत्रा। राजानं।

दधिरे। सहध्यै।

हर्यिऽअश्वाय। बर्हय। सं। आपीन्॥ १२

सत्रा राजानं सर्वतो जगत ईश्वरमनुत्तमन्युं। केनाप्यनुत्तोऽप्रतिहतो मन्युः क्रोधो यस्य सः। तमेवेंद्रं वाणीः स्तुतयः सहध्यै स्तोतॄणामपि शत्रूणामभिभवितुं दधिरे। अतो हे स्तोतस्त्वमपि हर्यश्वायेंद्राय बर्हय वर्धयेंद्रं। स्तोतुमित्यर्थः। आपीन् बंधून् संवर्धय। आह्वय॥

॥ इति पंचमस्य तृतीये षोडशो वर्गः ॥

मो षु त्वेति सप्तविंशत्यृचं पंचदशं सूक्तं। अत्रेयमनुक्रमणिका। मो षु सप्ताधिका प्रागाथं तृतीया द्विपदा सौदासैरग्नौ प्रक्षिप्यमाणः शक्तिरंत्यं प्रगाथमालेभे सोऽर्धर्चं उक्तेऽदह्यत। तं पुत्रोक्तं वसिष्ठः समापयतेति शाट्यायनकं वसिष्ठस्यैव हतपुत्रस्यार्षमिति तांड्यकमिति॥ मंडलद्रष्टा वसिष्ठ ऋषिः। इंद्र क्रतुं न इति प्रगाथस्यार्धर्चस्य च वसिष्ठपुत्रः शक्तिर्वसिष्ठो वा। इंद्रो देवता। अयुजो बृहत्यो युजः सतोबृहत्यः। तृतीया तु द्विपदा विराट्॥ षष्ठेऽहनि निष्केवल्ये पार्ष्ठमहश्चापोतायेतस्य सूक्तं। तत्र द्विपदामभि त्वा शूरेत्येतं राथंतरं प्रगाथं नकिः सुदास इति प्रगाथं च वर्जयेत्। तथैव पंचमारण्यके सूत्रितं। मो षु त्वा वाघतश्चनेत्येतस्य द्विपदां चोद्धरति राथंतरं च प्रगाथमथ वाऽस्य नकिः सुदासो रथमित्येतं प्रत्यवदधाति। ऐ० आ० ५, ८.। इति॥ चतुर्विंशेऽहनि पंचदशेऽहनि च निष्केवल्ये मो षु त्वा वाघत इति प्रगाथः सद्विपदः। सूत्रितं च। मो षु त्वा वाघतश्चनेति सद्विपद उपसंतन्य द्विपदां। आ० ७, ३.। इति॥ चातुर्विंशेऽहनि तृतीये प्रउगात्मकात्प्रगाथादनंतरं नकिः सुदास इति प्रगाथं शंसेत्॥ दशरात्रिमध्यमपृष्ठ्यचतुर्थीये षष्ठेऽहनि चार्थं प्रगाथः। तदेव सूत्रितं। नकिः सुदासो रथमिति तृतीया उक्तं नित्यादिति।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एवं स्थितान् प्रगाथान्पृष्ठ्याभिप्लवयोरन्वहं पुनः पुनरावर्तयेयुः। आ० ७. ३.। इति॥ अग्निष्टोमे माध्यंदिनसवनेऽच्छावाकशस्त्र उदिद्ध्वस्य रिच्यत इति प्रगाथः। तथा च सूत्रितं। उदिद्ध्वस्य रिच्यतें ऽंश इत्। आ० ५. १६.। इति॥ अग्निष्टोमे माध्यंदिनसवने मैत्रावरुणशस्त्रे कस्तमिंद्रेति प्रगाथः। सूत्रितं च। कस्तमिंद्र त्वावसुं सद्यो ह जातः। आ० ५. १६.। इति॥ चातुर्विंशिकेऽहनि माध्यंदिनसवने मैत्रावरुणशस्त्रांत्यार्थं प्रगाथः। अहर्गणेष्वपि द्वितीयादिष्वहःसु। सूत्रितं च। कस्तमिंद्र त्वावसुं कन्नव्यो अतसीनां। आ० ७. १२.। इति॥ आरंभणीयाः पर्यासान् कद्वतोऽहरहःशस्त्राणीति चोक्ताः। आ० ७. १.। इति॥ पृष्ठ्यषडहस्य तृतीयेऽहनि निष्केवल्ये वैरूपसामपक्षे यदिंद्र यावत इत्यनुरूपस्तृचः। सूत्रितं च। यदिंद्र यावतस्त्वमिति प्रगाथौ स्तोत्रियानुरूपौ। आ० ७. १०। इति॥ अग्निष्टोमे चातुर्विंशिकेऽहनि माध्यंदिनसवनेऽच्छावाकशस्त्रे तरणिरित्सिषासतीति वैकल्पिकस्तृचः। सूत्रितं च। तरोभिर्वो विदद्वसुं तरणिरित्सिषासतीति प्रगाथौ स्तोत्रियानुरूपौ। आ० ७. ४.। इति॥ अग्निष्टोमे निष्केवल्यशस्त्रे रथंतरसामपक्षेऽभि त्वा शूरेति प्रगाथः स्तोत्रियः। सूत्रितं च। अभि त्वा शूर नोनुमोऽभि त्वा पूर्वपीतय इति स्तोत्रियानुरूपौ। आ० ५. १५.। इति॥ आश्विनशस्त्रेऽप्ययं प्रगाथः। तथैव सूत्रितं च। अभि त्वा शूर नोनुमो वयमः सूरचक्षस इति प्रगाथाः। आ० ६. ५.। इति॥ महाव्रते निष्केवल्ये दक्षिणपक्षेऽयं प्रगाथः। तथैव पंचमारण्यके सूत्रितं। अभि त्वा शूर नोनुमोऽभि त्वा पूर्वपीतय इति रथंतरस्य स्तोत्रियानुरूपौ प्रगाथौ॥ ऐ० आ० ५. ८.। इति॥ आश्विनशस्त्र इंद्र क्रतुं न इति प्रगाथः। सूत्रितं च। इंद्र क्रतुं न आ भराभि त्वा शूर नोनुमः। आ० ६. ५.। इति॥ चातुर्विंशिकेऽहनि माध्यंदिनसवने ब्राह्मणाच्छंसिशस्त्रेऽयं वैकल्पिकः स्तोत्रियः प्रगाथः। सूत्रितं च। इंद्र क्रतुं न आ भरेंद्र ज्येष्ठं न आ भर। आ० ७. ४.। इति॥

॥ तत्र प्रथमा॥

मो षु त्वा वाघतश्चनारे अस्मन्नि रीरमन्।

आरात्ताच्चित्सधमादं न आ गहीह वा सन्नुप श्रुधि॥ १॥

मो इति। सु। त्वा। वाघतः। चन। आरे। अस्मत्।

नि। रीरमन्।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आरात्तात्। चित्। सधऽमादं। नः। आ।

गहि। इह। वा। सन्। उपं। श्रुधि॥ १

हे इंद्र त्वा त्वया सह यजमाना अध्येतेऽस्मदस्मत्त आरे दूरे वा नि दीरमन्। न नितरां रमयंतु। अतस्त्वमारात्ताच्चिद् दूरेऽपि वर्तमानोऽस्मदीयं सधमादं यज्ञमागहि। आगच्छ। इह वात्रापि वा सन् विद्यमान उपश्रुधि। अस्मदीयं स्तोत्रमुपशृणु॥

॥ अथ द्वितीया ॥

इमे हि ते ब्रह्मकृतः सुते सचा मधौ न मक्ष आसंते।

इंद्रे कामं जरितारो वसूयवो रथे न पादमा दधुः।

इमे। हि। ते। ब्रह्मऽकृतः। सुते। सचा। मधौ। न।

मक्षः। आसंते।

इंद्रे। कामं। जरितारः। वसुऽयवः। रथे। न। पादं।

आ। दधुः॥ २

हे इंद्र ते त्वदर्थं सुतेऽभिषुते सोमे ब्रह्मकृतः स्तोत्रकृतो मधौ न मधुनीव मक्षो मक्षिकाः सचा सहासते। उपासते। अथ परोक्षस्तुतिः वसूयवो धनकामा जरितारः स्तोतारः काममिष्टमिंद्रे रथे न पादं रथे पादमिवादधुः। समर्पयंति॥

॥ अथ तृतीया ॥

रायस्कामो वज्रहस्तं सुदक्षिणं पुत्रो न पितरं हुवे। ३

रायःऽकामः। वज्रंऽहस्तं। सुऽदक्षिणं। पुत्रः। न।

पितरं। हुवे॥ ३

रायस्कामो धनकामोऽहं सुदक्षिणं शोभनदानं वज्रहस्तमिंद्रं पुत्रो न पुत्र इव पितरं हुवे। ह्वयामि॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ चतुर्थी ॥

इम इंद्राय सुन्विरे सोमासो दध्याशिरः ।

ताँ आ मदाय वज्रहस्त पीतये हरिभ्यां याह्योक आ ॥ ४

इमे । इंद्राय । सुन्विरे । सोमासः । दधिऽआशिरः ।

तान् । आ । मदाय । वज्रऽहस्त । पीतये । हरिऽभ्यां ।

याहि । ओकः । आ ॥ ४

हे वज्रहस्त दध्याशिरो दधिमिश्रणा इमे सोमासः सोमा इंद्राय तुभ्यं सुन्विरे। सुता बभूवुः। तान् सोमान्मदाय मदार्थं पीतये पानायौको यज्ञसदनमभि हरिभ्यामश्वाभ्यामायाहि। आगच्छ॥

॥ अथ पंचमी ॥

श्रवच्छ्रुत्कर्ण ईयते वसूनां नू चिन्नो मर्धिषद्गिरः ।

सद्यः चिद्यः सहस्राणि शता ददन्नकिर्दित्संतमा मिनत् ॥ ५

श्रवत् । श्रुत्ऽकर्णः । ईयते । वसूनां । नु । चित् । नः ।

मर्धिषत् । गिरः ।

सद्यः । चित् । यः । सहस्राणि । शता । ददत् । नकिः ।

दित्संतं । आ । मिनत् ॥ ५

श्रुत्कर्णो याच्ञाश्रवणपरकर्ण इंद्रो वसूनां धनानां ईयते। याच्यते। नोऽस्मदीया गिरो याच्ञावाक्यानि श्रवत्। शृणोतु। नू चित् नैव मर्धिषत्। हिनस्तु। अश्रवणेन याच्ञावाक्यानि निष्फलानि न करोत्वित्यर्थः। अपि चेंद्रः सद्यश्चित् यः एव याच्ञानंतरमेव सहस्राणि शतानि च ददत्। प्रयच्छेत्। दित्संतं दातुमिच्छंतं तमिंद्रं नाकिरामिनत्। न हिंस्यात्। कश्चिदपि न वारयेदित्यर्थः॥

॥ इति पंचर्च सूक्तं सप्तदशो वर्गः ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ षष्ठी ॥

स वीरो अप्रतिष्कुत इंद्रेण शूशुवे नृभिः।

यस्ते गभीरा सवनानि वृत्रहन्त्सुनोत्या च धावति ॥ ६

सः। वीरः। अप्रतिऽस्कुतः। इंद्रेण। शूशुवे। नृऽभिः।

यः। ते। गभीरा। सवनानि। वृत्रऽहन्। सुनोति। आ।

च। धावति ॥ ६

हे वृत्रहन् ते त्वदर्थं यः पुमान् गभीरा गभीराणि सवनानि सोमान् सुनोति ॥ आधावति च त्वां स्तुतिभिरुपधावति च स वीर इंद्रेण हेतुनाप्रतिष्कुतः केनाप्यप्रतिगतोऽप्रतिषिद्धो वा भवेत्। नृभिः परिचारकैः शूशुवे। उपगम्यते च ॥ श्वयतिर्गतिकर्मा ॥

॥ अथ सप्तमी ॥

भवा वरूथं मघवन्मघोनां यत्समजासि शर्धतः।

वि त्वाहतस्य वेदनं भजेमह्या दूणाशो भरा गयं ॥ ७

भव। वरूथं। मघऽवन्। मघोनां। यत्। संऽअजासि।

शर्धतः।

वि। त्वाऽहतस्य। वेदनं। भजेमहि। आ। दुःऽनशः। भर।

गयं ॥ ७

हे मघवन् धनवन्निंद्र मघोनां हविष्मतां यजमानानामुपद्रवाणां वारकं वर्म भव। यद्यदा त्वं शर्धत उत्सहमानान् शत्रून् समजासि संप्रेरयेः। अपि च त्वाहतस्य त्वया हतस्य शत्रोर्वेदनं धनं विभजेमहि। विभागेन लभेमहि। किंच दुर्णशो नाशयितुमशक्यस्त्वं गयं गृहं धनं वाभर। अस्मभ्यमाहर ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथाष्टमी ॥

सुनोता सोमपाव्ने सोममिंद्राय वज्रिणे।

पचंता पक्तीरवसे कृणुध्वमित्पृणन्नित्पृणते मयः॥ ८

सुनोत। सोमऽपाव्ने। सोमं। इंद्राय। वज्रिणे।

पचंत। पक्तीः। अवसे। कृणुध्वं। इत्। पृणन्। इत्।

पृणते। मयः॥ ८

हे मदीयाः पुरुषा वज्रिणे सोमपाव्ने सोमस्य पात्रे इंद्राय सोमं सुनोत अभिषुणुत। अवसे इंद्रं तर्पयितुं पक्तीः पक्तव्यान् पुरोडाशादीन् पचत च। कृणुध्वमित्। इंद्रप्रियकराणि कर्माणि च कुरुतैव। इंद्रो हि मयः सुखं पृणन्नित् यजमानाय प्रयच्छन्नेव पृणते प्रीणातीति शेषः॥

॥ अथ नवमी ॥

मा स्रेधत सोमिनो दक्षता महे कृणुध्वं राय आतुजे।

तरणिरिज्जयति क्षेति पुष्यति न देवासः कवत्नवे॥ ९

मा। स्रेधत। सोमिनः। दक्षत। महे। कृणुध्वं। राये।

आऽतुजे।

तरणिः। इत्। जयति। क्षेति। पुष्यति। न। देवासः।

कवत्नवे॥ ९

हे मदीया जनाः सोमिनः सोमवन्तो यागान्मा स्रेधत। मा हिंसिष्ट। दक्षत। यागादिकं कर्म कुरुध्वं च। महे महत आतुजे॥ तुजिर्हिंसाकर्मा दानकर्मा वा॥ शत्रूणामभिहिंसकाय धनानां प्रदात्रे चेंद्राय राये धनलाभार्थं कृणुध्वं। कर्माणि कुरुत च। तरणिरित् कर्मसु त्वरित एव जयति शत्रून्। क्षेति। स्वके निवसति च।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

ऋच्छति। प्रजया पशुभिश्च पुष्टो भवति। वायतेः कुत्सितक्रियार्थे॥ यथोपदष्टदस्ताः कालत्वगगनकरणं यो रूपं कपदृर्दिंनि। देवासो देवा न भवंतीति शेषः। सुखमात्रये भवंतीत्यर्थः॥

॥ अथ दशमी॥

नकिः सुदासो रथं पर्यास न रीरमत्।

इंद्रो यस्याविता यस्य मरुतो गमत्स गोमति व्रजे॥ १०

नकिः। सुदासः। रथं। परि। आस। न। रीरमत्।

इंद्रः। यस्य। अविता। यस्य। मरुतः। गमत्। सः।

गोऽमति। व्रजे॥ १०

सुदासः शोभनदानस्य यजमानस्य रथं नकिः पर्यास। कश्चिद्र परस्यति। न रीरमत्। न रमयति च। स्थानार्थं न कश्चिद्देवं स्तम्भयतीत्यर्थः। अपि च यस्येंद्रोऽविता रक्षिता यस्य च मरुतोऽवितारः स गोमति गोयुक्ते व्रजे गोष्ठे गमत्। गच्छेत्॥

॥ इति पंचमस्य तृतीयेऽष्टादशो वर्गः॥

॥ अथैकादशी॥

गमद्वाजं वाजयन्निंद्र मर्त्यो यस्य त्वमविता भुवः।

अस्माकं बोध्यविता रथानामस्माकं शूर नृणां॥ ११

गमत्। वाजं॥ वाजयन्। इंद्र। मर्त्यः। यस्य। त्वं।

अविता॥ भुवः।

अस्माकं। बोधि। अविता। रथानां। अस्माकं। शूर।

नृणां॥ ११

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

हे इंद्र त्वं वसु बहुसहायिना रक्षिता भवः अद्यः स मर्त्यो पालयन् स्तोत्रेण त्वां वशिनं कुर्वन् वाजवंतं गमत्। गच्छेत्। अपि च हे शूर अस्माकं वासिष्ठानां रथानामपि त्वा रक्षिता बोधि। भव॥ अमंतर्लोटि रूपं। अकारश्च बहुलंछंदसः अस्माकं रथानां पुत्रादीनां रक्षिता भव॥

॥ अथ द्वादशी॥

उदिन्न्व॑स्य रिच्य॒तेऽं॒शो धनं॒ न जि॒ग्युषः॑।

य इंद्रो॒ हरि॑वान्न द॑भंति॒ तं रिपो॒ दक्षं॑ दधाति सो॒मिनि॑॥ १२

उत्। इत्। नु। अ॒स्य। रि॒च्य॒ते। अं॒शः। धनं॑। न।

जि॒ग्युषः॑।

यः। इंद्रः॑। हरि॑ऽवान्। न। द॒भं॒ति॒। तं। रिपः॑। दक्षं॑।

द॒धा॒ति॒। सो॒मिनि॑। १२

अस्येंद्रस्यांशो यद्वा सोमस्य भागोऽतिरिच्यतेऽन्येभ्योऽपि देवेभ्यः। इंद्रस्य त्रिष्वपि सवनेषु सोमपानमस्ति। माध्यंदिनं हि सवनमिंद्रस्यैवेति। जिग्युषो जितवतो धनं न धनमिव। उदिदित्ति त्रयः पूरणाः। अपि च यो हरिवानिंद्रः सोमिनि यजमाने दक्षं बलं दधाति संदधाति तं रिपो रिपवो न दभंति। न हिंसंति॥

॥ अथ त्रयोदशी॥

मंत्र॒मखं॑र्वं॒ सुधि॑तं सु॒पेश॑सं॒ दधा॑त य॒ज्ञिये॒ष्वा।

पू॒र्वीश्च॒न प्रसि॑तयस्तरंति॒ तं य इंद्रे॒ कर्म॑णा॒ भुव॑त्॥ १३

मंत्रं॑। अखं॑र्वं। सुऽधि॑तं। सु॒ऽपेश॑सं। दधा॑त। य॒ज्ञिये॑षु। आ।

पू॒र्वीः। च॒न। प्रऽसि॑तयः। त॒रं॒ति॒। तं। यः। इंद्रे॑।

कर्म॑णा। भुव॑त्। १३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे जना असुर्यंमनल्पं सुषितं सुनिहितं सुपेशसं शोभनरूपं मंत्रं स्तोत्रं यज्ञियेषु यजनीयेषु देवेषु मध्य इंद्राय दधात। विधत्त। यो जनः कत्वा स्तुत्यादिरूपेणेंद्र इंद्रस्य चित्ते सुभत् भवेत् तं जनं दुर्गविंहाराः प्रसितयः पाशादीनि बंधनानि। चनेति समुदायो नेत्यर्थे वर्तते। न तरंति। न व्याप्नुवंतीत्यर्थः॥

॥ अथ चतुर्दशी॥

कस्तमिंद्र त्वावसुमा मर्त्यो दधर्षति।

श्रद्धा इत्ते मघवन्पार्ये दिवि वाजी वाजं सिषासति॥ १४

कः। तं। इंद्र। त्वाऽवसुं। आ। मर्त्यः। दधर्षति।

श्रद्धा। इत्। ते। मघऽवन्। पार्ये। दिवि। वाजी।

वाजं। सिसासति॥ १४

हे इंद्र तव चित्ते यो भवेत् त्वावसुं। त्वं वसुव्यापको यस्येति बहुव्रीहिः। तं जनं को मर्त्यं आदधर्षति। आधर्षेत्। हे मघवन् ते त्वदर्थं यः श्रद्धा श्रद्धया युक्तः सन् वाजी हविष्मान् भवेत् पार्ये दिवि पौत्येऽहनि स वाजमन्नं बलं वा सिषासति। सेवते॥

॥ अथ पंचदशी॥

मघोनः स्म वृत्रहत्येषु चोदय ये ददति प्रिया वसु।

तव प्रणीती हर्यश्व सूरिभिर्विश्वा तरेम दुरिता॥ १५

मघोनः। स्म। वृत्रऽहत्येषु। चोदय। ये। ददति। प्रिया।

वसु।

तव। प्रऽनीती। हरिऽअश्व। सूरिऽभिः। विश्वा। तरेम।

दुःऽइता॥ १५

हे इंद्र मघोनो धनवतस्ते। त्वदर्थमित्यर्थः। प्रिया प्रियाणि वसु वसूनि धनानि ये जना ददति प्रयच्छंति ताञ्जनान्वृत्रहत्येषु संग्रामेषु चोदय। प्रेरय। हे हर्यश्व तव

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रणीती प्रणीत्या प्रणयनेन सूरिभिः स्तोतृभिः पुत्रादिभिः सार्धं विश्वा विश्वानि दुरिता दुरितानि तरेम ॥

॥ इति पंचमस्य तृतीये एकोनत्रिंशो वर्गः ॥

॥ अथ षोडशी ॥

तवेदिंद्रावमं वसु त्वं पुष्यसि मध्यमं ।

सत्रा विश्वस्य परमस्य राजसि नकिष्ट्वा गोषु वृण्वते ॥ १६

तव । इत् । इंद्र । अवमं । वसु । त्वं । पुष्यसि । मध्यमं ।

सत्रा । विश्वस्य । परमस्य । राजसि । नकिः । त्वा । गोषु ।

वृण्वते ॥ १६

हे इंद्र अवममधमं त्रपुसीसादिकं वसु धनं। यद्वा भौमं वस्वधमं। तवेत् तवैव। त्वं त्वमेव मध्यमं वसु रजतसुवर्णादिकमांतरिक्षं वा पुष्यसि। विश्वस्य सर्वस्य परमस्योत्तमस्यापि रत्नादेर्दिव्यस्य वा वसुनो राजसि। ईशिषे। सत्रा सत्यमेव। अपि च त्वा त्वां गोषु निमित्तेषु नकिर्वृण्वते। कोऽपि न वारयंति॥

॥ अथ सप्तदशी ॥

त्वं विश्वस्य धनदा असि श्रुतो य ईं भवंत्याजयः ।

तवायं विश्वः पुरुहूत पार्थिवोऽवस्युर्नाम भिक्षते ॥ १७

त्वं । विश्वस्य । धनऽदाः । असि । श्रुतः । ये । ईं । भवंति । आजयः ।

तव । अयं । विश्वः । पुरुऽहूत । पार्थिवः । अवस्युः । नाम । भिक्षते ॥ १७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे इंद्र त्वं विश्वस्य सर्वस्य स्तोतुरमानस्य वा धनदा धनस्य दाता ननु श्रुतः प्रथितोऽसि । य इंद्र य एते आजयो युद्धानि भवंति तेष्वपि धनदाः श्रुतोऽसि । हे पुरुहूत विश्वः सर्वोऽप्ययं पार्थिवो जनस्तव । त्वत्त इत्यर्थः । धनस्य रक्षामिच्छन् नामाजयुद्धकं वा ॥ यच्छंनोभित्युदकनामसु पाठात् ॥ भिक्षते । याचते । त्वामिति शेषः ॥

॥ अथाष्टादशी ॥

यदिंद्र यावतस्त्वमेतावदहमीशीय ।
स्तोतारमिद्दिधिषेय रदावसो न पापत्वाय रासीय ॥ १८

यत् । इंद्र । यावतः । त्वं । एतावत् । अहं । ईशीय ।
स्तोतारं । इत् । दिधिषेय । रदवसो इति रदऽवसो । न ।
पापऽत्वाय । रासीय ॥ १८

हे इंद्र यद्यतो यावतो धनस्येशिषे एतावत् ॥ षष्ठ्या लुक् ॥ एतावतो धनस्याहमीशीय ईश्वरो भवेयं हे रदवसो । रदति ददाति वसूनीति रदवसुः । ततोऽहं मदीयं स्तोतारमिद्दिधिषेय । धनप्रदानेन धारयेयमेव । पापत्वाय न रासीय । न दद्यां ॥

॥ अथैकोनविंशी ॥

शिक्षेयमिन्महयते दिवेदिवे राय आ कुहचिद्विदे ।
नहि त्वदन्यन्मघवन्न आप्यं वस्यो अस्ति पिता चन ॥ १९

शिक्षेयं । इत् । महऽयते । दिवेऽदिवे । रायः । आ ।
कुहचित्ऽविदे ।
नहि । त्वत् । अन्यत् । मघऽवन् । नः । आप्यं । वस्यः ।
अस्ति । पिता । चन ॥ १९

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कुहचिद्विदे। कुत्रचिद्विद्यमानः कुहचिद्वित्। तस्मै। यत्र क्वापि विद्यमानायेत्यर्थः। मंहयते पूजयते जनाय दिवेदिवे प्रतिदिनं रायो धनानि शिक्षेयमित्। दद्यामेव। आकारः पूरणः। एवमिंद्रस्य वाक्यं श्रुत्वा संतुष्ट ऋषिर्वदति। हे मघवन् त्वत्तोऽन्य-दस्माकमाप्यं ज्ञातेयं न ह्यस्ति। वस्यः प्रशस्यः पिता चन पालयिता च त्वदन्यो नास्तीत्यर्थः॥

॥ अथ विंशी ॥

तरणिरित्सिषासति वाजं पुरंध्या युजा।

आ व इंद्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्रुं॥ २०

तरणिः। इत्। सिसासति। वाजं। पुरंऽध्या। युजा।

आ। वः। इंद्रं। पुरुऽहूतं। नमे। गिरा। नेमिं।

तष्टाऽइव। सुऽद्रुं॥ २०

तरणिरित् स्तुत्यादौ कर्मणि त्वरित एव पुमान् पुरंध्या महत्या धिया युजा सहायभूतया वाजमन्नं सिषासति। संभजते। पुरुहूतं बहुभिराहूतमिंद्रं वस्त्वां गिरा स्तुत्याऽहमानमे नेमिं चक्रस्य वलयं सुद्रुं शोभनदारुं तष्टेव। यथा वर्धकिर्दारुने-मिमानमयते तद्वदित्यर्थः॥

॥ इति पंचमस्य तृतीये विंशो वर्गः ॥

॥ अथैकोविंशी ॥

न दुष्टुती मर्त्यो विंदते वसु न स्रेधंतं रयिर्नशत्।

सुशक्तिरिन्मघवन्तुभ्यं मावते देष्णं यत्पार्ये दिवि॥ २१

न। दुःऽस्तुती। मर्त्यः। विंदते। वसुं। न। स्रेधंतं।

रयिः। नशत्।

सुऽशक्तिः। इत्। मघऽवन्। तुभ्यं। माऽवते। देष्णं। यत्।

पार्ये। दिवि॥ २१

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

मर्त्यो मनुष्यो दुष्टुतो दुष्टुत्या तव धनं न विंदते । दुष्टं स्तुवचेन तव लभत इत्यर्थः । स्रेधंतं हिंसंतं । इंद्रविषयस्तुत्यादिकर्माण्यकुर्वंतमित्यर्थः । रयिर्धनं न नशत् । न व्याप्नोति । हे मघवन् त्वया पार्ये दिवि सोम्ये दिवसे मामते मह्यमंहनाय देयं दातव्यं यद्धनमस्ति तत्तुभ्यं त्वत्तः सुयज्ञिरिद् सुकर्मैव । विंदत इति व्यवहितमप्यनुषज्यतेऽध्याहारस्यांतिकत्वात् ॥

॥ अथ द्वाविंशी ॥

अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः ।
ईशानमस्य जगतः स्वर्दृशमीशानमिंद्र तस्थुषः ॥ २२

अभि । त्वा । शूर । नोनुमः । अदुग्धाःऽइव । धेनवः ।
ईशानं । अस्य । जगतः । स्वःऽदृशं । ईशानं । इंद्र ।
तस्थुषः ॥ २२

हे शूरेंद्र अस्य जगतो जंगमस्येशानमीश्वरं तस्थुषः स्थावरस्य चेशानं । ईशानमिति पदस्यावृत्तिरादरार्था । स्वर्दृशं सर्वद्रष्टारं त्वा त्वामदुग्धा इव धेनवो यथादुग्धा धेनवः क्षीरपूर्णोधस्त्वेन वर्तंते तद्वत्सोमपूर्णपात्रत्वेन वर्तमाना वयमभिनोनुमः । भृशमभिष्टुमः ॥

॥ अथ त्रयोविंशी ॥

न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।
अश्वायंतो मघवन्निंद्र वाजिनो गव्यंतस्त्वा हवामहे ॥ २३

न । त्वाऽवान् । अन्यः । दिव्यः । न । पार्थिवः । न । जातः ।
न । जनिष्यते ।
अश्वऽयंतः । मघऽवन् । इंद्र । वाजिनः । गव्यंतः । त्वा ।
हवामहे ॥ २३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे मघवन्निंद्र दिव्यो दिवि भवस्त्वावान् त्वत्सदृशोऽन्यो न जायते। पार्थिवः पृथिव्यां भवोऽपि त्वावानन्यो न जायते। दिव्यः पार्थिवो वा त्वावानन्यो न जातः। न च जनिष्यते। पृथिव्यां दिवि च त्रिष्वपि लोकेषु त्वत्सदृशः कश्चिन्नास्तीत्यर्थः। अश्वायंतोऽश्वानिच्छंतो वाजिनो वाजमिच्छंतः ॥ इच्छायामिनिप्रत्ययः ॥ इविष्मंतो वा गव्यंतो गा इच्छंतश्च वयं त्वा त्वां हवामहे। ह्वयामः ॥

॥ अथ चतुर्विंशी ॥

अभी षतस्तदा भरेंद्र ज्यायः कनीयसः।

पुरूवसुर्हि मघवन्सनादसि भरेभरे च हव्यः ॥ २४

अभि। सतः। तत्। आ। भर। इंद्र। ज्यायः। कनीयसः।

पुरुऽवसुः। हि। मघऽवन्। सनात्। असि। भरेऽभरे। च।

हव्यः ॥ २४

हे ज्यायो ज्यायसिंद्र ॥ आमंत्रितं पूर्वमविद्यमानवदितींद्रपदस्याविद्यमान-वत्त्वात् ज्याय इत्यस्य सर्वानुदात्तत्वाभावः। नकारस्य रुत्वं व्यत्ययाद्रुत्वाभावो वा ॥ कनीयसः सतो मम तत्प्रसिद्धं धनमभ्याभर। हे मघवन् त्वं सनाच्चिरादेवारभ्य पुरूवसुर्हि बहुधनो ह्यसि। भरेभरे संग्रामे यज्ञे वा हव्यो ह्वातव्योऽसि ॥

॥ अथ पंचविंशी ॥

परा णुदस्व मघवन्नमित्रान्त्सुवेदा नो वसू कृधि।

अस्माकं बोध्यविता महाधने भवा वृधः सखीनां ॥ २५

परा। नुदस्व। मघऽवन्। अमित्रान्। सुऽवेदा। नः।

वसु। कृधि।

अस्माकं। बोधि। अविता। महाऽधने। भव। वृधः।

सखीनां ॥ २५

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

हे मघवन् परा पराचीनानमित्रान् मनूनुदस्व । प्रेरय । नोऽस्मभ्यं वसु वसूनि सुवेदा सुलभानि कृधि । कुरु । मह्राधने संग्रामे ॥ वाजसातौ मह्राधन इति संग्रामनामसु पाठात् ॥ सखीनां स्तोतॄणामस्माकं वर्धिता नाथयिता रक्षिता बोधि । भव । वृधो वर्धयिता च भव ॥

॥ अथ षड्विंशी ॥

इंद्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।

शिक्षा णो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहि ॥२६

इंद्रं । क्रतुं । नः । आ । भर । पिता । पुत्रेभ्यः । यथा ।

शिक्षं । नः । अस्मिन् । पुरुऽहूत । यामनि । जीवाः ।

ज्योतिः । अशीमहि ॥ २६

हे इंद्र नोऽस्मभ्यं क्रतुं कर्म प्रज्ञानं वाभर । आहर । अपि च यथा पिता पुत्रेभ्यो धनं प्रयच्छति तथा नोऽस्मभ्यं शिक्ष । धनं देहि । हे पुरुहूत बहुभिराहूत यामनि यज्ञे जीवा वयं ज्योतिः सूर्यमशीमहि । प्रतिदिनं प्राप्नुयाम ॥

॥ अथ सप्तविंशी ॥

मा नो अज्ञाता वृजना दुराध्यो३ माशिवासो अव क्रमुः ।

त्वया वयं प्रवतः शश्वतीरपोऽति शूर तरामसि ॥ २७

मा । नः । अज्ञाताः । वृजनाः । दुःऽआध्यः । मा ।

अशिवासः । अव । क्रमुः ।

त्वया । वयं । प्रऽवतः । शश्वतीः । अपः । अति । शूर ।

तरामसि ॥ २७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे इंद्र अज्ञाता अज्ञातगमना वृजना हिंसका दुराध्यो नोऽस्मान्मावक्रमुः । मावक्रमुः । हे शूर त्वया वयं वसिष्ठाः प्रवतः प्रवणकाः शश्वतीर्बह्वीरपोऽतितरामसि । अतितराम ॥

॥ इति पंचमस्य तृतीये एकविंशो वर्गः ॥

श्वित्यंच इति चतुर्दशर्चं षोडशं सूक्तं । अत्रेयमनुक्रमणिका । श्वित्यंचः षड़ूना संवादो वसिष्ठस्य सपुत्रस्येंद्रेण वा [संवाद इति ॥ आदितो नवानां वसिष्ठ ऋषिः । वसिष्ठपुत्राणां स्तूयमानत्वात्त एव देवता । विद्युतो [ज्योतिरित्यादिभिर्दशम्यादिभिः सपुत्रैर्वसिष्ठः स्तूयते । अतो वसिष्ठो देवता । त एव ऋषयः । या तेनोच्यते इति न्यायात् । अनुक्तत्वात्त्रिष्टुप् ॥

॥ तत्र प्रथमा ॥

श्वित्यंचो मा दक्षिणतस्कपर्दा धियंजिन्वासो अभि हि प्रमंदुः ।
उत्तिष्ठन्वोचे परि बर्हिषो नॄन्न मे दूरादवितवे वसिष्ठाः ॥ १

श्वित्यंचः । मा । दक्षिणतःऽकपर्दाः । धियंऽजिन्वासः ।
अभि । हि । प्रऽमंदुः ।
उत्ऽतिष्ठन् । वोचे । परि । बर्हिषः । नॄन् । न । मे ।
दूरात् । अवितवे । वसिष्ठाः ॥ १

श्वित्यंचः । श्वित्यं श्वेतवर्णमंचंतीति श्वित्यंचः । श्वेतवर्णा इत्यर्थः । धियंजिन्वासः कर्मणां पूरयितारो दक्षिणतस्कपर्दाः । दक्षिणे शिरसो भागे कपर्दाश्चूडा येषां ते दक्षिणतस्कपर्दाः । चूडाकर्मण्यपि दक्षिणतो वसिष्ठानामिति श्रूयते । मा मामभिप्रमंदुः । विद्यावत्त्वेनाभिप्राहर्षयन् । यतो मामभिप्रमंदुरतो बर्हिषो यज्ञात् । परीति पंचम्यर्थानुवादः । उत्तिष्ठन्नहं नॄन्यज्ञस्य नेतॄन्वोचे । ब्रवीमि । मे मत्तो दूराद्वसिष्ठा वसिष्ठस्य मम पुत्रा अवितवे गंतुं नार्हंतीति शेषः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ द्वितीया ॥

दूरादिंद्रमनयन्ना सुतेन तिरो वैशंतमति पांतमुग्रं ।
पाशद्युम्नस्य वायतस्य सोमात्सुतादिंद्रोऽवृणीता वसिष्ठान् ॥ २

दूरात् । इंद्रं । अनयन् । आ । सुतेन । तिरः । वैशंतं ।
अति । पांतं । उग्रं ।
पाशद्युम्नस्य । वायतस्य । सोमात् । सुतात् । इंद्रः ।
अवृणीत । वसिष्ठान् ॥ २

यदा वसिष्ठस्य पुत्राः सुदासं राजानमयाजयन् तदैव पाशद्युम्नाख्योऽपि राजा सोमान्यष्टुमुद्यमं चकार। तदा ते वसिष्ठपुत्राः पाशद्युम्नं तिरस्कृत्य तदीये यागे सोमं पिबंतमिंद्रं मंत्रबलेन तस्मादाच्छिद्य सुदासो यज्ञे स्थापयामासुः। तदेतद्वृत्तांतं कौंतेयेन वसिष्ठः स्वसुतानेनेन मंत्रेण स्तौति ॥ वैशंतं। वेशंतः पल्वलं। अत्र वेशंतशब्देन सोमाधारचमसो लक्ष्यते। तत्स्थं सोमं पांतं पिबंतमुग्रमुग्रं त्विंद्रं सुतेन सुदासो यज्ञेऽभिषुतेन सोमेन हेतुना तिर पाशद्युम्नं तिरस्कृत्य दूरादानयन्। वसिष्ठा मंत्रबलेनानीतवंतः। इंद्रोऽपि वायतस्य वयतः पुत्रस्य पाशद्युम्नस्य ॥ द्वितीयार्थे षष्ठी ॥ वायतं पाशद्युम्नमत्यतिक्रम्य सुदासो यज्ञेऽभिषुतात्सोमाद्धेतोर्वसिष्ठान्वसिष्ठस्य पुत्रानवृणीत। पाशद्युम्नस्य सोमयागे चमसस्थं सोमं पिबन्नपींद्रस्तं पाशद्युम्नं तिरस्कृत्य मंत्रसामर्थ्यबलेन सुदासो यज्ञं आह्वानकाले वसिष्ठानाजगामेत्यर्थः ॥

॥ अथ तृतीया ॥

एवेन्नु कं सिंधुमेभिस्ततारेवेन्नु कं भेदमेभिर्जघान ।
एवेन्नु कं दाशराज्ञे सुदासं प्रावदिंद्रो ब्रह्मणा वो वसिष्ठाः ॥ ३

एव । इत् । नु । कं । सिंधुं । एभिः । ततार । एव । इत् ।
नु । कं । भेदं । एभिः । जघान ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एवः। इत्। नु। कं। दाशऽराज्ञे। सुऽदासं। प्र। आवत्।

इंद्रः। ब्रह्मणा। वः। वसिष्ठाः॥ ३

एवेत् यथा पाशद्युम्नस्य वायतस्य सोमयागे चमसस्थं सोमं पिबंतमपींद्रं वसिष्ठैः सुदाः प्राप्तवान् एवमेव सिंधुं नदीमेभिर्वसिष्ठैः कं सुखेन ततार तीर्णं आसीत्। नु इति पूरणः। तथा च निगमांतरं। अपांसि चित्पप्रथाना सुदासे। ऋग्वे० ७. १८. ५.। इति। एवेदेवमेव भेदं भेदनामकं शत्रुमप्येभिर्वसिष्ठैरेव जघान। अथ प्रत्यक्षस्तुतिः। एवेदेवमेव हे वसिष्ठा वो युष्मदीयेन ब्रह्मणा स्तोत्रेण दाशराज्ञे दशभी राजभिः सह युद्धे प्रवृत्ते सति सुदासं राजानमिंद्रः प्रावत्। प्रारक्षत्। तथा च निगमांतरं। दश राजानः समिता अयज्यवः सुदासमिंद्रावरुणा न युयुधुः। ऋग्वे० ७. ८३. ७.। इति। दाशराज्ञे परियत्ताय विश्वतः। ऋग्वे० ७. ८३. ८.। इति च॥

॥ अथ चतुर्थी॥

जुष्टी नरो ब्रह्मणा वः पितृणामक्षमव्ययं न किला रिषाथ।

यच्छक्वरीषु बृहता रवेणेंद्रे शुष्ममदधाता वसिष्ठाः॥ ४

जुष्टी। नरः। ब्रह्मणा। वः। पितृणां। अक्षं। अव्ययं।

न। किल। रिषाथ।

यत्। शक्वरीषु। बृहता। रवेण। इंद्रे। शुष्मं। अदधात।

वसिष्ठाः॥ ४

हे नरो वो युष्मदीयेन ब्रह्मणा स्तोत्रेण पितृणां जुष्टी प्रीतिर्भवति। पितृणां नित्यनेन पारोक्ष्येण वसिष्ठस्यैव कीर्तनं। अहं प्रीतो भवामीत्यर्थः। अथेदानीं स्वनामम् गंतुमुद्यतोऽक्षमक्षं रथस्याक्षमव्ययं। व्ययामि॥ छांदसं लङ्॥ चालयामीत्यर्थः। यूयं न किल रिषाथ न च क्षीणा भवथ हे वसिष्ठा यद्यस्माच्छक्वरीषु बृहता महता रवेण शब्देन साम्नेंद्रे शुष्मं बलमदधात अधारयत॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ पंचमी ॥

उद्द्यामिवेत्तृष्णजो नाथितासोऽदीधयुर्दाशराज्ञे वृतासः ।
वसिष्ठस्य स्तुवत इंद्रो अश्रोदुरुं तृत्सुभ्यो अकृणोदु लोकं ॥ ५

उत् । द्याम्ऽइव । इत् । तृष्णऽजः । नाथितासः । अदीधयुः ।
दाशऽराज्ञे । वृतासः ।
वसिष्ठस्य । स्तुवतः । इंद्रः । अश्रोत् । उरुं । तृत्सुऽभ्यः ।
अकृणोत् । ऊं इति । लोकं ॥ ५

तृष्णजो जाततृष्णा वृतासस्तृत्सुभी राजभिर्वृता नाथितासो वृष्टिं याचमाना वसिष्ठा द्यामिवादित्यमिवेंद्रं दाशराज्ञे दशानां राज्ञां संग्राम उददीधयुः । उददीधयन् । स्तुवतो वसिष्ठस्य स्तोत्रमिंद्रोऽश्रोत् । अशृणोत् । उरुं विस्तीर्णं लोकं तृत्सुभ्यो राजभ्योऽकृणोत् । अकरोत् । अददादित्यर्थः ॥

॥ इति पंचमस्य तृतीये द्वाविंशो वर्गः ॥

॥ अथ षष्ठी ॥

दंडा इवेद्गोअजनास आसन्परिच्छिन्ना भरता अर्भकासः ।
अभवच्च पुरएता वसिष्ठ आदित्तृत्सूनां विशो अप्रथंत ॥ ६

दंडाःऽइव । इत् । गोऽअजनासः । आसन् । परिऽछिन्नाः ।
भरताः । अर्भकासः ।
अभवत् । च । पुरःऽएता । वसिष्ठः । आत् । इत् ।
तृत्सूनां । विशः । अप्रथंत ॥ ६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

गोअजनासो गवां प्रेरका दंडा इव यथा दंडाः परिच्छिन्नपत्रोपशाखा भवंति तद्वद्भरताः तृत्सूनामेव राज्ञां भरता इति नामांतरेणोपादानं। शत्रुभिः परिच्छिन्ना अभवन्। अर्भकासोऽर्भका अल्पा अभवन्। आदित्परिच्छिन्नत्वादनंतरमेव तेषां तृत्सूनां वसिष्ठः पुरएता पुरोहितोऽभवत्। ततो वसिष्ठसामर्थ्यात्तृत्सूनां विशः प्रजा अप्रथंत। अवर्धंत॥

॥ अथ सप्तमी ॥

त्रयः कृण्वंति भुवनेषु रेतस्तिस्रः प्रजा आर्या ज्योतिरग्राः।

त्रयो घर्मास उषसं सचंते सर्वाँ इत्ताँ अनु विदुर्वसिष्ठाः॥ ७

त्रयः। कृण्वंति। भुवनेषु। रेतः। तिस्रः। प्रऽजाः।

आर्याः। ज्योतिःऽअग्राः।

त्रयः। घर्मासः। उषसं। सचंते। सर्वान्। इत्। तान्।

अनु। विदुः। वसिष्ठाः॥ ७

भुवनेषु पृथिव्यंतरिक्षद्युषु त्रयोऽग्निवायुसूर्या यथाक्रमेण रेतो निजं धारक-मुदकं कृण्वंति। कुर्वंति। तेषां त्रयाणां ज्योतिरग्रा आदित्यप्रमुखा आर्याः श्रेष्ठास्तिस्रः प्रजा भवंति। ते च त्रयोऽग्निवायुसूर्या घर्मासो दीप्यमाना उषसं सचंते। समवयंति। दृश्यमानान्सर्वानित्थंतानेव तान्वसिष्ठा अनुविदुः। अभिजानंति। तेषां रहस्यविज्ञाना-दिदमपि वसिष्ठानामेव स्तुतिः। तथा च शाट्यायनकं। त्रयः कृण्वंति भुवनेषु रेत इत्यग्निः पृथिव्यां रेतः करोति वायुरंतरिक्षे आदित्यो दिवि तिस्रः प्रजा आर्या ज्योतिरग्रा इति वसवो रुद्रा आदित्यास्तासां ज्योतिर्यदसावादित्यस्त्रयो घर्मास उषसं सचंत इत्यग्निरुषसं सचते आदित्य उषसं सचत इति॥

॥ अथाष्टमी ॥

सूर्यस्येव वक्षथो ज्योतिरेषां समुद्रस्येव महिमा गभीरः।

वातस्येव प्रजवो नान्येन स्तोमो वसिष्ठा अन्वेतवे वः॥ ८

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

सूर्यस्यऽइव । वक्षथः । ज्योतिः । एषां । समुद्रस्यऽइव ।

महिमा । गभीरः ।

वातस्यऽइव । प्रऽजवः । न । अन्येन । स्तोमः । वसिष्ठाः ।

अनुऽएतवे । वः ॥ ८

हे वसिष्ठा एषां वो युष्माकं स्तोमो महिमापि वा सूर्यस्य ज्योतिरिव वक्षथः प्रकाशोऽस्ति । हे वसिष्ठा वो युष्माकं महिमा स्तोमोऽपि वा समुद्रस्येव गभीरो गंभीरोऽस्ति । तथा हे वसिष्ठा एषां वो युष्माकं स्तोम ऋक्समूहो महिमापि वा वातस्येव प्रजवो यथा वातस्य प्रवेगोऽन्येनान्वेतुं न शक्यस्तद्वदन्येनान्वेतवेऽन्वेतुं न शक्यः ॥

॥ अथ नवमी ॥

त इन्निण्यं हृदयस्य प्रकेतैः सहस्रवल्शमभि सं चरंति ।

यमेन ततं परिधिं वयंतोऽप्सरस उप सेदुर्वसिष्ठाः ॥ ९

ते । इत् । निण्यं । हृदयस्य । प्रऽकेतैः । सहस्रंऽवल्शं ।

अभि । सं । चरंति ।

यमेन । ततं । परिऽधिं । वयंतः । अप्सरसः । उप । सेदुः ।

वसिष्ठाः ॥ ९

त इत् त एव वसिष्ठा निण्यं निरोहितं ज्ञानं । निण्यं सस्वरित्यंतर्हितनामसु पाठात् । सहस्रवल्शं सहस्रशाखं संसारं हृदयस्य प्रकेतैः प्रज्ञानैरभिसंचरंति । एवं ज्ञानेनाभिसंचरंतस्ते वसिष्ठा यमेन कारणात्मना सर्वनियंत्रा ततं विस्तृतं परिधिं वस्त्रं । परिधिरित्यनेन जन्मादिप्रवाहो विवक्षितः । तं वयंतोऽप्सरसो जननीत्वेनोपसेदुः । अत्र वसिष्ठा इति बहुवचनं पूजायां । वसिष्ठः पूर्वं प्रजापतेरात्मजं देहमुत्सृज्याप्सरःसु जायेयेति बुद्धिमकरोदिति भावः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ दशमी ॥

विद्युतो ज्योतिः परि संजिहानं मित्रावरुणा यदपश्यतां त्वा।

तत्ते जन्मोतैकं वसिष्ठागस्त्यो यत्त्वा विश आजभार ॥ १०

विऽद्युतः। ज्योतिः। परि। संऽजिहानं। मित्रावरुणा।

यत्। अपश्यतां। त्वा।

तत्। ते। जन्म। उत। एकं। वसिष्ठ। अगस्त्यः। यत्।

त्वा। विशः। आऽजभार ॥ १०

एतास्वृक्षु वसिष्ठस्यैव देहपरिग्रहः प्रतिपाद्यते। एतावैन्द्रत्वं वाक्यमित्येके मन्यंत्यपरे वसिष्ठपुत्राणामिति। हे वसिष्ठ यद्यदा विद्युतो विद्युत इव दीर्घं ज्योतिर्देहांतरपरिग्रहार्थं परिसंजिहानं परित्यजंतं त्वा त्वां ॥ छांदसमात्मनेपदं ॥ यद्वा जिहर्षितदेहार्थं दीर्घं ज्योतिः परिसंजिहानं परिजिहर्षंतमित्यर्थः ॥ अस्मिन्पक्षे जहातेर्गत्यर्थत्वादात्मनेपदं छांदसं न भवति। मित्रावरुणा मित्रावरुणावपश्यतां। आवाभ्यामयं जायेतेति समकल्पतामित्यर्थः। तत्तदा ते तवैकं जन्म। उतापि च यद्यदागस्त्यो विशो निवेशनान्मित्रावरुणाभ्यां जनयिष्याव इत्येतस्मात्पूर्वावस्थानात्त्वामाजभार आजहार ॥

॥ इति पंचमस्य तृतीये त्रयोविंशो वर्गः ॥

॥ अथैकादशी ॥

उतासि मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन्मनसोऽधि जातः।

द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वे देवाः पुष्करे त्वाददंत ॥ ११

उत। असि। मैत्रावरुणः। वसिष्ठ। उर्वश्याः। ब्रह्मन्।

मनसः। अधि। जातः।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

द्रप्सं। स्कन्नं। ब्रह्मणा। दैव्येन। विश्वे। देवाः। पुष्करे।

त्वा। आ। अददंत॥ ११

उतापि च हे वसिष्ठ मैत्रावरुणो मित्रावरुणयोः पुत्रोऽसि। हे ब्रह्मन् वसिष्ठ उर्वश्या अप्सरसा मनसो मनार्थं पुत्रः आदित्योऽयाब्धंकल्पात् द्रप्सं रेतो मित्रावरुणयोरवमोदर्शनात्स्कन्नमासीत्। तस्मादधि जातोऽसि। तथा च वक्ष्यते। कुम्भे च जातावित्यपि। एवं जातं त्वा त्वां दैव्येन देवसंबंधिना ब्रह्मणा वेदराशिधारकुणा ब्रह्मं पुष्करे विश्वे देवा आददंत। अधारयंत॥ तथा चादित्यैर्मैत्रावरुणौ जज्ञाते इति प्रक्रम्य पठ्यते। तयोरादित्ययोः सत्रे दृष्ट्वाप्सरसमुर्वशीं। रेतश्चस्कंद तत्कुंभे न्यपतद्वासतीवरे॥ तेनैव तु मुहूर्तेन वीर्यवंतो तपस्विनौ। अगस्त्यश्च वसिष्ठश्च तत्रर्षी संबभूवतुः॥ बहुधा पतितं रेतः कलशे च जले स्थले। स्थले वसिष्ठस्तु मुनिः संभूत ऋषिसत्तमः॥ कुंभे त्वगस्त्यः संभूतो जले मत्स्यो महाद्युतिः। उदियाय ततोऽगस्त्यः शम्यामात्रो महातपाः॥ मानेन संमितो यस्मात्तस्मान्मान्य इहोच्यते। यद्वा कुंभादृषिर्जातः कुंभेनापि हि मीयते॥ कुंभ इत्यभिधानं च परिमाणस्य लक्ष्यते। ततोऽप्सु गृह्यमाणासु वसिष्ठः पुष्करे स्थितः॥ सर्वतः पुष्करे तं हि विश्वे देवा अधारयन्निति॥

॥ अथ द्वादशी ॥

स प्रकेत उभयस्य प्रविद्वान्त्सहस्रदान उत वा सदानः।

यमेन ततं परिधिं वयिष्यन्नप्सरसः परि जज्ञे वसिष्ठः॥ १२

सः। प्रऽकेतः। उभयस्य। प्रऽविद्वान्। सहस्रऽदानः।

उत। वा। सऽदानः।

यमेन। ततं। परिऽधिं। वयिष्यन्। अप्सरसः। परि। जज्ञे।

वसिष्ठः॥ १२

स वसिष्ठः प्रकेतः प्रकृष्टज्ञान उभयस्योभयं दिवं च पृथिवीं च प्रविद्वान् प्रकर्षेण जानन् सहस्रदानोऽभवत्। विमनेन सहस्रदान इति विशेषणेन सत वापि वा सदानः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एवैतानवस्थित एवाभवत्। किंच वसिष्ठो यमेन कारणात्मना सर्वनियंत्रा तते विस्तृतं परिधिं वस्त्रं। परिधिमित्यनेन संसारप्रवाहो विवक्षितः तं वयिष्यन्नप्सरस उपसेदुः। परीति पंचम्यर्थानुवादः। अप्स । जातः॥

॥ अथ त्रयोदशी ॥

सत्रे ह जाताविषिता नमोभिः कुंभे रेतः सिषिचतुः समानं।
ततो ह मान उदियाय मध्यात्ततो जातमृषिमाहुर्वसिष्ठं ॥ १३

सत्रे । ह । जातौ । इषिता । नमःऽभिः । कुंभे । रेतः ।
सिसिचतुः । समानं ।
ततः । ह । मानः । उत् । इयाय । मध्यात् । ततः ।
जातं । ऋषिं । आहुः । वसिष्ठं ॥ १३

सत्रे यज्ञकतौ यागे। हेति पूरणः। जातौ दीक्षितौ मित्रावरुणाविषितावेषितौ अयमन्यैर्जनैर्नमोभिः स्तुतिभिः कुंभे वासतीवरे कलशे समानमेकदेव रेतः सिषिचतुः। असिंचतां। ततो वासतीवरात्कुंभात् मध्यादगस्त्यो मानः शमीप्रमाण उदियाय। प्रादुर्बभूव। तत एव कुंभाद्वसिष्ठमप्यृषिं जातमाहुः॥

॥ अथ चतुर्दशी ॥

उक्थभृतं सामभृतं बिभर्ति ग्रावाणं बिभ्रत्प्र वदात्यग्रे ।
उपैनमाध्वं सुमनस्यमाना आ वो गच्छाति प्रतृदो वसिष्ठः॥१४

उक्थऽभृतं । सामऽभृतं । बिभर्ति । ग्रावाणं । बिभ्रत् ।
प्र । वदाति । अग्रे ।
उप । एनं । आध्वं । सुऽमनस्यमानाः । आ । वः ।
गच्छाति । प्रऽतृदः । वसिष्ठः ॥ १४

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे प्रतृदः । प्रतृद इति तृत्सव एवाभिधीयंते नामांतरेण । भो युष्मान्वसिष्ठ आगच्छति । आगच्छति । एवं वसिष्ठं सुमनस्यमानाः सुमनसः संत उपाध्वं । उपतिष्ठत । आगतश्चासौ वसिष्ठो यज्ञेऽस्य पुरोहितो ब्रह्मा सन् उक्थभृतं शस्त्राणां संभर्तारं बिभर्ति । सामभृतमुद्गातारं बिभर्ति । ग्रावाणमभिषवणं बिभ्रत् बिभ्रत-मध्वर्युं च बिभर्ति । प्रवदाति । यज्ञे यत्प्रवदितव्यं ब्रह्मत्वादिनिमित्ते कर्तव्यमस्ति तदपि वदतीति तृत्सून् प्रति ब्रूते ब्रवीति ॥

॥ इति पंचमस्य तृतीये चतुर्विंशो वर्गः ॥

॥ इति सप्तमे मंडले द्वितीयोऽनुवाकः ॥

तृतीयेऽनुवाके द्वाविंशति सूक्तानि । तत्र प्र शुक्रेति पंचविंशत्यृचं प्रथमं सूक्तं । अत्रेयमनुक्रमणिका । प्र शुक्रा पंचाधिका वैश्वदेवं त्वाद्या एकविंशतिर्द्विपदा अब्जामहेरर्धर्चं उत्तरोऽहिर्बुध्न्यायेति । वसिष्ठ ऋषिः । आद्या एकविंशतिर्द्विपदा विंशत्यक्षरा विराजो द्वाविंशाद्याश्चतस्रस्त्रिष्टुभः । विश्वे देवा देवता ॥ व्यूळ्हे दशरात्रे चतुर्थेऽहनि वैश्वदेवशस्त्र इदं सूक्तं वैश्वदेवनिविद्धानं । सूत्रितं च । प्र शुक्रैत्विति वैश्वदेवं । आ० ८. ८. । इति ॥ षोडशिन्या धूर्ष्वंचा इति द्विपदा । आ० ६. २. । इति ॥ महाव्रतेऽप्येषा द्विपदा । तथैव पंचमारण्यके सूत्रितं । आ धूर्ष्वंचा इत्येका सूददोहा । ऐ० आ० ५. ८. । इति ॥

॥ तत्र प्रथमा ॥

प्र शुक्रैतु देवी मनीषा अस्मत्सुतष्टो रथो न वाजी ॥ १

प्र । शुक्रा । एतु । देवी । मनीषा । अस्मत् । सुऽतष्टः ।

रथः । न । वाजी ॥ १

शुक्रा दीप्ता देवी सर्वेषां कामानां प्रदात्री मनीषा स्तुतिरस्मदस्मत्तोऽस्मिन् सूक्ते स्तोष्यमाणान्देवान् वाजी वेगवान् सुतष्टः सुसंस्कृतो रथो न रथ इव प्रैतु । प्रगच्छतु ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ द्वितीया ॥

विदुः पृथिव्या दिवो जनित्रं शृण्वंत्यापो अध क्षरंतीः ॥ २

विदुः। पृथिव्याः। दिवः। जनित्रं। शृण्वंति। आपः। अधं। क्षरंतीः ॥ २

अस्माभिरापः स्तूयंते। क्षरंतीः क्षरंत्य आपो दिवः पृथिव्याश्च। उभयोरपि लोकयोरित्यर्थः। जनित्रमुत्पत्तिं विदुः। जानंति। अथापि च शृण्वंति स्तोत्राणीति शेषः ॥

॥ अथ तृतीया ॥

आपश्चिदस्मै पिन्वंत पृथ्वीर्वृत्रेषु शूरा मंसंत उग्राः ॥ ३

आपः। चित्। अस्मै। पिन्वंत। पृथ्वीः। वृत्रेषु। शूराः। मंसंते। उग्राः ॥ ३

इंद्रोऽस्मिन्नृचे स्तूयते। पृथ्वीः पृथ्व्यः प्रथमाना आपश्चिदापोऽप्यस्मा इंद्राय पिन्वंत। प्यायंते। वृत्रेषूपद्रवेषु सत्सूग्रा उद्गूर्णतेजस्विनो वा शूरा योद्धारोऽपि मंसंते। इममेवेंद्रं स्तुवंति ॥

॥ अथ चतुर्थी ॥

आ धूर्ष्वस्मै दधाताश्वानिंद्रो न वज्री हिरण्यबाहुः ॥ ४

आ। धूःऽसु। अस्मै। दधात। अश्वान्। इंद्रः। न। वज्री। हिरण्यऽबाहुः ॥ ४

अस्मै। षष्ठ्यर्थे चतुर्थी। अस्येंद्रस्यागमनायाश्वान् धूर्षु रथस्यादधात। इंद्रो न। नेति चार्थे। इंद्रो वज्री वज्रवान् हिरण्यबाहुर्हिरण्यहस्तश्च भवति ॥ योऽयमिति यज्ञमानत्वादस्या ऐंद्रत्वं गम्यते। आ धूर्ष्वस्मा इत्यत्रास्मा इत्यस्य पदस्यानुदात्तत्वं पूर्वस्यामिंद्रस्य प्रस्तुतत्वात् अत एव पूर्वार्धेंद्रीति विज्ञायते। पूर्वं स्तामन्यृच्यस्मा इत्यत्रानुदात्तत्वमसीयोऽयंमत्रमनुदात्तमिति। तथा च यास्कः। अस्मेति चोदात्तं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रथमादेशेऽनुदात्तमन्वादेशे तीव्रार्थंतरमुदात्तमल्पीयोऽर्थंतरमनुदात्तं। नि० ४. २५। इति। अल्पीयस्त्वं चेदं शब्दप्रवृत्तिनिमित्तस्य संनिधानस्य दूरस्थत्वेनेत्यवगंतव्यं॥

॥ अथ पंचमी ॥

अभि प्र स्थाताहेव यज्ञं यातेव पत्मन्त्मना हिनोत ॥ ५

अभि। प्र। स्थात। अहऽइव। यज्ञं। याताऽइव। पत्मन्।
त्मना। हिनोत॥ ५

यज्ञस्तुतिरियं। हे जना यज्ञमभिप्रस्थात। अभिक्रमत। अहेवेति पूरणौ। अपि च पत्मन् पतनानि यज्ञमार्गे त्मना स्वयमेव यातेव गंतेव हिनोत। गच्छत। हि गताविति धातुः॥

॥ अथ षष्ठी ॥

त्मना समत्सु हिनोत यज्ञं दधात केतुं जनाय वीरं ॥ ६

त्मना। समत्ऽसु। हिनोत। यज्ञं। दधात। केतुं।
जनाय। वीरं॥ ६

उक्तस्यैव विवरणमेतत्। हे मदीया जनाः समत्सु संग्रामेषु त्मना स्वयमेव हिनोत। गच्छत अपि च केतुं प्रज्ञापकं वीरं पापानां वारयितारं। मामकमित्यर्थः। यज्ञं जनाय लोकाय। तदर्थमित्यर्थः। दधात। विधत्त॥

॥ अथ सप्तमी ॥

उदस्य शुष्माद्भानुर्नार्त बिभर्ति भारं पृथिवी न भूम ॥ ७

उत्। अस्य। शुष्मात्। भानुः। न। आर्त। बिभर्ति।
भारं। पृथिवी। न। भूम॥ ७

अस्य यज्ञस्य शुष्माद्बलाद्भानुः सूर्यः उदार्त। उद्गच्छति। भूम भूतानि पृथिवीव भारं लोकस्यायं यज्ञो बिभर्ति च॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथाष्टमी ॥

ह्वयामि देवाँ अयातुरग्ने साधन्नृतेन धियं दधामि ॥ ८

ह्वयामि । देवान् । अयातुः । अग्ने । साधन् । ऋतेन ।
धियं । दधामि ॥ ८

अस्मिंनृचे देवाः स्तूयंते। हे अग्ने अयातुर्हिंसादिनियमयुक्तः ऋतेन यज्ञेन साधन् कार्याणि साधयन् देवान् ह्वयामि। अपि च धियं देवानां परिचरणात्मकं कर्म दधामि। करोमीत्यर्थः॥

॥ अथ नवमी ॥

अभि वो देवीं धियं दधिध्वं प्र वो देवत्रा वाचं कृणुध्वं ॥ ९

अभि । वः । देवीं । धियं । दधिध्वं । प्र । वः । देवऽत्रा ।
वाचं । कृणुध्वं ॥ ९

हे जना वो यूयमभि देवानुद्दिश्य देवीं दीप्तां धियं कर्म दधिध्वं। विधत्त। अपि च वो यूयं देवत्रा देवेषु वाचं स्तुतिरूपां प्र कृणुध्वं। प्रकर्षेण कुरुध्वं॥

॥ अथ दशमी ॥

आ चष्ट आसां पाथो नदीनां वरुण उग्रः सहस्रचक्षाः ॥ १०

आ । चष्टे । आसां । पाथः । नदीनां । वरुणः । उग्रः ।
सहस्रऽचक्षाः ॥ १०

सहस्रचक्षा बहुचक्षुर्वरुण आसां नदीनां पाथो जलमाचष्टे। अभिपश्यति। कीदृशो वरुणः। उग्र उद्गूर्णो ओजस्वी वा॥

॥ इति पंचमस्य तृतीये पंचविंशो वर्गः॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथैकादशी ॥

राजा राष्ट्रानां पेशो नदीनामनुत्तमस्मै क्षत्रं विश्वायु ॥ ११

राजा । राष्ट्रानां । पेशः । नदीनां । अनुत्तं । अस्मै । क्षत्रं ।

विश्वऽआयु ॥ ११

राष्ट्रानां राष्ट्राणां ॥ णत्वाभावश्छांदसः ॥ ईश्वराणामपि यदयो राजेश्वरो भवति। नदीनां पेशो रूपं रूपवदपि भवतीत्यर्थः। अस्मै। षष्ठ्यर्थे चतुर्थी। अस्य यजमानस्य क्षत्रं बलमनुत्तमन्यैरबाधितं विश्वायु सर्वतो गंतृ भवतीति ॥

॥ अथ द्वादशी ॥

अविष्टो अस्मान्विश्वासु विक्ष्वद्युं कृणोत शंसं निनित्सोः ॥ १२

अविष्टो इति । अस्मान् । विश्वासु । विक्षु । अद्युं ।

कृणोत । शंसं । निनित्सोः ॥ १२

अयं तृचो दैवः। हे देवा नोऽस्मान् विश्वासु सर्वासु विक्षु प्रजासु। अविष्ट उ इति सहितमविष्टो इति। अविष्ट। रक्षत। शंसं निनित्सोर्निंदितुमिच्छतः शत्रोरद्युमदीप्तं कृणोत। कुरुत च ॥

॥ अथ त्रयोदशी ॥

व्येतु दिद्युद्द्विषामशेवा युयोत विष्वग्रपस्तनूनां ॥ १३

वि । एतु । दिद्युत् । द्विषां । अशेवा । युयोत । विष्वक् ।

रपः । तनूनां ॥ १३

द्विषां शत्रूणां दिद्युदायुधमशेवासुखकरी विष्वक् सर्वतो व्येतु। अपगच्छतु। तनूनामंगानां रपः पापं देवा युयोत। अस्मत्तः पृथक्कुरुत ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ चतुर्दशी ॥

अवीँनो अग्निर्हव्यान्नमोभिः प्रेष्ठो अस्मा अधायि स्तोमः ॥ १४

अवीत् । नः । अग्निः । हव्यऽअत् । नमःऽभिः । प्रेष्ठः ।

अस्मै । अधायि । स्तोमः ॥ १४

हव्यादव्यानामत्ताग्निर्नमोभिरस्मदीयैर्नमस्कारैः प्रेष्ठः प्रियतमः सन् नोऽस्मानवीत् । रक्षतु । अस्मा अग्नये स्तोत्रमधायि । अस्माभिर्व्यधायि ॥

॥ अथ पंचदशी ॥

सजूर्देवेभिरपां नपातं सखायं कृध्वं शिवो नो अस्तु ॥ १५

सऽजूः । देवेभिः । अपां । नपातं । सखायं । कृध्वं । शिवः ।

नः । अस्तु ॥ १५

हे स्तोतारपामुदकानां नपातं पुत्रमग्निं । तनूनपादित्यपत्यनामसु पाठात् । देवेभिर्देवैः सजूः सह सखायं मित्रं स्तुतिभिः कृध्वं । कुरुध्वं । स चापां नपान्नोऽस्माकं शिवः सुखकरोऽस्तु । भवतु ॥

॥ अथ षोडशी ॥

अब्जामुक्थैरहिं गृणीषे बुध्ने नदीनां रजःस्सु षीदन् ॥ १६

अप्ऽजां । उक्थैः । अहिं । गृणीषे । बुध्ने । नदीनां ।

रजःऽसु । सीदन् ॥ १६

अहिं मेघानामाहन्तारं नदीनामुदकानां बुध्ने स्थाने । बुध्नमन्तरिक्षं बद्धा अस्मिन्धृता आप इति व्युत्पत्तेः । तस्मिन्रजःसूदकेषु सीदन् सीदंतमब्जामप्सु जातमग्निमुक्थैः स्तोत्रैर्गृणीषे । बुध्ने नदीनां रजःसूदकेषु सीदन् बुध्नमन्तरिक्षं बद्धा अस्मिन्धृता आप इति । नि० १०, ४४ । इति ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ सप्तदशी ॥

मा नोऽहिर्बुध्न्यो रिषे धान्मा यज्ञो अस्य स्रिधदृतायोः ॥ १७

मा । नः । अहिः । बुध्न्यः । रिषे । धात् । मा । यज्ञः ।

अस्य । स्रिधत् । ऋतऽयोः ॥ १७

अहिर्बुध्न्यः । बुध्नेऽन्तरिक्षे भवो बुध्न्यः । अहिश्चासौ बुध्न्यश्चेत्यहिर्बुध्न्योऽग्निः । नोऽस्मान्रिषे हिंसकाय मा धात् । मा ददातु । अस्य ऋतायोर्यज्ञकामस्य यजमानस्य यज्ञो मा च स्रिधत् । न क्षीयेत । यद्वास्याहिर्बुध्न्यस्यैवमहिर्बुध्न्यस्तुतिमिच्छ ऋतायोर्यज्ञकामस्य यो यज्ञः स न क्षीयेतेत्यर्थः ॥

॥ अथाष्टादशी ॥

उत न एषु नृषु श्रवो धुः प्र राये यन्तु शर्धन्तो अर्यः ॥ १८

उत । नः । एषु । नृषु । श्रवः । धुः । प्र । राये । यन्तु ।

शर्धन्तः । अर्यः ॥ १८

अन्नं हव्यो दैव्यो वा हूतो वा । उतापि च नोऽस्मदीयेष्वेषु नृषु पुरुषेषु श्रवोऽन्नं धुः । देवा दधतो वा धारयन्तु । राये धनार्थं शर्धन्त उत्सहमानाः प्रियमाणा वा अर्योऽरयः प्र यन्तु । प्रगच्छन्तु । विधन्तामित्यर्थः ॥

॥ अथैकोनविंशी ॥

तपन्ति शत्रुं स्व१र्ण भूमा महासेनासो अमेभिरेषाम् ॥ १९

तपन्ति । शत्रुम् । स्वः । न । भूम । महाऽसेनासः । अमेभिः ।

एषाम् ॥ १९

महासेनासो महासेना राजान एषां मरुतां देवानां बलेभिर्बलैर्भूमा भुवनानि सर्वं आदित्य इव शत्रुं स्वकीयं तपन्ति । बाधन्ते । महान्तोऽपि राजानोऽस्मै बलैः शत्रून् बाधन्ते । तानि बलानि देवानामेवेत्यर्थः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ विंशी ॥

आ यन्नः पत्नीर्गमंत्यच्छा त्वष्टा सुपाणिर्दधातु वीरान् ॥ २०

आ । यत् । नः । पत्नीः ॥ गमंति । अच्छं । त्वष्टा । सुऽपाणिः । दधातु । वीरान् ॥ २०

अस्यां देवपत्न्यस्त्वष्टा च देवता । यद्यदा पत्नीर्देवानां पत्न्यो नोऽस्मानच्छाभ्यां गमंति आगच्छंति तदा सुपाणिः शोभनहस्तस्त्वष्टा देवो वीरान् पुत्रान् दधातु । अस्मभ्यं ददातु ॥

॥ इति पंचमस्य तृतीये षड्विंशो वर्गः ॥

॥ अथैकविंशी ॥

प्रति नः स्तोमं त्वष्टा जुषेत स्यादस्मे अरमंतिर्वसूयुः ॥ २१

प्रति । नः । स्तोमं । त्वष्टा । जुषेत । स्यात् । अस्मे इति । अरमंतिः । वसुऽयुः ॥ २१

नोऽस्माकं स्तोमं स्तोत्रं त्वष्टा प्रतिजुषेत । प्रतिसेवेत । अपि चारमतिः पर्याप्तबुद्धिः सर्वविषयव्याप्तिबुद्धिर्वा त्वष्टास्मे अस्मदर्थं वसूयुर्धनकामः स्यात् । भूयात् ॥

॥ अथ द्वाविंशी ॥

ता नो रासन्रातिषाचो वसून्या रोदसी वरुणानी शृणोतु ।

वरूत्रीभिः सुशरणो नो अस्तु त्वष्टा सुदत्रो वि दधातु रायः ॥ २२

ता । नः । रासन् । रातिऽसाचः । वसूनि । आ । रोदसी इति । वरुणानी । शृणोतु ।

वरूत्रीभिः । सुऽशरण । नः । अस्तु । त्वष्टा । सुऽदत्रः । वि । दधातु । रायः ॥ २२

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सा यान्यस्माकमभीष्टानि तानि वसूनि धनानि रातिषाचो दानसमवेता देवपत्न्यो नोऽस्मभ्यं रासन्। प्रयच्छंतु। अपि च वरुणानी वरुणस्य पत्न्या शृणोतु। अस्मदीयं स्तोत्रमभिशृणोतु। रोदसी द्यावापृथिव्यौ चाभिशृणुतां। ऋतुः कल्याणदानस्तुष्टा च पत्नीभिरुपकृतानां धारयित्रीभिर्देवपत्नीभिः सह नोऽस्मभ्यं सुखरूपः सुखरूप-प्रदोऽस्तु। रायो धनानि च विदधातु॥

॥ अथ त्रयोविंशी॥

तन्नो रायः पर्वतास्तन्न आपस्तद्रातिषाच ओषधीरुत द्यौः।
वनस्पतिभिः पृथिवी सजोषा उभे रोदसी परि पासतो नः॥२३

तत्। नः। रायः। पर्वताः। तत्। न। आपः। तत्।
रातिऽसाचः। ओषधीः। उत। द्यौः।
वनस्पतिऽभिः। पृथिवी। सऽजोषाः। उभे इति।
रोदसी इति। परि। पासतः। नः॥ २३

नोऽस्माकं। तदित्यव्ययः। ता रायो धनानि पर्वताः परिपांतु। नोऽस्माकं तत्ता राय आपश्च परिपांतु। तद्रातिषाचो दानसहिता देवपत्न्यश्च परिपांतु। ओषधी-रोषधयश्च तत्परिपांतु। उतापि च द्यौस्तत्परिपातु। वनस्पतिभिः सजोषाः सहिता पृथिव्यंतरिक्षं च तत्परिपातु। आपः पृथिवीत्यंतरिक्षनामसु पाठात् नोऽस्माकं तदुभे रोदसी द्यावापृथिव्यावपि परिपासतः। परिरक्षतां॥

॥ अथ चतुर्विंशी॥

अनु तदुर्वी रोदसी जिहातामनु द्युक्षो वरुण इंद्रसखा।
अनु विश्वे मरुतो ये सहासो रायः स्याम धरुणं धियध्यै॥ २४

अनु। तत्। उर्वी इति। रोदसी इति। जिहातां। अनु।
द्युक्षः। वरुणः। इंद्रऽसखा।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अनु । विश्वे । मरुतः । ये । सहासः । रायः । स्याम ।
धरुणं । धियध्यै ॥ २४

तद्वक्ष्यमाणमुर्वी विस्तीर्णे रोदसी द्यावापृथिव्यावनुजिहातां । अनुगच्छतां । अनुमन्येतामित्यर्थः । द्यावो दीप्तेर्निवासभूत इंद्रस्येंद्रसखः ॥ इंद्रः सखा यस्येति बहुव्रीहिः ॥ वरुणश्च तदनुजिहीतां । द्विवचनांतस्यैकवचनांततया विपरिणामः । ये सहासः शत्रूणामभिभवितारस्ते मरुतोऽपि तदनुजिहतां । अत्र बहुवचनांततया विपरिणामः । यदनुमंतव्यं तदाह । धियध्यै धारणीयं धारयितुं रायो धनस्य धरुणं धाम स्थानं वयं स्याम । भवेमेति ॥

॥ अथ पंचविंशी ॥

तन्न इंद्रो वरुणो मित्रो अग्निराप ओषधीर्वनिनो जुषंत ।
शर्मन्त्स्याम मरुतामुपस्थे यूयं पात स्वस्तिभिः सदा नः ॥ २५

तत् । नः । इंद्रः । वरुणः । मित्रः । अग्निः । आपः ।
ओषधीः । वनिनः । जुषंत ।
शर्मन् । स्याम । मरुतां । उपऽस्थे । यूयं । पात ।
स्वस्तिऽभिः । सदा । नः ॥ २५

नोऽस्मभ्यं तदिदं स्तोत्रमिंद्रो वरुणश्च मित्रश्चाग्निश्चापश्चौषधीरोषधयश्च वनिनो वृक्षाश्च जुषंत । जुषंतां । सेवंतां । वयं च मरुतामुपस्थ उपस्थाने वर्तमानाः शर्मन् शर्मणि सुखे गृहे वा स्याम । भवेम । सिद्धमन्यत् ॥

॥ इति पंचमस्य तृतीये सप्तविंशो वर्गः ॥

यं न इंद्राग्नी इति पंचदशर्चं द्वितीयं सूक्तं । अत्रेयमनुक्रमणिका । यं नः पंचोना मांतिरिति । वसिष्ठ ऋषिः । त्रिष्टुप् छंदः । वैश्वदेवं हेत्युक्तत्वादिदमपि वैश्वदेवं ॥ महानाम्नीष्वप्येतत्सूक्तं जप्यं । तथा च सूत्रितं । भद्रं कर्णेभिः शृणुयाम देवाः यं न इंद्राग्नी अवसामनोभिः । आ० ८, १४ । इति । एत[illegible]स ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तत्र प्रथमा ॥

शं न इंद्राग्नी भवतामवोभिः शं न इंद्रावरुणा रातहव्या ।
शमिंद्रासोमा सुविताय शं योः शं न इंद्रापूषणा वाजसातौ ॥१

शं । नः । इंद्राग्नी इति । भवतां । अवःऽभिः । शं । नः ।
इंद्रावरुणा । रातऽहव्या ।
शं । इंद्रासोमा । सुविताय । शं । योः । शं । नः ।
इंद्रापूषणा । वाजऽसातौ ॥ १

[नोऽस्माकमस्मभ्यं वैंद्राग्नी अवोभी रक्षणैः शं शांत्यै भवतां । रातहव्या रातहव्यौ यजमानैर्दत्तहविष्काविंद्रावरुणेंद्रावरुणावपि नोऽस्मभ्यं शं शांत्यै भवतां । इंद्रासोमेंद्रासोमावपि नः शं शांत्यै सुविताय कल्याणाय च भवतां । शं शांत्यै सुखाय च । पुनरुक्तिरादरार्था । अथवा शं शमनहेतुकं सुखं योर्भिभययोगनिमित्तं सुखमित्यपुनरुक्तिः । इंद्रापूषणेंद्रापूषणावपि वाजसातौ युद्धेऽन्नलाभे निमित्ते वा नः शं शांत्यै भवतामित्यर्थः ॥

॥ अथ द्वितीया ॥

शं नो भगः शमु नः शंसो अस्तु शं नः पुरंधिः शमु संतु रायः ।
शं नः सत्यस्य सुयमस्य शंसः शं नो अर्यमा पुरुजातो अस्तु ॥२

शं । नः । भगः । शं । ऊं इति । नः । शंसः । अस्तु ।
शं । नः । पुरंऽधिः । शं । ऊं इति । संतु । रायः ।
शं । नः । सत्यस्य । सुऽयमस्य । शंसः । शं । नः ।
अर्यमा । पुरुऽजातः । अस्तु ॥ २

नोऽस्माकं शं शांत्यै भगो देवोऽस्तु । भवतु । नोऽस्माकं शमु शांत्या एव शंसो नराशंसोऽस्तु । भवतु । नोऽस्माकं शं शांत्यै पुरंधिर्बहुधीरप्यस्तु । रायो धनान्यपि शमु शांत्या एव संतु । नोऽस्माकं सुयमस्य शोभनयमयुक्तस्य सत्यस्य शंसो वचनमपि शमस्तु । नोऽस्माकं शं शांत्यै पुरुजातो बहुप्रादुर्भावोऽर्यमा देवोऽप्यस्तु ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ तृतीया ॥

शं नो धाता शमु धर्ता नो अस्तु शं न उरूची भवतु स्वधाभिः।
शं रोदसी बृहती शं नो अद्रिः शं नो देवानां सुहवानि
संतु ॥ ३

शं। नः। धाता। शं। ऊं इति। धर्ता। नः। अस्तु। शं।
नः। उरूची। भवतु। स्वधाभिः।
शं। रोदसी इति। बृहती इति। शं। नः। अद्रिः। शं।
नः। देवानां। सुऽहवानि। संतु ॥ ३

नोऽस्माकं शं शांत्यै धाता देवोऽस्तु। नोऽस्माकं शमु शांत्या एव विधर्ता पुण्यपापानां विधारयिता वरुणो देवोऽप्यस्तु। नोऽस्माकं शं शांत्या उरूची विस्तीर्णगमना पृथिव्यपि स्वधाभिरन्नैः सहास्तु। बृहती महत्यौ रोदसी द्यावापृथिव्यावपि शं भवतां। अद्रिः पर्वतोऽपि नऽस्माकं शं शांत्यै भवतु। शं शांत्यै नोऽस्माकं देवानां सुहवानि सुष्टुतयो संतु। भवंतु ॥

॥ अथ चतुर्थी ॥

शं नो अग्निर्ज्योतिरनीको अस्तु शं नो
मित्रावरुणावश्विना शं।
शं नः सुकृतां सुकृतानि संतु शं न इषिरो अभि वातु वातः ॥ ४

शं। नः। अग्निः। ज्योतिःऽअनीकः। अस्तु। शं। नः।
मित्रावरुणौ। अश्विना। शं।
शं। नः। सुऽकृतां। सुऽकृतानि। संतु। शं। नः। इषिरः।
अभि। वातु। वातः ॥ ४

CC-0. Vasishtha Tripathi Collection. Digitized by eGangotri

ज्योतिरनीको ज्योतिर्मुखोऽग्निर्नोऽस्माकं शं शांत्या अस्तु । भवतु । मित्रावरुणा मित्रावरुणावपि नोऽस्माकं शं शांत्यै भवतां । अश्विनाश्विनावपि शं । भवतां सुकृतां पुण्यकर्मणां पुरुषाणां सुकृतानि पुण्यकर्माण्यपि नोऽस्माकं शं शांत्यै संतु । भवंतु । इषिरो गमनशीलोऽपि वातो वायुरपि नोऽस्माकं शं शांत्या अभिवातु ॥

॥ अथ पंचमी ॥

शं नो द्यावापृथिवी पूर्वहूतौ शमंतरिक्षं दृशये नो अस्तु ।

शं न ओषधीर्वनिनो भवंतु शं नो रजसस्पतिरस्तु जिष्णुः ॥ ५

शं । नः । द्यावापृथिवी इति । पूर्वऽहूतौ । शं । अंतरिक्षं ।

दृशये । नः । अस्तु ।

शं । नः । ओषधीः । वनिनः । भवंतु । शं । नः । रजसः ।

पतिः । अस्तु । जिष्णुः ॥ ५

नोऽस्माकं शं शांत्यै द्यावापृथिवी द्यावापृथिव्यौ पूर्वहूतौ प्रथमाह्वाने भवतां । अंतरिक्षमपि नोऽस्माकं दृशये दर्शनाय शमस्तु । नोऽस्माकं शं शांत्या ओषधीरोषधयोऽपि भवंतु । वनिनो वृक्षाश्च शं भवंतु । जिष्णुर्जयशीलो रजसो लोकस्य पतिरिंद्रोऽपि नोऽस्माकं शं शांत्या अस्तु ॥

॥ इति पंचमस्य तृतीये द्वात्रिंशो वर्गः ॥

॥ अथ षष्ठी ॥

शं न इंद्रो वसुभिर्देवो अस्तु शमादित्येभिर्वरुणः सुशंसः ।

शं नो रुद्रो रुद्रेभिर्जलाषः शं नस्त्वष्टा ग्नाभिरिह शृणोतु ॥ ६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

शं । नः । इंद्रः । वसुऽभिः । देवः । अस्तु । शं ।

आदित्येभिः । वरुणः । सुऽशंसः ।

शं । नः । रुद्रः । रुद्रेभिः । जलाषः । शं । नः । त्वष्टा ।

ग्नाभिः । इह । शृणोतु ॥ ६

देवो द्योतनादिगुणयुक्त इंद्रो वसुभिर्देवैः सार्धं नोऽस्माकं शं शांत्यै भवतु । सुशंसः शोभनस्तुतिर्वरुणो देव आदित्येभिरादित्यैर्देवैः सार्धं शं शांत्या अस्तु । भवतु । जलाषो रुद्रो दुःखद्रावको देवो रुद्रेभी रुद्रैः सार्धं शं शांत्यै नोऽस्माकं भवतु । इह यज्ञे त्वष्टा देवो ग्नाभिर्देवपत्नीभिः सार्धं नः शं शांत्यै भवतु । इह यज्ञे नः स्तोत्रं शृणोतु च ॥

॥ अथ सप्तमी ॥

शं नः सोमो भवतु ब्रह्म शं नः शं नो ग्रावाणः शमु संतु

यज्ञाः ।

शं नः स्वरूणां मितयो भवंतु शं नः प्रस्वः शम्वस्तु वेदिः ॥ ७

शं । नः । सोमः । भवतु । ब्रह्म । शं । नः । शं । नः ।

ग्रावाणः । शं । ऊं इति । संतु । यज्ञाः ।

शं । नः । स्वरूणां । मितयः । भवंतु । शं । नः । प्रऽस्वः ।

शं । ऊं इति । अस्तु । वेदिः ॥ ७

नोऽस्माकं शं शांत्यै सोमो भवतु । ब्रह्म स्तोत्रमपि नोऽस्माकं शं शांत्यै भवतु । ग्रावाणोऽभिषवसाधनभूताः पाषाणा अपि नोऽस्माकं शं शांत्यै भवंतु । यज्ञाश्च नः शमु शांत्या एव संतु । स्वरूणां यूपानां मितयः प्रक्षेपणान्यपि नोऽस्माकं शं शांत्यै भवंतु । प्रस्व ओषधयोऽपि नोऽस्माकं शं शांत्यै भवंतु । वेदिरपि नः शमु शांत्या एवास्तु ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथाष्टमी ॥

शं नः सूर्यं उरुचक्षा उदेतु शं नश्चतस्रः प्रदिशो भवंतु ।
शं नः पर्वता ध्रुवयो भवंतु शं नः सिंधवः शमु संत्वापः ॥ ८

शं । नः । सूर्यः । उरुऽचक्षाः । उत् । एतु । शं । नः ।
चतस्रः । प्रऽदिशः । भवंतु ।
शं । नः । पर्वताः । ध्रुवयः । भवंतु । शं । नः । सिंधवः ।
शं । ऊं इति । संतु । आपः ॥ ८

नोऽस्माकं शं शांत्यै सूर्य उरुचक्षा विस्तीर्णतेजाः सन् उदेतु । उदयं प्राप्नोतु । चतस्रः प्रदिशो महादिशोऽपि नोऽस्माकं शं शांत्यै भवंतु । नोऽस्माकं शं शांत्यै पर्वता ध्रुवयो ध्रुवा भवंतु । नोऽस्माकं शं शांत्यै सिंधवो नद्योऽपि भवंतु । आपश्च नः शमु शांत्या एव संतु ॥

॥ अथ नवमी ॥

शं नो अदितिर्भवतु व्रतेभिः शं नो भवंतु मरुतः स्वर्काः ।
शं नो विष्णुः शमु पूषा नो अस्तु शं नो भवित्रं शम्वस्तु
वायुः ॥ ९

शं । नः । अदितिः । भवतु । व्रतेभिः । शं । नः । भवंतु ।
मरुतः । सुऽअर्काः ।
शं । नः । विष्णुः । शं । ऊं इति । पूषा । नः । अस्तु ।
शं । नः । भवित्रं । शं । ऊं इति । अस्तु । वायुः ॥ ९

अदितिर्देवी व्रतैर्व्रतैः कर्मभिः सार्धं नोऽस्माकं शं शांत्यै भवतु । स्वर्काः शोभनस्तुतयो मरुतोऽपि नोऽस्माकं शं शांत्यै संतु । विष्णुर्व्यापको नोऽस्माकं शं शांत्या

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अस्तु पूषा देवोऽपि नोऽस्माकं शम् शांत्या एवास्तु । अपितु भुवनमंतरिक्षमुदकं वा नोऽस्माकं शं शांत्या अस्तु । वायुरपि नः शम् शांत्या एवास्तु ॥

॥ अथ दशमी ॥

शं नो देवः सविता त्रायमाणः शं नो भवंतूषसो विभातीः ।
शं नः पर्जन्यो भवतु प्रजाभ्यः शं नः क्षेत्रस्य पतिरस्तु शंभुः ॥

शं । नः । देवः । सविता । त्रायमाणः । शं । नः ।
भवंतु । उषसः । विऽभातीः ।
शं । नः । पर्जन्यः । भवतु । प्रऽजाभ्यः । शं । नः ।
क्षेत्रस्य । पतिः । अस्तु । शंऽभुः ॥ १०

देवः क्रीडनादिगुणयुक्तः सविता त्रायमाणो रक्षन् नोऽस्माकं शं शांत्यै भवतु । विभातीर्व्युच्छंत्य उषसोऽपि नोऽस्माकं शं शांत्यै भवंतु । नोऽस्माकं प्रजाभ्यः पर्जन्योऽपि शं भवतु । शंभुः सुखस्य भावयिता क्षेत्रस्य पतिर्नोऽस्माकं शं शांत्या अस्तु ॥

॥ इति पंचमस्य तृतीय एकोनत्रिंशो वर्गः ॥

॥ अथैकादशी ॥

शं नो देवा विश्वदेवा भवंतु शं सरस्वती सह धीभिरस्तु ।
शमभिषाचः शमु रातिषाचः शं नो दिव्याः पार्थिवाः शं नो अप्याः ॥ ११

शं । नः । देवाः । विश्वऽदेवाः । भवंतु । शं । सरस्वती ।
सह । धीभिः । अस्तु ।
शं । अभिऽसाचः । शं । ऊं इति । रातिऽसाचः । शं ।
नः । दिव्याः । पार्थिवाः । शं । नः । अप्याः ॥ ११

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

विश्वदेवा महत्त्वोपेताः देवा नोऽस्माकं शं शान्त्यै भवन्तु। सरस्वती च धीभिः स्तुतिभिः कर्मभिर्वा सह नोऽस्माकं शं शान्त्या अस्तु। अभिषाचो यज्ञाभिगताः सेव्यमानाश्च नः शं शान्त्यै भवन्तु। रातिषाचो दानं सेवमाना अपि मह्यं शान्त्या एव भवन्तु। दिव्या दिवि भवाश्च नोऽस्माकं शं शान्त्यै भवन्तु। पार्थिवाः पृथिव्यां संभूताश्च नः शं भवन्तु। अप्या अप्स्वन्तरिक्षे भवाश्च। आकाशभवा अप इत्यन्तरिक्षनामसु पाठात्। नोऽस्माकं शं शान्त्यै भवन्तु॥

॥ अथ द्वादशी ॥

शं नः सत्यस्य पतयो भवन्तु शं नो अर्वन्तः शमु सन्तु गावः।
शं न ऋभवः सुकृतः सुहस्ताः शं नो भवन्तु पितरो हवेषु॥ १२

शं। नः। सत्यस्य। पतयः। भवन्तु। शं। नः। अर्वन्तः।
शं। ऊं इति। सन्तु। गावः।
शं। नः। ऋभवः। सुऽकृतः। सुऽहस्ताः। शं। नः।
भवन्तु। पितरः। हवेषु॥ १२

सत्यस्य पतयः पालकाः सत्यशीला देवा नोऽस्माकं शं शान्त्यै भवन्तु। अर्वन्तोऽश्वाश्च नोऽस्माकं शं शान्त्यै भवन्तु। गावोऽपि नः शं शान्त्यै भवन्तु। सुकृतः सुकर्माणः सुहस्ताः शोभनहस्ता ऋभवोऽपि नोऽस्माकं शं शान्त्यै सन्तु। हवेषु स्तोत्रेषु सत्सु पितरोऽपि नोऽस्माकं शं शान्त्यै भवन्तु॥

॥ अथ त्रयोदशी ॥

शं नो अज एकपाद्देवो अस्तु शं नोऽहिर्बुध्न्य१ः शं समुद्रः।
शं नो अपां नपात्पेरुरस्तु शं नः पृश्निर्भवतु देवगोपाः॥ १३

शं। नः। अजः। एकऽपात्। देवः। अस्तु। शं। नः।
अहिः। बुध्न्यः। शं। समुद्रः।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

शं । नः । अपां । नपात् । पेरुः । अस्तु । शं । नः ।

पृश्निः । भवतु । देवऽगोपाः ॥ १३

अज एकपादज एकपादाख्यो देवो नोऽस्माकं शं शांत्या अस्तु । अहिर्बुध्न्यश्च नोऽस्माकं शं शांत्या अस्तु । समुद्रोऽपि नः शं शांत्या अस्तु । पेरुरुपद्रवेभ्यः पारयितापां नपादपांनपादाख्योऽपि देवो नोऽस्माकं शं शांत्या अस्तु । देवगोपाः । देवा गोपयितारो यस्यां सा । पृश्निर्मरुतां माता नोऽस्माकं शं शांत्यै भवतु ॥

॥ अथ चतुर्दशी ॥

आदित्या रुद्रा वसवो जुषंतेदं ब्रह्म क्रियमाणं नवीयः ।

शृण्वंतु नो दिव्याः पार्थिवासो गोजाता उत ये यज्ञियासः ॥१४

आदित्याः । रुद्राः । वसवः । जुषंत । इदं । ब्रह्म । क्रियमाणं ।

नवीयः ।

शृण्वंतु । नः । दिव्याः । पार्थिवासः । गोऽजाताः ।

उत । ये । यज्ञियासः ॥ १४

नवीयो नवतरमस्माभिः क्रियमाणमिदं ब्रह्म स्तोत्रमादित्या दिव्याः । अदितिर्द्यौरिति श्रुतेः । रुद्रा आंतरिक्षा वसवः पार्थिवाश्च जुषंत । जुषंतां । सेवंतां । अन्ये दिव्या दिवि भवाः पार्थिवासः पार्थिवा गोजाता गोः पृश्नेर्जाताः । नाको गौरिति साधारणनामसु पाठात् । उतापि च ये यज्ञियासो यज्ञार्हाः ते सर्वेऽपि नोऽस्माकं हवं शृण्वंतु ॥

। अथ पंचदशी ।

ये देवानां यज्ञिया यज्ञियानां मनोर्यजत्रा अमृता ऋतज्ञाः ।

ते नो रासंतामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः । १५

. CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

ये। देवानां। यज्ञियाः। यज्ञियानां। मनोः। यजत्राः।

अमृताः। ऋतऽज्ञाः।

ते। नः। रासंतां। उरुऽगायं। अद्य। यूयं। पात।

स्वस्तिऽभिः। सदा। नः॥ १५

यज्ञियानां यजनीयानां देवानामपि यज्ञिया यजनीया मनोः प्रजापतेश्च यजत्रा यजनीया अमृतां मरणरहिता ऋतज्ञाः सत्यज्ञा ये देवाः संति ते सर्वे उरुगायं बहुकीर्तिं पुत्रमद्य नोऽस्मभ्यं रासंतां। प्रयच्छंतु। सिद्ध एनोऽन्त्यः पादः॥

॥ इति पंचमस्य तृतीये त्रिंशो वर्गः॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये पंचमाष्टके तृतीयोऽध्यायः समाप्तः॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥

अथ पंचमाष्टके चतुर्थोऽध्याय आरभ्यते। तत्र षडृत्वात्मकस्य वासिष्ठस्य सप्तमस्य मंडलस्य तृतीयेऽनुवाके द्वाविंशति सूक्तानि। तत्र प्र ब्रह्मेति नवर्चं तृतीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं पूर्ववद्वैश्वदेवं। अनुक्रांतं च। प्र ब्रह्म नवेति॥ विनियोगो लैंगिकः॥

॥ तत्र प्रथमा ॥

प्र ब्रह्मैतु सदनादृतस्य वि रश्मिभिः ससृजे सूर्यो गाः।
वि सानुना पृथिवी सस्र उर्वी पृथु प्रतीकमध्येधे अग्निः॥ १

प्र। ब्रह्म। एतु। सदनात्। ऋतस्य। वि। रश्मिऽभिः।
ससृजे। सूर्यः। गाः।
वि। सानुना। पृथिवी। सस्रे। उर्वी। पृथु। प्रतीकं।
अधि। आ। ईधे। अग्निः॥ १

ऋतस्य यज्ञस्य सदनात् स्थानाद्देवयजनाद्देशाद्ब्रह्म स्तोत्रं स्तुत्यान् देवान् प्रैतु। प्रकर्षेण गच्छतु। किं तद्भवतीति तदाह। सूर्यः सर्वस्य प्रेरकः शोभनवीर्यो वा देवो रश्मिभिरात्मीयैः किरणैर्गा अपो वृष्ट्युदकानि विससृजे। विसृजति। विसिंचति। प्रवर्षति। श्रूयते हि। याभिरादित्यस्तपति रश्मिभिस्ताभिः पर्जन्यो वर्षतीति। स्मृतिश्च भवति। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति। अत इदं माहात्म्यं सूर्यस्यैव विद्यते नान्यस्य विदित्यनेन पादेन सूर्यः स्तूयते। अपि च पृथिवी प्रथिता भूमिः सानुना समुच्छ्रितेन पर्वतादिनोर्वी विस्तीर्णा सती विसस्रे। विसरति। व्याप्नोति। तथाग्निः पृथु विस्तीर्णं प्रतीकं पृथिव्या अवयवं देवयजनलक्षणं स्थानमधि। अधिपरी अनर्थकाविति कर्मप्रवचनीयसंज्ञायां कर्मप्रवचनीययुक्ते इति सप्तम्यर्थे द्वितीया॥ ईधे स्वात्मनैव। आदीप्यते॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ द्वितीया ॥

इमां वां मित्रावरुणा सुवृक्तिमिषं न कृण्वे असुरा नवीयः।

इनो वामन्यः पदवीरदब्धो जनं च मित्रो यतति ब्रुवाणः ॥ २

इमां। वां। मित्रावरुणा। सुऽवृक्तिं। इषं। न। कृण्वे।

असुरा। नवीयः।

इनः। वां। अन्यः। पदऽवीः। अदब्धः। जनं। च। मित्रः।

यतति। ब्रुवाणः ॥ २

हे असुरावसुरौ बलवंतौ हे मित्रावरुणा मित्रावरुणौ वां युवाभ्यामिषं न हवीरूपमन्नमिव नवीयो नवीयसीमिमामस्मदीयां पुरोवर्तिनीं सुवृक्तिं स्तुतिं कृण्वे। अहं स्तोता करोमि। वां युवयोरन्योऽन्यतर इनः प्रभुरदब्धः शत्रुभिरहिंसितो वरुणः पदवीः पदस्य स्थानस्य प्रजनयिता। वरुणो हि धर्माधर्मयोर्धारयितेति पदवीरित्युच्यते ॥ ब्रुवाणोऽस्माभिः स्तूयमानो मित्रश्च जनं सर्वं प्राणिजातं यतति। यातयति। प्रयत्नयति। तथा च श्रूयते। मित्रो जनान्यातयति ब्रुवाणः। ऋग्वे० ३, ५९, १, । इति ॥

॥ अथ तृतीया ॥

आ वातस्य ध्रजतो रन्त इत्या अपीपयन्त धेनवो न सूदाः।

महो दिवः सदने जायमानोऽचिक्रदद्वृषभः सस्मिन्नूधन् ॥ ३

आ। वातस्य। ध्रजतः। रंते। इत्याः। अपीपयंत। धेनवः।

न। सूदाः।

महः। दिवः। सदने। जायमानः। अचिक्रदत्। वृषभः।

सस्मिन्। ऊधन् ॥ ३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रजतो गच्छतो वातस्य वायोरित्या गतय आ रंते। अभितो रमंते। तथा दुहाः॥ दुह प्रेरणे इति धातुः॥ धीरस्य प्रेरयित्र्यो धेनवो न। नेति चार्थे। गावश्चापीपयंत। आप्याययंति। एधंते। अपि च महो महतो दिवो द्योतमानस्यादित्यस्य सदने स्थानेऽन्तरिक्षे आजगान उत्पद्यमानो वृषभो वर्षणशीलः पर्जन्यः अभिचूषन् तस्मिन्नंतरिक्षेऽभिक्रंदत्॥

॥ अथ चतुर्थी ॥

गिरा य एता युनजद्धरी त इंद्र प्रिया सुरथा शूर धायू।

प्र यो मन्युं रिरिक्षतो मिनात्या सुक्रतुमर्यमणं ववृत्यां ॥ ४

गिरा। यः। एता। युनजत्। हरी इति। ते। इंद्र।

प्रिया। सुऽरथा। शूर। धायू इति।

प्र। यः। मन्युं। रिरिक्षतः। मिनाति। आ। सुऽक्रतुं।

अर्यमणं। ववृत्यां॥ ४

अस्याः पूर्वोऽर्धर्च इंद्रस्तुतिरपरोऽर्धर्चः स्तुतिः। हे शूर विक्रांतेंद्र ते तव प्रिया प्रियौ सुरथा शोभनरथौ धायू धारकावेतौ हरी त्वदीयावश्वौ यो जनो गिरा स्तुतिरूपया वाचा युनजत् रथे युंज्यात् हे इंद्र त्वमस्य यागमागच्छेति शेषः। योऽयंमा रिरिक्षतो हिंसितुमिच्छतः शत्रोः संबंधिनं मन्युं कोपं प्र मिनाति प्रकर्षेण हिनस्ति सुक्रतुं शोभनकर्माणमर्यमणमा ववृत्यां। स्तुत्यावर्तयामि॥

॥ अथ पंचमी ।

यजंते अस्य सख्यं वयश्च नमस्विनः स्व ऋतस्य धामन्।

वि पृक्षो बाबधे नृभिः स्तवान इदं नमो रुद्राय प्रेष्ठं॥ ५

यजंते। अस्य। सख्यं। वयः। च। नमस्विनः। स्वे।

ऋतस्य। धामन्।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

वि। पृक्षः। बाबधे। नृऽभिः। स्तवानः। इदं। नमः।
रुद्राय। प्रेष्ठं॥ ५

अनया रुद्रः स्तूयते। यमस्मिन्नो रुभिलंपयावयंतः स्वे स्वकीये एतस्य यज्ञस्य धामन् धामनि स्थाने। स्वकीये यज्ञगृहे स्थिता इत्यर्थः। यस्य च गंतारः क्षोणि क्रुयोषा यजमाना एतस्य रुद्रस्य सख्यं सखित्वमुषिभः यच्छंते। पूजयंतु। नृभिर्नेतृभिः स्तवानः स्तूयमानो रुद्रः पृक्षोऽन्नं स्तोतृषु विबाबधे। विपक्ष्यति। ददातीत्यर्थः। प्रेष्ठ रुद्रस्य प्रियतममिदं नमस्कारं रुद्राय मया क्रियते॥

॥ इति पंचमस्य चतुर्थे प्रथमो वर्गः॥

॥ अथ षष्ठी॥

आ यत्साकं यशसो वावशानाः सरस्वती सप्तथी सिंधुमाता।
याः सुष्वयंत सुदुघाः सुधारा अभि स्वेन पयसा पीप्यानाः॥ ६

आ। यत्। साकं। यशसः। वावशानाः। सरस्वती।
सप्तथी। सिंधुऽमाता।
याः। सुस्वयंत। सुऽदुघाः। सुऽधाराः। अभि। स्वेनं।
पयंसा। पीप्यानाः॥ ६

यत् यासां गंगादीनां नदीनां मध्ये सिंधुमातृणां मातृभूता सरस्वत्येतदाख्या नदी सप्तथी सप्तमी भवति सुदुघाः कामान्दोग्धुं समर्थाः सुधाराः शोभनधारोपेताश्च नद्यः सुष्वयंत स्रवंति। गतिकर्मैतत्। प्रस्रवंति। स्वेन स्वकीयेन पयसोदकेनाभि-पीप्याना आप्यायमाना अभिवर्धयंत्यो यशसोऽन्नवत्यो वावशानाः कामयमाना नद्यः साकं युगपदेव आ गच्छंतु। आ इत्युपसर्गस्य योग्यक्रियाध्याहारः॥

॥ अथ सप्तमी॥

उत त्ये नो मरुतो मंदसाना धियं तोकं च वाजिनोऽवंतु।
मा नः परि ख्यदक्षरा चरंत्यवीवृधन्युज्यं ते रयिं नः॥ ७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उत। त्ये। नः। मरुतः। मंदसानाः। धियं। तोकं। च।

वाजिनः। अवंतु।

मा। नः। परि। ख्यत्। अक्षरा। चरंती। अवीवृधन्।

युज्यं। ते। रयिं। नः॥ ७

उतापि च मंदसाना मोदमाना वाजिनो वेगवंतस्त्ये ते मरुतो नोऽस्मदीयं धियं यज्ञाख्यं कर्म तोकं चास्मदीयं पुत्रं चावंतु। रक्षंतु। अक्षरा व्याप्ता चरंती वाग्देवता च नोऽस्मान् परि त्यक्त्वाऽस्मद्व्यतिरिक्तानन्यान्मा ख्यत्। मा द्राक्षीत्। ते पूर्वोक्ता मरुतो याश्च युज्यं युज्यमपि नोऽस्मदीयं रयिं धनमवीवृधन् वर्धयंतु॥

॥ अथाष्टमी ॥

प्र वो महीमरमतिं कृणुध्वं प्र पूषणं विदथ्यं१ न वीरं।

भगं धियोऽवितारं नो अस्याः सातौ वाजं रातिषाचं पुरंधिं॥८

प्र। वः। महीं। अरमतिं। कृणुध्वं। प्र। पूषणं। विदथ्यं।

न। वीरं।

भगं। धियः। अवितारं। नः। अस्याः। सातौ। वाजं।

रातिऽसाचं। पुरंऽधिं॥ ८

हे स्तोतारो वो यूयमरमतिमुपरतिरहितां महीं महतीं भूमिं प्रकृणुध्वं। आह्वयत। तथा विदथ्यं यज्ञार्हं वीरं न सर्वेषां प्रेरकं च पूषणमेतन्नामकं देवं प्रकृणुध्वं। तथास्या धियो नोऽस्मदीयस्यास्य कर्मणोऽवितारं रक्षितारं भगं देवं चाह्वयत। अपि च सातावस्मदीये यज्ञे युद्धे वा वाजमृभूणामन्यतमं देवमाह्वयत। कीदृशं वाजं। रातिषाचं दानं सचमानं पुरंधिं पुराणां धारयितारं॥

यज्ञपुच्छेऽध्यायं च इति चमसिनः स्वं स्वं चमसमभिमृशेयुः। सूचितं च। अध्यायं वो मरुतः श्लोक एत्वित्येतयाभिमृशंति। आ० ६, १२,। इति॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तत्रैषा नवमी ॥

अच्छायं वो मरुतः श्लोक एत्वच्छा विष्णुं निषिक्तपामवोभिः।

उत प्रजायै गृणते वयो धुर्यूयं पात स्वस्तिभिः सदा नः॥ ८

अच्छ। अयं। वः। मरुतः। श्लोकः। एतु। अच्छ। विष्णुं।

निषिक्तऽपां। अवःऽभिः।

उत। प्रऽजायै। गृणते। वयः। धुः। यूयं। पात।

स्वस्तिऽभिः। सदा। नः॥ ८

हे मरुतो वो युष्मानयं श्लोकोऽस्मदीयमिदं स्तोत्रमच्छैतु। अभिगच्छतु। निषिक्तपां निषिक्तस्य गर्भस्य रक्षितारं। यद्वा चमसे निषिक्तानां सोमानां पातारमवोभिरस्मद्विषयरक्षणैर्युक्तं विष्णुं चास्मदीयं स्तोत्रमच्छैतु। उतापि च मरुतो विष्णुश्च गृणते स्तुवते मह्यं प्रजायै पुत्ररूपां प्रजां वयोऽन्नं च धुः। अधुः। दधतु। हे मरुतो हे विष्णो यूयं स्वस्तिभिरविनाशैर्नोऽस्मान् सदा सर्वदा पात। रक्षत॥

॥ इति पंचमस्य चतुर्थे द्वितीयो वर्गः॥

आ वो वाहिष्ठ इत्यष्टर्चं चतुर्थं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वदेवं। अनुक्रम्यते च आ वोऽष्टाविति॥ विनियोगो लैंगिकः॥

॥ तत्र प्रथमा ॥

आ वो वाहिष्ठो वहतु स्तवध्यै रथो वाजा ऋभुक्षणो अमृक्तः।

अभि त्रिपृष्ठैः सवनेषु सोमैर्मदे सुशिप्रा महभिः पृणध्वं॥ १

आ। वः। वाहिष्ठः। वहतु। स्तवध्यै। रथः। वाजाः।

ऋभुक्षणः। अमृक्तः।

अभि। त्रिऽपृष्ठैः। सवनेषु। सोमैः। मदे। सुऽशिप्राः।

महऽभिः। पृणध्वं॥ १

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अनेन तृचेन ऋभवः स्तूयंते। ऋभुक्षणो विभ्वो वाजस्य तेजसो निवासभूता हे वाजा ऋभवो वाजिनो मोढृतमः स्तवध्यै स्तोतुमर्हो ऽस्मत्कः केनाप्यहिंसितो युष्मदीयो रथो वो युष्मान् गच्छतु। आ समंतादस्मदीयं यज्ञं प्रापयतु। हे सुशिप्राः शोभनहनवो यूयं तेन रथेनागत्य अपनेष्वस्मदीययज्ञेषु मदे मदनिमित्ते त्रिपृष्ठैः क्षीरदधिसक्तुमिश्रै-रंशुभिर्मंथद्भिः सोमैरभिषुणाध्वं युष्मदीयं जठरमभिपूरयत। स रथो युष्मानागच्छत्विति पूर्वेणान्वयः॥

॥ अथ द्वितीया ॥

यूयं ह रत्नं मघवत्सु धत्थ स्वर्दृशं ऋभुक्षणो अमृक्तं।

सं यज्ञेषु स्वधावंतः पिबध्वं वि नो राधांसि मतिभिर्दयध्वं ॥२

यूयं। ह। रत्नं। मघवत्ऽसु। धत्थ। स्वःऽदृशः।

ऋभुक्षणः। अमृक्तं।

सं। यज्ञेषु। स्वधाऽवंतः। पिबध्वं। वि। नः। राधांसि।

मतिऽभिः। दयध्वं। २

हे ऋभुक्षणो हे ऋभवः स्वर्दृशः स्वर्गं पश्यंतो यूयं ह यूयमेव मघवत्सु हवि-र्लक्षणधनवत्सु निमित्तेष्वमृक्तमहिंसितं। चोरादिभिरनपहृतमित्यर्थः। रत्नं रमणीयं धत्थ। धारयथ। तदनंतरं स्वधावंतो बलवंतस्ते यूयं यज्ञेष्वस्मदीययज्ञेषु सं पिबध्वं। सम्यक् सोमं पिबत। अपि च यूयं मतिभिर्धनहेतुभिर्नोऽस्मभ्यं राधांसि धनानि वि दयध्वं। विशेषेण दत्त॥

॥ अथ तृतीया ॥

उवोचिथ हि मघवन्देष्णं महो अर्भस्य वसुनो विभागे।

उभा ते पूर्णा वसुना गभस्ती न सूनृता नि यमते वसव्या ॥ ३

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

उवोचिथ। हि। मघऽवन्। देष्णं। महः। अर्भस्य। वसुनः।

विऽभागे।

उभा। ते। पूर्णा। वसुना। गभस्ती इति। न। सूनृता।

नि। यमते। वसव्या॥ ३

उवोचिथेत्याद्याः पंचर्चं इंद्रदेवताकाः। हे मघवन् धनवन्निंद्र त्वं महो महतोऽर्भस्याल्पस्य च वसुनो धनस्य विभागे परिच्छेदानुकूले दाननिमित्ते देष्णं धनमुवोचिथ हि। सेवसे खलु। उचतिः सेवाकर्मा॥ तथा ते त्वदीयावुभावपि गभस्ती बाहू वसुना धनेन पूर्णौ। संपूर्णौ भवतः। ते त्वदीया सूनृता वाक् वसव्या वसूनि धनानि न नियमते न। नियच्छति। यद्वा वसव्या वसुषु धनेषु साधुः सूनृता वाक् धनेन संपूर्णौ त्वदीयौ बाहू न नियच्छति। मात्सर्यं प्रदापयतीत्यर्थः॥

॥ अथ चतुर्थी ॥

त्वमिंद्र स्वयशा ऋभुक्षा वाजो न साधुरस्तमेष्यृक्वा।

वयं नु ते दाश्वांसः स्याम ब्रह्म कृण्वंतो हरिवो वसिष्ठाः॥ ४

त्वं। इंद्र। स्वऽयशाः। ऋभुक्षाः। वाजः। न। साधुः।

अस्तं। एषि। ऋक्वा।

वयं। नु। ते। दाश्वांसः। स्याम। ब्रह्म। कृण्वंतः।

हरिऽवः। वसिष्ठाः॥ ४

हे इंद्र स्वयशा असाधारणकीर्तिर्ऋभुक्षा ऋभुनिवासक ऋभूणामीश्वरो वा त्वं साधुः साधको वाजो न अर्वा इव ऋक्वा ऋक्मान् स्तोतृभिः स्तुतोऽस्तं गृहमेषि। प्राप्नुहि। नु अद्य वसिष्ठा एतत्संज्ञका ऋषयो वयं हे हरिवः अश्वाभ्यामुपेतेंद्र ते त्वदर्थं दाश्वांसो हविर्देयचाग्रं दत्तवंतो ब्रह्म स्तोत्रं कृण्वंतः कुर्वंतः संतः स्याम। भवेम॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ पंचमी ॥

सनितासि प्रवतो दाशुषे चिद्याभिर्विवेषो हर्यश्व धीभिः ।

ववन्मा नु ते युज्याभिरूती कदा न इंद्र राय आ दशस्येः ॥ ५

सनिता । असि । प्रऽवतः दाशुषे । चित् । याभिः । विवेषः ।

हरिऽअश्व । धीभिः ।

ववन्म । नु । ते । युज्याभिः । ऊती । कदा । नः । इंद्र ।

रायः । आ । दशस्येः ॥ ५

हे हर्यश्व हरिनामकाश्वेंद्र त्वं याभिर्धीभिरस्मदीयाभिः स्तुतिभिर्विवेषः व्याप्नोषि स त्वं दाशुषे चित् हविर्दत्तवते यजमानायापि प्रवतः प्रवणस्य धनस्य सनितासि । दाता भवसि । अपि च हे इंद्र त्वं नोऽस्मभ्यं कदा कस्मिन् काले रायो धनान्यादशस्येः । प्रयच्छेः । नु अद्य ते तव युज्याभिर्योग्याभिरूती ऊतिभी रक्षाभिर्ववन्म । त्वां संभजेम ॥

॥ इति पंचमस्य चतुर्थे तृतीयो वर्गः ॥

॥ अथ षष्ठी ।

वासयसीव वेधसस्त्वं नः कदा न इंद्र वचसो बुबोधः ।

अस्तं तात्या धिया रयिं सुवीरं पृक्षो नो अर्वा न्युहीत वाजी ॥ ६

वासयसिऽइव । वेधसः । त्वं । नः । कदा । नः । इंद्र ।

वचसः । बुबोधः ।

अस्तं । तात्या । धिया । रयिं । सुऽवीरं । पृक्षः । नः ।

अर्वा । नि । उहीत । वाजी ॥ ६

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

हे इंद्र त्वं कदा कस्मिन्काले नोऽस्मदीयं वचसो वचरूपं स्तोत्रं बुबोधः । अवगच्छेः । तथा च त्वं वेधसः स्तोतॄनस्माभ्यासयसीव । इवेदानीमर्थे । इदानीं स्वकीये स्थानेऽवस्थापयसि । किंच वाजी बलवानन्नो वेगवान् त्वदीयोऽश्वस्तोत्रा ॥ तनोतेरिदं रूपं ॥ संततया धियाधन्मेरितया स्तुत्या हेतुभूतया सुवीरं शोभनपुत्रोपेतं रयिं त्वदीयं धनं इषोऽन्नं च नोऽस्मदीयमन्नं स्वइं न्युहीत । नियच्छेत् ॥

॥ अथ सप्तमी ॥

अभि यं देवी निर्ऋतिश्चिदीशे नक्षंत इंद्रं शरदः सुपृक्षः ।
उप त्रिबंधुर्जरदष्टिमेत्यस्ववेशं यं कृणवंत मर्ताः ॥ ७

अभि । यं । देवी । निःऽऋतिः । चित् । ईशे । नक्षंते ।
इंद्रं । शरदः । सुऽपृक्षः ।
उप । त्रिऽबंधुः । जरत्ऽअष्टिं । एति । असुऽवेशं । यं ।
कृणवंत । मर्ताः ॥ ७

देवी द्योतमाना निर्ऋतिश्चित् भूमिरपीशे ॥ तत्वार्थे केप्रत्ययः ॥ ईशितव्यास्वभूता सती यमिंद्रमभिनक्षते व्याप्नोति । सुपृक्षः शोभनान्नैरुपेताः शरदः संवत्सराय यमिंद्रं नक्षंते व्याप्नुवंति । मर्ता मरणधर्माणः स्तोतारो यं यमिंद्रमस्ववेशं स्वकीये स्थानेनुपविशंतं कृणवंत कुर्वंति त्रिबंधुस्त्रयाणां लोकानां बंधको धारकः स इंद्रो जरदष्टिं जरत्कीर्णंमष्टिरशनं यस्य यवस्य हेतुभूतं तद्वस्तुपैति । उपगच्छति ॥

॥ अथाष्टमी ॥

आ नो राधांसि सवितः स्तवध्या आ रायो यंतु पर्वतस्य रातौ ।
सदा नो दिव्यः पायुः सिषक्तु यूयं पात स्वस्तिभिः सदा नः ॥ ८

आ । नः । राधांसि । सवितः । स्तवध्यै । आ । रायः ।
यंतु । पर्वतस्य । रातौ ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

सदा । नः । दिव्यः । पायुः । सिसक्तु । यूयं । पात ।

स्वस्तिऽभिः । सदा । नः ॥ ८

हे सवितः सर्वस्य प्रेरक देव त्वत्सकाशादारभ्यपथ्यै स्तोतृं योग्यानि राधांसि धनानि नोऽस्मानायंतु । आगच्छंतु । पर्वतस्य । पर्वत इति कश्चिदिंद्रस्य सखा । एतन्नामकस्य देवस्य रातौ दाने सति राधो धनान्यस्मानायंतु । पायुः सर्वस्य पालको दिव्यो दिवि भवः स इंद्रः सदा सर्वदा नोऽस्मान् सिषक्तु । रक्षकत्वेन सेवतां । अस्मिन्सूक्ते ये प्रतिपादिता देवास्ते सर्वे यूयं नोऽस्मान् स्वस्तिभिः कल्याणैः सदा पात । पालयत ॥

॥ इति पंचमस्य चतुर्थे चतुर्थो वर्गः ॥

उदु ष्य देव इत्यष्टर्चं पंचमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं सवितृदेवताकं । सप्तम्य-ष्टम्यौ वाजिदेवताके । भगमुग्रोऽस्य इत्यर्धर्चो भगदेवत्यः सावित्रो वा । तथा चानुक्रमणिका । उदु ष्य सावित्रमंत्ये वाजिन्यौ भगमिति भागो वार्धर्च इति ॥ गतः सूक्तविनियोगः ॥

॥ तत्र प्रथमा ॥

उदु ष्य देवः सविता ययाम हिरण्ययीममतिं यामशिश्रेत् ।

नूनं भगो हव्यो मानुषेभिर्वि यो रत्ना पुरुवसुर्दधाति ॥ १

उत् । ऊं इति । स्यः । देवः । सविता । ययाम । हिरण्ययीं ।

अमतिं । यां । अशिश्रेत् ।

नूनं । भगः । हव्यः । मानुषेभिः । वि । यः । रत्ना ।

पुरुऽवसुः । दधाति ॥ १

सविता सर्वस्य प्रेरकः स्यः स देवो हिरण्ययीं सुवर्णमयीं याममतिं । रूपना-मैतत् । रूपं । प्रभामित्यर्थः । अशिश्रेत् आश्रयति तामवमतिमुद्ययाम । उद्यच्छति । उद्गमयति । उ इति पादपूरणः । नूनमद्य भगो भजनीयो यः सविता मानुषे-भिर्मनुष्यैः स्तोतृभिर्हव्यो ह्वातव्यः स्तोतव्यो भवति । पुरुवसुर्बहुधनो यो देवः स्तोतृभ्यो रत्ना रत्नानि रमणीयानि धनानि विदधाति करोति स सविता देवस्तामम-तिमुद्ययामेति पूर्वेण संबंधः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ द्वितीया ॥

उदु तिष्ठ सवितः श्रुध्य१स्य हिरण्यपाणे प्रभृतावृतस्य ।

व्यु१र्वीं पृथ्वीममतिं सृजान आ नृभ्यो मर्तभोजनं सुवानः ॥ २

उत् । ऊं इति । तिष्ठ । सवितरिति । श्रुधि । अस्य ।

हिरण्यऽपाणे । प्रऽभृतौ । ऋतस्य ।

वि । उर्वीं । पृथ्वीं । अमतिं । सृजानः । आ । नृऽभ्यः ।

मर्तऽभोजनं । सुवानः ॥ २

हे सवितः सर्वस्य प्रेरयितर्देव त्वमुत्तिष्ठ । ऊर्ध्वं गच्छ । ततो हे हिरण्यपाणे हे सुवर्णहस्त त्वमस्मदभीष्टप्रदानाय ऋतस्य यज्ञस्य प्रभृतौ प्रणयनेऽस्मदीयमिदं स्तोत्रं श्रुधि । शृणु । उ इति पूरणः । कीदृशस्त्वं । उर्वीं विस्तीर्णां पृथ्वीं प्रथितामम्रतिं रूपं प्रभां विसृजानो विसृजन् नृभ्यो नेतृभ्यः स्तोतृभ्यो मर्तभोजनं मनुष्याणां भोगयोग्यं धनमासुवानः प्रेरयन् । एवंभूतस्त्वमिदं स्तोत्रं शृण्विति संबंधः ॥

॥ अथ तृतीया ॥

अपि ष्टुतः सविता देवो अस्तु यमा चिद्विश्वे वसवो गृणन्ति ।

स नः स्तोमान्नमस्य१श्चनो धाद्विश्वेभिः पातु पायुभिर्नि

सूरीन् ॥ ३

अपि । स्तुतः । सविता । देवः । अस्तु । यं । आ । चित् ।

विश्वे । वसवः । गृणन्ति ।

सः । नः । स्तोमान् । नमस्यः । चनः । धात् । विश्वेभिः ।

पातु । पायुऽभिः । नि । सूरीन् ॥ ३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अपि च सविता देवोऽस्माभिः स्तुतोऽस्तु । अस्मदीयाः स्तुतीः शृणोत्वित्यर्थः । विश्वे वसवश्चित् सर्वे देवा अपि यं सवितारमाभिगृणंति अभिष्टुवंति नमस्यः सर्वैर्नमस्करणीयः स देवः स्तोमायास्मदीयानि स्तोत्राणि चनोऽन्नं धात् । दधातु । सफलानि करोतु । विश्वेभिर्विश्वैः सर्वैः पायुभिः पालनैः सूरीन् स्तोतॄनस्मानपि पातु । नितरां पालयतु ॥

॥ अथ चतुर्थी ॥

अभि यं देव्यदितिर्गृणाति सवं देवस्य सवितुर्जुषाणा ।

अभि सम्राजो वरुणो गृणंत्यभि मित्रासो अर्यमा सजोषाः ॥ ४

अभि । यं । देवी । अदितिः । गृणाति । सवं । देवस्य ।

सवितुः । जुषाणा ।

अभि । सम्ऽराजः । वरुणः । गृणंति । अभि । मित्रासः ।

अर्यमा । सऽजोषाः ।

देवी द्योतमानादितिरदीना देवमाता यं सवितारमभिगृणाति अभिष्टौति । कीदृशी । सवितुर्देवस्यैव सवं प्रसवमनुज्ञां जुषाणा सेवमाना । सम्राजः सम्यग्राजमाना वरुणः । उपलक्षणमेतत् । वरुणादयो देवा यं सवितारमभिगृणंति अभिष्टुवंति । मित्रासो मित्रादयश्च सजोषाः समानप्रीतिरर्यमैतत्संज्ञको देवश्च यमभिगृणंति स नः स्तोमांश्चनो धादिति पूर्वयर्चा संबंधः ॥

॥ अथ पंचमी ॥

अभि ये मिथो वनुषः सपंते रातिं दिवो रातिषाचः पृथिव्याः ।

अहिर्बुध्न्य उत नः शृणोतु वरूत्र्येकधेनुभिर्नि पातु ॥ ५

अभि । ये । मिथः । वनुषः । सपंते । रातिं । दिवः ।

रातिऽसाचः । पृथिव्याः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अहिः । बुध्न्यः । उत । नः । शृणोतु । वरूत्री ।

एकधेनुऽभिः । नि । पातु ॥ ५

रातिषाचो दानसेविनो वसुषः संभक्तारो ये यजमाना मिथः परस्परं संहता भूत्वा सवितारमभिलक्ष्य सपंते परिचरंति। कोऽयं। दिवो द्युलोकस्य पृथिव्या भूमेश्च रातिं मित्रभूतं। उतापि चाहिर्बुध्न्यः। बुध्नेऽन्तरिक्षे भवो बुध्न्यः। एतीत्यहिः। एतत्पदद्वयाभिधो मध्यमस्थानोऽग्निरहिर्बुध्न्य इत्युच्यते। सवितुर्मित्रभूतः सोऽपि तेषां नोऽस्माकं सवितृविषयं स्तोत्रं शृणोतु। तथा वरूत्री वाग्देवी च सवितृसहिता सत्येकधेनुभिर्मुख्याभिर्गोभिर्नो पातु। नितरामस्मान्पालयतु॥

॥ अथ षष्ठी ॥

अनु तन्नो जास्पतिर्मंसीष्ट रत्नं देवस्य सवितुरियानः ।

भगमुग्रोऽवसे जोहवीति भगमनुग्रो अध याति रत्नं ॥ ६

अनु । तत् । नः । जाःपतिः । मंसीष्ट । रत्नं । देवस्य ।

सवितुः । इयानः ।

भगं । उग्रः । अवसे । जोहवीति । भगं । अनुग्रः । अध ।

याति । रत्नं ॥ ६

इयानोऽभियाच्यमानो जास्पतिः प्रजानां पालकः सविता देवः सवितुर्देवस्य तस्य संबंधि रत्नं रमणीयं तत्प्रसिद्धं धनं नोऽस्माकमनुमंसीष्ट। अनुमन्यतां। उग्र ओजस्वी स्तोता भगं भजनीयं सवितारं भगसंज्ञकं देवं वावसे नोऽस्माकं रक्षणाय जोहवीति। भृशं ह्वयति। अथापि चानुग्रोऽसमर्थः स्तोता भगं तत्संज्ञकं सवितारं वा रत्नं रमणीयं तत्प्रसिद्धं धनं याति। याचते॥

वैश्वदेवे पर्वणि वाजिनस्य हविषः शं नो भवंत्वित्यादिके द्वे याज्यानुवाक्ये। सूत्रितं च। शं नो भवंतु वाजिनो हवेषु वाजे वाजेऽवत वाजिनो न इत्युभे पुरस्तान्याज्यां। आ० २, १६। इति॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तत्रैषा सप्तमी ॥

शं नो भवंतु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः।
जंभयंतोऽहिं वृकं रक्षांसि सनेम्यस्मद्युयवन्नमीवाः॥ ७

शं। नः। भवंतु। वाजिनः। हवेषु। देवऽताता।
मितऽद्रवः। सुऽअर्काः।
जंभयंतः। अहिं। वृकं। रक्षांसि। सनेमि। अस्मत्।
युयवत्। अमीवाः। ७

देवताता देवतातौ यज्ञे हवेष्वाह्वानेषु स्तोत्रेषु मितद्रवो मितद्रवणा मितगामिनः स्वर्काः शोभनान्ना वाजिन एतदभिधायका देवा नोऽस्माकं शं सुखाय भवंतु। अपि चाहिमागत्य हंतारं वृकं वस्तूनामादातारं। चोरमिति शेषः। रक्षांसि च जंभयंतो हिंसंतो वाजिनो देवाः सनेमि॥ पुराणनामैतत्॥ पुरातना अमीवा रोगानस्मत्तो युयवन्। पृथक् कुर्वंतु॥

॥ अथाष्टमी ॥

वाजेवाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः।
अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः॥ ८

वाजेऽवाजे। अवत। वाजिनः। नः। धनेषु। विप्राः।
अमृताः। ऋतऽज्ञाः।
अस्य। मध्वः। पिबत। मादयध्वं। तृप्ताः। यात।
पथिऽभिः। देवऽयानैः। ८

हे वाजिन एतन्नामका देवा विप्रा मेधाविनोऽमृता अमरणधर्माण ऋतज्ञाः सत्यं जानंत एवंभूताः संतो यूयं वाजे वाजे सर्वेषु युद्धेषु नोऽस्मान्धनेषु धननिमित्तेष्ववत।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पाययत। ततो यूयमस्य मध्वो मधुरोपेतमिमं सोमं पिबत। सोमपानानंतरं मादयध्वं। यूयं तृप्ता भवत। ततस्तृप्ता यूयं देवयानैर्देवगमनसाधनैः पथिभि-र्यात। गच्छत॥

॥ इति पंचमस्य चतुर्थे पंचमो वर्गः ॥

ऊर्ध्वो अग्निरिति सप्तर्चं षष्ठं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वदेवं। ऊर्ध्वः सप्त वैश्वदेवं त्वित्यनुक्रमणिका॥ सूक्तविनियोगो लैंगिकः॥ द्वितीये छंदोमे प्रउगशस्त्र ऊर्ध्वो अग्निरिति वैश्वदेवस्तृचः। सूत्रितं च। ऊर्ध्वो अग्निः सुमतिं वस्वो अश्रेदुत स्या नः सरस्वती जुषाणेति प्रउगं। आ० ८.१०.। इति॥

॥ तत्र प्रथमा ॥

ऊर्ध्वो अग्निः सुमतिं वस्वो अश्रेत्प्रतीची जूर्णिर्देवतातिमेति।
भेजाते अद्री रथ्येव पंथामृतं होता न इषितो यजाति॥ १

ऊर्ध्वः। अग्निः। सुऽमतिं। वस्वः। अश्रेत्। प्रतीची।
जूर्णिः। देवऽतातिं। एति।
भेजाते इति। अद्री इति। रथ्याऽइव। पंथां। ऋतं। होता।
नः। इषितः। यजाति॥ १

अग्निरंगनादिगुणविशिष्ट ऊर्ध्व उद्गमनः सन् वस्वो वासकस्य स्तोतुः सुमतिमस्मदीयां शोभनां स्तुतिमश्रेत्। अश्रयतु। सेवतां। प्रतीच्यभिमुखी जूर्णिः सर्वासां प्रजानां जरयित्र्युषोदेवता देवतातिं यज्ञमेति। गच्छति। अद्री आद्रियंतो श्रद्धा-वंतौ पत्नीयजमानौ पंथां पंथानं यज्ञमार्गं रथ्येव रथिनाविव भेजाते। सेवाते। तथेषितः संप्रेषितो नोऽस्मदीयो होता ऋतं यज्ञं यजाति। यजतु। करोत्वित्यर्थः॥

॥ अथ द्वितीया ॥

प्र वावृजे सुप्रया बर्हिरेषामा विश्पतीव बीरिट इयाते।
विशामक्तोरुषसः पूर्वहूतौ वायुः पूषा स्वस्तये नियुत्वान्॥ २

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

प्र । ववृजे । सुऽप्रयाः । बर्हिः । एषां । आ ।
विश्पती इवेति विश्पती इव । बीरिटे । इयाते इति ।
विशां । अक्तोः । उषसः । पूर्वऽहूतौ । वायुः । पूषा ।
स्वस्तये । नियुत्वान् ॥ २

एषां यजमानानां संबंधि सुप्रयाः शोभनान्नेन युक्तं बर्हिः कुशमयं प्रववृजे । प्रवृज्यते । आसाद्यत इत्यर्थः । विश्पतीव । इवेतीदानीमर्थे । इदानीमस्मदीयानां प्रजानां पालकौ नियुत्वान् । नियुच्छब्देन वडवा उच्यंते । तद्वान्वायु पूषा च विशां प्रजानां स्वस्तये क्षेमायाक्तो रात्रेः संबंधिन्या उषसः सकाशात्पूर्वंहूतौ पूर्वाह्वाने सति बीरिटेंऽतरिक्ष इयाते । आगच्छतां । यद्वा विश्पतीवेत्युपमा । विशां मनुष्याणां बीरिटे गणे विश्पती राजानौ यथागच्छतां तद्वत् । अस्मिन्पक्षे विशामित्युभयत्र संबध्यते ॥

। अथ तृतीया ।

ज्मया अत्र वसवो रंत देवा उरावंतरिक्षे मर्जयंत शुभ्राः ।
अर्वाक्पथ उरुज्रयः कृणुध्वं श्रोता दूतस्य जग्मुषो नो अस्य ॥ ३

ज्मयाः । अत्र । वसवः । रंत । देवाः । उरौ । अंतरिक्षे ।
मर्जयंत । शुभ्राः ।
अर्वाक् । पथः । उरुऽज्रयः । कृणुध्वं । श्रोत । दूतस्य ।
जग्मुषः । नः । अस्य ॥ ३

वसवो वसुसंज्ञका देवा अत्रास्मिन्यज्ञे ज्मयाः पृथिव्यां रंत । रमयंतां । उरौ विस्तीर्णेऽतरिक्षे स्थिताः शुभ्रा दीप्यमाना मरुतश्च मर्जयंत । परिचर्यंते । हे उरुज्रयः प्रभूतगमना वसवो मरुतश्च यूयं पथो युष्मदीयान्मार्गानस्मदभिमुखं यथा भवति तथा कृणुध्वं । कुरुत । अपि च यूयं जग्मुषो युष्मान्प्रति गच्छतो नोऽस्मदीयस्यास्य दूतस्याग्नेराह्वानं श्रोत । शृणुत । अग्निर्हि यजमानानां दूतः सन् देवानाह्वयतीत्यर्थः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ चतुर्थी ॥

ते हि यज्ञेषु यज्ञियास ऊमाः सधस्थं विश्वे अभि संति देवाः।
ताँ अध्वर उशतो यक्ष्यग्ने श्रुष्टी भगं नासत्या पुरंधिं ॥ ४

ते। हि। यज्ञेषु। यज्ञियासः। ऊमाः। सधऽस्थं। विश्वे।
अभि। संति। देवाः।
तान्। अध्वरे। उशतः। यक्षि। अग्ने। श्रुष्टी। भगं।
नासत्या पुरंऽधिं ॥ ४

यज्ञेषु यागेषु ते हि ते खलु यज्ञिया यज्ञियासो यज्ञार्हा ऊमा रक्षका विश्वे सर्वे देवाः सधस्थं सहस्थानमभिसंति। अभिभवंति। आक्रामंति। हे अग्ने अध्वरेऽध्वरे यज्ञे उशतः कामयमानांस्तान्देवान्यक्षि। यज। तथा श्रुष्टी। क्षिप्रनामैतत्। क्षिप्रं भगमेतत्संज्ञकं देवं नासत्या नासत्यावश्विनौ च पुरंधिं बहुधियं चातारमिंद्रं च यज ॥

॥ अथ पंचमी ॥

आग्ने गिरो दिव आ पृथिव्या मित्रं वह वरुणमिंद्रमग्निं।
आर्यमणमदितिं विष्णुमेषां सरस्वती मरुतो मादयंतां ॥ ५

आ। अग्ने। गिरः। दिवः। आ। पृथिव्याः। मित्रं। वह।
वरुणं। इंद्रं। अग्निं।
आ। अर्यमणं। अदितिं। विष्णुं। एषां। सरस्वती।
मरुतः। मादयंतां ॥ ५

हे अग्ने त्वं दिवो द्युलोकादस्मदीयाश्च गिरो यान् स्तुत्यान्देवानस्मदीयं यज्ञं प्रत्यावह। आह्वानं कुरु। पृथिव्या अंतरिक्षाच्चावह। कान्देवानिति तदुच्यते। मित्रमेतत्संज्ञं वरुणं चेंद्रं च देवेषु देवतारूपेणावस्थितं चाग्निमर्यमणमेतत्संज्ञकमदितिमदीनां पृथिवीं च विष्णुं च। एवंभूतान्देवान्देवानस्माकं यजमानानामभ्यावह। सरस्वती वाग्देवता च मरुतश्च मादयंतां। अस्मदीयैः स्तोत्रैर्हविर्भिश्च मादयंतु ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ षष्ठी ॥

इरे हव्यं मतिभिर्यज्ञियानां नक्षत्कामं मर्त्यानामसिन्वन् ।

धाता रयिमविदस्यं सदासां सक्षीमहि युज्येभिर्नु देवैः ॥ ६

इरे । हव्यं । मतिऽभिः । यज्ञियानां । नक्षत् । कामं ।

मर्त्यानां । असिन्वन् ।

धात । रयिं । अविऽदस्यं । सदाऽसां । सक्षीमहि । युज्येभिः ।

नु । देवैः ॥ ६

यज्ञियानां ॥ चतुर्थ्यर्थे षष्ठी ॥ यज्ञार्हेभ्यो देवेभ्यो मतिभिरस्मदीयाभिः स्तुतिभिः सह हव्यं हवी इरे । अस्माभिर्दीयते । मर्त्यानां मनुष्याणामस्माकं काममभिलाषमसिन्वन्नप्रतिबध्नन्नग्निर्नक्षत् । अस्मदीयं यज्ञं व्याप्नोतु । हे देवा यूयमविदस्यमनुपक्षयणीयं सदासां सर्वदा संभजनीयं रयिं धनं धात । अस्मभ्यं दत्त । तु क्षिप्रं वयं युज्येभिः सहायभूतैरिव यज्ञे समागतैर्देवैः सचेमहि । वधा तु इत्युपमार्थः । युज्येभिर्नु बंधुभिरिव देवैः सचीमहि ॥

॥ अथ सप्तमी ॥

नू रोदसी अभिष्टुते वसिष्ठैर्ऋतावानो वरुणो मित्रो अग्निः ।

यच्छंतु चंद्रा उपमं नो अर्कं यूयं पात स्वस्तिभिः सदा नः ॥ ७

नु । रोदसी इति । अभिस्तुते इत्यभिऽस्तुते । वसिष्ठैः ।

ऋतऽवानः । वरुणः । मित्रः । अग्निः ।

यच्छंतु । चंद्राः । उपऽमं । नः । अर्कं । यूयं । पात ।

स्वस्तिऽभिः । सदा । नः ॥ ७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नु अद्य रोदसी द्यावापृथिव्यौ वसिष्ठैरस्माभिः। पूजार्थं बहुवचनं। अभिष्टुते अभितः सर्वतः स्तुते अभूतां। तथा वरुणो मित्रोऽग्निश्चैवंभूता देवा अस्माभिरभिष्टुता आसन्। चंद्रा आह्लादका देवा नोऽस्मभ्यमर्कमर्चनीयमन्नमुपमं सर्वोत्कृष्टं यच्छंतु। ददतु। ऋक्षि। प्रतिपादिता ये देवास्ते सर्वे यूयं नोऽस्मान् स्वस्तिभिरविनाशैः सदा सर्वदा पात। पालयत॥

॥ इति पंचमस्य चतुर्थे षष्ठो वर्गः॥

ओ श्रुष्टिरिति सप्तर्चं सप्तमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वदेवं। ओ श्रुष्टिरित्यनुक्रांतं॥ विनियोगो लैंगिकः॥

॥ तत्र प्रथमा॥

ओ श्रुष्टिर्विदथ्या३ समेतु प्रति स्तोमं दधीमहि तुराणां।
यदद्य देवः सविता सुवाति स्यामास्य रत्निनो विभागे॥ १

ओ इति। श्रुष्टिः। विदथ्या। सं। एतु। प्रति। स्तोमं।
दधीमहि। तुराणां।
यत्। अद्य। देवः। सविता। सुवाति। स्याम। अस्य।
रत्निनः। विऽभागे॥ १

हे देवा विदथ्या विदथेन त्वदीयेन वित्तेन संपाद्या श्रुष्टिः सुखमस्मान् ओ आ समेतु। आगच्छतु। अथवा श्रुष्टिर्वेगवती विदथ्या विदथे यज्ञे क्रियमाणाऽस्मदीया स्तुतिर्युष्मानागच्छतु। वयं तुराणां वेगवतां देवानां स्तोमं स्तोत्रं प्रतिदधीमहि। कुर्वीमहि। यदद्येदानीं सविता देवो धनं सुवाति अस्मभ्यं प्रेरयेत् रत्निनो रमणीयधनवतोऽस्य सवितुस्तस्य धनस्य विभागे दाने स्याम। वयं भवेम॥

॥ अथ द्वितीया॥

मित्रस्तन्नो वरुणो रोदसी च द्युभक्तमिंद्रो अर्यमा ददातु।
दिदेष्टु देव्यदिती रेक्णो वायुश्च यन्नियुवैते भगश्च॥ २

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

मित्रः। तत्। नः। वरुणः। रोदसी इति। च। द्युऽभक्तं।
इंद्रः। अर्यमा। ददातु।
दिदेष्टु। देवी। अदितिः। रेक्णः। वायुः। च। यत्।
नियुवैते इति निऽयुवैते। भगः। च॥२

मित्रो देवो नोऽस्मभ्यं तत्प्रसिद्धं धनं ददातु। प्रयच्छतु। तथा वरुणो ददातु। रोदसी च द्यावापृथिव्यौ च दत्तां। तथेंद्रो द्युभक्तं द्युभिर्दीप्यमानैः स्तोतृभिः सेवितं तद्धनं ददातु। अर्यमा च ददातु। तथादितिर्देवी रेक्णो धनं दिदेष्टु। तद्धनमस्मभ्यं दिशतु। वायुश्च भगश्चोभौ देवौ यद्धनं नियुवैते अस्मास्विमिश्रितं योजयेतां तद्धनमिति पूर्वेण संबंधः॥

॥ अथ तृतीया ॥

सेदुग्रो अस्तु मरुतः स शुष्मी यं मर्त्यं पृषदश्वा अवाथ।
उतेमग्निः सरस्वती जुनंति न तस्य रायः पर्येतास्ति॥३

सः। इत्। उग्रः। अस्तु। मरुतः। सः। शुष्मी। यं।
मर्त्यं। पृषत्ऽअश्वाः। अवाथ।
उत। ईं। अग्निः सरस्वती। जुनंति। न। तस्य। रायः।
परिऽएता। अस्ति॥३

हे पृषदश्वाः पृषच्छब्देन केचिन्मृगविशेषा उच्यंते। त एवाश्वा वाहा येषां ते। यथंभूता हे मरुतो रुद्रपुत्रा देवा यूयं मर्त्यं मरणधर्माणं यं यजमानमवाथ पालयेत सेत् स एव यजमान उग्रोऽस्तु। ओजस्वी भवतु। तथा स शुष्मी बलवान् भवतु। तथोतापि अग्निरंचनादिगुणयुक्तो देवः सरस्वती वाग्देवता चेत्याद्याः सर्वे देवा ईमेनं यजमानं जुनंति। प्रेरयंति। तस्य यजमानस्य संबंधिनो रायो धनस्य कश्चिदपि पर्येता परिगंता नास्ति। नाशको न भवतीत्यर्थः॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ चतुर्थी ॥

अयं हि नेता वरुण ऋतस्य मित्रो राजानो अर्यमापो धुः।

सुहवा देव्यदितिरनर्वा ते नो अंहो अति पर्षन्नरिष्टान् ॥ ४

अयं। हि। नेता। वरुणः। ऋतस्य। मित्रः। राजानः।

अर्यमा। अपः। धुरिति धुः।

सुऽहवा। देवी। अदितिः। अनर्वा। ते। नः। अंहः।

अति। पर्षन्। अरिष्टान् ॥ ४

ऋतस्य यज्ञस्य सत्यस्य वा नेता प्रापयितायं हि अयं खलु वरुणश्च मित्रश्चार्यमा चैते राजानः समर्था देवा अपोऽस्मदीयं यज्ञादिलक्षणं कर्म धुः। दधुः। दधति। अनर्वा केनाप्यप्रतिगता देवी द्योतमानादितिरदीना देवमाता सुहवा शोभनाह्वाना भवति। ते सर्वादयो देवा अरिष्टानबाधितान् अस्मान् नोऽस्मानंहो दुरितमभिभवत्। अतिपारयंतु ॥

॥ अथ पंचमी ॥

अस्य देवस्य मीळ्हुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः।

विदे हि रुद्रो रुद्रियं महित्वं यासिष्टं वर्तिरश्विनाविरावत् ॥ ५

अस्य। देवस्य। मीळ्हुषः। वयाः। विष्णोः। एषस्य।

प्रऽभृथे। हविःऽभिः।

विदे। हि। रुद्रः। रुद्रियं। महिऽत्वं। यासिष्टं। वर्तिः।

अश्विनौ। इराऽवत् ॥ ५

प्रभृथे हविर्भिः संगोद्भृतैरन्वैषणस्य प्रापणीयस्य मीळ्हुषः कामानां सेक्तुर्विष्णोः सर्वं देवानामेकस्याप्यस्य देवस्य। विष्णुः सर्वा देवता इति श्रुतेः। अन्ये देवा वयाः शाखा इव भवंति। रुद्रो देवो रुद्रियं रुद्रसंबंधि सुखं महित्वं महत्त्वं च विदे हि।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

अंशाद्द्रापयति स्म। अपि च हे अश्विनौ देवौ युवामिरावत् हविर्लक्षणान्नयुक्तं वर्तिरस्मदीयं गृहं याचितं। अर्वाक्षिष्टं। आगच्छतं॥

॥ अथ षष्ठी ॥

मालं पूषन्नाघृण इरस्यो वरूत्री यद्रातिषाचश्च रासन्।

मयोभुवो नो अर्वंतो नि पांतु वृष्टिं परिज्मा वातो ददातु॥६

मा। अलं। पूषन्। आऽघृणे। इरस्यः। वरूत्री। यत्।

रातिऽषाचः। च। रासन्।

मयःऽभुवः। नः। अर्वंतः। नि। पांतु। वृष्टिं। परिऽज्मा।

वातः। ददातु॥६

हे आघृणे आगतदीप्ते एवंभूत हे पूषन् देव अलमाभिमुख्येन इरस्यः। वियातं मा लपाः। वरूत्री सर्वेषां रक्षित्री सरस्वती रातिषाचश्च। रातिर्दानं। तस्य संभक्तारो देवगणाश्च यद्धनं रासन् अस्मभ्यं प्रयच्छेयुः। अत्र मा लपा इति पूर्वेण संबंधः। किंच मयोभुवः सुखस्य भावका अर्वंतो गच्छंतो देवा नोऽस्मान् नि पांतु। नितरां पालयंतु। परिज्मा परितो गंता वातो वायुर्वृष्टिं हविरुपलक्षणमुदकं ददातु। प्रयच्छत्वस्मभ्यं॥

॥ अथ सप्तमी ॥

नू रोदसी अभिष्टुते वसिष्ठैर्ऋतावानो वरुणो मित्रो अग्निः।

यच्छंतु चंद्रा उपमं नो अर्कं यूयं पात स्वस्तिभिः सदा नः॥७

नु। रोदसी इति। अभिस्तुते इत्यभिऽस्तुते। वसिष्ठैः।

ऋतऽवानः। वरुणः। मित्रः। अग्निः।

यच्छंतु। चंद्राः। उपऽमं। नः। अर्कं। यूयं। पात।

स्वस्तिऽभिः। सदा। नः॥७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पूर्वं व्याख्यातेयं । अक्षरार्थस्तु । द्यावापृथिव्यौ वरुणादयो देवाश्च वसिष्ठैराभिरभिष्टुता भवंति । एवंभूता आह्लादका देवाः सर्वोत्कृष्टमन्नमस्मभ्यं ददतु । अस्मिन्सूक्ते प्रतिपादिताः सर्वे देवा यूयं कल्याणैरस्मान्सर्वदा पालयत ॥

॥ इति पंचमस्य चतुर्थे सप्तमो वर्गः ॥

प्रातरग्निमिति सप्तर्चमष्टमं सूक्तं । अत्रानुक्रमणिका । प्रातर्भगं जगत्याद्या लिंगोक्तदेवतांत्योषसेति । वसिष्ठ ऋषिः । आद्या जगती शिष्टास्त्रिष्टुभः आद्याग्नीन्द्रादिदेवत्या द्वितीयाद्याः पंच भगदेवत्याः सप्तम्युषोदेवत्या । अत्र केचिदाहुः । निवेष्टुकामो रोगार्त्तो मंगलं जपेत्सदा । निवेशं निर्यति शीघ्रं रोगैश्च परिमुच्यते । ऋग्वि० २. २५ । इति ॥

॥ तत्र प्रथमा ॥

प्रातरग्निं प्रातरिंद्रं हवामहे प्रातर्मित्रावरुणा प्रातरश्विना ।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रं हुवेम ॥ १

प्रातः । अग्निं । प्रातः । इंद्रं । हवामहे । प्रातः ।
मित्रावरुणा । प्रातः । अश्विना ।
प्रातः । भगं । पूषणं । ब्रह्मणः । पतिं । प्रातरिति । सोमं ।
उत । रुद्रं । हुवेम ॥ १

प्रातरुषःकालेऽग्निं देवं हवामहे । वयं स्तोतार आह्वयामः । तथा प्रातःकाल इंद्रं हवामहे । तथा मित्रावरुणा मित्रावरुणावहोरात्राभिमानिनौ देवौ प्रातर्वयं हवामहे । तथाश्विनौ देवानां भिषजौ प्रातर्वयं हवामहे । तथा प्रातर्भगं देवं पूषणं देवं ब्रह्मणस्पतिं मंत्राभिमानिनमेतत्संज्ञकं चाह्वयामः । तथा प्रातः सोममेतत्संज्ञकं देवमुतापि च रुद्रं देवं च हुवेम । आह्वयामः ॥

॥ अथ द्वितीया ॥

प्रातर्जितं भगमुग्रं हुवेम वयं पुत्रमदितेर्यो विधर्ता ।
आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह ॥ २

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रातःऽजितं। भगं। उग्रं। हुवेम। वयं। पुत्रं। अदितेः। यः। विऽधर्ता।

आध्रः। चित्। यं। मन्यमानः। तुरः। चित्। राजा। चित्। यं। भगं। भक्षि। इति। आह ॥ २

यो भगो देवो विधर्ता विश्वस्य जगतो धारको जितं जयशीलमुग्रमुद्गूर्णं अदितेः पुत्रं भगं देवं प्रातःकाल एव वयं हुवेम। आह्वयामः। आध्रश्चिदाध्रो दरिद्रोऽपि स्तोता यं भगं देवं मन्यमानः स्तुवन् भगं भजनीयं धनं भक्षि भज विभज मह्यं देहीत्याह ब्रवीति। तुरश्चित्। तुरस्तिर्गतिकर्मा। प्राप्तधनोऽपि राजा चित् समर्थोऽपि जनो यं भगं देवं भजनीयं धनं मह्यं भक्षि देहीत्याह। तं भगं प्रातरेव वयं हुवेमेति संबंधः॥

॥ अथ तृतीया ॥

भग प्रणेतर्भग सत्यराधो भगेमां धियमुदवा ददन्नः।

भग प्र णो जनय गोभिरश्वैर्भग प्र नृभिर्नृवंतः स्याम ॥ ३

भग। प्रऽनेतरिति प्रऽनेतः। भग। सत्यऽराधः। भग। इमां। धियं। उत्। अव। ददत्। नः।

भग। प्र। नः। जनय। गोभिः। अश्वैः। भग। प्र। नृऽभिः। नृऽवंतः। स्याम ॥ ३

हे भग देव त्वं प्रणेता प्रकर्षेण नेतासि। साहय प्रणेतर्हे भग त्वं सत्यराधाः सत्यधनोऽसि। साहय सत्यराधो हे भग त्वं नोऽस्मभ्यं ददत् कामान्प्रयच्छन् इमामस्मदीयां धियं स्तुतिमुदव। उद्रव। सफलयुक्तां कुरु। हे भग त्वं गोभिरश्वैश्च नोऽस्मान् प्रजनय। प्रोद्भूतान् कुरु। हे भग त्वत्प्रसादाद्वयं नृभिर्नेतृभिः पुत्रादिभि नृवंतो मनुष्यवंतः प्र स्याम। प्रभवेम॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ चतुर्थी ॥

उतेदानीं भगवंत स्यामोत प्रपित्व उत मध्ये अह्नां ।

उतोदिता मघवन्त्सूर्यस्य वयं देवानां सुमतौ स्याम ॥ ४

उत । इदानीं । भगऽवंतः । स्याम । उत । प्रऽपित्वे । उत ।

मध्ये । अह्नां ।

उत । उतऽइता । मघऽवन् । सूर्यस्य । वयं । देवानां ।

सुऽमतौ । स्याम ॥ ४

उतापि चेदानीं वयं भगवंतः स्याम । हे भग भगेन त्वया स्वामिना युक्ता भवेम । यद्वा भगवंतो धनवंतः स्याम । उतापि च प्रपित्वेऽह्नां प्राप्ते पूर्वाह्णे भगवंतः स्याम । उतापि चाह्नां दिवसानां मध्ये मध्याह्ने भगवंतः स्याम । उतापि च हे मघवन् धनवन् भग देव सूर्यस्य सर्वस्य प्रेरकस्य देवस्योदितोदितावुदये सति वयं त्वदनुग्रहाद्देवानामिंद्रादीनां सुमतावनुग्रहबुद्धौ स्याम । भवेम ॥

॥ अथ पंचमी ॥

भग एव भगवाँ अस्तु देवास्तेनं वयं भगवंतः स्याम ।

तं त्वा भग सर्व इज्जोहवीति स नो भग पुरएता भवेह ॥ ५

भगः । एव भगऽवान् । अस्तु । देवाः । तेन । वयं ।

भगऽवंतः । स्याम ।

तं । त्वा । भगः । सर्वः । इत् । जोहवीति । सः । नः ।

भगः । पुरःऽएता । भव । इह ॥ ५

हे देवा भगो देव एव भगवान् धनवानस्तु । तेन भगेन देवेन धनेन वा वयं भगवंतः स्याम । धनवंतो भवेम । हे भग तं प्रसिद्धं त्वा त्वां सर्वं इत् सर्व एव जनो जोहवीति । भृशं पुनः पुनराह्वयति । हे भग देव स त्वमिहास्मिन्यज्ञे नोऽस्माकं पुरएता पुरोगंता भव ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ षष्ठी ॥

सम॑ध्वरायो॒षसो॑ नमंत दधि॒क्रावे॑व॒ शुच॑ये प॒दाय॑।
अ॒र्वा॒ची॒नं व॑सु॒विदं॒ भगं॑ नो॒ रथ॑मि॒वाश्वा॑ वा॒जिन॒ आ व॑हंतु ॥ ६

सं। अ॒ध्व॒राय॑। उ॒षसः॑। न॒मं॒त॒। द॒धि॒क्रावा॑ऽइव। शुच॑ये।
प॒दाय॑।
अ॒र्वा॒ची॒नं। व॒सु॒ऽविदं॑। भगं॑। नः॒। रथं॑ऽइव। अश्वाः॑।
वा॒जिनः॑। आ। व॒हं॒तु॒ ॥ ६

शुचये शुद्धाय गमनयोग्याय पदाय स्थानाय दधिक्रावेवाश्वो यथा तथोषस उषोदेवता अध्वरायाऽहिंसाय यागाय संनमंत। संगच्छंतु। वाजिनो वेगवंतोऽश्वा रथमिव रथं यथा तथोषसोऽर्वाचीनमस्मदभिमुखं वसुविदं धनस्य प्रापकं भगं देवं नोऽस्मानभ्यावहंतु। आनयंतु॥

॥ अथ सप्तमी ॥

अश्वा॑वती॒र्गोम॑तीर्न उ॒षासो॑ वी॒रव॑तीः॒ सद॑मुच्छंतु भ॒द्राः।
घृ॒तं दुहा॑ना वि॒श्वतः॒ प्रपी॑ता यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥ ७

अश्व॑ऽवतीः। गोऽम॑तीः। नः॒। उ॒षसः॑। वी॒रऽव॑तीः। सदं॑।
उ॒च्छं॒तु॒। भ॒द्राः।
घृ॒तं। दुहा॑नाः। वि॒श्वतः॑। प्रऽपी॑ताः। यू॒यं। पा॒त॒।
स्व॒स्तिऽभिः॑। सदा॑। नः॒ ॥ ७

भद्राः कल्याणीया उषस उषोदेवता अश्वावतीरश्ववत्योऽश्वसहिताः सत्यो गोमतीर्गोमत्यश्च वीरवतीर्वीरवत्यः पुत्रादिजनोपेताश्च भवंत्यो नोऽस्मभ्यं सदं सर्वदोच्छंतु। व्युच्छंतु। नैशं तमो विवासयंतु। किं कुर्वत्यः। घृतमुदकं दुहानाः सिंचंत्यो विश्वतः सर्वैर्गुणैः प्रपीताः प्रवृद्धाः। एवंभूता उषसस्तम उच्छंतु। अस्मिन् सूक्ते प्रतिपादिता हे सर्वे देवा यूयं नोऽस्मान् सदा सर्वदा स्वस्तिभिः कल्याणैः पात। पालयत॥

॥ इति पंचमस्य चतुर्थेऽष्टमो वर्गः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्र ब्रह्माण इति षडृचं नवमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वदेवं। अत्रानुक्रांतं। प्र ब्रह्माणः षड्वैश्वदेवं त्विति॥ सूक्तविनियोगो लैंगिकः॥ तृतीये छंदोमे प्रउगशस्त्रे प्र ब्रह्माण इति वैश्वदेवस्तृचः। सूत्रितं च। प्र ब्रह्माणो अंगिरसो नक्षंत सरस्वतीं देवयंतो हवंते। आ० ८.११.। इति॥

॥ तत्र प्रथमा ॥

प्र ब्रह्माणो अंगिरसो नक्षंत प्र क्रंदनुर्नभन्यस्य वेतु।
प्र धेनव उदप्रुतो नवंत युज्यातामद्री अध्वरस्य पेशः॥१

प्र। ब्रह्माणः। अंगिरसः। नक्षंत। प्र। क्रंदनुः। नभन्यस्य।
वेतु।
प्र। धेनवः। उदऽप्रुतः। नवंत। युज्यातां। अद्री इति।
अध्वरस्य। पेशः॥१

ब्रह्माणोऽंगिरस एतन्नामका ऋषयः प्र नक्षंत। सर्वत्र व्याप्नुवंतु। क्रंदनुः पर्जन्यो नभन्यस्य स्तोत्रस्यास्मदीयं स्तोत्रं प्र वेतु। प्रकर्षेण कामयतु। धेनवः प्रीणयित्र्यो नद्य उदप्रुत उदकानि सिंचंत्यः प्रनवंत। सर्पंतु। अद्री आद्रियंतौ पत्नीयजमाना-वध्वरस्य यज्ञस्य पेशो रूपं युज्यातां। योजयेतां॥

॥ अथ द्वितीया ॥

सुगस्ते अग्ने सनवित्तो अध्वा युंक्ष्वा सुते हरितो रोहितश्च।
ये वा सद्मन्नरुषा वीरवाहो हुवे देवानां जनिमानि सत्तः॥२

सुऽगः। ते। अग्ने। सनऽवित्तः। अध्वा। युंक्ष्व। सुते।
हरितः। रोहितः। च।
ये। वा। सद्मन्। अरुषाः। वीरऽवाहः। हुवे। देवानां।
जनिमानि। सत्तः॥२

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे अग्ने सनवित्तः सनाच्चिरकालादारभ्य लब्धस्त्वदीयोऽध्वा मार्गः सुगः सुखेन गंतव्यो भवतु। किंच हरितः श्यामवर्णा रोहितश्च लोहितवर्णाश्चेत्युभयविधा ये वा ये च ते त्वदीया अश्वाः सद्मन् सद्मनि यज्ञगृहे वीरवाहो वीरं शूरं त्वां वहंतोऽरुषा आरोचमाना भवंति तांश्च त्वं सु युंक्ष्व। त्वदीये रथे सुष्ठु संयोजय। निषत्तो यज्ञगृहे निषण्णोऽहं होता अनु देवानामिंद्रादीनां जनिमा (नि) जनान् संघान् वे। आह्वयामि॥

॥ अथ तृतीया॥

समु वो यज्ञं महयन्नमोभिः प्र होता मंद्रो रिरिच उपाके।
यजस्व सु पुर्वणीक देवाना यज्ञियामरमतिं ववृत्याः॥३

सं। ऊं इति। वः। यज्ञं। महयन्। नमःऽभिः। प्र। होता।
मंद्रः। रिरिचे। उपाके।
यजस्व। सु। पुरुऽअनीक। देवान्। आ। यज्ञियां।
अरमतिं। ववृत्याः॥३

हे देवा वो युष्माकं यज्ञं नमोभिर्नमस्कारयुक्ता इमे होतारो वा यजमाना वा सं महयन्। सम्यक् पूजयंति। उ इति पूरकः। मंद्र स्तुतिशील उपाकेऽस्माकं समीपे स्थितोऽस्मदीयो होता प्ररिरिचे। अन्येभ्यो होतृभ्योऽतिरिच्यते। हे यजमान त्वं देवान् सु सुष्ठु यजस्व। हे पुरंणीक बहुतेजस्विन्नग्ने त्वं यज्ञियां यज्ञार्हामरमतिं भूमिमावहृत्याः। आवर्तय। तथा च निगमांतरे। आ नो महीमरमतिं सजोषाः। ऋग्वे० ५, ४३, ६,। इति॥

॥ अथ चतुर्थी॥

यदा वीरस्य रेवतो दुरोणे स्योनशीरतिथिराचिकेतत्।
सुप्रीतो अग्निः सुधितो दम आ स विशे दाति वार्यमियत्यै॥४

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यदा। वीरस्य। रेवतः। दुरोणे। स्योनऽशीः। अतिथिः।
आऽचिकेतत्।
सुऽप्रीतः। अग्निः। सुऽधितः। दमे। आ। सः। विशे॥
दाति। वार्यं। इयत्यै॥ ४

अतिथिः सर्वैरातिथिपूज्योऽग्निर्यदा वीरस्य वीरवतः स्तोतॄणां प्रेरयितुः धनवतो हविष्मतो यजमानस्य दुरोणे गृहे स्योनशीः सुखेन शयनीय आचिकेतत् प्रज्ञायते। अग्निर्दमे यज्ञगृहे सुधितः आकारार्थे। सुनिहितश्च सुष्ठु निहितः सन् यदा सुप्रीतो भवति तदा सोऽग्निरियत्या उपगच्छन्त्यै विशे प्रजायै वार्यं वरणीयं धनं दाति। ददाति। प्रयच्छति॥

। अथ पंचमी।

इमं नो अग्ने अध्वरं जुषस्व मरुत्स्विन्द्रे यशसं कृधी नः।
आ नक्ता बर्हिः सदतामुषासोशन्ता मित्रावरुणा यजेह॥ ५

इमं। नः। अग्ने। अध्वरं। जुषस्व। मरुत्ऽसु। इन्द्रे।
यशसं। कृधि। नः।
आ। नक्ता। बर्हिः। सदतां। उषसा। उशन्ता।
मित्रावरुणा। यज। इह॥ ५

हे अग्ने त्वं नोऽस्मदीयमिममध्वरं यज्ञं जुषस्व। सेवस्व। किंच मरुत्स्वस्मदर्थं अभिभूतेषु देवेष्विन्द्रे च यशसं कीर्तियुक्तं हविर्लक्षणान्नयुक्तं नोऽस्मदीयं यज्ञं हे अग्ने त्वं कृधि। कुरु। समर्पयेत्यर्थः। तथा नक्ता रात्रिरुषसा दिवसश्च। अहर्निशे इत्यर्थः। बर्हिर्बर्हिषि कुशमय आसदतां। उपविशतां। अपि च हे अग्ने उशन्तावुशन्तौ कामयमानौ मित्रावरुणा मित्रावरुणौ देवाविहास्मिन्यज्ञे यज। पूजय॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ षष्ठी ॥

एवाग्निं सहस्यं१ वसिष्ठो रायस्कामो विश्वप्स्न्यस्य स्तौत्।
इषं रयिं पप्रथद्वाजमस्मे यूयं पात स्वस्तिभिः सदा नः॥ ६

एव। अग्निं। सहस्यं। वसिष्ठः। रायःऽकामः।
विश्वऽप्स्न्यस्य। स्तौत्।
इषं। रयिं। पप्रथत्। वाजं। अस्मे इति। यूयं। पात।
स्वस्तिऽभिः। सदा। नः॥ ६

वसिष्ठ एतदाख्य ऋषी रायस्कामः पश्वादिधनानीच्छन् एवैवमुक्तप्रकारेण सहस्यं। सहो बलं। तस्य पुत्रं। तद्धं तमिति वा। अग्निं देवं विश्वप्स्न्यस्य सर्वरूपस्य धनस्य लाभाय स्तौत्। एवंभूतोऽग्निरस्मे अस्मभ्यमिषमन्नं रयिं धनं च वाजं बलं च पप्रथत्। प्रथयतु। विस्तारयतु। ददात्वित्यर्थः। अस्मिन्सूक्ते प्रतिपादिताः सर्वे देवा यूयमस्मान्कल्याणैः सर्वदा पालयत॥

॥ इति पंचमस्य षष्ठे नवमो वर्गः॥

प्र वो यज्ञेष्विति पंचर्चं दशमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैश्वदेवं। प्र वः पंचेत्यनुक्रान्तं॥ सूक्तविनियोगो लैंगिकः॥ प्रथमे छंदोमे प्रउगशस्त्रे प्र वो यज्ञेष्विति वैश्वदेवस्तृचः। सूत्रितं च। प्र वो यज्ञेषु देवयंतो अर्चन्प्र क्षोदसा धायसा सस्र एषेति प्रउगं। आ० ८. ९.। इति॥

॥ तत्र प्रथमा॥

प्र वो यज्ञेषु देवयंतो अर्चन्द्यावा नमोभिः पृथिवी इषध्यै।
येषां ब्रह्माण्यसमानि विप्रा विष्वग्वियंति वनिनो न शाखाः॥ १

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्र। वः। यज्ञेषु। देवऽयन्तः। अर्चन्। द्यावा। नमःऽभिः।

पृथिवी इति। इषध्यै।

येषाम्। ब्रह्माणि। असमानि। विप्राः। विष्वक्। विऽयन्ति।

वनिनः। न। शाखाः॥ १

देवयंतो देवान्कामयमाना विप्रा यज्ञेषु नमोभिः स्तुतिभिर्हविर्भिर्वा वो युष्मानिषध्या अभिप्राप्तुं प्रार्चन्। प्रार्चयंति। प्रकर्षेण स्तुवंति। द्यावा दिवं च पृथिवीं भूमिं च प्रस्तुवंति। येषां विप्राणां मेधाविनां ब्रह्माणि स्तोत्राणि वनिनो न शाखा वृक्षस्य शाखा इव विष्वक् विश्वतो वियंति विशेषेण गच्छंति ते विप्राः प्रार्चन्निति पूर्वेण संबंधः॥

॥ अथ द्वितीया ॥

प्र यज्ञ एतु हेत्वो न सप्तिरुद्यच्छध्वं समनसो घृताचीः।

स्तृणीत बर्हिरध्वराय साधूर्ध्वा शोचींषि देवयून्यस्थुः॥ २

प्र। यज्ञः। एतु। हेत्वः। न। सप्तिः। उत्। यच्छध्वम्।

सऽमनसः। घृताचीः।

स्तृणीत। बर्हिः। अध्वराय। साधु। ऊर्ध्वा। शोचींषि।

देवऽयूनि। अस्थुः॥ २

अयमस्मदीयो यज्ञः प्रैतु। देवान्प्रति गच्छतु। तत्र दृष्टांतः। हेत्वो न सप्तिः वीप्रगाम्यश्वो यथा तद्वत्। हे ऋत्विजः सर्वे यूयं समनसः सहृदयमनस्काः संतो घृताचीः स्रुच उद्यच्छध्वं। ऊर्ध्वं उद्यम्य धारयत। तथाध्वराय यागं कर्तुं साधु साधकं बर्हिः कुशमयं स्तृणीत। वेद्यां छादयत। हे अग्ने देवयूनि देवान्कामयमानानि त्वदीयानि शोचींष्यर्चींष्यूर्ध्वानि उन्नतान्यस्थुः। तिष्ठंतु॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ तृतीया ॥

आ पुत्रासो न मातरं विभृत्राः सानौ देवासो बर्हिषः सदन्तु।
आ विश्वाची विदथ्यामनक्त्वग्ने मा नो देवताता मृधस्कः॥ ३

आ। पुत्रासः। न। मातरं॥ विऽभृत्राः। सानौ। देवासः।
बर्हिषः। सदन्तु।
आ। विश्वाची। विदथ्यां। अनक्तु। अग्ने। मा। नः।
देवऽताता। मृधः। कः॥ ३

मातरं जननीं विभृत्वा विशेषेण भर्तव्याः पुत्रासो न पुत्रा इव तद्वदस्माकं सरणीया देवासो देवा बर्हिषः कुशमयस्य वेद्यामास्तीर्णस्य सानावुच्छ्रिते देश आसदन्तु। उपविशन्तु। हे अग्ने विदथ्यां यज्ञयोग्यां त्वदीयां ज्वालां विश्वाची विश्वं सर्वं पर्यञ्चति गच्छतीति विश्वाची स्रुक्। आनक्तु। आ समन्तात् सिञ्चतु। देवताता देवतातौ यज्ञे नोऽस्माकं मृधो हिंसकान् हे अग्ने त्वं मा कः। मा कार्षीः। यज्ञवाचको देवतातिशब्दोऽत्र सप्तम्यर्थं वर्तते॥

॥ अथ चतुर्थी ॥

ते सीषपन्त जोषमा यजत्रा ऋतस्य धाराः सुदुघा दुहानाः।
ज्येष्ठं वो अद्य मह आ वसूनामा गन्तन समनसो यति ष्ठ॥ ४

ते। सीषपन्त। जोषं। आ। यजत्राः। ऋतस्य। धाराः।
सुऽदुघाः। दुहानाः।
ज्येष्ठं। वः। अद्य। महः। आ। वसूनां। आ। गन्तन।
सऽमनसः। यति। स्थ॥ ४

यजत्रा यजनीयाश्च इन्द्रादयो देवा ऋतस्योदकस्य सुदुघाः सुखेन दोग्धुं शक्या धारा दुहानाः। ते देवा जोषं यथाप्रीं भवति तथासीषपन्त। सपतिः परिचरणार्थः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्तुतिभिरा समंतात्पर्यवीवरत् । अस्मान्परिवरणं कुर्वंतु । स्वीकुर्वंत्विति यावत् । अद्याश्विन्दिने हे देवा बहूनां धनानां मध्ये ज्येष्ठं श्रेष्ठं यो युष्मदीयं नष्टो वंदनीयं धनमागच्छतु । यूयमपि सततमस्मत्स्तुत्यपतय संत आगंतन । आगच्छत । हे देवा यूयं – – –आगंतनेति संबंधः ॥

॥ अथ पंचमी ॥

एवा नों अग्ने विक्ष्वा दंशस्य त्वया वयं संहसावन्नास्क्राः ।

राया युजा संधमादो अरिंष्टा यूयं पात स्वस्तिभिः सदां नः ॥ ५

एव । नः । अग्ने । विक्षु । आ । दशस्य । त्वया । वयं ।

सहसाऽवन् । अस्क्राः ।

राया । युजा । सधऽमादः । अरिंष्टाः । यूयं । पात ।

स्वस्तिऽभिः । सदा । नः ॥ ५

हे अग्ने एवैवं स्तुतस्त्वं विक्षु प्रजासु मध्ये नोऽस्मभ्यमादशस्व । धनमभिप्रयच्छ । हे सहसावन् बलवन्नग्ने त्वयास्क्रा असक्ता वयं युजा नित्ययुक्तेन राया धनेन सधमादः सह माद्यंतोऽरिष्टा अहिंसिता भवेम । अस्मिन्सूक्ते प्रतिपादिताः सर्वे देवा यूयं नोऽस्मान्कल्याणैः सर्वदा पालयत ॥

॥ इति पंचमस्य चतुर्थे दशमो वर्गः ॥

दधिक्रां व इति पंचर्चमेकादशं सूक्तं वसिष्ठस्यार्षं दधिक्राख्यदेवताकं । आद्या जगती सा च दधिक्रादिलिंगोक्तदेवताका शिष्टास्त्रिष्टुभः । अनुक्रम्यते हि । दधिक्रां दाधिक्रं जगत्याद्या लिंगोक्तदेवतेति ॥ गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

दधिक्रां वंः प्रथममश्विनोषसंमग्निं समिद्धं भगंमूतये हुवे ।

इंद्रं विष्णुं पूषणं ब्रह्मणस्पतिंमादित्यान्द्यावांपृथिवी

अपः । स्वंः ॥ १

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दधिऽक्रां। वः। प्रथमं। अश्विनां। उषसं। अग्निं। संऽइंद्धं।

भगं। ऊतयें। हुवे।

इंद्रं। विष्णुं। पूषणं। ब्रह्मणः। पतिं। आदित्यान्।

द्यावांपृथिवी इतिं। अपः। स्वःऽरितिं। स्वः॥ १

हे स्तोतारो वो युष्माकमूतये रक्षणाय प्रथमं दधिक्रामश्वाभिमानिनं देवं हुवे। आह्वयामि। ततोऽश्विनावश्विदेवावुषसमुषोदेवतां च समिद्धं संस्तुतोऽग्निमग्निं च भगमेतदाख्यं देवं चाह्वयामि। इंद्रं विष्णुं पूषणं च ब्रह्मणस्पतिमादित्यान् द्यावापृथिवी अप उदकदेवताः स्व सूर्यमित्येतान्देवानाह्वयामि॥

॥ अथ द्वितीया॥

दधिक्राम् नमसा बोधयंत उदीरांणा यज्ञमुपप्रयंतः।

इळां देवीं बर्हिषि सादयंतोऽश्विना विप्रा सुहवां हुवेम॥ २

दधिऽक्रां। ऊं इति। नमसा। बोधयंतः। उत्ऽईरांणाः।

यज्ञं। उपऽप्रयंतः।

इळां। देवीं। बर्हिषि। सादयंतः। अश्विनां। विप्रा।

सुऽहवां। हुवेम॥ २

दधिक्रामेतन्नामकमश्वविशेषं देवं नमसा स्तोत्रेण बोधयंतः प्रज्ञापयंत उदीरांणाः प्रेरयंतो यज्ञं यागमुपप्रयंत उपक्रममाणा वयं बर्हिषीळां भूरीरूपां देवीं सादयंत आस्थापयंतः सुहवा शोभनाह्वानौ विप्रा विप्रौ मेधाविनावश्विनावश्विनौ देवौ हुवेम। आह्वयाम। उ इति पूरणः॥

॥ अथ तृतीया॥

दधिक्रावाणं बुबुधानो अग्निमुपं। ब्रुव उषसं सूर्यं गां।

ब्रध्नं मांश्चतोर्वरुंणस्य बभ्रुं ते विश्वास्मद्दुरिता यावयंतु॥ ३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दधिऽक्रावाणं। बुबुधानः। अग्निं। उपं। ब्रुवे। उषसं।
सूर्यं। गां।
ब्रध्नं। मंश्चतोः। वरुणस्य। बभ्रुं। ते। विश्वा। अस्मत्।
दुःऽइता। यवयंतु॥ ३

दधिक्राव्णामश्वविशेषं बुबुधानो स्तोत्रेण बोधयन्नहमग्निं देवमुपब्रुवे। उपस्तौमि तथा चोषसमुषोदेवतां सूर्यं सर्वस्य प्रेरकं देवं गां भूमिं माध्यमिकां वा। एवंभूतान्देवानहमुपस्तौमि। मंश्चतोः मन्यमानान् स्तुवतो जनान् चेतयते जानामीति यद्वाभिमन्यमानांश्चातयते नाशयतीति मंश्चतुः। तस्य वरुणस्य ब्रध्नं महांतं बभ्रुं पिंगलवर्णमश्वं तस्यानयनार्थमहमुपब्रुवे। ते देवा अस्मदस्मत्तो विश्वा विश्वानि सर्वाणि दुरिता दुरितानि पापानि यवयंतु। पृथक्कुर्वंतु॥

॥ अथ चतुर्थी ॥

दधिक्रावा प्रथमो वाज्यर्वाग्रे रथानां भवति प्रजानन्।
संविदान उषसा सूर्येणादित्येभिर्वसुभिरंगिरोभिः॥ ४

दधिऽक्रावा। प्रथमः। वाजी। अर्वा। अग्रे। रथानां।
भवति। प्रऽजानन्।
संऽविदानः। उषसा। सूर्येण। आदित्येभिः। वसुऽभिः।
अंगिरःऽभिः॥ ४

प्रथमः सर्वेषामश्वानां मुख्यो वाजी वेगवानर्वा गमनशीलो दधिक्रावाश्वरूपो देवः प्रजानन् रथसंयोजनीयांस्तांस्तानश्वान्नश्वस्थानानि सम्यक् जानन् रथानामग्रे मुखो भवति। पुरोगो भवति। उषसा देवतया सूर्येण सर्वस्य प्रेरकेण देवेनादित्येभिरादित्यैश्च वसुभिरंगिरोभिर्देवैः सह सोमस्य पानं प्रति संविदानः समक् जानन्। ऐकमत्यं प्राप्त इत्यर्थः॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ पंचमी ॥

आ नो दधिक्राः पथ्यामनक्त्वृतस्य पंथामन्वेतवा उ ।

शृणोतु नो दैव्यं शर्धो अग्निः शृण्वंतु विश्वे महिषा

अमूराः ॥ ५

आ । नः । दधिऽक्राः । पथ्यां । अनक्तु । ऋतस्य । पंथां ।

अनुऽएतवै । ऊं इति ।

शृणोतु । नः । दैव्यं । शर्धः । अग्निः । शृण्वंतु । विश्वे ।

महिषाः । अमूराः ॥ ५

दधिक्रा अश्वरूपो देव ऋतस्य यज्ञस्य पंथां पंथानं मार्गमन्वेतवा अनुगंतुं प्रवृत्तानां नोऽस्माकं पथ्यां पदरोगानुक्तु। उदकेनाभिषिंचतु। उ इति पूरणः। दैव्यं शर्धो देवसंबंधि बलमीदृग्रूपोऽग्निर्नोऽस्मदीयं स्तवं शृणोतु। अमूरा अमूढा महिषा महांतो विश्वे सर्वे देवा अस्मदीयं स्तवं शृण्वंतु ॥

॥ इति पंचमस्य चतुर्थे एकादशो वर्गः ॥

आ देवो यात्विति चतुर्ऋचं द्वादशं सूक्तं वसिष्ठस्यार्षं सवितृदेवताकं त्रैष्टुभं। आ देवचतुर्थ्यं सावित्रमित्यनुक्रांतं ॥ व्यूळ्हे दशरात्रे चतुर्थेऽहनि वैश्वदेवशस्त्र इदं सावित्रनिविद्धानं। सूत्र्यते हि। चतुर्थेऽहन्या देवो यातु — — — । आ० ८. ८. ॥ — — इत्येषा वपानुवाक्या। सूत्रितं च। आ देवो यातु सविता सुरत्नः स घा नो देवः सविता सहावा। आ० ३. ७. ॥ अश्वमेधेऽनुवचनं सिद्धः सावित्र्य इष्टयः। तत्र द्वितीयस्यामिष्टौ याज्येयं। सूत्रितं च। य इमा विश्वा जातान्या देवो यातु। आ० १०. ६. । इति ॥

॥ तत्र प्रथमा ॥

आ देवो यातु सविता सुरत्नोऽंतरिक्षप्रा वहमानो अश्वैः ।

हस्ते दधानो नर्या पुरूणि निवेशयंच प्रसुवंच भूम ॥ १

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आ । देवः । यातु । सविता । सुऽरत्नः । अंतरिक्षऽप्राः ।

वहमानः । अश्वैः ।

हस्ते । दधानः । नर्या । पुरूणि । निऽवेशयन् । च ।

प्रऽसुवन् । च । भूम ॥ १

सुरत्नः शोभनरत्नोपेतोऽन्तरिक्षप्राः स्वकीयेन तेजसांतरिक्षस्य पूरयिताश्वैः स्वकीयैरश्वैर्वहमान उह्यमानः सविता सर्वस्य प्रेरको देव आयातु । आगच्छतु । कीदृशः । नर्या नर्याणि मनुष्यहितानि पुरूणि बहूनि धनानि हस्ते पाणौ दधानो दातुं धारयन् भूम भूतानि निवेशयन् च रात्रिषु स्वे स्थाने स्थापयंश्च प्रसुवन् चाहःसु प्रेरयंश्च । एवंभूतः सविता देव आयातु ॥

॥ अथ द्वितीया ॥

उदस्य बाहू शिथिरा बृहंता हिरण्यया दिवो अंताँ अनष्टां ॥

नूनं सो अस्य महिमा पनिष्ट सूरश्चिदस्मा अनु दादपस्यां ॥ २

उत् । अस्य । बाहू इति । शिथिरा । बृहंता । हिरण्यया ।

दिवः । अंतान् । अनष्टां ।

नूनं । सः । अस्य । महिमा । पनिष्ट । सूरः । चित् । अस्मै ।

अनु । दात् । अपस्यां ॥ २

शिथिरा शिथिलौ दानार्थं प्रसारितौ बृहंता बृहंतौ महांतौ हिरण्यया हिरण्मयौ सुवर्णमयावस्य सवितुः संबंधिनौ बाहू हस्तौ दिवोऽन्तरिक्षस्यांतान् पर्यंतानुदनष्टां । उदश्नुतां व्याप्नुवंतौ । नूनमद्यास्यैवंभूतस्य सवितुः स तादृशो महिमा महत्त्वं पनिष्ट । अस्माभिः स्तूयते । सूरश्चित्सूर्योऽप्यस्मै सवित्रेऽपस्यां कर्मेच्छामनुदात् । अनुददात् ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सावित्रे पयो पुरोडाशस्य हविषोः स घा न इति द्वे अनुवाक्ये। सूत्रं पूर्वमुदाहृतं॥ आश्वमेधिकीषु सावित्रेष्टिषु तृतीयसावित्र्याविशे एव याज्यानुवाक्ये। सूत्रितं च। स घा नो देवः सविता सहावेति द्वे। आ० १०. ६. ॥ इति॥

॥ सैषा सूक्ते तृतीया॥

स घा नो देवः सविता सहावा साविषद्वसुपतिर्वसूनि।

विश्रयमाणो अमतिमुरूचीं मर्तभोजनमध रासते नः॥ ३

सः। घ। नः। देवः। सविता। सहऽवा। आ। साविषत्।

वसुऽपतिः। वसूनि।

विऽश्रयमाणः। अमतिं। उरूचीं। मर्तऽभोजनं। अध।

रासते। नः॥ ३

सहावा। तेजोऽन्तरायमभिभावुकं तेजो यस्य सः। वसुपतिर्धनानां पालकः स सविता देवो नोऽस्मभ्यं वसूनि धनान्यासाविषत्। आ समंतात्प्रेरयति। षेञ् प्रेरणे। स सविता देव उरूचीं विस्तीर्णगमनाममतिं रूपं। दीप्तिमित्यर्थः। विश्रयमाणो निषेवमाणः सन् अधाधुना नोऽस्मभ्यं मर्तभोजनं मनुष्याणां भोगयोग्यं धनं रासते। ददातु॥

॥ अथ चतुर्थी॥

इमा गिरः सवितारं सुजिह्वं पूर्णगभस्तिमीळते सुपाणिं।

चित्रं वयो बृहदस्मे दधातु यूयं पात स्वस्तिभिः सदा नः॥ ४

इमाः। गिरः। सवितारं। सुऽजिह्वं। पूर्णऽगभस्तिं।

ईळते। सुऽपाणिं।

चित्रं। वयः। बृहत्। अस्मे इति। दधातु। यूयं। पात।

स्वस्तिऽभिः। सदा। नः॥ ४

इमा ईंहग्भूता गिरः गृणंति स्तुवंतीति गिरः स्तोतारः प्रजाः। यद्वेमाः स्तुतिरूपा वाचः सुजिह्वं शोभनजिह्वं। शोभनवाचमित्यर्थः। पूर्णगभस्तिं संपूर्णधनहस्तं सवितारं देवमीळते। स्तुवंति। स च सविता चित्रं चायनीयं बृहन्महद्वयोऽन्नमस्मे अस्मासु दधातु। यद्वाऽस्मे अस्मभ्यं प्रयच्छतु। हे सवितृप्रमुखा देवा यूयं नोऽस्मान् स्वस्तिभिः कल्याणैः सदा सर्वदा पात। पालयत॥

॥ इति पंचमस्य चतुर्थे द्वादशो वर्गः॥

इमा रुद्रायेति चतुर्ऋचं त्रयोदशं सूक्तं वसिष्ठस्यार्षं रुद्रदेवताकं। अंत्या त्रिष्टुप् शिष्टा जगत्यः। तथा चानुक्रमणिका। इमा रौद्रं त्रिष्टुबंतमिति॥ शूलगवादिषु रौद्रयज्ञेष्वनेन सूक्तेनोदीची दिगुपस्थेया। सूत्र्यते हि। इमा रुद्राय स्थिरधन्वन इति सर्वरुद्रयज्ञेषु दिगासुपस्थानं। आ० सू० ४. ८.। इति॥

॥ तत्र प्रथमा॥

इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधाव्ने।
अषाळ्हाय सहमानाय वेधसे तिग्मायुधाय भरता
शृणोतु नः॥ १

इमाः। रुद्राय। स्थिरऽधन्वने। गिरः। क्षिप्रऽइषवे। देवाय।
स्वधाऽव्ने।
अषाळ्हाय। सहमानाय। वेधसे। तिग्मऽआयुधाय।
भरत। शृणोतु। नः॥ १

हे अस्मदीया स्तोतारो यूयमिमा गिरः स्तुतीः रुद्रायैतन्नामकाय देवाय भरत। धारयत। कीदृशाय। स्थिरधन्वने दृढधनुष्काय क्षिप्रेषवे शीघ्रगामिबाणाय स्वधाव्ने ऽन्नवते ऽषाळ्हाय शत्रुभिरनभिभूताय सहमानाय शत्रूणामभिभवित्रे वेधसे विधात्रे तिग्मायुधाय तीक्ष्णायुधाय। एवंभूताय रुद्राय स्तुतीर्भरत। स च रुद्रो नोऽस्मदीयाः स्तुतीः शृणोतु॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ द्वितीया ॥

स हि क्षयेण क्षम्यस्य जन्मनः साम्राज्येन दिव्यस्य चेतति।
अवन्नवन्तीरुप नो दुरश्चरानमीवो रुद्र जासु नो भव ॥ २

सः। हि। क्षयेण। क्षम्यस्य। जन्मनः। साम्ऽराज्येन।
दिव्यस्य। चेतति।
अवन्। अवन्तीः। उप। नः। दुरः। चर। अनमीवः।
रुद्र। जासु। नः। भव ॥ २

स हि स खलु रुद्रो देव क्षम्यस्य। क्षमायां पृथिव्यां भवः। तस्य जन्मनो जनस्य क्षयेणैश्वर्येण चेतति। प्रज्ञायते। दिव्यस्य जनस्य च साम्राज्येनैश्वर्येण प्रज्ञायते। शेष प्रत्यक्षकृतः। हे रुद्र देव त्वं चावन्तीस्त्वां स्तोत्रैस्तर्पयन्तीर्नोऽस्मदीयाः प्रजा अवन् पालयन् दुरो दुर्याण्यस्मदीयानि गृहाण्युपचर। उपगच्छ। किंच त्वं नोऽस्मदीय सु प्रजास्वनमीवः। अमीवा रोगः। तामकुर्वन् भव ॥

॥ अथ तृतीया ॥

या ते दिद्युदवसृष्टा दिवस्परि क्ष्मया चरति परि सा
वृणक्तु नः।
सहस्रं ते स्वपिवात भेषजा मा नस्तोकेषु तनयेषु रीरिषः ॥ ३

या। ते। दिद्युत्। अवऽसृष्टा। दिवः। परि। क्ष्मया।
चरति। परि। सा। वृणक्तु। नः।
सहस्रं। ते। सुऽअपिवात। भेषजा। मा। नः। तोकेषु।
तनयेषु। रिरिषः ॥ ३

हे रुद्र ते वैद्युतात्मनस्तव संबंधिनो दिवस्परि तदिच्छकामादवसृष्टा विसृष्टा या

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

विद्युदशनिरूपा हेतिः क्ष्मया चिता चितो वा चरति वर्तते सा दिद्युत् नोऽस्मान्परिवृणक्तु । परित्यजतु । अपि च हे स्वपिवात ते तव सहस्रं बहूनि भेषजा भेषजानि यान्यौषधानि संति तान्यस्मभ्यं प्रयच्छेति शेषः । नोऽस्माकं तोकेषु पुत्रेषु तनयेषु च मा रीरिषः । हिंसां मा कृथाः ॥

॥ अथ चतुर्थी ॥

मा नो वधी रुद्र मा परा दा मा ते भूम प्रसितौ हीड़ितस्य ।
आ नो भज बर्हिषि जीवशंसे यूयं पात स्वस्तिभिः सदा नः ॥ ४

मा । नः । वधीः । रुद्र । मा । परा । दाः । मा । ते ।
भूम । प्रऽसितौ । हीड़ितस्य ।
आ । नः । भज । बर्हिषि । जीवऽशंसे । यूयं । पात ।
स्वस्तिऽभिः । सदा । नः ॥ ४

हे रुद्र त्वं नोऽस्मान्मा वधीः । मा हिंसीः । तथा मा परादाः । मा च त्याक्षीः । अपि च हीड़ितस्य क्रुद्धस्य ते तव प्रसितौ प्रकर्षेण बंधने वयं च मा भूम । किंच जीवशंसे जीवैराशंसनीये बर्हिषि यज्ञे नोऽस्मानाभज । भागिनः कुरु । हे रुद्रसखा देवा यूयं नोऽस्मान्कल्याणैः सर्वदा पालयत ॥

॥ इति पंचमस्य चतुर्थे त्रयोदशो वर्गः ॥

आपो यं व इति चतुर्ऋचं चतुर्दशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमब्देवताकं । आपो यमापश्चिदित्यनुक्रांतं च ॥ गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

आपो यं वः प्रथमं देवयंत इंद्रपानमूर्मिमकृण्वतेड़ः ।
तं वो वयं शुचिमरिप्रमद्य घृतप्रुषं मधुमंतं वनेम ॥ १

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

आपः। यं। वः। प्रथमं। देवऽयंतः। इंद्रऽपानं। ऊर्मिं। अकृण्वत। इळः।

तं। वः। वयं। शुचिं। अरिप्रं। अद्य। घृतऽप्रुषं। मधुऽमंतं। वनेम॥ १

देवयंतो देवानिच्छंतोऽध्वर्यवो हे आपो हे अब्देवता वो युष्माकं कार्यभूतमिंद्रपानमिंद्रेण पातव्यमिळ इळाया भूम्याः संभूतं यमूर्मिं सोमाख्यं यं रसं प्रथमं पुराकृण्वत अभिषवपावनादिभिः समस्कुर्वत अद्येदानीं वयमपि वो युष्मदीयं तमूर्मिं वनेम। संभजेमहि। कीदृशं। शुचिं शुद्धमरिप्रं पापरहितं घृतप्रुषं हविः क्षरदुदकं सिंचंतं मधुमंतं मधुररसोपेतं। एवंभूतं तं वनेमेति संबंधः॥

॥ अथ द्वितीया ॥

तमूर्मिमापो मधुमत्तमं वोऽपां नपादवत्वाशुहेमा।
यस्मिन्निंद्रो वसुभिर्मादयाते तमश्याम देवयंतो वो अद्य॥ २

तं। ऊर्मिं। आपः। मधुमत्ऽतमं। वः। अपां। नपात्।
अवतु। आशुऽहेमा।
यस्मिन्। इंद्रः। वसुऽभिः। मादयाते। तं। अश्याम।
देवऽयंतः। वः। अद्य॥ २

हे आप एतत्संज्ञका देवा वो युष्मदीयं मधुमत्तमं रसवत्तमं तमूर्मिं प्रवृद्धं सोमाख्यं रसमाशुहेमा शीघ्रगतिरपां नपादेतदाख्यो देवोऽवतु। पालयतु। इंद्रो यस्मिन्नूर्मौ वसुभिर्वासकैर्देवैः सह मादयाते माद्येत् अद्यास्मिन्दिने देवयंतो देवकामा वयं वो युष्मदीयं तमूर्मिमश्याम। प्राप्नुयाम॥

॥ अथ तृतीया ॥

शतपवित्राः स्वधया मदंतीर्देवीर्देवानामपि यंति पाथः।
ता इंद्रस्य न मिनंति व्रतानि सिंधुभ्यो हव्यं घृतवज्जुहोत॥ ३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

शतऽपवित्राः। स्वधया। मदंतीः। देवीः। देवानां। अपि।
यंति। पाथः।
ताः। इंद्रस्य। न। मिनंति। व्रतानि। सिंधुऽभ्यः। हव्यं।
घृतऽवत्। जुहोत॥ ३

शतपवित्राः शतं बहूनि पवित्राणि पावनानि रूपाणि यासां ताः स्वधया स्वकार्यभूतेनान्नेन मदंतीर्जनं मादयंत्यो देवीर्देव्यो द्योतमाना आपो देवानामिंद्रादीनां पाथः स्थानमपियंति। प्रविशंति। तास्तादृश्य आप इंद्रस्य प्रीणनानि व्रतानि यज्ञादीनि कर्माणि न मिनंति। न हिंसंति। उत्पादयंतीत्यर्थः। हे अध्वर्यवो यूयं सिंधुभ्यस्ताभ्योऽद्भ्यो घृतवदुपस्तरणाभिघारणलक्षणेनाज्येन युक्तं हव्यं पुरोडाशादिकं जुहोत। कुरुत॥

॥ अथ चतुर्थी॥

याः सूर्यो रश्मिभिराततान याभ्य इंद्रो अरदद्गातुमूर्मिं।
ते सिंधवो वरिवो धातना नो यूयं पात स्वस्तिभिः सदा नः॥ ४

याः। सूर्यः। रश्मिऽभिः। आऽततान। याभ्यः। इंद्रः।
अरदत्। गातुं। ऊर्मिं।
ते। सिंधवः। वरिवः। धातन। नः। यूयं। पात।
स्वस्तिऽभिः। सदा। नः॥ ४

सूर्यो देवो या अपो रश्मिभिः स्वकीयैः किरणैराततान विस्तारयति। सूर्यो हि रश्मिभिरुदकमादाय वर्षतीत्यर्थः। याभ्योऽद्भ्य ऊर्मिं। ऊर्मिरिदं रूपं। गमनयोग्यं गातुं मेघेभ्यो निर्गमनसाधनं मार्गमिंद्रोऽरदत् वज्रेण मेघान्ताडयन् प्रयच्छति हे सिंधवः आपस्ते यूयं नोऽस्मभ्यं वरिवो धनं धातन। धत्त। प्रयच्छत॥ ते इति सिंधुशब्देन समानाधिकरण्यात्पुंस्त्वमत्र॥ हे अब्देवताः यूयं सर्वदा नोऽस्मान्कल्याणैः पालयत॥

॥ इति पंचमस्य चतुर्थे षड्विंशो वर्गः॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ऋभुक्षण इति चतुर्ऋचं षोडशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमृभुदेवताकं। अंत्याया विकल्पेन विश्वे देवा देवता। तथा चानुक्रांतं। ऋभुक्षण आंत्या वैश्वदेवी वेति॥ दशमेऽहनि वैश्वदेवशस्त्रे आर्भवनिविद्धानं। सूत्यते हि। ऋभुक्षण इत्यार्भवं। आ० ८. १२.। इति॥

॥ तत्र प्रथमा॥

ऋभुक्षणो वाजा मादयध्वमस्मे नरो मघवानः सुतस्य।

आ वोऽर्वाचः क्रतवो न यातां विभ्वो रथं नर्यं वर्तयंतु॥ १

ऋभुक्षणः। वाजाः। मादयध्वं। अस्मे इति। नरः।

मघऽवानः। सुतस्य।

आ। वः। अर्वाचः। क्रतवः। न। यातां। विऽभ्वः। रथं।

नर्यं। वर्तयंतु॥ १

ऋभुक्षणेत्यृभूणां ज्येष्ठस्याख्या वाज इति तु कनिष्ठस्य। अत्र ऋभुक्षणो वाजा इति बहुवचनेन ऋभवस्त्रयो गृह्यंते। हे ऋभुक्षणो वाजा नरो नेतारो मघवानो धनवंत एवंभूता हे ऋभवो यूयमस्मे अस्मासु स्थितेन सुतस्याभिषुतेन सोमेन मादयध्वं। तृप्ता भवत। नेति संप्रत्यर्थे। इदानीं यातां गच्छतां वो युष्मदीयाः क्रतवः कर्मणां कर्तारो विभ्वो विभवः समर्था अश्वा अर्वाचोऽर्वाचोऽस्मदभिमुखा। नर्यं मनुष्यहितं रथं युष्मदीयमावर्तयंतु॥

॥ अथ द्वितीया॥

ऋभुर्ऋभुभिरभि वः स्याम विभ्वो विभुभिः शवसा शवांसि।

वाजो अस्माँ अवतु वाजसाताविंद्रेण युजा तरुषेम वृत्रं॥ २

ऋभुः। ऋभुऽभिः। अभि। वः। स्याम। विऽभ्वः। विभुऽभिः।

शवसा। शवांसि।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

वाजः। अस्मान्। अवतु। वाजऽसातौ। इंद्रेण। युजा।

तरुषेम। वृत्रं॥ २

हे ऋभवः ऋभुभिर्युष्माभिर्वयमृभवः। उरु भवंतीत्यृभवः। संतो विभुभिर्युष्माभिर्विभ्वो विभवश्च संतः शवांसि शत्रूणां बलानि शवसा युष्मदीयेन बलेनाभिस्याम। अभिभवेम। तथा वाजसातौ संग्रामे वाज एतत्संज्ञक ऋभुरस्मानवतु। पालयतु। अपि च युजा सहायभूतेनेंद्रेण वृत्रं शत्रुं वयं तरुषेम। तरेम। प्रायेण ऋभवोऽत्रेंद्रेण सह स्तूयंत इति॥

॥ अथ तृतीया॥

ते चिद्धि पूर्वीरभि संति शासा विश्वाँ अर्यः उपरताति वन्वन्।

इंद्रो विभ्वाँ ऋभुक्षा वाजो अर्यः शत्रोर्मिथत्या कृणवन्वि

नृम्णं॥ ३

ते। चित्। हि। पूर्वीः। अभि। संति। शासा। विश्वान्।

अर्यः। उपरऽताति। वन्वन्।

इंद्रः। विऽभ्वा। ऋभुक्षाः। वाजः। अर्यः। शत्रोः।

मिथत्या। कृणवन्। वि। नृम्णं॥ ३

ते तादृशा इंद्र ऋभवश्च पूर्वीर्बह्वीरन्यदीयाः सेनाः शासा शासनेन स्वकीययाज्ञया। यद्वा शिष्यंते हिंस्यंतेऽनेनेति शास आयुधं तेनाभिसंति। अभिभवंति। चिद्धीतौ पूरणौ। किंचोपरताति॥ सप्तम्या लुक्॥ उपरैरुपलैः पाषाणसदृशैरायुधैस्तायते विस्तार्यत इत्युपरताति युद्धं। तस्मिन्विश्वान् समस्तानर्योऽरीन् शत्रून्वन्वन्। हिंसंति। विभ्वा ऋभुक्षा वाज एतत्संज्ञका ऋभवश्चेंद्रश्चार्यः शत्रूणामभिगंतारः संतः शत्रोः संबंधि नृम्णं बलं मिथत्या। मेथतेरिदं रूपं। मिथतिर्हिंसा। तया विकृणवन्। विकुर्वंतु। विनाशयंत्वित्यर्थः॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ चतुर्थी ॥

नू देवासो वरिवः कर्तना नो भूत नो विश्वेऽवसे सजोषाः।

समस्मे इषं वसवो ददीरन्यूयं पात स्वस्तिभिः सदा नः॥ ४

नु। देवासः। वरिवः। कर्तन। नः। भूत। नः। विश्वे।

अवसे। सऽजोषाः।

सं। अस्मे इति। इषं। वसवः। ददीरन्। यूयं। पात।

स्वस्तिऽभिः। सदा। नः॥ ४

हे देवासो देवा द्योतमाना ऋभवो यूयं नु अद्य नोऽस्मभ्यं वरिवो धनं कर्तन। कुरुत। प्रयच्छत। तथा विश्वे सर्वे ऋभवो यूयं सजोषाः सह प्रीयमाणाः संतो नोऽस्माकमवसे रक्षणाय भूत। भवत। अपि च वसवः प्रशस्ता ऋभव इषमन्नमस्मे अस्मभ्यं संददीरन्। संप्रयच्छेयुः। हे ऋभवो यूयमस्मान् सर्वदा कल्याणै रक्षत॥

॥ इति प्रथमस्य चतुर्थे पंचदशो वर्गः॥

समुद्रज्येष्ठा इति चतुर्ऋचं षोडशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमब्देवताकं। तथा चानुक्रांतं। समुद्रज्येष्ठा आपमिति॥ गतो विनियोगः॥

॥ तत्र प्रथमा ॥

समुद्रज्येष्ठाः सलिलस्य मध्यात्पुनाना यंत्यनिविशमानाः।

इंद्रो या वज्री वृषभो रराद ता आपो देवीरिह मामवंतु॥ १

समुद्रऽज्येष्ठाः। सलिलस्य। मध्यात्। पुनानाः। यंति।

अनिऽविशमानाः।

इंद्रः। याः। वज्री। वृषभः। रराद। ताः। आपः।

देवीः। इह। मां। अवंतु॥ १

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

समुद्रज्येष्ठाः। समुद्रोऽर्णवो ज्येष्ठः प्रशस्यतमो यासामपां ताः। सलिलस्य। अंतरिक्षमध्ये तत्। अंतरिक्षस्य मध्यात् माध्यमिकात्स्थानाद्यंति। गच्छंति। कीदृश्यः। पुनाना विश्वं शोधयंत्योऽनिविशमानाः सर्वदा गच्छंत्यः वज्री वज्रभृद्वृषभः कामानां वर्षितेंद्रो या निवृता अपो रराद लिखति देवीर्देव्यस्ता आप इहास्मिन् प्रदेशे स्थितं मामवंतु। रक्षंतु। अभिगच्छंतु वा॥

॥ अथ द्वितीया॥

या आपो दिव्या उत वा स्रवंति खनित्रिमा उत वा याः स्वयंजाः।
समुद्रार्था याः शुचयः पावकास्ता आपो देवीरिह मामवंतु॥२

याः। आपः। दिव्याः। उत। वा। स्रवंति। खनित्रिमाः।
उत। वा। याः। स्वयंऽजाः।
समुद्रऽअर्थाः। याः। शुचयः। पावकाः। ताः। आपः।
देवीः। इह। माम्। अवंतु॥२

या आपो दिव्या अंतरिक्षभवाः संति। उत वापि च या आपो नद्यादिगताः सत्यः स्रवंति गच्छंति। याश्च खनित्रिमाः खननेन निर्वृत्ताः। उत वापि च याः स्वयंजाः स्वयमेव प्रादुर्भवंत्यः समुद्रार्थाः। समुद्र एवार्थो गंतव्यो यासां ताः समुद्रार्थाः। शुचयो दीप्तियुक्ताः पावकाः शोधयित्र्यश्च भवंति ता आपो मामवंत्विति॥

॥ अथ तृतीया॥

यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यन् जनानां।
मधुश्चुतः शुचयो या पावकास्ता आपो देवीरिह मामवंतु॥३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यासां। राजा। वरुणः। याति। मध्ये। सत्यानृते इति।
अवऽपश्यन्। जनानां।
मधुऽश्चुतः। शुचयः। याः। पावकाः। ताः। आपः। देवीः।
इह। मां। अवंतु ॥ ३

वरुणो यासामपां राजा स्वामी मध्ये मध्यमलोके याति गच्छति। किं कुर्वन्। जनानां भूतानां सत्यानृते सत्यं चानृतं चावपश्यन्। जानन्नित्यर्थः। या आपो मधुश्चुतो रसं क्षरंत्यः शुचयो दीप्तियुक्ताः पावकाः शोधयित्र्यः ता आपो देव्यो मां रक्षंत्विति ॥

॥ अथ चतुर्थी ॥

यासु राजा वरुणो यासु सोमो विश्वे देवा यासूर्जं मदंति ।
वैश्वानरो यास्वग्निः प्रविष्टस्ता आपो देवीरिह मामवंतु ॥ ४

यासु। राजा। वरुणः। यासु। सोमः। विश्वे। देवाः।
यासु। ऊर्जं। मदंति।
वैश्वानरः। यासु। अग्निः। प्रऽविष्टः। ताः। आपः।
देवीः। इह। मां। अवंतु ॥ ४

अपां राजा वरुणो यास्वप्सु वर्तते। सोमो यास्वप्सु वर्तते। यास्वप्सु स्थिता विश्वे सर्वे देवा ऊर्जमन्नं मदंति। वैश्वानरोऽग्निर्यास्वप्सु प्रविष्टः ता आपो देव्य इह स्थितं मामवंतु ॥

॥ इति पंचमस्य चतुर्थे षोडशो वर्गः ॥

आ वां मित्रावरुणेति चतुरृचं सप्तदशं सूक्तं वसिष्ठस्यार्षं। चतुर्थ्यतिजगती न्यूनेन शक्वरी वादितस्तिस्रो जगत्यः। प्रथमा मैत्रावरुणी द्वितीयाग्नेयी तृतीया वैश्वानरी चतुर्थी गंगादिनदीदेवताका। तथा चानुक्रमणिका। आ वां मैत्रावरुण्याग्नेयी वैश्वदेवी नदीस्तुतिर्जागतमंत्यातिजगती शक्वरी वेति। अस्य सूक्तस्य मत्स्यं विषादिहरणे विनियोगो लिंगादवगंतव्यः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तत्र प्रथमा ॥

आ मां मित्रावरुणेह रक्षतं कुलाययद्विश्वयन्मा न आ गन्।

अजकावं दुर्दृशीकं तिरो दधे मा मां पद्येन रपसा

विदत्त्सरुः॥ १

आ। मां। मित्रावरुणा। इह। रक्षतं। कुलाययत्।

विऽश्वयत्। मा। नः। आ। गन्।

अजकाऽवं। दुःऽदृशीकं। तिरः। दधे। मा। मां। पद्येन।

रपसा। विदत्। त्सरुः॥ १

हे मित्रावरुणा हे मित्रावरुणौ युवामिहास्मिल्लोके मामा रक्षतं। आभिमुख्येन पालयतं। कुलाययत्। कुलायं स्थानं। तत्कुर्वत् शरीरविशेषेण वर्तमानं विषं नोऽस्मान् आभिमुख्येन मा गन्। मा गमत्। मा गच्छतु। तथाजकावं। अजका नाम रोगविशेषः। तद्वत् दुर्दृशीकं दुर्दर्शनं विषं तिरो दधे। तिरो धत्तां। त्सरुश्छद्मगामी। तथा त्सरुश्छद्मगामी। जिह्मगः सर्प इत्यर्थः। मां पद्येन पादभवेन रपसा। रपः पापनामा। शब्देनमा विदत्। न जानातु॥

॥ अथ द्वितीया ॥

यद्विजामन्परुषि वन्दनं भुवदष्ठीवन्तौ परि कुल्फौ च देहत्।

अग्निष्टच्छोचन्नप बाधतामितो मा मां पद्येन रपसा

विदत्त्सरुः॥ २

यत्। विऽजामन्। परुषि। वन्दनं। भुवत्। अष्ठीवन्तौ।

परि। कुल्फौ। च। देहत्।

अग्निः। तत्। शोचन्। अप। बाधतां। इतः। मा। मां।

पद्येन। रपसा। विदत्। त्सरुः॥ २

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पंदनमेतत्संयुक्तं यद्विषं विज्ञायते विविधजन्मानि यदपि कुल्यादीनां पर्वाणि वमद् अन्नवेत्। यश्च विषमष्ठीवंतो जातुनो ज्ञुल्को गुल्फो च परिरक्षत्। दिह उपचये। उपचितं कुर्यात् अग्निर्देवः योचद्धं दीप्यमानः सन् इतोऽस्मात्स्थानात्स्विग्नपदाधस्तां। अपचंत। शिष्टं व्याख्यातं ॥

॥ अथ तृतीया ॥

यद्भ्रसलो भवति यन्नदीषु यदोषधीभ्यः परि जायते विषं।

विश्वे देवा निरितस्तत्सुवंतु मा मां पद्येन रपसा

विदत्त्सरुः ॥ ३

यत्। भ्रवमलौ। भवति। यत्। नदीषु। यत्। ओषधीभ्यः।

परि। जायते। विषं।

विश्वे। देवाः। निः। इतः। तत्। सुवंतु। मा। मां।

पद्येन। रपसा। विदत्। त्सरुः ॥ ३

यद्विषं यद्भ्रमावेतत्संयुक्तो मद्ये भवति। यद्विषं नदीषु सन्नस्थापयश प्रादुर्भवति। परीति पंचम्यर्थानुवादी। ओषधीभ्यः सकाशाद्यद्विषं जायते उत्पद्यते विश्वे सर्वे देवास्तद्विषमितोऽस्मात्स्थानाद्देशात् निः सुवंतु। निःशेषेण प्रेरयंतु। मा मामिति शिष्टं व्याख्यातं ॥

॥ अथ चतुर्थी ॥

याः प्रवतो निवत उद्वत उदन्वतीरनुदकाश्च याः।

ता अस्मभ्यं पयसा पिन्वमानाः शिवा देवीरशिपदा भवंतु

सर्वा नद्यो अशिमिदा भवंतु ॥ ४

याः। प्रऽवतः। निऽवतः। उत्ऽवतः। उदन्ऽवतीः।

अनुदकाः। च। याः।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ताः । अस्मभ्यं । पयसा । पिन्वमानाः । शिवाः । देवीः ।

अशिपदाः । भवन्तु । सर्वाः । नद्यः । अशिमिदाः ।

भवन्तु ॥ ४

या नद्यः प्रवतः प्रवणदेशे गच्छन्त्यः । या निवतो निम्नदेशे गच्छन्त्यः । या उद्वत उन्नतदेशे गच्छन्त्यः । या उदन्वतीरुदन्वत्य उदकयुक्ताः । अनुदकाश्चोदकरहिताश्च या नद्यो यान्ति पयसोदकेन पिन्वमाना विश्वमाप्याययन्त्यो देवीर्देव्यो द्योतमाना-स्ताअस्मभ्यं नद्योऽस्मभ्यमशिपदाः । शिपदं नाम रोगविशेषः । तद्वर्जिताः सत्यः शिवाः कल्याण्यो भवन्तु । अपि च सर्वास्ता नद्योऽशिमिदाः । शिमिर्वधकर्मा । अहिंसाप्रदा भवन्तु ॥

॥ इति पंचमस्य चतुर्थे सप्तदशो वर्गः ॥

आदित्यानामिति त्र्यृचमष्टादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमादित्यदेवताकं । अनुक्रम्यते च । आदित्यानां त्र्यृचमादित्यं त्विति ॥ गतः सूक्तविनियोगः ॥ आदित्यदेवताके पशावादित्यानामवसेति वपाया अनुवाक्या । सूत्रितं च । आदित्यानामवसा नूतनेनेमा गिर आदित्येभ्यः । आ० ३. ८. । इति ॥ आदित्यचरावेषानुवाक्या । सूत्रितं च । आदित्यानामवसा नूतनेन धीता यक्षदादित्यान् । आ० ५. १७. । इति ॥

॥ तत्र प्रथमा ॥

आदित्यानामवसा नूतनेन सक्षीमहि शर्मणा शंतमेन ।

अनागास्त्वे अदितित्वे तुरास इमं यज्ञं दधतु श्रोषमाणाः ॥ १

आदित्यानां । अवसा । नूतनेन । सक्षीमहि । शर्मणा ।

शंऽतमेन ।

अनागाःऽत्वे । अदितिऽत्वे । तुरासः । इमं । यज्ञं । दधतु ।

श्रोषमाणाः ॥ १

आदित्यानामदितेः पुत्राणामेतत्संज्ञकानां देवानामवसा रक्षणेन । तादर्थ्ये तृतीयेत्यर्थः । नूतनेनाद्यतनेन शंतमेन । शं सुखं । अतिशयेन तत्करणेन शर्मणा । शर्मेति गृहनामैतत् । गृहेण सक्षीमहि । वयं संगच्छेमहि । तुरासस्तुरास्त्वरिता

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आदित्याः सोममाप्या अस्मदीयानि स्तोत्राणि शृण्वंतो यज्ञं यष्टारमिमं जनमना-गास्त्वेऽनपराधत्वे चादितित्वेऽदीनत्वे च दधतु। स्थापयंतु ॥

आदित्यासो अदितिरित्यादित्यपंचकस्य याज्या। सूत्रितं च। आदित्यासो अदि-तिर्मादयंतामिति नैतं चतुर्थीमेव हूयमानं। आ० ५. १७. । इति ॥

॥ सैषा सूक्ते द्वितीया ॥

आदित्यासो अदितिर्मादयंतां मित्रो अर्यमा वरुणो रजिष्ठाः।
अस्माकं संतु भुवनस्य गोपाः पिबंतु सोममवसे नो अद्य ॥ २

आदित्यासः। अदितिः। मादयंतां। मित्रः। अर्यमा।
वरुणः। रजिष्ठाः।
अस्माकं। संतु। भुवनस्य। गोपाः। पिबंतु। सोमं।
अवसे। नः। अद्य ॥

आदित्याश्च आदित्या देवा अदितिस्तेषां माता च। यद्वादितिरिति देवविशेषणं। अदितिरदितयोऽदीना रजिष्ठा अतिशयेन ऋजवो मित्रोऽर्यमा वरुणश्चैते सर्वे मादयंतां। तृप्ताः संतु। भुवनस्य सर्वस्य जगतो गोपा रक्षका एवंभूता देवा अस्माकं संतु। अस्माकमेव रक्षका भवंत्वित्यर्थः। अद्यास्मिन्दिने नोऽस्माकमवसे रक्षणाय सोममस्माभिरभिषुतं पिबंतु ॥

॥ अथ तृतीया ॥

आदित्या विश्वे मरुतश्च विश्वे देवाश्च विश्व ऋभवश्च विश्वे।
इंद्रो अग्निरश्विना तुष्टुवाना यूयं पात स्वस्तिभिः सदा नः ॥ ३

आदित्याः। विश्वे। मरुतः। च। विश्वे। देवाः। च।
विश्वे। ऋभवः। च। विश्वे।
इंद्रः। अग्निः। अश्विना। तुस्तुवानाः। यूयं। पात।
स्वस्तिऽभिः। सदा। नः ॥ ३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आदित्या अदितेः पुत्रा विश्वे सर्वे द्वादशसंख्याका अक्षो विश्वे मरुतश्च वर्षे एकोनपंचाशत्संख्योपेताश्च विश्वे देवाश्च विश्व ऋभवश्चेंद्रोऽग्निरश्विनाश्विनावेतत्सं ख्या एवंभूता ये देवास्तुष्टुवाना अस्माभिः स्तुता बभूवुः सर्वे ते देवा यूयं सदा सर्वदा नोऽस्मान् स्वस्तिभिः कल्याणैः पात । रक्षत ॥

॥ इति पंचमस्य चतुर्थेऽष्टादशो वर्गः ॥

आदित्यासो अदितय इति नवात्मकमेकोनविंशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमादित्यदेवताकं । आदित्यास इत्यनुक्रमणिका ॥ गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

आदित्यासो अदितयः स्याम पूर्देवत्रा वसवो मर्त्यत्रा ।

सनेम मित्रावरुणा सनंतो भवेम द्यावापृथिवी भवंतः ॥ १

आदित्यासः । अदितयः । स्याम । पूः । देवऽत्रा । वसवः ।

मर्त्यऽत्रा ।

सनेम । मित्रावरुणा । सनंतः । भवेम । द्यावापृथिवी इति ।

भवंतः ॥ १

हे आदित्यास आदित्या देवाः ॥ व्यत्ययेनाद्युदात्तत्वाभावः ॥ अदादित्यानामिव आदित्याः ॥ तस्येदमित्यर्थे प्रत्यग्द्वितीयो यत्प्रत्ययः ॥ आदित्यानां शेषभूता वयमदितयोऽखंडनीयाः स्याम । भवेम । देवत्रा देवेषु वसवो वासका देवा युष्मदीयं पूः पालनं मर्त्यत्रा मनुष्येष्वस्मास्तु भवतु । हे मित्रावरुणा मित्रावरुणौ सनंतो युवां संभजंतो वयं सनेम । युवाभ्यां दत्तं धनं संभजेमहि । हे द्यावापृथिवी द्यावापृथिव्यौ युवयोः प्रसादाद्वयं भवंतो भवेम । भूतिमंतः स्याम ॥

॥ अथ द्वितीया ॥

मित्रस्तन्नो वरुणो मामहंत शर्म तोकाय तनयाय गोपाः ।

मा वो भुजेमान्यजातमेनो मा तत्कर्म वसवो यच्चयध्वे ॥ २

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मित्रः। तत्। नः। वरुणः। ममहंत। शर्म। तोकाय।

तनयाय। गोपाः।

मा। वः। भुजेम। अन्यऽजातं। एनः। मा। तत्।

कर्म। वसवः। यत्। चयध्वे॥ २

मित्रो वरुणोऽग्निर्याभिमानिनो देवाविन्द्राद्याः सर्वे आदित्या नोऽस्मभ्यं तत्प्रसिद्धं शर्म सुखं ममहंत। मंहतिर्दानकर्मा। ददतु। गोपा विश्वस्य रक्षकास्ते देवास्तोकायास्मदीयाय पुत्राय तनयाय तत्सुताय च शर्म प्रयच्छंतु। अथ प्रत्यक्षस्तुतिः। हे देवा वो युष्मदीया वयमन्यजातमन्येनोत्पादितमेनः पापं मा भुजेम। मा वयमंतःस्थाम। हे वसवो वासका देवा यत्नेन युष्मदप्रियेण कर्मणा चयध्वे नाशयथ तत्तादृशं कर्म वयं मा कर्म। मा कार्ष्म॥ कृञ् करोतेश्छंदसि लुङि रूपं। मंत्रे घसह्वरेत्यादिना च्लेर्लुक्॥

॥ अथ तृतीया॥

तुरण्यवोऽंगिरसो नक्षंत रत्नं देवस्य सवितुरियानाः।

पिता च तन्नो महान्यजत्रो विश्वे देवाः समनसो जुषंत॥ ३

तुरण्यवः। अंगिरसः। नक्षंत। रत्नं। देवस्य। सवितुः।

इयानाः।

पिता। च। तत्। नः। महान्। यजत्रः। विश्वे। देवाः।

सऽमनसः। जुषंत॥ ३

तुरण्यवो यज्ञादिकर्मसु त्वरिता अंगिरस एतन्नामका ऋषय इयानाः सवितारं याचमानाः संतः सवितुः प्रेरकस्य देवस्य संबंधि रत्नं रमणीयं धनं नक्षंत व्याप्नुवंत। उत्तरार्धगततच्छब्दापेक्षया यच्छब्दोऽध्याह्रियते। यजत्रो यजनीयो महान् प्रभूतः पिता च सर्वस्य पितृभूतो वरुणः। यद्वा सर्वेषां पिता प्रजापतिर्विश्वे

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सर्वे देवाः समनसः समानमनस्कास्सन्तस्तादृशं रत्नं नोऽस्मान् युवंत। सेवयंतु। यद्वा नोऽस्मभ्यं ददतु॥

॥ इति पंचमस्य चतुर्थे एकविंशो वर्गः॥

प्र द्यावा यज्ञैरिति तृचात्मकं त्रिंशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं द्यावापृथिवीयं। अनुक्रम्यते च। प्र द्यावा द्यावापृथिव्यमिति॥ चतुर्थेऽहनि वैश्वदेवशस्त्र इदं द्यावापृथिव्यनिविद्धानं। सूत्रितं च। आ देवो यातु प्र द्यावेति चासिष्ठं। आ० ८. ८.। इति॥ द्यावापृथिव्ये पशौ वपापुरोडाशयोः प्र द्यावेति द्वे ऋचौ याज्ये। सूत्रितं च। प्र द्यावा यज्ञैः पृथिवी नमोभिरिति द्वे। आ० ३. ८.। इति॥

॥ अथ प्रथमा॥

प्र द्यावा यज्ञैः पृथिवी नमोभिः सबाध ईडे बृहती यजत्रे।

ते चिद्धि पूर्वे कवयो गृणंतः पुरो मही दधिरे देवपुत्रे॥ १

प्र। द्यावा। यज्ञैः। पृथिवी इति। नमःऽभिः। सऽबाधः।

ईडे। बृहती इति। यजत्रे इति।

ते इति। चित्। हि। पूर्वे। कवयः। गृणंतः। पुरः।

मही इति। दधिरे। देवपुत्रे इति देवऽपुत्रे॥ १

यजत्रे यजनीये बृहती बृहत्यौ महत्यौ द्यावापृथिवी द्यावापृथिव्यौ यज्ञैर्यागैर्नमोभिः स्तोत्रैश्चाहं स्तोता सबाधो बाधासहितः। ऋत्विजां संबाधयुक्त इत्यर्थः। प्र ईडे। प्रकर्षेण स्तौमि। मही महत्यौ देवपुत्रे। देवाः पुत्रा ययोस्ते। ते चिद्धि तादृश्यौ अपि द्यावापृथिव्यौ पूर्वे पुरातनाः कवयो गृणंतः स्तुवंतः पुरो दधिरे। पुरस्तात्स्थापयामासुः॥

आग्रयणे द्यावापृथिव्यैककपालस्य प्र पूर्वजे इति याज्या। सूत्रितं च। मही द्यौः पृथिवी च नः प्र पूर्वजे पितरा नव्यसीभिः। आ० २. ९.। इति॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ सैषा सूक्ते द्वितीया ॥

प्र पूर्वजे पितरा नव्यसीभिर्गीर्भिः कृणुध्वं सदने ऋतस्य।
आ नो द्यावापृथिवी दैव्येन जनेन यातं महि वां वरूथं॥ २

प्र। पूर्वजे इति पूर्वऽजे। पितरा। नव्यसीभिः। गीःऽभिः।
कृणुध्वं। सदने इति। ऋतस्य।
आ। नः। द्यावापृथिवी इति। दैव्येन। जनेन। यातं।
महि। वां। वरूथं॥ २

हे अस्मदीया स्तोतारो यूयं नव्यसीभिर्नवतराभिर्गीर्भिः स्तुतिरूपाभिर्वाग्भिर्यज्ञस्य यज्ञस्य सदने स्थानभूते पूर्वजे पूर्वं प्रजाते पितरा पितरौ विश्वस्य मातापितृभूते द्यावापृथिव्यौ प्रकृणुध्वं। पुरस्कुरुत। अथ प्रत्यक्षस्तुतिः। हे द्यावापृथिवी द्यावापृथिव्यौ युवां दैव्येन देवसंबंधिना जनेन सह नोऽस्मानभ्यायातं। आगच्छतं। किमर्थमायातमित्युच्यते। वां युवयोर्वरूथमस्माभिर्वरणीयं महि महत्। धनमस्तीति शेषः। तदस्मभ्यं दीयतामित्यर्थः॥

॥ अथ तृतीया ॥

उतो हि वां रत्नधेयानि संति पुरूणि द्यावापृथिवी सुदासे।
अस्मे धत्तं यदसदस्कृधोयु यूयं पात स्वस्तिभिः सदा नः॥ ३

उतो इति। हि। वां। रत्नऽधेयानि। संति। पुरूणि।
द्यावापृथिवी इति। सुऽदासे।
अस्मे इति। धत्तं। यत्। असत्। अस्कृधोयु। यूयं। पात।
स्वस्तिऽभिः। सदा। नः॥ ३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उतो अपि च स्वस्ति हे द्यावापृथिवी द्यावापृथिव्यौ शं युवयोः सुदासे शोभनदानाय यजमानाय देयानि पुरूणि बहूनि रत्नधेयानि रमणीयानि धनानि संति। भवंति। तेषां मध्ये यद्धनमस्मृधोयु। मधुनो स्तवः। अन्यत्रायनल्पमस्मत् भवेत् तद्धनमस्मे अस्मभ्यं धत्तं। प्रयच्छतं। हे द्यावापृथिव्यौ यूयं युवां नोऽस्मान् सर्वदा कल्याणैः पात। पालयतं॥

॥ इति पंचमस्य चतुर्थे विंशो वर्गः॥

वास्तोष्पत इति तृचात्मकमेकविंशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वास्तोष्पत्यं। तथा चानुक्रम्यते। वास्तोष्पते वास्तोष्पत्यमिति। आप्ते गृहनिर्माणे वास्तोष्पत इति त्रिसृभिः प्रत्यृचं जुहुयात्। सूत्रितं च। वास्तोष्पते प्रति जानीह्यस्मानिति तिसृभिः प्रत्यृचं हुत्वा। गृ० सू० २. ८.। इति॥

॥ तत्र प्रथमा॥

वास्तोष्पते प्रति जानीह्यस्मान्त्स्वावेशो अनमीवो भवा नः।

यत्त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे॥ १

वास्तोः। पते। प्रति। जानीहि। अस्मान्। सुऽआवेशः।

अनमीवः। भव। नः।

यत्। त्वा। ईमहे। प्रति। तत्। नः। जुषस्व। शं। नः।

भव। द्विऽपदे। शं। चतुःऽपदे॥ १

हे वास्तोष्पते गृहस्य पालयितर्देव त्वमस्मान् त्वदीयान् स्तोतॄनिति प्रतिजानीहि। प्रबुध्यस्व। तदनंतरं नोऽस्माकं स्वावेशः शोभननिवेशोऽनमीवोऽरोगकृच्च भव। किंच वयं त्वा त्वां यद्धनमीमहे याचामहे त्वमपि तद्धनं नोऽस्मभ्यं प्रतिजुषस्व। प्रयच्छ। अपि च नोऽस्माकं द्विपदे पुत्रपौत्रादिजनाय शं सुखकरो भव। चतुष्पदेऽस्मदीयाय गवाश्वादिपशवे च शं सुखकरो भव॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ द्वितीया ॥

वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो ।
अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति नो जुषस्व ॥ २

वास्तोः । पते । प्रऽतरणः । नः । एधि । गयऽस्फानः ।
गोभिः । अश्वेभिः । इन्दो इति ।
अजरासः । ते । सख्ये । स्याम । पिताऽइव । पुत्रान् ।
प्रति । नः । जुषस्व ॥ २

हे वास्तोष्पते गृहस्य पालयितर्देव त्वं नोऽस्माकं प्रतरणः प्रवर्धको गयस्फानो गयस्यास्मदीयस्य धनस्य स्फायिता प्रवर्धक एधि । भव । हे इन्दो सोमवदाह्लादक ते त्वया सह सख्ये सति वयं गोभिः पशुभिरश्वेभिरश्वैश्च सहिता अजरासो जरारहिताः स्याम । भवेम विनाशरहिता इत्यर्थः । पितेव पुत्रान् । यथा पिता पुत्रान्वत्सलत्वेन सेवते तथा त्वमपि नोऽस्मान्प्रतिजुषस्व । सेवस्व

॥ अथ तृतीया ॥

वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या ।
पाहि क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः ॥ ३

वास्तोः । पते । शग्मया । सम्ऽसदा । ते । सक्षीमहि ।
रण्वया । गातुऽमत्या ।
पाहि । क्षेमे । उत । योगे । वरम् । नः । यूयम् । पात ।
स्वस्तिऽभिः । सदा । नः ॥ ३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे वास्तोष्पते देव शग्मया सुखकर्या रण्वया रमणीयया गातुमत्या धनवत्या ते त्वया देवया संसदा स्थानेन सचीमहि। वयं संगच्छेमहि। त्वमपि क्षेमे प्राप्तस्य रक्षण उतापि च योगेऽप्राप्तस्य प्रापणे वरं वरणीयं नोऽस्मदीयं धनं पाहि। रक्ष। हे वास्तोष्पते यूयं त्वं नोऽस्मान् सर्वदा कल्याणैः पात। पाहि॥

॥ इति पंचमस्य चतुर्थे एकविंशो वर्गः॥

अमीवहेत्यष्टर्चं द्वाविंशं सूक्तं। आद्या गायत्री पंचम्याद्यास्तिस्रोऽनुष्टुभो द्वितीयाद्यास्तिस्र उपरिष्टाद्बृहत्यः। त्वष्टका चतुर्थ्यादयश्च बृहतीति तन्मुख्य-योगात्। आद्या वास्तोष्पतिदेवताका शिष्टा ऐंद्र्यः। तथा चानुक्रांतं अमीवहाष्टौ वास्तोष्पत्याद्या गायत्री शेषाः सुपरिष्टाद्बृहत्यादयोऽनुष्टुभः प्रस्वापिन्य उपनिषदिति॥ गतो विनियोगः॥ बृहद्देवतायां यदुक्तं तदिह लिख्यते॥ वरुणस्य गृहान्रात्रौ वसिष्ठः स्वप्नमाचरन्। प्रविवेशाथ तं तत्र श्वा नदन्नभ्यवर्तत॥ क्रंदंतं सारमेयं स धावंतं दष्टुमुद्यतं। यदर्जुनेति च द्वाभ्यां शांतयित्वा ह्यसूषुपत्॥ एवं प्रस्वापयामास जनमन्यं च वारुणमिति॥ अत्र केचित्पुनरेवमाहुः॥ प्राचां प्रस्वापिनित्वं तु कथासु परिकल्प्यते। वसिष्ठस्तृषितोऽन्नार्थी त्रिरात्रात्तक्तभोजनः। चतुर्थेरात्रौ चौर्यार्थं शास्त्र्यं स्वप्नमेत्यत्र॥ कोष्ठागारे प्रवेशाय पाशवस्त्रादितुष्टये। यदर्जुनेति सप्तर्चं ददर्श च जजाप चेति॥

॥ तत्र प्रथमा॥

अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन्।
सखा सुशेव एधि नः॥ १

अमीवऽहा। वास्तोः। पते। विश्वा। रूपाणि। आऽविशन्।
सखा। सुऽशेवः। एधि। नः॥ १

हे वास्तोष्पते गृहस्य पालयितर्वास्तोष्पतिसंज्ञक देव अमीवहामीवानां रोगाणां नाशयिता त्वं विश्वा विश्वानि बहूनि रूपाण्याविशन् प्रविशन्। यद्यद्रूपं कामयंते तत्तद्देवता भवंति। नि० १०. १७.। इति यास्कः। नोऽस्माकं सखा मित्रभूतः सुशेवः सुष्ठु सुखकर एधि। भव॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ द्वितीया ॥

यदर्जुन सारमेय दतः पिशंग यच्छसे ।

वीव भ्राजंत ऋष्टय उप स्रक्वेषु बप्सतो नि षु स्वप ॥ २

यत् । अर्जुन । सारमेय । दतः । पिशंग । यच्छसे ।

विऽइव । भ्राजंत । ऋष्टयः । उप । स्रक्वेषु । बप्संतः । नि ।

सु । स्वप ॥ २

हे अर्जुन श्वेत हे सारमेय । सरमा नाम देवशुनी । तस्याः कुलोद्भव हे पिशंग केषु चिदंगेषु पिंगलवर्ण एवंभूत हे शुनक त्वं दतो दंतान्यदा यच्छसे विस्तारयसि । अस्मान्दष्टुमित्यर्थः । तदानीं वीव भ्राजंत ऋष्टयः । यथायुधानि विशेषेण भासंते तथोपाभक्षणेपि बप्सतो भक्षयतस्तव दंताः स्रक्वेषु स्रक्कासु भासंते । स्रक्का यद्योष्ठयोः प्रांतप्रदेशः । तथाभूतस्त्वमिदानीं सु सुष्ठु नि स्वप । नितरां निद्रां कुरु ॥

॥ अथ तृतीया ॥

स्तेनं राय सारमेय तस्करं वा पुनःसर ।

स्तोतॄनिंद्रस्य रायसि किमस्मान्दुच्छुनायसे नि षु स्वप ॥ ३

स्तेनं । राय । सारमेय । तस्करं । वा । पुनःऽसर ।

स्तोतॄन् । इंद्रस्य । रायसि । किं । अस्मान् । दुच्छुनऽयसे ।

नि । सु । स्वप ॥ ३

हे पुनःसर । गतमेव देशं पुनः सरतीति पुनःसरः तादृग्भूत हे सारमेय त्वं स्तेनं । प्रच्छन्नमनापहारी स्तेनः । तं । तस्करं । प्रत्यक्षमनापहारी तस्करः । तं वा राय । गच्छ । इंद्रस्य स्तोतॄनस्मान् किं रायसि । गच्छसि । अस्मान्दुच्छुनायसे । किं बाधसे । नि षु स्वप । अत्यंतं निद्रां कुरु ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ चतुर्थी ॥

त्वं सूकरस्य दर्दृहि तव दर्दर्तु सूकरः ।

स्तोतॄनिन्द्रस्य रायसि किमस्मान्दुच्छुनायसे नि षु स्वप ॥ ४

त्वं । सूकरस्य । दर्दृहि । तव । दर्दर्तु । सूकरः ।

स्तोतॄन् । इन्द्रस्य । रायसि । किं । अस्मान् । दुच्छुनऽयसे ।

नि । सु । स्वप ॥ ४

हे सारमेय त्वं सूकरस्य वराहस्य ॥ द्वितीयार्थे षष्ठी ॥ दर्दृहि । विदारय । सूकरोऽपि तव दर्दर्तु । विदारयतु । युवयोर्निश्चयैरिलातु । अस्माभ्यां दशेत्यर्थः ॥ स्तोतॄनित्यर्धर्चः पूर्वमात्रापि व्याख्यातः ॥

॥ अथ पंचमी ॥

सस्तु माता सस्तु पिता सस्तु श्वा सस्तु विश्पतिः ।

ससंतु सर्वे ज्ञातयः सस्त्वयमभितो जनः ॥ ५

सस्तु । माता । सस्तु । पिता । सस्तु । श्वा । सस्तु । विश्पतिः ।

ससंतु । सर्वे । ज्ञातयः । सस्तु । अयं । अभितः । जनः ॥ ५

हे सारमेय माता त्वदीया जननी सस्तु । स्वपतु । पिता च सस्तु । श्वा सारमेयो भवान् सस्तु । विश्पतिर्जातानां वश्या विशां जनानां पालको स्वामी सस्तु । सर्वे ज्ञातयो बंधवोऽपि ससंतु । स्वपंतु । अभितः परितः स्थितोऽयमपि सर्वो जनः सस्तु । स्वपतु ॥

॥ अथ षष्ठी ॥

य आस्ते यश्च चरति यश्च पश्यति नो जनः ।

तेषां सं हन्मो अक्षाणि यथेदं हर्म्यं तथा ॥ ६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यः । आस्ते । यः । च । चरति । यः । च । पश्यति । नः । जनः ।
तेषां । सं । हन्मः । अक्षाणि । यथा । इदं । हर्म्यं । तथा ॥ ६

यो जन आस्ते स्वस्मिन्प्रदेशे तिष्ठति । यश्च चरति गच्छति । यश्च जनो नोऽस्मान्पश्यति एवंभूतानां तेषां जनानामक्षाण्यिंद्रियाणि संहन्मः । संहनाम । संहतिर्निमीलनं । निमीलयामेत्यर्थः । इदं प्रत्यक्षेणोपलभ्यमानं हर्म्यं प्रासादादिस्थावरात्मकं वस्तुजातं यथा निश्चलं भवति तथैवेमे सर्वे जना निश्चला भवंत्वित्यर्थः ॥

॥ अथ सप्तमी ॥

सहस्रशृंगो वृषभो यः समुद्रादुदाचरत् ।
तेना सहस्येना वयं नि जनान्त्स्वापयामसि ॥ ७

सहस्रऽशृंगः । वृषभः । यः । समुद्रात् । उत्ऽआचरत् ।
तेन । सहस्येन । वयं । नि । जनान् । स्वापयामसि ॥ ७

सहस्रशृंगः सहस्रकिरणो वृषभो कामानां वर्षिता यः सूर्यः समुद्रादंतरिक्षात् सकाशादुदाचरत् उदागच्छति सहस्येनाभिभवित्रा तेन सूर्येण वयं कोशादो जनान् सर्वान्निष्वापयामसि । नितरां स्वापयामः ॥

॥ अथाष्टमी ॥

प्रोष्ठेशया वह्येशया नारीर्यास्तल्पशीवरीः ।
स्त्रियो याः पुण्यगंधास्ताः सर्वाः स्वापयामसि ॥ ८

प्रोष्ठेऽशयाः । वह्येऽशयाः । नारीः । याः । तल्पऽशीवरीः ।
स्त्रियः । याः । पुण्यऽगंधाः । ताः । सर्वाः स्वापयामसि ॥ ८

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वायादह्रो नारीर्नार्यः स्त्रियः प्रोष्ठेशयाः प्रोष्ठे शयानाः। या वह्येशयाः। वह्यं वाहनं। तस्मिन् शयानाः। यास्तल्पशीवरीस्तल्पशयाः। याः स्त्रियः पुण्यगंधा मंगल्यगंधाः तास्तादृशीः सर्वाः स्त्रीः स्वापयामसि। वयं निद्रां कारयामः॥

॥ इति पंचमस्य चतुर्थे द्वाविंशो वर्गः ॥

॥ इति सप्तमे मंडले तृतीयोऽनुवाकः ॥

अथ चतुर्थेऽनुवाके पंचदश सूक्तानि। तत्र क ईं व्यक्ता इति पंचविंशत्यृचं प्रथमं सूक्तं वसिष्ठस्यार्षं मरुद्देवताकं। आद्या एकादश द्विपदा विराजः शिष्टाश्चतुर्दश त्रिष्टुभः। तथा चानुक्रांतं। क ईं पंचाधिका मारुतं ह्याद्या एकादश द्विपदा इति॥ दशरात्रे षष्ठेऽहन्याग्निमारुते शस्त्र इदं मारुतनिविद्धानं सूक्तं। सूत्रितं च। वैश्वानरस्य सुमतौ क ईं व्यक्ता नरः। आ० ८. ८। इति॥

॥ तत्र प्रथमा ॥

क ईं व्य॑क्ता नरः सनीडा रुद्रस्य मर्या अधा स्वश्वाः ॥ १

के। ईं। विऽअ॑क्ताः। नरः। सऽनीडाः। रुद्रस्य। मर्याः।

अध। सुऽअश्वाः ॥ १

व्यक्ताः कांतियुक्ता नरो नेतारः सनीडाः समानौकसो रुद्रस्य महादेवस्य पुत्रा मर्या मर्येभ्यो मनुष्येभ्यो हिता अधापि च स्वश्वाः शोभनाश्वा ईदृशा एवंभूताः के भवंतीति स्तुत्यतिशयादविदांचर्षेर्वाक्॥

॥ अथ द्वितीया ॥

नकिर्ह्ये॑षां जनूंषि वेद ते अंग विद्रे मिथो जनित्रं ॥ २

नकिः। हि। एषां। जनूंषि। वेद। ते। अंग। विद्रे।

मिथः। जनित्रं ॥ २

एषां मरुतां जनूंषि जन्मानि नकिर्हि वेद। कश्चिदपि न खलु जानाति। ते तादृशा मरुतो मिथः परस्परं जनित्रं रुद्रपृश्निभ्यां सकाशात्प्रादुर्भूतं स्वकीयं जन्मांग विद्रे। स्वयमेव विदंति॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ तृतीया ॥

अभि स्वपूभिर्मिथो वपंत वातस्वनसः श्येना अस्पृध्रन् ॥ ३

अभि। स्वऽपूभिः। मिथः। वपंत। वातऽस्वनसः। श्येनाः। अस्पृध्रन् ॥ ३

मरुतः स्वपूभिः स्वकीयैः पवनैः संचरणैः स्वयमेव संचरंतो मिथः परस्परमभिवपंत। संगच्छंते। अपि च वातस्वनसो वायुवत्स्वनंतः शब्दायमानाः श्येनाः। श्यैङ् गताविति धातो रूपं। गमनशीलाः। यद्वा श्येना इति लुप्तोपममेतत्। श्येनाः पक्षिणः। तद्वद्गच्छंतोऽस्पृध्रन्। परस्परं रूपसौंदर्यादिभिः स्पर्धंते॥

॥ अथ चतुर्थी ॥

एतानि धीरो निण्या चिकेत पृश्निर्यदूधो मही जभार ॥ ४

एतानि। धीरः। निण्या। चिकेत। पृश्निः। यत्। ऊधः। मही। जभार ॥ ४

धीरो धीमान् प्राज्ञो जनो निण्या निण्यानि अंतर्हितान्येतानि मरुदात्मकानि भूतानि चिकेत। जानीयात्। किंतु न सर्वे जना जानंतीत्यर्थः मही महती पृश्निर्मरुतां जननी यद् यानि मरुदात्मकानि भूतान्यूध ऊधस्यंतरिक्षे स्वकीये जठरे वा जभार बभार एतानि चिकेतेति पूर्वेण संबंधः॥

॥ अथ पंचमी ॥

सा विट् सुवीरा मरुद्भिरस्तु सनात्सहंती पुष्यंती नृम्णं ॥ ५

सा। विट्। सुऽवीरा। मरुत्ऽभिः। अस्तु। सनात्। सहंती। पुष्यंती। नृम्णं ॥ ५

सा विट् सा प्रजा मरुतः परिचरति। सा प्रजा मरुद्भिर्नेतृभिः सनात् चिराद्सहंती शत्रूनभिभवंती नृम्णं धनं बलं वा पुष्यंती वर्धंती सुवीरा शोभनपुत्रयुक्तास्तु। अस्तु॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ षष्ठी ॥

यामं येष्ठाः शुभा शोभिष्ठाः श्रिया संमिश्ला ओजोभिरुग्राः ॥ ६

यामं । येष्ठाः । शुभा । शोभिष्ठाः । श्रिया । संऽमिश्लाः ।

ओजःऽभिः । उग्राः ॥ ६

मरुतो यामं यातव्यं गंतव्यं प्रदेशं येष्ठा यातृतमा अतिशयेन गंतारः शुभालंकारेण शोभिष्ठा अतिशयेन शोभायुक्ताः श्रिया कांत्या संमिश्लाः संगच्छमाना ओजोभिर्बलैरुग्रा उद्गूर्णाः । एवंभूता भवंतीति शेषः ॥

॥ अथ सप्तमी ॥

उग्रं व ओजः स्थिरा शवांस्यधा मरुद्भिर्गणस्तुविष्मान् ॥ ७

उग्रं । वः । ओजः । स्थिरा । शवांसि । अध । मरुत्ऽभिः ।

गणः । तुविष्मान् ॥ ७

हे मरुतो वो युष्माकमोजस्तेन उग्रमुद्गूर्णं भवतु । शवांसि युष्मदीयानि बलानि स्थिरा स्थिराणि केनचिदनपहर्तव्यानि भवंतु । अधापि च मरुद्भिर्गणो रुद्राणां संघस्तुविष्मान् हविष्मान्भवतु ॥

॥ अथाष्टमी ॥

शुभ्रो वः शुष्मः क्रुध्मी मनांसि धुनिर्मुनिरिव शर्धस्य धृष्णोः ॥ ८

शुभ्रः । वः । शुष्मः । क्रुध्मी । मनांसि । धुनिः मुनिःऽइव ।

शर्धस्य । धृष्णोः ॥ ८

हे मरुतो वो युष्माकं शुष्मो बलं शुभ्रः सर्वतः शोभमानं । किंच वो मनांसि क्रुध्मी संग्रामेषु शत्रुहननार्थं क्रोधनशीलानि । धृष्णोर्धर्षणशीलस्य शर्धस्य बलवतो युष्मदीयस्य गणस्य धुनिश्च शत्रूणां कंपयितृवेगो ध्वनिरिव । मननान्मुनिः स्तोता । स यथा बहुविधं शब्दमुत्पादयति एवं बहुविधशब्दस्योत्पादक इत्यर्थः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ नवमी ॥

सनेम्यस्मद्युयोत दिद्युं मा वो दुर्मतिरिह प्रणङ्नः ॥ ९

सनेमि। अस्मत्। युयोत। दिद्युं। मा। वः। दुःऽमतिः।

इह। प्रणक्। नः ॥ ९

[हे मरुतः सनेमि पुराणं दिद्युमायुधमस्मदस्मत्तो युयोत। पृथक् कुरुत। वो युष्मदीया दुर्मतिः कुमतिरिहास्मिन्कर्मणि नोऽस्मान्मा प्रणक्। मा व्याप्नोतु ॥]

॥ अथ दशमी ॥

प्रिया वो नाम हुवे तुराणामा यत्तृपन्मरुतो वावशानाः ॥ १०

प्रिया। वः। नाम। हुवे। तुराणां। आ। यत्। तृपत्।

मरुतः। वावशानाः ॥ १०

[हे मरुतः तुराणां शत्रूणां हिंसकानां त्वरावतां वा वो युष्माकं प्रिया प्रियेण नाम नाम्नाहुवे। आह्वयामि। यद्येनानेन वावशानाः कामयमानाः संतस्तृपत् तृप्तिं गच्छंति ॥]

॥ इति पंचमस्य चतुर्थे त्रयोविंशो वर्गः ॥

॥ अथैकादशी ॥

स्वायुधास इष्मिणः सुनिष्का उत स्वयं तन्वः शुंभमानाः ॥ ११

सुऽआयुधासः। इष्मिणः। सुऽनिष्काः। उत। स्वयं। तन्वः।

शुंभमानाः ॥ ११

स्वायुधासः स्वायुधाः शोभनायुधा इष्मिणो गंतारः सुनिष्काः शोभनालंकारा उतापि च तन्वः स्वकीयानि शरीराणि शुंभमानाः स्वयमेव शोभयंतो मरुत एवंभूता भवंतीत्यर्थः ॥

नाहते पर्वो शुची वो हव्येति यथावा पदुवाक्या। इष्मिणं च। शुची वो हव्या मरुतः शुचीनां नू ष्टिर्ं मरुतः। आ० ३, ७। इति ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तत्रैषा द्वादशी ॥

शुची वो हव्या मरुतः शुचीनां शुचिं हिनोम्यध्वरं शुचिभ्यः ।
ऋतेन सत्यमृतसाप आयञ्छुचिजन्मानः शुचयः पावकाः ॥ १२

शुची । वः । हव्या । मरुतः । शुचीनां । शुचिं । हिनोमि ।
अध्वरं । शुचिऽभ्यः ।
ऋतेन । सत्यं । ऋतऽसापः । आयन् । शुचिऽजन्मानः ।
शुचयः । पावकाः ॥ १२

हे मरुतः शुचीनां शुद्धानां वो युष्माकं शुची शुचीनि हव्या हव्यानि हवींषि भवंतु । शुचिभ्यः प्रकाशमानेभ्यो युष्मभ्यं शुचिं शुद्धमध्वरं यागं हिनोमि । अहं प्रेरयामि । ऋतसाप ऋतमुदकं स्पृशंतो मरुत ऋतेन सत्येनैव सत्यमायन् । गच्छंति । कीदृशाः । शुचिजन्मानः शोभनजननाः शुचयो दीप्यमानाः पावकाः शोधका एवंभूता गच्छंतीत्यर्थः ॥

॥ अथ त्रयोदशी ॥

अंसेष्वा मरुतः खादयो वो वक्षःसु रुक्मा उपशिश्रियाणाः ।
वि विद्युतो न वृष्टिभी रुचाना अनु स्वधामायुधैर्यच्छमानाः ॥ १३

अंसेषु । आ । मरुतः । खादयः । वः । वक्षःऽसु । रुक्माः ।
उपऽशिश्रियाणाः ।
वि । विऽद्युतः । न । वृष्टिऽभिः । रुचानाः । अनु । स्वधां ।
आयुधैः । यच्छमानाः ॥ १३

हे मरुतोंऽसेषु युष्मदीयेषु स्कंधप्रदेशेषु खादयोऽलंकारविशेषाः । आसक्ता भवंतीति शेषः । रुक्मासः रुक्मा रोचमाना हारा वो युष्मदीयं वक्ष उरःप्रदेशमुपशिश्रियाणा आश्रिता भवंति । किंच हे मरुतो वृष्टिभिर्वर्षैः सार्धं विद्युतो न तडितो यथा रुचाना रोचमानास्तादृग्भूता यूयमायुधैर्वैद्युताडनैः स्वधामुदकमनुयच्छमानाः प्रयच्छंतो विचरथेति शेषः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

गृहमेधीये प्र बुध्न्या व इति प्रधानस्य याज्या। सूत्रितं च। प्र बुध्न्या व ईरते महांसीति पुष्टिमंतौ विराजौ संयाज्ये। आ० २. १८.। इति॥

॥ सैषा सूक्ते चतुर्दशी॥

प्र बुध्न्या व ईरते महांसि प्र नामानि प्रयज्यवस्तिरध्वं।

सहस्रियं दम्यं भागमेतं गृहमेधीयं मरुतो जुषध्वं॥ १४

प्र। बुध्न्या। वः। ईरते। महांसि। प्र। नामानि।

प्रऽयज्यवः। तिरध्वं।

सहस्रियं। दम्यं। भागं। एतं। गृहऽमेधीयं। मरुतः।

जुषध्वं॥ १४

हे मरुतो वो युष्मदीयानि बुध्न्या बुध्न्यान्यंतरिक्षे भवानि महांसि तेजांसि प्रेरते। प्रकर्षेण गच्छंति। किंच हे प्रयज्यवः प्रकर्षेण यष्टव्या मरुतो यूयं नामानि। यान्युदकमयंतीति नामान्युदकानि। तिरध्वं। वर्धयत। हे मरुतो यूयं सहस्रियं सहस्रसंख्याकं दम्यं दमे गृहे भवं गृहमेधीयं गृहमेधिगुणेभ्यो युष्मभ्यं देयमेतमेतादृशं भागं जुषध्वं। सेवध्वं। एकं भागं सहस्रियमिति कथमाह। तथा च श्रूयते। यावदेका देवता कामयते यावदेका तावदाहुतिः प्रथते न हि तदस्ति यत्तावदेव स्याद्यावज्जुहोतीति॥

॥ अथ पंचदशी॥

यदि स्तुतस्य मरुतो अधीथेत्था विप्रस्य वाजिनो हवीमन्।

मक्षू रायः सुवीर्यस्य दात नू चिद्यमन्य आदभदरावा॥ १५

यदि। स्तुतस्य। मरुतः। अधिऽइथ। इत्था। विप्रस्य।

वाजिनः। हवीमन्।

मक्षु। रायः। सुऽवीर्यस्य। दात। नु। चित्। यं। अन्यः।

आऽदभत्। अरावा॥ १५

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वाजिनो हविर्लक्षणान्नवतो विप्रस्य मेधाविनो मम संबंधिनि शमीमन् शमिश्रति हविषा युक्ते स्तोत्रे क्रियमाणे सति हे मरुतो यूयं यदि यस्मात्कारणात् स्तुतस्य स्तुतं मदीयं स्तोत्रमित्येवमनेन प्रकारेणाधीय अवगच्छथ तस्मात्कारणात् हे मरुतो यूयं सुवीर्यस्य शोभनपुत्रोपेतस्य रायो रायं धनं ॥ द्वितीयार्थे षष्ठी ॥ अच्छ शीघ्रं दात । दत्त । अराविरातिः शत्रुभूतोऽन्यो जनो यं रायं नू चिदादभत् नैवाभिभवेत् तादृशमस्मभ्यं दत्तेति संबंधः ॥

॥ इति पंचमस्य चतुर्थे चतुर्विंशो वर्गः ॥

मरुद्भ्यः क्रीडिभ्यः सप्तकपालमित्यस्यात्यास इति याज्या । सूत्रितं च । अत्यासो न ये मरुतः स्वंचो इष्टो दमूनाः । आ० २, १८ । इति ॥

॥ सैषा सूक्ते षोडशी ॥

अत्यासो न ये मरुतः स्वंचो यक्षदृशो न शुभयंत मर्याः ।
ते हर्म्येष्ठाः शिशवो न शुभ्रा वत्सासो न प्रक्रीडिनः पयोधाः ॥१६

अत्यासः । न । ये । मरुतः । सुऽअंचः । यक्षऽदृशः । न ।
शुभयंत । मर्याः ।
ते । हर्म्येऽस्थाः । शिशवः । न । शुभ्राः । वत्सासः । न ।
प्रऽक्रीडिनः । पयःऽधाः ॥ १६

अत्यासो न अत्याः सततगामिनोऽश्वा इव स्वंचः सुष्ठु गच्छंतो ये मरुतो यक्षदृशो न यक्षस्योत्सवस्य द्रष्टारो मनुष्या इव शुभयंत शोभंते हर्म्येष्ठा हर्म्ये स्थिताः शिशवो न कुमारा इव शुभ्राः शोभमाना वत्सासो न वत्सा इव प्रक्रीडिनः प्रकर्षेण क्रीडमानास्ते मरुतः पयोधाः पयस उदकस्य धारयितारो दातारो वा भवंति ॥

॥ अथ सप्तदशी ॥

दशस्यंतो नो मरुतो मृडंतु वरिवस्यंतो रोदसी सुमेके ।
आरे गोहा नृहा वधो वो अस्तु सुम्नेभिरस्मे वसवो नमध्वं ॥१७

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

इषयंतः। नः। मरुतः। मृळंत। वरिवस्यंतः। रोदसी इति।
सुमेके इति सुऽमेके।

आरे। गोऽहा। नृऽहा। वधः। वः। अस्तु। सुम्नेभिः।
अस्मे इति। वसवः। नमध्वं ॥ १७

मरुतो नोऽस्मभ्यं दयस्यंतो धनानि प्रयच्छंतः सुमेके सुरूपे रोदसी द्यावापृथिव्यौ परिचक्षंतः स्वपरिचर्या पूरयंतो मृळंत। मृळयंतु। अस्मान्सुखयुक्तान् कुर्वंतु। अपि च हे वसवो वासका मरुतो गोहा गवां गोपस्थानादुदकानां भेदको नृहा नृणां मनुष्याणां हंता यो युष्मदीयं वध आयुधमारेऽस्तु। अस्मत्तो दूरे भवतु। यूयमपि सुम्नेभिः सुम्नैः सुखैः सहास्मे अस्मासु नमध्वं। स्वयमेवाभिमुखा भवत ॥

मारुते पश्चाया वो होतेत्येषानुवाक्या। सूत्रितं च। आ वो होता जोहवीति सत्तः प्र चित्रमर्कं गृणते तुराय। आ० ३. ७. । इति ॥

॥ सैषाष्टादशी

आ वो होता जोहवीति सत्तः सत्राचीं रातिं मरुतो गृणानः।
य ईवतो वृषणो अस्ति गोपाः सो अद्वयावी हवते व उक्थैः॥ १८

आ। वः। होता। जोहवीति। सत्तः। सत्राचीं। रातिं।
मरुतः। गृणानः।
यः। ईवतः। वृषणः। अस्ति। गोपाः। सः। अद्वयावी।
हवते। वः। उक्थैः॥ १८

हे मरुतः सत्तो होतृसदने निषण्णोऽस्मदीयो होता सत्राचीं सर्वतो गमनयोग्यां रातिं त्वदीयं दानं गृणानः स्तुवन् वो युष्मानजोहवीति। भृशमाह्वयति। हे वृषणः कामानां वर्षितारो मरुतो यो होतेवतो गच्छतो व्यापारवतो यजमानस्य गोपा अस्ति युष्मदाह्वाननिमित्तेन रक्षको भवति स होताद्वयावी मायारहितः सन् वो युष्मानुक्थैः स्तोत्रैर्हवते। स्तौति ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथैकोनविंशी ॥

इमे तुरं मरुतो रामयंतीमे सहः सहस आ नमंति।

इमे शंसं वनुष्यतो नि पांति गुरु द्वेषो अररुषे दधंति ॥ १९

इमे। तुरं। मरुतः। रमयंति। इमे। सहः। सहसः।

आ। नमंति।

इमे। शंसं। वनुष्यतः। नि। पांति। गुरु। द्वेषः। अररुषे।

दधंति ॥ १९

इमे ईदृशा मरुतस्तुरं कर्मसु क्षिप्रमेतं यजमानं रमयंति। क्रीडयंति। इमे मरुतः सहः सहसा बलेन सहसो बलवतो जनानानमंति। इमे मरुतो वनुष्यतो हिंसकात्पुरुषाच्छंसं शंसकं स्तोतारं नि पांति। नितरां पालयंति। अररुषे हविरप्रयच्छते जनाय गुरु महद्द्वेषोऽप्रियं दधंति। कुर्वंति ॥

॥ अथ विंशी ॥

इमे रध्रं चिन्मरुतो जुनंति भृमिं चिद्यथा वसवो जुषंत।

अप बाधध्वं वृषणस्तमांसि धत्त विश्वं तनयं तोकमस्मे ॥ २०

इमे। रध्रं। चित्। मरुतः। जुनंति। भृमिं। चित्। यथा।

वसवः। जुषंत।

अप। बाधध्वं। वृषणः। तमांसि। धत्त। विश्वं। तनयं।

तोकं। अस्मे इति ॥ २०

इमे मरुतो रध्रं चित् समृद्धमपि जनं जुनंति। प्रेरयंति। भृमिं चित् भ्रमणशीलमपि दरिद्रं जुनंति। प्रेरयंति। वसवो वासका देवा युष्मान्यथा जुषंत कामयेरन् हे वृषणः कामानां वर्षितारस्ते यूयं तमांस्यपबाधध्वं। नाशयत। अपि चास्मे अस्मभ्यं विश्वं सर्वं तोकं पुत्रं तनयं पौत्रं च धत्त। प्रयच्छत ॥

॥ इति पंचमस्य चतुर्थे पंचविंशो वर्गः ५

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

। अथैकविंशी ।

मा वो दात्रान्मरुतो निररा॑म मा पश्चाद्द॑घ्म रथ्यो विभागे।
आ नः स्पार्हे भजतना वसव्ये३ यदीं सुजातं वृषणो वो अस्ति॥ २१

मा। वः। दात्रात्। मरुतः। निः। अराम। मा। पश्चात्। दघ्म। रथ्यः। विऽभागे।
आ। नः। स्पार्हे। भजतन। वसव्ये। यत्। ईम्। सुऽजातं। वृषणः। वः। अस्ति॥ २१

हे मरुतो वो युष्माकं दात्राद्दानात्सा निरराम। वयं मा निर्गमाम। युष्मत्सकाशात्प्रदित्सुभ्यो धनं मा दत्तेत्यर्थः। हे रथ्यो रथवंतो मरुतो विभागे युष्मदीयस्य धनस्य दाने पश्चान्मा दघ्म। दघ्नोतिर्गतिकर्मा। वयं पश्चाद्भागिनो मा भूम। यूयं प्रथममस्मभ्यमेव दत्तेति यावत्। स्पार्हे स्पृहणीये वसव्ये वसुसमूहे यूयं नोऽस्मानाभजतन। भागिनः कुरुत। हे वृषणो वर्षितारो मरुतो वो युष्माकं सुजातं शोभनजन्म यद्धनमस्ति तस्मिन्भागिनः कुरुतेति संबंधः। ईमिति पूरणः॥

। अथ द्वाविंशी ।

सं यद्धनंत मन्युभिर्जनासः शूरा यह्वीष्वोषधीषु विक्षु।
अध स्मा नो मरुतो रुद्रियासस्त्रातारो भूत पृतनास्वर्यः॥ २२

सं। यत्। हनंत। मन्युऽभिः। जनासः। शूराः। यह्वीषु। ओषधीषु। विक्षु।
अध। स्म। नः। मरुतः। रुद्रियासः। त्रातारः। भूत। पृतनासु। अर्यः॥ २२

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

यद्यदा शूरा विक्रांता जनासो जना यह्वीषु महतीष्वोषधीषु विक्षु प्रजासु च जेतव्यासु मन्युभिः क्रोधैरभिमानैर्वा संघनंत संगच्छंते अथ तदानीं हे रुद्रियासो रुद्रपुत्रा हे मरुतो यूयं पृतनासु युद्धेष्वर्योऽरेः शत्रोः सकाशात्त्रातारो भूत। रक्षका भवत ॥

॥ अथ त्रयोविंशी ॥

भूरि॑ चक्र मरुतः पित्र्या॑ण्युक्थानि॒ या वः॑ शस्यंते॑ पुरा चि॑त्।

मरुद्भि॑रुग्रः पृत॑नासु साळ्हा॑ मरुद्भि॒रित्सनि॑ता वाजमर्वा॑ ॥ २३

भूरि॑ । चक्र । मरुतः । पित्र्या॑णि । उक्थानि॑ । या । वः ।

शस्यंते॑ । पुरा । चित् ।

मरुत्ऽभिः॑ । उग्रः । पृत॑नासु । साळ्हा॑ । मरुत्ऽभिः॑ । इत् ।

सनि॑ता । वाज॑ । अर्वा॑ ॥ २३

हे मरुतो यूयं भूरि भूरीणि बहूनि पित्र्याणि पितृसंबंधीनि धनदानादीनि कर्माणि चक्र। कृतवंतो भवत। पुरा चित् पूर्वकालेऽपि वो युष्माकमुक्थानि प्रशस्यानि यानि कर्माणि प्रशस्यंते प्रख्याप्यंते तानि चक्रेति संबंधः। उग्र ओजस्वी पृतनासु युद्धेषु मरुद्भिर्युष्माभिर्गंतृभिः साळ्हा शत्रूणामभिभविता भवति। मरुद्भिरिव मरुद्भिर्युष्माभिरेव गंतृभिरर्वा घोटैरभिगंता वाजमन्नं सनिता संभक्ता भवति। यद्वार्वाश्वो वाजं युद्धं सनिता भवति ॥

॥ अथ चतुर्विंशी ॥

अस्मे वी॒रो म॑रुतः शु॒ष्म्य॑स्तु जना॑नां॒ यो असु॑रो विध॒र्ता ।

अपो येन॑ सुक्षि॒तये॒ तरे॒माध॒ स्वमोको॑ अ॒भि वः॑ स्याम ॥ २४

अस्मे इति॑ । वी॒रः । म॒रुतः॒ । शु॒ष्मी । अ॒स्तु । जना॑नां । यः ।

असु॑रः । वि॒ऽध॒र्ता ।

अ॒पः । येन॑ । सु॒ऽक्षि॒तये॑ । तरे॑म । अध॑ । स्वं । ओकः॑ ।

अ॒भि । वः॒ । स्या॒म ॥ २४

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे मरुतोऽस्मे अस्माकं वीरः पुत्रः शासदस्तु। सत्यवान्भवतु। असुरः प्रज्ञावान्यो जनानां चर्षणीनां विधाता विधारकः। येन पुत्रेण वयं सुक्षितये सुष्ठु निवासायाप्याम ततः वरूथरहितेन शिंयम उपयो यतमानस्त्विति पूर्वेणान्वयः। अथापि च नो युष्मदीया वयं यशोक आत्मीयं स्थानमभिगच्छाम। आतिष्ठेम॥

॥ अथ पंचविंशी ॥

तन्न इंद्रो वरुणो मित्रो अग्निराप ओषधीर्वनिनो जुषंत।
शर्मन्त्स्याम मरुतामुपस्थे यूयं पात स्वस्तिभिः सदा नः॥ २५

तत्। नः। इंद्रः। वरुणः। मित्रः। अग्निः। आपः।
ओषधीः। वनिनः। जुषंत।
शर्मन्। स्याम। मरुतां। उपऽस्थे। यूयं। पात। स्वस्तिऽभिः।
सदा। नः॥ २५

पूर्वं व्याख्यातेयं। अयमर्थस्तु। इंद्रादयो देवा अस्मदीयं स्तोत्रं सेवंतां। मरुतामुपस्थाने वर्तमाना वयं सुखे स्याम। हे मरुतो यूयं सर्वदास्मानविनाशैः पालयत॥

॥ इति पंचमस्य चतुर्थे षड्विंशो वर्गः॥

मध्वो व इति सप्तर्चं द्वितीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं मरुद्देवताकं। मध्वः सप्तेत्यनुक्रांतं॥ दशरात्रे षष्ठेऽहन्याग्निमारुत इदं मरुन्निविद्धानं। सूत्रितं च। मध्वो वो नाम स प्रत्नथेत्याग्निमारुतं। आ० ८. ८.। इति॥

॥ तत्र प्रथमा॥

मध्वो वो नाम मारुतं यजत्राः प्र यज्ञेषु शवसा मदंति।
ये रेजयंति रोदसी चिदुर्वी पिन्वंत्युत्सं यदयासुरुग्राः॥ १

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मध्वः। वः। नाम। मारुतम्। यजत्राः। प्र। यज्ञेषु।
शवसा। मदन्ति।
ये। रेजयन्ति। रोदसी इति। चित्। उर्वी इति। पिन्वन्ति।
उत्सम्। यत्। अयासुः। उग्राः॥ १

हे यजत्रा यजनीया मरुतो वो युष्मदीयं मारुतं मारुतमिति नाम नामधेयं मध्वो मादयितारः स्तोतारो यज्ञेषु यागेषु शवसा बलेन प्र मदंति। प्रकर्षेण स्तुवंति। मदैः स्तुवंतीत्यर्थः। ये मरुत उर्वी विस्तीर्णे रोदसी चिद्द्यावापृथिव्यावपि रेजयंति कंपयंति। किंचोत्सं मेघं पिन्वंति वर्षयंतीत्यर्थः। उग्रा यद्ये मरुतोऽयासुः यांति सर्वत्र गच्छंति तेषां मरुतां युष्माकं नाम प्र मदंतीति पूर्वेणान्वयः॥

॥ अथ द्वितीया॥

निचेतारो हि मरुतो गृणन्तं प्रणेतारो यजमानस्य मन्म।
अस्माकमद्य विदथेषु बर्हिरा वीतये सदत पिप्रियाणाः॥ २

निऽचेतारः। हि। मरुतः। गृणन्तम्। प्रऽनेतारः।
यजमानस्य। मन्म।
अस्माकम्। अद्य। विदथेषु। बर्हिः। आ। वीतये। सदत।
पिप्रियाणाः॥ २

हे मरुतो गृणंतं स्तुवंतं जनं निचेतारो हि अनुग्रहणाय भवंति खलु। अपि च यजमानस्य मन्माभिमतं कामं प्रणेतारश्च भवंति। अपनोऽर्थे च प्रत्ययश्छांदसः। हे मरुतो यूयं पिप्रियाणाः प्रीयमाणाः संतोऽद्यास्मिन्दिनेऽस्माकं विदथेषु यज्ञेषु वीतये सोमस्य भक्षणाय बर्हिर्बर्हिष्यपि कुशमय आसदत। आसीदत। उपविशत॥

॥ अथ तृतीया॥

नैतावदन्ये मरुतो यथेमे भ्राजन्ते रुक्मैरायुधैस्तनूभिः।
आ रोदसी विश्वपिशः पिशानाः समानमञ्ज्यञ्जते शुभे कम्॥ ३

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

न। एतावत्। अन्ये। मरुतः। यथा। इमे। भ्राजन्ते।

रुक्मैः। आयुधैः तनूभिः।

आ। रोदसी इति। विश्वऽपिशः। पिशानाः। समानम्।

अञ्जि। अञ्जते। शुभे। कम्॥ ३

इमे ईदृशा मरुतो यथा यजमानेभ्यो धनादिकं ददति अन्ये मरुद्व्यतिरिक्ता देवा एतावद्धनादिकं न दद्युरित्यर्थः। ते च रुक्मै रोचमानैराभरणैरायुधैः स्वकीयाभिस्तनूभिरात्मीयैः शरीरैरङ्गैश्च भ्राजन्ते। सर्वदा भासन्ते। कश्चिदेकवाक्यतायां च। यथेमे मरुतो रुक्मादिभिर्भ्राजन्ते नैतावदेतद्व्यतिरिक्ता भ्राजन्त इति। अपि च रोदसी द्यावापृथिव्यौ पिशानाः प्रकाशयन्तो विश्वपिशो व्याप्तदीप्तय एवंभूता मरुतः शुभे शोभायै समानं सदृशमञ्ज्याभरणमञ्जते। स्वकीयावयवेष्वभिव्यक्तीकुर्वन्ति। कमिति पूरणः॥

॥ अथ चतुर्थी ॥

ऋधक्सा वो मरुतो दिद्युदस्तु यद्व आगः पुरुषता कराम।

मा वस्तस्यामपि भूमा यजत्रा अस्मे वो अस्तु सुमतिश्चनिष्ठा॥ ४

ऋधक्। सा। वः। मरुतः। दिद्युत्। अस्तु। यत्। वः।

आगः। पुरुषता। कराम।

मा। वः। तस्याम्। अपि। भूम। यजत्राः। अस्मे इति।

वः। अस्तु। सुऽमतिः। चनिष्ठा॥ ४

हे मरुतो वो युष्मदीया सा प्रसिद्धा दिद्युद्धेतिरायुधमृधगस्तु। अस्मत्तः पृथग्भवतु। ननु यद्यपि वयं वो युष्माकमागोऽपराधं पुरुषता पुरुषतया मनुष्यत्वेन कराम करवाम। मनुष्याणां हि प्रमादः सुलभ इत्यर्थः। हे यजत्रा यजनीया मरुतो वो युष्मदीयायां तस्यां दिद्युत्यपि मा भूम। चनिष्ठा चनस्तमा। अतिशयेनान्नप्रदेत्यर्थः। वो युष्मदीया सुमतिरनुग्रहबुद्धिरस्मे अस्मास्वस्तु॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ पंचमी ॥

ऋते चिदत्र मरुतो रणंतानवद्यासः। शुचयः पावकाः।

प्र णोऽवत सुमतिभिर्यजत्राः प्र वाजेभिस्तिरत पुष्यसे नः॥ ५

ऋते। चित्। अत्र। मरुतः। रणंत। अनवद्यासः॥ शुचयः।

पावकाः।

प्र। नः। अवत। सुमतिऽभिः। यजत्राः। प्र। वाजेभिः।

तिरत। पुष्यसे नः॥ ५

अत्रास्मिन्नृते चिदस्मदीये यज्ञकर्मण्यपि मरुतो रणंत। रमंतां। कीदृशा मरुतः। अनवद्यासोऽनिंदिताः शुचयो दीप्तियुक्ताः पावकाः शोधका एवंभूता इति। किंच हे मरुतो यजत्रा यजनीया यूयं नोऽस्मान् सुमतिभिरनुग्रहबुद्धिभिः स्तुतिभिर्वा प्रावत। प्रकर्षेण पालयत। तथा नोऽस्मान्वाजेभिर्वाजैरन्नैः पुष्यसे पोषाय प्रतिरत। प्रवर्धयत॥

॥ अथ षष्ठी ॥

उत स्तुतासो मरुतो व्यंतु विश्वेभिर्नामभिर्नरो हवींषि।

ददात नो अमृतस्य प्रजायै जिगृत रायः सूनृता मघानि॥ ६

उत। स्तुतासः। मरुतः। व्यंतु। विश्वेभिः। नामऽभिः।

नरः। हवींषि।

ददात। नः। अमृतस्य। प्रऽजायै। जिगृत। रायः।

सूनृता। मघानि। ६

अपि च स्तुतास एवमस्माभिः स्तुता मरुतो हवींषि व्यंतु। भक्षयंतु। कीदृशाः। विश्वेभिर्विश्वैर्नामभिरुदकैः सहिता नरो नेतारः। अथ प्रत्यक्षस्तुतिः। हे मरुतो नोऽस्मदीयायै प्रजायै संततयेऽमृतस्यामृतमुदकं ददात। दत्त। तथा

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

ऋत्विजो दातुर्यजमानस्य सूनृता सूनृतानि बहु नुवंति शोभनयोग्यानि मघानि धनानि जिन्वत। चक्षिरत। प्रयच्छतेत्यर्थः॥

॥ अथ सप्तमी ॥

आ स्तुतासो मरुतो विश्व ऊती अच्छा सूरीन्त्सर्वताता जिगात।
ये नस्त्मना शतिनो वर्धयंति यूयं पात स्वस्तिभिः सदा नः॥ ७

आ। स्तुतासः। मरुतः। विश्वे। ऊती। अच्छ। सूरीन्। सर्वऽताता। जिगात।
ये। नः। त्मना। शतिनः। वर्धयंति। यूयं। पात। स्वस्तिऽभिः। सदा। नः॥ ७

हे मरुतः स्तुतासः अस्मदीयाभिः स्तुता विश्वे सर्वे यूयमूती ऊत्या रक्षया सहिताः सूरीन् स्तोतॄनच्छाभिलक्ष्य सर्वताता सर्वतातौ यज्ञे आजिगात। आगच्छत। ये मरुतस्त्मनात्मनैव नोऽस्मान् शतिनः शतसंख्याकान्वर्धयंति। यथा वयं पुत्रपौत्रादिभिः शतिनो भवेम तथा वर्धयंतीत्यर्थः। ते यूयमाजिगातेति पूर्वेण संबंधः। एवंभूता मरुतो यूयं सर्वदास्मान्पालयत॥

॥ इति पंचमस्य चतुर्थे सप्तविंशो वर्गः॥

प्र साकमुक्ष इति षडृचं तृतीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं मरुद्देवताकं। अनुक्रांतं च। प्र साकमुक्षे षडिति॥ गतो विनियोगः॥

॥ तत्र प्रथमा ॥

प्र साकमुक्षे अर्चता गणाय यो दैव्यस्य धाम्नस्तुविष्मान्।
उत क्षोदंति रोदसी महित्वा नक्षंते नाकं निर्ऋतेरवंशात्॥ १

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

प्र । साकम्ऽउक्षे । अर्चत । गणाय । यः । दैव्यस्य । धाम्नः ।
तुविष्मान् ।
उत । क्षोदंति । रोदसी इति । महिऽत्वा । नक्षंते । नाकं ।
निःऽऋतेः । अवंशात् ॥ १

हे स्तोतारो यूयं साकमुक्षे संततं परिषिंचते गणाय मरुत्समूहाय प्रार्चत । स्तोत्रं प्रोच्चारयत । यो मरुद्गणो दैव्यस्य देवसंबंधिनो धाम्नः स्वर्गाख्यस्य स्थानस्य तुविष्मान् तुविष्मान्भवति । सर्वेभ्यो सर्वेभ्यः प्रवृद्ध इत्यर्थः । तस्मै गणायेति पूर्वेण संबंधः । उतापि च मरुतो महित्वा स्वकीयेन महत्त्वेन महिम्ना रोदसी द्यावापृथिव्यौ क्षोदंति । भंजंति । तथा निर्ऋतेर्भूमेरवंशादंतरिक्षाच्च नाकं स्वर्गं नक्षंते । व्याप्नुवंति ॥

॥ अथ द्वितीया ॥

जनूश्चिद्वो मरुतस्त्वेष्येण भीमासस्तुविमन्यवोऽयासः ।
प्र ये महोभिरोजसोत संति विश्वो वो यामन्भयते स्वर्दृक् ॥ २

जनूः । चित् । वः । मरुतः । त्वेष्येण । भीमासः ।
तुविऽमन्यवः । अयासः ।
प्र । ये । महःऽभिः । ओजसा । उत । संति । विश्वः । वः ।
यामन् । भयते । स्वःऽदृक् ॥ २

हे भीमासो भीमास्तुविमन्यवः प्रवृद्धमन्यवोऽयासो गंतार इति त्रीणि संबोधनानि । एवंभूता हे मरुतो वो युष्माकं जनूर्जन्म त्वेष्येण दीप्तेन रूपेण बभूवेति शेषः । उतापि च ये मरुतो महोभिस्तेजोभिरोजसा बलेन च प्रसंति प्रभवंति तेषां वो युष्माकं यामन् यामनि गमने विश्वः स्वर्दृक् सूर्यस्य द्रष्टा सर्वो जीवसमूहः । यद्वा स्वरंतरिक्षं तत्पश्यतीति दृशः स्वर्दृक् । सर्वोऽपि [illegible]त्यर्थः । भयते । बिभेति ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ तृतीया ॥

बृहद्वयो मघवद्भ्यो दधात जुजोषन्निन्मरुतः सुष्टुतिं नः ।

गतो नाध्वा वि तिराति जंतुं प्र णः स्पार्हाभिरूतिभिस्तिरेत ॥ ३

बृहत् । वयः । मघवत्ऽभ्यः । दधात । जुजोषन् । इत् ।

मरुतः । सुऽस्तुतिं । नः ।

गतः । न । अध्वा । वि । तिराति । जंतुं । प्र । नः ।

स्पार्हाभिः । ऊतिऽभिः । तिरेत ॥ ३

हे मरुतो यूयं मघवद्भ्यो हविर्लक्षणधनवद्भ्योऽस्मभ्यं बृहत्प्रभूतं वयोऽन्नं दधात । प्रयच्छत । नोऽस्मदीयां सुष्टुतिं शोभनं स्तोत्रं जुजोषन्नित् । सेवंतामेव । गतो मरुद्भिः प्राप्तोऽध्वा मार्गो जंतुं प्राणिनं न वितिराति । नाशयति । उदकेनाप्याययत्येव । यद्वा वितिरतिर्वर्धनार्थः । नेति चार्थे । मरुद्भिर्गतो मार्गश्च जंतुं वर्धयति । तथा नोऽस्मान् स्पार्हाभिः स्पृहणीयाभिरूतिभी रक्षाभिः प्रतिरेत । प्रवर्धयत ॥

॥ अथ चतुर्थी ॥

युष्मोतो विप्रो मरुतः शतस्वी युष्मोतो अर्वा सहुरिः सहस्री ।

युष्मोतः सम्राळुत हंति वृत्रं प्र तद्वो अस्तु धूतयो देष्णं ॥ ४

युष्माऽऊतः । विप्रः । मरुतः । शतस्वी । युष्माऽऊतः ।

अर्वा । सहुरिः । सहस्री ।

युष्माऽऊतः । संऽराट् । उत । हंति । वृत्रं । प्र । तत् । वः ।

अस्तु । धूतयः । देष्णं ॥ ४

हे मरुतो युष्मोतो युष्माभी रक्षितो विप्रः स्तोता शतस्वी शतसंख्योपेतधनवान् भवति । युष्मोतो युष्माभी रक्षितोऽर्वाभिगंता सहुरिः शत्रूणामभिभविता स्तोता सहस्री सहस्रधनवान् भवति । युष्मोतो युष्माभी रक्षितः सम्राट् साम्राज्ययुक्तो

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

भवति। अर्वापि च तस्य यन्तुं यंति। युष्मत्सखो जिनाति। हे धूतयः कंपयितारो मरुतो यो युष्माभिर्दत्तं तत्स्पृहणीयं रेप्णं धनं प्राप्नु। प्रभूतं भवतु॥

॥ अथ पंचमी ॥

ताँ आ रुद्रस्य मीळ्हुषो विवासे कुविन्नंसंते मरुतः पुनर्नः।
यत्सस्वर्ता जिहीळिरे यदाविरव तदेन ईमहे तुराणां॥ ५

तान्। आ। रुद्रस्य। मीळ्हुषः। विवासे। कुवित्। नंसंते।
मरुतः। पुनः। नः।
यत्। सस्वर्ता। जिहीळिरे। यत्। आविः। अव। तत्।
एनः। ईमहे। तुराणां॥ ५

मीळ्हुषः कामानां वर्षितू रुद्रस्येश्वरस्य पुत्रान् तान्मरुत आविवासे। अहं होता परिचरामि। ते मरुतो नोऽस्मभ्यं कुविद्बहुलत्वः पुनः भूयो नंसंते। नमंतां। अभिमुखीभवंतु। कुविच्छब्देनैव पुनःशब्दार्थस्य लब्धत्वात्पुनःशब्दप्रयोगं विलयं। आदरार्थं। सस्वर्तांतर्हितेनाप्रकाशेन यत् येनैनसा जिहीळिरे क्रुद्धाः मरुत अभूवन्। आविः प्रकाशेन यत् येनैनसा च जिहीळिरे तुराणां क्षिप्राणां मरुतां संबंधि तदुभयविधमेनोऽपराधमवेमहे। दूरेण ययमपनयामः॥

॥ अथ षष्ठी ॥

प्र सा वाचि सुष्टुतिर्मघोनामिदं सूक्तं मरुतो जुषंत।
आराच्चिद्द्वेषो वृषणो युयोत यूयं पात स्वस्तिभिः सदा नः॥ ६

प्र। सा। वाचि। सुऽस्तुतिः। मघोनां। इदं। सुऽउक्तं।
मरुतः। जुषंत।
आरात्। चित्। द्वेषः। वृषणः। युयोत। यूयं। पात।
स्वस्तिऽभिः। सदा। नः॥ ६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नवीनां भगवतां मरुतां संबंधिनी सुष्टुतिर्या शोभना स्तुतिरस्मिन्यज्ञे कृता सा स्तुतिरस्माभिः प्रणापि। प्रोक्ताभूत्। मरुत इदमीदृग्भूतं सूक्तं जुषंत। सेवंतां। हे वृषणः कामानां वर्षितारो यूयं द्वेषो द्वेषांसि अस्मदाराच्चिद् दूरादेव युयोत। अपगमय। पृथक्कुरुत। यूयं नोऽस्मान् स्वस्तिभिः सर्वदा रक्षत॥

॥ इति पंचमस्य चतुर्थेऽष्टाविंशो वर्गः॥

यं त्रायध्व इति द्वादशर्चं चतुर्थं सूक्तं। वसिष्ठस्यार्षमनुक्रमणिका। यं त्रायध्वे द्वादश त्रिप्रगाथादि नवम्याद्यास्तिस्रो गायत्र्योऽंत्यानुष्टुब्रौद्री मृत्युविमोचिनीति आद्यातृतीयापंचम्यो बृहत्यो द्वितीयाचतुर्थीषष्ठ्यः सतोबृहत्यः सप्तम्यष्टम्यावतुष्ट-स्त्रिष्टुभौ नवमीदशम्येकादश्यो गायत्र्यः। द्वादश्यनुष्टुप्। सा च रुद्रदेवताका। शिष्टा मारुत्यः॥ सूक्तविनियोगो लैंगिकः॥

॥ तत्र प्रथमा॥

यं त्रायध्व इदमिदं देवासो यं च नयथ।
तस्मा अग्ने वरुण मित्रार्यमन्मरुतः शर्म यच्छत॥ १

यं। त्रायध्वे। इदंऽइदं। देवासः। यं। च। नयथ।
तस्मै। अग्ने। वरुण। मित्र। अर्यमन्। मरुतः। शर्म।
यच्छत॥ १

हे देवासो देवा इदमिदमित्सो अथचेतोर्यं स्तोतारं त्रायध्वे पालयध्वे। यं च स्तोतारं नयथ सन्मार्गं प्रापयथ हे अग्ने वरुण मित्र अर्यमन् हे मरुत एवंभूता हे हे देवाः तस्मै स्तोत्रे शर्म सुखं यच्छत। दत्त॥

॥ अथ द्वितीया॥

युष्माकं देवा अवसाहनि प्रिय ईजानस्तरति द्विषः।
प्र स क्षयं तिरते वि महीरिषो यो वो वराय दाशति॥ २

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

युष्माकं। देवाः। अवसा। अहंनि। प्रिये। ईजानः।
तरंति। द्विषः।
प्र। सः। क्षयं। तिरते। वि। महीः। इषः। यः। वः।
वराय। दाशति॥ २

हे देवा युष्माकं युष्मदीयेनावसा रक्षणेन प्रियेऽहनि सर्वेषां देवानां प्रियभूते यज्ञाभिधाने दिवस ईजान इष्टवाञ्जनो द्विषः शत्रून्तरति। आक्रामति। स यजमानः क्षयं स्वकीयं निवासं प्र तिरते। प्रवर्धयति। यो यजमानो वो युष्मभ्यं महीर्महतीरिषो हविर्लक्षणान्यन्नानि वराय निवारणाय यूयं नान्यत्र गच्छतास्मदीयान्येव हवींषि स्वीकुरुतेति निरोधनं कर्तुं वि दाशति विशेषेण ददाति। अत एव स स्वकीयं निवासं वर्धयतीत्यर्थः॥

॥ अथ तृतीया ॥

नहि वश्चरमं चन वसिष्ठः परिमंसते।
अस्माकमद्य मरुतः सुते सचा विश्वे पिबत कामिनः॥ ३
नहि। वः। चरमं। चन। वसिष्ठः। परिऽमंसते।
अस्माकं। अद्य। मरुतः। सुते। सचा। विश्वे। पिबत।
कामिनः॥ ३

वसिष्ठ ऋषिर्वो युष्माकं मध्ये चरमं जघन्यमपि नहि परिमंसते। वर्जयित्वा न स्तौति। किंतु सर्वानेव युष्मान् स्तौतीत्यर्थः। अद्यास्मिन्दिनेऽस्माकमस्मदीये सुते सोमेऽभिषुते सति हे मरुतः कामिनः सोमं कामयमाना विश्वे यूयं सचा संगत्य पिबत। पानं कुरुत॥

॥ अथ चतुर्थी ॥

नहि व ऊतिः पृतनासु मर्धति यस्मा अराध्वं नरः।
अभि व आवर्त्सुमतिर्नवीयसी तूयं यात पिपीषवः॥ ४

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

नहि । वः । ऊतिः । पृतनासु । मर्धति । यस्मै ।
अराध्वं । नरः ।
अभि । वः । आ । अवर्त् । सुऽमतिः । नवीयसी । तूयं ।
यात । पिपीषवः ॥ ४

हे मरुतो वो युष्मदीयोसी रक्षा पृतनासु युद्धेषु नहि मर्धति । न खलु हिनस्ति । शत्रुभिः कृतां हिंसां सहत इत्यर्थः । हे नरो नेतारो यूयं यस्मै जनायाराध्वं कामानदध्वं तं जनं न हिनस्तीति संबंधः । नवीयसी नवतरा वो युष्मदीया सुमतिरस्मदुपरिरभ्यावर्त्त् । अस्मानभ्यावर्ततां । तथा हे पिपीषवः सोमपानकामा यूयमपि तूयं क्षिप्रं यात आगच्छत ॥

॥ अथ पंचमी ॥

ओ षु घृष्विराधसो यातनांधांसि पीतये ।
इमा वो हव्या मरुतो ररे हि कं मो ष्वन्यत्र गंतन ॥ ५

ओ इति । सु । घृष्विऽराधसः । यातन । अंधांसि । पीतये ।
इमा । वः । हव्या । मरुतः । ररे । हि । कं । मो इति ।
सु । अन्यत्र । गंतन ॥ ५

हे घृष्विराधसः । परस्परसंघृष्टानि सुसंहतानि राधांसि येषां ते । हे मरुतो यूयमंधांसि सोमलक्षणानि अन्नान्यपि पीतये अस्मत्पानार्थं सु सुष्ठु आयातन । आयात । हि यस्मात्कारणात् हे मरुतो वो युष्मभ्यमिमानि हव्या हव्यानि हवींषि ररे अहं ददामि अतः कारणाद्यूयमन्यत्र मो षु गंतन । मा गच्छत ॥

॥ अथ षष्ठी ॥

आ च नो बर्हिः सदताविता च नः स्पार्हाणि दातवे वसु ।
अस्रेधंतो मरुतः सोम्ये मधौ स्वाहेह मादयाध्वै ॥ ६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आ। च। नः। बर्हिः। सदत। अवित। च। नः।
स्पार्हाणि। दातवे। वसु।
अस्रेधंतः। मरुतः। सोम्ये। मधौ। स्वाहा। इह।
मादयाध्वै॥ ६

हे मरुतो यूयं नोऽस्मदीये बर्हिः कुशमये बर्हिष्यासदत च। उपविशत। स्पार्हाणि स्पृहणीयानि वसु वसूनि धनानि दातवेऽस्मभ्यं दातुं नोऽस्मानवित च। आगच्छत च। हे मरुतोऽस्रेधंतोऽहिंसंतो यूयमिहास्मिन्यज्ञे मधौ मदकरे सोम्ये सोमात्मके हविषि स्वाहा स्वाहाकारेण मादयाध्वै। मादयध्वं। माद्यत॥

॥ इति पंचमस्य षष्ठे एकोनत्रिंशो वर्गः॥

॥ अथ सप्तमी॥

सस्वश्चिद्धि तन्वः१ शुंभमाना आ हंसासो नीलपृष्ठा अपप्तन्।
विश्वं शर्धो अभितो मा नि षेद नरो न रण्वाः सवने मदंतः॥ ७

सस्वरिति। चित्। हि। तन्वः। शुंभमानाः। आ।
हंसासः। नीलऽपृष्ठाः। अपप्तन्।
विश्वं। शर्धः। अभितः। मा। नि। सेद। नरः। न।
रण्वाः। सवने। मदंत॥ ७

सस्वरंतर्हिता मरुतस्तन्वः स्वकीयान्यंगानि शुंभमाना अलंकुर्वाणाः शोभयंतो मरुतो नीलपृष्ठा असितवर्णा हंसासो हंसा इवापप्तन्। आपतंतु। आगच्छंतु। विश्वं शर्धो व्याप्तं मरुद्गणो मा मामभितः सर्वतासदेद। निषीदतु। तत्र दृष्टांतः। सवनेऽस्मदीये यज्ञे मदंतो हृष्यंतो रण्वा रमणीया नरो न मनुष्या इव तद्वत्॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

शाकमेधेषु मरुद्भ्यः सांतपनेभ्य इत्यस्य यो नो मरुत इति पूर्वोक्तयाज्या सांतपना इदमिति याज्या। तथा च सूत्रितं। सांतपना इदं हविर्यो नो मरुतो अभि दुर्हृणायुः। आ० २, १८, । इति॥

॥ सैषा सूक्तेऽष्टमी ॥

यो नो मरुतो अभि दुर्हृणायुस्तिरश्चित्तानि वसवो जिघांसति।

द्रुहः पाशान्प्रति स मुचीष्ट तपिष्ठेन हन्मना हन्तना तं ॥ ८

यः। नः। मरुतः। अभि। दुःऽहृणायुः। तिरः। चित्तानि।

वसवः। जिघांसति।

द्रुहः। पाशान्। प्रति। सः। मुचीष्ट। तपिष्ठेन। हन्मना।

हंतन। तं ॥ ८

हे वसवः प्रशस्ता हे मरुतो नोऽस्मदीयानि चित्तानि दुर्हृणायुरशोभनं क्रुधमनु तिरः सर्वैस्तिरस्कृतो यो जनोऽभिजिघांसति आभिमुख्येन हंतुमिच्छति। स जनो द्रुहः पापायां द्रोग्धुर्वरुणस्य पाशानस्मात् प्रति स मुचीष्ट बध्नीयात् यूयं तं जनं तपिष्ठेन तप्ततमेन हन्मना हननसाधनेनायुधेन हंतन। हत। हिंस्त॥

॥ अथ नवमी ॥

सांतपना इदं हविर्मरुतस्तज्जुजुष्टन।

युष्माकोती रिशादसः॥ ९

सांऽतपनाः। इदं। हविः। मरुतः। तत्। जुजुष्टन।

युष्माक। ऊती। रिशादसः॥ ९

सांतपनाः शत्रूणां संतापका हे मरुत इदं प्रत्यक्षेणोपलभ्यमानं हविर्युष्मभ्यं कल्पितमिति शेषः। हे रिशादसो रिशतां हिंसतामसितारो रिशामामत्तारो वा यूयं युष्माकू युष्माकमूती ऊत्या रक्षया तत्तादृशं हविर्जुजुष्टन। सेवध्वं॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स्वर्कमेधास इति स्वर्कमेधीयस्य ऋचिमोऽनुवाक्या। सूत्रितं च। स्वर्कमेधास आ गत प्र शुभ्रा न ईरते मह्यांसि। आ० २. १८। इति ॥

॥ सैषा दशमी ॥

स्वर्कमेधास आ गत मरुतो माप भूतन ।

युष्माकोती सुदानवः ॥ १०

स्वर्कऽमेधासः । आ । गत । मरुतः । मा । अप । भूतन ।

युष्माकं । ऊती । सुऽदानवः ॥ १०

स्वर्कमेधासो स्वर्के क्रियमाणो यज्ञो येषां ते सुदानवः शोभनदाना हे मरुतो यूयं युष्माक युष्माकमूती अत्या रक्षया युक्ता आगत । अस्मदीयं यज्ञं प्रत्यागच्छत । हे मरुतो मापभूतन । अपगता मा भवत । भू प्राप्ताविति धातुः ॥

वैश्वदेवे पर्वणि मारुतस्यानुवाक्येहेह व इत्येषा। सूत्रितं च। इहेह वः स्वतवसः प्र चित्रमर्कं गृणते तुराय। आ० २. १९। इति ॥

॥ सैषा सूक्ते एकादशी ॥

इहेह वः स्वतवसः कवयः सूर्यत्वचः ।

यज्ञं मरुत आ वृणे ॥ ११

इहऽइह । वः । स्वऽतवसः । कवयः । सूर्यऽत्वचः ।

यज्ञं । मरुतः । आ । वृणे ॥ ११

हे स्वतवसः स्वायत्तबलाः स्वयं प्रवृद्धा वा हे कवयः क्रांतदर्शिनः सूर्यत्वचः सूर्यवर्णा एवंभूता हे मरुतो यूयमिहेहैवास्मदीयं यज्ञमावृणे । आभजामि । कल्पयामि ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ द्वादशी ॥

त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं ।
उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् ॥ १२

त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनं ।
उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् ॥ १२

अत्र शौनकः । त्रिरात्रं नियतोऽपोष्य श्रपयेत्पायसं चरुं । तेनाहुतिशतं पूर्णं जुहुयात्त्र्यंबकेनतः ॥ कश्चिद्वा गताद्देशे त्र्यंबकं त्र्यंबकेऽमृता । एतत्सर्वमतं जप्त्वा जीवेद्वर्षशतं सुखी । ऋग्वि० २, २७. । [त्रयाणां ब्रह्मविष्णुरुद्राणामंबकं पितरं यजामह इति मित्रावरुणपुत्रो वसिष्ठो ब्रवीति । किंविशिष्टमित्यत आह । सुगंधिं प्रसारितपुण्यकीर्तिं । पुनः किंविशिष्टं । पुष्टिवर्धनं जगद्बीजं । उद्भक्तिमित्यर्थः । उपासकस्य वर्धनं । अणिमादियुक्तिवर्धनं । अतस्तत्प्रसादादेव मृत्योर्मरणात्संसाराद्वा मुक्षीय । मोचय । यथा बंधनादुर्वारुकं कर्कटीफलं मुच्यते तद्वन्मरणात्संसाराद्वा मोचय । किं मर्यादीकृत्य । आमृतात् । सायुज्यमोक्षपर्यंतमित्यर्थः । अथ तैत्तिरीयभाष्ये शोभनः शरीरगंधः पुण्यगंधो वा यस्यासौ सुगंधिः । यथा वृक्षस्य संपुष्पितस्य दूराद्गंधो वात्येवं पुण्यस्य कर्मणो दूराद्गंधो वातीति श्रुतेः । पुष्टिं शरीरधनादिविषयां वर्धयतीति पुष्टिवर्धनः । तादृशं त्र्यंबकं यजामहे । पूजयामः । लोके यथोर्वारुकफलानि बंधनाद्वृंतात्प्रलयनेन मुच्यंते तद्वदयं त्र्यंबकप्रसादेन मृत्योर्मुक्षीय । मोचनयुक्तो भूयासं । अमृतात्स्वर्गरूपात्फलाद्देवा मा मुक्षीय । चतुर्थपादार्थसंबंधस्य तात्पर्योक्तिमयं दर्शयति । त्र्यंबकं यजामह इत्याह मृत्योर्मुक्षीय मामृतादिति वाक्यशेषेऽपि ॥]

॥ इति पंचमस्य चतुर्थे त्रिंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये पंचमाष्टके चतुर्थोऽध्यायः समाप्तः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥
व्याख्याय मिणमाभिन्नः पंचमस्य चतुर्थकं ।
अध्यायं सायणाचार्यः पंचमं व्याकरोत्यथ ॥

तत्र यदद्य सूर्येति द्वादशर्चं पंचमं सूक्तं । अत्रानुक्रमणिका । यदद्य मैत्रावरुणं तु वै सौर्याद्येति । मंत्रदृष्टा वसिष्ठ ऋषिः । अनुक्तत्वात्त्रिष्टुप् छंदः । तु शब्दानुक्तत्वादैन्द्रादीनि सप्त सूक्तानि मित्रावरुणदेवत्यानि । आद्या सूर्यदेवत्या ॥ विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

यदद्य सूर्यं ब्रवोऽनागा उद्यन्मित्राय वरुणाय सत्यं ।
वयं देवत्रादिते स्याम तवं प्रियासो अर्यमन्गृणंतः ॥ १

यत् । अद्य । सूर्य । ब्रवः । अनागाः । उत्ऽयन् । मित्राय ।
वरुणाय । सत्यं ।
वयं । देवऽत्रा । अदिते । स्याम । तव । प्रियासः । अर्यमन् ।
गृणंतः ॥ १

हे सूर्य सर्वस्य प्रेरक एतन्नामक देव उद्यन् उदयं कुर्वंस्त्वं अद्यास्मिन्कालेऽस्मान् ब्रवः ब्रूयाः । किमिति । अनागाः अनागस इति । एतेऽपापा इति यदि देवेषु मध्ये ब्रूयाः तर्हि वयं हे अदिते अदीनदेव देवत्रा देवेषु देवानां मध्ये मित्राय वरुणाय च सत्यमवितथं स्याम । अनागसो भवेम । किंच हे अर्यमन् दातस्त्वां गृणंतः स्तुवंतस्तव प्रियासः प्रियाः स्याम । त्वत्प्रेमविषया भवेम । यद्वोत्तरार्धं एकं वाक्यं । हे अदिते हे अर्यमन् उक्तलक्षण देव वयं देवेषु मध्ये त्वां गृणंतस्तवैव प्रियाः स्याम । यदि मां देवेष्वपापं ब्रूयास्तर्हि तैरयमनपराधीत्यनुगृहीतस्त्वां स्तुत्या तव प्रियो भवेयमित्यर्थः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अथ द्वितीया ॥

एष स्य मित्रावरुणा नृचक्षा उभे उदेति सूर्यो अभि ज्मन्।

विश्वस्य स्थातुर्जगतश्च गोपा ऋजु मर्तेषु वृजिना च पश्यन्॥ २

एष। स्यः। मित्रावरुणा। नृऽचक्षाः। उभे इति। उत्।

एति। सूर्यः। अभि। ज्मन्।

विश्वस्य। स्थातुः। जगतः। च। गोपाः। ऋजु। मर्तेषु।

वृजिना। च। पश्यन्॥ २

हे मित्रावरुणा एष पुरतो दृश्यमानः स्य स सर्वैः स्तुत्यत्वेन प्रसिद्धो नृचक्षा नृणां मनुष्याणां द्रष्टा सूर्य उभे द्यावापृथिव्यावभि अभिलक्ष्योदेति ज्मन् अंतरिक्षे गच्छन्। स विशेष्यते। विश्वस्य सर्वस्य स्थातुः स्थावरस्य जगतो जंगमस्य च गोपा गोपायिता। किं कुर्वन्। मर्तेषु मनुष्येषु स्थितान्यृजूनि ऋजुतानि वृजिनानि पापानि च पश्यन्॥

॥ अथ तृतीया ॥

अयुक्त सप्त हरितः सधस्थाद्या ईं वहंति सूर्यं घृताचीः।

धामानि मित्रावरुणा युवाकुः सं यो यूथेव जनिमानि चष्टे॥ ३

अयुक्त। सप्त। हरितः। सधऽस्थात्। याः। ईं। वहंति।

सूर्यं। घृताचीः।

धामानि। मित्रावरुणा। युवाकुः। सं। यः। यूथाऽइव।

जनिमानि। चष्टे॥ ३

हे मित्रावरुणा मित्रावरुणौ युवयोरागमनाय सधस्थात्सहस्थानादंतरिक्षादंतरिक्षे सप्त सर्पणस्वभावान् सप्तसंख्याकान्वा हरितो हरिद्वर्णानश्वानयुक्त। युक्तवानुदये। हरित आदित्यस्येति हि निरुक्तं। या हरित ईमेनं सूर्यं देवं घृताचीर्घृतांचना

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वदगमन्यः। अवर्गदा इत्यर्थः। तावश्वाः सप्तो वहंति ता यथुन्ना। अपोदितः सन् धामानि स्थानानि वांकान् जनिमानि जन्मानि। जन्तुधामजः प्राणिन इत्यर्थः। तांश्च युवाकुर्वुरां चावचानो यो देवः संचष्टे संयक् पश्यति यूथेव गोयूथानीव यूथपाः। स यथा सर्वं यूथं तदन्तरगोव्यक्तिं च सम्यक् पश्यति तद्वल्लोकानाभाविनश्च पश्यति॥

॥ अथ चतुर्थी ॥

उद्वां पृक्षासो मधुमन्तो अस्थुरा सूर्यो अरुहच्छुक्रमर्णः ।

यस्मा आदित्या अध्वनो रदन्ति मित्रो अर्यमा वरुणः

सजोषाः ॥ ४

उत् । वाम् । पृक्षासः । मधुऽमन्तः । अस्थुः । आ । सूर्यः ।

अरुहत् । शुक्रम् । अर्णः ।

यस्मै । आदित्याः । अध्वनः । रदन्ति । मित्रः । अर्यमा ।

वरुणः । सऽजोषाः ॥ ४

हे मित्रावरुणौ वां युवयोरर्थाय पृक्षासोऽन्नानि चरुपुरोडाशादीनि मधुमन्ती माधुर्योपेतानि तदाधारोपधानादीनि उदस्थुः। संपादितान्यासन्। सूर्यश्च शुक्रं दीप्तमर्णोऽर्णवमन्तरिक्षमारुहत्। आरोहति। यस्मै सूर्याय तद्गमनार्थमादित्या अदितेः पुत्रा देवा अध्वनो मार्गान्रदन्ति विलिखन्ति साधयन्ति। के ते। मित्रोऽर्यमा वरुणश्चैते त्रयोऽपि देवाः सजोषसः समानप्रीतयः सन्तः स देव आरुहदिति॥

॥ अथ पंचमी॥

इमे चेतारो अनृतस्य भूरेर्मित्रो अर्यमा वरुणो हि सन्ति ।

इम ऋतस्य वावृधुर्दुरोणे शग्मासः पुत्रा अदितेरदब्धाः ॥ ५

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इमे। चेतारः। अनृतस्य। भूरेः। मित्रः। अर्यमा।

वरुणः। हि। संति।

इमे। ऋतस्य। ववृधुः। दुरोणे। शग्मासः। पुत्राः। अदितेः।

अदब्धाः॥ ५

इमे मित्रोऽर्यमा वरुणश्च त्रयोऽप्यन्नतस्य पापस्य भूरेः प्रभूतस्य चेतारो चेतारः संति। भवंति हि। इमे मित्रादय ऋतस्य यज्ञस्य दुरोणे गृहे ववृधुः। वर्धंते हविषा स्तुत्या च। कीदृशास्ते। शग्मासः सुखकरा अदितेः पुत्रा अदब्धा अहिंसिताः॥

॥ अथ षष्ठी ॥

इमे मित्रो वरुणो दूळभासोऽचेतसं चिच्चितयंति दक्षैः।

अपि क्रतुं सुचेतसं वतंतस्तिरश्चिदंहः सुपथा नयंति॥ ६

इमे। मित्रः। वरुणः। दुःऽदभासः। अचेतसं। चित्।

चितयंति। दक्षैः।

अपि। क्रतुं। सुऽचेतसं। वतंतः। तिरः। चित्। अंहः।

सुऽपथा। नयंति॥ ६

इम आदित्या मित्रो वरुणश्च। एतद्द्वयमर्यम्णोऽप्युपलक्षणं। कते दूळभासो दुर्दभा अनभिभाव्या अचेतसं चित् अप्रज्ञानमनुष्ठानविषयज्ञानरहितमपि दक्षैः सामर्थ्यैश्चितयंति। अपि सुचेतसं प्रकृष्टज्ञानवंतं पुरुषं क्रतुं कर्तारं कर्मानुष्ठानवंतं वतंतो गच्छंतं इमे गुःकृतं तिरश्चित् तिरो नयंतोऽक्षान्सुपथा शोभनेन मार्गेण नयंति। प्रापयंत्यभिमतं यज्ञं स्वर्गादिकं वा॥

॥ इति पंचमस्य पंचमे प्रथमो वर्गः॥

॥ अथ सप्तमी ॥

इमे दिवो अनिमिषा पृथिव्याश्चिकित्वांसो अचेतसं नयंति।

प्रव्राजे चिन्नद्यो गाधमस्ति पारं नो अस्य विष्पितस्य पर्षन्॥ ७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इमे । दिवः । अनिंऽमिषा । पृथिव्याः । चिकित्वांसः ।

अचेतसं । नयंति ।

प्रऽव्राजे । चित् । नद्यः । गाधं । अस्ति । पारं । नः ।

अस्य । विष्पितस्यं । पर्षन् ॥ ७

इमे मित्रादयो दिवो द्युलोकस्य पृथिव्याश्च संबंधिनोऽनिमिषानिमेषेण सर्वस्य चिकित्वांसो जानंतः । कं । अचेतसमज्ञानं । नयंति प्रापयंति कर्माणि प्रज्ञांश्च । प्रव्राजे चित् प्रवणेऽत्यंतनिम्नेऽपि देशे नद्यो नद्या गाधमस्ति । भवति युष्मत्प्रसादात् । ते यूयं नोऽस्माकमस्य विष्पितस्य व्याप्तस्य कर्मणः पारं पर्षन्तु । पारयंतु । नयंतु ॥

॥ अथाष्टमी ॥

यद्वो गोपावददितिः शर्म भद्रं मित्रो यच्छंति वरुणः सुदासे ।

तस्मिन्ना तोकं तनयं दधाना मा कर्म देवहेडनं तुरासः ॥ ८

यत् । गोपावत् । अदितिः । शर्म । भद्रं । मित्रः । यच्छंति ।

वरुणः । सुऽदासे ।

तस्मिन् । आ । तोकं । तनयं । दधानाः । मा । कर्म ।

देवऽहेडनं । तुरासः ॥ ८

यच्छर्म सुखं वरूथं वा गोपावद्रक्षणोपेतं भद्रं स्तुत्यमदितिरदीनोऽथ वादितिर्मित्रो वरुणश्चैते त्रयो देवाः सुदासे सुदानाय मह्यं यच्छंति प्रयच्छंति तस्मिन्नुक्तलक्षणे शर्मणि तोकं पुत्रं तनयं तत्पुत्रादिकं । अथवा तनयशब्दोऽपत्यसामान्यवचनः । तोकं तनयं पुत्रमा समंतो दधाना धारयंतो वयं हे तुरासो गमनाय त्वरमाणा देवहेडनं देवानां मित्रादीनां कोपनं मा कर्म । मा कार्ष्म ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ नवमी ॥

अव वेदिं होत्राभिर्यजेत रिपः काश्चिद्वरुणध्रुतः सः ।
परि द्वेषोभिरर्यमा वृणक्तूरुं सुदासे वृषणा उ लोकं ॥ ९

अव । वेदिं । होत्राभिः । यजेत । रिपः । काः । चित् ।
वरुणऽध्रुतः । सः ।
परि । द्वेषःऽभिः । अर्यमा । वृणक्तु । उरुं । सुऽदासे ।
वृषणौ । ऊं इति । लोकं ॥ ९

हे मित्रादयः होतृद्वेषी वेदिं यागसाधनं होत्राभिः । वाङ्नामैतत् । वाग्रूपाभिः स्तुतिभिः सार्धमवयजेत । येषां कर्माणि कुर्वन् देवांश्च स्तुयादित्यर्थः । अवपूर्वो यजतिस्त्यागार्थः । स किं प्राप्नुयादिति तत्राह । वरुणध्रुतो वरुणेन त्वया हिंसितः स काश्चिद्रिपो हिंसाः प्राप्नुयादिति शेषः । अस्मांस्त्वर्यमा देवो द्वेषोभिर्द्वेष्टृभी रक्षःप्रभृतिभिः परिवृणक्तु । वर्जयतु । उरुं विस्तीर्णं लोकं स्थानं सुदासे शोभनदानाय मह्यं प्रयच्छतं हे वृषणा वर्षकौ कामानां मित्रावरुणौ ॥

॥ अथ दशमी ॥

सस्वश्चिद्धि समृतिस्त्वेष्येषामपीच्येन सहसा सहंते ।
युष्मद्भिया वृषणो रेजमाना दक्षस्य चिन्महिना मृळता नः ॥ १०

सस्वः । चित् । हि । संऽऋतिः । त्वेषी । एषां ।
अपीच्येन । सहसा । सहंते ।
युष्मत् । भिया । वृषणः । रेजमानाः । दक्षस्य । चित् ।
महिना । मृळत । नः ॥ १०

एषां मित्रादीनां संवृतिः संगतिः संभृतिर्वा सस्वः अंतर्हिता निगूढा त्वेषी दीप्ता च भवति । तादृशा एतेऽपीच्येन । एतदप्यंतर्हितनाम । निगूढेन सहसा बलेन

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सचंते। अभिभवंत्यसह्यं द्रुहं नु। किंच हे वरुणोऽभिगन्तव्यैका मित्रादयो युष्मद्युष्मत्तो भिया भीत्या रेजमानाः कंपमाना भवंति विरोधिनः। यस्मादेवं तस्माद्वरुणस्य युष्माकं बलस्य महिना महिम्ना महत्त्वेन नोऽस्मभ्यं मृळत। सुखयां कुरुत॥

॥ अथैकादशी ॥

यो ब्रह्मणे सुमतिमायजाते वाजस्य सातौ परमस्य रायः।
सीक्षंत मन्युं मघवानो अर्य उरु क्षयाय चक्रिरे सुधातु ॥ ११

यः ॥ ब्रह्मणे। सुऽमतिं। आऽयजाते। वाजस्य। सातौ।
परमस्य। रायः।
सीक्षंत। मन्युं। मघऽवानः। अर्यः। उरु। क्षयाय।
चक्रिरे। सुऽधातु ॥ ११

यो यजमानो ब्रह्मणे परिवृढकर्मणे युष्मत्स्तोत्ररूपाय सुमतिं शोभनां बुद्धिमायजाते आयजते। यजतिरत्र दाने। ददाति करोति। किमर्थं। वाजस्यान्नस्य सातौ दाने निमित्ते परमस्योत्कृष्टस्य रायो धनस्य च सातौ लाभाय। ईरयति स्तुतीः प्रेरयतीत्यरिः स्तोता। मन्युं स्तोत्रं मघवानो दानवंतोऽर्यमादयः सीक्षंत। सचते। तेनित्या च तस्योरुक्षयाय विस्तीर्णनिवासाय सुधातु सुधानं शोभनस्थानं चक्रिरे। कुर्वते॥

॥ अथ द्वादशी ॥

इयं देव पुरोहितिर्युवभ्यां यज्ञेषु मित्रावरुणावकारि।
विश्वानि दुर्गा पिपृतं तिरो नो यूयं पात स्वस्तिभिः सदा नः॥१२

इयं। देवा। पुरःऽहितिः। युवऽभ्यां। यज्ञेषु। मित्रावरुणौ।
अकारि।
विश्वानि। दुःऽगा। पिपृतं। तिरः। नः। यूयं। पात।
स्वस्तिऽभिः। सदा। नः ॥ १२

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अनया स्तुतिमुपसंहरति । हे देवा देवौ मित्रावरुणौ युवभ्यां युवाभ्यां वसिष्ठेविवं पुरोहितिः पुरस्क्रिया पूजा स्तुतिलक्षणाकारि । कृताभूत् । तां सेवित्वा विश्वानि सर्वाणि दुर्गा दुःखेन गंतव्यान्यापदस्तिरस्तिरस्कुरुतं । तथा कृत्वा नोऽस्माच्चिपर्त्तं । मारयतं । स्पष्टो गतः ॥

॥ इति पंचमस्य पंचमे द्वितीयो वर्गः ॥

उद्वां चक्षुरिति सप्तर्चं षष्ठं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं मैत्रावरुणं । उद्वां सप्तेत्यनु-क्रमणिका ॥ विनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

उद्वां चक्षुर्वरुणा सुप्रतीकं देवयोरेति सूर्यस्ततन्वान् ।

अभि यो विश्वा भुवनानि चष्टे स मन्युं मर्त्येष्वा चिकेत ॥ १

उत् । वां । चक्षुः । वरुणा । सुऽप्रतीकं । देवयोः । एति ।

सूर्यः । ततन्वान् ।

अभि । यः । विश्वा । भुवनानि । चष्टे । सः । मन्युं । ।

मर्त्येषु । आ । चिकेत ॥ १

हे मित्रावरुणा मित्रावरुणौ देवयोर्द्योतमानयोर्वां युवयोश्चक्षुः प्रकाशकं तेजः सुप्रतीकं शोभनरूपमेवंरूपः सूर्यस्ततन्वान् तेजो विस्तारयन्नुदेति । उद्गच्छति । अपोदितो यो देवो विश्वा सर्वाणि भुवनानि भूतजातान्यभिचष्टे अभिपश्यति स देवो मर्त्येषु मनुष्येषु मन्युं स्तोत्रं कर्म वाचिकेत । आजानाति ॥

॥ अथ द्वितीया ॥

प्र वां स मित्रावरुणावृतावा विप्रो मन्मानि दीर्घश्रुदियर्ति ।

यस्य ब्रह्माणि सुक्रतू अवाथ आ यत्क्रत्वा न शरदः पृणैथे ॥ २

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

प्र । वां । सः । मित्रावरुणौ । ऋतऽवा । विप्रः । मन्मानि ।
दीर्घऽश्रुत् । इयर्ति ।
यस्य । ब्रह्माणि । सुक्रतू इति सुऽक्रतू । अवाथः । आ । यत् ।
क्रत्वा । न । शरदः । पृणैथे इति ॥ २

हे मित्रावरुणौ वां युवयोर्मन्मानि मननीयानि स्तोत्राणि स प्रसिद्धो विप्रो मेधाव्यृतावा यज्ञवान् दीर्घश्रुत् चिरकालं श्रोता एवमुक्तलक्षणो वसिष्ठ इयर्ति । प्रेरयति । यस्य युवयोर्ब्रह्माणि परिवृढानि स्तोत्राणि हे सुक्रतू शोभनकर्माणावायथो रक्षथः । यत्क्रतुं शरदो बह्वीः संवत्सरानापृणैथे आपूरयेथे स उदियर्ति ॥

॥ अथ तृतीया ॥

प्रोरोर्मित्रावरुणा पृथिव्याः प्र दिव ऋष्वाद्बृहतः सुदानू ।
स्पशं दधाथे ओषधीषु विक्ष्वृधग्यतो अनिमिषं रक्षमाणा ॥ ३

प्र । उरोः ॥ मित्रावरुणा । पृथिव्याः । प्र । दिवः । ऋष्वात् ।
बृहतः । सुदानू इति सुऽदानू ।
स्पशः । दधाथे इति । ओषधीषु । विक्षु । ऋधक् । यतः ।
अनिऽमिषं । रक्षमाणा ॥ ३

हे मित्रावरुणा मित्रावरुणौ युवामुरोर्विस्तीर्णायाः पृथिव्या अपि प्र । प्ररिरिचाथे । अस्येदेव प्ररिरिचे । ऋग्वे० १. ६१. ९. । इत्यादिषु प्रशब्दस्य रिरिच इत्यनेन सह संबन्धदर्शनादत्राप्युचितक्रियाध्याहारेण रिरिच इति योज्यं । तथा ऋष्वाद्दर्शनीयाद्बृहतः स्वरूपतोऽतिमहतो दिवो द्युलोकादपि प्ररिरिचाथे हे सुदानू शोभनदानौ । किंचौषधीषु विक्षु प्रजासु निमित्तभूतासु प्रजासु चेति वा स्वयो रूपं दधाथे । धारयेथे । किं कुर्वन्तौ । ऋधक् यत ऋधक् सत्येन यतो नियमाद् सत्येन गच्छतो जनाननिमिषमप्रमादेन सर्वदा रक्षमाणा पालयन्तौ ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ चतुर्थी

शंसा मित्रस्य वरुणस्य धाम शुष्मो रोदसी बद्बधे महित्वा।
अयन्मासा अयज्वनामवीराः प्र यज्ञमन्मा वृजनं तिराते॥ ४

शंस। मित्रस्य। वरुणस्य। धाम। शुष्मः। रोदसी इति।
बद्बधे। महिऽत्वा।
अयन्। मासाः। अयज्वनां। अवीराः। प्र। यज्ञऽमन्मा।
वृजनं। तिराते॥ ४

हे ऋषे मित्रस्य वरुणस्य च धाम तेजःस्थानं शंस। स्तुहि। ययोर्देवयोः शुष्मो बलं रोदसी द्यावापृथिव्यौ सह वर्तमाने महित्वा स्वमहत्त्वेन बद्बधे बध्नाति पृथक्स्थापयति इयं पृथिवीयं द्यौरिति पृथक्करोति। द्यावापृथिवी महास्तभितेति श्रुतेः। अयज्वनामननुष्ठातॄणां मासाः कालावयवा अवीरा अपुत्रा एवायन्। यंतु। गच्छंतु। तद्विपरीतो यज्ञमन्मा यज्ञार्थं मतिमान्यज्वा वृजनं बलं प्रतिराते। प्रवर्धयतु। प्रपूर्वस्तिरतिर्वर्धनार्थः॥

॥ अथ पंचमी॥

अमूरा विश्वा वृषणाविमा वां न यासु चित्रं ददृशे न यक्षं।
द्रुहः सचंते अनृता जनानां न वां निण्यान्यचिते अभूवन्॥ ५

अमूरा। विश्वा। वृषणौ। इमाः। वां। न। यासु। चित्रं।
ददृशे। न। यक्षं।
द्रुहः। सचंते। अनृता। जनानां। न। वां। निण्यानि।
अचिते। अभूवन्॥ ५

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे अमूरा अमूढौ हे विश्वा व्याप्तौ हे वृषणौ वर्षितारौ वां युवाभ्यामिमेमानि स्तुतिवचांसि क्रियंते । यासु स्तुतिषु चित्रमाश्चर्यं न ददृशे न दृश्यते न यक्षं न पूजा दृश्यते। युवाभ्यां महिम्नोऽपि महत्वात् प्रयत्नेन क्रियमाणमपि स्तोत्रं न चमत्कारोतीत्यर्थः। जनानामन्तता स्तुत्यविषयाणि स्तोत्राणि द्रुहो द्रोग्धारः सचंते। सेवंते। न सचंतः वां युवाभ्यां क्रियमाणानि निण्यान्यंतर्हितानि रहस्यान्यपि स्तोत्राण्यचित्तिऽज्ञानाय नाभूवन्। न भवंति॥

॥ अथ षष्ठी ॥

सम् उ वां यज्ञं महयं नमोभिर्हुवे वां मित्रावरुणा सबाधः ।

प्र वां मन्मान्यृचसे नवानि कृतानि ब्रह्म जुजुषन्निमानि ॥ ६

सम्। ऊं इति। वां। यज्ञं। महयं। नमःऽभिः। हुवे। वां।

मित्रावरुणा। सऽबाधः।

प्र। वां। मन्मानि। ऋचसे। नवानि। कृतानि। ब्रह्म।

जुजुषन्। इमानि। ६

हे मित्रावरुणौ वां युवयोर्यज्ञं नमोभिर्नमस्कारैः स्तुतिभिः सह महयं। संपूजयाम्यहं। तदर्थं हे मित्रावरुणा मित्रावरुणौ वां सबाधो बाधायुक्तोऽहं हुवे। आह्वयामि बाधापरिहाराय। वां युवामृचसे स्तोतुं नवानि नूतनानि स्तुत्यानि वा मन्मानि स्तोत्राणि प्रभवंत्वित्यध्याहारः। कृतानि यथा स्मृतिमतानीदानीं क्रियमाणानि ब्रह्म परिवृढानि स्तोत्राणि युवां जुजुषन्। प्रीणयंतु॥

॥ अथ सप्तमी ॥

इयं देव पुरोहितिर्युवभ्यां यज्ञेषु मित्रावरुणावकारि ।

विश्वानि दुर्गा पिपृतं तिरो नो यूयं पात स्वस्तिभिः

सदा नः ॥ ७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इयं। देवाः। पुरःऽहितिः। युवऽभ्यां। यज्ञेषु। मित्रावरुणौ।
अकारि।
विश्वानि। दुःऽगा। पिपृतं। तिरः। नः। यूयं। पात।
स्वस्तिऽभिः। सदा। नः॥ ७

इयं देवेति सप्तमी गता॥

॥ इति पंचमस्य पंचमे तृतीयो वर्गः॥

उत्सूर्य इति षडृचं सप्तमं सूक्तं। अत्रानुक्रमणिका। उत्सूर्यः षळाद्यास्तिस्रः सौर्य इति। वसिष्ठ ऋषिः। त्रिष्टुप् छंदः। आद्यास्तिस्रः सूर्यदेवत्याः शिष्टा मित्रावरुणदेवत्याः॥ सूक्तविनियोगो लैंगिकः॥

॥ तत्र प्रथमा॥

उत्सूर्यो बृहदर्चींष्यश्रेत्पुरु विश्वा जनिम मानुषाणां।
समो दिवा ददृशे रोचमानः क्रत्वा कृतः सुकृतः कर्तृभिर्भूत्॥१

उत्। सूर्यः। बृहत्। अर्चींषि। अश्रेत्। पुरु। विश्वा।
जनिम। मानुषाणां।
समः। दिवा। ददृशे। रोचमानः। क्रत्वा। कृतः।
सुऽकृतः। कर्तृऽभिः। भूत्॥ १

सूर्यः सर्वस्य प्रेरको देवो बृहदत्यधिकं पुरु पुरूण्यपि बहून्यर्चींषि तेजांस्युदश्रेत्। ऊर्ध्वं श्रयति। किं प्रति। मानुषाणां मनुष्याणां विश्वा सर्वाणि जनिम जनिमानि जनान्। जनशब्दः संघवचनः। तानभ्युदश्रेत्। स देवो दिवाह्नि रोचमानः सन् समो ददृशे एकरूपः प्रतिनियतः सन् दृश्यते। तस्मात्पुरुषं पुरुषं प्रत्यादित्यो भवतीति हि श्रुतिः। स देवः क्रत्वा सर्वस्य कर्ता कृतः संपादितः प्रजापतिना कर्तृभिः ऋत्विकर्तृभिः सुकृतः स्तुत्या तीक्ष्णीकृतो भूत् भवति॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ द्वितीया ॥

स सू॑र्यं प्रति॑ पुरो न उद्गा॑ एभिः स्तोमे॑भिरेतशेभि॒रेवैः॑ ।

प्र नो॑ मित्राय वरु॑णाय वोचोऽनागसो अर्य॒म्णे अ॒ग्नये॑ च ॥ २

सः । सूर्य॑ । प्रति॑ । पुरः । नः । उत् । गाः । एभिः ।

स्तोमे॑भिः । एतशेभिः॑ । एवैः॑ ।

प्र । नः । मित्राय॑ । वरु॑णाय । वोचः । अनागसः । अर्यम्णे ।

अग्नये॑ । च ॥ २

हे सूर्य स प्रसिद्धस्त्वं नोऽस्मान्प्रति पुरः पुरस्तादुद्गाः । उद्गच्छ । कैः साधनैः । एभिः स्तोमेभिः स्तोमैः स्तुत्यैरेतशेभिरेतशैः ॥ स्वार्थिकः मकारो वा जरंता युवशा ता । ऋग्वे० १. १६१. ७. । पुरुमः कण्वमपासृन्तरतः । ऐ० ब्रा० ५. १४. । इत्यादिवत् ॥ तादृशैरेवैर्गमनशीलैरश्वैरुद्गाः । अथ तथा उक्ताभिः स्तुतः सन् नोऽस्माननागसोऽपापान्प्रवोचः । केभ्यः । मित्राय वरुणायार्यम्णे ग्नये च । अत्र सौर्ये इतरेषां मित्रादीनां संकीर्तनं तेषामपि निपातभाक्त्वादविरुद्धं । एवं पूर्वत्रोत्तरत्र च मैत्रावरुणेऽर्यमादीनां संकीर्तनमपि न विरुध्यते ॥

॥ अथ तृतीया ॥

वि नः॑ सहस्रं॑ शुरुधो॑ रदंत्वृ॒तावा॑नो वरु॑णो मित्रो अ॒ग्निः ।

यच्छं॑तु चंद्रा उ॑पमं नो॑ अर्कमा नः॒ कामं॑ पूपुरंतु स्तवा॑नाः ॥ ३

वि । नः । सहस्रं॑ । शुरुधः॑ । रदंतु । ऋतऽवा॑नः । वरु॑णः ।

मित्रः । अग्निः ।

यच्छं॑तु । चंद्राः । उपऽमं । नः । अर्कं॑ । आ । नः । कामं॑ ।

पूपुरंतु । स्तवा॑नाः ॥ ३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नोऽस्मभ्यं सुदक्षः सुचेतुःखस्य प्रतिरोधार, ऋतावानः सत्यवंतो वरुणादयः सहस्रं सहस्रसंख्याकं धनं विरदंतु। वितरंतु। अथवा सुदक्ष ऋतवतयाः सहस्र-संख्याका ओषधी रदंतु। किंच ते चंद्रा आह्लादकारिणोऽस्मभ्यमुपमं स्तुत्यमवं-चनीयं यच्छंतु। किंच स्तवाना अस्माभिः स्तूयमाना नोऽस्माकं काममपेक्षितं पुपुरंतु। पूरयंतु। हे सूर्य त्वयानुघाता इति सूर्यस्य स्तुतिः॥

॥ अथ चतुर्थी ॥

द्यावाभूमी अदिते त्रासीथां नो ये वां जज्ञुः सुजनिमान ऋष्वे।
मा हेळे भूम वरुणस्य वायोर्मा मित्रस्य प्रियतमस्य नृणां॥ ४

द्यावाभूमी इति। अदिते। त्रासीथां। नः। ये। वां। जज्ञुः।
सुऽजनिमानः। ऋष्वे इति।
मा। हेळे। भूम। वरुणस्य। वायोः। मा। मित्रस्य।
प्रियऽतमस्य। नृणां।

हे द्यावाभूमी द्यावापृथिव्यौ हे अदिते अखंडनीये। एतद्द्यावाभूम्योरेवैकवचनेन संबोधनं। हे ऋष्वे। महन्नामैतत्। हे महत्यौ नोऽस्मान् त्रासीथां। रक्षतं। ये वयं सुजनिमानः शोभनजन्मानो वां युवां जज्ञुः ज्ञातवंत च। किंच वयं वरुणस्य हेळे क्रोधे मा भूम। तथा वायोर्मा भूम। तथा नृणां स्तुतिनेतॄणां मनुष्याणां प्रियतमस्य मित्रस्य हेळे मा भूम॥

प्र बाहवेति पंचमी मैत्रावरुण्ये पयो पशुपुरोडाशस्य याज्या। सूत्रितं च। प्र बाहवा सिसृतं जीवसे नो यद्बंहिष्ठं नातिविधे सुदानू। आ० ३. ८.। इति॥ तत्पाठस्तु॥

॥ अथ पंचमी ॥

प्र बाहवा सिसृतं जीवसे न आ नो गव्यूतिमुक्षतं घृतेन।
आ नो जने श्रवयतं युवाना श्रुतं मे मित्रावरुणा हवेमा।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्र। बाहवा। सिसृतं। जीवसे। नः। आ। नः। गव्यूतिं।
उक्षतं। घृतेन।
आ। नः। जने। श्रवयतं। युवाना। श्रुतं। मे।
मित्रावरुणा। हवा। इमा॥ ५

हे मित्रावरुणा मित्रावरुणौ देवौ बाहवा युवाभ्यां बाहू प्रसिसृतं। प्रसारयतं हविःस्वीकाराय धनप्रदानाय वा। किमर्थमिति। नो जीवसेऽस्माकं जीवनाय। किंच नोऽस्माकं गव्यूतिं। गावो यंति गच्छंत्यत्रेति गव्यूतिर्गोमार्गभूमिः। तां तृणादिप्ररोहाय घृतेनोदकेन। समंतादुक्षतं। सिंचतं। किंच नोऽस्माञ्जनेऽस्मदीयाने मनुष्यसमूहे वा नोऽस्माञ्छ्रवयतं। विश्रुतं कुरुतं। हे युवाना नित्ययौवनौ सर्वत्र व्याप्तौ वा युवां मे ममेमानि हवानाह्वानानि श्रुतं। शृणुतं॥

॥ अथ षष्ठी ॥

नू मित्रो वरुणो अर्यमा नस्त्मने तोकाय वरिवो दधंतु।
सुगा नो विश्वा सुपथानि संतु यूयं पात स्वस्तिभिः सदा नः॥६

नु। मित्रः। वरुणः। अर्यमा। नः। त्मने। तोकाय।
वरिवः। दधंतु।
सुऽगा। नः। विश्वा। सुऽपथानि। संतु। यूयं। पात।
स्वस्तिऽभिः। सदा। नः॥ ६

मित्रो वरुणोऽर्यमा चैते त्रयो देवा नु अद्य नोऽस्माकं त्मन आत्मन आत्महिताय तोकाय पुत्राय च वरिवो धनं दधंतु। प्रयच्छंतु। नोऽस्माकं विश्वा सर्वाणि गंतव्यानि सुगा सुगमनानि सुपथानि च संतु। भवंतु। शिष्टं गतं।

॥ इति पंचमस्य पंचमे चतुर्थो वर्गः ॥

उद्वेतीति षड्चमष्टमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं। आद्याश्चतस्रः पंचम्याः पूर्वार्धश्च सूर्यदेवत्याः अवशिष्टायाऋचोऽर्धं मित्रावरुणदेवत्याः। तथा चानुक्रांतं। उद्वेतीति षाट्पंचमा इति ॥ विनियोगो लैंगिकः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तत्र प्रथमा ॥

उद्वे॑ति सुभगो॑ विश्वच॑क्षाः साधा॑रणः सूर्यो॑ मानु॑षाणां ।

चक्षु॑र्मित्रस्य वरु॑णस्य देवश्चर्मे॑व यः समवि॑व्यक्तमां॑सि ॥ १

उत् । ऊं॑ इति॑ । एति । सुऽभगः॑ । विश्वऽच॑क्षाः । साधा॑रणः ।

सूर्यः॑ । मानु॑षाणां ।

चक्षुः॑ । मित्रस्य॑ । वरु॑णस्य । देवः । चर्मे॑ऽइव । यः ।

सम्ऽअवि॑व्यक् । तमां॑सि ॥ १

उद्वेति उद्गच्छत्ययं सूर्यः सुभग शोभनभाग्यः सुष्ठु भजनीयो वा विश्वचक्षाः सर्वस्य द्रष्टा मानुषाणां सर्वेषां मनुष्याणां साधारणः । साधारणत्वप्रतिपादकश्रुतिः पूर्वमुदाहृता । मित्रस्य वरुणस्य च चक्षुः प्रकाशको देवो द्योतमानः । यो देवश्चर्मेव चर्मणेव तमांसि समविव्यक् सम्यक् विचति संवेष्टयति स महानुभावो देव उद्वेति ॥

॥ अथ द्वितीया ॥

उद्वे॑ति प्रसवि॒ता जना॑नां म॒हान्के॒तुर॑र्ण॒वः सूर्य॑स्य ।

समा॒नं चक्रं॑ पर्या॒विवृ॑त्स॒न्यदे॑त॒शो वह॑ति धूर्षु यु॒क्तः ॥ २

उत् । ऊं॑ इति॑ । एति । प्रऽसविता । जना॑नां । म॒हान् ।

के॒तुः । अ॒र्ण॒वः । सूर्य॑स्य ।

समा॒नं । च॒क्रं । परि॒ऽआ॒विवृ॑त्सन् । यत् । ए॒त॒शः । वह॑ति ।

धूः॒ऽसु । यु॒क्तः ॥ २

अयं सूर्यस्य सूर्यः । विभक्तिव्यत्ययः । उद्वेति । उद्गच्छति । कीदृशोऽयं । जनानां सर्वेषां प्रसविता सर्वेषु कर्मसु प्रेरयिता महान् पूज्यः केतुः सर्वस्य प्रज्ञापकोऽर्णव उदकप्रदः । किं कुर्वन्नुदेतीत्युच्यते । समानं सर्वेषामेकरूपमेकेनैव चक्रं रथांगं चरणशीलं रथं वा पर्यावृत्सन् पर्यावर्तयितुमिच्छन् । यद्यच्चक्रं धूर्षु रथस्य धुर्षु युक्त एतश एतशवर्णो हरि- तवर्णोऽश्वो वहति । एको अश्वो वहति सप्तनामा । ऋग्वे॰ १, १६४, २, । इत्युक्तं ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ तृतीया ॥

विभ्राजमान उषसामुपस्थाद्रेभैरुदेत्यनुमद्यमानः।

एष मे देवः सविता चच्छंद यः समानं न प्रमिनाति धाम ॥ ३

विऽभ्राजमानः। उषसां। उपऽस्थात्। रेभैः। उत्। एति। अनुऽमद्यमानः।

एषः। मे। देवः। सविता। चच्छंद। यः। समानं। न। प्रऽमिनाति। धाम ॥ ३

अयं सूर्यो विभ्राजमानो विशेषेण दीप्यमान उषसामुपस्थादुपस्थे मध्ये रेभैः स्तोतृभिरनुमद्यमानः समुदेति। किंचैष देवो द्योतमानः सविता मे मह्यं चच्छंद। अपच्छंदयति कामान्। एष इत्युक्तं क इति। यो देवः समानं सर्वेषां प्राणिनामेकरूपं धाम स्वीयं तेजःस्थानं न प्रमिनाति न हिनस्ति न संकोचयति स देव उदेतीति ॥

॥ अथ चतुर्थी ॥

दिवो रुक्म उरुचक्षा उदेति दूरेअर्थस्तरणिर्भ्राजमानः।

नूनं जनाः सूर्येण प्रसूता अयन्नर्थानि कृणवन्नपांसि ॥ ४

दिवः। रुक्मः। उरुऽचक्षाः। उत्। एति। दूरेऽअर्थः। तरणिः। भ्राजमानः।

नूनं। जनाः। सूर्येण। प्रऽसूताः। अयन्। अर्थानि। कृणवन्। अपांसि ॥ ४

अयं सूर्यो रुक्मो रोचमान उरुचक्षाः प्रभूततेजाश्च सन् दिवोऽन्तरिक्षादुदेति। यद्वा दिवोऽन्तरिक्षस्य रुक्म आभरणस्थानीयः। कीदृशोऽयं। दूरेअर्थो दूरेगंता अर्थोऽर्तेः। दूरे प्रार्थ्यमानो वा तरणिस्तारको भ्राजमानो दीप्यमानः समुदेति। नूनं निश्चयं जनाः सर्वे प्राणिनः सूर्येण प्रेरकेण देवेन प्रसूता अनुज्ञाताः प्रेरिताः संतोऽर्थानि गंतव्यान्ययन्नपांसि कर्माणि कृणवन्। कुर्वंति ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ पंचमी ॥

यत्रा चक्रुरमृता गातुमस्मै श्येनो न दीयन्नन्वेति पाथः।
प्रति वां सूर उदिते विधेम नमोभिर्मित्रावरुणोत हव्यैः॥ ५

यत्र। चक्रुः। अमृताः। गातुं। अस्मै। श्येनः। न।
दीयन्। अनु। एति। पाथः।
प्रति। वां। सूरे। उत्ऽइते। विधेम। नमःऽभिः।
मित्रावरुणा। उत। हव्यैः॥ ५

यत्र यस्मिन्नंतरिक्षेऽमृता अनश्वरधर्मोपेताः पूर्वं देवा अस्मै सूर्याय गातुं मार्गं चक्रुः अकुर्वन् तस्मादंतरिक्षमत्येति। अनुगच्छति। न इव। दीयन् गच्छन् श्येनो न शंसनीयगमनो श्येन इव। अयमर्थः शीघ्रं इत्युक्तं। हे मित्रावरुणा मित्रावरुणौ वां युवां सूरे सूर्ये उदिते सति प्रातःसवने नमोभिर्नमस्कारैः स्तुतिभिरन्नैरपि च हव्यैर्हविर्भिश्च प्रतिविधेम। परिचरेम॥

॥ अथ षष्ठी ॥

नू मित्रो वरुणो अर्यमा नस्त्मने तोकाय वरिवो दधंतु।
सुगा नो विश्वा सुपथानि संतु यूयं पात स्वस्तिभिः सदा नः॥ ६

नु। मित्रः। वरुणः। अर्यमा। नः। त्मने। तोकाय।
वरिवः। दधंतु।
सुऽगा। नः। विश्वा। सुऽपथानि। संतु। यूयं। पात।
स्वस्तिऽभिः। सदा। नः॥ ६

नू मित्र इति षष्ठी गता॥

॥ इति मंडलस्य पंचमे पंचमो वर्गः॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिवि क्षयंतेति पंचर्चं नवमं सूक्तं वसिष्ठस्यार्षं मैत्रावरुणं। दिवि पंचेत्यनु-क्रमणिका॥ द्वितीये छंदोमे प्रउगशस्त्र आद्यतृचो मैत्रावरुणस्य। सूत्रितं च। दिवि क्षयंता रजसः पृथिव्यामा मित्रयाराश्विना गतं नः। आ० ८. ११. । इति॥

॥ अथ प्रथमा ॥

दिवि क्षयंता रजसः पृथिव्यां प्र वां घृतस्य निर्णिजो ददीरन्।

हव्यं नो मित्रो अर्यमा सुजातो राजा सुक्षत्रो वरुणो जुषंत॥१

दिवि। क्षयंता। रजसः। पृथिव्यां। प्र। वां। घृतस्य।

निःऽनिजः। ददीरन्।

हव्यं। नः। मित्रः। अर्यमा। सुऽजातः। राजा। सुऽक्षत्रः।

वरुणः। जुषंत॥१

दिवि द्युलोकेऽन्तरिक्षे पृथिव्यां च वर्तमानस्य रजस उदकस्य क्षयंता। क्षयतिरैश्वर्यकर्मा। स्वामिनौ भवथः। हे मित्रावरुणौ वां युवाभ्यां प्रेरिता मेघा घृतस्य निर्णिज उदकस्य रूपाणि ददीरन्। ददते। प्रयच्छंति। अथवा वां युवाभ्यां घृतस्य निर्णिजो रूपाणि। घृतानीत्यर्थः। तानि ददीरन्। दीयंते। नोऽस्माकं संबंधि हव्यं मित्रः सुजातः सुष्ठु प्रादुर्भूतोऽर्यमा राजा सर्वस्य स्वामी सुक्षत्रः शोभनबलो वरुणश्चैते जुषंत। सेवंतां

॥ अथ द्वितीया ॥

आ राजाना मह ऋतस्य गोपा सिंधुपती क्षत्रिया यातमर्वाक्।

इडां नो मित्रावरुणोत वृष्टिमव दिव इन्वतं जीरदानू॥२

आ। राजाना। महः। ऋतस्य। गोपा।

सिंधुपती इति सिंधुऽपती। क्षत्रिया। यातं। अर्वाक्।

इडां। नः। मित्रावरुणा। उत। वृष्टिं। अव। दिवः।

इन्वतं। जीरदानू इति जीरऽदानू॥२

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे राजाना सम्राजौ स्वामिनौ हे महो महत ऋतस्योदकस्य यज्ञस्य गोपा गोपायितारौ ॥ सुबामंत्रिते पराङ्गवत्स्वर इति पराङ्गवद्भावात् षष्ठ्यामंत्रितसमुदायस्य निघातत्वं ॥ हे सिंधुपती नद्याः पालयितारौ हे क्षत्रिया बलवंतौ युवामर्वागस्मदभिमुखमायातं । आगच्छतं । किंच हे मित्रावरुणा मित्रावरुणौ हे जीरदानू क्षिप्रदानौ युवां नोऽस्मभ्यमिळामन्नमुतापि च वृष्टिं तत्साधकां वृष्टिं च दिवोऽंतरिक्षाद्यावस्थादिन्वतं । प्रेरयतं ॥

॥ अथ तृतीया ॥

मित्रस्तन्नो वरुणो देवो अर्यः प्र साधिष्ठेभिः पथिभिर्नयंतु ।

ब्रवद्यथा न आदरिः सुदास इषा मदेम सह देवगोपाः ॥ ३

मित्रः । तत् । नः । वरुणः । देवः । अर्यः । प्र । साधिष्ठेभिः ।

पथिऽभिः । नयंतु ।

ब्रवत् । यथा । नः । आत् । अरिः । सुऽदासे । इषा ।

मदेम । सह । देवऽगोपाः ॥ ३

मित्रो वरुणो देवोऽर्योऽर्यमा चैते त्रयोऽपि नोऽस्मान् तत्तदा यदास्माकमपेक्षितं तदा साधिष्ठेभिः साधकतमैः पथिभिर्मार्गैर्नयंतु । प्रापयंतु । किंच नोऽस्मान् सुदासे शोभनदानाय जनायारिरर्यमा यथा ब्रवत् अस्मानतुकंप्य इति ब्रूयात् तथा कुर्वंतु । अर्यम्णः पुनरभिधानमादरार्थं । देवगोपा देवा यूयं गोपायितारो येषामस्माकं ते वयमिषा युष्माभिर्दत्तेनान्नेन सह पुत्रादिसहिता मदेम । हृष्येम ॥

॥ अथ चतुर्थी ॥

यो वां गर्तं मनसा तक्षदेतमूर्ध्वां धीतिं कृणवद्धारयच्च ।

उक्षेथां मित्रावरुणा घृतेन ता राजाना सुक्षितीस्तर्पयेथां ॥ ३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यः । वां । गर्तं । मनसा । तक्षत् । एतं । ऊर्ध्वां । धीतिं ।
कृणवत् । धारयत् । च ।

उक्षेथां । मित्रावरुणा । घृतेन । ता । राजाना । सुऽक्षितीः ।
तर्पयेथां ॥ ४

हे मित्रावरुणौ यो वां युवयोरेतं गर्तं रथं मनसा तक्षत् स्तोमेन संकल्पयेत् । तथा तस्योर्ध्वमुन्नतां धीतिं कर्म स्तुतिरूपं कृणवत् कुर्यात् उच्चैः स्तुयात् । एवं कृत्वा धारयच्च यागे धारयेत् हे राजानौ स्वामिनौ मित्रावरुणा मित्रावरुणौ ता तौ युवां जनं घृतेनोदकेनोक्षेथां । सिंचतं । तस्मै सुक्षितीः शोभननिवासाः प्रजाः तर्पयेथां । यथा सुक्षितयो भवंति तथा तर्पयेथामिति ॥

॥ अथ पंचमी ॥

एष स्तोमो वरुण मित्र तुभ्यं सोमः शुक्रो न वायवेऽयामि ।
अविष्टं धियो जिगृतं पुरंधीर्यूयं पात स्वस्तिभिः सदा नः ॥ ५

एषः । स्तोमः । वरुण । मित्र । तुभ्यं । सोमः । शुक्रः । न ।
वायवे । अयामि ।

अविष्टं । धियः । जिगृतं । पुरंऽधीः । यूयं । पात ।
स्वस्तिऽभिः । सदा । नः ॥ ५

अनया स्तुतिमुपसंहरति । हे वरुण हे मित्र तुभ्यं युवयोरर्थाय । वायुर्गंतादित्यः स एवायं वा । तस्मै चैष स्तोमः स्तोत्रोऽयामि । अकारि । क्रियते । शुक्रो दीप्तः सोमो न युष्मभ्यं प्रीतिकरः सोमो यथा दीयते तद्वत् । धियः कर्माण्यस्मदीयान्यविष्टं पुरंधीः स्तुतीर्जिगृतं । प्रबुध्यतं । अन्यद्गतं ॥

॥ इति पंचमस्य पंचमे षष्ठो वर्गः ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रति वां सूर इति पंचर्चं दशमं सूक्तं वसिष्ठस्यार्षं मैत्रावरुणं। प्रति वामित्यनुक्रांतं॥ द्वितीये छंदोमे प्रउगशस्त्रेऽप्येष तृचः। सूत्रितं च। प्रति वां सूर उदिते सूक्तैर्वेति प्रउगं। आ० ८. १०. । इति॥

॥ तत्र प्रथमा॥

प्रति वां सूर उदिते सूक्तैर्मित्रं हुवे वरुणं पूतदक्षं।
ययोरसुर्यमक्षितं ज्येष्ठं विश्वस्य यामन्नाचिता जिगत्नु॥ १

प्रति। वां। सूरे। उत्ऽइते। सुऽउक्तैः। मित्रं। हुवे।
वरुणं। पूतऽदक्षं।
ययोः। असुर्यं। अक्षितं। ज्येष्ठं। विश्वस्य। यामन्।
आऽचिता। जिगत्नु॥ १

सूरे सूर्ये उदिते प्रातःसवने मित्रं पूतदक्षं शुद्धबलं वरुणं वां सूक्तैर्हुवे आह्वये। ययोर्मित्रावरुणयोरक्षितमक्षीणमत एव ज्येष्ठमसुर्यं बलमाचिताचित उपचिते भूरसंघैरुपेते यामन् यामनि संग्रामे विश्वस्य सर्वस्य जिगत्नु जेतृ भवति॥

॥ अथ द्वितीया॥

ता हि देवानामसुरा तावर्या ता नः क्षितीः करतमूर्जयन्तीः।
अश्याम मित्रावरुणा वयं वां द्यावा च यत्र पीपयन्नहा च॥ २

ता। हि। देवानां। असुरा। तौ। अर्या। ता। नः।
क्षितीः। करतं। ऊर्जयन्तीः।
अश्याम। मित्रावरुणा। वयं। वां। द्यावा। च। यत्र।
पीपयन्। अहा। च॥ २

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

ता हि तौ खलु देवौ देवानां मध्येऽसुरा बलवंतौ। अर्यौ तौ सर्वस्येश्वरौ। ता तौ नोऽस्माकं विशः पुत्रादिरूपा प्रजा जयंतौ प्रहर्षः करतं। कुरुतं। हे मित्रावरुणा मित्रावरुणौ वयं वां युवामश्याम। व्याप्नुयाम। यत्र यस्यां युवयोर्व्याप्तौ द्यावा द्यावापृथिव्यौ। सर्वदा तयोः सद्भावादयनयोर्लभ्यते। अहा च। एतच्छब्दोऽहरुपलक्षणं। अहोरात्राणि च पीपयन् अस्मान् प्याययेयुः॥

॥ अथ तृतीया॥

ता भूरिपाशावनृतस्य सेतू दुरत्येतू रिपवे मर्त्याय।
ऋतस्य मित्रावरुणा पथा वामपो न नावा दुरिता तरेम॥ ३

ता। भूरिऽपाशौ। अनृतस्य। सेतू इति।
दुरत्येतू इति। दुःऽअत्येतू। रिपवे। मर्त्याय।
ऋतस्य। मित्रावरुणा। पथा। वां। अपः। न। नावा।
दुःऽइता। तरेम। ३

ता तौ मित्रावरुणौ भूरिपाशौ प्रभूतबंधनसाधनपाशोपेतावनृतस्य यागरहितस्य सेतू सेतुवद्बंधकौ रिपवे मर्त्याय वैरिजनाय दुरत्येतू दुरतिक्रमौ भवतः। हे मित्रावरुणा तादृशौ मित्रावरुणौ वां युवयोर्ऋतस्य यज्ञस्य युवयोरर्थायानुष्ठीयमानस्य यागस्य पथा मार्गेण दुरिता दुःखानि तरेम नावाऽपो न प्रभूतान्युदकानीव॥
मैत्रावरुणे पशावा नो मित्रावरुणेत्येषा वपायानुवाक्या। सूत्रितं च। आ नो मित्रावरुणा हव्यजुष्टिं युवं वस्त्राणि पीवसा वसाथे। आ० ३, ८। इति॥ तत्पठस्तु॥

॥ अथ चतुर्थी॥

आ नो मित्रावरुणा हव्यजुष्टिं घृतैर्गव्यूतिमुक्षतमिळाभिः।
प्रति वामत्र वरमा जनाय पृणीतमुद्नो दिव्यस्य चारोः॥ ४

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आ। नः। मित्रावरुणा। हव्यऽजुष्टिं। घृतैः। गव्यूतिं। उक्षतं। इळाभिः।

प्रति। वां। अत्र। वरं। आ। जनाय। पृणीतं। उद्नः। दिव्यस्य। चारोः॥ ४

हे मित्रावरुणा मित्रावरुणौ नोऽस्माकं हव्यजुष्टिं हविःसेवनवंतं यज्ञमागच्छत-मिति शेषः। आगत्य चेळाभिरन्नैः सह घृतैरुदकैर्गव्यूतिमस्मदीयां भूमिमुक्षतं। सिंचतं। वां युवां अत्रास्मिन् लोके वरमुत्कृष्टं हविः स्तोत्रं वा च आयच्छ इति शेषः। अतः केवलं जनायैव दिव्यस्य दिवि भवस्य चारोश्चरणीयस्योद्न उदकस्य॥ कर्मणि षष्ठी॥ उदकस्यैवमुदकं पृणीतं। प्रयच्छतं॥

॥ अथ पंचमी॥

एष स्तोमो वरुण मित्र तुभ्यं सोमः शुक्रो न वायवेऽयामि।

अविष्टं धियो जिगृतं पुरंधीर्यूयं पात स्वस्तिभिः सदा नः॥ ५

एषः। स्तोमः। वरुण। मित्र। तुभ्यं। सोमः। शुक्रः। न। वायवे। अयामि।

अविष्टं। धियः। जिगृतं। पुरंऽधीः। यूयं। पात। स्वस्तिऽभिः। सदा। नः॥ ५

एष स्तोम इति पंचमी गता॥

॥ इति पंचमस्य पंचमे सप्तमो वर्गः॥

प्र मित्रयोरित्येकोनविंशत्यृचमेकादशं सूक्तं वसिष्ठस्यार्षं। अत्रेयमनुक्रमणिका। प्र मित्रयारेकोना गायत्रं दशस्याद्यास्तयः प्रगाथाः पुरउष्णिक् चतस्रोऽस्या दशा-दित्यादित्याः सूर्यं इति। दशमी बृहत्येकादशी सतोबृहती द्वादशी बृहती त्रयोदशी सतोबृहती चतुर्दशी बृहती पंचदशी सतोबृहती षष्ठी पुरउष्णिक् शिष्टा गायत्र्यः॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

चतुर्थ्याद्यास्त्रयोदश्यंता आदित्यदेवतास्तदंत्यास्तिस्रः सूर्यदेवत्याः । आद्यंत्यौ तृचौ पूर्ववन्मैत्रावरुणौ ॥ अग्निष्टोमे माध्यंदिनसवने मैत्रावरुणशस्त्र आदितो नवर्चः शस्याः । प्र मित्रयोर्वरुणयोरिति नव । आ० ५. १०. । इति सूत्रितत्वात् ॥ उक्थ्याभिप्लवषडहयोः स्तोमवृद्धिनिमित्तमाद्याः षडृचः । सूत्रितं च । प्र मित्रयोर्वरुणयोरिति षट् । आ० ७. ५. । इति ॥

॥ तत्र प्रथमा ॥

प्र मित्रयोर्वरुणयोः स्तोमो न एतु शूष्यः ।
नमस्वान्तुविजातयोः ॥ १

प्र । मित्रयोः । वरुणयोः । स्तोमः । नः । एतु । शूष्यः ।
नमस्वान् । तुविऽजातयोः ॥ १

मित्रयोर्वरुणयोः । मित्रावरुणयोरित्यर्थः । उभयत्र प्रतियोग्यपेक्षया द्विवचनत्वं । तुविजातयोर्बहुप्रादुर्भावयोर्देवयोर्नोऽस्मदीयः शूष्यः सुखकरो नमस्वानन्नवान् हविर्भिर्युक्तः स्तोमः स्तोत्रं प्रैतु । गच्छतु । अहोरात्रौ वै मित्रावरुणाविति श्रुतिः । अनयोरहोरात्राभिमानित्वात्तयोः पुनः पुनरागमनादनयोस्तुविजातत्वं । अथवा बहूनामुपकारायानयोः प्रादुर्भावात्तुविजातत्वं ॥

अथ द्वितीया ॥

या धारयंत देवाः सुदक्षा दक्षपितरा ।
असुर्याय प्रमहसा ॥ २

या । धारयंत । देवाः । सुऽदक्षा । दक्षऽपितरा ।
असुर्याय । प्रऽमहसा ॥ २

या यौ युवां धारयंत । के । देवा आदिकर्तारोऽसुर्याय बलकरणाय । कीदृशौ युवां । सुदक्षा शोभनबलौ दक्षपितरा बलस्य पालकौ स्वामिनौ वा । बलप्रदावित्यर्थः । प्रमहसा प्रकृष्टतेजस्कौ तौ साधयतमित्युत्तरस्यामन्वयः ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ तृतीया ॥

ता नः स्तिपा तनूपा वरुण जरितॄणां ।

मित्र साधयतं धियः ॥ ३

ता । नः । स्तिऽपा । तनूऽपा । वरुण । जरितॄणां ।

मित्र । साधयतं । धियः ॥ ३

ता तौ स्तिपा । स्त्यायंत इति स्तयो गृहाः । तान्पात इति स्तिपौ । तनूपा तन्वः पालकौ हे वरुण हे मित्र जरितॄणां स्तोतॄणां युवां जरितॄणां नोऽस्माकं धियः कर्माणि स्तुतिरूपाणि साधयतं । संपादयतं कुरुतं ॥

॥ अथ चतुर्थी ॥

यद्द्य सूर उदितेऽनागा मित्रो अर्यमा ।

सुवाति सविता भगः ॥ ४

यत् । अद्य । सूरे । उत्ऽइते । अनागाः । मित्रः । अर्यमा ।

सुवाति । सविता । भगः ॥ ४

यदनमस्माकमपेक्षितं तदद्यास्मिन्काले सूरे उदिते सति प्रातःसवनेऽनागाः पापवर्जिता मित्रोऽर्यमा सविता भगश्चेते सर्वेऽस्मभ्यं सुवाति । प्रेरयेत् । यद्वा अनागा मित्रोऽर्यमा दाता भवतु । तदीप्सितं धनं भगो भजनीयः सविता सुवाति । प्रेरयतु ॥

॥ अथ पंचमी ॥

सुप्रावीरस्तु स क्षयः प्र नु यामन्त्सुदानवः ।

ये नो अंहोऽतिपिप्रति ॥ ५

सुप्रऽअवीः। अस्तु। सः। क्षयः। प्र। नु। यामन्।

सुऽदानवः।

ये। नः। अंहः। अतिऽपिप्रति॥ ५

स क्षयः स निवासः सुप्रावीरस्तु। सुष्ठु प्रकर्षेण रक्षितास्तु। प्रशब्द आदरार्थः। प्रकर्षेण तु क्षिप्रं भवत्विति शेषः। कस्येत्युच्यते। हे सुदानवः सुदाना युष्माकं यामन् यामनि गमने सति। कीदृशानां गमने। ये यूयमागत्य नोऽस्माकमंहः पापमतिपिप्रति अतिपारयथ तेषां गमन इति॥

॥ इति पंचमस्य पंचमेऽष्टमो वर्गः॥

॥ अथ षष्ठी॥

उत स्वराजो अदितिरदब्धस्य व्रतस्य ये।

महो राजान ईशते॥ ६

उत। स्वऽराजः। अदितिः। अदब्धस्य। व्रतस्य। ये।

महः। राजानः। ईशते॥ ६

उतापि च ये मित्रादयस्त्रयः स्वराजः स्वयं स्वामिनोऽदितिस्तेषां माता च संति अदब्धस्याहिंसितस्य महो महतो व्रतस्य कर्मणो राजानः स्वामिनः त ईशते। समर्था भवंति। अभिमतं दातुमिति शेषः। अथवैवं योज्यं। ते मित्रादयोऽदितिश्चादब्धस्य व्रतस्य स्वराज ईश्वराः ते महो महतोऽस्मदभिमतधनस्य राजानः स्वामिनः संत ईशतेऽस्माभ्यं तद्दातुं॥

प्रति वामित्येष तृचश्चातुर्विंशिकेऽहनि प्रातःसवने मैत्रावरुणस्य पर्यासः। सूत्रितं च। प्रति वां सूर उदिते ध्यंगरिखणमिरत्। आ० ७. २.। इति॥

॥ तत्र तृचे प्रथमा सूक्ते सप्तमी॥

प्रति वां सूर उदिते मित्रं गृणीषे वरुणं।

अर्यमणं रिशादसं॥ ७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रति। वां। सूरे। उत्ऽइते। मित्रं। गृणीषे। वरुणं।
अर्यमणं। रिशाऽदसं॥ ७

हे मित्रावरुणौ मित्रं त्वां वरुणं च सूरे रिशादसं शत्रूणामत्तारमर्यमणं च प्रति प्रत्येकं गृणीषे। स्तुवे। कर्तर्युच्यते। सूरे सूर्ये देव उदिते सति। प्रातरित्यर्थः॥

॥ अथ तृचे द्वितीया ऋगष्टमी॥

राया हिरण्यया मतिरियमवृकाय शवसे।

इयं विप्रा मेधसातये॥ ८

राया। हिरण्यऽया। मतिः। इयं। अवृकाय। शवसे।
इयं। विप्रा। मेधऽसातये॥ ८

हिरण्यया हितरमणीयेन राया धनेन सहितायावृकायाहिंसाय शवसेऽस्माकं बलायेयमिदानीं क्रियमाणा मतिः स्तुतिर्भवत्विति शेषः॥ हिरण्ययेत्यत्र सुपां सुलुगिति तृतीयैकवचनस्य यादेशः॥ किंच हे विप्रा प्राज्ञा इयं मे च स्तुतिर्मेधसातये यज्ञलाभाय च भवतु॥

॥ अथ तृचे तृतीया ऋङ्नवमी॥

ते स्याम देव वरुण ते मित्र सूरिभिः सह।

इषं स्वश्च धीमहि॥ ९

ते। स्याम। देव। वरुण। ते। मित्र। सूरिऽभिः। सह।
इषं। स्वऽरिति स्वः। च। धीमहि॥ ९

हे देव वरुण ते वयं तव स्तोतारः स्याम। सत्वा भवेम। न केवलं वयमेव यजमानाः किंतु सूरिभिः स्तोतृभिर्ऋत्विग्भिः सह। तथा हे मित्र देव ते वयं सूरिभिः सह स्याम। भवेम। किंचेममन्नं स्वरुदकं च धीमहि। धारयामहे॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

आश्विनशस्त्रे बह्वः सूरचक्षस इति प्रगाथः। सूत्रितं च। बह्वः सूरचक्षस इति प्रगाथः। ६. ५.। इति॥ दशरात्रे पंचमेऽहनि प्रउगशस्त्रेऽप्ययं प्रगाथः। सूत्रितं च। बह्वः सूरचक्षस इमा उ वां दिविष्टयः। आ० ७. १२.। इति॥

॥ सैषा प्रगाथे प्रथमा सूक्ते दशमी॥

बह्वः सूरचक्षसोऽग्निजिह्वा ऋतावृधः।

त्रीणि ये येमुर्विदथानि धीतिभिर्विश्वानि परिभूतिभिः॥ १०

बह्वः। सूरऽचक्षसः। अग्निऽजिह्वाः। ऋतऽवृधः।

त्रीणि। ये। येमुः। विदथानि। धीतिऽभिः। विश्वानि।

परिभूतिऽभिः॥ १०

बहवो महांतः सूरचक्षसः सूर्यसदृशप्रकाशाः। सूरः प्रकाशको येषामिति वा। अग्निजिह्वाः। अग्निरेव जिह्वादनसाधनो येषां तादृशाः। ऋतावृधो यज्ञस्य वर्धयितारो मित्रादयः। किंच ये त्रीणि विश्वानि व्याप्तानि विदथानि पृथिव्यादि-स्थानानि पृथिव्यादीनि परिभूतिभिः परिभावुकैर्धीतिभिः कर्मभिर्येमुः प्रयच्छंति ते तत्रायातेत्युत्तरत्र संबंधनीयं। अथवात्रैव ये त्रीणि स्थानानि प्रयच्छंति ते बहुत्वादिगुणोपेता आगच्छंत्वित्यध्याहार्यं॥

॥ इति पंचमस्य पंचमे नवमो वर्गः॥

॥ अथैकादशी॥

वि ये दधुः शरदं मासमादहर्यज्ञमक्तुं चादृचं।

अनाप्यं वरुणो मित्रो अर्यमा क्षत्रं राजान आशत॥ ११

वि। ये। दधुः। शरदं। मासं। आत्। अहः। यज्ञं।

अक्तुं। च। आत्। ऋचं॥

अनाप्यं। वरुणः। मित्रः। अर्यमा। क्षत्रं। राजानः।

आशत॥ ११

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ये मित्रादयः शरदं संवत्सरं विदधुः अकुर्वन् । आदनंतरमेव मासमनंतरमहर-नंतरमहःसाध्यं यज्ञं । आदनंतरमक्तुं रात्रिं च ऋचं मंत्रं च । यद्वा ऋचं स्तुत्यादित्य-यमपीत्यर्थं वसंते । तथा सति क्रमोऽप्यविरुद्धितः । ते वरुणो मित्रोऽर्यमा च क्षत्रोऽनाप्य-मन्यैरप्राप्तं क्षत्रं बलं राजानो राजमाना आशत । व्याप्नुवंतः ॥

॥ अथ द्वादशी ॥

तद्वो अद्य मनामहे सूक्तैः सूर उदिते ।

यदोहते वरुणो मित्रो अर्यमा यूयमृतस्य रथ्यः ॥ १२

तत् । वः । अद्य । मनामहे । सुऽउक्तैः । सूरे । उत्ऽइते ।

यत् । ओहते । वरुणः । मित्रः । अर्यमा । यूयं । ऋतस्य ।

रथ्यः ॥ १२

तत्तस्मिन्नद्यास्मिन्यागकाले वो युष्मान्मनामहे । याचामहे । कैः साधनैः । सूक्तैः । कस्मिन्काले । सूर उदिते । प्रातःकाल इत्यर्थः । यद्धनं हे ऋतस्योदकस्य रथ्यो नेतारो यूयं वरुणादय ओहते । यूयमित्यनेन सामानाधिकरण्यादोहत इत्यत्र पुरुषव्यत्ययः । ओहथ इत्यर्थः । तद्धनं मनामह इति ॥

॥ अथ त्रयोदशी ॥

ऋतावान ऋतजाता ऋतावृधो घोरासो अनृतद्विषः ।

तेषां वः सुम्ने सुच्छर्दिष्टमे नरः स्याम ये च सूरयः ॥ १३

ऋतऽवानः । ऋतऽजाताः । ऋतऽवृधः । घोरासः ।

अनृतऽद्विषः ।

तेषां । वः । सुम्ने । सुच्छर्दिःऽतमे । नरः । स्याम । ये ।

च । सूरयः ॥ १३

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

ये यूयमृतावान ऋतवंतो यज्ञवंत उदकवंतो वा ऋतजाताः। उक्त ऋतशब्दार्थः। तदर्थमुत्पन्नाः। अथवा ऋतात्प्रजापतेः सकाशादुत्पन्ना ऋतावृध ऋतार्थस्य ऋतस्य प्रवर्धितारो घोरासो घोरा अनृतद्विषोऽनृतस्य द्वेष्टारः तेषां वो युष्माकं छर्दिष्टमे सुखतमे सुम्ने धनेऽत्यंतरमणीये छर्दिषि गृहे सुखे वा ये वयं ये चान्ये सूरयः स्तोतारः ते सर्वे स्याम। भवेम॥

सोमातिरेके माध्यंदिनसवने नैमित्तिके शस्त्र उदु त्यदित्ययं प्रगाथोऽनुरूपः। सूत्रितं च। यद्यन्यां चापि सूर्योदु त्यद्दर्शतं वपुरिति प्रगाथौ स्तोत्रियानुरूपौ। आ० ६.७.। इति॥ चातुर्विंशिकेऽहनि माध्यंदिनसवनेऽयमेव वैकल्पिकः स्तोत्रियतृचः। सूत्रितं च। उदु त्यद्दर्शतं वपुरुदु त्ये मधुमत्तमाः। आ० ७.४.। इति॥

॥ सैषा सूक्ते चतुर्दशी॥

उदु त्यद्दर्शतं वपुर्दिव एति प्रतिह्वरे।
यदीमाशुर्वहति देव एतशो विश्वस्मै चक्षसे अरं॥ १४

उत्। ऊं इति। त्यत्। दर्शतं। वपुः। दिवः। एति। प्रतिऽह्वरे।
यत्। ईं। आशुः। वहति। देवः। एतशः। विश्वस्मै। चक्षसे। अरं॥ १४

त्यत्तद्दर्शतं दर्शनीयं वपुर्मंडलं दिवोंऽतरिक्षस्य प्रतिह्वरे समीप उदु एति। उदेति। उ इति पूरणः। यदीं यदेतन्मंडलमाशुः शीघ्रगाम्येतश एतवर्णोऽश्वो वहति धारयति। किमर्थं। विश्वस्मै सर्वस्मा अरं चक्षसे सम्यक् सर्वलोकदर्शनाय॥

॥ अथ प्रगाथे द्वितीया सूक्ते पंचदशी॥

शीर्ष्णःशीर्ष्णो जगतस्तस्थुषस्पतिं समया विश्वमा रजः।
सप्त स्वसारः सुविताय सूर्यं वहंति हरितो रथे॥ १५

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

शीर्ष्णःऽशीर्ष्णः । जगतः । तस्थुषः । पतिं । समया । विश्वं ।
आ । रजः ।
सप्त । स्वसारः । सुविताय । सूर्यं । वहंति । हरितः ।
रथे ॥ १५

शीर्ष्णः शीर्ष्णः सर्वस्यापि शिरसः ॥ तृतीयार्थे पंचमी ॥ सर्वशिरस्केत्यर्थः । सूर्यं वहंतीत्यनेन संबध्यते । अथवा शिरःशब्देन तत्स्थानपदवीं लक्षयति । श्रेष्ठतया तस्य प्राधान्यमुच्यते । सर्वस्य श्रेष्ठमित्यर्थः । जगतो जंगमस्य तस्थुषः स्थावरस्य पतिं स्वामिनं रथे वर्तमानं सूर्यं सुविताय कल्याणाय विश्वं रजः समया सर्वलोकस्य समीपे ॥ अभितः परितः समयेत्यादिना । पा० २. ३. २. १. । समयाशब्दयोगात् द्वितीया ॥ सप्त सप्तसंख्याकाः स्वसारोऽन्यनिरपेक्षेण स्वयमेव सरंत्यो हरितो हरितवर्णा अश्वा वहंति ॥

॥ इति पंचमस्य पंचमे दशमो वर्गः ॥

॥ तत्र षोडशी ॥

तच्चक्षुर्देवहितं शुक्रमुच्चरत् ।
पश्येम शरदः शतं जीवेम शरदः शतं ॥ १६

तत् । चक्षुः । देवऽहितं । शुक्रं । उत्ऽचरत् ।
पश्येम । शरदः । शतं । जीवेम । शरदः । शतं ॥ १६

तत्प्रसिद्धं चक्षुः सर्वस्य प्रकाशकं देवहितं देवानां हितं । तेषां चक्षुरिन्द्रियस्य तदधीनत्वात् । अथवा देवेन हितं शुक्रं निर्मलं सूर्यमंडलमुच्चरत् । उद्गच्छति । तच्छरदः शतं शतसंवत्सरं पश्येम । जीवेम शरदः शतं । पुनरुक्तिरादरार्था ॥

पृष्ठ्याभिप्लवषडहयोः सौर्यनिविद्धाने आद्यापि ताभ्येभिरह्नास्येति तृचः । ताभ्येभिरह्नास्येति तिसः । आ० ७. ५. । इति हि सूत्रितं ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ तृचे प्रथमा सूक्तौ सप्तदशी

काव्येभिरदाभ्या यातं वरुण द्युमत्।
मित्रश्च सोमपीतये॥ १७

काव्येभिः। अदाभ्या। आ। यातं। वरुण। द्युऽमत्।
मित्रः। च। सोमऽपीतये॥ १७

हे अदाभ्या अदंभनीयौ हे वरुण त्वं मित्रश्च द्युमत् द्युतिमंतौ युवां काव्येभि-रस्मत्कृतैः स्तोत्रैरायातं। किमर्थं। सोमपीतये। सोमपानाय॥

॥ तृचे द्वितीया सूक्तेऽष्टादशी॥

दिवो धामभिर्वरुण मित्रश्चा यातमद्रुहा।
पिबतं सोममातुजी॥ १८

दिवः। धामऽभिः। वरुण। मित्रः। च। आ। यातं। अद्रुहा।
पिबतं। सोमं। आतुजी इत्याऽतुजी॥ १८

हे वरुण त्वं मित्रश्चाद्रुहाद्रोग्धारौ युवां दिवो द्युलोकसंबंधिभ्यो धामभिर्धा-मभ्यः स्थानेभ्यः॥ पंचम्यर्थे तृतीया॥ अथवा धामभिस्तेजोभिर्विभूतिभिः सार्ध-मायातं। अस्मद्यज्ञमागच्छतं। आगत्य चातुजी शत्रूणां सर्वतो हिंसकावादातारौ वा धनानां। एवंरूपौ संतौ सोमं पिबतं॥ तुजि पिजि हिंसाबलादाननिके-तनेष्वत्र हिंसायामादाने वा वर्तते॥

॥ तृचे तृतीया सूक्त एकोनविंशी॥

आ यातं मित्रावरुणा जुषाणावाहुतिं नरा।
पातं सोममृतावृधा॥ १९

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

आ । यातं । मित्रावरुणा । सुऽशस्ती । आऽहुतिं । नरा ।
पातं । सोमं । ऋतऽवृधा ॥ १८

हे मित्रावरुणा मित्रावरुणौ हे नरा नायकौ नेतारावाहुतिं सोमलक्षणां सुशस्ती प्रियशस्ती संतावायातं । आगच्छतं यज्ञं । आगत्य च हे ऋतावृधा यज्ञस्य वर्धकौ युवां सोमं पातं । पिबतं ॥

॥ इति पंचमस्य पंचम एकादशो वर्गः ॥

प्रति वां रथमिति दशर्चं द्वादशं सूक्तं । प्रति वां दशाश्विनं तु तदित्यनुक्रमणिका । ऋषिश्चात्रिः । छंदस्त्रिष्टुप् । तुह्यादिपरिभाषयैतदादीन्यष्ट सूक्तान्यश्विदेवत्यानि ॥ प्रातरनुवाक आश्विने क्रतौ त्रैष्टुभे छंदस्येतदादिसूक्तसप्तकं द्वितीयवर्जं चंसं । तथा च सूत्रं । प्रति वां रथमिति सप्तानां द्वितीयमुद्धरेत् । आ० ४, १५. । इति ॥

॥ तत्र प्रथमा ॥

प्रति वां रथं नृपती जरध्यै हविष्मता मनसा यज्ञियेन ।
यो वां दूतो न धिष्ण्यावजीगरच्छा सूनुर्न पितरा विवक्मि ॥ १

प्रति । वां । रथं । नृपती इति नृऽपती । जरध्यै । हविष्मता ।
मनसा । यज्ञियेन ।
यः । वां । दूतः । न । धिष्ण्यौ । अजीगः । अच्छ । सूनुः ।
न । पितरा । विवक्मि ॥ १

हे नृपती नृणामृत्विग्यजमानानां स्वामिनावश्विनौ वां युवयो रथं जरध्यै । जरा स्तुतिः । स्तोतुं प्रतिगच्छामीति शेषः । केन साधनेनेति तदुच्यते । हविष्मता हविर्युक्तेन यज्ञियेन यज्ञार्हेण मनसा स्तोत्रेण । यो रथो वां हे धिष्ण्यौ धिषणार्हौ । धिषणा स्तुतिः । वां युवां दूतो न दूत इवाजीगजागरयति प्रबोधयति अच्छगति गंतुं तं रथमच्छा विवक्मि । आवपामि । प्रबोधने दृष्टांतः । सूनुर्न पितरा

पुत्रो मातापितराविव। अथवात्र यो रथो युवाभ्यां योग्यः तेन रथेन गंतुं युवामागो युवामच्छा विवक्मीति वा योज्यं॥

॥ अथ द्वितीयां॥

अबोध्यग्निः समिधानो अस्मे उपो अदृश्रन्तमसश्चिदंताः।

अचेति केतुरुषसः पुरस्ताच्छ्रिये दिवो दुहितुर्जायमानः॥ २

अबोधि। अग्निः। सम्ऽइधान। अस्मे इति। उपो इति।

अदृश्रन्। तमसः। चित्। अंताः।

अचेति। केतुः। उषसः। पुरस्तात्। श्रिये। दिवः। दुहितुः।

जायमानः॥ २

अस्मे अस्माभिः समिधानः समिध्यमानः सन् अग्निरबोधि। दीप्यते। तमसश्चित् तमसोऽप्यंताः पर्यंताः प्रदेशा उपो अदृश्रन्। उपदृश्यंते सर्वैः। केतुः सर्वस्य प्रज्ञापकः सूर्यो दिवो दुहितुरुषसः पुरस्तात्पूर्वस्यां दिशि श्रिये शोभायै जायमानः सन् अचेति। ज्ञायते। यस्मादेवं तस्माद्युवयोरागमनसमयः। अत आगच्छत-मिति शेषः॥

॥ अथ तृतीया।

अभि वां नूनमश्विना सुहोता स्तोमैः सिषक्ति नासत्या

विवक्वान्।

पूर्वीभिर्यातं पथ्याभिरर्वाक्स्वर्विदा वसुमता रथेन॥ ३

अभि। वां। नूनं। अश्विना। सुऽहोता। स्तोमैः। सिसक्ति।

नासत्या। विवक्वान्।

पूर्वीभिः। यातं। पथ्याभिः। अर्वाक्। स्वःऽविदा।

वसुऽमता। रथेन॥ ३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे अश्विना वां युवां सुहोता सुष्ठु देवानां होता विप्रज्ञान् स्तुतीनां वक्ताऽहं हे नासत्या सत्यभूतौ। इदमश्विनावित्यत्र योज्यं। स्तोमैः सिषक्ति। सेवते। अतोऽर्वागस्मदभिमुखं पूर्वीभिः पथ्याभिः पूर्वं सुखैर्मार्गैः स्वर्विदा स्वर्गमुदकं वा जानता अश्ववता वा वसुमता धनवता वा रथेन यातं। गच्छतं॥

॥ अथ चतुर्थी ॥

अवोर्वां नूनमश्विना युवाकुर्हुवे यद्वां सुते माध्वी वसूयुः।
आ वां वहंतु स्थविरासो अश्वाः पिबाथो अस्मे सुषुता
मधूनि ॥ ४

अवोः। वां। नूनं। अश्विना। युवाकुः। हुवे। यत्। वां।
सुते। माध्वी इति। वसुऽयुः॥
आ। वां। वहंतु। स्थविरासः। अश्वाः। पिबाथः।
अस्मे इति। सुऽसुता। मधूनि॥ ४

हे अश्विनावश्विनौ यो रक्षित्रोर्युवाभ्यां युवाकुर्युवां कामयमानोऽहं नूनमद्य समूतो भवामीति शेषः। यद्यस्मात् हे माध्वी मधुरस्य सोमस्यार्थौ मधुविद्या-संबंधिनौ वा वां युवां सुतेऽभिषुते सोमे वसूयुर्धनकामो हुवे स्तौमि अतो वां स्वभूतः। वां युष्मानावहंतु। के। स्थविरासः स्थूलाः प्रवृद्धा अश्वाः। एतयोरति-प्रवृद्धत्वात् शीघ्रगतेरपेक्षितत्वाच्च स्थविरैरेव भाव्यं। आगमनानंतरमस्मे अस्माभिः सुषुता सुष्ठ्वभिषुतानि मधूनि मधुररसान् पिबाथः। पिबतं॥

॥ अथ पंचमी ॥

प्राचीमु देवाश्विना धियं मेऽमृध्रां सातये कृतं वसूयुं।
विश्वा अविष्टं वाज आ पुरंधीस्ता नः शक्तं शचीपती
शचीभिः ॥ ५

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्राचीं। ऊं इति। देवा। अश्विना। धियं। मे। अमृध्रां।
सातयें। कृतं। वसुऽयुं।
विश्वाः। अविष्टं। वाजें। आ। पुरंऽधीः। ता। नः।
शक्तं। शचीपती इति शचीऽपती। शचीभिः॥ ५

हे अश्विनाश्विनौ देवा देवौ युवां प्राचीं प्रत्यगभिमुखीममृध्रामहिंसितां वसूयुं धनमिच्छंतीं मे मम धियं बुद्धिं स्तुतिं कर्म वा सातये लाभायोचितां कृतं। कुरुतं। किंच वाजे वा संग्रामेऽपि विश्वाः पुरंधीरस्मदीया बुद्धीरविष्टं। रक्षतं। हे शचीपती। शचीति कर्मनाम। कर्मणां पालकौ ता तौ युवां शचीभिरस्मदीयैः स्तुत्यादिरूपैः कर्मभिर्नोऽस्माञ्छक्तं। प्रयच्छतं धनमिति शेषः॥

॥ इति पंचमस्य पंचमे द्वादशो वर्गः॥

॥ अथ षष्ठी॥

अविष्टं धीष्व॑श्विना न आसु प्रजावद्रेतो अह्र॑यं नो अस्तु।
आ वां तोके तन॑ये तूतु॑जानाः सुरत्ना॑सो देववी॑तिं गमेम॥ ६

अविष्टं। धीषु। अश्विना। नः। आसु। प्रजाऽवत्। रेतः।
अह्र॑यं। नः। अस्तु।
आ। वां। तोके। तन॑ये। तूतु॑जानाः। सुऽरत्ना॑सः।
देवऽवीतिं। गमेम॥ ६

हे अश्विनाश्विनौ नोऽस्माकमासु धीष्वेषु कर्मस्वविष्टं। रक्षतं। नोऽस्माकमह्रयमलज्जनीयं प्रजावत्पुत्राद्युपेतं पुत्रोत्पादनसमर्थं रेतोऽस्तु। वां युवयोरनुग्रहात् लब्धे तोके पुत्रे तनये तत्पुत्रादौ च तूतुजाना अभिमतं धनं प्रयच्छंतः सुरत्नासः शोभनधनाश्च संतो देववीतिं देवानां वीतिः प्राप्तिर्यस्मिन् तादृशं यज्ञमागमेम। आगच्छेम॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ सप्तमी ॥

एष स्य वां पूर्वगत्वेव सख्ये निधिर्हितो माध्वी रातो अस्मे ।
अहेड़ता मनसा यातमर्वागश्नंता हव्यं मानुषीषु विक्षु ॥ ७

एषः । स्यः । वां । पूर्वगत्वाऽइव । सख्ये । निऽधिः । हितः ।
माध्वी इति । रातः । अस्मे इति ।
अहेड़ता । मनसा । आ । यातं । अर्वाक् । अश्नंता । हव्यं ।
मानुषीषु । विक्षु ॥ ७

एष पुरतो दीयमानः स्य स युवयोः प्रियत्वेन प्रसिद्धः सोमो हे माध्वी मधुप्रियावश्विनौ वां युवयोः पुरतो निधिर्निधिस्थानीयो हितः स्थापितोऽस्मे अस्माभी रातो दत्तः संकल्पितः संनिहितः । किमिव । सख्ये सख्यार्थं पूर्वगत्वेव पुरतो गंता दूत इव । स यथा प्रियं जनयन् स्वामिनः पुरतो वर्तते तद्वदित्यर्थः । यस्मादेवं तस्मादहेडंताक्रुध्यता मनसानुग्रहयुक्तेन चेतसार्वागस्मदभिमुखमायातं । आगच्छतं । अश्नंता हव्यं हविः सोमादिकमश्नंतावश्नुवंतौ । कुत्र । मानुषीषु विक्षु मनुष्यरूपासु प्रजासु वर्तमानं ॥

॥ अथाष्टमी ॥

एकस्मिन्योगे भुरणा समाने परि वां सप्त स्रवतो रथो गात् ।
न वायंति सुभ्वो देवयुक्ता ये वां धूर्षु तरणयो वहंति ॥ ८

एकस्मिन् । योगे । भुरणा । समाने । परि । वां । सप्त ।
स्रवतः । रथः । गात् ।
न । वायंति । सुऽभ्वः । देवऽयुक्ताः । ये । वां । धूःऽसु ।
तरणयः । वहंति ॥ ८

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे अश्विना सर्वस्य भर्तारौ युवयोरेकस्मिन् समान उभयसाधारणे येगेऽस्मद्विषये सति वां युवयो रथः सप्त स्रवतः सर्पणस्वभावाः सप्तसंख्याका वा गंगाद्याः परिगात् । परिगच्छति । शीघ्रमागच्छतीत्यर्थः । तद्रथ्याश्वाः सुभ्वः सुभवना देवयुक्ता देवाभ्यां युवाभ्यां युक्ता अश्वा शीघ्रगमने न वायंति । न शुष्यंति । न श्राम्यंते । येऽश्वा वां धूर्षु रथस्य नरथयस्तारकाः शीघ्रगंतारो वर्तंति युवां ते न वायंतीति ॥

॥ अथ नवमी ॥

असश्चता मघवद्भ्यो हि भूतं ये राया मघदेयं जुनंति

प्र ये बंधुं सूनृताभिस्तिरंते गव्या पृंचंतो अश्व्या मघानि ॥ ९

असश्चता । मघवत्ऽभ्यः । हि । भूतं । ये । राया ।

मघऽदेयं । जुनंति ।

प्र । ये । बंधुं । सूनृताभिः । तिरंते । गव्या । पृंचंतः ।

अश्व्या । मघानि ॥ ९

असश्चता शत्राप्यसज्यमानौ युवां मघवद्भ्यो धनवद्भ्यो हविष्मद्भ्यो यजमानेभ्यस्तेषामर्थाय भूतं हि । भवतं । तेभ्य एवानुरक्तौ भवतं । अनुग्राह्या एव विशेष्यंते । ये राया धनेन निमित्तेन राया युक्ता वा मघदेयं दातव्यं मघं धनं हविर्लक्षणं वा जुनंति प्रेरयंति यच्छंति । ये च बंधुं । स्नेहेन बध्नातीति बंधुः । तं स्वसंबंधिनं । अथवा फलेन बध्नातीति बंधुरध्वर्य्वादिः । तं सूनृताभिः प्रियसत्यात्मिकाभिर्वाग्भिः प्रतिरंते प्रवर्धयंति । प्रपूर्वस्तिरतिर्वर्धनार्थः । किं कुर्वंतः । गव्या गोरूपाण्यश्व्याश्वरूपाणि च मघानि धनानि पृंचंतोऽर्थिभ्यः प्रयच्छंतः तेभ्यो मघवद्भ्यो भूतमिति ॥

॥ अथ दशमी ॥

नू मे हवमा शृणुतं युवाना यासिष्टं वर्तिरश्विनाविरावत् ।

धत्तं रत्नानि जरतं च सूरीन्यूयं पात स्वस्तिभिः सदा नः ॥ १०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

नु । मे । हवं । आ । शृणुतं । युवाना । यासिष्टं । वर्तिः ।
अश्विनौ । इराऽवत् ।
धत्तं । रत्नानि । जरतं । च । सूरीन् । यूयं । पात ।
स्वस्तिऽभिः । सदा । नः ॥ १०

हे युवाना नित्यतरुणौ हे अश्विनौ युवां मे मम हवमाह्वानं स्तुतिं वा आ शृणुतं । श्रुत्वा च हे अश्विनाविरावत् अन्नयुक्तं वर्तिर्गृहं यासिष्टं । आगच्छतं । आगत्य च रत्नानि रमणीयानि धनानि धत्तं । दत्तं । सूरीन् स्तोतॄञ्जरतं । स्तुवतं ॥ धातूनामनेकार्थत्वात् ॥ शिष्टं स्पष्टं ॥

॥ इति पंचमस्य पंचमे त्रयोदशो वर्गः ॥

आ शुभ्रा यातमिति नवर्चं त्रयोदशं सूक्तं वसिष्ठस्यार्षमाश्विनं । आदितः सप्त विराजोऽन्त्यौ द्वौ त्रिष्टुभौ । अनुक्रान्तं च । आ शुभ्रा नव सप्ताद्या विराज इति ॥ सूक्तविनियोगो लैंगिकः ॥

॥ तत्र प्रथमा ॥

आ शुभ्रा यातमश्विना स्वश्वा गिरो दस्रा जुजुषाणा युवाकोः ।
हव्यानि च प्रतिभृता वीतं नः ॥ १

आ । शुभ्रा । यातं । अश्विना । सुऽअश्वा । गिरः । दस्रा ।
जुजुषाणा । युवाकोः ।
हव्यानि । च । प्रतिऽभृता । वीतं । नः ॥ १

हे शुभ्रा दीप्तौ स्वश्वा शोभनाश्वौ हे अश्विनावश्विनावायातं । अस्मद्यज्ञमागच्छतं । दस्रा शत्रूणामुपक्षपयितारौ युवां युवाकोर्युवां कामयमानस्य मम गिरः स्तुतीर्जुजुषाणा सेवमानौ भवतमिति शेषः । न केवलं स्तुतिं किंतु नोऽस्मदीयानि प्रतिभृता संभृतानि हव्यानि हवींषि च वीतं । भक्षयतं ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

प्र वामंधांसीत्येषाश्विनयस्त्रयाज्या । सूत्रितं च । प्र वामंधांसि मद्यान्यस्थुरुभा पिबतमश्विना । आ० ६. ५. । इति ॥

॥ सैषा द्वितीया ॥

प्र वामंधांसि मद्यान्यस्थुररं गंतं हविषो वीतये मे ।
तिरो अर्यो हवनानि श्रुतं नः ॥ २

प्र । वां । अंधांसि । मद्यानि । अस्थुः । अरं । गंतं ।
हविषः । वीतये । मे ।
तिरः । अर्यः । हवनानि । श्रुतं । नः ॥ २

हे अश्विनौ वां युवाभ्यां मद्यानि मदजनकान्यंधांसि सोमलक्षणान्यन्नानि प्रास्थुः । प्रास्थिषत । स्वीकारार्थमुद्यतानीत्यर्थः । अतो युवां मे मम हविषो वीतये पानायारमलमर्थं शीघ्रं गंतं । आगच्छतं । अर्यो ऽरेरस्मद्विरोधिनो हवनानि तिरस्तिरस्कृत्य नोऽस्मदाह्वानमित्यर्थः । तच्छ्रुतं । शृणुतं ॥ श्रुतमित्यस्य पादादित्वादनिघातः ॥

॥ अथ तृतीया ॥

प्र वां रथो मनोजवा इयर्ति तिरो रजांस्यश्विना शतोतिः ।
अस्मभ्यं सूर्यावसू इयानः ॥ ३

प्र । वां । रथः । मनःऽजवाः । इयर्ति । तिरः । रजांसि ।
अश्विना । शतऽऊतिः ।
अस्मभ्यं । सूर्यावसू इति । इयानः ॥ ३

हे सूर्यावसू सूर्यावाः सह रथे वसंतौ वां युवयो रथोऽस्मभ्यमस्मदर्थमियानो याच्यमानः सन् इयर्ति । आगच्छत्वित्यर्थः । यद्वा वां प्रेरयति गमनाय । कीदृशो रथः । मनोजवा मनोवेगः शतोतिरपरिमितरक्षाविषयरक्षणः । किं कुर्वन् । रजांसि लोकान् तिरस्तिरस्कृत्यातिक्रम्य यातीति ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ चतुर्थी ॥

अयं ह यद्वां देवया उ अद्रिरूर्ध्वो विवक्ति सोमसुद्युवभ्यां ।

आ वल्गू विप्रो ववृतीत हव्यैः ॥ ४

अयं । ह । यत् । वां । देवऽयाः । ऊं इति । अद्रिः । ऊर्ध्वः ।

विवक्ति । सोमऽसुत् । युवऽभ्यां ।

आ । वल्गू इति विप्रः । ववृतीत । हव्यैः ॥ ४

यद्यदा वां युवां प्रति देवया देवौ युवां कामयमानः । उ इति पूरणः । अयमद्रिरभिषवग्रावा सोमसुत् सोममभिषुण्वन् युवाभ्यां । युवाभ्यामर्थायाभिषुण्वन्निति संबंधः एवं कुर्वन् ऊर्ध्व उन्नतः सन् विवक्ति शब्दैः शब्दयति तदानीं वल्गू सुंदरौ युवां विप्रो मेधावी यजमानो हव्यैर्हविर्भिराववृतीत । आवर्तयति ॥

॥ अथ पंचमी ॥

चित्रं ह यद्वां भोजनं न्वस्ति न्यत्रये महिष्वंतं युयोतं ।

यो वामोमानं दधते प्रियः सन् ॥ ५

चित्रं । ह । यत् । वां । भोजनं । नु । अस्ति । नि । अत्रये ।

महिष्वंतं । युयोतं ।

यः । वां । ओमानं । दधते । प्रियः । सन् ॥ ५

हे अश्विनौ वां युवयोश्चित्रं चायनीयं यद्भोजनं धनमस्ति ह अस्ति खलु । न्विति पूरणः । तदस्मभ्यं दत्तमित्यर्थः । अथ तयोः स्तुतिः । अत्रय एतन्नामकाय मंत्रस्यर्षये चतुर्थी ॥ तस्मा अभिध्वंसनशीलं नियुयोतं । पृथक्कुरुतं । योऽत्रिः प्रियः सन् स्तोत्रवाक्युवाभ्यां प्रियभूतः सन् युवाभ्यामेव कृतमोमानं रक्षणं सुखं दधते धारयति ॥

॥ इति पंचमस्य पंचमे चतुर्दशो वर्गः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ षष्ठी ॥

उत त्यद्वां जुरते अश्विना भूच्च्यवानाय प्रतीत्यं हविर्दे।
अधि यद्वर्प इतऊति धत्थः ॥ ६

उत। त्यत्। वां। जुरते। अश्विना। भूत्। च्यवानाय।
प्रतीत्यं। हविःऽदे।
अधि। यत्। वर्पः। इतःऽऊति। धत्थः ॥ ६

उतापि च हे अश्विनाश्विनौ वां युवयोः सत्कं जूर्यते जुरते जूर्णाय हविर्दे हविर्दात्रे च्यवानायैतन्नामकाय ऋषये त्यत्तत्प्रतीत्यं प्रतिगमनं तस्य रूपस्य प्रत्यासु भूत्। अभूत्। किं तदिति। यद्वर्पो रूपमितऊती इतोगमनार्थं यूयो युवामादितःप्राप्ति-रूपमधिधत्थः अध्यधत्तं। युवं च्यवानमश्विना जरन्तं पुनर्युवानं चक्रथुः शचीभिः। ऋग्वे० १, ११७, १३, । इत्यादिषु च्यवानस्य युवत्वोत्पत्तिकरणं प्रसिद्धं॥

॥ अथ सप्तमी ॥

उत त्यं भुज्युमश्विना सखायो मध्ये जहुर्दुरेवासः समुद्रे।
निरीं पर्षदरावा यो युवाकुः ॥ ७

उत। त्यं। भुज्युं। अश्विना। सखायः। मध्ये। जहुः।
दुःऽएवासः। समुद्रे।
निः। ईं। पर्षत्। अरावा। यः। युवाकुः। ॥ ७

उतापि च त्वं तं भुज्युमेतन्नामानं समुद्रे मध्ये समुद्रोदकस्य मध्ये सखायो भुज्यु-सम्बन्धिभूता दुरेवासो दुष्टगमना जहुः। त्यक्तवन्तः। ईमेनं समुद्रमध्ये स्थितं निः पर्षत्। निरपारयत्। यो भुज्युर्युवाकुर्युवां कामयिताऽरावारवानयिगंता च तमेनं निर-पारयतं। अत्राश्विनेषु सूक्तेषु कथाः सूच्यन्ते। अश्विभुज्य्वादीनामश्विजलादिभ्यो रक्षणरूपाश्च ताः कथा महता प्रपंचेनाकाभिनोक्ताभ्यां वर्णितः। ऋग्वे० १, ११६, १, । इत्यत्र प्रपंचिताः ताश्च द्रष्टव्याः॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथाष्टमी ॥

वृकाय चिज्जसमानाय शक्तमुत श्रुतं शयवे हूयमाना

यावघ्न्यामपिन्वतमपो न स्तर्यं चिच्छक्त्यश्विना शचीभिः ॥ ८

वृकाय। चित्। जसमानाय। शक्तं। उत। श्रुतं। शयवे।
हूयमाना।
यौ। अघ्न्यां। अपिन्वतं। अपः। न। स्तर्यं। चित्। शक्ती।
अश्विना। शचीभिः ॥ ८

वृकाय धनादाने अभिद्रवत इत्यर्थः। चिदिति पूरणः। अथवा परेभ्यो धनानि प्रयच्छते। यद्वा वृकाय वृकवद्धिंसकायैतन्नामकाय जसमानाय कर्मभिरुपक्षीयमाणाय ऋषये शक्तं। अभिमतं धनमदत्तं॥ शकेर्दानार्थस्य लुङ्ग्रूपं। बहुभावयांदशः॥ उतापि च शयवे एतन्नामकाय ऋषये हूयमानाह्वयमानौ युवां श्रुतं। अशृणुतं। यौ युवामघ्न्यां गामपिन्वतं अपूरयतं क्षीरेण। अपो न अद्भिरिव नदीं। तां यथोदकेन पूरयतस्तद्वत्। कीदृशीमघ्न्यां। स्तर्यं चित् स्तरीमपि निवृत्तप्रसवां वन्ध्यामपि शक्ती शक्त्या सामर्थ्येन दोहनलक्षणेन युक्तां कृत्वा शचीभिः प्रदीप्तैः कर्मभिर्हे अश्विनाविति शयवे चिन्नासत्या शचीभिर्जसुरये स्तर्यं पिप्यथुर्गां। ऋग्वे० १. ११६. २२. इत्यादि द्रष्टव्यं॥

॥ अथ नवमी ॥

एष स्य कारुर्जरते सूक्तैरग्रे बुधान उषसां सुमन्मा।

इषा तं वर्धदघ्न्या पयोभिर्यूयं पात स्वस्तिभिः सदा नः ॥ ९

एषः। स्यः। कारुः। जरते। सुऽउक्तैः। अग्रे। बुधानः।
उषसां। सुऽमन्मा।
इषा। तं। वर्धत्। अघ्न्या। पयःऽभिः। यूयं। पात।
स्वस्तिऽभिः। सदा। नः। ९

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एष स्तोता स्म स प्रसिद्धो वसिष्ठ ऋषिः स्तोतोषसामध्ये प्रातःसवने सुषानो सुष्य-माणः सुमखा शोभनमतिः सुष्टुतिभिः सूक्तैरीट्टे । स्तौति । लिंगव्यत्ययेन वर्धंतु । वर्धयतं ॥ वचनव्यत्ययः ॥ अघ्न्या अहंतव्या गौश्च वर्धंतु । वर्धयतु । अथवैकवचनं वाक्यं । अघ्न्या गौर्वसिष्ठस्य प्रतिनियताग्निहोत्रार्था गौरित्याशयेन । एतादिनेत्यर्थः । पयोभिश्च तं वसिष्ठं वर्धंतु । वर्धयतु । एवमात्मानं परोक्षेण निर्दिशेय । शिष्टं स्पष्टं ॥

॥ इति पंचमस्य पंचमे पंचदशो वर्गः ॥

आ वां रथ इत्यष्टर्चं चतुर्दशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाश्विनं । अनुक्रम्यते च । आ वां रथोऽष्टाविति ॥ प्रातरनुवाकाश्विनशस्त्रयोर्विनियोग उक्तः ॥

॥ तत्र प्रथमा ॥

आ वां रथो रोदसी बद्बधानो हिरण्ययो वृषभिर्यात्वश्वैः ।
घृतवर्तनिः पविभी रुचान इषां वोळ्हा नृपतिर्वाजिनीवान् ॥ १

आ । वां । रथः । रोदसी इति । बद्बधानः । हिरण्ययः ।
वृषऽभिः । यातु । अश्वैः ।
घृतऽवर्तनिः । पविऽभिः । रुचानः । इषां । वोळ्हा ।
नृऽपतिः । वाजिनीऽवान् ॥ १

हे अश्विनौ वां रथो वृषभिर्युवभिरश्वैर्युक्तः सन्नायातु यज्ञमस्मदीयं । कीदृशो रथः । रथो विशेष्यते । रोदसी द्यावापृथिव्यौ बद्बधानो बाधमानो हिरण्ययो हिरण्मयो घृतवर्तनिर्घृतमुदकं वर्तन्यां यस्य तादृशः पविभी रथनेमिभिर्मधुभाद्भिर्वा रुचानो दीप्यमान इषां वोळ्हा यजमानैर्दत्तानां हविषां वाहको दातव्यानां वान्नानां वोळ्हा नृपतिर्नृणां यजमानानां स्वामी वाजिनीवानन्नवान् ॥

॥ अथ द्वितीया ॥

स पप्रथानो अभि पंच भूमा त्रिवंधुरो मनसा यातु युक्तः ।
विशो येन गच्छथो देवयंतीः कुत्रा चिद्याममश्विना दधाना ॥ २

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सः । पप्रथानः । अभि । पंच । भूम । त्रिऽवंधुरः । मनसा ।
आ । यातु । युक्तः ।
विशः । येन । गच्छथः । देवऽयंतीः । कुत्र । चित् । यामं ।
अश्विना । दधाना ॥ २

स रथः पंच भूम भूमानि सर्वप्राणिनः पप्रथानः प्रथमानस्त्रिवंधुरः । वंधुरस्त्रावर्य सारथ्यवस्थानं काष्ठमयं । तादृशैस्त्रिभिर्युक्तो मनसा मनस्तुल्या युक्तोऽभ्यायातु येन रथेन देवयंतीर्विशो यजमानान्प्रति गच्छथः । हे अश्विनाश्विनौ कुत्र चित् यत्र क्वापि यामं गमनं दधाना धारयंतौ येन विशो गच्छथः स यात्विति ॥

। अथ तृतीया ।

स्वश्वा यशसा यातमर्वाग्दस्रा निधिं मधुमंतं पिबाथः ।
वि वां रथो वध्वा३ यादमानोऽन्तान्दिवो बाधते वर्तनिभ्यां ॥ ३

सुऽअश्वा । यशसा । आ । यातं । अर्वाक् । दस्रा । निऽधिं ।
मधुऽमंतं । पिबाथः ।
वि । वां । रथः । वध्वा । यादमानः । अंतान् । दिवः ।
बाधते । वर्तनिऽभ्यां ॥ ३

हे देवौ स्वश्वा शोभनाश्वेन यशसा यावीगर्वादभिमुखं यातं । आगच्छतं । हे दस्रौ शत्रूणामुपक्षपयितारौ मधुमंतं मधुररसोपेतं निधिं निधिवच्छिद्रितं सोमं पिबाथः । पिबतं । वां युवयो रथो वध्वा सूर्यया सह यादमानो गंतव्यान्प्रति गच्छन् । गमयन्नित्यर्थः । एवं कुर्वन् वर्तनिभ्यां स्वचक्राभ्यां दिवोऽंतान् पर्यंतप्रदेशान् बाधते । शीघ्रगमनेन पीडयति ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ चतुर्थी ॥

युवोः श्रियं परि योषावृणीत सूरो दुहिता परितक्म्यायां।

यद्देवयंतमवथः शचीभिः परि घ्रंसमोमना वां वयो गात् ॥ ४

युवोः। श्रियं। परि। योषा। अवृणीत। सूरः। दुहिता।

परिऽतक्म्यायां।

यत्। देवऽयंतं। अवथः। शचीभिः। परि। घ्रंसं। ओमना।

वां। वयः। गात् ॥ ४

युवोर्युवयोः श्रियं श्रयत इति श्री रथः। तं सेवमानेव या योषा सर्वदा निश्रयंती योषित् सूरः सूर्यस्य दुहिता पर्यवृणीत। कदा। परितक्म्यायां रात्रौ परितस्तक-नवति संग्रामे यत्ते वा गंतव्ये। किंच। यद्यदा देवयंतं देवकामं यजमानं यद्वा शचीभिर्युवयोर्गमनादिलक्षणैः कर्मभिरवथः रक्षथः तदानीं घ्रंसं दीप्तं वयोऽन्नं सोमादिलक्षणमोमनाखनेन रक्षणेन निमित्तेन वां परिगात्। पर्यगात् ॥

॥ अथ पंचमी ॥

यो ह स्य वां रथिरा वस्त उस्रा रथो युजानः परियाति वर्तिः।

तेन नः शं योरुषसो व्युष्टौ न्यश्विना वहतं यज्ञे अस्मिन् ॥ ५

यः। ह। स्यः। वां। रथिरा। वस्ते। उस्राः। रथः।

युजानः। परिऽयाति। वर्तिः।

तेन। नः। शं। योः। उषसः। विऽउष्टौ। नि। अश्विना।

वहतं। यज्ञे। अस्मिन् ॥ ५

यो रथः। हेति पूरणः। स्य स प्रसिद्धो रथो हे रथिरा रथिनौ। मत्वर्थीयो रः। उस्रा उस्राः तेजांसि वस्ते आच्छादयति। यश्च रथो युजानोऽश्वैर्युज्यमानः सन् वर्तिनीं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यजमानस्य स्वं मा परियाति परिगच्छति तेन रथेन हे अश्विनाश्विनौ नोऽस्माक-मपिन्वत उषसो व्युष्टौ प्रातःकालेऽर्थं यजनाय पापानां वीतिं क्षयाय च युवानां नि वहतं। नितरां प्राप्नुतं ॥

॥ अथ षष्ठी ॥

नरा गौरेव विद्युतं तृषाणास्माकमद्य सवनोप यातं ।

पुरुत्रा हि वां मतिभिर्हवन्ते मा वामन्ये नि यमन्देवयन्तः ॥ ६

नरा । गौराऽइव । विऽद्युतं । तृषाणा । अस्माकं । अद्य । सवना । उप । यातं ।

पुरुऽत्रा । हि । वां । मतिभिः । हवन्ते । मा । वां । अन्ये । नि । यमन् । देवऽयन्तः ॥ ६

हे नरा नेतारावश्विनौ गौरेव गौरा मृगीव विद्युतं विशेषेण दीप्यमानं सोमं प्रति तृषाणा तृष्यन्तावस्माकं सवना सवनान्युपयातं । उपागच्छतं । पुरुत्रा बहुषु यज्ञेषु वां युवां यजमाना मतिभिः स्तुतिभिर्हवन्ते हि । स्तुवन्ति । अतो वां युवामन्ये अपरे देवयन्तो देवौ कामयमाना वां युवां मा नियमन् । मा नियच्छन्तु ॥

॥ अथ सप्तमी ॥

युवं भुज्युमवविद्धं समुद्र उदूहथुरर्णसो अस्निधानैः ।

पतत्रिभिरश्रमैरव्यथिभिर्दंसनाभिरश्विना पारयन्ता ॥ ७

युवं । भुज्युं । अवऽविद्धं । समुद्रे । उत् । ऊहथुः । अर्णसः । अस्निधानैः ।

पतत्रिऽभिः । अश्रमैः । अव्यथिऽभिः । दंसनाभिः । अश्विना । पारयन्ता ॥ ७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे अश्विनाश्विनौ युवं भुज्युमेतन्नामकमपिदं विक्षिप्तं सखिभिः समुद्रे तन्मध्ये निमग्नमपि च समुद्रादुदूहथुः। किं कुर्वंताविति तदुच्यते। अतिव्रजद्भिरत्यंतं गच्छद्भिर श्वैरव्यथिभिश्च पतत्रिभिः पतनवद्भिर्गमनवद्भी रथे नियुक्तैरश्वैर्दंसनाभिः शारीरैः कर्मभिश्च पारयंता पारयंतौ समुद्रमपि च ऊहथुरिति। नासत्या भुज्युमूहथुः पतंगैः। ऋग्वे० १.११६.४.। इति सूक्तं॥

॥ अथाष्टमी॥

नू मे हवमा शृणुतं युवाना यासिष्टं वर्तिरश्विनाविरावत्।
धत्तं रत्नानि जरतं च सूरीन्यूयं पात स्वस्तिभिः सदा नः॥ ८

नु। मे। हवं। आ। शृणुतं। युवाना। यासिष्टं। वर्तिः।
अश्विनौ। इराऽवत्।
धत्तं। रत्नानि। जरतं। च। सूरीन्। यूयं। पात।
स्वस्तिऽभिः। सदा। नः॥ ८

नू मे हवमित्यष्टमी विधा॥

॥ इति पंचमस्य पंचमे षोडशो वर्गः॥

आ विश्ववारेति सप्तर्चं पंचदशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाश्विनं। अनुक्रम्यते च। आ विश्ववारा सप्तेति॥ प्रातरनुवाक आश्विनशस्त्रे च विनियोग उक्तः॥ आश्वलायनसूत्रोक्ते छंदोमे प्रउगशस्त्रे विनियुक्तः। आ विश्ववाराश्विना गतं नोऽयं सोम इंद्र। आ० ८.११.। इति सूत्रितत्वात्॥

॥ तत्र प्रथमा॥

आ विश्ववाराश्विना गतं नः प्र तत्स्थानमवाचि वां पृथिव्यां।
अश्वो न वाजी शुनपृष्ठो अस्थादा यत्सेदथुर्ध्रुवसे न योनिं॥ १

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आ । विश्वऽवारा । अश्विना । गतं । नः । प्र । तत् ।

स्थानं । अवाचि । वां । पृथिव्यां ।

अश्वः न । वाजी । शुनऽपृष्ठः । अस्थात् । आ । यत् ।

सेदथुः । ध्रुवसे । न । योनिं ॥ १

हे विश्ववारा सर्वैर्वरणीयावश्विनाश्विनौ नोऽस्माकं यज्ञमागतमागच्छतं वां युवयोस्तत्स्थानं पृथिव्यां वेद्यां प्रावाचि । प्रोच्यते । तदर्थं शुनपृष्ठः सुखकरपृष्ठभागः । अत्यन्तविपुलत्वादारूढानां सुखकरपृष्ठभाग इत्यर्थः । वाजी वेगवानश्वोऽस्थात् । तिष्ठतु युवयोः समीपे । यत् । यदित्यर्थः । यदवनावेदथुः आसीदथः सोऽर्थः । यद्वा यत्स्थानमासीदथः तत्स्थानमस्माकमावर्तितौ गच्छतम् । क्षितो द्रष्टव्यः । ध्रुवसे ध्रुवाय निवासाय योनिं न योनिं स्थानमिव ॥

अथ द्वितीया ॥

सिषक्ति सा वां सुमतिश्चनिष्ठातापि घर्मो मनुषो दुरोणे ।

यो वां समुद्रान्त्सरितः पिपर्त्येतग्वा चिन्न सुयुजा युजानः ॥ २

सिषक्ति । सा । वां । सुऽमतिः । चनिष्ठा । अतापि । घर्मः ।

मनुषः । दुरोणे ।

यः । वां । समुद्रान् । सरितः । पिपर्ति । एतऽग्वा । चित् ।

न । सुऽयुजा । युजानः ॥ २

सा सुमतिरस्माभिः क्रियमाणा शोभना स्तुतिश्चनिष्ठा कमनीयतमातिशयेनान्नवती वा वां युवां सिषक्ति । सेवते । किंच घर्मः प्रवर्ग्यश्च मनुषो मनुष्यस्य यजमानस्य दुरोणे यागगृहेऽतापि । तप्तोऽभूत् । यद्वा उक्तमप्यसपत्नत्वं च घर्मत्वमिति श्रुतिः । यद्वा शिरःस्थानीयत्वादस्य । यो घर्मो वां युवां । प्राप्नोतीति शेषः । समुद्रान् सरितश्च पिपर्ति पूरयति वृष्टिद्वारा । एतग्वा चित् । चिदिति पूरणः । एतग्वाश्वि

यथा युवां सुष्टु युक्तौ रथे भवतस्तथेत्यर्थः। नेतृणामर्थे तदश्वानां यन्त्रे युवामात्मो योजयन्त्यश्वः। स एवं करोति॥

॥ अथ तृतीया ॥

यानि स्थानान्यश्विना दधाथे दिवो यह्वीष्वोषधीषु विक्षु।
नि पर्वतस्य मूर्धनि सदन्तेषं जनाय दाशुषे वहन्ता॥ ३

यानि। स्थानानि। अश्विना। दधाथे इति। दिवः। यह्वीषु।
ओषधीषु। विक्षु।
नि। पर्वतस्य। मूर्धनि। सदन्ता। इषं। जनाय। दाशुषे।
वहन्ता॥ ३

हे अश्विना युवां दिवो द्युलोकादागत्य यानि स्थानानि दधाथे कुरुथः। तान्युच्यन्ते। यह्वीषु महतीष्वोषधीषु विक्षु यजमानेषु च। किं च युवां पर्वतस्य मेघस्यान्तरिक्षस्य वा मूर्धनि स्थाने सदन्ता निषीदन्तावन्नं दाशुषे हविर्दात्रे जनाय यजमानाय वहन्ता प्रापयन्तौ भवतमिति शेषः॥

॥ अथ चतुर्थी ॥

चनिष्टं देवा ओषधीष्वप्सु यद्योग्या अश्नवैथे ऋषीणां।
पुरूणि रत्ना दधतौ न्य१स्मे अनु पूर्वाणि चख्यथुर्युगानि॥ ४

चनिष्टं। देवौ। ओषधीषु। अप्ऽसु। यत्। योग्याः।
अश्नवैथे इति। ऋषीणां।
पुरूणि। रत्ना। दधतौ। नि। अस्मे इति। अनु। पूर्वाणि।
चख्यथुः। युगानि॥ ४॥

हे देवा देवौ युवामोषधीष्वोषधिविकारेषु पुरोडाशादिष्वन्नेषु सोमरसात्
चनिष्टं। अत्यन्तकमनीयमन्नं कामयेथामित्यर्थः। यद्यस्माद्योग्या युवयोर्मिलत:

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ओषधीरपश्च अस्मीणां संबंधिनीरस्मभ्यं व्याप्नुथः। तस्मादस्मदीया अपि कामयेथा-मित्यर्थः। यद्वा अस्मीणामस्माकर्मिति पूजार्थं बहुवचनं। यद्वांऽस्मादोषधीष्वप्सु च अनिष्टं योग्याः स्तुतीरस्मभ्यं ये तंसादस्मे अस्मासु पुरूणि बहूनि रत्ना रमणीयानि धनानि निदधतौ पूर्व्याणि युगानि बिभुनानि आपन्तीस्वरूपाण्यनुपश्यथुः। ख्यातवंतौ। अनुभवंतावनुग्रहार्थं॥

॥ अथ पंचमी ॥

शुश्रुवांसा चिद्श्विना पुरूण्यभि ब्रह्माणि चक्षाथे ऋषीणां।

प्रति प्र यातं वरमा जनायास्मे वामस्तु सुमतिश्चनिष्ठा॥ ५

शुश्रुवांसा। चित्। अश्विना। पुरूणि। अभि। ब्रह्माणि।
चक्षाथे इति। ऋषीणां।

प्रति। प्र। यातं। वरं। आ। जनाय। अस्मे इति। वां।
अस्तु। सुऽमतिः। चनिष्ठा॥ ५

हे अश्विनाश्विनौ। चिदिति पूरणः। युवां शुश्रुवांसा श्रुतवंतौ संतौ पुरूणि बहूनि ब्रह्माणि परिवृढानि कर्माणि स्तुतिलक्षणान्यृषीणामस्माकं संबंधीन्यभि-चक्षाथे अभिपश्यथो युवां। अस्मै जनाय जनस्य यजमानस्य मम वरं यज्ञं प्रति प्रयातं। वां युवयोश्चनिष्ठोऽन्नवत्तमा सुमतिरनुग्रहबुद्धिरस्मे अस्मासु अस्तु। भवतु॥

॥ अथ षष्ठी ॥

यो वां यज्ञो नासत्या हविष्मान्कृतब्रह्मा समर्यो३ भवाति।

उप प्र यातं वरमा वसिष्ठमिमा ब्रह्माण्यृच्यंते युवभ्यां॥ ६

यः। वां। यज्ञः। नासत्या। हविष्मान्। कृतऽब्रह्मा।
सऽमर्यः। भवाति।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उपं । प्र । यातं । वरं । आ । वसिष्ठं । इमा । ब्रह्माणि ।
ऋच्यंते । युवऽभ्यां ॥ ६

हे नासत्याश्विनौ यो युवयोर्यज्ञो यजमानः स्वयं कृत्विग्भिः मंत्रैः स्वीकृतः सन् हविष्मान् हविषा युक्तः शतपद्या शतस्तोत्रलक्षणो भवति भवति तं वरं रणीयं वसिष्ठमेव प्र यातं । प्रकर्षेणोपागच्छतं । इमेमानि ब्रह्माणि मंत्रात्मकानि युवाभ्यां युवयोरागमनाय ऋच्यंते । स्तूयंते । क्रियंत इत्यर्थः ॥

॥ अथ सप्तम्या स्तुतिमुपसंहरति ॥

इयं मनीषा इयमश्विना गीरिमां सुवृक्तिं वृषणा जुषेथां ।
इमा ब्रह्माणि युवयून्यग्मन्यूयं पात स्वस्तिभिः सदा नः ॥ ७

इयं । मनीषा । इयं । अश्विना । गीः । इमां । सुऽवृक्तिं ।
वृषणा । जुषेथां ।
इमा । ब्रह्माणि । युवऽयूनि । अग्मन् । यूयं । पात ।
स्वस्तिऽभिः । सदा । नः ॥ ७

हे अश्विनावश्विनावियं मनीषा स्तुतिर्युवयोः कृतेति शेषः । तदेवादरार्थं पुनरुच्यते । इयं गीः स्तुतिः कृता । हे वृषणा कामानां वर्षितारावस्मत्कृतां सुवृक्तिं शोभनां स्तुतिं जुषेथां । सेवेथां । इमानि ब्रह्माणि कर्माणि स्तुतिरूपाणि युवयूनि युवां कामयमानानि संत्यग्मन् । गच्छंतु युवां । यूयं पातेति सिद्धं ॥

॥ इति पंचमस्य पंचमे सप्तदशो वर्गः ॥

॥ इति सप्तमे मंडले चतुर्थोऽनुवाकः ॥

पंचमेऽनुवाक एकविंशति सूक्तानि । तत्राप स्वसुरिति षडृचं प्रथमं सूक्तं त्रैष्टुभमाश्विनं । अनुक्रम्यते च । अप स्वसुः षडिति ॥ गतो विनियोगः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तत्र प्रथमा ॥

अप स्वसुरुषसो नग्जिहीते रिणक्ति कृष्णीररुषाय पंथां ।
अश्वामघा गोमघा वां हुवेम दिवा नक्तं शरुमस्मद्युयोतं ॥ १

अप । स्वसुः । उषसः । नक् । जिहीते । रिणक्ति । कृष्णीः ।
अरुषाय । पंथां ।
अश्वऽमघा । गोऽमघा । वां । हुवेम । दिवा । नक्तं । शरुं ।
अस्मत् । युयोतं ॥ १

स्वसुः स्वसृस्थानीयाया उषसः सकाशात् नक् नक्तं रात्रिरपजिहीते । अपगच्छति । तस्या अवकाशं दत्वा स्वयमपगतेत्यर्थः । तथा च मंत्रः स्वसा स्वस्रे ज्यायस्यै योनिमारैक् । ऋ० १, १२४, ८, । इत्युक्तं । कृष्णीः कृष्णवर्णा रात्रिररुषायारोचमानाय सूर्याय वा पंथां पंथानं मार्गं रिणक्ति । रेचयति । यस्मादेवं तस्माद्युवयोरागमनसमयत्वात् हे अश्वमघा अश्वधनौ हे गोमघा गोधनौ । उभयोः प्रदातारावित्यर्थः । ईदृशौ वां युवां हुवेम । स्तुमः । आह्वयामः । दिवा नक्तं सर्वदा शरुं हिंसकमस्मत्तो युयोतं । पृथक्कुरुतं ॥

॥ अथ द्वितीया ॥

उपायातं दाशुषे मर्त्याय रथेन वाममश्विना वहंता ।
युयुतमस्मदनिराममीवां दिवा नक्तं माध्वी त्रासीथां नः ॥ २

उपऽआयातं । दाशुषे । मर्त्याय । रथेन । वामं । अश्विना ।
वहंता ।
युयुतं । अस्मत् । अनिरां । अमीवां । दिवा । नक्तं ।
माध्वी इति । त्रासीथां । नः ॥ २

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

हे अश्विनौ युवामस्मान्। उपागच्छतमस्मदाह्वानं प्रति। किमर्थं। दाशुषे हविर्दत्तवते यजमानाय तदर्थं रथेन रासं वननीयं धनं वहंता वहंतौ। अस्मदस्मत्तो युयुतं। पृथक्कुरुतं। किं। अनिरां। दरिद्रं। तदस्मद्दारिद्र्यमित्यर्थः। अमीवां रोगं च। हे माध्वी मधुमंतौ युवां दोषावस्तोः दिवा नक्तं सर्वदा त्रासीथां ॥ रक्षतं ॥

॥ अथ तृतीया ॥

आ वां रथमवमस्यां व्युष्टौ सुम्नायवो वृषणो वर्तयंतु ।
स्यूमगभस्तिमृतयुग्भिरश्वैराश्विना वसुमंतं वहेथां ॥ ३

आ । वां । रथं । अवमस्यां । विऽउष्टौ । सुम्नऽयवः ।
वृषणः । वर्तयंतु ।
स्यूमऽगभस्तिं । ऋतयुक्ऽभिः । अश्वैः । आ । अश्विना ।
वसुऽमंतं । वहेथां ॥ ३

अवमस्यामासन्नायां व्युष्टौ व्युच्छन उषसि वां युवयो रथं सुम्नायवः सुखेन योजयंतोऽश्वा वृषणो वर्षका युवामाभावर्तयंतु। स्यूमगभस्तिं सुखरश्मिं सूतरश्मिं वसुमंतं प्रदेयधनं युक्तं रथं हे अश्विनावश्विनावृतयुग्भिरुदकयुक्तैरश्वैरुदकप्रदैरश्वैरावहेथां ॥

॥ अथ चतुर्थी ॥

यो वां रथो नृपती अस्ति वोळ्हा त्रिवंधुरो वसुमाँ
उस्रयामा ।
आ न एना नासत्योप यातमभि यद्वां विश्वप्स्न्यो जिगाति ॥ ४

यः । वां । रथः । नृपती इति नृऽपती । अस्ति । वोळ्हा ।
त्रिऽवंधुरः । वसुऽमान् । उस्रऽयामा ।
आ । नः । एना । नासत्या । उप । यातं । अभि । यत् ।
वां । विश्वऽप्स्न्यः । जिगाति ॥ ४

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे इंद्रपती इष्यो यजमानानां पालकावश्विनौ वां युवयोर्यो रथो वीड्वा युवयोरायत्तोऽस्ति सर्वदा संनिहितो वर्तते। कीदृशोऽसौ। त्रिबंधुरः सारथ्य-धिष्ठानस्थानत्रयोपेतो वसुमान् धनवानुषयाणोऽसं दिवं प्रतिगंता एतेन रथेन हे नासत्याश्विनौ नोऽस्मानुपायातं। यद्यो यत्र रथो वां विश्वाप्सो व्याप्तरूपोऽभि-जिगाति अभिगच्छति। अयनाय। अत्रस्मादिदिंद्राख्यो वहिष्ठो वां जिगाति याति तत्र उपायातं ॥

॥ अथ पंचमी ॥

युवं च्यवानं जरसोऽमुमुक्तं नि पेदव ऊहथुराशुमश्वं।

निरंहसस्तमसः स्पर्तमत्रिं नि जाहुषं शिथिरे धातमंतः ॥ ५

युवं। च्यवानं। जरसः। अमुमुक्तं। नि। पेदवे। ऊहथुः।

आशुं। अश्वं।

निः। अंहसः। तमसः। स्पर्तं। अत्रिं। जाहुषं। शिथिरे।

धातं। अंतरिति ॥ ५

हे अश्विना युवं युवां च्यवानं जरसो जीर्णाद्रूपादमुमुक्तं। अमोचयतं। युवं च्यवानमश्विना जरंतं पुनर्युवानं। ऋग्वे० १. ११७. ११.। इति श्रुत्यंतरं। तथा पेदवे एतन्नामकाय राज्ञे आशुं शीघ्रगामिनमश्वं निरूहथुः। न्यवहतं। युवं श्वेतं पेदवे॥ ऋग्वे० १. ११८. ९.। इति निगमः। तथात्रिं शतद्वारयंत्र अंहसोऽसादग्नेः सकाशात्तमस अंधकारात्स्थानाच्च सकाशान्निरमुक्तं। स्पारयतं। युवमत्रिमवनं तप्तमय ओमन्वंतं चक्रथुः। ऋग्वे० १०. ३९. ९.। इति निगमः। तथा जाहुषं शिथिरे शिथिले कष्टे वर्तमाने ऽंतर्मध्ये पुनर्निधातं। न्यधातं। परिविष्टं जाहुषं विश्वतः सीं। ऋग्वे० १०. ५१६. २०.। इति श्रुतं ॥

॥ अथ षष्ठी ॥

इयं मनीषा इयमश्विना गीरिमां सुवृक्तिं वृषणा जुषेथां।

इमा ब्रह्माणि युवयून्यग्मन्यूयं पात स्वस्तिभिः सदा नः ॥ ६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इयं। मनीषा। इयं। अश्विना। गीः। इमां। सुऽवृक्तिं।
वृषणा। जुषेथां।
इमा। ब्रह्माणि। युवऽयूनि। अग्मन्। यूयं। पात।
स्वस्तिऽभिः। सदा। नः॥ ६

इयं मनीषेति षष्ठी गता॥

॥ इति पंचमस्य पंचमेऽष्टादशो वर्गः॥

आ गोमतेति पंचर्चं द्वितीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाश्विनं॥ अनुक्रम्यते च। आ गोमता पंचेति॥ विनियोगः प्रातरनुवाकाश्विनशस्त्रयोरुक्तः॥ आश्विने पशावाद्यास्तिस्रो याज्यानुवाक्याः। सूत्रितं च। आ गोमता नासत्या रथेनेति तिस्रः। आ० ३. ८.। इति॥

॥ तत्र प्रथमा॥

आ गोमता नासत्या रथेनाश्वावता पुरुश्चंद्रेण यातं।
अभि वां विश्वा नियुतः सचंते स्पार्हया श्रिया तन्वा शुभाना॥१

आ। गोऽमता। नासत्या। रथेन। अश्वऽवता।
पुरुऽचंद्रेण। यातं।
अभि। वां। विश्वाः। निऽयुतः। सचंते। स्पार्हया। श्रिया।
तन्वा। शुभाना॥ १

हे नासत्याश्विनौ गोमता गोयुक्तेनाश्वावताश्वयुक्तेन। अश्वैर्वृषभैर्वोढेनेत्यर्थः। यद्वा गोमता गोमद्देन पुरुश्चंद्रेण बहुधनेन आनंदकेनेत्यर्थः। तादृशेन रथेनायातं। आगच्छतं। वां विश्वा सर्वा नियुतः स्तुतयः सचंते सेवंतेऽस्मत्प्रेरिताः। हे स्पार्हया स्पृहणीयया श्रिया शोभया तन्वा शरीरेण च शुभाना दीप्यमानौ युवां॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ द्वितीया ॥

आ नो देवेभिरुप यातमर्वाक्सजोषसा नासत्या रथेन ।

युवोर्हि नः सख्या पित्र्याणि समानो बंधुरुत तस्य वित्तं ॥ २

आ । नः । देवेभिः । उप । यातं । अर्वाक् । सऽजोषसा ।

नासत्या । रथेन ।

युवोः । हि । नः । सख्या । पित्र्याणि । समानः । बंधुः ।

उत । तस्य । वित्तं ॥ २

हे नासत्याश्विनौ युवां देवेभिरितरैर्देवैः सह सजोषसा समानप्रीतौ परस्परं संगतौ नोऽस्माकमर्वागभिमुखं रथेनायातं। आगच्छतं। आगमने संगत्यातिशयमाह। युवोर्युवयोर्नोऽस्माकं च सख्या सख्यानि पित्र्याणि पितृतः प्राप्तानि। नेदानीं सख्याद्युपाधिना प्राप्तानि भवंतीत्यर्थः। तदेवाह। अस्माकमपि च युवयोरपि च बंधुर्बंधकः पितामहः समान एक एव। तस्य वित्तं॥ तस्येति कर्मणि षष्ठी॥ तं बंधुं तद्बंधुत्वं वा वित्तं। जानीतं॥ विवस्वान्वरुणश्चोभावपि कश्यपाददितेर्जातौ विवस्वानश्विनोर्जनको वरुणो वसिष्ठस्येत्येवं समानबंधुत्वं। तथा च बृहद्देवतायामुक्तं। अभवन्मिथुनं त्वष्टुः सरण्यूस्त्रिशिराः सह। स वै सरण्यूं प्रायच्छत्स्वयमेव विवस्वते॥ ततः सरण्य्वां जाते ते यमयम्यौ विवस्वतः। तावप्युभौ यमावेव ह्यास्तां यम्या च वै यमः॥ सृष्ट्वा भर्तुः परोक्षं तु सरण्यूः सदृशीं स्त्रियं। निक्षिप्य मिथुनं तस्यामश्वा भूत्वा प्रचक्रमे॥ अविज्ञानाद्विवस्वांस्तु तस्यामजनयन्मनुं। राजर्षिरासीत्स मनुर्विवस्वानिव तेजसा॥ स विज्ञाय त्वपक्रांतां सरण्यूमश्वरूपिणीं। त्वाष्ट्रीं प्रति जगामाशु वाजी भूत्वा सलक्षणः॥ सरण्यूस्तु विवस्वंतं विज्ञाय हयरूपिणं। मैथुनायोपचक्राम तां च तत्रारुरोह सः॥ ततस्तयोस्तु वेगेन शुक्रं तदपतद्भुवि। उपाजिघ्रच्च सा त्वश्वा तच्छुक्रं गर्भकाम्यया॥ आघ्राणमात्राच्छुक्रात्तु कुमारौ संबभूवतुः। नासत्यश्चैव दस्रश्च यौ स्तुतावश्विनाविति॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ तृतीया ॥

उदु स्तोमा॑सो अ॒श्विनो॑रबुध्रञ्जा॒मि ब्रह्मा॑ण्यु॒षस॑श्च दे॒वीः।
आ॒विवा॑स॒न्रोद॑सी॒ धिष्ण्ये॒मे अच्छा॒ विप्रो॒ नास॑त्या विवक्ति ॥ ३

उत्। ऊं॒ इति॑। स्तोमा॑सः॥ अ॒श्विनोः॑। अ॒बु॒ध्र॒न्। जा॒मि।
ब्रह्मा॑णि। उ॒षसः॑। च। दे॒वीः।
आ॒ऽविवा॑सन्। रोद॑सी॒ इति॑। धिष्ण्ये॒ इति॑। इ॒मे इति॑।
अच्छ॑। विप्रः॑। नास॑त्या। वि॒व॒क्ति॒ ॥ ३

स्तोमासः स्तोमाः स्तोत्राणि अश्विनोरश्विनावुदु अबुध्रन्। उत्कृष्टं बोधयन्ति। उ इति पूरणः। जामि। बन्धुनामैतत्। बन्धुस्थानीयानि ब्रह्माणि परिवृढानि कर्माणि देवीर्द्योतमाना उषसः। चकारादश्विनौ च। अबुध्रन्। विप्रो मेधावी वसिष्ठ इमे रोदसी द्यावापृथिव्यौ धिष्ण्ये धिषण हे स्तुत्ये आविवासन् परिचरन् नासत्याश्विनावच्छाभिमुखं विवक्ति। स्तौति॥

॥ अथ चतुर्थी ॥

वि चेदु॒च्छन्त्य॑श्विना उ॒षासः॒ प्र वां॒ ब्रह्मा॑णि का॒रवो॑ भरन्ते।
ऊ॒र्ध्वं भा॒नुं स॑वि॒ता दे॒वो अ॑श्रेद्बृ॒हद॒ग्नयः॑ स॒मिधा॑ जरन्ते ॥ ४

वि। च। इत्। उ॒च्छन्ति॑। अ॒श्वि॒ना॒। उ॒षसः॑। प्र। वा॒म्।
ब्रह्मा॑णि। का॒रवः॑। भ॒र॒न्ते॒।
ऊ॒र्ध्वम्। भा॒नुम्। स॒वि॒ता। दे॒वः। अ॒श्रे॒त्। बृ॒हत्। अ॒ग्नयः॑।
स॒म्ऽइधा॑। ज॒र॒न्ते॒ ॥ ४

हे अश्विनावुषास उषसो व्युच्छन्ति चेत् तमांसि विवासयन्ति। चेदिति पूरणार्थः। [illegible]। चेद्योगादनिघातः॥ अतो युवयोः स्तुति-

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

उपयत्वाद्ब्रह्माणि स्तोत्राणि कारवः स्तोतारः प्र भरंते। प्रकर्षेण संपादयंति। ऊर्ध्व- मश्नेत् आश्रयति भानुं तेज सविता देवः। उत्तरोऽपि सविता सविभनेन मूर्द्धति- जरत् अरंते। स्तूयंते॥

आ पश्चातादिति पंचम्याश्विने पशौ वपाया अनुवाक्या। सूत्रितं च। आ पश्चातान्नासत्या पुरस्तादा गोमता नासत्या रथेन। आ० ३. ८.। इति॥ तत्पाठस्तु॥

॥ अथ पंचमी॥

आ पश्चातांन्नासत्या पुरस्तादाश्विना यातमधरादुदंक्तात्।
आ विश्वतः पांचंजन्येन राया यूयं पात स्वस्तिभिः सदा नः॥५॥

आ। पश्चातात्। नासत्या। आ। पुरस्तात्। आ।
अश्विना। यातं। अधरात्। उदक्तात्।
आ। विश्वतः। पांचऽजन्येन। राया। यूयं। पात।
स्वस्तिऽभिः। सदा। नः॥५॥

हे नासत्याश्विनौ पश्चात्तात्पश्चिमदेशाद् यातं। तथा पुरस्तात्पूर्वस्माद्देशात् तथा- धरादधस्तनाद्देशाद्दक्षिणत उपरिष्टादुदग्देशात्। सर्वत्रायातमिति संबंधः। किं बहुना विश्वतः सर्वस्माद्देशात्पांचजन्येन पंचजनहितेन राया धनेन सहायातं। निषाद- पंचमाश्चत्वारो वर्णाः पंचजनाः॥

॥ इति पंचमस्य पंचमे एकोनविंशो वर्गः॥

अतारिष्मेति पंचर्चं तृतीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमाश्विनं। अतारिष्मेत्यनु- क्रमणिका॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः॥

॥ तत्र प्रथमा॥

अतारिष्म तमसस्पारमस्य प्रति स्तोमं देवयंतो दधानाः।
पुरुदंसा पुरुतमा पुराजामर्त्या हवते अश्विना गीः॥१॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

अतारिष्म । तमसः । पारं । अस्य । प्रति । स्तोमं । देवऽयन्तः ।

दधानाः ।

पुरुऽदंसा । पुरुऽतमा । पुराऽजा । अमर्त्या । हवते ।

अश्विना । गीः ॥ १

अस्य तमसोऽज्ञानस्य तत्कार्यस्य जननमरणात्मनः संसारदुःखस्य । अथवा राक्षसत्वाद् प्रयोगविषयाज्ञानस्य पारमतारिष्म । तीर्णाः स्मः । किं कुर्वन्तः देवयन्तो देवकामाः स्तोमं स्तुतिं प्रतिदधाना देवेषु कुर्वाणाः । पुरुदंसा बहुकर्माणौ पुरुतमा प्रभूततमौ पुराजा पूर्वं जातावमर्त्या मरणधर्मरहितावश्विनावश्विनौ गीर्गरिता स्तोता परितो हवते । स्तौति । आह्वयति वा ॥

॥ अथ द्वितीया ॥

न्यु प्रियो मनुषः सादि होता नासत्या यो यजते वंदते च ।
अश्नीतं मध्वो अश्विना उपाक आ वां वोचे विदथेषु प्रयस्वान् ॥ २

नि । ऊं इति । प्रियः । मनुषः । सादि । होता । नासत्या ।

यः । यजते । वंदते । च ।

अश्नीतं । मध्वः । अश्विना । उपाके । आ ॥ वां । वोचे ।

विदथेषु । प्रयस्वान् ॥ २

प्रियो युवयोः प्रियभूतो मनुषो मानुषो मनुषः सकाशाज्जातो वा होता देवानामाह्वाता स्तोतायं निषादि । न्यसादि । निषण्णो भवति । युवयोः कर्माणि वर्तत इत्यर्थः । हे नासत्यावश्विनौ यो यजते यागं करोति वंदते स्तौति च तस्य संस्क्रियमाणं मध्वो मधुरं सोमरसं हे अश्विनावश्विनावुपाकेऽन्तिक एव स्थित्वा अश्नीतं भक्षयतं । विदथेषु यज्ञेषु वां युवां प्रयस्वानन्नवानहं आवोचे । आह्वये ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ तृतीया ॥

अहेम यज्ञं पथामुराणा इमां सुवृक्तिं वृषणा जुषेथां ।

श्रुष्टीवेव प्रेषितो वामबोधि प्रति स्तोमैर्जरमाणो वसिष्ठः ॥ ३

अहेम । यज्ञं । पथां । उराणाः । इमां । सुऽवृक्तिं वृषणा ।

जुषेथां ।

श्रुष्टीवाऽइव । प्रऽइषितः । वां । अबोधि । प्रति । स्तोमैः ।

जरमाणः । वसिष्ठः ॥ ३

उराणा उरु स्तोत्रं कुर्वाणाः स्तोतारो वयं पथां पततामागच्छतां देवानामर्थाय यज्ञं यागं तत्साधनं हविर्वाऽहेम । वर्धयेमहे । वृषणा वर्षकौ कामानामिमां सुवृक्तिं शोभनस्तुतिं जुषेथां । सेवेथां । वां युवां श्रुष्टीवेव । श्रुष्टीति क्षिप्रनाम । क्षिप्रगंता दूत इव प्रेषितोऽहमबोधि । बोधयति शीघ्रं गंतव्यमिति । किं कुर्वन् । स्तोमैः स्तोत्रैः प्रतिजरमाणः प्रतिस्तुवन् । कः । वसिष्ठोऽहमबोधीति ॥

॥ अथ चतुर्थी ॥

उप त्या वह्नी गमतो विशं नो रक्षोहणा संभृता वीळुपाणी ।

समंधांस्यग्मत मत्सराणि मा नो मर्धिष्टमा गतं शिवेन ॥ ४

उप । त्या । वह्नी इति । गमतः । विशं । नः । रक्षःऽहना ।

संऽभृता । वीळुपाणी इति वीळुऽपाणी ।

सं । अंधांसि । अग्मत । मत्सराणि । मा । नः । मर्धिष्टं ।

आ । गतं । शिवेन ॥ ४

त्या त्यौ तौ वह्नी हविषां वोढारौ नोऽस्माकं विशं प्रजाःस्तुतिमुपगमतः । उपगच्छतां । कीदृशौ तौ । रक्षोहणा रक्षसां हंतारौ संभृता सम्यग्भृतौ पुष्टांगौ

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रोढ़पाणी दृढपाणी। यद्वायमर्थोऽश्वपरतया व्याख्येयः। तथा सति तौ रथस्य वोढारौ दृढपादावश्विनोरश्वावनुगच्छतामिति तस्यार्थः। अंधांस्यन्नानि मत्सराणि मदकराणि सोमाः समग्मत। समगच्छंत युवां। नोऽस्मान् मा मर्धिष्टं। मा हिंस्तं। किंतु पियेन संगतेन धनेन सार्धमागतं। आगच्छतं॥

॥ अथ पंचमी॥

आ पश्चातांनासत्या पुरस्तादाश्विना यातमधरादुदंक्तात्।
आ विश्वतः पांचजन्येन राया यूयं पात स्वस्तिभिः सदा नः॥ ५

आ। पश्चातात्। नासत्या। आ। पुरस्तात्। आ।
अश्विना। यातं। अधरात्। उदंक्तात्॥
आ। विश्वतः। पांचऽजन्येन। राया। यूयं। पात।
स्वस्तिऽभिः। सदा। नः॥ ५

आ पश्चातादिति पंचम्या विनियोगो व्याख्या च गता॥

॥ इति पंचमस्य पंचमे विंशो वर्गः॥

इमा उ वामिति षड्चं षष्ठं सूक्तमाश्विनं वसिष्ठस्यार्षं। आद्यास्तृतीयापंचम्यो बृहत्यः शिष्टाः सतोबृहत्यः। तथा चानुक्रांतं। इमा उ वां षड् प्रगाथमिति॥ प्रातरनुवाके आश्विने क्रतौ बार्हते छंदस्याश्विनशस्त्रे च सूक्तं। सूत्रितं च। इमा उ वामयं वां। आ० ४. १५.। इति॥ दशरात्रे पंचमेऽहनि प्रउगशस्त्रे इमा उ वामित्याद्यमाश्विनस्तृचः। सूत्रितं च। इमा उ वां दिविष्टयः पिबा सुतस्य रसिनः। आ० ७. १२.। इति॥

॥ तत्र प्रथमा॥

इमा उ वां दिविष्टय उस्रा हवंते अश्विना।
अयं वामह्वेऽवसे शचीवसू विशंविशं हि गच्छथः॥ १

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इमाः। ऊँ इति। वां। दिविष्टयः। उस्रा। हवंते। अश्विना।

अयं। वां। अह्वे। अवसे। शचीवसू इति शचीऽवसू।

विशंऽविशं। हि। गच्छथः॥ १

इमा दिविष्टयो दिवमिच्छंत्यः प्रजा ऋत्विजोऽपि। उ इति चार्थे। हे अश्विना उस्रा वासकौ वां हवंते॥ आह्वयंति। अयं वसिष्ठोऽपि हे शचीवसू कर्मधनौ वां युवामवसेऽवनाय युवयोस्तर्पणाय वह्वे। आह्वयामि। किमर्थमेवं प्रजा आह्वयंतीत्यादरोक्तिरिति तत्राह। हि यस्मात्कारणाद्युवां विशं विशं प्रजां प्रतिगच्छथः॥

॥ अथ द्वितीया ॥

युवं चित्रं ददथुर्भोजनं नरा चोदेथां सूनृतावते।

अर्वाग्रथं समनसा नि यच्छतं पिबतं सोम्यं मधु॥ २

युवं। चित्रं। ददथुः। भोजनं। नरा। चोदेथां।

सूनृताऽवते।

अर्वाक्। रथं। सऽमनसा। नि। यच्छतं। पिबतं। सोम्यं।

मधु॥ २

हे अश्विनौ युवं युवां चित्रं चायनीयं भोजनं धनं ददथुः। धारयेथे। तद्धनं सूनृतावते स्तुतिमते स्तोत्रे चोदेथां। प्रेरयतं। तदर्थं समनसा समानमनस्कौ संतौ रथं युवयोः संबंधिनमर्वागस्मदभिमुखं। नियच्छतं नियमतं। तथा कृत्वा सोम्यं सोमसंबंधिनं मधु मधुररसं पिबतं॥

॥ अथ तृतीया ॥

आ यातमुप भूषतं मध्वः पिबतमश्विना।

दुग्धं पयो वृषणा जेन्यावसू मा नो मर्धिष्टमा गतं। ३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आ । यातं । उप । भूषतं । मध्वः । पिबतं । अश्विना ।

दुग्धं । पयः । वृषणा । जेन्यावसू इति । मा । नः । मर्धिष्टं ।

आ । गतं ॥ ३

हे अश्विना युवामायातं । आगच्छतं । आगत्य चोप समीपे भूषतं । भवतं मध्वो
मधुरं सोमरसं पिबतं । पीत्वा च हे वृषणा वर्षकौ हे जेन्यावसू जेतव्यधनौ ।
जितधनावित्यर्थः । युवां पयो दुग्धमुदकमंतरिक्षाद् दुग्ध । नोऽस्मान् मा मर्धिष्टं मा
हिंस्तं । देवप्रार्थनाकरणमेव हिंसा । आगतं । आगच्छतं शीघ्रं ॥

॥ अथ चतुर्थी ॥

अश्वासो ये वामुप दाशुषो गृहं युवां दीयंति बिभ्रतः ।

मक्षूयुभिर्नरा हयेभिरश्विना देवा यातमस्मयू ॥ ४

अश्वासः । ये । वां । उप । दाशुषः । गृहं । युवां । दीयंति ।

बिभ्रतः ।

मक्षूयुऽभिः । नरा । हयेभिः । अश्विना । आ । देवा ।

यातं । अस्मयू इत्यस्मऽयू ॥ ४

येऽश्वासोऽश्वा वां युवयोः स्वभूता दाशुषो हविर्दातुर्गृहं युवां बिभ्रतो धारयंतो ।
दीयंति । गमयंतीत्यर्थः । मक्षूयुभिः शीघ्रगंतृभिर्हयेभिर्हयैरश्वैर्हे नरा नेतारावश्वि-
नाश्विनौ देवा देवावस्मयू अस्मत्कामयमानावायातं । अस्मद्यज्ञमागच्छतं ॥

॥ अथ पंचमी ॥

अधा ह यंतो अश्विना पृक्षः सचंत सूरयः ।

ता यंसतो मघवद्भ्यो ध्रुवं यशश्छर्दिरस्मभ्यं नासत्या ॥ ५

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अध। स्म। यंतः। अश्विना। पृक्षः। सचंत। सूरयः।

ता। यंसतः। मघवत्ऽभ्यः। ध्रुवं। यशः। छर्दिः। अस्मभ्यं।

नासत्या॥ ५

अध अपि चाश्विनाश्विनौ यंतः स्तुतिभिर्गच्छंतो यजमानाः सूरयो मेधाविनः स्तोतारः पृक्षोऽन्नं प्रभूतं सचंत। सेवंते। संयंति वा। ता तौ युवां मघवद्भ्यो हविष्मद्भ्योऽस्मभ्यं ध्रुवमविचलितं यशोऽन्नं यश एव वा छर्दिर्गृहं यंसतः। प्रयच्छतं। हे नासत्याश्विनौ॥

॥ अथ षष्ठी॥

प्र। ये ययुरवृकासो रथा इव नृपातारो जनानां।

उत स्वेन शवसा शूशुवुर्नर उत क्षियंति सुक्षितिं॥ ६

प्र। ये। ययुः। अवृकासः। रथाःऽइव। नृऽपातारः। जनानां।

उत। स्वेन। शवसा। शूशुवुः। नरः। उत। क्षियंति।

सुऽक्षितिं॥ ६

ये यजमाना अवृकासः परकीयधनस्यानादातारो जनानां मनुष्याणां मध्ये नृपातारः ऋत्विग्रूपाणां नृणां रक्षितारः संतो ययुः युवां प्राप्नुवंति हविर्भिः। प्राप्तौ दृष्टांतः। रथा इव ओष्ठादिपूर्णा रथा यथा प्राप्नुवंति स्वाभिमतं देशं। येत्ययमुत्तरवाक्यापेक्षः। अपि च ते नरो यजमानाः स्वेन शवसा स्वीयेन बलेन शूशुवुः। वर्धंते। उतापि च सुक्षितिं सुनिवासं क्षियंति। गच्छंति। प्राप्नुवंति॥

॥ इति पंचमस्य पंचमे एकविंशो वर्गः॥

व्युषा आव इत्यष्टर्चं पंचमं सूक्तं वसिष्ठस्यार्षं। अत्रानुक्रमणिका। व्युषा अष्टानुष्टुभं त वा इति। त वा इत्यनुक्तत्वात्तुह्यादिपरिभाषयेदमादीनि चत्वारि षष्ठ्याद्योदैवत्यानि॥ प्रातरनुवाके उषस्ये क्रतौ त्रैष्टुभे छंदस्याश्विनशस्त्रे चेदमादीनि षट् सूक्तानि। तथा च सूत्र्यते। व्युषा आवो दिविजा इति पंचानि सूक्तं। आश्व० ४, १४, [illegible] इति॥ ऋग्विधाने आख्यातो विनियोगोऽस्य लिख्यते॥ [illegible]

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

च उत्थाय प्रयतः शुचिः । व्युषा इत्युपतिष्ठेत षड्भिः सूक्तैः कृताञ्जलिः ॥ प्राप्नुयात्तु हिरण्यानि नानारूपं धनं बहु । गा अश्वान्पुरुषान्धान्यं स्त्रियो वासांस्यजाविकं । ऋग्वि० २, २८, । इति ॥

॥ तत्र प्रथमा ॥

व्यु१षा आवो दिविजा ऋतेनाविष्कृण्वाना महिमानमागात् ।
अप द्रुहस्तम आवरजुष्टमङ्गिरस्तमा पथ्या अजीगः ।

वि । उषाः । आवः । दिविऽजाः । ऋतेन । आविःऽकृण्वाना ।
महिमानं । आ । अगात् ।
अप । द्रुहः । तमः । आवः । अजुष्टं । अङ्गिरःऽतमा ।
पथ्याः । अजीगरिति ॥ १

इयमुषा दिविजा दिव्यन्तरिक्षे प्रादुर्भूता सती व्यावः । व्यौच्छत् । विभातं कृतवतीत्यर्थः ॥ वसेर्निगमप्रयोगत्वेन विपूर्वो व्युच्छने भवेत् । छन्दस्यपि दृश्यत इत्याट् । [illegible] हल्ङ्याब्भ्य इति लोपः ॥ सैषोषा ऋतेन तेजसा महिमानं स्वकीयमात्मानमाविष्कृण्वाना आगात् । आगतवती । आगत्य च द्रुहो द्रोग्धॄनजुष्टं सर्वेषामप्रियं तमश्चापावः । अपवृणोति । किंचाङ्गिरस्तमा । अङ्गिरोभ्यो [illegible] । सैषा पथ्याः पदवीरजीगः । उद्गिरति । प्राणिनां व्यवहाराय प्रकाशयतीत्यर्थः ॥

॥ अथ द्वितीया ॥

महे नो अद्य सुवितायं बोध्युषो महे सौभगाय प्र यंधि ।
चित्रं रयिं यशसं धेह्यस्मे देवि मर्तेषु मानुषि श्रवस्युं ॥ २

महे । नः । अद्य । सुवितायं । बोधि । उषः । महे ।
सौभगाय । प्र । यंधि ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

चित्रं। रयिं। यशसं। धेहि। अस्मे इति। देवि। मर्तेषु। मानुषि। श्रवस्युं॥ २

अद्य नोऽस्माकं महे महते सुविताय सुखप्राप्तये सुखगमनाय वा बोधि। बुध्यस्व। किंच हे उषो महे महते सौभगाय सौभाग्याय च प्रयंधि। प्रयच्छ धनानि। किंच चित्रं चायनीयं यशसं यशोयुक्तं रयिं धनं धेहि धारय अस्मे अस्मासु। हे मानुषि मनुष्यहिते देवि मर्त्येष्वस्मासु श्रवस्युमन्नयुक्तं पुत्रं धेहीत्यनुषंगः॥

॥ अथ तृतीया॥

एते त्ये भानवो दर्शतायाश्चित्रा उषसो अमृतास आगुः।
जनयंतो दैव्यानि व्रतान्यापृणंतो अंतरिक्षा व्यस्थुः॥ ३

एते। त्ये। भानवः। दर्शतायाः। चित्राः। उषसः। अमृतासः। आ। अगुः।
जनयंतः। दैव्यानि। व्रतानि। आऽपृणंतः। अंतरिक्षा। वि। अस्थुः॥ ३

दर्शतायाः दर्शनीयायाः प्रकाशयुक्ताया उषस एते पुरो दृश्यमानास्त्ये ते प्रसिद्धाश्चित्राः पूज्या आश्चर्यभूता वा अमृतासोऽमरणा अनश्वरा भानवो रश्मय आगुः। आगच्छंति। किं कुर्वंतः। दैव्यानि देवानां संबंधीनि व्रतानि कर्माणि जनयंत उत्पादयंतः। तदनुकूलप्रकाशप्रदानात्तदुत्पादकत्वमेषां। अंतरिक्षांतरिक्षाण्यापृणंत आपूरयंतः। एकस्यांतरिक्षस्य वायुमेघपक्षिणामाधारत्वोपाधिना त्रित्वं। अतो बहुवचनमुपपन्नं। एवं कुर्वंतो भानवो व्यस्थुः। विविधं तिष्ठंति। चरंति॥

॥ अथ चतुर्थी॥

एषा स्या युजाना पराकात्पंच क्षितीः परि सद्यो जिगाति।
अभिपश्यंती वयुना जनानां दिवो दुहिता भुवनस्य पत्नी॥ ४

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एषा । स्या । युजाना । पराकात् । पंच । क्षितीः । परि ।
सद्यः । जिगाति ।
अभिऽपश्यंती । वयुना । जनानां । दिवः । दुहिता ।
भुवनस्य । पत्नी ॥ ४

एषा स्या सोषाः पराकात् दूरदेशात् दूरे स्थितापि युजानोद्योगं कुर्वाणा प्रकाशाय पंच क्षितीर्निषादपंचमांश्चतुरो वर्णान् सद्यः परिजिगाति । किं कुर्वंती । जनानां प्राणिनां वयुना प्रज्ञानान्यभिपश्यंती साक्षित्वेनावलोकयंती । कीदृशी सा । दिवो दुहिता दुहितृस्थानीया भुवनस्य भूतजातस्य पत्नी पालयित्री परिजिगातीत्यन्वयः ॥

॥ अथ पंचमी ॥

वाजिनीवती सूर्यस्य योषा चित्रामघा राय ईशे वसूनां ।
ऋषिष्टुता जरयंती मघोन्युषा उच्छति वह्निभिर्गृणाना ॥ ५
वाजिनीऽवती । सूर्यस्य । योषा । चित्रऽमघा । रायः । ईशे ।
वसूनां ।
ऋषिऽस्तुता । जरयंती । मघोनी । उषाः । उच्छति ।
वह्निऽभिः । गृणाना ॥ ५

वाजिनीवती अन्नवती । यद्यप्युषोनामैतत् तथापि चित्रामघेत्यस्याप्युषोनामकत्व-द्वयमिश्रणत्वादन्नैकी योगरूढोऽवगंतव्यः । सूर्यस्य योषा योषित् चित्रामघा विचित्रधना विचित्रप्रख्यधना वा रायो धनस्याधिपतिभूतस्य तस्य वसूनां देव-मनुष्यादिसर्वाश्रयाणां धनानां चेष्टे । ईष्टे । अथवा वसवो वासका रश्मयः । तेषा-मपीष्टे । ऋषिष्टुता ऋषिभिः स्तुताः जरयंती प्राणिजातानि । उषा खलु पुनः पुनरावर्तमाना प्राणिनामायुः क्षपयति । मघोनी धनवत्युषा वह्निभिः कर्मवोढृभिर्यज-मानैर्गृणाना स्तूयमानोच्छति । विवासनं करोति ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ षष्ठी ॥

प्रति द्युतानामरुषासो अश्वाश्चित्रा अदृश्रन्नुषसं वहंतः।
याति शुभ्रा विश्वपिशा रथेन दधाति रत्नं विधते जनाय ॥ ६

प्रति। द्युतानां। अरुषासः। अश्वाः। चित्राः। अदृश्रन्।
उषसं। वहंतः।
याति। शुभ्रा। विश्वऽपिशा। रथेन। दधाति। रत्नं।
विधते। जनाय ॥ ६

द्युतानां द्योतमानामुषसं वहंतो धारयंतोऽरुषास आरोचमानाश्चित्राश्चायनीया अश्वाः प्रत्यदृश्रन्। प्रतिदृश्यंते। सा चोषाः शुभ्रा दीप्यमाना विश्वपिशा बहुरूपेण रथेन याति। सर्वत्र गच्छति। विधते परिचरते जनाय रत्नं रमणीयं धनं दधाति। ददाति च ॥

॥ अथ सप्तमी ॥

सत्या सत्येभिर्महती महद्भिर्देवी देवेभिर्यजता यजत्रैः।
रुजद् दृळ्हानि दददुस्रियाणां प्रति गाव उषसं वावशंत ॥ ७

सत्या। सत्येभिः। महती। महत्ऽभिः। देवी। देवेभिः।
यजता। यजत्रैः।
रुजत्। दृळ्हानि। ददत्। उस्रियाणां। प्रति। गावः।
उषसं। वावशंत ॥ ७

सत्यान्यैरबाध्या महती पूजनीया प्रवृद्धा वा गुणैर्देवी द्योतमाना यजता यजनीयोषाः सत्येभिः सत्यैर्महद्भिर्देवैर्यजत्रैर्यजनीयैः किरणैर्निपातभाग्भिरन्यैर्देवैर्वा सहिता सती दृळ्हान्यत्यंतं स्थिराणि तमांसि रुजत्। भिनत्ति। उस्रियाणां। गोनामैतत्। उस्राभिव आसां भोगा इति तन्निरुक्तिः। तासां संभाराय ददत्।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एद्दाति। शाखान्तरेऽस्यकारश्छांदसः। अथवोषिया गा ददत्। ददाति स्तोतृभ्यः। किंच गावः। उपव्रजन्त्येतत्। सर्वेऽपि तथाऽवक्रूषाः प्राप्तिन वयसं वाचयंत। उर्यंत। कामयंते। विशेषेण गवां प्रभाते संचारार्थमुषसोऽपेक्षितत्वात्तासां प्राधान्येनोक्तिः॥

॥ अथाष्टमी ॥

नू नो गोमद्वीरवद्धेहि रत्नमुषो अश्वावत्पुरुभोजो अस्मे।
मा नो बर्हिः पुरुषता निदे कर्यूयं पात स्वस्तिभिः सदा नः॥ ८

नु। नः। गोऽमत्। वीरऽवत्। धेहि। रत्नं। उषः।
अश्वऽवत्। पुरुऽभोजः। अस्मे इति।
मा नः। बर्हिः। पुरुषता। निदे। कः। यूयं। पात।
स्वस्तिऽभिः। सदा। नः॥ ८

हे उषो नु नोऽस्मभ्यं गोमद्गोभिर्युक्तं वीरवद्वीरैः पुत्रैरुपेतं रत्नं रमणीयं धनं पुरुभोजो बहुधनं चाश्वं अश्वयुक्तं धेहि। देहि। पादभेदादस्मे इति पुनरभिधानं। नोऽस्माकं बर्हिर्यज्ञं पुरुषता पुरुषतायां पुरुषसमूहेष्वपवादरूपेऽपि। निदे निंदायै मा कः। मा कार्षीः। यथा ते निंदन्ति तथा मा कुर्वित्यर्थः॥

॥ इति पंचमस्य पंचमे द्वाविंशो वर्गः॥

उदु ज्योतिरिति सप्तर्चं षष्ठं सूक्तं वसिष्ठस्यार्षं। तथा चानुक्रांतं। उदु सप्तेति॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः॥

॥ तत्र प्रथमा ॥

उदु ज्योतिरमृतं विश्वजन्यं विश्वानरः सविता देवो अश्रेत्।
क्रत्वा देवानामजनिष्ट चक्षुराविरकर्भुवनं विश्वमुषाः॥ १

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

उत्। ऊं इति। ज्योतिः। अमृतं। विश्वऽजन्यं।

विश्वानरः। सविता। देवः। अश्रेत्।

क्रत्वा। देवानां। अजनिष्ट। चक्षुः। आविः। अकः।

भुवनं। विश्वं। उषाः॥ १

अमृतममृतत्वसाधकमविनाशि वा विश्वजन्यं विश्वेषां जनानां हितकरं ज्योतिर्विश्वानरः सर्वेषां नेता सविता देव उदश्रेत्। ऊर्ध्वं श्रयति। देवानां द्योतमानानां स्तोतॄणां वा यजमानानां क्रत्वा कर्मणा निमित्तेन। यागानुष्ठानार्थमित्यर्थः। तदर्थं यदा देवानां चक्षुश्चक्षुःस्थानीयमुषसं तेजः क्रत्वा कर्मणा निमित्तेनाजनिष्ट। प्रादुरभूत् अनन्तरमेवोषा विश्वं सर्वं भुवनं भूतजातमाविरकः। प्रादुरकः। अकरोत्। तमसावृतं जगदाविष्कृतवती॥

॥ अथ द्वितीया ॥

प्र मे पंथा देवयाना अदृश्रन्नमर्धंतो वसुभिरिष्कृतासः।

अभूदु केतुरुषसः पुरस्तात्प्रतीच्यागादधि हर्म्येभ्यः॥ २

प्र। मे। पंथाः। देवऽयानाः। अदृश्रन्। अमर्धंतः।

वसुऽभिः। इष्कृतासः।

अभूत्। ऊं इति। केतुः। उषसः। पुरस्तात्। प्रतीची।

आ। अगात्। अधि। हर्म्येभ्यः॥ २

मे मम देवयाना देवप्रापकाः पंथाः पंथानः प्रादृश्रन्। प्रदृश्यंते। कीदृशाः पंथानः। अमर्धंतोऽहिंसंतो वसुभिस्तेजोभिरिष्कृतासः संस्कृताः। पुरस्तात् पूर्वस्यां दिश्युषसः केतुः प्रज्ञापकं तेजोऽभूत्। अभवत्। जायते। सोषाश्च प्रतीची प्रत्यगंचनात्यन्तभिमुखी हर्म्येभ्योऽधि उच्छ्रितेभ्यः प्रदेशेभ्यः॥ हर्म्यशब्द उच्चप्रदेशोपलक्षकः॥ आगात्। आगच्छति॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ तृतीया ॥

तानीदहानि बहुलान्यासन्या प्राचीनमुदिता सूर्यस्य ।
यतः परि जार इवाचरन्त्युषो ददृक्षे न पुनर्यतीव ॥ ३

तानि । इत् । अहानि । बहुलानि । आसन् । या ।
प्राचीनं । उत्ऽइता । सूर्यस्य ।
यतः । परि । जारःऽइव । आऽचरंती । उषः । ददृक्षे । न ।
पुनः । यतीऽइव ॥ ३

हे उषस्तानीत् तान्येव तव तेजांसि बहुलान्यहान्यासन् । उषःप्रकाशयुक्तस्यैव कालस्याहःशब्दव्यवहारात् । तानीत्युक्तं कानीत्याह । या यानि सूर्यस्योदितोदिता उदये सति प्राचीनं तस्य प्राक्तनं प्रत्युदयंति । यद्वा सूर्यस्य प्राचीने देशे या यान्युदितोदितानि तानीत्यर्थः । हे उषो यतो यैश्च तेजोभिः परिददृक्षे दृश्यसे त्वं । जार इव पत्याविवाचरंती समीपे संचरंती साध्वी नारीव जारे रात्रेर्जरयितरि सूर्ये संचरंती त्वं दृश्यसे । यथा लोके दुष्टं भ्रमणशीलमपि पतिमत्यजंत्येव साध्वी संचरति तद्वत् तमविमुंचती त्वमित्यर्थः । न पुनर्यतीव यती पतिं परित्यज्येतस्ततः संचरंती व्यभिचारिणीव सूर्यमपरित्यजंती त्वं । पुनरित्ययं चैवकारप्रद्योतनार्थः । एवं यैस्तेजोभिर्युक्ता परिदृश्यसे तान्यहान्यासन्निति संबंधः ॥

॥ अथ चतुर्थी ॥

त इद्देवानां सधमाद आसन्नृतावानः कवयः पूर्व्यासः ।
गूड़्हं ज्योतिः पितरो अन्वविंदन्सत्यमंत्रा अजनयन्नुषासं ॥ ४

ते । इत् । देवानां । सधऽमादः । आसन् । ऋतऽवानः ।
कवयः । पूर्व्यासः ।
गूड़्हं । ज्योतिः । पितरः । अनु । अविंदन् । सत्यऽमंत्राः ।
अजनयन् । उषसं ॥ ४

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

स इत्तेऽंगिरस एव ऋषीणां मध्ये देवानां सधमादः सह माद्यंत आसन्। अभवन्। स इत्तुशब्दौ च इत्याद्यौ। य ऋतावानः सत्यवंत कवयोऽनूचानाः। ये वा अनूचानास्ते कवयः। ऐ० ब्रा० २. ३८.। इति श्रुतेः। पूर्व्यासः पूर्वकालीना पितरः पालयितारः सर्वेऽप्यांगिरसो गूळ्हं गूढं तमसावृतं ज्योतिः सौर्यं तेजोऽन्वविंदन् लब्धवंतो मंत्रसामर्थ्यात् ते सत्यमंत्राः सत्यस्तुतयः संत उषासमुदयमजनयन् प्रादुरकुर्वन्। तुरीयेण ब्रह्मणाविंददत्रिः। ऋग्वे० ५. ४०. ६.। अत्रयस्तमन्वविंदन्। ऋग्वे० ५. ४०. ९.। इति निगमौ। अत्रांगिरसां स्तुत्योषस एव स्तुतिर्द्रष्टव्या॥

॥ अथ पंचमी ॥

समान ऊर्वे अधि संगतासः सं जानते न यतंते मिथस्ते।
ते देवानां न मिनंति व्रतान्यमर्धंतो वसुभिर्यादमानाः॥ ५

समाने। ऊर्वे। अधि। संऽगतासः। सं। जानते। न। यतंते।
मिथः। ते।
ते। देवानां। न। मिनंति। व्रतानि। अमर्धंतः। वसुऽभिः।
यादमानाः॥ ५

समाने सर्वेषां साधारणे ऊर्वे गोसमूहे पणिभिरपहृते पुनर्लब्धे सति। अधीत्यनर्थकः। संगतासो मिलिताः संतस्ते संजानते। एकमत्यो भवंति। न मिथः परस्परं यतंते। स्पर्धेन साधनमनुतिष्ठंतीत्यर्थः। तेऽगिरसो देवानां व्रतानि कर्माणि यागलक्षणानि न मिनंति। न हिंसंति। किंतु परिपालयंतीत्यर्थः। किं कुर्वंतः अमर्धंतोऽहिंसंतो वसुभिर्वासकैस्तैस्तेजोभिर्यादमाना गच्छंत॥

॥ अथ षष्ठी ॥

प्रति त्वा स्तोमैरीळते वसिष्ठा उषर्बुधः सुभगे तुष्टुवांसः।
गवां नेत्री वाजपत्नी न उच्छोषः सुजाते प्रथमा जरस्व॥ ६

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रति। त्वा। स्तोमैः। ईळते। वसिष्ठाः। उषःऽबुधः। सुऽभगे।
तुस्तुऽवांसः।
गवां। नेत्री। वाजऽपत्नी। नः। उच्छ। उषः। सुऽजाते।
प्रथमा। जरस्व ॥ ६

हे सुभगे देव्युषस्त्वा त्वामुषर्बुध उषसि बुध्यंतस्तुष्टुवांसः स्तुवंतो वसिष्ठाः स्तोमैः स्तोत्रैरीळते। स्तुवंति। गवां नेत्री प्रापयित्री वाजपत्न्यन्नस्य पालयित्री। अन्नदात्रीत्यर्थः। ईदृशी त्वं नोऽस्मदर्थमुच्छ। विभाहि। हे उषः सुजाते सुप्रादुर्भावे प्रथमेतरदेवेभ्यो मुख्यभूता जरस्व ॥

॥ अथ सप्तमी ॥

एषा नेत्री राधसः सूनृतानामुषा उच्छंती रिभ्यते वसिष्ठैः।
दीर्घश्रुतं रयिमस्मे दधाना यूयं पात स्वस्तिभिः सदा नः ॥ ७

एषा। नेत्री। राधसः। सूनृतानां। उषाः। उच्छंती।
रिभ्यते। वसिष्ठैः।
दीर्घऽश्रुतं। रयिं। अस्मे इति। दधाना। यूयं। पात।
स्वस्तिऽभिः। सदा। नः ॥ ७

एषोषा राधसः स्तोतुः सूनृतानां स्तुतीनां नेत्री समुच्छंती तमो विवासयंती वसिष्ठैर्वसिष्ठगोत्रोत्पन्नै रिभ्यते। स्तूयते। दीर्घश्रुतं दीर्घं श्रूयमाणं सर्वत्र प्रसिद्धं रयिं धनमस्मे अस्मासु दधाना धारयंती ॥

॥ इति पंचमस्य पंचमे त्रयोविंशो वर्गः ॥

उपो रुरुचे इति षडृचं सप्तमं सूक्तं वसिष्ठस्यार्षमुषस्यं। तथा चानुक्रांतं उपो रुरुचे षडिति॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तत्र प्रथमा ॥

उपो रुरुचे युवतिर्न योषा विश्वं जीवं प्रसुवन्ती चरायै ।
अभूदग्निः समिधे मानुषाणामकर्ज्योतिर्बाधमाना तमांसि ॥ १

उपो इति । रुरुचे । युवतिः । न । योषा । विश्वं । जीवं ।
प्रऽसुवन्ती । चरायै ।
अभूत् । अग्निः । सम्ऽइधे । मानुषाणां । अकः । ज्योतिः ।
बाधमाना । तमांसि ॥ १

इयमुषा उपो समीप एव सूर्यस्य रुरुचे । दीप्यते । युवतिर्यौवनोपेता योषा न योषिदिव । सा यथा वस्त्राभरणादिना भर्तुः समीपे प्रदीप्यते तद्वत् । किं कुर्वती । विश्वं सर्वं जीवं जीवसंघं चरायै संचाराय प्रसुवन्ती प्रेरयन्ती । किंचाग्निर्मानुषाणां मनुष्याणामर्थाय समिधेऽभूत् । समिन्धनीयोऽभवत् ॥ सत्यर्थे केन् ॥ समिद्धः सन् तमांस्यन्धकारान्बाधमाना बाधमानं बाधकं ज्योतिस्तेजःसंघातकः । अकार्षीत् । अथवोषसं ज्योतिस्तमांसि बाधमाना बाधमानान्यकः । अकरोत् ॥

॥ अथ द्वितीया ॥

विश्वं प्रतीची सप्रथा उदस्थाद्रुशद्वासो बिभ्रती शुक्रमश्वैत् ।
हिरण्यवर्णा सुदृशीकसंदृग्गवां माता नेत्र्यह्नामरोचि ॥ २

विश्वं । प्रतीची । सऽप्रथाः । उत् । अस्थात् । रुशत् । वासः ।
बिभ्रती । शुक्रं । अश्वैत् ।
हिरण्यऽवर्णा । सुदृशीकऽसंदृक् । गवां । माता । नेत्री ।
अह्नां । अरोचि ॥ २

विश्वं कृत्स्नं जगत्प्रति प्रतीच्यभिमुखी सप्रथाः सर्वतः पृथुतरोदस्थात् । उदगच्छत् । उदिता च रुशद्रोचमानं शुक्रं तेजोमयं वासो वसनीयं तेजःसमूहं बिभ्रती

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

धारयन्त्येव। वर्धते। हिरण्यवर्णा हिरण्मयीव वर्णोपेता सुदृशीकसंदृक्। संदर्शयतीति संदृक् तेजः। सुष्ठु दर्शनीयं संदृक् तेजो यस्याः सा तादृशी। गोनां वाचां गवामेव वा माता निर्मात्री। उषःकाले हि पक्षिमनुष्यादीनां वाचो निर्गच्छन्ति। गवामपि तस्मिन्काले संचारात्तन्निर्मातृत्वं। अथवा रश्मीनां निर्मात्र्यरोचि रोचतेऽह्नां नेत्री दिवसानां प्रापयित्री॥

॥ अथ तृतीया ॥

देवानां चक्षुः सुभगा वहन्ती श्वेतं नयन्ती सुदृशीकमश्वं।
उषा अदर्शि रश्मिभिर्व्यक्ता चित्रामघा विश्वमनु प्रभूता ॥ ३

देवानां। चक्षुः। सुऽभगा। वहन्ती। श्वेतं। नयन्ती।
सुऽदृशीकं। अश्वं।
उषाः। अदर्शि। रश्मिऽभिः। विऽअक्ता। चित्रऽमघा।
विश्वं। अनु। प्रऽभूता। ३

देवानां चक्षुश्चक्षुःस्थानीयं तेजो वहन्ती धारयन्ती सुभगा शोभनधना सुदृशीकं सुदर्शनमश्वं सर्वदा गन्तारमादित्यं नयन्ती प्रापयन्ती। किं० श्वेतं श्वेतवर्णमिदं सूर्यं। प्रकाशयुक्तं कुर्वन्तीत्यर्थः। ईदृश्युषाः। रश्मिभिः स्वकीयैर्व्यक्तादर्शि। दृश्यते च। चित्रामघा विचित्रधना विश्वमनु सर्वं जगदनुलक्ष्य प्रभूता प्रवृद्धा। सर्वजगद्व्यवहारायेत्यर्थः॥

॥ अथ चतुर्थी ॥

अन्तिवामा दूरे अमित्रमुच्छोर्वीं गव्यूतिमभयं कृधी नः।
यावय द्वेष आ भरा वसूनि चोदय राधो गृणते मघोनि ॥ ४

अन्तिऽवामा। दूरे। अमित्रं। उच्छ। उर्वीं। गव्यूतिं।
अभयं। कृधि। नः।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

यवय । द्वेषः । आ । भर । वसूनि । चोदय । राधः ।

गृणते । मघोनि ॥ ४

हे उषोऽन्तिवामा । अंतिकसदंतिके वामं वननीयं धनं यस्याः सांतिवामा । त्वम-मित्रमस्मच्छत्रुं दूरेऽस्मत्तो विप्रकृष्टदेशे वर्तमानं कृत्वा व्युच्छ । विभाहि । यथामित्रो दूरे भवति तथा व्युच्छेत्यर्थः । तथोर्वीं गव्युतिं भूमिमभयं नोऽस्माकं कृधि । कुरु । किंच द्वेषोऽस्मद्द्वेष्टॄन्यावय । अस्मत्तः पृथक्कुरु । वसूनि शत्रूणां धनान्याभर । आहर । राधो धनं चोदय प्रेरय गृणते स्तुवते मह्यं हे मघोनि धनवति ॥

॥ अथ पंचमी ॥

अस्मे श्रेष्ठेभिर्भानुभिर्वि भाह्युषो देवि प्रतिरंती न आयुः ।

इषं च नो दधती विश्ववारे गोमदश्वावद्रथवच्च राधः ॥ ५

अस्मे इति । श्रेष्ठेभिः । भानुऽभिः । वि । भाहि । उषः ।

देवि । प्रऽतिरंती । नः । आयुः ।

इषं । च । नः । दधती । विश्वऽवारे । गोऽमत् । अश्वऽवत् ।

रथऽवत् । च । राधः ॥ ५

हे उषो देवि अस्मे अस्मभ्यं श्रेष्ठेभिः प्रशस्यैर्भानुभी रश्मिभिः प्रकाशैर्विभाहि । प्रकाशय । किं कुर्वंती । नोऽस्माकमायुरायुष्यं प्रतिरंती वर्धयंती । हे विश्ववारे विश्वैः संभजनीये देवि नोऽस्मभ्यमिषं च गोमद्गोभिर्युक्तमश्ववदश्वैरुपेतं रथवद्रथैरुपेतं राधो धनं च दधती विभाहीति ॥

॥ अथ षष्ठी ॥

यां त्वां दिवो दुहितर्वर्धयंत्युषः सुजाते मतिभिर्वसिष्ठाः ।

सास्मासु धा रयिमृष्वं बृहंतं यूयं पात स्वस्तिभिः सदा नः ॥ ६

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

यां । त्वा । दिवः । दुहितः । वर्धयंति । उषः । सुऽजाते ।

मतिऽभिः । वसिष्ठाः ।

सा । अस्मासु । धाः । रयिं । ऋष्वं । बृहंतं । यूयं । पात ।

स्वस्तिऽभिः । सदा । नः ॥ ६

हे दिवो दुहितरुषः सुजाते शोभनजनने यां त्वा त्वां मतिभिः स्तोत्रैर्वसिष्ठा वर्धयंति सा त्वमस्मासु वसिष्ठेष्वृष्वं प्रदीप्तं बृहंतं महांतं रयिं धनं धाः । धेहि ॥

॥ इति पंचमस्य पंचमे चतुर्विंशो वर्गः ॥

प्रति केतव इति पंचर्चमष्टमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमुषस्यं । प्रति पंचेत्यनुक्रमणिका ॥ उक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्रति केतवः प्रथमा अदृश्रन्नूर्ध्वा अस्या अंजयो वि श्रयंते ।

उषो अर्वाचा बृहता रथेन ज्योतिष्मता वाममस्मभ्यं वक्षि ॥ १

प्रति । केतवः । प्रथमाः । अदृश्रन् । ऊर्ध्वाः । अस्याः ।

अंजयः । वि । श्रयंते ।

उषः । अर्वाचा । बृहता । रथेन । ज्योतिष्मता । वामं ।

अस्मभ्यं । वक्षि ॥ १

अस्याः प्रथमाः प्रथमोत्पन्नाः केतवः प्रज्ञापका रश्मयः प्रत्यदृश्रन् । प्रतिदृश्यंते । अस्या अंजयो व्यंजका रश्मय ऊर्ध्वा ऊर्ध्वगा वि श्रयंते । विविधं सर्वत्र श्रयंति । हे उषो देवि अर्वाचास्मदभिमुखेनागच्छता बृहता महता ज्योतिष्मता तेजोवता रथेनास्मभ्यं वामं वननीयं धनं वक्षि । वहसि ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ द्वितीया ॥

प्रति षीमग्निर्जरते समिद्धः प्रति विप्रासो मतिभिर्गृणंतः।

उषा याति ज्योतिषा बाधमाना विश्वा तमांसि दुरिताप

देवी ॥ २

प्रति। सीं। अग्निः। जरते। सम्ऽइद्धः। प्रति। विप्रासः।

मतिऽभिः। गृणंतः।

उषाः। याति। ज्योतिषा। बाधमाना। विश्वा। तमांसि।

दुःऽइता। अप। देवी ॥ २

अग्निः समिद्धः सन् सीं सर्वतः प्रतिजरते। अभिवर्धते। विप्रासो विप्रा मेधाविन ऋत्विजश्च मतिभिः स्तुतिभिरुषसं गृणंतः स्तुवंतो जरंते। उषाश्च देवी ज्योतिषा विश्वा सर्वाणि तमांसि दुरिता दुरितान्यपबाधमाना याति अर्वं गच्छति॥

॥ अथ तृतीया ॥

एता उ त्याः प्रत्यदृश्रन्पुरस्ताज्ज्योतिर्यच्छंतीरुषसो विभातीः।

अजीजनन्त्सूर्यं यज्ञमग्निमपाचीनं तमो अगादजुष्टं ॥ ३

एताः। ऊं इति। त्याः। प्रति। अदृश्रन्। पुरस्तात्।

ज्योतिः। यच्छंतीः। उषसः। विऽभातीः।

अजीजनन्। सूर्यं। यज्ञं। अग्निं। अपाचीनं। तमः।

अगात्। अजुष्टं ॥ ३

एता उ। उ इति पूरणः। त्यास्ताः प्रसिद्धा एता विभातीर्विभात्यो विभान्त्यो ज्योतिस्तेजो यच्छंतीः प्रयच्छंत्य उषसः पुरस्तात्पूर्वस्यां दिशि प्रत्यदृश्रन्।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रतिदृश्यंते। ता उषसः सूर्यं यज्ञमग्निं चाजीजनन्। प्रादुरकुर्वन्। उषस उदयानंतरं तेषां संभवात्तज्जनकत्वमुपचर्यते। किं चापाचीनं नीचीनमजुष्टमप्रियं। सर्वेषां दृष्टिनिरोधकत्वादप्रियत्वं। तादृशं तमोऽगात्। अपगतमभूत्॥

॥ अथ चतुर्थी ॥

अचेति दिवो दुहिता मघोनी विश्वे पश्यंत्युषसं विभातीं।
आस्थाद्रथं स्वधया युज्यमानमा यमश्वासः सुयुजो वहंति॥ ४

अचेति। दिवः। दुहिता। मघोनी। विश्वे। पश्यंति।
उषसं। विऽभातीं।
आ। अस्थात्। रथं। स्वधया। युज्यमानं। आ। यं।
अश्वासः। सुऽयुजः। वहंति॥ ४

दिवो दुहिता मघोनी धनवत्युषा अचेति। सर्वैर्ज्ञायते। विश्वे सर्वेऽपि प्राणिनो विभातीमुच्छंतीमुषसं पश्यंति। तादृशी देवी स्वधयान्नेन युज्यमानं रथमास्थात्। आतिष्ठत्। आरोहति। यं रथं सुयुजो शोभनयोजना अश्वासोऽश्वा आवहंति अभिमतदेशं प्रापयंति तं रथमास्थादिति॥

॥ अथ पंचमी ॥

प्रति त्वाद्य सुमनसो बुधंतास्माकासो मघवानो वयं च।
तिल्विलायध्वमुषसो विभातीर्यूयं पात स्वस्तिभिः सदा नः॥ ५

प्रति। त्वा। अद्य। सुऽमनसः। बुधंत। अस्माकासः।
मघऽवानः। वयं। च।
तिल्विलायध्वं। उषसः। विऽभातीः। यूयं। पात।
स्वस्तिऽभिः। सदा। नः॥ ५

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे उषः अद्यास्मिन्काले सुमनसः शोभनस्तुतिका मघवानो हविर्लक्षणधन-वंतोऽस्माकमस्मदीयाः पुरुषा ऋत्विजः। यद्वा मघवान इत्येतदृत्विजामेतेषां विशेषणं। ऋत्विक्सहितो यजमानः प्रतिबुध्यंत। अबोधयन् स्तुतिभिः। हे उषसो यूयं च विभातीर्व्युच्छंत्यः वसिष्ठैरभिष्टुताः सत्यः। ततः स्विष्टकृतं सुदिनं कुरुत॥ शिष्टं स्पष्टं॥

॥ इति पंचमस्य पंचमे पंचविंशो वर्गः॥

व्युषा आव इति पंचर्चं नवमं सूक्तं वसिष्ठस्यार्षमुषस्यं त्रैष्टुभं। व्युषा इत्यनुक्रमणिका॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः॥

॥ तत्र प्रथमा॥

व्यु१षा आवः पथ्या३ जनानां पंच क्षितीर्मानुषीर्बोधयंती।
सुसंदृग्भिरुक्षभिर्भानुमश्रेद्वि सूर्या रोदसी चक्षसावः॥ १

वि। उषाः। आवः। पथ्या। जनानां। पंच। क्षितीः।
मानुषीः। बोधयंती।
सुसंदृक्ऽभिः। उक्षऽभिः। भानुं। अश्रेत्। वि। सूर्या।
रोदसी इति। चक्षसा। आवरित्यावः॥ १

जनानां सर्वप्राणिनां पथ्या पथि हितोषा व्यावः। व्यौच्छत्। यद्वा जनानां हिताय व्यौच्छदिति योज्यं। किं कुर्वंती। मानुषीर्मनुष्यरूपाः पंच क्षितीर्निषाद-पंचमांश्चतुरो वर्णान्बोधयंती। ईदृश्युषाः सुसंदृग्भिः। संदृश्यते संदर्शयतीति वा संदृक् तेजः। सुतेजोभिरुक्षभिर्गोभिर्भानुमश्रेत्। अश्रयत्। आश्रितवत्याश्च ऐ० ब्रा० ४. २.। इति हि श्रुतिः। अरुण्यो गाव उषसामिति निरुक्तं। सूर्या रोदसी द्यावापृथिव्यौ तयोर्युक्ता चक्षसा प्रकाशकेन तेजसा व्यावः। विवृणोति॥

॥ अथ द्वितीया॥

व्यं१जते दिवो अंतेष्वक्तून्विशो न युक्ता उषसो यतंते।
सं ते गावस्तम आ वर्तयंति ज्योतिर्यच्छंति सवितेव बाहू॥ २

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

वि। अंजते। दिवः। अंतेषु। अक्तून्। विशः। न। युक्ताः।
उषसः। यतंते।
सं। ते। गावः। तमः। आ। वर्तयंति। ज्योतिः। यच्छंति।
सविताऽइव। बाहू इति॥ २

उषसोऽक्तून् तेजांसि दिवोऽन्तरिक्षस्यान्तेषु पर्यंतप्रदेशेषु व्यंजते। व्यक्तीकुर्वंतीत्यर्थः। युक्ताः परस्परं संयुक्ता विशो न प्रजा इव सेना इव यतंते। प्रयटंते तमोनाशनायात्र गमनाय वा। अथ प्रत्यक्षवादः। हे उषस्ते तव गावो रश्मयस्तमोऽंधकारं समावर्तयंति। नाशयंति। ज्योतिस्तेजो यच्छंति प्रयच्छंति सविता सूर्यो बाहू इव॥

॥ अथ तृतीया ॥

अभूदुषा इंद्रतमा मघोन्यजीजनत्सुविताय श्रवांसि।
वि दिवो देवी दुहिता दधात्यंगिरस्तमा सुकृते वसूनि॥ ३

अभूत्। उषाः। इंद्रऽतमा। मघोनी। अजीजनत्।
सुविताय। श्रवांसि।
वि। दिवः। देवी। दुहिता। दधाति। अंगिरःऽतमा।
सुऽकृते। वसूनि॥ ३

इंद्रतमा ऐश्वर्यवत्तमा मघोनी धनवत्युषा अभूत्। प्रादुरभूत्। सुविताय कल्याणाय श्रवांस्यन्नान्यजीजनत्। उदपादयत्। प्रकाशितवतीत्यर्थः। दिवो दुहितांगिरस्तमा गंतृतमा। यद्वांगिरोगोत्रैर्भारद्वाजैः सह रात्रेरपत्यत्वात्ते रात्र्यवसानत्वोपारूपत्वादंगिरस्तमेत्युच्यते। भारद्वाजे रात्रेः कथोत्पत्तिरनुक्रमण्यामुक्ता। रात्री कुशिकः सौभरो रात्रिर्वा भारद्वाजी। ऋग्वे० १०. १२८.। इति।। तादृश्युषाः सुकृते यजमानाय वसूनि धनानि विदधाति। करोति॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ चतुर्थी ॥

तावदुषो राधो अस्मभ्यं रास्व यावत्स्तोतृभ्यो अरदो गृणाना।
यां त्वा जज्ञुर्वृषभस्या रवेण वि दृळ्हस्य दुरो अद्रेरौर्णोः॥ ४

तावत्। उषः। राधः। अस्मभ्यं। रास्व। यावत्।
स्तोतृऽभ्यः। अरदः। गृणाना।
यां। त्वा। जज्ञुः। वृषभस्य। रवेण। वि। दृळ्हस्य।
दुरः। अद्रेः। और्णोः॥ ४

हे उषो यावद्राधो धनं स्तोतृभ्यः पूर्वमरदो दत्तवत्यसि तावद्राधो धनं गृणाना स्तूयमानाऽस्मभ्यमपि रास्व। देहि। यां त्वा त्वां वृषभस्य रवेण। सुप्तोपमैषा॥ वृषभस्येति कर्मणि षष्ठी॥ वृषभं रवेणेव त्वां प्रकाशेन जज्ञुः जानंति प्राणिनः। अथवा वृषभस्य प्रवृद्धस्य स्तोतृस्य रवेण शब्देन जज्ञुः ज्ञापयंति। दृळ्हस्य दृढस्याद्रेर्दुरो द्वाराणि पणिभिर्गा प्रवेश्य पिहितानि व्यौर्णोः विवृतान्यकरोः॥

॥ अथ पंचमी ॥

देवंदेवं राधसे चोदयंत्यस्मद्र्यक्सूनृता ईरयंती।
व्युच्छंती नः सनये धियो धा यूयं पात स्वस्तिभिः सदा नः॥ ५

देवंऽदेवं। राधसे। चोदयंती। अस्मद्र्यक्। सूनृताः। ईरयंती।
विऽउच्छंती। नः। सनये। धियः। धाः। यूयं। पात।
स्वस्तिऽभिः। सदा। नः॥ ५

देवं देवं सर्वमपि स्तोतारं राधसे धनाय चोदयंती प्रेरयंत्यस्मद्र्यक् अस्मदभिमुखं सूनृता वचांसीरयंती प्रेरयंती व्युच्छंती व्युष्टं कुर्वती नोऽस्माकं सनये दानाय धनलाभाय धियो बुद्धीर्धाः। धेहि। शिष्टं स्पष्टं॥

॥ इति पंचमस्य पंचमे षड्विंशो वर्गः॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रति स्तोमेभिरिति द्व्यृचात्मकं दशमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमुषस्यं। प्रति द्व्यृचमित्यनुक्रमणिका ॥ प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

॥ तत्र प्रथमा ॥

प्रति स्तोमेभिरुषसं वसिष्ठा गीर्भिर्विप्रासः प्रथमा अबुध्रन् ।

विवर्तयन्ती रजसी समन्ते आविष्कृण्वती भुवनानि विश्वा ॥ १

प्रति । स्तोमेभिः । उषसं । वसिष्ठाः । गीःऽभिः । विप्रासः ।

प्रथमाः । अबुध्रन् ।

विऽवर्तयन्ती । रजसी इति । समन्ते इति सम्ऽअन्ते ।

आविःऽकृण्वती । भुवनानि । विश्वा ॥ १

विप्रासो मेधाविनो वसिष्ठा वसिष्ठगोत्राः स्तोमेभिः स्तोत्रैः प्रयुज्यमाना गीर्भिः स्तुतिभिः प्रथमा इतरयजमानेभ्यः पूर्वभूताः सन्त उषसं प्रत्यबुध्रन् । प्रतिबोधयन्ति । कीदृशीमुषसं च । रजसी द्यावापृथिव्यौ समन्ते संगतपर्यन्ते एकीभूतप्रान्ते विवर्तयन्ती व्यावर्तयन्ती विश्वा सर्वाणि भुवनानि भूतजातान्याविष्कृण्वती प्रकटीकुर्वती स्वभासा ॥

॥ अथ द्वितीया ॥

एषा स्या नव्यमायुर्दधाना गूढ्वी तमो ज्योतिषोषा अबोधि ।

अग्र एति युवतिरह्रयाणा प्राचिकितत्सूर्यं यज्ञमग्निं ॥ २

एषा । स्या । नव्यं । आयुः । दधाना । गूढ्वी । तमः ।

ज्योतिषा । उषाः । अबोधि ।

अग्रे । एति । युवतिः । अह्रयाणा । प्र । अचिकितत् ।

सूर्यं । यज्ञं । अग्निं ॥ २

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एषीषाः स्वा सा गतदिवसेषु प्रतिदा उच्छ्गान्तैषा नव्यं नवतरमायुरायुष्यं । यौवनमित्यर्थः । तादृशं दधाना धारयंती गूढो गूढं तमोऽंधकारं ज्योतिषा स्वतेजसा निवारयंत्यगोभि । बुध्यते । अग्रे पुरोदेशे सूर्यस्य पुरस्ताद् देशानागमे या । पुतरदेवेभ्यः पूर्वमित्यर्थः । युवतिर्नित्यतरुणी यर्तत विभ्रयंती याहुयाणा । सुभोपयैषा । अवज्ञा युवतिरिव । सा यथा पत्युरग्रे संचरति तद्वद् सूर्यस्य पुरस्तादेति । एवंभूता सती सूर्यं यज्ञमग्निं च प्राचिकितत् । प्रज्ञापयति ॥

॥ अथ तृतीया ॥

अश्वा॑वती॒र्गोम॑तीर्न उ॒षासो॑ वी॒रव॑तीः॒ सद॑मुच्छंतु भ॒द्राः ।
घृ॒तं दुहा॑ना वि॒श्वतः॒ प्रपी॑ता यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥ ३

अश्व॑ऽवतीः । गोऽम॑तीः । नः॒ । उ॒षसः॑ । वी॒रऽव॑तीः । सद॑म् ।
उ॒च्छ॒न्तु॒ । भ॒द्राः ।
घृ॒तम् । दुहा॑नाः । वि॒श्वतः॑ । प्रऽपी॑ताः । यू॒यम् । पा॒त॒ ।
स्व॒स्तिऽभिः॑ । सदा॑ । नः॒ ॥

अश्वावतीर्बहुभिरश्वैः प्रदेयैरश्वैर्युक्ता इत्यर्थस्तथा गोमतीर्गोमत्यो गोप्रदा वीरवतीर्वीरवत्यः पुत्रदा अत एव भद्रा स्तुत्या उषास उषसः सदं सर्वदोच्छंतु । पुनः कीदृश्यः । घृतमुदकं दुहाना दोग्ध्र्यो विश्वतः प्रपीताः सर्वतः प्रवृद्धाः । यूयं पातेति गतं ॥

॥ इति पंचमस्य पंचमे सप्तविंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये पंचमाष्टके पंचमोऽध्यायः समाप्तः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥

अथ षष्ठो व्याख्यायते। सप्तमे मंडले पंचमेऽनुवाके दश सूक्तानि व्याख्यातानि। प्रत्यु अदर्शीति षड़्चमेकादशं सूक्तं वसिष्ठस्यार्षमुषस्यं। प्रथमाद्या अयुजो बृहत्यो द्वितीयाद्या युजः सतोबृहत्यः। तथा चानुक्रांतं। प्रत्यु षट् प्रागाथमिति॥ प्रातरनुवाक उषस्ये क्रतौ बार्हते छंदस्याश्विनशस्त्रे चेदं सूक्तं। सूत्रितं च। प्रत्यु अदर्शि सह वामेनेति बार्हतं। आ० ४. १४.। इति॥

॥ तत्र प्रथमा॥

प्रत्यु अदर्श्यायत्युच्छंती दुहिता दिवः।
अपो महि व्ययति चक्षसे तमो ज्योतिष्कृणोति सूनरी॥ १

प्रति। ऊं इति। अदर्शि। आऽयती। उच्छंती। दुहिता।
दिवः।
अपो इति। महि। व्ययति। चक्षसे। तमः। ज्योतिः।
कृणोति। सूनरी॥ १

आयत्यागच्छंती व्युच्छंती तमांसि विवासयंती वर्जयंती दिवो द्युलोकस्य सूर्यस्य वा दुहिता पुत्री। एवंभूतोषाः प्रत्यदर्शि। सर्वैः प्रतिदृश्यते। उ इति पूरकः। सैषा महि महत्तमो नैशमंधकारं। अप उ इति निपातद्वयसमुदायोऽप्यर्थे। अपो व्ययति। अपवृणोति। किमर्थं। चक्षसे दर्शनार्थं। एवं कृत्वा सूनरी जनानां सुष्ठु नेत्री ज्योतिः प्रकाशं कृणोति। करोति॥

॥ अथ द्वितीया॥

उदुस्रियाः सृजते सूर्यः सचाँ उद्यन्नक्षत्रमर्चिवत्।
तवेदुषो व्युषि सूर्यस्य च सं भक्तेन गमेमहि॥ २

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उत् । उस्रियाः । सृजते । सूर्यः । सचा । उत्ऽयत् । नक्षत्रं ।
अर्चिऽवत् ।
तव । इत् । उषः । विऽउषि । सूर्यस्य । च । सं । भक्तेन ।
गमेमहि ॥ २

सूर्यः सर्वस्य प्रेरक आदित्य उस्रिया रश्मीन् सचा सह युगपदेवोत्सृजति । उद्गमयति । तथोद्यदुद्गच्छत् प्रादुर्भवत् नक्षत्रं नभसि दृश्यमानं ग्रहनक्षत्रादिकमर्चिवत् दीप्तिमत्करोति । सौरेण तेजसा हि नक्तं चंद्रप्रभृतीनि नक्षत्राणि भासंते । सुषुम्णः सूर्यरश्मिश्चंद्रमा गंधर्वः । वा० सं० १८. ४० । इति हि निगमः । एवं च सति हे उषः उषोदेवते तव सूर्यस्य च व्युषि विवासने प्रकाशने सति भक्तेनान्नेन संगमेमहि । वयं संगच्छेमहि । इच्छब्दः पूरकः ॥

॥ अथ तृतीया ॥

प्रति त्वा दुहितर्दिव उषो जीरा अभुत्स्महि ।
या वहसि पुरु स्पार्हं वनन्वति रत्नं न दाशुषे मयः ॥ ३

प्रति । त्वा । दुहितः । दिवः । उषः । जीराः । अभुत्स्महि ।
या । वहसि । पुरु । स्पार्हं । वनन्ऽवति । रत्नं । न ।
दाशुषे । मयः ॥ ३

हे दिवो दुहितर्दिवोऽन्तरिक्षाज्जायमाने हे उषः उषोदेवते त्वा त्वां जीराः क्षिप्रकारिणो वयं प्रत्यभुत्स्महि । प्रतिबोद्धारो भवेम । हे वनन्वति । वननं संभजनं संभक्तव्यं धनं वा । तद्वति या त्वं पुरु बहु स्पार्हं स्पृहणीयं धनं वहसि प्रापयसि दाशुषे हवींषि दत्तवते यजमानाय रत्नं रमणीयं धनमिव मयः सुखं च या त्वं वहसि तां त्वां प्रत्यभुत्स्महीत्यन्वयः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ चतुर्थी ॥

उच्छंती या कृणोषि मंहना महि। प्रख्यै देवि स्वर्दृशे।

तस्यास्ते रत्नभाज ईमहे वयं स्याम मातुर्न सूनवः॥ ४

उच्छंती। या। कृणोषि। मंहना। महि। प्रऽख्यै। देवि।

स्वः। दृशे।

तस्याः। ते। रत्नऽभाजः। ईमहे। वयं। स्याम। मातुः।

न। सूनवः॥ ४

हे महि महति देव दानादिगुणयुक्त उषोदेवते व्युच्छंती तमांसि वर्जयंती मंहना महिम्ना युक्ता। यद्वा मंहतिर्दानकर्मा। दानयुक्ता या त्वं स्वः सर्वं जगत् प्रख्यै प्रबोधनार्थं दृशे दर्शनार्थं च कृणोषि करोषि तस्यास्तादृश्यास्ते रत्नभाजो रत्नानां रमणीयानां धनानां भाजयित्र्याः सेवयित्र्या ईमहे। याचामहे। किं। रत्नधान इति समभिव्याहाराद्रत्नानीति गम्यते। अपि च वयं प्रियतमाः स्याम भवेम मातुर्न सूनवः। यथा मातुर्जनन्याः सूनवः पुत्राः प्रियतमा भवंति तद्वत्॥

॥ अथ पंचमी ॥

तच्चित्रं राध आ भरोषो यद्दीर्घश्रुत्तमं।

यत्ते दिवो दुहितर्मर्तभोजनं तद्रास्व भुनजामहै॥ ५

तत्। चित्रं। राधः। आ। भर। उषः। यत्।

दीर्घश्रुत्ऽतमं।

यत्। ते। दिवः। दुहितः। मर्तऽभोजनं। तत्। रास्व।

भुनजामहै॥ ५

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

हे उषस्तच्चित्रं चायनीयं राधो धनमाभर। आहर। अस्मभ्यं प्रयच्छ। यद्धनं दीर्घश्रुत्तमं देशकालयोर्विप्रकर्षेऽप्यतिशयेन श्रोतव्यं। अपि च हे दिवो दुहितर्यत्तव त्वया देयं मर्तभोजनं मर्तानां मनुष्याणां भोगयोग्यं यदन्नमस्ति तद्रास्व। देह्यस्मभ्यं। वयं च त्वद्दत्तं धनमन्नं च भुनजामहै। अभ्यवहरेम॥

॥ अथ षष्ठी॥

श्रवः सूरिभ्यो अमृतं वसुत्वनं वाजाँ अस्मभ्यं गोमतः।

चोदयित्री मघोनः सूनृतावत्युषा उच्छदप स्रिधः॥ ६

श्रवः। सूरिऽभ्यः। अमृतं। वसुऽत्वनं। वाजान्। अस्मभ्यं।

गोऽमतः।

चोदयित्री। मघोनः। सूनृताऽवती। उषाः। उच्छत्।

अप। स्रिधः॥ ६

हे उषः सूरिभ्यः स्तोतृभ्योऽस्मभ्यममृतं मरणरहितं नित्यं वसुत्वनं वासकं वसुत्वयुक्तं वा श्रवः श्रवणीयं यशो रास्वेत्यनुषंगः। तथा गोमतो बहुभिर्गोभिर्युक्तान्वाजानन्नानि चास्मभ्यं रास्व। विधेः परोक्षकृतः। मघोनो हविष्मतो यजमानस्य चोदयित्री प्रेरयित्री सूनृतावती। प्रियसत्यात्मिका वाक्सूनृता। तद्वत्युषाः स्रिधः शोषकान् शत्रूनपोच्छत्। अपगमयतु॥

॥ इति पंचमस्य षष्ठे प्रथमो वर्गः॥

इंद्रावरुणेति दशर्चं द्वादशं सूक्तं वसिष्ठस्यार्षं जागतं। इदमादीनि चत्वारि सूक्तानींद्रावरुणदेवत्यानि। तथा चानुक्रांतं। इंद्रावरुणा दशैंद्रावरुणं तु जागतमिति॥ तृतीये सवन उक्थ्ये प्रशास्तुः शस्त्र एतत्सूक्तं। सूत्रितं च। इंद्रावरुणा युवमा वां राजानौ। आ० ६. १.। इति॥

॥ तत्र प्रथमा॥

इंद्रावरुणा युवमध्वराय नो विशे जनाय महि शर्म यच्छतं।

दीर्घप्रयज्युमति यो वनुष्यति वयं जयेम पृतनासु दूढ्यः॥ १

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

इंद्रावरुणा । युवं । अध्वराय । नः । विशे । जनाय । महि ।
शर्म । यच्छतं ।
दीर्घप्रयज्युं । अति । यः । वनुष्यति । वयं । जयेम ।
पृतनासु । दुःऽध्यः ॥ १

हे इंद्रावरुणाविंद्रावरुणौ युवं युवां नोऽस्माकं विशे निवेशयित्रे परिचारकाय जनाय पुत्रपौत्रादिलक्षणायाध्वराय यज्ञानुष्ठानार्थं महि महच्छर्म वरूथं सुखं वा यच्छतं प्रयच्छतं । अपि च दीर्घप्रयज्युं दीर्घप्रततयज्ञमस्मदीयं जनं यः शत्रुरतिवनुष्यति अतिजिघांसति पृतनासु संग्रामेषु दूढ्यो दुर्धियो दुष्टाभिसंधीन् तांश्छत्रून्वयं जयेम । अभिभवेम ॥

॥ अथ द्वितीया ॥

सम्राळन्य: स्वराळन्य उच्यते वां महांताविंद्रावरुणा महावसू ।
विश्वे देवासः परमे व्योमनि सं वामोजो वृषणा सं बलं दधुः ॥२

संऽराट् । अन्यः । स्वऽराट् । अन्यः । उच्यते । वां । महांतौ ।
इंद्रावरुणा । महावसू इति महाऽवसू ।
विश्वे । देवासः । परमे । विऽओमनि । सं । वां । ओजः ।
वृषणा । सं । बलं । दधुः । २

द्वितीयः पादः परोक्षकृतः शिष्टाः प्रत्यक्षकृताः । हे इंद्रावरुणौ वां युवयोर्मध्येऽन्य एको वरुणः सम्राट् सम्यक् राजमान इत्युच्यते । ता सम्राजा धर्तारा । ऋग्वे० २. ४१. ६. । इत्यादिषु कीर्त्यते । अन्य इंद्रः स्वराट् स्वयमेवान्यनिरपेक्षतया राजमान इत्युच्यते । स्वराळिंद्रो दमे । ऋग्वे० १. ६१. १५. । इत्यादिषु कीर्त्यते । तथाविधाविंद्रावरुणाविंद्रावरुणौ महांतौ गुणैरधिकौ महावसू महाधनौ च भवतः । हे वृषणा कामानां वर्षिताराविंद्रावरुणौ वां युवां परमे व्योमन्युत्कृष्ट आकाशे विश्वे देवाः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सर्वे देवा ओजः संदधुः। समयोजयन् शरीरदार्ढ्याय। तद्धेतुभूतं तदोज इत्युच्यते। स्मर्यते च। ओजः साष्टमो दशेति। तथा बलं हननादेः कार्यस्य हेतुभूतं सामर्थ्यं च युवाभ्यां संदधुः। समयोजयन् ॥

॥ अथ तृतीया ॥

अन्वपां खान्यतृंतमोजसा सूर्यमैरयतं दिवि प्रभुं।

इंद्रावरुणा मदे अस्य मायिनोऽपिन्वतमपितः पिन्वतं धियः ॥ ३

अनु। अपां। खानि। अतृंतं। ओजसा। आ। सूर्यं।

ऐरयतं। दिवि। प्रऽभुं।

इंद्रावरुणा। मदे। अस्य। मायिनः। अपिन्वतं। अपितः।

पिन्वतं। धियः ॥ ३

हे इंद्रावरुणावपामुदकानां खानि द्वाराणि वृत्रेण पिहितान्योजसा बलेनान्वतृंतं। अन्वहिंसतं। आवरकस्य वृत्रस्य वधेन वृष्टिप्रतिबंधं निराकृतवंतावित्यर्थः। तथा सूर्यं सर्वस्य प्रेरकमादित्यं दिव्यंतरिक्षे प्रभुं प्रभूतं संतमैरयतं। अभ्यगमयतं। तमोभिरावृतं सूर्यं तद्वधेन प्रकाशितवंतावित्यर्थः। हे इंद्रावरुणाविंद्रावरुणौ मायिनः प्रज्ञाकरस्यास्य सोमस्य पानेन मदे हर्षे सत्यपितो जलरहिता नदीरपिन्वतं। जलेनापूरयतं। तथा च निगमदाम्नायते। अस्य मदे जरितरिंद्रोऽजिन्वदयुधोऽपिन्वदपिस इति। अपि च धियः कर्माण्यस्माभिरनुष्ठितानि कर्माणि पिन्वतं। सिंचतं। फलेन पूरयतं ॥

॥ अथ चतुर्थी ॥

युवामिद्युत्सु पृतनासु वह्नयो युवां क्षेमस्य प्रसवे मितज्ञवः।

ईशाना। वस्व उभयस्य कारव इंद्रावरुणा सुहवा हवामहे ॥ ४

युवां। इत्। युत्ऽसु। पृतनासु। वह्नयः। युवां। क्षेमस्य।

प्रऽसवे। मितऽज्ञवः।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

ईशाना । वस्वः । उभयस्य । कारवः । इंद्रावरुणा । सुऽहवा ।

हवामहे ॥ ४

हे इंद्रावरुणौ युवयोर्वां हविषां स्तोत्राणां वा वोढार ऋत्विजो युवां युष्मेषु हसनात् मनुषेषु रक्षणार्थं युवामित् युवामेव ह्वयंते । आह्वयंति । मितज्ञवः संकुचित-जानुका अंगिरसोऽपि येनस्य रक्षणस्य प्रजाय उत्पादने निमित्तभूते सति युवामेव ह्वयंते । अतः कारणात् हे इंद्रावरुणौ कारवः स्तोतारो वयमप्युभयस्य दिव्यस्य पार्थिवस्य च वस्वो वसुनो धनस्येशाना ईश्वरौ सुहवा सुखेन ह्वातव्यौ युवामेव हवामहे । आह्वयामहे ॥

॥ अथ पंचमी ॥

इंद्रावरुणा यदिमानि चक्रथुर्विश्वा जातानि भुवनस्य मज्मना ।
क्षेमेण मित्रो वरुणं दुवस्यति मरुद्भिरुग्रः शुभमन्य ईयते ॥ ५

इंद्रावरुणा । यत् । इमानि । चक्रथुः । विश्वा । जातानि ।

भुवनस्य । मज्मना ।

क्षेमेण । मित्रः । वरुणं । दुवस्यति । मरुत्ऽभिः । उग्रः ।

शुभं । अन्यः । ईयते ॥ ५

हे इंद्रावरुणौ यत् यौ युवां भुवनस्य लोकस्य संबंधीनीमानि परिदृश्यमानानि विश्वानि सर्वाणि जातानि जातिमंति भूतजातानि मज्मना महीयेन बलेन चक्रथुः कृतवंतौ तयोर्युवयोर्मध्ये एकं वरुणं क्षेमेण रक्षणहेतुना मित्रो देवो दुवस्यति । परिचरति । मिलावरुणौ हि परस्परं प्राप्नुवतौ । यत् एव सहचरौ उच्येते । अन्य एक इंद्रो मरुद्भिर्मरुद्गणैः सह उग्रः उद्गूर्णबलः सन् शुभं शोभनमलंकारमीयते । प्राप्नोति । यद्वा मरुद्भिरंतरिक्षस्थानैर्देवगणैः सार्धमुग्र ओजस्वीइंद्रः शुभमुदकमीयते । प्रेरयति ॥

॥ इति पंचमस्य षष्ठे द्वितीयो वर्गः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ षष्ठी ॥

महे शुल्काय वरुणस्य नु त्विष ओजो मिमाते ध्रुवमंस्य यत्स्वं।

अजामिमन्यः श्नथयंतमातिरद्दभ्रेभिरन्यः प्र वृणोति भूयसः॥ ६

महे। शुल्काय। वरुणस्य। नु। त्विषे। ओजः। मिमाते इति।

ध्रुवं। अस्य। यत्। स्वं।

अजामिं। अन्यः। श्नथयंतं। आ। अतिरत्। दभ्रेभिः।

अन्यः। प्र। वृणोति। भूयसः॥ ६

वरुणस्य। उपलक्षणमेतत्। इंद्रस्य वरुणस्य च त्विषे दीप्त्यर्थमोजो बलं नु क्षिप्रं मिमाते। स्तोत्रेण निर्मिमाते यजमानपत्न्यौ। स्तोत्रेण हि बलं जायते। किमर्थं। महे महते शुल्काय धनाय। ईदृशस्य धनस्य लाभार्थं। यद्वेंद्रस्य वरुणस्य च ध्रुवं नित्यं स्वं स्वकीयमसाधारणं यदोजो विद्यते तदोजो मिमाते इत्यन्वयः। तयोरिंद्रावरुणयोरन्य एको वरुणोऽजामिमबंधुमस्तुवंतं श्नथयंतं हिंसंतं कर्माण्यकुर्वंतमस्तोतारमयजमानं चातिरत्। अभिभवति। अन्य एक इंद्रो दभ्रेभिरल्पैरेवोपायैर्भूयसो बहुतरानप्यरातीन् प्र वृणोति। प्रकर्षेणावृतान् बाधितान् करोति। यद्वा भूयसो यजमानान् प्र वृणोति। प्रवरानुत्कृष्टान्करोति॥

॥ अथ सप्तमी ॥

न तमंहो न दुरितानि मर्त्यमिंद्रावरुणा न तपः कुतश्चन।

यस्य देवा गच्छथो वीथो अध्वरं न तं मर्तस्य नशते

परिह्वृतिः॥ ७

न। तं। अंहः। न। दुःऽइतानि। मर्त्यं। इंद्रावरुणा। न।

तपः। कुतः। चन।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यस्य । देवा । गच्छथः । वीथः । अध्वरं । न । तं । मर्तस्य ।

नशते । परिऽह्वृतिः ॥ ७

हे इंद्रावरुणाविंद्रावरुणौ तं मर्त्यं मनुष्यमंहः पापं न नशते । न व्याप्नोति । न च दुरितानि दुर्गमनानि पापफलानि च प्राप्नुवंति । कुतश्चन कस्मादपि निमित्तात्तपः संतापश्च तं न प्राप्नोति । हे देवा देवौ दानादिगुणयुक्ताविंद्रावरुणौ यस्य मर्त्यस्य मनुष्यस्याध्वरं यज्ञं गच्छथः प्राप्नुथो युवां वीथः कामयेथे च यस्य हवींषि तं मनुष्यं परिह्वृतिः परिबाधा न नशते । उक्तप्रकारेण न प्राप्नोति ॥

॥ अथाष्टमी ॥

अर्वाङ्नरा दैव्येनावसा गतं शृणुतं हवं यदि मे जुजोषथः ।

युवोर्हि सख्यमुत वा यदाप्यं मार्डीकमिंद्रावरुणा नि यच्छतं ॥ ८

अर्वाक् । नरा । दैव्येन । अवसा । आ । गतं ॥ शृणुतं ।

हवं । यदि । मे । जुजोषथः ।

युवोः । हि । सख्यं । उत । वा । यत् । आप्यं । मार्डीकं ।

इंद्रावरुणा ॥ नि । यच्छतं ॥ ८

हे नरा नेताराविंद्रावरुणौ दैव्येन देवसंबंधिनावसा रक्षणेन सहार्वागस्मदभिमुखमागतं । आगच्छतं । आगत्य च मदीयं हवं स्तोत्रं शृणुतं । यदि मे मम जुजोषथः प्रीयेथे । यदि प्रीतिरस्ति चेत् युवाभ्यामागंतव्यं मदीयं स्तोत्रं श्रोतव्यं च भवतीत्यर्थः । युवोर्हि युवयोः खलु यत्सख्यं सखित्वमुत वापि च यदाप्यमापित्वं बांधवं मार्डीकं मृडीकस्य सुखस्य साधनं तदुभयं हे इंद्रावरुणौ नियच्छतं । अस्मभ्यं प्रयच्छतं ॥

अथ नवमी ॥

अस्माकमिंद्रावरुणा भरेभरे पुरोयोधा भवतं कृष्ट्योजसा ।

यद्वां हवंत उभये अध स्पृधि नरस्तोकस्य तनयस्य सातिषु ॥ ९

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अस्माकं। इंद्रावरुणा। भरेऽभरे। पुरःऽयोधा। भवतं।
कृष्टिऽओजसा।

यत्। वां। हवंते। उभये। अध। स्पृधि। नरः। तोकस्य।
तनंयस्य। सातिषु॥ ९

हे कृष्ट्योजसा। मनुष्याणां कर्षकाणां वा बलं ययोस्तादृशौ। हे इंद्रावरुणौ भरेभरे संग्रामे संग्रामेऽस्माकं पुरोयोधा पुरस्ताद्योद्धारौ भवतं। यत् यौ वां उभये उभयविधा पूर्वकालीना इदानींतनाश्च नरो नेतारः स्तोतारः स्पृधि युद्धे यौ युवां हवंते। अथापि च तोकस्य पुत्रस्य तनयस्य पौत्रस्य सातिषु संभजनीयेषु निमित्तभूतेषु च यौ युवां हवंते तावस्माकं पुरोयोधा भवतमित्यन्वयः॥

॥ अथ दशमी॥

अस्मे इंद्रो वरुणो मित्रो अर्यमा द्युम्नं यच्छंतु महि शर्म सप्रथः।
अवध्रं ज्योतिरदितेर्ऋतावृधो देवस्य श्लोकं सवितुर्मनामहे॥ १०

अस्मे इति। इंद्रः। वरुणः। मित्रः। अर्यमा। द्युम्नं।
यच्छंतु। महि। शर्म। सऽप्रथः।

अवध्रं। ज्योतिः। अदितेः। ऋतऽवृधः। देवस्य। श्लोकं।
सवितुः। मनामहे॥ १०

अस्मे अस्मभ्यमिंद्रादयो द्युम्नं द्योतमानं धनं यच्छंतु। प्रयच्छंतु। तथा महि महत्सप्रथः सर्वतः पृथु विस्तीर्णं शर्म गृहं च प्रयच्छंतु। अपि च ऋतावृधः ऋतस्य यज्ञस्य वर्धयित्र्या अदितेरदीनाया देवमातुर्ज्योतिस्तेजश्च यदस्माकमवध्रमहिंसकमस्तु। वयं च देवस्य दानादिगुणयुक्तस्य सवितुः सर्वस्य प्रेरकस्य श्लोकं स्तुतिं मनामहे।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

जानीथः । कुशं इत्यर्थः । यद्वा देवेन सवित्रा सख्यं देयं श्लोकं यशो वनामहे । याचामहे ॥

॥ इति पंचमस्य षष्ठे तृतीयो वर्गः ॥

युवां नरेति दशर्चं त्रयोदशं सूक्तं वसिष्ठस्यार्षं जागतं मैत्रावरुणं । युवां नरेत्यनुक्रांतं ॥ अभिप्लविकेषूक्थ्येषु स्तोत्रियानुरूपावौ पृगास्तुरिदं सूक्तमावापार्थं । सूत्रितं च । युवां नरा पुनीते यां । आ० ७. ८. । इति ॥

॥ तत्र प्रथमा ॥

युवां नरा पश्यमानास आप्यं प्राचा गव्यंतः पृथुपर्शवो ययुः ।
दासा च वृत्रा हतमार्याणि च सुदासमिंद्रावरुणावसावतं ॥ १

युवां । नरा । पश्यमानासः । आप्यं । प्राचा । गव्यंतः ।
पृथुऽपर्शवः । ययुः ।
दासा । च । वृत्रा । हतं । आर्याणि । च । सुऽदासं ।
इंद्रावरुणा । अवसा । अवतं ॥ १

हे नरा नेताराविंद्रावरुणौ युवां ॥ षष्ठ्यर्थे द्वितीया ॥ युवयोराप्यं बंधुभावं पश्यमानासः पश्यंतो युष्मदाप्यलाभार्थिनो गव्यंतो गा आत्मन इच्छंतो यजमानाः पृथुपर्शवः । पृथुर्विस्तीर्णः पर्शुः । पार्श्वास्थि येषां ते तथोक्ताः । विस्तीर्णाग्निपार्श्वयुक्ताः संतः प्राचा प्राचीनं ययुः बर्हिराहरणार्थं गच्छंति । पर्शुर्हि बर्हिराच्छिद्यते । तथा च तैत्तिरीयकं । अश्वपर्श्वा बर्हिरच्छैतीति । हे इंद्रावरुणौ युवां दासा दासान्युपक्षपयितॄणि च वृत्राण्यावरकाणि शत्रुजातान्यार्याणि च कर्मानुष्ठानपराणि च यजमानानि हतं । हिंस्तं । अपि च सुदासमेतन्नामकं राजानमवसा रक्षणेन सार्धमवतं । आगच्छतं ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ द्वितीया ॥

यत्रा नरः समयंते कृतध्वजो यस्मिन्नाजा भवति किं चन

प्रियं ।

यत्रा भयंते भुवना स्वर्दृशस्तत्रा न इंद्रावरुणाधि वोचतं ॥ २

यत्र । नरः । सम्ऽअयंते । कृतऽध्वजः । यस्मिन् । आजा ।

भवति । किं । चन । प्रियं ।

यत्र । भयंते । भुवना । स्वःऽदृशः । तत्र । नः । इंद्रावरुणा ।

अधि । वोचतं ॥ २

यत्र यस्मिन् संग्रामे नरो मनुष्याः कृतध्वजा उच्छ्रितध्वजाः समयंते युद्धार्थं संगच्छंते । यस्मिंश्चाजाजौ युद्धे । चनेति निपातद्वयसमुदायो विभज्य योजनीयः । किंच किमपि प्रियमनुकूलं न भवति । अपि तु सर्वं दुष्करं भवति । यत्र च युद्धे भुवना भुवनानि भूतजातानि स्वर्दृशः शरीरपातादूर्ध्वं स्वर्गस्य द्रष्टारो वीराश्च भयंते बिभ्यति तत्र तादृशे संग्रामे हे इंद्रावरुणौ नोऽस्मानधिवोचतं । अस्मत्पक्षपातवचनौ भवतं ॥

॥ अथ तृतीया ॥

सं भूम्या अंता ध्वसिरा अदृक्षतेंद्रावरुणा दिवि घोष

आरुहत् ।

अस्थुर्जनानामुप मामरातयोऽर्वागवसा हवनश्रुता गतं ॥ ३

सं । भूम्याः । अंताः । ध्वसिराः । अदृक्षत । इंद्रावरुणा ।

दिवि । घोषः । आ । अरुहत् ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अस्थुः । जनानां । उप । मां । अरातयः । अर्वाक् । अवसा ।

हवनऽश्रुता । आ । गतं ॥ ३

हे इंद्रावरुणौ भूम्या अंताः पर्यंता ध्वसिराः सैनिकैर्ध्वस्ताः समदृश्यंत । संदृश्यंते । तथा दिवि द्युलोके घोषः सैनिकानां शब्दोऽरुहत् । आरूढोऽभूत् । जनानामस्मदीयानां भटानामरातयः शत्रवो मामुपास्थुः । उपस्थिताः । एवं प्रवर्तमानेऽस्मिन्युद्धे हे हवनश्रुताह्वानश्रोताराविंद्रावरुणाववोभिरस्मदभिमुखमवसा रक्षणेन सहागतं । आगच्छतं ॥

॥ अथ चतुर्थी ॥

इंद्रावरुणा वधनाभिरप्रति भेदं वन्वंता प्र सुदासमावतं ।

ब्रह्माण्येषां शृणुतं हवीमनि सत्या तृत्सूनामभवत्पुरोहितिः ॥ ४

इंद्रावरुणा । वधनाभिः । अप्रति । भेदं । वन्वंता । प्र ।

सुऽदासं । आवतं ।

ब्रह्माणि । एषां । शृणुतं । हवीमनि । सत्या । तृत्सूनां ।

अभवत् । पुरःऽहितिः ॥ ४

हे इंद्रावरुणाविंद्रावरुणौ वधनाभिर्वधकरैरायुधैरप्रतिगतमप्राप्तं भेदमेतन्नामकं शत्रुं वन्वंता हिंसंतौ युवां सुदासं । शोभनं ददातीति सुदाः । एतन्नामकं मम याज्यं राजानं प्रावतं । प्रकर्षेण रक्षतं । एषां तृत्सूनां मम याज्यानां ब्रह्माणि स्तोत्राणि शृणुतं । अशृणुतं । कदा । हवीमनि । आहूयंतेऽस्मिन्युद्धार्थं परस्परमिति हवीमा संग्रामः । तस्मिन् । यस्मादेवं तस्मात्तृत्सूनामेतन्नामकानां मम याज्यानां पुरोहितिर्मदीयं पुरोधानं सत्या सत्यफलमभवत् । तेषु मदीयं पौरोहित्यं तत्सफलं जातमित्यर्थः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ पंचमी ॥

इंद्रावरुणावभ्या तपंति माघान्यर्यो वनुषामरातयः ।
युवं हि वस्व उभयस्य राजथोऽध स्मा नोऽवतं पार्ये दिवि ॥ ५

इंद्रावरुणौ । अभि । आ । तपंति । मा । अघानि । अर्यः ।
वनुषां । अरातयः ।
युवं । हि । वस्वः । उभयस्य । राजथः । अध । स्म । नः ।
अवतं । पार्ये । दिवि ॥ ५

हे इंद्रावरुणावर्योऽरेः शत्रोः संबंधीन्यघान्याहंतॄण्यायुधानि मा मामभ्यातपंति अभितो बाधंते। अपि च वनुषां हिंसकानां मध्येऽरातयोऽभिगमनशीलाः शत्रवो मामभितपंति। युवं हि युवां खलूभयस्य पार्थिवस्य दिव्यस्य वस्वो वसुनो धनस्य राजथः। ईशाथे। राजतिरैश्वर्यकर्मा। अध अतः कारणात् पार्ये तरणीये दिवि दिवसे युद्धदिने नोऽस्मानवतं। रक्षतं ॥

॥ इति पंचमस्य षष्ठे चतुर्थो वर्गः ॥

॥ अथ षष्ठी ॥

युवां हवंत उभयास आजिष्विंद्रं च वस्वो वरुणं च सातये।
यत्र राजभिर्दशभिर्निबाधितं प्र सुदासमावतं तृत्सुभिः सह ॥ ६

युवां । हवंते । उभयासः । आजिषु । इंद्रं । च । वस्वः ।
वरुणं । च । सातये ।
यत्र । राजऽभिः । दशऽभिः । निऽबाधितं । प्र । सुऽदासं ।
आवतं । तृत्सुऽभिः । सह ॥ ६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उभयास उभयविधाः सुदाःसंज्ञो राजा तत्सहायभूतास्तृत्सवश्चैवं द्विप्रकारा जना आजिषु संग्रामेष्विंद्रं च वरुणं च युवां हवंते। आह्वयंते। किमर्थं। वसो धनस्य सातये संभजनार्थं। यत्र येष्वाजिषु दशभिर्दशसंख्याकै राजभिः शत्रुभूतैर्नृपैर्नि-बाधितं नितरां हिंसितं सुदासं तृत्सुभिः सह शरणागतं प्रावतं युवां प्रकर्षेणारक्षतं तेष्वाजिष्वित्यन्वयः ॥

॥ अथ सप्तमी ॥

दश राजानः समिता अयज्यवः सुदासमिंद्रावरुणा न युयुधुः ।
सत्या नृणामद्मसदामुपस्तुतिर्देवा एषामभवन्देवहूतिषु ॥ ७

दश । राजानः । सम्ऽइताः । अयज्यवः । सुऽदासं ।
इंद्रावरुणा । न । युयुधुः ।
सत्या । नृणां । अद्मऽसदां । उपऽस्तुतिः । देवाः । एषां ।
अभवन् । देवऽहूतिषु ॥ ७

हे इंद्रावरुणौ दशसंख्याका राजानः सुदासः शत्रवः समिताः संगताः परस्परं समवेता अयज्यवोऽयजमाना एवंभूतास्ते सुदासमेकं संग्रामेष्वपि राजानं न युयुधुः। न संप्रजह्रुः। युवाभ्यामनुगृहीतं तं प्रहर्तुं न शेकुः। अद्मानोऽद्मसदां। अद्मान्यन्ने हवींषि सीदंतीत्यद्मसद ऋत्विजः। ऋत्विग्भिर्युक्तानां नृणां यज्ञस्य नेतृणां तेषामृत्विजा-मुपस्तुतिः स्तोत्रं सत्या सफलमभूत्। अपि चैषां देवहूतिषु। देवा हूयंत एभिरिति देवहूतयो यज्ञाः। तेषु सर्वे च देवा अभवन्। युष्मदनुग्रहात्प्रादुर्भवंति ॥

॥ अथाष्टमी ॥

दाशराज्ञे परियत्ताय विश्वतः सुदास इंद्रावरुणावशिक्षतं ।
श्वित्यंचो यत्र नमसा कपर्दिनो धिया धीवंतो असपंत
तृत्सवः ॥ ८

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दाशऽराज्ञे । परिऽयत्ताय । विश्वतः । सुऽदासे ।

इंद्रावरुणौ । अशिक्षतं ।

श्वित्यंचः । यत्र । नमसा । कपर्दिनः । धिया । धीऽवंतः ।

असपंत । तृत्सवः ॥ ८

हे इंद्रावरुणौ दाशराज्ञे । दशशब्दस्य छांदसो दीर्घः । विभक्तिव्यत्ययः ॥ दशभी राजभिः शत्रुभूतैर्विश्वतः सर्वतः परियत्ताय परिवेष्टिताय सुदासे राज्ञेऽशिक्षतं । धनं प्रायच्छतं । यत्र यस्मिन्देशे श्वित्यंचः श्वितं श्वैत्यं नैर्मल्यमंचंतो गच्छंतः कपर्दिनो जटिला धीवंतः कर्मभिर्युक्तास्तृत्सवो वसिष्ठशिष्या एतत्संज्ञा ऋत्विजो नमसा हविर्लक्षणेनान्नेन धिया स्तुत्यासपंत पर्यचरन् तस्मिन्देशे युवां तस्मै राज्ञे धनं प्रायच्छतमित्यर्थः ॥

॥ अथ नवमी ॥

वृत्राण्यन्यः समिथेषु जिघ्नते व्रतान्यन्यो अभि रक्षते सदा ।
हवामहे वां वृषणा सुवृक्तिभिरस्मे इंद्रावरुणा शर्म यच्छतं ॥ ९

वृत्राणि । अन्यः । संऽइथेषु । जिघ्नते । व्रतानि । अन्यः ।

अभि । रक्षते । सदा ।

हवामहे । वां । वृषणा । सुवृक्तिऽभिः । अस्मे इति ।

इंद्रावरुणा । शर्म । यच्छतं ॥ ९

हे इंद्रावरुणौ युवयोरन्य एक इंद्रो वृत्राणि शत्रून् समिथेषु संग्रामेषु जिघ्नते । हंति । अन्य एको वरुणः सद सर्वदा व्रतानि कर्माण्यभि रक्षते । अभितः सर्वतो रक्षति । हे वृषणा कामानां वर्षिताराविंद्रावरुणौ तथाविधौ वां युवां सुवृक्तिभिः सुप्रवृत्ताभिः स्तुतिभिर्हवामहे । आह्वयामहे । आहूतौ च युवामस्मे अस्मभ्यं शर्म सुखं यच्छतं । दत्तं ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उभयास उभयविधाः सुदाःसंज्ञो राजा तत्सहायभूतास्तृत्सवश्चैवं द्विप्रकारा जना आजिषु संग्रामेष्विंद्रं च वरुणं च युवां ह्वयंते। आह्वयंते। किमर्थं। वस्वो धनस्य सातये संभजनाय। यत्र येष्वाजिषु दशभिर्दशसंख्याकै राजभिः शत्रुभूतैर्नृपैर्निबाधितं नितरां हिंसितं सुदासं तृत्सुभिः सह वर्तमानं प्रावतं युवां प्रकर्षेणारक्षतं तेष्वाजिष्वित्यन्वयः ॥

॥ अथ सप्तमी ॥

दश राजानः समिता अयज्यवः सुदासमिंद्रावरुणा न युयुधुः ।

सत्या नृणामद्मसदामुपस्तुतिर्देवा एषामभवन्देवहूतिषु ॥ ७

दश । राजानः । सम्ऽइताः । अयज्यवः । सुऽदासं ।

इंद्रावरुणा । न । युयुधुः ।

सत्या । नृणां । अद्मऽसदां । उपऽस्तुतिः । देवाः । एषां ।

अभवन् । देवऽहूतिषु ॥ ७

हे इंद्रावरुणौ दशसंख्याका राजानः सुदासः शत्रवः समिताः संगताः परस्परं समवेता अयज्यवोऽयजमाना एवंभूतास्ते सुदासमेनमेकमपि राजानं न युयुधुः। न संप्रजह्रुः। युवाभ्यामनुगृहीतं तं प्रहर्तुं न शेकुः। तदानीमद्मसदां। अद्ममन्नमुच्यते हविरपि सीदंतीत्यद्मसद ऋत्विजः। हविर्भिर्यज्ञानां नृणां यज्ञस्य नेतॄणामस्मदृत्विजामुपस्तुतिः स्तोत्रं सत्या सफलमभूत्। अपि चैषां देवहूतिषु। देवा हूयंत एष्विति देवहूतयो यज्ञाः। तेषु सर्वे च देवा अभवन्। युष्मदनुग्रहात्प्रादुर्भवंति ॥

। अथाष्टमी ।

दाशराज्ञे परियत्ताय विश्वतः सुदास इंद्रावरुणावशिक्षतं ।

श्वित्यंचो यत्र नमसा कपर्दिनो धिया धीवंतो असपंत

तृत्सवः ॥ ८

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्र । वां । घृताची । बाह्वोः । दधाना । परि । त्मना ।

विषुऽरूपा । जिगाति ॥ १

हे राजानौ राजमानावीश्वरौ इंद्रावरुणावध्वरे हिंसारहितेऽस्मिन्यागे वां युवां हव्येभिर्हविर्भिर्नमोभिः स्तोत्रैश्चावर्तयध्यां । आवर्तयामि । अपि च वां बाह्वोर्हस्तयोर्दधाना धार्यमाणा विषुरूपा । रूप्यत इति रूपं हविः । विश्वरूपहविर्युक्ता घृताची घृतसंयुक्ता जुहूः स्वयमात्मना स्वयमेव वां युवां परिप्रजिगाति । अभिप्रगच्छति । यद्वा विषुरूपा नानाविधरूपो वाऽभिमत इति योज्यं ॥

अथ द्वितीया ॥

युवो राष्ट्रं बृहदिन्वति द्यौर्यौ सेतृभिररज्जुभिः सिनीथः ।

परि नो हेळो वरुणस्य वृज्या उरुं न इंद्रः कृणवदु लोकं ॥ २

युवोः । राष्ट्रं । बृहत् । इन्वति । द्यौः । यौ । सेतृऽभिः ।

अरज्जुऽभिः । सिनीथः ।

परि । नः । हेळः । वरुणस्य । वृज्याः । उरुं । नः । इंद्रः ।

कृणवत् । ऊं इति । लोकं ॥ २

हे इंद्रावरुणौ युवोर्युवयोर्बृहन्महद्राष्ट्रं राज्यं द्यौर्द्युलोकरूपमिन्वति । इच्छा यजमानान् प्रीणयति । यौ युवां सेतृभिर्बंधकैररज्जुभी रज्जुरहितैर्रोगादिभिः सिनीथः पापकृतो बध्नीथः ॥ षिञ् बंधन इति धातुः ॥ तयोर्मध्ये वरुणस्य वारयितुर्देवस्य हेळः क्रोधो नोऽस्मान्परिवृज्याः । परिवर्जयतु । परित्यज्यान्यत्र गच्छतु । इंद्र च उरुं विस्तीर्णं लोकं स्थानं कृणवत् । करोतु ॥

॥ अथ तृतीया ॥

कृतं नो यज्ञं विदथेषु चारुं कृतं ब्रह्माणि सूरिषु प्रशस्ता ।

उपो रयिर्देवजूतो न एतु प्र णः स्पार्हाभिरूतिभिस्तिरेतं ॥ ३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कृतं । नः । यज्ञं । विदथेषु । चारुं । कृतं । ब्रह्माणि ।
सूरिषु । प्रऽशस्ता ।
उपो इति । रयिः । देवऽजूतः । नः । एतु । प्र । नः ।
स्पार्हाभिः । ऊतिऽभिः । तिरेतं ॥ ३

हे इन्द्रावरुणौ नोऽस्माकं विदथेषु यज्ञेषु क्रियमाणं यज्ञं चारुं शोभनं फलसहितं कृतं । कुरुतं । तथा सूरिषु स्तोतृष्वस्मासु विद्यमानानि ब्रह्माणि परिवृढानि स्तोत्राणि प्रशस्ता प्रशस्तान्युत्कृष्टानि फलवन्ति कृतं । कुरुतं । अपि च देवजूतो देवाभ्यां युवाभ्यां प्रेरितो रयिर्धनं नोऽस्मानुपैतु । प्राप्नोतु । तथा स्पार्हाभिः स्पृहणीयाभिरूतिभी रक्षाभिर्नोऽस्मान् प्रतिरेतं युवां वर्धयेथां । प्रपूर्वस्तिरतिर्वर्धनार्थः ॥

॥ अथ चतुर्थी ॥

अस्मे इन्द्रावरुणा विश्ववारं रयिं धत्तं वसुमन्तं पुरुक्षुं ।
प्र य आदित्यो अनृता मिनात्यमिता शूरो दयते वसूनि ॥ ४

अस्मे इति । इन्द्रावरुणा । विश्वऽवारं । रयिं । धत्तं ।
वसुऽमन्तं । पुरुऽक्षुं ।
प्र । यः । आदित्यः । अनृता । मिनाति । अमिता ।
शूरः । दयते वसूनि ॥ ४

हे इन्द्रावरुणावस्मे अस्मभ्यं रयिं धनं धत्तं । प्रयच्छतं । कीदृशं । विश्ववारं विश्वैः सर्वैर्वरणीयं संभजनीयं वसुमन्तं निवासयुक्तं पुरुक्षुं बह्वन्नं पुरुभिर्बहुभिः प्रशस्यं वा । आदित्योऽदितेः पुत्रो यो वरुणोऽनृतान्यनृतानि सत्यरहितानि भूतानि प्रमिनाति प्रहिनस्ति ॥ मीङ् हिंसायामिति धातुः ॥ शूरः शौर्यवान् स वरुणोऽमितामितान्यपरिमितानि वसूनि धनानि दयते । स्तोतृभ्यो ददाति ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ पंचमी ॥

इयमिंद्रं वरुणमष्ट मे गीः प्रावत्तोके तनये तूतुजाना।

सुरत्नासो देववीतिं गमेम यूयं पात स्वस्तिभिः सदा नः॥ ५

इयं। इंद्रं। वरुणं। अष्ट। मे। गीः। प्र। आवत्।

तोके। तनये। तूतुजाना।

सुऽरत्नासः। देवऽवीतिं। गमेम। यूयं। पात। स्वस्तिऽभिः।

सदा। नः॥ ५

मे मदीयेयं गीः स्तुतिरिंद्रं वरुणं चाष्ट। अश्नुतां। व्याप्नोतु। तथा तूतुजाना त्वरमाणा सा तोके पुत्रे तनये पौत्रे च विषये प्रावतु। प्ररक्षत्वस्मान्। वयं च सुरत्नासः शोभनधनाः संतो देववीतिं देवैः कामयितव्यं यज्ञं गमेम। प्राप्नुयाम। हे इंद्रावरुणादयः सर्वे देवा यूयं स्वस्तिभिः कल्याणैरस्मान् सदा सर्वदा पात रक्षत॥

॥ इति पंचमस्य षष्ठे षष्ठो वर्गः॥

पुनीषे वामिति पंचर्चं पंचदशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैंद्रावरुणं। पुनीष इत्यनुक्रांतं॥ आभिप्लविकेषूक्थ्येषु तृतीयसवने स्तोमवृद्धौ यथास्तुतिदिनावापार्थं। सूक्तिं च। युवां नरा पुनीषे वां। आ० ७. ९. । इति॥

॥ तत्र प्रथमा ॥

पुनीषे वामरक्षसं मनीषां सोममिंद्राय वरुणाय जुह्वत्।

घृतप्रतीकामुषसं न देवीं ता नो यामन्नुरुष्यतामभीके॥ १

पुनीषे। वां। अरक्षसं। मनीषां। सोमं। इंद्राय।

वरुणाय। जुह्वत्।

घृतऽप्रतीकां। उषसं। न। देवीं। ता। नः। यामन्।

उरुष्यतां। अभीके॥ १

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

इंद्रावरुणौ वां युवाभ्यां युवयोरर्थं रक्षोरहितां राक्षसैरसंस्पृष्टां मनीषां स्तुतिं पुनीषे। शोधयामि। किं कुर्वन्। इंद्राय वरुणाय च सोमं जुह्वत् इंद्रं वरुणं चोद्दिश्य सोमयज्ञे प्रक्षिपन्। कीदृशीं मनीषां। देवीं द्योतमानामुषसं न उषसमिव घृतप्रतीकां दीप्तावयवां। किंच। परीच्छतः। ता ताविंद्रावरुणावभीकेऽभिगते युद्धे यामन् यामनि युद्धार्थं गमने सति नोऽस्मानुरुष्यतां। रक्षतां॥

॥ अथ द्वितीया ॥

स्पर्धंते वा उ देवहूये अत्र येषु ध्वजेषु दिद्यवः पतंति ।
युवं ताँ इंद्रावरुणावमित्रान्हतं पराचः शर्वा विषूचः ॥ २

स्पर्धंते । वै । ऊं इति । देवऽहूये । अत्र । येषु । ध्वजेषु ।
दिद्यवः । पतंति ।
युवं । तान् । इंद्रावरुणौ । अमित्रान् । हतं । पराचः ।
शर्वा । विषूचः । २

देवहूये। देवा विजिगीषवो योद्धारो हूयंते युद्धार्थं परस्परमाह्वयंत इति देवहूयः संग्रामः। अत्रास्मिन्देवहूये संग्रामे स्पर्धंते वै मर्त्योऽस्माभिः स्पर्धंते खलु। उ इति पूरकः। येषु संग्रामेषु ध्वजेषु पताकासु दिद्यवः शत्रुक्षिप्तान्यायुधानि पतंति तान् तेषु संग्रामेषु विद्यमानानमित्रान् शत्रून् हे इंद्रावरुणौ युवं युवां शर्वा शर्वणा हिंसकेनायुधेन पराचः पराङ्मुखान् विषूचो विविधगतींश्च हतं। हिंस्तं। यथा ते शत्रवः पराङ्मुखा इतस्ततः पलायमानाश्च भवंति तथा तान्मारयेतमित्यर्थः॥

॥ अथ तृतीया ।

आपश्चिद्धि स्वयशसः सदःसु देवीरिंद्रं वरुणं देवता धुः ।
कृष्टीरन्यो धारयति प्रविक्ता वृत्राण्यन्यो अप्रतीनि हंति ॥ ३

आपः । चित् । हि । स्वऽयशसः । सदःऽसु । देवीः । इंद्रं ।
वरुणं । देवता । धुरिति धुः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

कृष्टीः । अन्यः । धारयति । प्रऽविक्ताः । वृत्राणि । अन्य ।
अप्रतीनि । हंति ॥ ३

आपश्चिद्विकाराः सोमाख्याः स्वयशसः स्वायत्तयशस्का देवीर्द्योतमाना सत्यः सदस्सु सदनेषु स्थानेष्विंद्रं वरुणं च देवता ते द्वे देवते धुः । धारयंति । अवस्थापयंति । सोमेनाप्यायिता हि देवताः स्वे स्वे स्थानेऽवतिष्ठंते । यद्वा वसतीवर्याख्या आप एव सोमाभिषवद्वारा सदनेष्विंद्रं वरुणं च धारयंति । तयोरिंद्रावरुणयोरन्य एकः प्रविक्ताः पृथग्भूताः पुण्यापुण्यविवेकेन विविक्तफलभोक्त्रीः कृष्टीः प्रजा असांकर्येण धारयति । अन्य इंद्रो वृत्राणि शत्रुजातान्यप्रतीन्यन्यैरप्रतिगतानि हंति । हिनस्ति ॥

॥ अथ चतुर्थी ॥

स सुक्रतुर्ऋतचिदस्तु होता य आदित्य शवसा वां नमस्वान् ।
आववर्तदवसे वां हविष्मानसदित्स सुविताय प्रयस्वान् ॥ ४

सः । सुऽक्रतुः । ऋतऽचित् । अस्तु । होता । यः ।
आदित्या । शवसा । वां । नमस्वान् ।
आऽववर्तत् । अवसे । वां । हविष्मान् । असत् । इत् । सः ।
सुविताय । प्रयस्वान् ॥ ४

सुक्रतुः शोभनकर्मा शोभनप्रज्ञो वा स होता स्तोता ऋतचिदृतस्योदकस्य यज्ञस्य वा चेता चिचेतास्तु । भवतु । हे आदित्यावदितेः पुत्राविंद्रावरुणौ ॥ छांदसः सांहितिको ह्रस्वः ॥ यो नमस्वान् नमसा नमस्कारेण स्तोत्रेण वा युक्तः सन् शवसा बलेन युक्तो वां युवां । परिचरतीति शेषः । स सुक्रतुरित्यन्वयः । अपि च यो हविष्मान् हविर्भिर्युक्तः सन् अवसे तर्पणाय वां युवामाववर्तत् आवर्तयेत् स यजमानः प्रयस्वानन्नवान् भूत्वा सुविताय सुष्ठु प्राप्तव्याय फलायासदित् । भवेदेव ॥

॥ अथ पंचमी ॥

इयमिंद्रं वरुणमष्ट मे गीः प्रावत्तोके तनये तूतुजाना ।
सुरत्नासो देववीतिं गमेम यूयं पात स्वस्तिभिः सदा नः ॥ ५

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इयं । इंद्रं । वरुणं । अष्ट । मे । गीः । प्र । आवत् ।
तोके । तनये । तूतुजाना ।
सुऽरत्नासः । देवऽवीतिं । गमेम । यूयं । पात ।
स्वस्तिऽभिः । सदा । नः ॥ ५

व्याख्यातेयं । मदीया स्तुतिरिंद्रं वरुणं चाश्नुतां । तथा प्रेर्यमाणा सा पुत्रे पौत्रे च विषयेऽस्मान् रक्षतु । वयं शोभनधनाः संत उत्तरोत्तरं यागं प्राप्नुयाम । हे इंद्रावरुणादयो देवा अस्मान् सर्वदा कल्याणै रक्षत ॥

॥ इति पंचमस्य षष्ठे सप्तमो वर्गः ॥

धीरा त्वस्येत्यष्टर्चं षोडशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वरुणदेवत्यं । तथा चानुक्रांतं । धीराष्टौ वारुणं हेति ॥ गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

धीरा त्वस्य महिना जनूंषि वि यस्तस्तंभ रोदसी चिदुर्वी ।
प्र नाकमृष्वं नुनुदे बृहंतं द्विता नक्षत्रं पप्रथच्च भूम ॥ १

धीरा । तु । अस्य । महिना । जनूंषि । वि । यः । तस्तंभ ।
रोदसी इति । चित् । उर्वी इति ।
प्र । नाकं । ऋष्वं । नुनुदे । बृहंतं । द्विता । नक्षत्रं ।
पप्रथत् । च । भूम ॥ १

अस्य वरुणस्य जनूंषि जन्मानि महिना महिम्ना तु चित्रं धीरा धीराणि धैर्यवंति भवंति । यो वरुण उर्वी विस्तीर्णे रोदसी चित् द्यावापृथिव्यावपि वितस्तंभ विविधं स्तब्धे स्वकीये स्थाने स्थिते अकरोत् । यश्च बृहंतं महांतं नाकमादित्यं नक्षत्रं च ऋष्वं दर्शनीयं द्विता द्वैधं प्रणुनुदे प्रेरयति स्म । अहनि सूर्यं दर्शनीयं प्रेरयति रात्रौ नक्षत्रं तथेति द्विप्रकारः । भूम भूमिं च यः पप्रथत् अप्रथयत् विस्तारितवान् तस्यास्य वरुणस्येत्यन्वयः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ द्वितीया ॥

उत स्वया तन्वा३ सं वदे तत्कदा न्व१न्तर्वरुणे भुवानि ।

किं मे हव्यमहृणानो जुषेत कदा मृळीकं सुमना अभि ख्यं ॥२

उत । स्वया । तन्वा । सं । वदे । तत् । कदा । नु । अंतः ।

वरुणे । भुवानि ।

किं । मे । हव्यं । अहृणानः । जुषेत । कदा । मृळीकं ।

सुऽमनाः । अभि । ख्यं ॥ २

वरुणं भीतः दिदृक्षमाणः ऋषिरनया विमर्शयति । उतेति निपातः पृच्छायां । उत किं स्वया तन्वा स्वीयेनात्मीयेन शरीरेण संवदे । संवदनं करोमि आहो स्वित् तत्तेन वरुणेन सह संवदे । कदा नु कदा खलु वरुणे देवेऽन्तर्भुवानि । अन्तर्भूतो भवानि । वरुणस्य चित्ते संलग्नो भवामीत्यर्थः । अपि च मे मदीयं हव्यं हविः अहृणानोऽक्रुध्यन् वरुणः किं केन हेतुना जुषेत । सेवेत । सुमनाः शोभनमनस्कः सन्नहं कदा कस्मिन्काले मृळीकं सुखयितारं वरुणमभिख्यं । अभिपश्येयं ॥

॥ अथ तृतीया ॥

पृच्छे तदेनो वरुण दिदृक्षूपो एमि चिकितुषो विपृच्छं ।

समानमिन्मे कवयश्चिदाहुरयं ह तुभ्यं वरुणो हृणीते ॥ ३

पृच्छे । तत् । एनः । वरुण । दिदृक्षु । उपो इति । एमि ।

चिकितुषः । विऽपृच्छं ।

समानं । इत् । मे । कवयः । चित् । आहुः । अयं । ह ।

तुभ्यं । वरुणः । हृणीते ॥ ३

हे वरुण तदेनः पापं पृच्छे । त्वां पृच्छामि । दिदृक्षु ॥ अंतमः सुलोपः ॥ द्रष्टुमिच्छन् । तेन पापेन हेतुना त्वदीयैः पाशैर्बद्धोऽस्मि । पृष्टः सन् तत्पापं

कथय। अहं पिपृच्छन् विविधं प्रष्टुं चिकित्वुषो विदुषो जनानुपो एमि। उपागां। ते कवयश्चित् क्रान्तदर्शिनो जनाश्च मे मह्यं समानमित् समानमेवैकरूपमेवाहुः। अकथयन्। यदाहुस्तदाह। हे स्तोतस्तुभ्यमयमेव वरुणो हृणीते क्रुध्यतीति। अतः क्रोधं परित्यज्यास्मानंहोभ्यो मोचय॥

॥ अथ चतुर्थी॥

किमाग आस वरुण ज्येष्ठं यत्स्तोतारं जिघांससि सखायं।

प्र तन्मे वोचो दूळभ स्वधावोऽव त्वानेना नमसा तुर इयां॥ ४

किं। आगः। आस। वरुण। ज्येष्ठं। यत्। स्तोतारं।

जिघांससि। सखायं।

प्र। तत्। मे। वोचः। दुःऽदभ। स्वधाऽवः। अव। त्वा।

अनेनाः। नमसा। तुरः। इयां॥ ४

हे वरुण ज्येष्ठमधिकं किमाग आस। कोऽपराधो मया कृतो बभूव। यद्येनागसा सखायं मित्रभूतं सन्तं स्तोतारं जिघांससि हन्तुमिच्छसि। हे दूळभ दुर्दभ अन्यैर्बाधितुमशक्य स्वधावन्नन्नवन् हे वरुण तदागो मे मह्यं प्रवोचः। प्रब्रूहि। एवं सति तस्य प्रायश्चित्तं कृत्वानेना अपापः सन्त्वं तुरस्त्वरमाणः शीघ्रो नमसा नमस्कारेण हविषा वा त्वामवेयां। उपगच्छेयं॥

॥ अथ पंचमी॥

अव द्रुग्धानि पित्र्या सृजा नोऽव या वयं चकृमा तनूभिः।

अव राजन्पशुतृपं न तायुं सृजा वत्सं न दाम्नो वसिष्ठं॥ ५

अव। द्रुग्धानि। पित्र्या। सृज। नः। अव। या। वयं।

चकृम। तनूभिः।

अव। राजन्। पशुऽतृपं। न। तायुं। सृज। वत्सं। न।

दाम्नः। वसिष्ठं॥ ५

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

हे वरुण पित्र्या पितृतः प्राप्तानि नोऽस्मदीयानि द्रुग्धानि द्रोहान् बंधनहेतु-भूतानवसृज। विमुंच। अस्मत्तो विश्लेषय। वयं च या यानि द्रोहजातानि तनूभिः शरीरैश्चकृम कृतवंतः ता तानि चावसृज। हे राजन् राजमान वरुण पशुतृपं न तायं स्तैन्यप्रायश्चित्तं कृत्वावसाने ग्रासादिभिः पशूनां तर्पयितारं केनचिद् दाम्नो रज्जोर्बंधं न वत्समिव च वसिष्ठं मां बंधकात्पापादवसृज। विमुंच॥

॥ अथ षष्ठी॥

न स स्वो दक्षो वरुण ध्रुतिः सा सुरा मन्युर्विभीदको अचित्तिः।
अस्ति ज्यायान्कनीयस उपारे स्वप्नश्चनेदनृतस्य प्रयोता॥६

न। सः। स्वः। दक्षः। वरुण। ध्रुतिः। सा। सुरा। मन्युः। विऽभीदकः। अचित्तिः।
अस्ति। ज्यायान्। कनीयसः। उपऽअरे। स्वप्नः। चन। इत्। अनृतस्य। प्रऽयोता॥६

हे वरुण स स्वो दक्षः पुरुषस्य स्वभूतं तद्बलं पापप्रवृत्तौ कारणं न भवति। किंतर्हि ध्रुतिः स्थिरोत्पत्तिसमय एव निर्मिता दैवगतिः कारणं॥ ध्रु गतिस्थैर्ययोरिति धातुः॥ सा च ध्रुतिर्बुद्धिभ्रंशरूपा सुरा प्रमादकारिणी मन्युः क्रोधश्च गुर्वादिविषयः सन् अनर्थहेतुः। विभीदको द्यूतसाधनोऽक्षः। स च द्यूतेषु पुरुषं प्रेरयन्ननर्थहेतु-र्भवति। अचित्तिरज्ञानमविवेककारणं। एत ईदृशो दैवकृतिरेव पुरुषस्य पाप-प्रवृत्तौ कारणं। अपि च कनीयसोऽल्पस्य हीनस्य पुरुषस्य पापप्रवृत्तावुपारे उपारे समीपे नियंतृत्वेन स्थितो ज्यायानधिक ईश्वरोऽस्ति। स एव तं पापे प्रवर्तयति तथा चाम्नातं। एष ह्येवासाधु कर्म कारयति तं यमधो निनीषत इति। एवं सति स्वप्नश्चन स्वप्नोऽप्यनृतस्य पापस्य प्रयोता प्रकर्षेण मिश्रयिता भवति। इन्द्रियैः पुरुषैः स्वप्ने कृतैरपि कर्मभिर्बहूनि पापानि जायंते। किंच वक्तव्यं जाग्रति कृतैः कर्मभिः पापान्युत्पद्यंत इति। अतो ममापराधो दैवागत इति हे वरुण त्वया क्षंतव्य इति भावः॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ सप्तमी ॥

अरं दासो न मीळ्हुषे कराण्यहं देवाय भूर्णयेऽनागाः ।
अचेतयदचितो देवो अर्यो गृत्सं राये कवितरो जुनाति ॥ ७

अरं । दासः । न । मीळ्हुषे । कराणि । अहं । देवाय । भूर्णये । अनागाः ।
अचेतयत् । अचितः । देवः । अर्यः । गृत्सं । राये । कविऽतरः । जुनाति ॥ ७

मीळ्हुषे सेक्त्रे कामानां वर्षित्रे भूर्णये जगतो भर्त्रे देवाय दानादिगुणयुक्ताय वरुणायानागास्त्वत्प्रसादादपापः सन्नहमरमलं पर्याप्तं कराणि । परिचरणं करवाणि । दासो न । यथा भृत्यः स्वामिने सम्यक् परिचरति तद्वत् । अर्यः स्वामी स च देवोऽचितोऽज्ञानतोऽस्मानचेतयत् । चेतयतु । प्रज्ञापयतु । गृत्सं स्तोतारं च कवितरः प्राज्ञतरो देवो राये धनाय धनप्राप्त्यर्थं जुनाति जुनातु । प्रेरयतु ॥

एकादशिने ब्राह्मणे पश्वामयमिति पुरोडाशस्यानुवाक्या। सूत्रितं च । अयं सु तुभ्यं वरुण स्वधाव एवा वन्दस्व वरुणं बृहन्तं । आ० ३. ७. । इति ॥

॥ सैषाष्टमी ॥

अयं सु तुभ्यं वरुण स्वधावो हृदि स्तोम उपश्रितश्चिदस्तु ।
शं नः क्षेमे शमु योगे नो अस्तु यूयं पात स्वस्तिभिः सदा नः ॥ ८

अयं । सु । तुभ्यं । वरुण । स्वधाऽवः । हृदि । स्तोमः ।
उपऽश्रितः । चित् । अस्तु ।
शं । नः । क्षेमे । शं । ऊं इति । योगे । नः । अस्तु ।
यूयं । पात । स्वस्तिऽभिः । सदा । नः ॥ ८

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे स्वधावोऽन्नवन्वरुण तुभ्यं त्वदर्थं क्रियमाणोऽयमेतत्सूक्तात्मकः स्तोमः स्तोत्रं हृदि त्वदीये हृदये सु सुष्ठूपश्रित उपगतः समवेतोऽस्तु । शिदिति पूरकः । अप्राप्तस्य प्रापणं योगः प्राप्तस्य रक्षणं क्षेमः । नोऽस्मदीये क्षेमे रक्षणे अस्मत्पुत्राणां शमस्तु । योगे च नोऽस्मदीये प्रापणे शमु शमनमेनसामस्मत्पुत्राणां । हे वरुणादयो देवा यूयमस्मान् सर्वदा स्वस्तिभिरविनाशैः पात । रक्षत ॥

॥ इति पंचमस्य षष्ठेऽष्टमो वर्गः ॥

रदत्पथ इति सप्तर्चं सप्तदशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वारुणं । अनुक्रांतं च । रदत्सप्तेति ॥ गतो विनियोगः ॥

॥ तत्र प्रथमा ॥

रदत्पथो वरुणः सूर्याय प्रार्णांसि समुद्रिया नदीनां ।
सर्गो न सृष्टो अर्वतीर्ऋतायञ्चकार महीरवनीरहभ्यः ॥ १

रदत् । पथः । वरुणः । सूर्याय । प्र । अर्णांसि । समुद्रियाः ।
नदीनां ।
सर्गः । न । सृष्टः । अर्वतीः । ऋतऽयन् । चकार । महीः ।
अवनीः । अहऽभ्यः ॥ १

अयं वरुणो देवः सूर्याय सर्वस्य प्रेरकायादित्याय पथो मार्गानंतरिक्षप्रदेशानरदत् । प्रायच्छत् । समुद्रिया समुद्रे भवानि । यद्वा समुद्रवंत्यस्मादाप इति समुद्रमंतरिक्षं । तत्र भवान्यर्णांस्युदकानि नदीनां प्रासृजत् । सर्गो न । सृज्यते युद्धभूमौ सादिना प्रेर्यत इति सर्गोऽश्वः । स यथार्वतीर्वडवाः प्रति शीघ्रं गच्छति तद्वदृतायन् यज्ञं शीघ्रं गमनमात्मन इच्छन् महीर्महतीरवनी रात्रीरहभ्योऽहोभ्यः सकाशाच्चकार । भेदेन कृतवान् । यज्ञं गच्छन् स्वयं एव वरुण इत्युच्यते । स हि स्वगमनेन रात्रीर्जनयति ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ द्वितीया ॥

आत्मा ते वातो रज आ नवीनोत्पशुर्न भूर्णिर्यवसे ससवान्।
अंतर्मही बृहती रोदसीमे विश्वा ते धाम वरुण प्रियाणि॥ २

आत्मा। ते। वातः। रजः। आ। नवीनोत्। पशुः। न।
भूर्णिः। यवसे। ससऽवान्।
अंतः। मही इति। बृहती इति। रोदसी इति। इमे इति।
विश्वा। ते। धाम। वरुण। प्रियाणि॥ २

हे वरुण ते सर्वान्तर्यामिनस्तव प्रेरयिता वातो वायुरात्मा सर्वस्य प्राणिजातस्य धारयिता। स च रज उदकमा नवीनोत्। समंतात् प्रेरयति। वातेन हि वृष्टिर्जायते। भूर्णिर्जगतो भर्ता स वायुर्यवसे घासे प्रक्षिप्ते सति यथा पशुर्घासवान् भवति तद्वत्ससवान्। ससमित्यन्ननाम। तद्वान् भवति। हविर्लक्षणमन्नमपि तस्मै प्रयच्छंतीत्यर्थः। यद्वा सनोतेः क्वसौ रूपं। ततः ससवान् संभक्तवान्वातो घासे सति पशुर्यथा भारवाही भवति तद्वज्जगतो भर्ता। हे वरुण मही महत्यौ बृहती परिवृढे इमे रोदसी द्यावापृथिव्यावंतर्मध्ये। द्यावापृथिव्योर्मध्य इत्यर्थः। ते तव विश्वा सर्वाणि धाम धामानि स्थानानि तेजांसि वा प्रियाणि सर्वेषां प्रीतिकराणि भवंति॥

॥ अथ तृतीया ॥

परि स्पशो वरुणस्य स्मदिष्टा उभे पश्यंति रोदसी सुमेके।
ऋतावानः कवयो यज्ञधीराः प्रचेतसो य इषयंत मन्म॥ ३

परि। स्पशः। वरुणस्य। स्मत्ऽइष्टाः। उभे इति। पश्यंति।
रोदसी इति। सुमेके इति सुऽमेके।
ऋतऽवानः। कवयः। यज्ञऽधीराः। प्रऽचेतसः। ये।
इषयंत। मन्म॥ ३

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

स्पर्शयंति स्पृशंतीति स्पशश्चराः। वरुणस्य देवस्य स्पशश्चराः स्मदिष्टा। स्मदित्येतत् प्रशस्तार्थे सहार्थे च वर्तते। प्रशस्तगतयः। यद्वा सह प्रेषिताः संतः सुमेके शोभनमेहने सुरूपे शोभे रोदसी द्यावापृथिव्यौ परि पश्यंति। परित ईक्षंते। उभयोर्लोकयोर्वर्तमानान्पुण्यापुण्यकारिणो जनान्पश्यंतीत्यर्थः। यस्मादेवं तस्मात्तद्भीत्या ऋतावानः सत्यवंतो यज्ञधीरा यज्ञेषु सक्तबुद्धयः प्रचेतसः प्राज्ञाः कवयः क्रांतदर्शिनो ये जना मन्म मन्मानि स्तोत्राणीषयंत गमयंति वरुणं प्रापयंति तानपि परिपश्यंतीत्यर्थः। अतोऽस्मानपि स्तोतॄञ्ज्ञात्वा पापान्मुंचंत्वित्यभिप्रायः॥

॥ अथ चतुर्थी ॥

उवाच मे वरुणो मेधिराय त्रिः सप्त नामाघ्न्या बिभर्ति।

विद्वान्पदस्य गुह्या न वोचद्युगाय विप्र उपराय शिक्षन्॥ ४

उवाच। मे। वरुणः। मेधिराय। त्रिः। सप्त। नाम। अघ्न्या। बिभर्ति।

विद्वान्। पदस्य। गुह्या। न। वोचत्। युगाय। विप्रः। उपराय। शिक्षन्॥ ४

मेधिराय मेधाविने मे मह्यं वरुण उवाच। उक्तवान्। किमुक्तवानिति तदाह। त्रिः सप्तैकविंशतिसंख्याकानि नामान्यघ्न्या गौर्बिभर्ति। धारयतीति। वागत्र गौरुच्यते। सा चोरसि कंठे शिरसि च स्थितानि गायत्र्यादीनि सप्त छंदसां नामानि बिभर्ति। यद्वा वेदात्मिका वागेकविंशतिसंख्याकानां यज्ञानां नामानि बिभर्ति धारयति। अपर आह। गौः पृथिवी। तस्याश्च गौर्ग्मा ज्मेति पठितान्येकविंशति नामानीति। अपि च विद्वान् जानन् विप्रो मेधावी स वरुणो युगाय युक्तायोपरायोप समीपे रममाणायांतेवासिने मह्यं शिक्षन् उपदिशन् पदस्योत्कृष्टस्य स्थानस्य ब्रह्मलोकलक्षणस्य संबंधीनि गुह्या गुह्यानि रहस्यान्युपदेश्य गम्यानि। नकारश्चार्थे। इमानि च वोचत्। उक्तवान्। अतोऽहं वरुणस्य शिष्योऽस्मि। तस्मात् वरुणोऽस्मान् पापान्मोचयत्वित्यर्थः॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

। अथ पंचमी ।

तिस्रो द्यावो निहिता अंतरस्मिन्तिस्रो भूमीरुपराः

षड्विधानाः।

गृत्सो राजा वरुणश्चक्र एतं दिवि प्रेंखं हिरण्ययं शुभे कं ॥ ५

तिस्रः। द्यावः। निऽहिताः। अंतः। अस्मिन्। तिस्रः।

भूमीः। उपराः। षट्ऽविधानाः।

गृत्सः। राजा। वरुणः। चक्रे। एतं। दिवि। प्रऽइंखं।

हिरण्ययं। शुभे। कं॥ ५

तिस्रस्त्रिप्रकारा उत्तममध्यमाधमभावेन त्रिविधा द्यावो द्युलोका अस्मिन्वरुणेऽंतर्मध्ये निहिताः। तिस्रः पूर्ववत्त्रिविधा भूमीर्भूम्यश्च षड्विधानाः। विधानं विधा। षट्संख्याका ऋतुभेदेन षड्विधाः प्रकारा यासु तादृश्यः। उपरा अस्मिन्नेव वरुण उपरा अंतर्भूताः। लोकानां त्रित्वं च त्रयो वा इमे त्रिवृतो लोका इत्यादिना ब्राह्मणेनावगम्यते। तिस्रो भूमीर्धारयन्। ऋग्वे० २, २७, ८,। इति निगमश्च भवति। इमौ लोकावावृत्य वरुणस्तिष्ठतीत्यर्थः। अपि च गृत्सः स्तुत्यो राजेश्वरः स वरुणो दिव्यंतरिक्षे हिरण्ययं हिरण्मयं सुवर्णमयं हितरमणीयं वा प्रेंखं दोलायमानं दिग्द्वयसंसर्पिणमेतं सूर्यं शुभे कं शोभार्थं चक्रे। कृतवान्। दिवि सूर्यमदधात्सोममद्रौ। ऋग्वे० ५, ८५, २,। इति हि श्रूयते॥

वारुणे पशावव सिंधुमिति वपाया अनुवाक्या। सूत्रितं च। अव सिंधुं वरुणो द्यौरिव स्थादयं सु तुभ्यं वरुण स्वधावः। आ० ३, ७,। इति॥

। अथ षष्ठी ।

अव सिंधुं वरुणो द्यौरिव स्थाद्द्रप्सो न श्वेतो मृगस्तुविष्मान्।

गंभीरशंसो रजसो विमानः सुपारक्षत्रः सतो अस्य

राजा॥ ६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अवं। सिंधुं। वरुणः। द्यौःऽइव। स्थात्। द्रप्सः। न।
श्वेतः। मृगः। तुविष्मान्।
गंभीरऽशंसः। रजसः। विऽमानः। सुपारऽक्षत्रः। सतः।
अस्य। राजा॥ ६

द्यौरिव सूर्य इव दीप्तो वरुणः सिंधुं समुद्रमवस्थात्। वेलायामवस्थापयति। यथा वेलां नातिक्रामति तथा करोतीत्यर्थः। कीदृशो वरुणः। द्रप्सो न द्रवणशील उदबिंदुरिव श्वेतः शुभ्रवर्णो मृगः। मृगोपममेतत्। गौरमृग इव तुविष्मान् बलवान् प्रवृद्धो वा गंभीरशंसः। गंभीरो महान् शंसः स्तोत्रं यस्य स तथोक्तः। रजस उदकस्य विमानो निर्माता। सुपारक्षत्रः सुष्ठु दुःखात्तारकं क्षत्रं बलं धनं वा यस्य तादृशो वरुणः सतो विद्यमानस्यास्य जगतो राजेश्वरो भवति॥

॥ अथ सप्तमी॥

यो मृळयाति चक्रुषे चिदागो वयं स्याम वरुणे अनागाः।
अनु व्रतान्यदितेर्ऋधंतो यूयं पात स्वस्तिभिः सदा नः॥ ७

यः। मृळयाति। चक्रुषे। चित्। आगः। वयं। स्याम।
वरुणे। अनागाः।
अनु। व्रतानि। अदितेः। ऋधंतः। यूयं। पात।
स्वस्तिऽभिः। सदा। नः॥ ७

आगोऽपराधं चक्रुषे चित्कृतवतेऽपि स्तोत्रे यो वरुणो मृळयाति दयां करोति तस्मिन्वरुणेऽनागा अनागसोऽनपराधाः संतो वयं स्याम। वर्तमाना भवेम। किं कुर्वंतः। अदितेरदीनस्य वरुणस्य संबंधीनि व्रतानि कर्माण्यनु आनुपूर्व्येण ऋधंतः समर्धयंतः। हे वरुणादयो देवा यूयमस्मान् सर्वदा कल्याणैः पालयत॥

॥ इति पंचमस्य षष्ठे नवमो वर्गः॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्र शुन्ध्युवमिति सप्तर्चमष्टादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वारुणं प्र शुन्ध्युवमित्यनुक्रान्तं॥ गतो विनियोगः॥

॥ तत्र प्रथमा॥

प्र शुन्ध्युवं वरुणाय प्रेष्ठां मतिं वसिष्ठ मीड़्हुषे भरस्व।
य ईमर्वाञ्चं करते यजत्रं सहस्रामघं वृषणं बृहन्तं॥ १

प्र। शुन्ध्युवं। वरुणाय। प्रेष्ठां। मतिं। वसिष्ठ।
मीड़्हुषे। भरस्व।
यः। ईं। अर्वाञ्चं। करते। यजत्रं। सहस्रऽमघं। वृषणं।
बृहन्तं॥ १

ऋषिरात्मानमेव प्रत्यक्षीकृत्य स्तुतौ नियुङ्क्ते। हे वसिष्ठ त्वं मीड़्हुषे सेक्त्रे वरुणाय शुन्ध्युवं शोधयित्रीं यद्वा स्वत एव शुद्धां प्रेष्ठां प्रियतमां मतिं मननीयामीदृशीं स्तुतिं प्रभरस्व। प्रहर। प्रापय। यो वरुण ईमेनं सूर्यमर्वाञ्चमस्मदभिमुखं करते अन्तरिक्षे करोति तस्मै वरुणायेत्यन्वयः। कीदृशं सूर्यं। यजत्रं यष्टव्यं सहस्रामघं बहुधनं वृषणं कामानां वर्षकं बृहन्तं महान्तं॥

॥ अथ द्वितीया॥

अधा न्वस्य संदृशं जगन्वानग्नेरनीकं वरुणस्य मंसि।
स्वर्यदश्मन्नधिपा उ अन्धोऽभि मा वपुर्दृशये निनीयात्॥ २

अध। नु। अस्य। संऽदृशं। जगन्वान्। अग्नेः। अनीकं।
वरुणस्य। मंसि।
स्वः। यत्। अश्मन्। अधिऽपाः। ऊं इति। अन्धः।
अभि। मा। वपुः। दृशये। निनीयात्॥ २

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अथाधुनास्य वरुणस्य संदृशं संदर्शनं तु क्षिप्रं जगन्वान् गतवानस्म्यग्नेरनीकं ज्वालासंघं मंसि। स्तवानि। तं वरुणं वपुरिति शेषः। यद्वा वरुणः स्वः सुखकरमश्मन्नश्मन्यभिषवार्थं पाषाणेऽवस्थितं। अभिषुतमित्यर्थः। ईदृशमन्धः सोमलक्षणमन्नमधिपा अधिकं पाता भवेत्। छान्दसः षत्वाभावः। उ इति पूरकः॥ तदानीं मा मां वपुः शरीरं स्वकीयं। वपुरिति रूपनाम। प्रशस्तं रूपं वा दृशये दर्शनार्थमभिनिनीयात्। अभिप्रापयेत्॥

॥ अथ तृतीया ॥

आ यद्रुहाव वरुणश्च नावं प्र यत्समुद्रमीरयाव मध्यं

अधि यदपां स्नुभिश्चराव प्र प्रेंख ईंखयावहै शुभे कं ॥ ३

आ। यत्। रुहाव। वरुणः। च। नावं। प्र। यत्।

समुद्रं। ईरयाव। मध्यं।

अधि। यत्। अपां। स्नुऽभिः। चराव। प्र। प्रऽईंखे।

ईंखयावहै। शुभे। कं ॥ ३

यद्यदा वरुणो मसचे सत्यश्च वरुणश्चोभौ नावं द्रव्यमयीं तरणसाधनभूतां रुहाव उभावारूढौ अभूविव। तां च नावं यद्यदा समुद्रं मध्यं समुद्रस्य मध्यं प्रति प्रेरयाव प्रकर्षेण गमयाव। यद्यदा चापामुदकानामधि उपरि स्नुभिर्गन्तृभिरन्याभिरपि नौभिश्चराव चरावहै तदानीं शुभे शोभार्थं प्रेंखे नौरूपायां दोलायामेव प्रेंखयावहै। निम्नोन्नतैस्तरंगैरितश्चेतश्च प्रचलन्तौ संक्रीडावहै। कमिति पूरकः। यद्वा क्रियाविशेषणं। कं सुखं यथा भवति तथेत्यर्थः॥

॥ अथ चतुर्थी ॥

वसिष्ठं ह वरुणो नाव्याधादृषिं चकार स्वपा महोभिः।

स्तोतारं विप्रः सुदिनत्वे अह्नां यान्नु द्यावस्ततनन्यादुषासः ॥ ४

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

वसिष्ठं। ह। वरुणः। नावि। आ। अधात्। ऋषिं।

चकार। सुऽअपाः। महःऽभिः।

स्तोतारं। विप्रः। सुदिनऽत्वे। अह्नां। यात्। नु।

द्यावः। ततनन्। यात्। उषसः॥ ४

एवं वसिष्ठेनात्मनोक्ते वरुणेन कृतं तद्दर्शयति। वसिष्ठं च वसिष्ठं खलु वरुणो नावि स्वकीयायामाधात्। आरोहयत्। तथा तमृषिं महोभी रक्षणैः स्वपां स्वपसं शोभनकर्माणं चकार। वरुणः कृतवान्। अपि च विप्रो मेधावी वरुणोऽह्नां दिवसानां मध्ये सुदिनत्वे यत्फलत्वेन शोभनदिनत्वं तत्र स्तोतारमस्थापयदिति शेषः। किं कुर्वन्। यात् यातो गच्छतो द्यावो दिवसान् यातीरुषास उषसोपलक्षिता रात्रीश्च चिरं ततनत् स्वात्मना विस्तारयन्॥

॥ अथ पंचमी॥

क्व त्यानि नौ सख्या बभूवुः सचावहे यदवृकं पुरा चित्।

बृहंतं मानं वरुण स्वधावः सहस्रद्वारं जगमा गृहं ते॥ ५

क्व। त्यानि। नौ। सख्या। बभूवुः। सचावहे इति।

यत्। अवृकं। पुरा। चित्।

बृहंतं। मानं। वरुण। स्वधाऽवः। सहस्रऽद्वारं।

जगम। गृहं। ते॥ ५

हे वरुण त्यानि तानि पुरातनानि आवयोः सख्या सख्यानि सखित्वानि क्व कुत्र बभूवुः। पुरा पूर्वस्मिन् कालेऽवृकमहिंसमावयोर्मैत्र्यं यत्सख्यमस्ति तत्सचावहे। आवां सेवावहे। चिदिति पूरणः। अपि च हे स्वधावोऽन्नवन् वरुण ते त्वदीयं गृहं जगम। गच्छानि॥ लोडर्थे लिट्॥ कीदृशं गृहं। बृहंतं महांतं मानं। मांत्यस्मिन् सर्वाणि भूतानीति मानं। सर्वस्य भूतजातस्य परिच्छेदकमित्यर्थः। सहस्रद्वारं बहुद्वारं॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ षष्ठी ॥

य आ॒पिर्नित्यो॑ वरुण प्रि॒यः सन्त्वामागां॑सि कृ॒णव॒त्सखा॑ ते।
मा त॒ एन॑स्वंतो यक्षिन्भुजेम य॒न्धि ष्मा॒ विप्रः॑ स्तुव॒ते वरू॑थं ॥ ६

यः। आ॒पिः। नित्यः॑। वरुण। प्रि॒यः। सन्। त्वां।
आगां॑सि। कृ॒णव॑त्। सखा॑। ते।
मा। ते॒। एन॑स्वंत। य॒क्षि॒न्। भु॒जे॒म। य॒न्धि। स्म॒। विप्रः॑।
स्तु॒व॒ते। वरू॑थं ॥ ६

हे वरुण यो वसिष्ठो नित्यः प्रियः आपिर्बंधुः। औरसः पुत्र इत्यर्थः। यः पूर्वं प्रियः सन् त्वां प्रत्यागांस्यपराधान् कृणवत् अकार्षीत् स इदानीं ते तव सखा समानख्यानः प्रियोऽस्तु। हे यक्षिन्यजनीय वरुण ते तव स्वभूता वयमेनस्वंत एनसा पापेन युक्ताः संतो मा भुजेम। मा भुजमहि। त्वत्प्रसादात्पापरहिता एव संतो भोगान् भुनज्महे। विप्रो मेधावी त्वं च स्तुवते स्तोत्रं कुर्वते वसिष्ठाय वरूथमनिष्टनिवारकं वरणीयं वा गृहं यंधि। प्रयच्छ। स्मेति पूरकः॥

अत्र षड्भिधानं। ध्रुवासु त्वासु क्षितिषु क्षपन् बंधात्प्रमुच्यते। तिस्रस्त्रो अपेहेतां पिपासकं न गच्छति। ऋग्वे० २. २६.। इति॥

॥ सैषा सप्तमी ॥

ध्रु॒वासु॑ त्वा॒सु क्षि॒तिषु॑ क्षि॒यंतो॒ व्य१॒॑स्मत्पाशं॒ वरु॑णो मुमोचत्।
अवो॑ वन्वा॒ना अदि॑तेरु॒पस्था॑द्यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः ॥ ७

ध्रु॒वासु॑। त्वा॒। आ॒सु। क्षि॒तिषु॑। क्षि॒यंतः॑। वि। अ॒स्मत्।
पाशं॑। वरु॑णः। मु॒मो॒च॒त्।
अवः॑। व॒न्वा॒नाः। अदि॑तेः। उ॒पऽस्था॑त्। यू॒यं। पा॒त॒।
स्व॒स्तिऽभिः॑। सदा॑। नः॒ ॥ ७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

श्रि, वास्तुनस्त्वास्ता, उपक्षमाणाः क्षितिषु भूमिषु क्षियंतो निवसंतो वयं हे वरुण त्वा त्वां स्तुम इति शेषः। स च वरुणोऽस्मदर्थं पाशं बंधकं पापं विमुमोचत्। मोचयेत्। तथादितेरखंडनीयायाः पृथिव्या उपस्थादुपस्थानादपो रक्षणं वरुणेन दत्तं वन्वानाः संभजमाना वयं स्याम। अन्यद्गतं॥

॥ इति पंचमस्य षष्ठे दशमो वर्गः॥

मो षु वरुणेति पंचर्चमेकविंशं सूक्तं वासिष्ठं। अंत्या जगती शिष्टाश्चतस्रो गायत्र्यः। तथा चानुक्रांतं। मो षु पंच गायत्रं जगत्यंतमिति॥ गतो विनियोगः॥

॥ तत्र प्रथमा॥

मो षु वरुण मृन्मयं गृहं राजन्नहं गमं।

मृड़ा सुक्षत्र मृड़य॥ १

मो इति। सु। वरुण। मृत्ऽमयं। गृहं। राजन्।

अहं। गमं।

मृड़। सुऽक्षत्र। मृड़य॥ १

हे राजन्नीश्वर वरुण त्वदीयं मृन्मयं मृदादिभिर्निर्मितं गृहं मो षु नैवाहं गमं। गतोऽस्मि। अपि तु सुशोभनं सुवर्णमयमेव त्वदीयं गृहं प्राप्नवानि। हे वरुण मां मृड़। सुखय। हे सुक्षत्र शोभनधन वरुण मृड़य। दयां च कुरु॥

॥ अथ द्वितीया॥

यदेमि प्रस्फुरन्निव दृतिर्न ध्मातो अद्रिवः।

मृड़ा सुक्षत्र मृड़य॥ २

यत्। एमि। प्रस्फुरन्ऽइव। दृतिः। न। ध्मातः। अद्रिऽवः।

मृड़। सुऽक्षत्र। मृड़य॥ २

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे अद्रिवः आयुधवन्वरुण यद्यदा प्रस्फुरन्निव शैत्येन प्रविचलन्निव तनुवाससेपनायो दृतिर्न दृतिरिव ध्मातो वायुना पूर्णः सन् त्वया बद्धोऽहमेमि गच्छामि तदानीं मृळ। सुखय। हे सुक्षत्र सुधन मृळय। उपदयां कुरु॥

॥ अथ तृतीया ॥

क्रत्वः समह दीनता प्रतीपं जगमा शुचे।

मृळा सुक्षत्र मृळय॥ ३

क्रत्वः। समह। दीनता। प्रतिऽईपं। जगम। शुचे।

मृळ। सुऽक्षत्र। मृळय॥ ३

हे समह सधन शुचे स्वभावतो निर्मल वरुण दीनता दीनतयाऽशक्ततया क्रत्वः कर्मणः कर्तव्यत्वेन विहितस्य श्रौतस्मार्तादिलक्षणस्य प्रतीपं प्रतिकूलमननुष्ठानं जगम आप्तवानस्मि। अत एव त्वया बद्धः। तादृशं मां मृळ। सुखय। अन्यद्गतं॥

॥ अथ चतुर्थी ॥

अपां मध्ये तस्थिवांसं तृष्णाविदज्जरितारं।

मृळा सुक्षत्र मृळय॥ ४

अपां। मध्ये। तस्थिऽवांसं। तृष्णा। अविदत्। जरितारं।

मृळ। सुऽक्षत्र। मृळय॥ ४

अपां समुद्रादायुदकानां मध्ये तस्थिवांसं स्थितवन्तमपि जरितारं तव स्तोतारं मां तृष्णा पिपासा अविदत्। आप्नवती। लवणोदकस्य समुद्रजलस्य पानानर्हत्वात्। अतस्तादृशं मां मृळ। सुखय। अन्यद्गतं॥

देवसुवां हविःषु वारुणस्य चरोर्यत्किं चेदमिति याज्या। सूत्रितं च। यत्किं चेदं वरुण दैव्ये जन इति अव ते हेळो वरुण नमोभिरिति द्वे। आ० ४, ११। इति ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

। तत्र पंचमी ॥

यत्किं चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्याश्चरामसि ।

अचित्ती यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव

रीरिषः ॥ ५

यत् । किं । च । इदं । वरुण । दैव्ये । जने । अभिऽद्रोहं ।

मनुष्याः । चरामसि ।

अचित्ती । यत् । तव । धर्म । युयोपिम । मा । नः ।

तस्मात् । एनसः । देव । रिरिषः ॥ ५

हे वरुण दैव्ये देवसमूहरूपे जने यत्किंचेदमभिद्रोहमपकारजातं मनुष्या वयं चरामसि चरामः निवर्तयामः । तथाचित्ती अचित्त्याज्ञानेन तव त्वदीयं यद्धर्मं धारकं कर्म युयोपिम वयं विमोहितवंतः हे देव तस्मादेनसः पापान्नोऽस्मान्मा रीरिषः । मा हिंसीः ॥

॥ इति पंचमस्य षष्ठे एकादशो वर्गः ॥

॥ इति सप्तमे मंडले पंचमोऽनुवाकः ॥

षष्ठेऽनुवाके पंचदश सूक्तानि । तत्र प्र वीरयेति सप्तर्चं प्रथमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वायव्यं । आद्यपंचस्वाद्यांत द्विपचनर्क्सु ता ऐंद्रवायव्यः । तथा चानुक्रांतं । प्र वीरया सप्त वायव्यं ह्यैंद्राश्च या द्विपद्युक्ता इति ॥ तृतीये छंदोमे प्रउगशस्त्रे प्र वीरयेति वायव्यस्तृचः । सूत्रितं च । प्र वीरया शुचयो दद्रिरे वां ते सत्येन मनसा दीध्यानाः । आ० ८. ११. । इति ॥

। तत्र प्रथमा ॥

प्र वीरया शुचयो दद्रिरे वामध्वर्युभिर्मधुमंतः सुतासः ।

वह वायो नियुतो याह्यच्छा पिबा सुतस्यांधसो मदाय ॥ १

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

प्र । वीरऽया । शुचयः । ददिरे । वाम् । अध्वर्युऽभिः ।

मधुऽमन्तः । सुतासः ।

वह । वायो इति । निऽयुतः । याहि । अच्छ । पिब

सुतस्य । अंधसः । मदाय ॥ १

हे वायो वीरया वीराय विविधमीरयित्रे ॥ सुपां सुलुगिति चतुर्थ्या याजादेशः ॥ वां ते ॥ व्यत्ययेन द्विवचनं ॥ तुभ्यं शुचयः शुद्धा मधुमन्तो माधुर्योपेताः सुतासोऽभिषुताः सोमा ऐतरेयिभिर्नवमेऽहनि प्रउगेऽध्वर्युभिरध्वरस्य नेतृभिर्ऋत्विग्भिः प्रददिरे प्रदीयंते ॥ दद दान इत्यस्यैतद्रूपं ॥ यत एवमतः कारणाद्धे वायो नियुतो वडवा वह । रथं प्रापय । तेन च रथेनाच्छ याहि । अस्मद्यज्ञमभिगच्छ । अभिगम्य च सुतस्याभिषुतस्यांधसोऽन्नस्य सोमलक्षणस्य स्वकीयं भागं पिब । किमर्थं । मदाय प्रीत्यर्थं ॥

शुनासीरीये पर्वणि वायव्यस्य पयस ईशानायेति याज्या । सूत्रितं च । स त्वं नो देव मनसेशानाय प्रहुतिं यस्त आनट् । आ० २. २० । इति ॥ वायव्ये पशावप्येषैव पशुपुरोडाशस्य याज्या । सूत्रितं च । ईशानाय प्रहुतिं यस्त आनट् प्र यो वायुं रथयुजं कृणुध्वं । आ० ३. ८. । इति ॥

॥ सैषात्र द्वितीया ॥

ईशानाय प्रहुतिं यस्त आनट् शुचिं सोमं शुचिपास्तुभ्यं वायो ।

कृणोषि तं मर्त्येषु प्रशस्तं जातोजातो जायते वाज्यस्य ॥ २

ईशानाय । प्रऽहुतिं । यः । ते । आनट् । शुचिं । सोमं ।

शुचिऽपाः । तुभ्यं । वायो इति ।

कृणोषि । तं । मर्त्येषु । प्रऽशस्तं । जातःऽजातः । जायते ।

वाजी । अस्य ॥ २

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

हे वायो ईशानायेश्वराय ते तुभ्यं त्वदर्थं प्रकृतिं प्रशस्तामाहुतिं चरुपुरोडाशादि-लक्षणां यो यजमान आनट् प्राप्नोतु। दद्यादित्यर्थः। तथा हे शुचिपाः शुद्धस्य सोमस्य पातर्यो तुभ्यं शुचिं शुद्धं सोमं च यः प्रयच्छति मर्त्येषु मनुष्येषु मध्ये तं यजमानं प्रशस्तं भुज्यं कृणोषि। करोषि। स च जातो जातः सर्वत्र प्रादुर्भूतः प्रख्यातः सन् वाजस्य प्रभृतस्य धनस्य प्राप्तये जायते। समर्थो भवति। सर्वं धनं लभत इत्यर्थः॥

नियुत्वद्वायुविशिष्टवायुदेवताके पशौ राये नु यमिति पुरोडाशस्य याज्या। सूत्रितं च। राये नु यं जज्ञतू रोदसीमे प्र वायुमच्छा बृहती मनीषा। आ० ३.८। इति॥

॥ सैषात्र तृतीया ॥

राये नु यं जज्ञतू रोदसीमे राये देवी धिषणा धाति देवं।
अध वायुं नियुतः सश्चत स्वा उत श्वेतं वसुधितिं निरेके॥ ३

राये। नु। यं। जज्ञतुः। रोदसी इति। इमे इति। राये।
देवी। धिषणा। धाति। देवं।
अध। वायुं। निऽयुतः। सश्चत। स्वाः। उत। श्वेतं।
वसुऽधितिं। निऽरेके॥ ३

इमे रोदसी द्यावापृथिव्यौ यं वायुं राये धनार्थं नु क्षिप्रं जज्ञतुर्जनयामासतुः तं देवं दानादिगुणयुक्तं वायुं देवी द्योतमाना धिषणा स्तुती राये धनार्थं धाति। धारयति। धनं यथा लभ्यते तथा प्रेरयतीत्यर्थः। अधाधुनेयं स्तुतौ प्रवृत्तायां स्वाः स्वकीया नियुतो वडवा रथवाहा वायुं सश्चत। सचन्ते। सेवन्ते। उतापि च श्वेतं शुभ्रवर्णं निरेके। नितरां रेको रिक्तता निरेकः। दारिद्र्यमित्यर्थः। तस्मिन् सति वसुधितिं वसूनां धातारं प्रदातारं तं वायुं नियुतोऽस्मद्यज्ञं प्रापयन्तीति शेषः॥

द्वितीये छंदोमे प्रउगशस्त्रे वायव्यतृचस्योच्छन्नुषस इति तृतीया। सूत्रितं च। उच्छन्नुषसः सुदिना अरिप्रा इत्येकपातिन्यः। आ० ८.१०। इति॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ सैषात्र चतुर्थी ॥

उच्छन्नुषसः सुदिना अरिप्रा उरु ज्योतिर्विविदुर्दीध्यानाः।
गव्यं चिदूर्वमुशिजो वि वव्रुस्तेषामनु प्रदिवः सस्रुरापः॥ ४

उच्छन्। उषसः। सुऽदिनाः। अरिप्राः। उरु। ज्योतिः।
विविदुः। दीध्यानाः।
गव्यं। चित्। ऊर्वं। उशिजः। वि। वव्रुः। तेषां। अनु।
प्रऽदिवः। सस्रुः। आपः॥ ४

येऽङ्गिरसो वायुमस्तोषत तेषामरिप्राः पापरहिता उषसः सुदिनाः शोभनदिनस्य हेतुभूताः सत्य उच्छन्। औच्छन्। व्यवासयन्। ते च दीध्याना दीप्यमानाः संत उरु विस्तीर्णं ज्योतिः सूर्याख्यं विविदुः। वायोः प्रसादादलभंत। अपि चोशिजः कामयमानास्तेऽङ्गिरसो गव्यं चित् गोसंघरूपमव्यूर्वं धनं पणिभिरपहृतं विवव्रुः। व्यवृण्वन्। अलभंत। तथा तेषामंगिरसामर्थाय प्रदिवः पुराण्य आपोऽनुसस्रुः। अन्वसरन्। अन्वगच्छन्। हिताहिताचरणपरा आसन्नित्यर्थः। आवरकस्यासुरस्य वायुना हननादसुरेणापहृतान्पशुप्रभृतीन् पुनर्लब्धवंत इत्यर्थः॥

तृतीये छंदोमे प्रउगशस्त्रे ते सत्येनेत्यैंद्रवायवस्तृचः। सूत्रितं च। ते सत्येन मनसा दीध्याना दिवि क्षयंता रजसः पृथिव्यां। आ० ८. ११.। इति॥

॥ तत्र प्रथमा सूक्ते पंचमी ॥

ते सत्येन मनसा दीध्यानाः स्वेन युक्तासः क्रतुना वहंति।
इंद्रवायू वीरवाहं रथं वामीशानयोरभि पृक्षः सचंते॥ ५

ते। सत्येन। मनसा। दीध्यानाः। स्वेन। युक्तासः।
क्रतुना। वहंति।
इंद्रवायू इति। वीरऽवाहं। रथं। वां। ईशानयोः। अभि।
पृक्षः। सचंते॥ ५

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

ते प्रसिद्धाः सत्येन यथार्थेन मनसा मननीयेन स्तोत्रेण युक्ता दीध्याना दीप्यमानाः स्वेन स्वकीयत्वेन विद्यमानेन क्रतुना कर्मणा नित्यनैमित्तिकात्मना युक्तासो युक्ता एवंभूता यजमाना हे इंद्रवायू वीरवाहं वीरैर्विशिष्टैर्वीरयद्भिः स्तोतृभिर्वहनीयं प्रापणीयं । यद्वा वीरैरश्वैर्वहनीयमीशानयोरीश्वरयोर्वां युवयोः स्वभूतं रथं वहंति सं स्वं यज्ञं प्रापयंति । तत्र च पृक्षोऽन्नानि हविर्लक्षणान्यभिसचंते । युवामभिसेवंते ॥

॥ अथ षष्ठी ॥

ईशानासो ये दधते स्वर्णो गोभिरश्वेभिर्वसुभिर्हिरण्यैः ।
इंद्रवायू सूरयो विश्वमायुरर्वद्भिर्वीरैः पृतनासु सह्युः ॥ ६

ईशानासः । ये । दधते । स्वः । नः । गोभिः । अश्वेभिः ।
वसुऽभिः । हिरण्यैः ।
इंद्रवायू इति । सूरयः । विश्वम् । आयुः । अर्वत्ऽभिः । वीरैः ।
पृतनासु । सह्युः ॥ ६

इंद्रवायू ईशानास ईश्वराः प्रभवो ये जना नोऽस्मभ्यं गोभिरश्वेभिरश्वैर्वसुभिर्निवासकैर्हिरण्यैश्च सहितं स्वः सुष्ठरणीयं सुखं दधते ददति प्रयच्छंति । यद्वा हिरण्यव्यतिरिक्तानि धनानि वसूनि । तैर्हिरण्येन सहेत्यर्थः । ते सूरयो दातारो विश्वं व्याप्तमायुरन्नं जीवनं वा मर्त्यानां स्वभूतं पृतनासु संग्रामेष्वर्वद्भिरश्वैर्वीरैः शूरभटैश्च साधनभूतैः सह्युः । अभिभवेयुः । यद्वा सहार्थे तृतीया । अर्वद्भिर्वीरैः पुत्रैश्च सहितं मर्त्यानामायुरभिभवेयुरित्यर्थः ॥

॥ अथ सप्तमी ॥

अर्वंतो न श्रवसो भिक्षमाणा इंद्रवायू सुष्टुतिभिर्वसिष्ठाः ।
वाजयंतः स्ववसे हुवेम यूयं पात स्वस्तिभिः सदा नः ॥ ७

अर्वंतः । न । श्रवसः । भिक्षमाणाः । इंद्रवायू इति ।
सुस्तुतिऽभिः । वसिष्ठाः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वाजऽयंतः । सु । अवसे । हुवेम । यूयं । पात । स्वस्तिऽभिः ।
सदा । नः ॥ ७

अर्वंतो न अश्वा इव हविषां वोढारः अश्वसोऽस्माः ॥ द्वितीयार्थे षष्ठी ॥ अन्नं भिक्षमाणा याचमाना वाजयंतो वाजं बलमात्मन इच्छंतो वसिष्ठा वयं स्ववसे शोभनरक्षणाय सुष्ठु तर्पणाय वा सुष्टुतिभिः शोभनाभिः स्तुतिभिरिंद्रवायू इंद्रं वायुं च हुवेम । आह्वयेमहि । अन्यद्गतं ॥

॥ इति पंचमस्य षष्ठे द्वादशो वर्गः ॥

कुविदंगेति सप्तर्चं द्वितीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वायव्यं । कुविदंगेत्यनुक्रांतं ॥ गतः सूक्तविनियोगः । वायव्ये पशौ कुविदंगेति वपाया याज्या । सूत्रितं च । कुविदंग नमसा ये वृधास इयानाय प्रसृतिं यस्त आनट् । आ० ३. ८. ॥ इति ॥

॥ सैषा प्रथमा ॥

कुविदंग नमसा ये वृधासः पुरा देवा अनवद्यास आसन् ।
ते वायवे मनवे बाधितायावासयन्नुषसं सूर्येण ॥ १

कुवित् । अंग । नमसा । ये । वृधासः । पुरा । देवाः ।
अनवद्यासः । आसन् ।
ते । वायवे । मनवे । बाधिताय । अवासयन् । उषसं ।
सूर्येण ॥ १

दीव्यंति स्तुवंतीति देवाः स्तोतारः । पुरा पूर्वस्मिन्काले ये वृधासो वृद्धा देवाः स्तोतारः । कुविदिति बहुनाम । अंगेति क्षिप्रनाम । कुविद्बहवोऽंग क्षिप्रं यतेन नमसा वायुविषयेण स्तोत्रेण नमस्कारेण वानवद्यासोऽवद्यरहिता आसन् तेऽद्यापि वायवे हवींषि दातुं सूर्येण सहोषसमवासयन् । उषसो व्युष्टिं सूर्योदयं च वायुयागार्थं कुर्वंतीत्यर्थः । किमर्थं । मनवे मनुष्याणां बाधिताय बाधितानां पुत्रादीनां रक्षणार्थमित्यर्थः । यद्वा मनवे बाधितायेति षष्ठ्यर्थे चतुर्थी । बाधितस्य मनोः प्रजापतेर्यागे वायवे हवींषि दातुमित्यन्वयः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

द्वितीये छंदोमे प्रउगशस्त्र ऐंद्रवायवतृचस्योशंतेत्येषा प्रथमा । सूत्रितं च ।
उशंता दूता न दभाय गोपा यावत्तरस्तन्वो यावदोज इत्येका द्वे च । आ० ८. १०. ।
इति ॥

॥ सैषा द्वितीया ॥

उशंता दूता न दभाय गोपा मासश्च पाथः शरदश्च पूर्वीः ।
इंद्रवायू सुष्टुतिर्वामियाना मार्डीकमीट्टे सुवितं च नव्यं ॥ २

उशंता । दूता । न । दभाय । गोपा । मासः । च ।
पाथः । शरदः । च । पूर्वीः ।
इंद्रवायू इति । सुऽस्तुतिः । वां । इयाना । मार्डीकं ।
ईट्टे । सुवितं । च । नव्यं ॥ २

हे इंद्रवायू उशंतावुशंतौ कामयमानौ दूतौ । देवतेर्गतिकर्मणो दूतशब्दः ॥ गंतारौ गोपौ गोपायितारावीदृशौ युवां दभाय हिंसायै न भवतं । अपि तु मासो मासांश्च पूर्वीर्बह्वीः शरदः संवत्सरांश्च चिरकालमस्मान् पाथः । रक्षतं । अपि च इंद्रवायू सुष्टुतिरस्मदीया शोभना स्तुतिर्वां युवामियाना गच्छंती प्राप्नुवंती मार्डीकं सुखमीट्टे । याचते । यद्वा सुखं यथा भवति तथा युवामीट्टे । स्तौति । तथा नव्यं नवतरं सुवितं सुष्ठु प्राप्यं धनं चेट्टे ॥

नियुत्वद्वायुदेवत्ये पशौ पीवोअन्नानित्येषा याज्या । सूत्रितं च । पीवोअन्नान्रयिवृधः सुमेधा राये नु यं जज्ञतू रोदसीमे । आ० ३. ८. । इति ॥ तथा द्वितीये छंदोमे प्रउगशस्त्रे वायव्यतृचस्यैषैव द्वितीया । सूत्रितं च । पीवोअन्नान्रयिवृधः सुमेधा उच्छन्नुषसः सुदिना अरिप्राः । आ० ८. १०. । इति ॥

॥ सैषा तृतीया ॥

पीवोअन्नान्रयिवृधः सुमेधाः श्वेतः सिषक्ति नियुतामभिश्रीः ।
ते वायवे समनसो वि तस्थुर्विश्वेन्नरः स्वपत्यानि चक्रुः ॥ ३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पीवःऽअन्नान् । रयिऽवृधः । सुऽमेधाः । श्वेतः । सिसक्ति ।

निऽयुतां । अभिऽश्रीः ।

ते । वायवे । सऽमनसः । वि । तस्थुः । विश्वा । इत् ।

नरः । सुऽअपत्यानि । चक्रुः ॥ ३

पीवोअन्नान् । पीवांसि स्थूलानि प्रभूतान्यन्नानि येषां तान् । रयिवृधो रय्या धनेन वृद्धान् एवंभूतानाश्रितजनान् सुमेधाः शोभनप्रज्ञो नियुतां वडवानां स्वभूतानामभिश्रीरभिश्रयणीयः श्वेतः श्वेतवर्णो वायुः सिषक्ति । सेवते । ते च जनाः समनसः समानमनस्काः संतो वायवे वायुमुद्दिश्य यष्टुं वि तस्थुः । विविधमवतिष्ठंते । स्थित्वा च ते नरः कर्मणां नेतारो जना विश्वेत् विश्वानि सर्वाण्येव स्वपत्यानि शोभनापत्यहेतूनि । यद्वा सुष्ठु पतनकारणानि वायुदेवत्यानि कर्माणि चक्रुः कुर्वंति ॥

द्वितीये छंदोमे प्रउगशस्त्र ऐंद्रवायवतृचस्य यावत्तर इत्यादिके द्वे ऋचौ सूत्रं तु पूर्वमेवोदाहृतं ॥

॥ तयोः प्रथमा सूक्ते चतुर्थी ॥

यावत्तरस्तन्वो३ यावदोजो यावन्नरश्चक्षसा दीध्यानाः ।

शुचिं सोमं शुचिपा पातमस्मे इंद्रवायू सदतं बर्हिरेदं ॥ ४

यावत् । तरः । तन्वः । यावत् । ओजः । यावत् । नरः ।

चक्षसा । दीध्यानाः ।

शुचिं । सोमं । शुचिऽपा । पातं । अस्मे इति । इंद्रवायू

इति । सदतं । बर्हिः । आ । इदं ॥ ४

हे इंद्रवायू युवयोस्तन्वः शरीरस्य तरो वेगो यावदस्ति । यावच्चौजो बलं । यावच्च नरः कर्मणां नेतार ऋत्विजश्चक्षसा ज्ञानेन दीध्याना दीप्यमाना भवंति तस्य सर्वस्यानुरूपं शुचिपा शुचेः सोमस्य पाताराविंद्रवायू शुचिं शुद्धं सोममस्मे अस्मदीयं पातं पिबतं । इदं वेद्यां स्तीर्णं बर्हिश्चासदतं । पानार्थमासीदतं । बर्हिष्युपविशतमित्यर्थः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ पंचमी ॥

निंयुवाना नियुतः स्पार्हवीरा इंद्रंवायू सरथं यातमर्वाक्।

इदं हि वां प्रभृंतं मध्वो अग्रमध प्रीणाना वि मुंमुक्तमस्मे ॥ ५

निऽयुवाना। निऽयुतः। स्पार्हऽवीराः। इंद्रंवायू इतिं।

सऽरथं। यातं। अर्वाक्।

इदं। हि। वां। प्रऽभृंतं मध्वः। अग्रं। अधं।

प्रीणाना। वि। मुमुक्तं। अस्मे इतिं॥ ५

हे इंद्रवायू स्पार्हवीराः स्पृहणीयवीरोपेता नियुत आत्मीयानश्वान् सरथमुभयोः समानमेकं रथं नियुवाना नियमयंतौ युवामस्मदभिमुखं यातं गच्छतं। इदं हीदं खलु मध्वो मधुरस्य सोमस्याग्र्यं प्रथेभ्वाद्यमैंद्रवायवाख्यं ग्रहं वां युवयोरर्थं प्रभृतं प्रकर्षेण हृतं होमार्थमुत्तरवेदिं प्रति नीतं। अधाथ मादकस्य सोमस्य पानानंतरं प्रीणाना प्रीयमाणौ युवामस्मान् विमुमुक्तं। पापाद्विमोचयतं॥

प्रथमे छंदोमे प्रउगशस्त्र ऐंद्रवायवतृचस्य या वां शतमिति तृतीया॥ सूत्रितं च। या वां शतं नियुतो याः सहस्रमित्येकपातिन्यः। आ० ८. ११.। इति॥

॥ सैषात्र षष्ठी ॥

या वां शतं नियुतो याः सहस्रमिंद्रंवायू विश्ववाराः सचंते।

आभिर्यातं सुविदत्राभिरर्वाक्पातं नरा प्रतिंभृतस्य मध्वः॥ ६

याः। वां। शतं। निऽयुतः। याः। सहस्रं। इंद्रंवायू इतिं।

विश्वऽवाराः। सचंते।

आ। आभिः। यातं। सुऽविदत्राभिः। अर्वाक्। पातं।

नरा। प्रतिंऽभृतस्य। मध्वः॥ ६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे इंद्रवायू या नियुतः शतं शतसंख्याकाः सत्यो वां युवां सचंते सेवंते । याश्च विश्ववारा विश्वैर्वरणीया नियुतः सहस्रं सहस्रसंख्याकाः सत्यो युवां सचंते सुविदत्राभिः शोभनधनप्रदाभिराभिर्नियुद्भिरश्वैर्गमद्भिरस्मद्यागमायातं । आगच्छतं । नरा नेतारौ प्रतिष्ठितस्योत्तरवेदिं प्रति नीतस्य गभ्यो मधुरस्य सोमस्य ॥ द्वितीयार्थे षष्ठी ॥ इमं सोमं पातं । पिबतं ॥

॥ अथ सप्तमी ॥

अर्वंतो न श्रवसो भिक्षमाणा इंद्रवायू सुष्टुतिभिर्वसिष्ठाः ।

वाजयंतः स्ववसे हुवेम यूयं पात स्वस्तिभिः सदा नः ॥ ७

अर्वंतः । न । श्रवसः । भिक्षमाणाः । इंद्रवायू इति ।

सुस्तुतिऽभिः । वसिष्ठाः ।

वाजऽयंतः । सु । अवसे । हुवेम । यूयं । पात । स्वस्तिऽभिः ।

सदा । नः ॥ ७

व्याख्यातेयं । अक्षरार्थस्तु । अश्वा इव क्षत्रियां योद्धारोऽन्नं याचमाना धनं कामयमाना वसिष्ठा वयं शोभनरक्षणाय शोभनैः स्तोत्रैरिंद्रवायू आह्वयेमहीति ॥

॥ इति पंचमस्य षष्ठे त्रयोदशो वर्गः ॥

आ वायो इति पंचर्चं तृतीयं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वायव्यं । अनुक्रांतं च । आ वायो पंचेति ॥ सुनासीरीये पर्वणि वायोर्नियुत्वतो यागस्या वायो इत्यनुवाक्या । सूत्रितं च । आ वायो भूष शुचिपा उप नः प्र याभिर्यासि दाश्वांसमच्छ । आ० २. २०. । इति ॥ नियुत्वद्वायुदेवताके पशावप्येषैव वपाया अनुवाक्या । आ० ३. ८. ॥ प्रथमे छंदोमे प्रउगशस्त्रे वायव्यतृचस्यैषाद्या । सूत्रितं च । समुद्रादूर्मिरित्याज्यमा वायो भूष शुचिपाः । आ० ८. ९. । इति ॥

॥ सैषा प्रथमा ॥

आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार ।

उपो ते अंधो मद्यमयामि यस्य देव दधिषे पूर्वपेयं ॥ १

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

आ। वायो इति। भूष। शुचिऽपाः। उप। नः। सहस्रं।
ते। निऽयुतः। विश्वऽवार।
उपो इति। ते। अंधः। मद्यं। अयामि। यस्य। देव।
दधिषे। पूर्वऽपेयं॥ १

हे शुचिपाः शुद्धस्य सोमस्य पातर्वायो नोऽस्माकमुप समीप आभूष। आगच्छ॥ भू प्राप्तावित्यस्यैतद्रूपं॥ हे विश्ववार विश्वैर्वरणीय ते तव वाहनभूता नियुतो वडवाः सहस्रं सहस्रसंख्याका विद्यंते। यत एवमतः शीघ्रमागच्छ। ते तव मद्यं मदकरं सोमलक्षणमंधोऽन्नमुप उप च उपायामि। उपयतं पात्रे गृहीतमासीत्। हे देव वायो यस्य सोमस्य पूर्वपेयं प्रथमपानं दधिषे दधासि धारयसि। ऐंद्रवायवग्रहे प्रथमे वषट्कारे केवलाय वायवे हूयते द्वितीये त्विंद्रवायुभ्यामिति वायोः प्रथमपानं। तादृशमंधः उपायामीत्यन्वयः॥

प्रथमे छंदमे प्रउगशस्त्रे ऐंद्रवायवतृचस्य प्र सोतेत्याद्या। सूत्रितं च। प्र सोता जीरो अध्वरेष्वस्थाद्वे वायव इंद्रवायू इति वा। आ० ८. ९.। इति॥

॥ सैषा द्वितीया॥

प्र सोता जीरो अध्वरेष्वस्थात्सोममिंद्राय वायवे पिबध्यै।
प्र यद्वां मध्वो अग्रियं भरंत्यध्वर्यवो देवयंतः शचीभिः॥ २

प्र। सोता। जीरः। अध्वरेषु। अस्थात्। सोमं। इंद्राय।
वायवे। पिबध्यै।
प्र। यत्। वां। मध्वः। अग्रियं। भरंति। अध्वर्यवः।
देवऽयंतः। शचीभिः॥ २

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

धीरः शिल्पकारो सोमाभिषोताध्वर्युरिंद्राय वायवे च पिबध्यै पानार्थमध्वरेषु यागेषु सोमं प्राभरत् । प्रातिष्ठिपत् । पुरस्तादुत्तरवेदिं प्रापितवान् । हे इंद्रवायू यत् येषु यज्ञेषु मध्वः सोमस्याग्रियमग्रभवं प्रथमपानं देवयंतो देवकामा अध्वर्यवः अवीषि कर्मभिरभिषवादिलक्षणैः शुचयोरर्थं ॥ भरंति प्रक्षेपेण भरंति संपादयंति तेष्वध्वरेष्वित्यन्वयः ॥

शुनासीरीये पर्वणि नियुत्वद्वायोर्यागस्य प्र याभिरिति याज्या । सूत्रितं च । प्र याभिर्यासि दाश्वांसमच्छा स त्वं नो देव मनसा । आ० २. २०. । इति ॥ तद्देवत्ये पशावप्येषैव पुरोडाशस्यानुवाक्या । सूत्रितं च । प्र याभिर्यासि दाश्वांसमच्छा नो नियुद्भिः शतिनीभिः । आ० ३. ८. । इति ॥ प्रथमे छंदोमे प्रउगशस्त्र एषैव वायव्यतृचस्य तृतीया । सूत्रितं च । आ वायो भूष शुचिपा उप नः ॥ प्र याभिर्यासि दाश्वांसमच्छा । आ० ८. ६. । इति ॥

॥ सैषाय तृतीया ॥

प्र याभिर्यासि दाश्वांसमच्छा नियुद्भिर्वायविष्टये दुरोणे ।
नि नो रयिं सुभोजसं युवस्व नि वीरं गव्यमश्व्यं च राधः ॥ ३ ॥

प्र । याभिः । यासि । दाश्वांसं । अच्छ । नियुत्ऽभिः ।
वायो इति । इष्टये । दुरोणे ।
नि । नः । रयिं । सुऽभोजसं । युवस्व । नि । वीरं ।
गव्यं । अश्व्यं । च । राधः ॥

हे वायो दुरोणे यज्ञगृहे स्थितं दाश्वांसं हविषां दातारं यजमानमिष्टये यागाय याभिर्नियुद्भिरश्वाभिरच्छ याभिमुख्येन प्र यासि अभिगच्छसि ताभिरस्मानप्यागच्छेति शेषः । आगत्य च नोऽस्मभ्यं सुभोजसं शोभनभोजनयुक्तं रयिं धनं नि युवस्व । नितरां मिश्रय । प्रयच्छ । तथा वीरं पुत्रं गव्यं गोसंघरूपमश्व्यमश्वसंघरूपमेतदुभयात्मकं राधो धनं च नि युवस्व । प्रयच्छ ॥

प्रथमे छंदोमे प्रउगशस्त्र ऐंद्रवायवतृचस्य ये वायव इंद्रेति द्वितीया । सूत्रितं च । ये वायव इंद्रमादनासो या वां शतं नियुतो याः सहस्रं । आ० ८. ६. । इति ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ सैषा चतुर्थी ॥

ये वायवं इंद्रमादंनास आदेवासो नितोशंनासो अर्यः ।
घ्नंतो वृत्राणि सूरिभिः ष्याम सासह्वांसो युधा नृभिरमित्रान् ॥

ये । वायवे । इंद्रऽमादनासः । आऽदेवासः । निऽतोशनासः ।
अर्यः ।
घ्नंतः । वृत्राणि । सूरिऽभिः । स्याम । ससह्वांसः । युधा
नृऽभिः । अमित्रान् ॥ ४

ये सूरयः स्तोतार इंद्रमादनासः स्तोत्रैरिंद्रस्य तर्पयितारः। तथा वायवे वायोश्च मादनास्तर्पका भवंति। ये चादेवासो जागतैरुपेता अत एवार्योऽरेः शत्रोर्नितोशनासो निहंतारः तैरस्मदीयैः सूरिभिः स्तोतृभिर्वृत्राण्यपि शत्रून् घ्नंतो हिंसंतः स्याम। भवेम। किं कुर्वंतः। अमित्रान् शत्रुभटान् नृभिरस्मदीयैः पुरुषैर्युधा युद्धेन ससह्वांसोऽभिभवंतः ॥

नियुत्वद्वायुदेवताके पशावा नो नियुद्भिरिति हविषोऽनुवाक्या। सूत्रितं च। आ नो नियुद्भिः शतिनीभिरध्वरं पीवोअन्नान्रयिवृधः सुमेधाः। आ० ३. ८.। इति॥ प्रथमे छंदोमे प्रउगशस्त्रे वायव्यतृचस्यैषैव तृतीया। सूत्रितं च। आ नो नियुद्भिः शतिनीभिरध्वरं प्र सोता जीरो अध्वरेष्वस्थात्। आ० ८. ९.। इति॥

॥ सैषा सूक्ते पंचमी ॥

आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुपं याहि यज्ञं ।
वायो अस्मिन्त्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥ ५॥

आ । नः । नियुत्ऽभिः । शतिनीभिः । अध्वरं ।
सहस्रिणीभिः । उप । याहि । यज्ञं ।
वायो इति । अस्मिन् । सवने । मादयस्व । यूयं । पात ।
स्वस्तिऽभिः । सदा । नः ॥ ५

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे वायो नोऽस्माकमध्वरं हिंसारहितं यज्ञं शतिनीभिः शतसंख्याकाभिः सहस्रिणीभिः सहस्रसंख्याकाभिश्च नियुद्भिरश्वाभिरुपायाहि। उपागच्छ। तदनंतरमस्मिन् सवने प्रातःसवने मादयस्व। सोमेन तृप्यस्व। अन्यद्गतं॥

॥ इति पंचमस्य षष्ठे चतुर्दशो वर्गः॥

शुचिं नु इत्यष्टर्चं चतुर्थं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैंद्राग्नं। अनुक्रम्यते हि। शुचिं त्वष्टावैंद्राग्नं त्विति॥ गतः सूक्तविनियोगः। ऐंद्राग्नस्य पशोर्वपायाः शुचिमित्येषा याज्या। सूत्रितं च। शुचिं तु स्तोमं नवजातमद्या गोभिर्विप्रः प्रमतिमिच्छमानः। आ० ३. ७.। इति॥

॥ सैषा प्रथमा॥

शुचिं नु स्तोमं नवजातमद्येंद्राग्नी वृत्रहणा जुषेथां।
उभा हि वां सुहवा जोहवीमि ता वाजं सद्य उशते धेष्ठा॥ १

शुचिं। नु। स्तोमं। नवऽजातं। अद्य। इंद्राग्नी इति।
वृत्रऽहना। जुषेथां।
उभा। हि। वां। सुऽहवा। जोहवीमि। ता। वाजं।
सद्यः। उशते। धेष्ठा॥ १

हे वृत्रहणा वृत्राणां शत्रूणां हंतारा इंद्राग्नी शुचिं शुद्धं निरवद्यं नवजातमिदानीमुत्पन्नं स्तोमं मदीयं स्तोत्रमद्यास्मिन्काले नु क्षिप्रं जुषेथां। सेवेथां। हि यस्मात्सुहवा सुखमाह्वातुं शक्यावुभौ वां युवां जोहवीमि पुनः पुनराह्वयामि अत आगत्य सेवेथामित्यर्थः। किंच ता तौ तथाविधौ युवामुशते कामयमानाय यजमानाय वाजमन्नं बलं वा सद्यस्तदानीमेव धेष्ठा धातृतमौ भवतं॥

॥ अथ द्वितीया॥

ता सानसी शवसाना हि भूतं साकंवृधा शवसा शूशुवांसा।
क्षयंतौ रायो यवसस्य भूरेः पृंक्तं वाजस्य स्थविरस्य घृष्वेः॥ २

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ता। सानसी इति। शवसाना। हि। भूतं। साकंऽवृधा।

शवसा। शूशुऽवांसा।

क्षयंती। रायः। यवसस्य। भूरेः। पृंक्तं। वाजस्य।

स्थविरस्य। घृष्वेः॥ २

हे इंद्राग्नी ता तौ तादृशौ सानसी सर्वैः संभजनीयौ युवां शवसाना। शवो बलं। तद्वदाचरंतौ हि खलु भूतं। भवतिश्च लङ्र्थे मंत्रवाचाप्तावित्यर्थः। वीरवंतौ। साकंवृधा सह वर्धमानौ शवसा बलेन शूशुवांसा वर्धमानौ तथा रायो धनस्य भूरेर्बहुलस्य यवसस्यान्नस्य क्षयंतावीश्वरौ। एवंविधौ युवं युवां स्थविरस्य स्थूलस्य घृष्वेः शत्रूणां घर्षकस्य वाजस्यान्नस्य। क्रियाग्रहणमपि कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी॥ ईदृशमन्नं पृंक्तं। संयोजयतं। अस्मभ्यं प्रयच्छतमित्यर्थः॥

॥ अथ तृतीया ॥

उपो ह यद्विदथं वाजिनो गुर्धीभिर्विप्राः प्रमतिमिच्छमानाः।

अर्वंतो न काष्ठां नक्षमाणा इंद्राग्नी जोहुवतो नरस्ते॥ ३

उपो इति। ह। यत्। विदथं। वाजिनः। गुः। धीभिः।

विप्राः। प्रऽमतिं। इच्छमानाः।

अर्वंतः। न। काष्ठां। नक्षमाणाः। इंद्राग्नी इति।

जोहुवतः। नरः। ते॥ ३

वाजिनो हविष्मंतो विप्रा मेधाविनः प्रमतिं प्रकृष्टां मतिमिंद्राग्न्योः स्तुतिरूपां बुद्धिमिच्छमाना आत्मन इच्छंतो यत् ये यजमाना विदथं। विदंति जानंति देवांस्तत्र यजमानास्तेनेति विदथो यज्ञः। तं धीभिः कर्मभिर्हविर्भिर्वोपो गुः। उप गच्छंति। ह इति पूरणः। ते नरः कर्मणां नेतारो जना अर्वंतो न काष्ठां यथाश्वाः शीघ्रं युद्धभूमिं व्याप्नुवंति तथा नक्षमाणा ऐंद्राग्नानि कर्माणि व्याप्नुवंत इंद्राग्नी इंद्रं चाग्निं च जोहुवतः। पुनः पुनराह्वयंतः। भवंति॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अनाराध्यायामैंद्राग्नस्य हविषो गीर्भिर्विप्र इत्येषा याज्या। सूत्रितं च। इंद्राग्नी अवसा गतं गीर्भिर्विप्रः प्रमतिमिच्छमानः। आ० २. ८.। इति॥ ऐंद्राग्ने पशौ पुरोडाशस्यैषैव याज्या। सूत्रं तूदाहृतं॥

॥ सैषा चतुर्थी॥

गीर्भिर्विप्रः प्रमतिमिच्छमान ईट्टे रयिं यशसं पूर्वभाजं।

इंद्राग्नी वृत्रहणा सुवज्रा प्र नो नव्येभिस्तिरतं देष्णैः॥ ४

गीःऽभिः। विप्रः। प्रऽमतिं। इच्छमानः। ईट्टे। रयिं।

यशसं। पूर्वऽभाजं।

इंद्राग्नी इति। वृत्रऽहना। सुऽवज्रा। प्र। नः। नव्येभिः।

तिरतं। देष्णैः॥ ४

हे इंद्राग्नी प्रमतिं युवयोरनुग्रहबुद्धिमिच्छमान इच्छन् विप्रो मेधावी यजमानो यशसं यशस्करं युष्मत् पूर्वभाजं पूर्वमेव संभजनीयं रयिं धनमुद्दिश्य गीर्भिः स्तुतिभिरीट्टे। स्तौति। हे वृत्रहणा वृत्रस्य हंतारौ सुवज्रा शोभनायुधाविंद्राग्नी नव्येभिर्नवतरैः प्रशस्तैर्देष्णैर्दातव्यैर्धनैर्नोऽस्मान् प्रतिरतं। प्रवर्धयतं॥

॥ अथ पंचमी॥

सं यन्मही मिथती स्पर्धमाने तनूरुचा शूरसाता यतैते।

अदेवयुं विदथे देवयुभिः सत्रा हतं सोमसुता जनेन॥ ५

सं। यत्। मही इति। मिथती इति। स्पर्धमाने इति।

तनूऽरुचा। शूरऽसाता। यतैते इति।

अदेवऽयुं। विदथे। देवयुऽभिः। सत्रा। हतं। सोमऽसुता।

जनेन॥ ५

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

षष्ठी षष्ठ्यौ मियती परस्परं हिंसंत्यौ । यद्वा मेयतिराक्रोशकर्मा । परस्पर-
माक्रोशंत्यौ स्पर्धमाने स्पर्धां कुर्वंत्यौ तनूरुचा‒‒‒इतं । हिंसितं । तथा सोमसुता
सोमस्य हुवता अनेन यजमानसंबंधिना सोमसुतं जनं हिंसितं ॥

॥ इति पंचमस्य षष्ठे पंचदशो वर्गः ॥

॥ अथ षष्ठी ॥

इमामु षु सोमसुतिमुप न एंद्राग्नी सौमनसाय यातं ।
नू चिद्धि परिमम्नाथे अस्माना वां शश्वद्भिर्ववृतीय वाजैः ॥ ६

इमां । ऊं इति । सु । सोमऽसुतिं । उप । नः । आ ।
इंद्राग्नी इति । सौमनसाय । यातं ।
नु । चित् । हि । परिमम्नाथे इति परिऽमम्नाथे । अस्मान् ।
आ । वां । शश्वत्ऽभिः । ववृतीय । वाजैः ॥ ६

हे इंद्राग्नी इमामु इमामेव नोऽस्मदीयां सोमसुतिं सोमाभिषवक्रियां सौम-
नसाय सुमनसो भावाय सु सुष्ठूपयातं । उपागच्छतं । अपि च युवामस्मान् परित्यज्य
नू चित् नैव मम्नाथे । अन्यान् न मन्येथे । अस्मानेव सर्वदा बुध्येथे । हि यस्मादेवं
तस्माद्वां युवां शश्वद्भिर्बहुभिर्भोजैरन्नैर्हविर्लक्षणैरावृतीय । आवर्तयामि ॥

॥ अथ सप्तमी ॥

सो अग्न एना नमसा समिद्धोऽच्छा मित्रं वरुणमिंद्रं वोचेः ।
यत्सीमागश्चकृमा तत्सु मृळ तदर्यमादितिः शिश्रथंतु ॥ ७

सः । अग्ने । एना । नमसा । संऽइद्धः । अच्छ । मित्रं ।
वरुणं । इंद्रं । वोचेः ।
यत् । सीं । आगः । चकृम । तत् । सु । मृळ । तत् ।
अर्यमा । अदितिः । शिश्रथंतु ॥ ७

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

हे अग्ने स त्वमेनैनेन नमसान्नेनाग्नेयेन हविषा समिद्धः संदीप्तः सन् मित्रं वरुणमिंद्रं चाच्छ वोचेः। अभिब्रूयाः। अयमस्मदीयो रक्षणीय इति कथय। वयं यदागोऽपराधं। सीमिति परिग्रहार्थीयः। सीं सर्वतो वाङ्मनःकायैश्चकृम कृतवंतो वयं तत्तस्मादागसः सु मृळ। अस्मान् सुखय। तच्चागोऽर्यमादितिर्मित्रादयश्च शिश्रथंतु। अस्मत्तो वियोजयंतु॥

॥ अथाष्टमी ॥

एता अग्न आशुषाणास इष्टीर्युवोः सचाभ्यश्याम वाजान्।
मेंद्रो नो विष्णुर्मरुतः परि ख्यन्यूयं पात स्वस्तिभिः सदा नः।८

एता। अग्ने। आशुषाणासः। इष्टीः। युवोः। सचा। अभि।
अश्याम। वाजान्।
मा। इंद्रः। नः। विष्णुः। मरुतः। परि। ख्यन्।
यूयं। पात। स्वस्तिऽभिः। सदा। नः॥ २

हे अग्ने। उपलक्षणमेतत्। हे इंद्राग्नी एता इष्टीरिमान्यज्ञानाशुषाणास आशु शीघ्रं संभजमाना वयं युवोर्युवयोः प्रभूतान्वाजानन्नानि सचा सह युगपदेवाभ्यश्याम। अभिप्राप्नुयाम। अपि चेंद्रो विष्णुर्मरुतश्च नोऽस्मान् मा परि ख्यन्। अस्मान्परित्यज्यान्यान् मा प्राप्नुः। सर्वदास्मानेव पश्यंतु॥ अन्यद्गतं॥

॥ इति पंचमस्य षष्ठे षोडशो वर्गः ॥

इयं वामिति द्वादशर्चं पंचमं सूक्तं वसिष्ठस्यार्षमैंद्राग्नं। द्वादश्यनुष्टुप् शिष्टा गायत्र्यः। तथा चानुक्रांतं। इयं वां द्वादश गायत्रमंत्यानुष्टुबिति॥ ज्योतिष्टोमे प्रातःसवनेऽच्छावाकशस्त्र आदितो नवर्चः शस्यंते। सूत्र्यते हि। इयं वामस्य मन्मन इति नव। आ० ५. १०.। इति॥ आभिप्लविकेषूक्थ्येषु स्तोमेष्वच्छावाकस्य प्रातःसवन इदं सूक्तमावापार्थमुत्तमावर्जं। सूत्रितं च। इयं वामस्य मन्मन इत्येकादश। आ० ७. ५.। इति॥ चातुर्विंशिकेऽहनि प्रातःसवने तस्यैवाद्यस्तृचः। सूत्रितं च। इयं वामस्य मन्मन इंद्राग्नी युवामिमे। आ० ७. २.। इति॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तत्र प्रथमा ॥

इयं वामस्य मन्मन इन्द्राग्नी पूर्व्यस्तुतिः।
अभ्राद्वृष्टिरिवाजनि ॥ १

इयं। वां। अस्य। मन्मनः। इन्द्राग्नी इति। पूर्व्यऽस्तुतिः।
अभ्रात्। वृष्टिःऽइव। अजनि ॥ १

हे इंद्राग्नी इयं पूर्व्यस्तुतिः पूर्व्या मुख्या स्तुतिरस्य मन्मन स्तोतुरस्मात्सकाशाद्युवाभ्यां युवयोरर्थमभ्रान्मेघाद्वृष्टिरिव यथा सत्यजनि। प्रादुर्भूता। तां शृणुतमित्युत्तरत्र संबंध ॥

॥ अथ द्वितीया ॥

शृणुतं जरितुर्हवमिन्द्राग्नी वनतं गिरः।
ईशाना पिप्यतं धियः ॥ २

शृणुत। जरितुः। हवं। इन्द्राग्नी इति। वनतं। गिरः।
ईशाना। पिप्यतं। धियः ॥ २

हे इंद्राग्नी जरितुः स्तोतुर्हवमाह्वानं युवां शृणुतं। शृणुतं च गिरस्तदीयाः स्तुतीर्वनतं। संभजतं। तथेशानेश्वरौ युवां धियोऽनुष्ठितानि कर्माणि पिप्यतं। तत्स्थैः फलैः पूरयतं ॥

॥ अथ तृतीया ॥

मा पापत्वाय नो नरेन्द्राग्नी माभिशस्तये।
मा नो रीरधतं निदे ॥ ३

मा। पापऽत्वाय। नः। नरा। इन्द्राग्नी इति। मा।
अभिऽशस्तये।
मा। नः। रीरधतं। निदे ॥ ३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे नरा नेताराविंद्राग्नी नोऽस्मान् पापत्वाय हीनभावाय मा रीरधतं । तथाभिशस्तये शत्रुभिः कृतायाभिशंसनाय मा रीरधतं । तथा निदे निंदकाय जनाय नोऽस्मान् मा रीरधतं । मा वशीकुरुतं ॥

चातुर्विंशिकेऽहनि प्रातःसवनेऽच्छावाकशस्त्रे ऽन्त्येयं [illegible] कल्पः । सूत्रितं च । इंद्रे अग्ना नमो बृहता युवं यथोरिदं । ७. २. । इति ॥

॥ तत्र प्रथमा सूक्ते चतुर्थी ॥

इंद्रे अग्ना नमो बृहत्सुवृक्तिमेरयामहे ।

धिया धेना अवस्यवः ॥ ४

इंद्रे । अग्ना । नमः । बृहत् । सुऽवृक्तिं । आ । ईरयामहे ।

धिया । धेनाः । अवस्यवः ॥ ४

अवस्यवो रक्षणकामा वयमिंद्रे देवेऽग्नौ च बृहत्प्रभूतं नमो हविर्लक्षणमन्नं सुवृक्तिं सुप्रवृत्तां स्तुतिं चेरयामहे । अभिप्रेरयामः । तथा धिया कर्मणा युक्ता धेनाः । वाङ्नामैतत् । अवगीताः [illegible] स्तुतिवाचश्चाभिप्रेरयामः ॥

॥ अथ पंचमी ॥

ता हि शश्वंत ईळत इत्था विप्रास ऊतये ।

सबाधो वाजसातये ॥ ५

ता । हि । शश्वंतः । ईळते । इत्था । विप्रासः । ऊतये ।

सऽबाधः । वाजऽसातये ॥ ५

ता हि तौ खल्विंद्राग्नी शश्वंतो बहवो विप्रासो मेधाविनो जना ऊतये रक्षणायेत्थमनेन प्रकारेणेळते । स्तुवंति । तथा सबाधः समानं बाध्यमानाः परस्परं बाध्यमाना जना वाजसातयेऽन्नलाभाय तावेवेंद्राग्नी ईळते । स्तुवंति । यद्वा वाजसातिरिति संग्रामनाम । संग्रामार्थं ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ षष्ठी ॥

ता वां गीर्भिर्विपन्यवः प्रयस्वंतो हवामहे।

मेधसाता सनिष्यवः ॥ ६

ता। वां। गीःऽभिः। विपन्यवः। प्रयस्वंतः। हवामहे।

मेधऽसाता। सनिष्यवः ॥ ६

विपन्यवः स्तोत्रमिच्छंतः प्रयस्वंतो हविर्लक्षणेनान्नेनोपेताः सनिष्यवः धनं धनि-मात्मन इच्छंतो वयं मेधसाता मेधानां यागानां सातौ संभजने निमित्तभूते सति हे इंद्राग्नी ता तौ वां युवां गीर्भिः स्तुतिभिर्हवामहे। आह्वयामहे ॥

॥ इति पंचमस्य षष्ठे सप्तदशो वर्गः ॥

अनारंभणीयायामैंद्राग्नस्य हविष इंद्राग्नी अवसेत्यनुवाक्या। सूत्रितं च। इंद्राग्नी अवसा गतं गीर्भिर्विप्रः प्रमतिमिच्छमानः। आ० २, ६.। इति ॥

॥ अथ सप्तमी ॥

इंद्राग्नी अवसा गतमस्मभ्यं चर्षणीसहा।

मा नो दुःशंस ईशत ॥ ७

इंद्राग्नी इति। अवसा। आ। गतं। अस्मभ्यं।

चर्षणिऽसहा।

मा। नः। दुःऽशंसः। ईशत ॥ ७

हे चर्षणिसहा चर्षणीनां मनुष्याणां शत्रुभूतानामभिभवितारौ हे इंद्राग्नी अस्मभ्यं स्तोतृभ्यो देयेनावसान्नेन सहागतं। आगच्छतं। दुःशंसो दुष्टाभिशंसनः पापरूपराक्षसादिः शत्रुर्नोऽस्मानीशत। ईशिष्ट। अस्मान्याधितुं मा शक्नोतु ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथाष्टमी ॥

मा कस्य नो अररुषो धूर्तिः प्र णङ्मर्त्यस्य ।

इंद्राग्नी शर्म यच्छतं ॥ ८

मा । कस्य । नः । अररुषः । धूर्तिः । प्र । नक् । मर्त्यस्य ।

इंद्राग्नी । शर्म । यच्छतं ॥ ८

हे इंद्राग्नी कस्य कस्य चिदप्यररुषोऽरेर्मर्त्यस्य मनुष्यस्य संबंधिनी धूर्तिर्हिंसा नोऽस्मान्मा प्रणक्। मा प्राप्नोतु। शर्म। सुखं चास्मभ्यं प्रयच्छतं। दत्तं ॥

॥ अथ नवमी ॥

गोमद्धिरण्यवद्वसु यद्वामश्वावदीमहे ।

इंद्राग्नी तद्वनेमहि ॥ ९

गोऽमत् । हिरण्यऽवत् । वसु । यत् । वां । अश्वऽवत् ।

ईमहे ।

इंद्राग्नी इति । तत् । वनेमहि ॥ ९

हे इंद्राग्नी गोमद्गोभिर्युक्तं हिरण्यवद्धिरण्यैः सुवर्णैर्युक्तमश्वावदश्वैश्चोपेतं यद्वसु वां युवामीमहे याचामहे तद्वसु युवयोः प्रसादाद्वयं वनेमहि। संभजेमहि ॥

चातुर्विंशिकेऽहनि प्रातःसवनेऽच्छावाकशस्त्रे यत्सोम आ सुत इत्यारंभणीयाप्र-गंपेषु च द्वितीयादिष्वहःस्वेषा प्रातःसवने तेनैव शंसनीया। सूत्रितं च। यत्सोम आ सुते नर इत्यारंभणीयाः शस्त्वा। आ० ७. २.। इति ॥

॥ सैषा दशमी ॥

यत्सोम आ सुते नर इंद्राग्नी अजोहवुः ॥

सप्तीवंता सपर्यवः ॥ १०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यत्। सोमे। आ। सुते। नरः। इन्द्राग्नी इति। अजोहवुः।

सप्तिऽवन्ता। सपर्यवः॥ १०

सोमे सुतेऽभिषुते सति नरः कर्मणां नेतार ऋत्विजः सपर्यवः परिचरणकामाः सन्तः सप्तीवन्ता प्रशस्ताश्वाविन्द्राग्नी इन्द्रमग्निं च यद्यदाजोहवुः अभिह्वयन्ते तदा युवामागच्छतमिति शेषः ॥

॥ अथैकादशी ॥

उक्थेभिर्वृत्रहन्तमा या मन्दाना चिदा गिरा।

आङ्गूषैराविवासतः॥ ११

उक्थेभिः। वृत्रहन्ऽतमा। या। मन्दाना। चित्। आ।

गिरा।

आङ्गूषैः। आऽविवासतः॥ ११

वृत्रहन्तमा वृत्राणामावरकाणां हन्तृतमौ मन्दाना मोदमानौ या याविन्द्राग्नी उक्थेभिः शस्त्रैर्गिरा च स्तुत्या आविवासतः परिचरन्ति ॥ व्यत्ययेन कर्मणि कर्तृप्रत्ययः ॥ आङ्गूषैराघोषैरन्यैश्च स्तोत्रैश्चाविवासतः परिचरन्ति तौ युवामागच्छतमिति शेषः ॥

॥ अथ द्वादशी ॥

ताविद् दुःशंसं मर्त्यं दुर्विद्वांसं रक्षस्विनं।

आभोगं हन्मना हतमुदधिं हन्मना हतं॥ १२

तौ। इत्। दुःऽशंसं। मर्त्यं। दुःऽविद्वांसं। रक्षस्विनं।

आऽभोगं। हन्मना। हतं। उदऽधिं। हन्मना। हतं॥ १२

हे इन्द्राग्नी तौ युवां दुःशंसं दुष्टाभिशंसनं दुर्विद्वांसं दुर्विज्ञानं रक्षस्विनं रक्षःसमानमाभोगमाभुज्यमानमपहृत्य भोक्तारं मर्त्यं मनुष्यं मर्त्यं हन्मना हननसाधनेना-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

क्षुधेन हतं। हिंसां। अस्मभ्यमर्थं हरांतेन उदयसि। उदधिं। कुंभोपमस्तत्।
उदधानं कुंभमिव। यथा कुंभोऽनायासेन भिद्यत एवमनायासेनैव अस्मदायुधेन
युवां हिंसा॥

॥ इति पंचमस्य षष्ठेऽष्टादशो वर्गः॥

प्र क्षोदसेति सप्तर्चं षष्ठं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं सरस्वतीदेवताकं। तृतीया तु सरस्वद्देवताका। अनुक्रम्यते च। प्र क्षोदसा षट् सारस्वतं तु तृतीया सरस्वत इति॥ गतः सूक्तविनियोगः॥ प्रथमे छंदोमे प्रउगशस्त्र प्र क्षोदसा धायसा सस्र एषेति प्रउगं। आ० ८. ६.। इति॥ सारस्वते पशौ प्र क्षोदसेति वपाया याज्या। सूत्रितं च। प्र क्षोदसा धायसा सस्र एषा पावीरवी कन्या चित्रायुः। आ० ३. ८.। इति॥

॥ तत्र प्रथमा॥

प्र क्षोदसा धायसा सस्र एषा सरस्वती धरुणमायसी पूः।
प्रबाबधाना रथ्येव याति विश्वा अपो महिना सिंधुरन्याः॥ १

प्र। क्षोदसा। धायसा। सस्रे। एषा। सरस्वती।
धरुणं। आयसी। पूः।
प्रऽबाबधाना। रथ्याऽइव। याति। विश्वाः। अपः।
महिना। सिंधुः। अन्याः॥ १

सरस्वत्या एषा नद्यधिगमा। एषा दृश्यमाना नदीरूपा सरस्वत्यायस्मयस्य निर्मिता पूः पुरीव धरुणं॥ लिंगव्यत्ययः॥ धरुणा धारयित्री धायसा धारकेण क्षोदसोदकेन प्रसस्रे। प्रधावति। शीघ्रं गच्छति। सिंधुः स्यंदनशीला नदीरूपा अन्या विश्वाः सर्वा अप आपगा महिना महिम्ना प्रबाबधाना अत्यर्थं बाधमाना रथ्येव प्रतोलीव विस्तीर्णा सती याति। गच्छति। यद्वा। रथ्येव रथिनेव यथा रथो रथेन मार्गस्थं तृणगुल्मादिकं चूर्णीकृत्य गच्छति तद्वत् स्वकीयेन वेगेन सर्वं संपिंषती गच्छतीत्यर्थः॥

सारस्वत एव पशौ वपाया एकाचेतदित्यनुवाक्या। सूत्रितं च। एकाचेतत्सरस्वती नदीनामुत स्या नः सरस्वती जुषाणा। आ० ३. ७.। इति॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ सैषा द्वितीया ॥

एकाचेतत्सरस्वती नदीनां शुचिर्यती गिरिभ्य आ समुद्रात्।
रायश्चेतन्ती भुवनस्य भूरेर्घृतं पयो दुदुहे नाहुषाय ॥ २

एका। अचेतत्। सरस्वती। नदीनां। शुचिः। यती।
गिरिऽभ्यः। आ। समुद्रात्।
रायः। चेतन्ती। भुवनस्य। भूरेः। घृतं। पयः। दुदुहे।
नाहुषाय ॥ २

सहस्रसंवत्सरेण क्रतुना यक्ष्यमाणो नाहुषो नाम राजा सरस्वतीं नदीं प्रार्थयाञ्चकार सा च तस्मै सहस्रसंवत्सरपर्याप्तं पयो घृतं च प्रददौ। अयमर्थोऽत्र प्रतिपाद्यते। नदीनामन्यासां मध्ये शुचिः शुद्धा गिरिभ्यः सकाशादा समुद्रात्समुद्रपर्यन्तं यती गच्छन्त्येका सरस्वती नद्यचेतत्। नाहुषस्य प्रार्थनामजानात्। तथा भुवनस्य भूतजातस्य भूरेर्बहुलस्य रायो धनानि चेतन्ती प्रज्ञापयन्ती प्रयच्छन्ती नाहुषाय राज्ञे घृतं पयश्च सहस्रसंवत्सरक्रतोः पर्याप्तं दुदुहे। दुग्धवती। दत्तवती॥

सरस्वद्देवताके पशौ स वावृध इति पुरोडाशस्य याज्या। सूत्रितं च। स वावृधे नर्यो योषणासु यस्य व्रतं पशवो यन्ति सर्वे। आ० ३. ८.। इति॥

। सैषा तृतीया।

स वावृधे नर्यो योषणासु वृषा शिशुर्वृषभो यज्ञियासु।
स वाजिनं मघवद्भ्यो दधाति वि सातये तन्वं मामृजीत ॥ ३

सः। ववृधे। नर्यः। योषणासु। वृषा। शिशुः। वृषभः।
यज्ञियासु।
सः। वाजिनं। मघवत्ऽभ्यः। दधाति। वि। सातये।
तन्वं। मामृजीत ॥ ३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मध्यस्थाने वायुः सरस्वान् । नर्यो नृभ्यो हितो वृषा सेचनसमर्थः शिशुर्बालः प्रादुर्भावसमयेऽल्पतया दृश्यमानो वृषभो वर्षिता । एवंभूतः स सरस्वान् यज्ञियासु यज्ञार्हासु योषणासु योषित्स्वात्मनः कलत्रभूतासु मध्यमस्य नाम्नाप्सु वावृधे । वर्धते । स तादृशः सरस्वान् मघवद्भ्यो हविष्मद्भ्यो यजमानेभ्यो वाजिनं बलिनं पुत्रं दधाति । ददाति । तथा सातये लाभार्थं तन्वं तेषां शरीरं वि मामृजीत । विमार्ष्टि । लाभार्थं संस्करोतीत्यर्थः । यद्यप्येषा सरस्वतः स्तुतिस्तथापि सरस्वत्याः प्रीणनार्थं तत्कृतमिति छान्दोगिके सारस्वते तृचेऽस्या उक्तो विनियोगो न विरुध्यते ॥

दशरात्रेऽष्टमेऽहनि प्रउग उत स्या न इति सारस्वतः सप्तमस्तृचः । सूत्रितं च । उत स्या नः सरस्वती जुषाणेति प्रउगं । आ० ८. १०. । इति ॥ सारस्वते पशौ पुरोडाशस्योत स्या न इत्यनुवाक्या । सूत्रितं च । उत स्या नः सरस्वती जुषाणा सरस्वत्यभि नो नेषि वस्यः । आ० ३. ७. । इति ॥

॥ सैषा सूक्ते चतुर्थी ॥

उत स्या नः सरस्वती जुषाणोप श्रवत्सुभगा यज्ञे अस्मिन् ।
मितज्ञुभिर्नमस्यैरियाना राया युजा चिदुत्तरा सखिभ्यः ॥ ४

उत । स्या । नः । सरस्वती । जुषाणा । उप । श्रवत् ।
सुऽभगा । यज्ञे । अस्मिन् ।
मितज्ञुऽभिः । नमस्यैः । इयाना । राया । युजा । चित् ।
उत्ऽतरा । सखिऽभ्यः ॥ ४

उतापि च जुषाणा प्रीयमाणा सुभगा शोभनधना स्या सा सरस्वती नोऽस्माकमस्मिन्यज्ञ उपश्रवत् । अस्मदीयाः स्तुतीरुपशृणोतु । कीदृशी सा । मितज्ञुभिः प्रह्वीभूतजानुभिर्नमस्यैर्नमस्कारार्हैर्देवैरियानोपगम्यमाना । विभक्त्यर्थे । युजा नित्ययुक्तेन राया धनेन च संगता सखिभ्य उत्तरोत्कृष्टतरा । इदंशब्दमस्मदीयाः स्तुतीरुपशृणोत्वित्यन्वयः ॥

पवित्रेष्ट्यां सारस्वतस्य हविष इमा जुह्वाना इति याज्या । सूत्रितं च । इमा जुह्वाना युष्मदा नमोभिरधिमाय्यो अकारि मे । आ० २. १२. । इति ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ सैषा पंचमी ॥

इमा जुह्वाना युष्मदा नमोभिः प्रति स्तोमं सरस्वति जुषस्व।

तव शर्मन्प्रियतमे दधाना उप स्थेयाम शरणं न वृक्षं॥ ५

इमा। जुह्वानाः। युष्मत्। आ। नमःऽभिः। प्रति। स्तोमं।

सरस्वति। जुषस्व।

तव। शर्मन्। प्रियऽतमे। दधानाः। उप। स्थेयाम।

शरणं। न। वृक्षं॥ ५

हे सरस्वति इमेमान्यस्मदीयानि हवींषि जुह्वानास्त्वय्यं जुह्वतो वयं नमोभिरन्नैर्नमस्कारैर्युष्मत्सकाशादा॥ उपसर्गश्रुतेर्योग्यक्रियाध्याहारः॥ आददीमहि धनानीति शेषः। स्तोमं चास्मदीयं स्तोत्रं प्रतिजुषस्व। प्रतिसेवस्व। वयं च प्रियतमेऽतिशयेन प्रिये तव त्वदीये शर्मन् शर्मणि सुखे दधाना निधायमानाः अंतः शरणं न वृक्षमाश्रयभूतं वृक्षमिवोपस्थेयाम। त्वामुपतिष्ठेम। संगच्छेमहि॥

॥ अथ षष्ठी ॥

अयमु ते सरस्वति वसिष्ठो द्वारावृतस्य सुभगे व्यावः।

वर्ध शुभ्रे स्तुवते रासि वाजान्यूयं पात स्वस्तिभिः सदा नः॥ ६

अयं। ऊं इति। ते। सरस्वति। वसिष्ठः। द्वारौ।

ऋतस्य। सुऽभगे। वि। आवरित्यावः।

वर्ध। शुभ्रे। स्तुवते। रासि। वाजान्। यूयं। पात।

स्वस्तिऽभिः। सदा। नः॥ ६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे सुभगे शोभनधने सरस्वति अयं वसिष्ठस्त्वां संतुष्टस्तस्य यज्ञस्य संबंधिन्यौ द्वारौ पूर्वापरे द्वारौ। विवृणोति। उ इति पूरणः। हे शुभ्रे शुभ्रवर्णे देवि वर्धं च वर्धस्व। तथा स्तुवते स्तोत्रं कुर्वते वसिष्ठाय वाजानन्नानि रासि। प्रदेहि अन्यद्गतं ॥

॥ इति पंचमस्य पष्ठ एकोनविंशो वर्गः ॥

बृहदु गायिष इति षडृचं सप्तमं सूक्तं वसिष्ठस्यार्षं। आद्या बृहती द्वितीया सतोबृहती तृतीया प्रस्तारपंक्तिः त्रिष्टाद्यास्तिस्रो गायत्र्यः। आद्यस्तृचः सरस्वतीदेवताकोऽन्त्यस्तृचः सरस्वद्देवताकः। तथा चानुक्रांतं। बृहदु प्रगाथः प्रस्तारपंक्तिः पराश्तिस्रो गायत्र्यः सरस्वत इति ॥ पंचमेऽहनि प्रउगशस्त्रे आद्यः प्रगाथः सारस्वततृचः। सूत्रितं च। बृहदु गायिष इति पावीरवं प्रउगं प्रगाथानेके। आ० ७. १२.। इति ॥

॥ तत्र प्रथमा ॥

बृहदु गायिषे वचोऽसुर्या नदीनां।
सरस्वतीमिन्महया सुवृक्तिभिः स्तोमैर्वसिष्ठ रोदसी ॥ १

बृहत्। ऊँ इति। गायिषे। वचः। असुर्या। नदीनां।
सरस्वतीं। इत्। महय। सुवृक्तिऽभिः। स्तोमैः। वसिष्ठ।
रोदसी इति ॥ १

अनया ऋषिरात्मानं संबोध्य सरस्वत्याः स्तुतौ प्रेरयति। हे वसिष्ठ त्वं बृहद्बृहदेव महदेव वचः स्तोत्रं गायिषे। गायसि। किमर्थं। नदीनां मध्येऽसुर्या ॥ असुरा बलवत्युदात्तत्वैकवचनस्य याऽदेशः ॥ असुरायै बलवत्यै नदीरूपायै सरस्वत्यै। अस्याः प्रीणनार्थमित्यर्थः। तथा रोदसी द्यावापृथिव्योः स्थितां दिवि देवतारूपेण भूम्यां वाग्रूपेण निवसंतीं सरस्वतीमित् सरस्वतीमेव सुवृक्तिभिः सु दोषवर्जितैः स्तोत्रैः स्तोमैर्महय। पूजय। सर्वदा सरस्वतीमेव स्तुहि नान्यां देवतामिति भावः ॥

॥ अथ द्वितीया ॥

उभे यत्ते महिना शुभ्रे अंधसी अधिक्षियंति पूरवः।
सा नो बोध्यवित्री मरुत्सखा चोद राधो मघोनां ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उभे इति । यत् । ते । महिना । शुभ्रे । अंधसी इति ।

अधिऽक्षियंति । पूरवः ।

सा । नः । बोधि । अवित्री । मरुत्ऽसखा । चोद ।

राधः । मघोनां ॥ २

हे शुभ्रे शुभ्रवर्णे सरस्वति यत् यस्मात्ते तव महिना महिम्नोभे अंधसी उभय-विधं दिव्यं पार्थिवं चान्नं चास्मदादयो वा पूरवः पूरयितारो मनुष्या अधिक्षियंति अधिगच्छंति ता तस्मादवित्री रक्षित्री सती नोऽस्मान्बोधि । बुध्यस्व । अपि च मरुत्सखा । मरुतो मार्ध्यमिका देवगणाः । ते सखायो यस्या माध्यमिकायाः वाचस्तादृशी त्वं मघोनां हविर्लक्षणधनोपेतानामस्माकं राधो धनं चोद । प्रेरय ॥

॥ अथ तृतीया ॥

भद्रमिद्भद्रा कृणवत्सरस्वत्यकवारी चेतति वाजिनीवती ।

गृणाना जमदग्निवत्स्तुवाना च वसिष्ठवत् ॥ ३

भद्रं । इत् । भद्रा । कृणवत् । सरस्वती ॥ अकवऽअरी ।

चेतति । वाजिनीऽवती ।

गृणाना । जमदग्निऽवत् । स्तुवाना । च । वसिष्ठऽवत् ॥ ३

भद्रा कल्याणी भजनीया वा सरस्वती भद्रमिद्भद्रमेव कल्याणमेव कृणवत् । अस्माकं करोतु । तथाकवार्यकुत्सितगमना वाजिनीवत्यन्नवती चेतति । चेतयतु । अस्मान् प्रज्ञापयतु । यद्वा अस्मदीयं स्तोत्रं चेतति । जानातु । तथा जमदग्निवत् जमदग्निना ऋषिणेव यथा गृणाना स्तूयमाना अभिष्टुता ॥ सप्तम्यर्थे वतिप्रत्ययः ॥ वसिष्ठवत् वसिष्ठस्येवानुरूपं स्तुवाना स्तूयमाना च भव ॥

सरस्वद्देवताके पशौ जनीयंत इति तिस्रः पुरोडाशहविषां क्रमेणानुवाक्याः । सूत्रितं च । जनीयंतो न्वग्रव इति तिस्रो दिव्यं सुपर्णं वायसं बृहंतं । आ०. ३. ८. ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तत्र प्रथमा सूक्ते चतुर्थी ॥

जनीयंतो न्वग्रवः पुत्रीयंतः सुदानवः ।
सरस्वंतं हवामहे ॥ ४

जनिऽयंतः । नु । अग्रवः । पुत्रिऽयंतः । सुऽदानवः ।
सरस्वंतं । हवामहे ॥ ४

जनीयंतः । जायंत आत्मजपत्यानीति जनयो जायाः । ता इच्छंतः पुत्रीयंतः पुत्रानिच्छंतः सुदानवः शोभनदाना वयम उपगंतारो वयं नु अग्रव्य सरस्वंतं देवं हवामहे । स्तुमहे । आह्वयामहे वा ॥

॥ अथ पंचमी ॥

ये ते सरस्व ऊर्मयो मधुमंतो घृतश्चुतः ।
तेभिर्नोऽविता भव ॥ ५

ये । ते । सरस्वः । ऊर्मयः । मधुऽमंतः । घृतऽश्चुतः ।
तेभिः । नः । अविता । भव ॥ ५

हे सरस्वः सरस्वन् देव ते त्वदीया ये ऊर्मयो जलसंघा मधुमंतो रसवंतो घृतश्चुतो घृतस्य उदकस्य क्षारयितारो भवंति तेभिस्तैरूर्मिभिर्नोऽस्माकमविता रक्षिता भव ॥

अध्वारंभणीयायां सारस्वतयागस्य पीपिवांसमित्यनुवाक्या । सूत्रितं च । पीपिवांसं सरस्वतो दिव्यं सुपर्णं वायसं बृहंतं । आ० २. ८. । इति ॥

॥ पैषा षष्ठी ॥

पीपिवांसं सरस्वतः स्तनं यो विश्वदर्शतः ।
भक्षीमहि प्रजामिषं ॥ ६

पीपिऽवांसं । सरस्वतः । स्तनं । यः । विश्वऽदर्शतः ।
भक्षीमहि । प्रऽजां । इषं ॥ ६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पीपिवांसं प्रवृद्धं सरस्वतो देवस्य स्तनं मध्यमाभं स्तनवदुदकाधारं वा मेघं भक्षीमहि। भजेमहि। प्राप्नुयाम। यो विश्वदर्शतो विश्वैः सर्वैर्दर्शतो भवति द्रष्टव्यो भवति तं स्तनं मेघमित्यर्थः। तथा प्रजां पुत्रादिरूपामिषमन्नं च सरस्वतः प्रसादाद्भक्षीमहि ॥

॥ इति पंचमस्य षष्ठे विंशो वर्गः ॥

यज्ञे दिव इति दशर्चमष्टमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं। प्रथमैंद्री तृतीयानव-म्योरिंद्राब्रह्मणस्पती देवता दशम्या इंद्राबृहस्पती शिष्टानां तु बृहस्पतिः। तथा चानुक्रांतं। यज्ञे दशैंद्र्यादि चाद्यंत्यमंत्यैंद्री च तृतीयानवम्यावैंद्राब्रह्मणस्पत्ये इति ॥ आभिप्लविकेषूक्थ्येषु तृतीयसवने स्तोमवृद्धौ ब्राह्मणाच्छंसिन इदमुत्तमं च सूक्तमावपनार्थं। सूत्रितं च। यज्ञे दिवः। आ० ७. ९.। इति ॥

॥ तत्र प्रथमा ॥

यज्ञे दिवो नृषदने पृथिव्या नरो यत्र देवयवो मदंति ।
इंद्राय यत्र सवनानि सुन्वे गमन्मदाय प्रथमं वयश्च ॥ १

यज्ञे । दिवः । नृऽसदने । पृथिव्याः । नरः । यत्र । देवऽयवः ।
मदंति ।
इंद्राय । यत्र । सवनानि । सुन्वे । गमत् । मदाय । प्रथमं ।
वयः । च ॥ १

यत्र यस्मिन्यज्ञे देवयवो देवान्कामयमाना नरो नेतार ऋत्विजो मदंति हृष्यंति। यत्र यस्मिंश्च सवनान्यभिषोतव्याः सोमा इंद्रायेंद्रार्थं सुन्वे ऽभिषूयंते पृथिव्याः संबंधिनि नृषदने नृणां नेतॄणां सदनभूते तस्मिन्यज्ञे प्रथमं सर्वेभ्यो देवेभ्यः पूर्वं दिवो द्युलोकादिंद्रः। आगच्छतु। किमर्थं। मदाय मदार्थं। सोमं पातुमित्यर्थः। तथा वयश्च गंतारस्तदीया अश्वाश्च गमत्। आगच्छंतु ॥

॥ अथ द्वितीया ॥

आ दैव्या वृणीमहेऽवांसि बृहस्पतिर्नो मह आ सखायः ।
यथा भवेम मीळ्हुषे अनागा यो नो दाता परावतः पितेव ॥ २

वयं । त्वा । गृणीमहे । अवांसि । बृहस्पतिः । नः ।

महे । आ । सखायः ।

यथा । भवेम । मीढुषे । अनागाः । यः । नः । दाता ।

पराऽवतः । पिताऽइव ॥ २

हे सखायः समानख्यानाः स्तोतारो वयं देवस्य दैव्यानि देवसंबंधीन्यवांसि रक्षणान्याहृणीमहे । अभिलषामहे । प्रार्थयामहे । नोऽस्माकं हविर्बृहस्पतिर्बृहतां पालयिता देव आमहे । महतिदानार्थं । आमहते । आदत्ते ॥ लोपस्त आत्मनेपदेष्विति तलोपः ॥ यो बृहस्पतिः परावतो दूरदेशाद्धनान्याहृत्य पुत्रेभ्यः पितेव नोऽस्मभ्यं दाता भवति तस्मै मीढुषे सेक्त्रे बृहस्पतयेऽनागा अनागसोऽनपराधा यथा वयं भवेम हे सखायस्तथा यूयं परिचरतेति शेषः ॥

॥ अथ तृतीया ॥

तमु ज्येष्ठं नमसा हविर्भिः सुशेवं ब्रह्मणस्पतिं गृणीषे ।

इंद्रं श्लोको महि दैव्यः सिषक्तु यो ब्रह्मणो देवकृतस्य

राजा ॥ ३

तं । ऊं इति । ज्येष्ठं । नमसा । हविःऽभिः । सुऽशेवं ।

ब्रह्मणः । पतिं । गृणीषे ।

इंद्रं । श्लोकः । महि । दैव्यः । सिसक्तु । यः । ब्रह्मणः ।

देवऽकृतस्य । राजा ॥ ३

ज्येष्ठं प्रशस्यतमं सुशेवं सुसुखं ब्रह्मणो मंत्रस्य पतिं पालयितारमेनमुग्रं तमु तमेवेंद्रं नमसा नमस्कारेण हविर्भिश्चरुपुरोडाशादिभिश्च सार्धं गृणीषे । गृणे । स्तुवे । अपि च महि महांतमिंद्रं दैव्यो देवार्हः श्लोकोऽस्मदीयः स्तावको मंत्रः सिषक्तु । सेवतां । ब्रह्मणोऽन्नस्य मंत्रस्य वा देवकृतस्य देवैः स्तोतृभिः कृतस्य य इंद्रो ब्रह्मणस्पतिर्वा राजेश्वरो भवति तमिंद्रं तं ब्रह्मणस्पतिमिति संबंधः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ चतुर्थी ॥

स आ नो योनिं सदतु प्रेष्ठो बृहस्पतिर्विश्ववारो यो अस्ति ।
कामो रायः सुवीर्यस्य तं दात्पर्षन्नो अति सश्चतो अरिष्टान् ॥ ४

सः । आ । नः । योनिम् । सदतु । प्रेष्ठः । बृहस्पतिः ।
विश्वऽवारः । यः । अस्ति ।
कामः । रायः । सुऽवीर्यस्य । तम् । दात् । पर्षत् । नः ।
अति । सश्चतः । अरिष्टान् ॥ ४

प्रेष्ठः प्रियतमः स बृहस्पतिर्नोऽस्माकं योनिं स्थानं वेदिलक्षणमासदतु । आसीदतु । आगत्योपविशतु । यो बृहस्पतिर्विश्ववारो विश्वैर्वरणीयोऽस्ति भवति । अपि च रायो धनस्य सुवीर्यस्य शोभनवीर्यस्य च यः कामोऽस्माकमभिलाषोऽस्ति तं कामस्माभ्यं दात् । ददातु । काम्यमानं प्रयच्छत्वित्यर्थः । तथा सश्चत उपद्रवैः संसक्तान्नोऽस्मानरिष्टानहिंसितान् सतोऽतिपर्षत् । अतिपारयति पारयतु ॥

॥ अथ पंचमी ॥

तमा नो अर्कममृताय जुष्टमिमे धासुरमृतासः पुराजाः ।
शुचिक्रन्दं यजतं पस्त्यानां बृहस्पतिमनर्वाणं हुवेम ॥ ५

तम् । आ । नः । अर्कम् । अमृताय । जुष्टम् । इमे । धासुः ।
अमृतासः । पुराऽजाः ।
शुचिऽक्रन्दम् । यजतम् । पस्त्यानाम् । बृहस्पतिम् । अनर्वाणम् ।
हुवेम ॥ ५

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

तं सर्वस्य श्रीणम्यतया अमृतायामरणत्वाय जीवनाय जुष्टं पर्याप्तमर्क- मर्चनसाधनमन्नं पुराजाः पुरा जाता इमेऽमृतासोऽमरणा देवा बृहस्पतेरास्या नोऽस्मभ्यमधासुः। प्रदधुः। यथं च शुचिक्रंदं शुद्धशब्दं यजतं पस्त्यानां। पस्त्यमिति गृहनाम। तेन तद्वंतो लक्ष्यंते। गृहिणां यजतं यष्टव्यमनर्वाणमप्रत्यृतं केनाप्य- प्रतिगतं बृहस्पतिं वयं पावक देवं हुवेम। आह्वयाम। स्तुवेम वा॥

॥ इति पंचमस्य षष्ठे एकविंशो वर्गः॥

॥ अथ षष्ठी॥

तं शग्मासो अरुषासो अश्वा बृहस्पतिं सहवाहो वहंति।

सहश्चिद्यस्य नीळवत्सधस्थं नभो न रूपमरुषं वसानाः॥ ६

तं। शग्मासः। अरुषासः। अश्वाः। बृहस्पतिं। सहऽवाहः।

वहंति।

सहः। चित्। यस्य। नीळऽवत्। सधऽस्थं। नभः। न।

रूपं। अरुषं। वसानाः॥ ६

शग्मासः शग्माः सुखकराः अश्वा व्याप्नुवाना अरुषासः आरोचमानाः सहवाहः संभूय वाहका अश्वास्तं बृहस्पतिं वहंति। वहंतु। यस्य बृहस्पतेः सहश्चित् बलं च अस्ति। नीळवत्। नीळं निलयो निवासः। तद्युक्तं सधस्थं सहस्थानं च यस्य तं बृहस्पतिमित्यन्वयः। कीदृशा अश्वाः। नभो नादित्यमिवारुषमारोचमानं रूपं वसाना धारयंतः॥

॥ अथ सप्तमी॥

स हि शुचिः शतपत्रः स शुंध्युर्हिरण्यवाशीरिषिरः स्वर्षाः।

बृहस्पतिः स स्वावेश ऋष्वः पुरू सखिभ्य आसुतिं करिष्ठः॥ ७

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

सः। हि। शुचिः। शतऽपत्रः। सः। शुन्ध्युः।

हिरण्यऽवाशीः। इषिरः। स्वःऽसाः।

बृहस्पतिः। सः। सुऽआवेशः। ऋष्वः। पुरु। सखिऽभ्यः।

आऽसुतिं। करिष्ठः। ७

स हि स खलु बृहस्पतिः शुचिः शुद्धः शतपत्रो बहुविधवाहनः। स एव शुन्ध्युः सर्वेषां शोधयिता हिरण्यवाशीः। वाशीति वाङ्नाम। हितरमणीयवाक्। यद्वा वाशीभिस्तक्षताश्मन्मयीभिः। ऋग्वे० १०, १०१ ९,। इति निगमाद्वाश्यायुधं। स्वर्णमयायुध इषिरो गंताभ्येषणीयो वा स्वर्षाः स्वर्गस्य संभक्ता। यद्वा सरणशीलस्योदकस्य सनिता दाता स एव बृहस्पतिः स्वावेशः सुनिवास ऋष्वो दर्शनीयः। ईदृशो देवः सखिभ्यः स्तोतृभ्यः पुरु बहुधनमासुतिमन्नं करिष्ठः कर्तृतमो दातृतमो भवति॥

। अथाष्टमी ॥

देवी देवस्य रोदसी जनित्री बृहस्पतिं वावृधतुर्महित्वा।
दक्षाय्याय दक्षता सखायः करद्ब्रह्मणे सुतरा सुगाधा॥ ८

देवी इति। देवस्य। रोदसी इति। जनित्री इति।

बृहस्पतिं। ववृधतुः। महिऽत्वा।

दक्षाय्याय। दक्षत। सखायः। करत्। ब्रह्मणे। सुऽतरा।

सुऽगाधा। ८

देवी देव्यौ दानादिगुणयुक्ते देवस्य बृहस्पतेर्जनित्री जनयित्र्यौ रोदसी द्यावापृथिव्यौ महित्वा महत्त्वेन युक्तं बृहस्पतिं ववृधतुः। वर्धयामासतुः। हे सखायो यूयमपि दक्षाय्याय वर्धनीयाय॥ द्वितीयार्थे चतुर्थी॥ वर्धनीयं तं बृहस्पतिं दक्षत। वर्धयत। स च बृहस्पतिर्ब्रह्मणे ऽहिताय प्रभूतायान्नाय तदर्थं सुतरा सुतरणानि सुखेन तरणीयानि सुगाधा सुखेनावगाहनीयान्युदकानि करत्। करोतु॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ नवमी ॥

इयं वां ब्रह्मणस्पते सुवृक्तिर्ब्रह्मेंद्राय वज्रिणे अकारि ।

अविष्टं धियो जिगृतं पुरंधीर्जजस्तमर्यो वनुषामरातीः ॥ ९

इयं । वां । ब्रह्मणः । पते । सुऽवृक्तिः । ब्रह्म । इंद्राय ।

वज्रिणे । अकारि ।

अविष्टं । धियः । जिगृतं । पुरंऽधीः । जजस्तं । अर्यः ।

वनुषां । अरातीः ॥ ९

हे ब्रह्मणस्पते तुभ्यं वज्रिणे वज्रवत इंद्राय च वां युवाभ्यां । तादर्थ्ये चतुर्थी ॥ ब्रह्म मंत्ररूपेयं सुवृक्तिः सुप्रवृत्ता स्तुतिरकारि । मया कृताभूत् । तौ युवां धियोऽस्मदीयानि कर्माण्यविष्टं । रक्षतं । तथा पुरंधीः पुरुधीर्बह्वीः स्तुतीर्जिगृतं । निगिरतं स्तुतिमिति यावत् । अर्योऽर्योऽभिगंतारोऽस्मान्वनुषां संभक्तॄणां शत्रूणामरातीः शत्रुसेना जजस्तं । उपक्षपयतं ॥

[illegible] ब्राह्मणाच्छंसिनो बृहस्पते युवमिति याज्या । सूत्रितं च । बृहस्पते युवमिंद्रश्च वस्व इति याज्या । आ० ६. १. । इति ॥ वाजपेयेऽपि च । बृहस्पते युवमिंद्रश्च वस्व इति परिधानीया । सूत्रितं च । बृहस्पते युवमिंद्रश्च वस्व इति परिधानीया । आ० ९. ९. । इति ॥

॥ सैषा दशमी ॥

बृहस्पते युवमिंद्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य ।

धत्तं रयिं स्तुवते कीरये चिद्यूयं पात स्वस्तिभिः सदा नः ॥ १०

बृहस्पते । युवं । इंद्रः । च । वस्वः । दिव्यस्य । ईशाथे इति ।

उत पार्थिवस्य ।

धत्तं । रयिं । स्तुवते । कीरये । चित् । यूयं । पात ।

स्वस्तिऽभिः । सदा । नः ॥ १०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे बृहस्पते त्वं चेन्द्रश्च युवां दिव्यस्य दिवि भवस्य वस्वो वसुनो धनस्येशाथे। अतः कारणात् स्तुवते स्तोत्रं कुर्वते वीराय। स्तोतृनामैतत्। स्तोत्रे रयिं धनं धत्तं। दत्तं। पिपृतेति पूर्ववत्। अन्यद्गतं॥

॥ इति पंचमस्य षष्ठे द्वाविंशो वर्गः॥

अध्वर्यव इति सप्तर्चं दशमं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभमैन्द्रं सप्तम्यैन्द्राबार्हस्पत्या। तथा चानुक्रांतं। अध्वर्यवः सप्तोत्त्यैन्द्राबार्हस्पत्येति। पूर्वसूक्तेन सहोक्तो विनियोगः॥

॥ अथ प्रथमा॥

अध्वर्यवोऽरुणं दुग्धमंशुं जुहोतन वृषभाय क्षितीनां।
गौराद्वेदीयाँ अवपानमिंद्रो विश्वाहेद्याति सुतसोममिच्छन्॥१

अध्वर्यवः। अरुणं। दुग्धं। अंशुं। जुहोतन। वृषभाय।
क्षितीनां।
गौरात्। वेदीयान्। अवऽपानं। इंद्रः। विश्वाहा। इत्।
याति। सुतऽसोमं। इच्छन्॥ १

हे अध्वर्यवोऽध्वरस्य नेतार ऋत्विजः क्षितीनां जनानां मध्ये वृषभाय श्रेष्ठाय इंद्रायारुणमारोचमानं दुग्धमभिषुतमंशुं सोमं जुहोतन। जुहुत। अवपानमपक्रम्य स्थितं दूरस्थं पातव्यं सोमं गौरात् गौरमृगादपि वेदीयानतिशयेन विद्वानिंद्रः सुतसोममभिषुतसोमं यजमानमिच्छन् अभिलषन् विश्वाहा विश्वान्यहानीदेव सर्वदैव याति। गच्छति। अतस्तस्मा इंद्राय सोमं जुहुतेत्यन्वयः॥

॥ अथ द्वितीया॥

यद्दधिषे प्रदिवि चार्वन्नं दिवेदिवे पीतिमिदस्य वक्षि।
उत हृदोत मनसा जुषाण उशन्निंद्र प्रस्थितान्पाहि सोमान्॥२

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यत्। दधिषे। प्रऽदिवि। चारु। अन्नं। दिवेऽदिवे। पीतिं। इत्। अस्य। वक्षि।

उत। हृदा। उत। मनसा। जुषाणः। उशन्। इंद्र।

प्रऽस्थितान्। पाहि। सोमान्॥ २

हे इंद्र यद्दिवि प्रगतेषु दिवसेषु पूर्वस्मिन्काले चारु शोभनं यज्ञोपलक्षणमन्नं दधिषे पानेनोदरे धारयसि अस्य सोमस्य पीतिमित् पानमेव दिवे दिवे प्रतिदिवसमिदानीमपि वक्षि। कामयसे॥ वश कांतावित्यस्य लिटि वचो लुक्ति पलव्रलत्वेनेतद्रूपं॥ उतापि च हे इंद्र हृदा हृदयेन। उतशब्दश्चार्थे। मनसा च जुषाणः सेवमान उशन् कामयमानस्त्वं प्रस्थितान् पुरस्ताद्धोतादिभिः सम्यक्स्थापितान् सोमान्पाहि। पिब॥

॥ अथ तृतीया॥

जज्ञानः सोमं सहसे पपाथ प्र ते माता महिमानमुवाच।
एंद्र पप्राथोर्वंतरिक्षं युधा देवेभ्यो वरिवश्चकर्थ॥ ३

जज्ञानः। सोमं। सहसे। पपाथ। प्र। ते। माता। महिमानं। उवाच।

आ। इंद्र। पप्राथ। उरु। अंतरिक्षं। युधा। देवेभ्यः। वरिवः। चकर्थ॥ ३

हे इंद्र त्वं जज्ञानो जायमान एव सहसे बलाय सोमं पपाथ। पीतवानसि। ते तव महिमानं महत्त्वं माता त्वदीया अदितिः प्रोवाच। प्रोक्तवती। इंद्रस्येदं पंथा इत्यादिके मंत्रे स्पष्टं। ऋग्वे० ३. १८. ४.। इत्यत्रोदाहरिष्यादित्येंद्र-महत्त्वोक्तत्वात्। अतः कारणात् हे इंद्र त्वमुरु विस्तीर्णमंतरिक्षमापप्राथ। आपूरितवानसि। अपि च युधा युद्धेन देवेभ्यः स्तोतृभ्यो देवेभ्यः वरिवो धनं चकर्थ। कृतवानसि॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ चतुर्थी ॥

यद्वांधर्था मरुतो मन्दसानास्त आर्चन् तान्वाहुभिः
आग्रंदानान् ।
यद्वा ऋ नर्त इंद्राभियुध्यास्तं त्वयाजिं सौश्रवसं जयेम ॥ ४

यत् । वाधथाः । मरुतः । मन्दसानान् । आर्चन् । तान् ।
बाहुऽभिः । आग्रंदानान् ।
यत् । वा । नृऽभिः । वृतः । इंद्र । अभिऽयुध्याः । तं ।
त्वया । आजिं । सौश्रवसं । जयेम ॥ ७

हे इंद्र मरुतः स्तुतान् मन्दसाना अमृन्यदा योधयाः स्तुताभिर्योधयेः । तैः
वह योधुं यदं यद्यर्थं (चर्षः । तदा मा मासदानान् हिंसतस्त्वया बाहुभिरादु-
भनिरपेक्षैर्दारैन तत्समदाद्ब्वाजा । एकेन । अभिमवेन । यद्वा यदि वा हे इंद्र
मबिनृभिर्ऋत्विग्भिः परिवृतस्त्वमेवाभियुध्याः अस्मदीयान्छत्रूनभियुध्येः सौश्र-
वसं । अर्थात्सं वया वा । शोभनस्य श्रवसा इंद्र तमाजिं संग्रामं त्वया सहायेन
वय जयेम ॥

॥ अथ पंचमी ॥

प्रेंद्रस्य वोचं प्रथमा कृतानि प्र नूतना मघवा या चकार ।
यदेददेवीरसहिष्ट माया अथाभवत्केवलः सोमो अस्य ॥ ५

प्र । इंद्रस्य । वोचं । प्रथमा । कृतानि । प्र । नूतना ।
मघऽवा । या चकार ।
यदा । इत् । अदेवीः । असहिष्ट । मायाः । अथ ।
अभवत् । केवलः सोमः । अस्य ॥ ५

इंद्रस्य कृतानि वीर्यकर्माणि प्रथमा प्रथमानि पुरातनानि प्रवोचं । प्रब्रवीमि ।
मघवा मघवानिंद्रो या यानि चकार कृतवान् नूतना नूतनान्यपि तानि च तानि

प्रयोगे । यद्वेत् यद्देवाद्देवोरासुरोगाथाभिः समान्यत्रविद पाम्यभूत् अथानंतरमेवा-
स्येंद्रस्य सोमः केवलासाधारणोऽभवत् । तदायत्तरणेन सामस्येंद्रस्य पाकपाकृतः
संबंधो जात इत्यर्थः ॥

॥ अथ षष्ठी ॥

तवेदं विश्वमभितः पशव्यं यत्पश्यसि चक्षसा सूर्यस्य ।

गवामसि गोपतिरेक इंद्र भक्षीमहि ते प्रयतस्य वस्वः ॥ ६

तव । इदं । विश्वं । अभितः । पशव्यं । यत् । पश्यसि ।

चक्षसा । सूर्यस्य ।

गवां । असि । गोऽपतिः । एकः । इंद्र । भक्षीमहि । ते ।

प्रऽयतस्य । वस्वः ॥ ६

हे इंद्र पशव्यं । पशवो द्विविधा द्विपादश्चतुष्पादश्च । तेभ्यो हितमभितः सर्वतो विद्यमानमिदं विश्वं सर्वं जगत्तवैव स्वभूतं । सूर्यस्य प्रेरकस्यादित्यस्य चक्षसा तेजसा । यदिदं पश्यसि त्वं प्रकाशयसि । अपि च हे इंद्र एक एव त्वं गोपतिरसि । न केवलमेकस्या एव गोपतिरपि तु सर्वासामित्याह । गवामिति । अतः कारणात्ते त्वया प्रयतस्य दत्तस्य । द्वितीयार्थे षष्ठी ॥ दत्तं वस्वो धनं भक्षीमहि । भजेमहि ॥

॥ अथ सप्तमी ॥

बृहस्पते युवमिंद्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य ।

धत्तं रयिं स्तुवते कीरये चिद्यूयं पात स्वस्तिभिः सदा नः ॥ ७

बृहस्पते । युवं । इंद्रः । च । वस्वः । दिव्यस्य । ईशाथे इति ।

उत । पार्थिवस्य ।

धत्तं । रयिं । स्तुवते । कीरये । चित् । यूयं । पात ।

स्वस्तिऽभिः सदा । नः ॥ ७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

व्याख्यातेयं। अक्षरार्थस्तु। हे बृहस्पते त्वं चेंद्रश्च युवां दिव्यस्य पार्थिवस्य चोभयविधस्य धनस्येश्वरौ भवथः। तौ युवां स्तुवते स्तोत्रे धनं दत्तमिति॥

॥ इति पंचमस्य षष्ठे त्रयोविंशो वर्गः॥

परो मात्रयेति सप्तर्चमेकादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं। उरुं यज्ञायेत्याद्यास्तिस्र ऐंद्रावैष्णव्यः शिष्टाः केवलविष्णुदेवताकाः। तथा चानुक्रांतं। परो वैष्णवं तूह्यमित्यैंद्र्यश्च तिस्र इति॥ गतः सूक्तविनियोगः॥ विष्णुदेवत्ये पशौ परो मात्रयेति पुरोडाशस्य याज्या। सूत्रितं च। परो मात्रया तन्वा वृधानेरावती धेनुमती हि भूतं। आ० ३.८.। इति॥

॥ अथ प्रथमा॥

परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवंति।

६ उभे ते विद्म रजसी पृथिव्या विष्णो देव त्वं परमस्य वित्से॥१

परः। मात्रया। तन्वा। वृधान। न। ते। महिऽत्वं।

अनु। अश्नुवंति।

उभे इति। ते। विद्म। रजसी इति। पृथिव्याः।

विष्णो इति। देव। त्वं। परमस्य। वित्से॥१

पर इति सकारांतं परस्तादित्यस्यार्थे। परशब्दाच्छांदसोऽसिप्रत्ययः। परो दिवा पर एना पृथिव्या। ऋग्वे० १०.८२.५.। इति यथा। मात्रयेति व्यत्ययेन तृतीया। मात्रया परः इयत्तासंमानयापरिमितया तन्वा शरीरेण वृधान वर्धमान हे विष्णो ते तव महित्वं महत्त्वं नान्वश्नुवंति। नानुव्याप्नुवंति। त्रिविक्रमावतारे यत्तव माहात्म्यं तत्सर्वैरपि जनैर्ज्ञातुं न शक्यत इत्यर्थः। ते तवोभे रजसी उभौ लोकौ पृथिव्या आरभ्य पृथिवीमंतरिक्षं च विद्म। जानीमः। एवं चक्षुरुपलभ्यमानत्वे नान्यत्। हे देव द्योतमान विष्णो त्वमेव परमस्य स्वर्गादेरुत्कृष्टलोकस्य॥ द्वितीयार्थे षष्ठी॥ परमं लोकं वित्से। जानासि। अन्यस्तत्र गंतुं न केनापि शक्यत इति भावः॥

पूर्वोक्त एव पशौ न ते विष्णो इति वपाया याज्या। सूत्रितं च। न ते विष्णो जायमानो न जातस्त्वं विष्णो सुमतिं भिक्षमाणा। आ० ३.८.। इति॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ सैषा द्वितीया ॥

न ते विष्णो जायमानो न जातो देव महिम्नः परमन्तमाप।

उदस्तभ्ना नाकमृष्वं बृहन्तं दाधर्थ प्राचीं ककुभं पृथिव्याः॥ २

न। ते। विष्णो इति। जायमानः। न। जातः। देव।

महिम्नः। परं। अन्तं। आप।

उत्। अस्तभ्नाः। नाकं। ऋष्वं। बृहन्तं। दाधर्थ। प्राचीं।

ककुभं। पृथिव्याः॥ २

हे देव दानादिगुणयुक्त विष्णो ते तव महिम्नो महत्त्वस्य परं निकृष्टमन्तमवसानं जायमानः प्रादुर्भवन् जनो नाप। न प्राप्नोति। तथा जातः प्रादुर्भूतोऽपि जनो नैव प्राप्नोति। तव महत्त्वस्यावसानं नास्ति। अत एव सर्वैर्न ज्ञायत इति भावः। कोऽसौ महिमा तमाह। ऋष्वं दर्शनीयं बृहन्तं महान्तं नाकं द्युलोकमुदस्तभ्नाः। त्वमूर्ध्वमधारयः। यथाधो न पतति तथा। पृथिव्या भूमेः संबंधिनीं प्राचीं ककुभं च दाधर्थ। धारितवानसि। उपलक्षणमेतत् सर्वस्य भूतजातस्य। तथा च मंत्रांतरं। य उ त्रिधातु पृथिवीमुत द्यामेको दाधार भुवनानि विश्वा। ऋग्वे० १.१५४.४.। इति॥

पूर्वोक्त एव यथाविराडवती इति ऋचो याज्या। सूत्रितं च। इरावती धेनुमती हि भूतं विश्वकर्मन्हविषा वावृधान इति द्वे। आ० ३. ८.। इति॥

॥ सैषा तृतीया ॥

इरावती धेनुमती हि भूतं सूयवसिनी मनुषे दशस्या।

व्यस्तभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः॥ ३

इरावती इतीराऽवती। धेनुमती इति धेनुऽमती। हि।

भूतं। सुयवसिनी इति सुऽयवसिनी। मनुषे। दशस्या।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वि । अस्तभ्नाः । रोदसी इति । विष्णो इति । एते इति ।

दाधर्थ । पृथिवीं । अभितः । मयूखैः ॥ ३

हे द्यावापृथिव्यौ मनुषे स्तुवते मनुष्याय दशस्या दित्सया युवां युवामिरावती अन्नवत्यौ धेनुमती गोमत्यौ सूयवसिनी शोभनयवसे च भूतं । अभूतं । हिशब्दः प्रसिद्धौ । विष्णुना विक्रान्तत्वाद्युवामेवमेव खलु पूर्वमभूतमित्यर्थः । हे विष्णो एते उभे रोदसी द्यावापृथिव्यौ व्यस्तभ्नाः । विविधमधारयः पृथिवीमूर्ध्वं सुखत्वेन द्यामधो-सुखत्वेनेति विविधत्वं । अपि च पृथिवीं प्रथितामिमां भूमिमभितः सर्वत्र स्थितैर्मयूखैः पर्वतैर्दाधर्थ । धारितवानसि । यथा न चलति तथा दृढीकृतवानित्यर्थः । पर्वता हि विष्णोः स्वभूताः । विष्णुः पर्वतानामधिपतिरिति श्रुतेः ॥

॥ अथ चतुर्थी ॥

उरुं यज्ञाय चक्रथुरु लोकं जनयंता सूर्यमुषासमग्निं ।

दासस्य चिद्वृषशिप्रस्य माया जघ्नथुर्नरा पृतनाज्येषु ॥ ४

उरुं । यज्ञाय । चक्रथुः । ऊं इति । लोकं । जनयंता ।

सूर्यं । उषसं । अग्निं ।

दासस्य । चित् । वृषऽशिप्रस्य । मायाः । जघ्नथुः । नरा ।

पृतनाज्येषु ॥ ४

हे इंद्राविष्णू यज्ञाय यजमानायेदमुरु विस्तीर्णं लोकं स्वर्गाख्यं चक्रथुः । कृतवंतौ खलु युवां । किं कुर्वंतौ । सूर्यं सर्वस्य प्रेरकमादित्यमुषसं तमोनिवारकमुषःकालमग्निं चाहवनीयादिकं जनयंतौ पुनः प्रादुर्भावयंतौ । हे नरा नेताराविंद्राविष्णू वृषशिप्र-एतत्संज्ञक दासस्य चिदुपक्षपयितुरसुरस्य मायाः पृतनाज्येषु संग्रामेषु जघ्नथुः । निर्हिंसथुः युवां सूर्यादिकं जनयंतावित्युच्यते ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ पञ्चमी ॥

[illegible] ।

[illegible] ॥ ३

[illegible] ।

च । [illegible] ।

[illegible] ।

[illegible] । पीराम् ॥३॥

[illegible]

॥ अथ षष्ठी ॥

[illegible] ।

[illegible] ॥ ६

[illegible] ।

[illegible] वर्षेण्यो ।

[illegible] ।

[illegible] ॥ ६

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

बृहती महतीयं मनीषा मननीया स्तुतिर्बृहंता बृहंतौ महांतावुरुक्रमा विस्तीर्ण-
क्रमणौ । विष्णुना सहैकार्थीकरणादिंद्रस्याप्युरुक्रमत्वं । तवसा । तव इति बलस्य
नामधेयं । तद्वतो । एवंभूतौ युवां वर्धयंती प्रवृद्धौ कुर्वंत्यासीत् तदा । हे
विष्णो हे इंद्र विदथेषु यज्ञेषु वां युवाभ्यां स्तोत्रलक्षणं स्तोमं ररे ददे ॥ रा
दान इति धातुः ॥ तौ युवां वृजनेष्विषोऽन्नानि पिन्वतं । यच्छतं वर्धयतं ॥

अस्य यद्येष्टो विष्णोः शिपिविष्टस्य वषट्कारेत्येषानुवाक्या । सूत्रितं च । अग्ना ते
एका भुवनोत याजी वषट्ते विष्णवास आ कृणोमि । आ० ३. १३. । इति ॥

॥ मैत्रावरुणी ॥

वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् ।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥ ७

वषट् । ते । विष्णो इति । आसः । आ । कृणोमि । तत् ।
मे । जुषस्व । शिपिऽविष्ट । हव्यम् ।
वर्धन्तु । त्वा । सुऽस्तुतयः । गिरः । मे । यूयम् । पात ।
स्वस्तिऽभिः । सदा । नः ॥ ७

हे विष्णो ते तुभ्यमास आस्यादास्येन वषट् कृणोमि । करोमि । वषट्कारेण
हविर्ददामि । हे शिपिविष्ट । शिपयो रश्मयः । तैराविष्ट विष्णो मद्दत्तं मे
मदीयं हव्यं हविर्जुषस्व । सेवस्व । सुष्टुतयः शोभनस्तुत्यात्मिका गिरो मामक्यः
त्वां वर्धयंतु । वर्धयंतु ।

॥ इति पंचमस्य षष्ठे चतुर्विंशो वर्गः ॥

नू मर्त इति सप्तर्चं द्वादशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं वैष्णवं । नू मर्तं इत्यनुक्रान्तं ।
अथा ऽकृत्स्नानाथवा इदं पंचमीयं । सूत्रितं च । ऋतुर्जनित्री नू मर्तो दयते सनिष्यन्
आ० ६. १. । इति ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तत्र प्रथमा ॥

नू मर्तो॑ दयते सनि॒ष्यन्यो विष्ण॑व उरुगा॒याय॒ दाश॑त्।

प्र यः स॒त्राचा॒ मन॑सा॒ यजा॑त एतावन्तं॒ नर्य॑मा॒विवा॑सात्॥ १

नु। मर्तः॑। द॒य॒ते॒। स॒नि॒ष्यन्। यः। विष्ण॑वे। उ॒रु॒ऽगा॒याय॑।

दाश॑त्।

प्र। यः। स॒त्राचा॑। मन॑सा। यजा॑ते। ए॒तावन्त॑म्। नर्य॑म्।

आ॒ऽविवा॑सात्॥ १

स मर्तो मनुष्यः सनिष्यन् धनमिच्छन् नु क्षिप्रं दयते। धनमाप्नोति॥ दयति-दानकर्मा॥ यो मनुष्य उरुगायाय बहुभिः कीर्तनीयाय विष्णवे दाशत् हवींषि दद्यात्। यश्च सत्राचा सहाञ्चता मनसा मनसा स्तोत्रेण प्र यजाते प्रकर्षेण पूजयेत्। एतावन्तमेतावत्परिमाणं महान्तं नर्यं नरेभ्यो हितं विष्णुमाविवासात् परिचरेत् स मर्तो दयत इत्यन्वयः। यद्वा सनिष्यन्निति सम्भजनार्थादिभिः परिचरेत् स मर्तो दयत इत्यन्वयः। यद्वा सनिष्यन्निति सन्नी-यो धारणं इति रूपं। सनिष्यन् धनानीति सम्भजनार्थो ... दयते प्रयच्छतीति योज्यं॥

विष्णुदेवत्ये यागे पुरोडाशस्य त्वं विष्णो इत्यनुवाक्या। सूत्रितं च। त्वं विष्णो सुमतिं विश्वजन्यां नि यजते पृथिवीमेष एतां। आ० ३. ८.। इति॥

॥ सैषा द्वितीया ॥

त्वं वि॑ष्णो सुम॒तिं वि॒श्वज॑न्या॒मप्र॑युतामेवयावो म॒तिं दाः।

पर्चो॒ यथा॑ नः सुवि॒तस्य॒ भूरे॒रश्वा॑वतः पुरुश्च॒न्द्रस्य॑ रा॒यः॥ २

त्वं। विष्णो॒ इति॑। सु॒ऽम॒तिम्। वि॒श्वऽज॑न्याम्। अप्र॑ऽयुताम्।

एव॒ऽया॒वः॒। म॒तिम्। दाः॒।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

पर्चः । यथा । नः । सुवितस्य । भूरेः । अश्वऽवतः ।
पुरुऽचन्द्रस्य । रायः ॥ २

हे एवयावः । एवा गन्तारः [illegible] । तान् यापयति गमयति [illegible] । हे भगवन् विष्णो त्वं [illegible] सुमतिं [illegible] पुरु[illegible] [illegible] रायो धनस्य यथा [illegible] [illegible] ॥

[illegible] ॥ [illegible] ॥ [illegible] ॥

॥ [illegible] तृतीया ॥

त्रिर्देवः पृथिवीमेष एतां वि चक्रमे शतर्चसं महित्वा ।
प्र विष्णुरस्तु तवसस्तवीयान्त्वेषं ह्यस्य स्थविरस्य नाम ॥ ३

त्रिः । देवः । पृथिवीम् । एषः । एताम् । वि । चक्रमे ।
शतऽअर्चसम् । महिऽत्वा ।
प्र । विष्णुः । अस्तु । तवसः । तवीयान् । त्वेषम् । हि । अस्य ।
स्थविरस्य । नाम ॥ ३

एष देवो दानादिगुणयुक्तो विष्णुः [illegible] त्रिर्विचक्रमे । [illegible] विष्णुः [illegible] अस्तु । [illegible] स्थविरस्य [illegible] विष्णु [illegible] नाम [illegible] विष्णु [illegible] ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पूर्वोक्त एव मन्त्रो वि चक्रम इति यथाया अनुवाकः। ... च। वि चक्रमे पृथिवीमेष एतां क्षेत्राय विष्णुः पृथिवीमेव एतां। पा० ३, ८,। इति ॥

॥ सैषा चतुर्थी ॥

वि चक्रमे पृथिवीमेष एतां क्षेत्राय विष्णुर्मनुषे दशस्यन्।

ध्रुवासो अस्य कीरयो जनास उरुक्षितिं सुजनिमा चकार ॥ ४ ॥

वि। चक्रमे। पृथिवीम्। एषः। एताम्। क्षेत्राय। विष्णुः।

मनुषे। दशस्यन्।

ध्रुवासः। अस्य। कीरयः। जनासः। उरुऽक्षितिम्।

सुऽजनिमा। चकार ॥ ४ ॥

एष देवो विष्णुः एतां पृथिवीं ... क्षेत्राय निवासार्थं मनुषे मनवे ... दशस्यन् ... विचक्रमे। ... अस्य च विष्णोः कीरयः स्तोतारो जनासो जना ध्रुवासो निश्चला भवन्ति। ... सुजनिमा ... उरुक्षितिं विस्तीर्णनिवासं चकार। कीरयः स्तोतारः ॥

... इति ... ॥ ... पा० ६, ७, ॥ ... ॥ ... ॥ ... पा० ३, १२,। इति ॥

॥ सैषा पंचमी ॥

प्र तत्ते अद्य शिपिविष्ट नामार्यः शंसामि वयुनानि विद्वान्।

तं त्वा गृणामि तवसमतव्यान्क्षयन्तमस्य रजसः पराके ॥ ५ ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्र। तत्। ते। अद्य। शिपिऽविष्ट। नाम। अर्यः। शंसामि।

वयुनानि। विद्वान्।

तं। त्वा। गृणामि। तवसं। अतव्यान्। क्षयन्तं। अस्य।

रजसः। पराके॥ ५

हे शिपिविष्ट रश्मिभिराविष्ट विष्णो ते तव तत् शिपिविष्ट इति प्रख्यातं नाम अर्यः स्वामी स्तुतीनां हविषां वा वयुनानि प्रज्ञानानि ज्ञातव्यान्यर्थजातानि विद्वान् जानन्नहमद्य प्र शंसामि। प्रकर्षेण स्तौमि। तवसं प्रवृद्धं तं त्वा त्वां विष्णुमतव्यानप्रवृद्धोऽहं गृणामि। स्तौमि। कीदृशं। अस्य रजसो लोकस्य पराके दूरदेशे क्षयन्तं निवसन्तं॥

। अथ षष्ठी।

किमित्ते विष्णो परिचक्ष्यं भूत् प्र यद्ववक्षे शिपिविष्टो अस्मि।

मा वर्पो अस्मदप गूह एतद्यदन्यरूपः समिथे बभूथ॥ ६

किं। इत्। ते। विष्णो इति। परिऽचक्ष्यं। भूत्। प्र।

यत्। ववक्षे। शिपिऽविष्टः। अस्मि।

मा। वर्पः। अस्मत्। अप। गूहः। एतत्। यत्।

अन्यऽरूपः। सम्ऽइथे। बभूथ॥ ६

पुरा खलु विष्णुः स्वं रूपं परित्यज्य रूपान्तरं धारयन् संग्रामे वसिष्ठस्य साहाय्यं चकार। तं जानन्नृषिरनया प्रत्याचष्टे॥ अत्र निरुक्तं। शिपिविष्टो विष्णुरिति विष्णोर्द्वे नामनी भवतः। कुत्सितार्थीयं पूर्वं भवतीत्यौपमन्यवः। किं ते विष्णोऽप्रख्यानमेतद्भवत्यप्रख्यापनीयं यन्नः प्रब्रूषे शेप इव निर्वेष्टितोऽस्म्यप्रतिपन्नरश्मिः। अपि वा प्रशंसानामैवाभिप्रेतं स्यात्। किं ते विष्णो प्रख्यानमेतद्भवति

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रख्यापनीयं यत्तु प्रब्रूषे शिपिविष्टोऽस्मीति प्रतिपन्नरश्मिः। शिपयोऽत्र रश्मय
उच्यन्ते तैराविष्टो भवति। मा वर्पो अस्मदप गूह एतत्। वर्प इति रूपनाम
वृणोतीति सतः। यदन्यरूपः समिथे संग्रामे भवति संयतरश्मिः। नि० ५, ८। इति॥
यास्कप्रदर्शितार्थस्य योजना। हे विष्णो ते तव तन्नाम किं परिचक्ष्यं प्रख्यापनीयं
भूत्। भवति। किंशब्दः क्षेपे। अप्रख्यापनीयमेव भवति। तदेवाह यत्प्रब्रूषे
प्रब्रूषे शिपिविष्टोऽस्मीति। अन्तर्भावितण्यर्थोऽयम्। शेप इव निर्वेष्टितप्रकाशाच्छा-
दितो भवामीति। तद्योग्यत्वादिदं नाम न प्रख्यापितव्यं। तथाच किं परिचक्ष्यं
वर्जनीयं परित्याज्यं। विरुद्धार्थप्रतिपादकत्वादस्य एव परिचक्ष्यं हि भूत्। किंच
उत्तरार्धं पूर्ववत्। अत्र यज्ञरूपविलक्षणं यदन्यरूपं समिथे रूपमुद्घाटय।
नापगूहः। अपगूढं संवृतं मा कुरु॥ गुह संवरणे॥ अपि तु तदेव रूपं प्रकटय।
वैष्णवस्य रूपस्य गूहने का प्रसक्तिरिति चेत्। यद्यस्मादन्यरूपो रूपान्तरमेव धारयन्
समिथे संग्रामे अमुष्य परार्थं बभूथो भवसि तस्मादिदं गूहनं न कार्यमिति॥
प्रशंसापक्षे तु हे विष्णो ते तव तन्नाम किं परिचक्ष्यं भूत्। किं प्रख्यापनीयं भवति।
न प्रख्यापनीयं। किं तन्नाम। शिपिविष्टो रश्मिभिराविष्टोऽस्मीति यन्नाम प्रब्रूषे।
यत एवं प्रख्यातरूपवानतोऽस्माकमेतत् स्वकं रूपं संवृतं मा कार्षीः। यदन्यो गूह-
रूपोऽपि अन्यथाप्य समिथे संग्रामेऽन्यरूपः तत्प्रियरूपं यदन्यदेतत् स्वकं रूपं धारयसि-
तावत्तत्र एतदमुष्य समिथे तत्राप्यं गूढेऽपि भावय इति अथैव तव
रूपस्य गूहनं। अतो यद्भक्तव्यं तदेतत् स्वकं रूपं तदस्माकं प्रदर्शयेति तात्पर्यार्थः॥

॥ अथ सप्तमी ॥

वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम्।
वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः॥ ७॥

वषट्। ते। विष्णो इति। आसः। आ। कृणोमि। तत्।
मे। जुषस्व। शिपिऽविष्ट। हव्यम्।
वर्धन्तु। त्वा। सुऽस्तुतयः। गिरः। मे। यूयम्। पात।
स्वस्तिऽभिः। सदा। नः॥ ७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

[illegible]॥ [illegible] । ये [illegible] [illegible] [illegible] । [illegible], [illegible]-[illegible] । [illegible] पारः [illegible] ॥

॥ इति पंचमस्य षष्ठे पंचविंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण
सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये
पंचमाष्टके षष्ठोऽध्यायः समाप्तः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत्।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं॥

अथ सप्तमो व्याख्यास्यते। सप्तममंडलस्य षष्ठेऽनुवाक एकादश सूक्तानि व्याख्यातानि। तिस्रो वाच इति षडृचं द्वादशं सूक्तं। अत्रानुक्रम्यते। तिस्रः षट् पार्जन्यं त्विति। एते कुमार आग्नेयोऽपश्यद्वसिष्ठ एव वेति वाशब्दपाठादग्निपुत्रः कुमार ऋषिर्वसिष्ठो वा। सूक्तत्वात्त्रिष्टुप्। इदमुत्तरं च पर्जन्यदेवत्यं। अत्र शौनकः। आशुदशं विगाह्यापः प्राङ्मुखः प्रयतः शुचिः। सूक्ताभ्यां तिस्र इत्यादिभ्यामुपतिष्ठेत भास्करं। अनश्नंस्तैलमभ्यं हविष्काशेन वत्सतः। पंचरात्रेऽप्यतिक्रांते महतीं भास्करं। अनश्नंस्तैलमभ्यं हविष्काशेन वत्सतः। पंचरात्रेऽप्यतिक्रांते महतीं वृष्टिमाप्नुयात्। ऋग्वि० २. ३०. । इति॥

॥ तत्र प्रथमा॥

तिस्रो वाचः प्र वद ज्योतिरग्रा या एतद्दुह्रे मधुदोघमूधः।
स वत्सं कृण्वन्गर्भमोषधीनां सद्यो जातो वृषभो रोरवीति॥ १

तिस्रः। वाचः। प्र। वद। ज्योतिःऽअग्राः। याः। एतत्।
दुह्रे। मधुऽदोघं। ऊधः।
सः। वत्सं। कृण्वन्। गर्भं। ओषधीनां। सद्यः। जातः।
वृषभः। रोरवीति॥ १

ऋषिरात्मानं स्तुतौ प्रेरयति। हे ऋषे तिस्रस्त्रिविधा ऋग्यजुःसामात्मिकाः स्तुतिरूपा वाचः प्रवद। प्रब्रूहि। कीदृश्यो वाचः। ज्योतिरग्राः। ज्योतिर्द्योतमानः प्रणवोऽग्रे प्रमुखो यासां तादृशीः। या वाचो मधुदोघं मधुन उदकस्य दोग्धारं ऊध उदकस्य कर्तारमंतरिक्षमभि दृश्यमानमूधः ऊधस्थं मेघं। यद्वा लुप्तोपमितम्। ऊध इव पयस आश्रयभूतं मेघं दुह्रे दुहते॥ दुहेर्लटि लोपस्त आत्मनेपदेष्विति तलोपः। बहुलं छंदसीति रुट्॥ ज्योतिः प्रीतो हि परमेष्ठी मेघैर्वर्धयति। अतो वाच एव दुग्धसौत्व-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पचंते। यद्वा वदेति व्यत्ययेन मध्यमः। तिस्र इति द्रुतविलंबितमध्यमभेदेन त्रिविधा ज्योतिरग्रा विद्युल्लक्षणा वाचः प्रवदंतीति। या गर्जितलक्षणा वाचो वृष्टिप्रदमेतं मेघं दुह्रे उदकानि दुहंति। एवंभूतः स च पर्जन्यो वत्सं सद्य निषयंतं वैद्युताग्निं कृण्वन् प्रादुष्कुर्वन् तत्रैवौषधीनां व्रीह्यादीनां च गर्भं कुर्वन् सद्यः शीघ्रं जातः प्रादुर्भूतो वृषभो वर्षिता सन् रोरवीति। भृशं शब्दायते॥

॥ अथ द्वितीया ॥

यो वर्धन ओषधीनां यो अपां यो विश्वस्य जगतो देव ईशे।
स त्रिधातु शरणं शर्म यंसत्त्रिवर्तु ज्योतिः स्वभिष्ट्य१स्मे ॥ २

यः। वर्धनः। ओषधीनाम्। यः। अपाम्। यः। विश्वस्य।
जगतः। देवः। ईशे।
सः। त्रिऽधातु। शरणम्। शर्म। यंसत्। त्रिऽवर्तु। ज्योतिः।
सुऽअभिष्टि। अस्मे इति ॥ २

यः पर्जन्य ओषधीनां वर्धनो वर्धयिता। यश्चापामुदकानां वर्धकः। यश्च देवो द्योतमानः पर्जन्यो विश्वस्य सर्वस्य जगत ईशे ईष्टे॥ लोपस्त आत्मनेपदेष्विति तलोपः। अधीगर्थेति कर्मणि शेषत्वेन विवक्षिते षष्ठी। अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः। यद्वृत्तान्नित्यमिति निघातप्रतिषेधः॥ स पर्जन्यस्त्रिधातु त्रिभूमिकं शरणं गृहं शर्म सुखं च यंसत्। यच्छतु। अस्मभ्यं ददात्वित्यर्थः॥ यमेर्लेट्यडागमः। सिब्बहुलमिति सिप्। इतश्च लोप इतीकारलोपः॥ तथा त्रिवर्तु त्रिवृत्त्वतियमेन वर्तमानं। श्रूयते हि। त्रीणि वा आदित्यस्य तेजांसि वसंते प्रातर्ग्रीष्मे मध्यंदिने शरद्यपराह्ण इति। एवंविधं स्वभिष्टि स्वभ्यष्टं ज्योतिस्तेजश्चास्मे अस्मभ्यं प्रयच्छतु॥

॥ अथ तृतीया ॥

स्तरीरु त्वद्भवति सूत उ त्वद्यथावशं तन्वं चक्र एषः।
पितुः पयः प्रति गृभ्णाति माता तेन पिता वर्धते तेन पुत्रः ॥ ३

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

स्तरीः । ऊं इति । त्वत् । भवति । सूते । ऊं इति । त्वत् ।

यथाऽवशं । तन्वं । चक्रे । एषः ।

पितुः । पयः । प्रति । गृभ्णाति । माता । तेन । पिता ।

वर्धते । तेन । पुत्रः ॥ ३

त्वदिति तकारांतोऽन्यशब्दपर्यायोऽनुदात्तः सर्वनामसु पठितः ॥ अयं पर्जन्यस्त्वदन्यद्रूपं स्तरीर्निवृत्तप्रसवा गौः । सा यथा न दोग्ध्री तद्वद्वर्षुकं न भवति । उ इति पूरकः । द्वितीय उशब्दश्चार्थे । त्वदन्यच्च रूपं सूते । धेनुवत्प्रसूते । उदकानि प्रवर्षति । एष पर्जन्यस्तन्वं स्वकीयं शरीरं यथावशं यथाकामं स्तरीत्वेन धेनुत्वेन च चक्रे । करोति । अपि च पितुर्दिवः सकाशात्पयो वृष्ट्युदकं माता पृथिवी प्रतिगृभ्णाति । प्रतिगृह्णाति ॥ हृग्रहोर्भ इति भत्वं ॥ प्रतिगृहीतेन तेन अचिरात्मना परिणतेन पिता द्युलोको वर्धते । तेनैवोदकेन पुत्रः पृथिव्यां भवः प्राणिसंघोऽपि वर्धते ॥

॥ अथ चतुर्थी ॥

यस्मिन्विश्वानि भुवनानि तस्थुस्तिस्रो द्यावस्त्रेधा सस्रुरापः ।

त्रयः कोशास उपसेचनासो मध्वः श्चोतंत्यभितो विरप्शं ॥ ४

यस्मिन् । विश्वानि । भुवनानि । तस्थुः । तिस्रः । द्यावः ।

त्रेधा । सस्रुः । आपः ।

त्रयः । कोशासः । उपऽसेचनासः । मध्वः । श्चोतंति ।

अभितः । विऽरप्शं ॥ ४

यस्मिन्पर्जन्ये विश्वानि भुवनानि सर्वाणि भूतजातानि तस्थुः तिष्ठंति । यदधीनवृत्तीनि भवंतीत्यर्थः । यस्मिंश्च द्यावो द्युप्रभृतयो लोका अवतिष्ठंते । यस्मादापस्त्रेधा सस्रु प्राच्यः प्रतीच्योऽवाच्यश्च सत्यो निर्गच्छंति, उपसेचनास उपसेक्तारस्त्रयः पौरस्त्यप्रतीच्य उदीच्येति त्रिप्रकाराः कोशासो मेघा विरप्शं महांतं पर्जन्यमभितः सर्वतो मध्वः ॥ कर्मणि षष्ठी ॥ मधूदकं श्चोतंति । क्षारयंति । वर्षंति ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ पंचमी ॥

इदं वचः पर्जन्याय स्वराजे हृदो अस्त्वंतरं तज्जुजोषत्।

मयोभुवो वृष्टयः संत्वस्मे सुपिप्पला ओषधीर्देवगोपाः॥ ५

इदं। वचः। पर्जन्याय। स्वऽराजे। हृदः। अस्तु। अंतरं।

तत्। जुजोषत्।

मयःऽभुवः। वृष्टयः। संतु। अस्मे इति। सुऽपिप्पलाः।

ओषधीः। देवऽगोपाः॥ ५

इदं वचो वचनं स्तोत्रं स्वराजे स्वायत्तदीप्तये पर्जन्याय क्रियते। एतच्च हृदस्तदीयस्य हृदयस्यांतरमंतर्गतमस्तु। स च तत्स्तोत्रं जुजोषत्। सेवतां॥ जुषी प्रीतिसेवनयोः॥ लेट्यडागमश्छांदसः। अपः स्तुः॥ मयोभुवः सुखस्य भावयित्र्यो वृष्टयोऽस्मे अस्माकं तत्प्रसादात्संतु। भवंतु। तथा देवगोपा देवः पर्जन्यो गोपायिता रक्षिता यासां तथाविधा ओषधीरोषधयश्च सुपिप्पलाः सुफला अस्माकं भवंतु॥

॥ अथ षष्ठी ॥

स रेतोधा वृषभः शश्वतीनां तस्मिन्नात्मा जगतस्तस्थुषश्च।

तन्म ऋतं पातु शतशारदाय यूयं पात स्वस्तिभिः सदा नः॥ ६

सः। रेतःऽधाः। वृषभः। शश्वतीनां। तस्मिन्। आत्मा॥

जगतः। तस्थुषः। च।

तत्। मा। ऋतं। पातु। शतऽशारदाय। यूयं। पात।

स्वस्तिऽभिः। सदा। नः।

स पर्जन्यः शश्वतीनां बह्वीनामोषधीनां रेतोधा रेतस उदकस्य बीजभूतस्य धाता विनिधाता भवति। वृषभ इत्युपमा। यथा कश्चिद्वृषभो बह्वीनां गवां गर्भं आधात्

भवति तद्वत्। अतस्तस्मिन् पर्जन्ये जगतो जंगमस्य तस्थुषः स्थावरस्य चात्मा देहो वर्तते। तत्पर्जन्येन दत्तमुदकं मा मां शतशारदाय शतसंवत्सरजीवनार्थं पातु रक्षतु॥ मायव्ययस्य छान्दस इति प्रकृतिभावो ह्रस्वत्वं च॥ अन्यद्गतं॥

॥ इति पंचमस्य सप्तमे प्रथमो वर्गः॥

पर्जन्यायेति तृचं त्रयोदशं सूक्तं गायत्रं। पूर्ववदृषिदेवते। तथा चानुक्रान्तं। पर्जन्याय तृचं गायत्रमिति॥ वैश्वानरपार्जन्यावान्वारंभणीयायां पार्जन्यस्य चरोः पर्जन्यायेत्यनुवाक्या। सूत्र्यते हि। पर्जन्याय प्र गायत प्र वाता वांति पतयंति विद्युतः। आ० २. १५. । इति॥

॥ तत्र प्रथमा॥

पर्जन्याय प्र गायत दिवस्पुत्राय मीळ्हुषे।
स नो यवसमिच्छतु॥ १

पर्जन्याय। प्र। गायत। दिवः। पुत्राय। मीळ्हुषे।
सः। नः। यवसं। इच्छतु॥ १

हे स्तोतारः पर्जन्याय देवाय प्र गायत। प्रकर्षेण स्तोत्रमुच्चारयत। कीदृशाय। दिवोऽन्तरिक्षस्य पुत्राय। तत्र हि पर्जन्यः प्रादुर्भवति। मीळ्हुषे सेक्त्रे। स तादृशः पर्जन्यो नोऽस्मभ्यं यवसमोषध्यादिलक्षणमन्नं दातुमिच्छतु॥

॥ अथ द्वितीया॥

यो गर्भमोषधीनां गवां कृणोत्यर्वतां।
पर्जन्यः पुरुषीणां॥ २

यः। गर्भं। ओषधीनां। गवां। कृणोति। अर्वतां।
पर्जन्यः। पुरुषीणां॥ २

यः पर्जन्य ओषधीनां व्रीह्यादीनां गवामर्वतामश्वानां पुरुषीणां नारीणां च यः पर्जन्यो गर्भं प्रकृतिमंशे बीजमुदकरूपं कृणोति करोति तस्मै पर्जन्यायेत्युत्तरत्र संबंधः॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ तृतीया ॥

तस्मा इदास्ये हविर्जुहोता मधुमत्तमं ।
इड़ां नः संयतं करत् ॥ ३

तस्मै । इत् । आस्ये । हविः । जुहोत । मधुमत्ऽतमं ।
इड़ां । नः । सं॒ऽयतं । करत् ॥ ३

तस्मा इत् तस्मा एव पर्जन्यायास्ये देवानामास्यभूतेऽग्नौ मधुमत्तमं रसवत्तमं हविर्जुहोत । जुहुत हे ऋत्विजः । स च पर्जन्यो नोऽस्मभ्यमिड़ामन्नं संयतं सम्यङ् नियतं यथा भवति तथा करत् । करोतु । ददात्विति यावत् ॥

॥ इति पंचमस्य सप्तमे द्वितीयो वर्गः ॥

संवत्सरमिति दशर्चं पंचदशं सूक्तं वसिष्ठस्यार्षं त्रैष्टुभं । आद्या त्वनुष्टुप् । मंडूका देवता । तथा चानुक्रांतं । संवत्सरं दश पर्जन्यस्तुतिः मंडूकस्तुत्या मंडूकांस्तुष्टावाद्यानुष्टुबिति ॥ वृष्टिकामेनैतत्सूक्तं जप्यं ॥

॥ तत्राद्या ॥

संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः ।
वाचं पर्जन्यजिन्वितां प्र मंडूका अवादिषुः ॥ १

संवत्सरं । शशयानाः । ब्राह्मणाः । व्रतऽचारिणः ।
वाचं । पर्जन्यऽजिन्वितां । प्र । मंडूकाः । अवादिषुः ॥ १

अत्र निरुक्तं । वसिष्ठो वर्षकामः पर्जन्यं तुष्टाव तं मंडूका अन्वमोदंत स मंडूकाननुमोदमानान् दृष्ट्वा तुष्टाव । नि० ९. ६. । इति ॥ मंडूका मज्जूका मज्जनाद्वा मदतेर्वा मोदतिकर्मणो मंदतेर्वा तृप्तिकर्मणो मंडयतेरिति वैयाकरणा मंड एषामोक इति वा मंडो मदेर्वा मुदेर्वा तेषामेषा भवति । नि० ९. ५. । इति ॥ व्रतचारिणो व्रतं संवत्सरसत्रं तस्य चरितारो ब्राह्मणाः । ब्रह्मोपवेशनवत् । मंडूका

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ब्राह्मणा इव संवत्सरं व्रतमचरित्वा पर्जन्येरितं संवत्सरं शशयानाः विश्वाना पर्जन्यार्थं व्रतचरंत इव स्थित एव संत एते मंडूकाः पर्जन्येन प्रीतां यथा वाचा पर्जन्यः प्रीतो भवति तादृशः वाचं प्रावादिषुः । प्रवदंति ॥

॥ अथ द्वितीया ॥

दिव्या आपो अभि यदेनमायन्दृतिं न शुष्कं सरसी शयानं ।

गवामह न मायुर्वत्सिनीनां मंडूकानां वग्नुरत्रा समेति ॥ २

दिव्याः । आपः । अभि । यत् । एनं । आयन् । दृतिं । न ।

शुष्कं । सरसी इति । शयानं ।

गवां । अह । न । मायुः । वत्सिनीनां । मंडूकानां । वग्नुः ।

अत्र । सं । एति ॥ २

दिव्या दिवि भवा आपो दृतिं न दृतिमिव शुष्कं नीरसं सरसी ॥ सहस्वरः सरसी । गौरादित्वान्ङीष् । सरस्यां । सुपां सुलुगिति सप्तम्या लुक् ईदूतौ च सप्तम्यर्थे इति प्रगृह्यसंज्ञा ॥ शुष्के सरसि निर्जले धर्मकाले शयानं निवसंतमेनं मंडूकगणं यद्यदा आयन् अभिगच्छंति तदा प्रावृष्यन्वये पर्जन्ये सति वत्सिनीनां वत्सयुक्तानां गवां न गवामिव मायुः शब्द इव मंडूकानां वग्नुः शब्द समेति । संगच्छते । यथा वत्सैः संगतासु गोषु महान् घोषो जायते तद्वद्वर्षे पर्जन्ये महान् कलकलशब्दो जायत इत्यर्थः । अहेति पूरकः ॥

॥ अथ तृतीया ॥

यदीमेनाँ उशतो अभ्यवर्षीत्तृष्यावतः प्रावृष्यागतायां ।

अख्खलीकृत्या पितरं न पुत्रो अन्यो अन्यमुप वदंतमेति ॥ ३

यत् । ईं । एनान् । उशतः । अभि । अवर्षीत् । तृष्याऽवतः ।

प्रावृषि । आऽगतायां ।

अख्खलीकृत्य । पितरं । न । पुत्रः । अन्यः । अन्यं । उप ।

वदंतं । एति ॥ ३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उशतः कामयमानान् तृष्यावतस्तृष्यावत एनान्मंडूकान् प्रावृषि वर्षतावागतायामागते सति यद्यदाभ्यवर्षीत् पर्जन्यो जलैरभिषिंचति। ईमिति पूरणः। तदानीमख्खलीकृत्य। अख्खल इति शब्दानुकरणं। अख्खलशब्दं कृत्वा पुत्रः पितरं न पितरमिवान्यो मंडूको वदंतं मंडूकं तमन्यं मंडूकमुपैति। प्राप्नोति॥

॥ अथ चतुर्थी॥

अन्यो अन्यमनु गृभ्णात्येनोरपां प्रसर्गे यदमंदिषातां।

मंडूको यदभिवृष्टः कनिष्कन्पृश्निः संपृंक्ते हरितेन वाचं॥ ४

अन्यः। अन्यं। अनु। गृभ्णाति। एनोः। अपां। प्रऽसर्गे।
यत्। अमंदिषातां।
मंडूकः। यत्। अभिऽवृष्टः। कनिस्कन्। पृश्निः। संऽपृंक्ते।
हरितेन। वाचं॥ ४

एनोरेनयोर्द्वयोर्मंडूकयोरन्यो मंडूकोऽन्यं मंडूकमनुगृभ्णाति। गृह्णाति। अपामुदकानां प्रसर्गे प्रसर्जने वर्षे सति यद्यदामंदिषातां हृष्टौ बभूतां। यद्यदाभिवृष्टः पर्जन्येनाभिषिक्तः कनिष्कन्॥ स्कंदतेर्यङ्लुगंतस्य रूपं॥ भृशं स्कंदन् उत्प्लवं कुर्वन् पृश्निः पृश्निवर्णो मंडूको हरितेन हरितवर्णेनान्येन मंडूकेन वाचं संपृंक्ते संयोजयति। उभावप्येकविधं शब्दं कुरुतो। तदानीमन्योऽन्यमनुगृभ्णातीत्यन्वयः॥

॥ अथ पंचमी॥

यदेषामन्यो अन्यस्य वाचं शाक्तस्येव वदति शिक्षमाणः।

सर्वं तदेषां समृधेव पर्व यत्सुवाचो वदथनाध्यप्सु॥ ५

यत्। एषां। अन्यः। अन्यस्य। वाचं। शाक्तस्यऽइव।
वदति। शिक्षमाणः।
सर्वं। तत्। एषां। समृधाऽइव। पर्व। यत्। सुऽवाचः।
वदथन। अधि। अप्ऽसु॥ ५

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

हे मंडूका यद्यदैषां युष्माकं मध्येऽन्यो मंडूकोऽन्यस्य मंडूकस्य वाचं वदति अनुवदति अनुकरोति शिक्षमाणः शिक्ष्यमाणः शिष्यः शाक्तस्येव शक्तिमतः शिक्षकस्य वाचं यथानुवदति तद्वत् । यद्यदा च सुवाचः शोभनवाचो यूयं सर्वेऽप्सु उदकेषूदकोपर्युपरि प्लवंतो वदथन वदत शब्दं कुरुत तत्तदेषां युष्माकं सर्वं पर्व पर्ववत् शरीरं समृधेव समृद्धमेवाविकलावयवमेव भवति । इवशब्दोऽवधारणे । घर्मकाले शुष्कत्व-मापद्य मंडूकाः पुनर्वर्षे सत्यविकलांगाः प्रादुर्भवंतीत्यर्थः ॥

॥ इति पंचमस्य सप्तमे तृतीयो वर्गः ॥

॥ अथ षष्ठी ॥

गोमायुरेको अजमायुरेकः पृश्निरेको हरित एक एषां ।
समानं नाम बिभ्रतो विरूपाः पुरुत्रा वाचं पिपिशुर्वदंतः ॥ ६

गोऽमायुः । एकः । अजऽमायुः । एकः । पृश्निः । एकः ।
हरितः । एकः । एषां ।
समानं । नाम । बिभ्रतः । विऽरूपाः । पुरुऽत्रा । वाचं ।
पिपिशुः । वदंत ॥ ६

एषां मंडूकानां मध्य एको मंडूको गोमायुर्गोमायुरिव मायुः शब्दो यस्य तादृशो भवति । एकोऽन्यो मंडूकोऽजमायुरजस्य मायुरिव मायुर्यस्य तादृशो भवति । एकः पृश्निः पृश्निवर्णः । एकोऽपरो हरितो हरितवर्णः । एवं विरूपा नानारूपा अपि समानमेकं मंडूका इति नाम बिभ्रतो धारयंतः पुरुत्रा बहुषु देशेषु वाचं वदंतः शब्दं कुर्वंतः पिपिशुः । अवयवीभवंति ॥ प्रादुर्भवंति ॥ पिश अवयवे । पुरुशब्दाद्देव-मनुष्येत्यादिना त्राप्रत्ययः ॥

॥ अथ सप्तमी ॥

ब्राह्मणासो अतिरात्रे न सोमे सरो न पूर्णमभितो वदंतः ।
संवत्सरस्य तदहः परि ष्ठ यन्मंडूकाः प्रावृषीणं बभूव ॥ ७

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

ब्राह्मणासः । अतिऽरात्रे । न । सोमे । सरः । पूर्णं ।

अभितः । वदंतः ।

संवत्सरस्य । तत् । अहः । परि । स्थ । यत् । मंडूकाः ।

प्रावृषीणं । बभूव ॥ ७

रात्रिमतीत्य वर्तत इत्यतिरात्रः। अतिरात्रे न सोमे। यथातिरात्राख्ये सोमयागे ब्राह्मणासो ब्राह्मणा रात्रौ स्तुतशस्त्राणि पर्यायेण शंसंति हे मंडूकाः द्वितीयो नशब्दः संप्रत्यर्थे। न संप्रति पूर्णं सरोऽभितः सर्वतो वदंतो रात्रौ शब्दं कुर्वाणा यूयं तदहस्तद्दिनं परि ष्ठ। परितः सर्वतो भवथ। यदहः प्रावृषीणं प्रावृषेण्यं प्रावृषि भवं बभूव तस्मिन्नहनि सर्वतो वर्तमाना भवथेत्यर्थः॥

॥ अथाष्टमी ॥

ब्राह्मणासः सोमिनो वाचमक्रत ब्रह्म कृण्वंतः परिवत्सरीणं।

अध्वर्यवो घर्मिणः सिष्विदाना आविर्भवंति गुह्या न के चित्॥ ८

ब्राह्मणासः । सोमिनः । वाचं । अक्रत । ब्रह्म । कृण्वंतः ।

परिवत्सरीणं ।

अध्वर्यवः । घर्मिणः । सिष्विदानाः । आविः । भवंति ।

गुह्याः । न । के । चित् ॥ ८

सोमिनः सोमयुक्ताः परिवत्सरीणं सांवत्सरिकं गवामयनिकं ब्रह्म स्तुतशस्त्रात्मकं कृण्वंतः कुर्वंतो ब्राह्मणासः। लुप्तोपममेतत्। ब्राह्मणा इव वाचं शब्दमक्रत। अकृषतेमे मंडूकाः। अपि च घर्मिणो घर्मेण प्रवर्ग्येण चरंतोऽध्वर्यवोऽध्वरस्य नेतार ऋत्विज इव सिष्विदानाः स्विद्यमाना गुह्या वर्षकाले बिलेऽभिगूढाः के चित् येऽपि च मंडूका न संप्रति दृष्टा तत्याविर्भवंति। जायंते॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ नवमी ॥

देवहितिं जुगुपुर्द्वादशस्य ऋतुं नरो न प्र मिनन्त्येते ।
संवत्सरे प्रावृष्यागतायां तप्ता घर्मा अश्नुवते विसर्गं ॥ ९

देवऽहितिं । जुगुपुः । द्वादशस्य । ऋतुं । नरः । न । प्र ।
मिनंति । एते ।
संवत्सरे । प्रावृषि । आऽगतायां । तप्ताः । घर्माः । अश्नुवते ।
विऽसर्गं ॥ ९

नरो नेतार एते मंडूका देवहितिं देवैः हितं विधानमनयोर्नीत्यं धर्मं रक्षेयंरूपं जुगुपुः । गोपायंति । काले काले रक्षंति । एत एव द्वादशस्य द्वादशमासात्मकस्य संवत्सरस्य ऋतुं तं तं वसंतादिकं न प्रमिनंति । न हिंसंति । पर्जन्यस्तुतेरनुमोदनेन तत्तत्काले वृष्टिहेतवो भवंतीत्यर्थः । संवत्सरे संपूर्णे प्रावृषि वर्षर्तावागतायामागते सति घर्माः पूर्वं घर्मकाले वर्तमानास्तप्तास्तापेन पीडिताः संप्रति विसर्गं विसर्जनं पित्र्याद्याचनमश्नुवते । प्राप्नुवंति ॥

॥ अथ दशमी ॥

गोमायुरदादजमायुरदात्पृश्निरदाद्धरितो नो वसूनि ।
गवां मंडूका ददतः शतानि सहस्रसावे प्र तिरंत आयुः ॥ १०

गोऽमायुः । अदात् । अजऽमायुः । अदात् । पृश्निः । अदात् ।
हरितः । नः । वसूनि ।
गवां । मंडूकाः । ददतः । शतानि । सहस्रऽसावे । प्र ।
तिरंते । आयुः ॥ १०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

गोमायुर्गौरिव मायुः शब्दो यस्य तादृशो मंडूको वसूनि धनानि नोऽस्मभ्यमदात्। ददातु। अजमायुश्चादात्। ददातु। हरितो हरितवर्णश्चादात्। ददातु। पृश्निः पृश्निवर्णश्चादात्। ददातु। तथा सहस्रसावे सहस्रसंख्याका ओषधयः सूयंत उत्पद्यंत इति वर्षर्तुः सहस्रसावः। तस्मिन् सति सर्वे मंडूका गवां शतान्यपरिमिता गा ददतोऽस्मभ्यं प्रयच्छंत आयुर्जीवनं प्रतिरंते। प्रवर्धयंतु॥

॥ इति पंचमस्य सप्तमे चतुर्थो वर्गः॥

इंद्रासोमेति पंचविंशत्यृचं पंचदशं सूक्तं वसिष्ठस्यार्षं। आद्याः षट् जगत्यः सप्तमी जगती त्रिष्टुप् वाष्टादश्येकविंशीत्रयोविंश्यो जगत्योऽंत्या प्रति चक्ष्वेत्यनुष्टुप् शिष्टाश्चतुर्दश त्रिष्टुभः। नवमीद्वादशीत्रयोदश्यः सोमदेवत्या एकादशी देवदेवत्याष्टमीषोडश्याविंद्रदेवताके सप्तदशी ग्रावदेवत्याष्टादशी मरुद्देवताका दशमीचतुर्दश्यावग्निदेवताके प्र वर्तयेत्याद्याः पंचर्च इंद्रदेवताकाः। मा नो रक्ष इति त्रयोविंश्याः पूर्वोऽर्धर्चो वसिष्ठस्य प्रार्थनापरः। अतस्तद्देवताकः। उत्तरोऽर्धर्चः पृथिव्यंतरिक्षदेवत्यः शिष्टानां रक्षोहणाविंद्रासोमौ देवता। तथा चानुक्रांतं। इंद्रासोमा पंचाधिकेंद्रासोमं राक्षोघ्नं शापाभिशापप्रायं षट् सप्त वाद्या जगत्य एकविंशीत्रयोविंश्यौ त्वाष्टादशी वारुणी च दशमीचतुर्दश्यावाग्नेय्यौ देव्येकादश्यंत्यानुष्टुप् नवमी द्वादशी त्रयोदशी सौम्यः सप्तदशी ग्राव्यष्टमीषोडश्यावैंद्र्यौ प्र वर्तयेति पंचैंद्र्यो मा नो रक्ष इत्यर्धर्च आत्मन आशीरुत्तरोऽर्धर्चः पृथिव्यंतरिक्षदेवत इति॥ अत्र बृहद्देवतायामनुक्रम्यते। संवत्सरं तु मंडूकानैंद्रासोमं परं तु यत्। ऋषिर्ददर्श रक्षोघ्नं पुत्रशोकपरिप्लुतः। हते पुत्रशते क्रुद्धः सौदासैर्दुःखितस्तदेति॥ अतो रक्षोनिबर्हणार्थं चैतत्सूक्तं जाप्यं॥

॥ तत्र प्रथमा॥

इंद्रासोमा तपतं रक्ष उब्जतं न्यर्पयतं वृषणा तमोवृधः।
परा शृणीतमचितो न्योषतं हतं नुदेथां नि शिशीतमत्रिणः॥

इंद्रासोमा। तपतं। रक्षः। उब्जतं। नि। अर्पयतं।
वृषणा। तमःऽवृधः।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

परा। शृणीतं। अचितः। नि। ओषतं। हतं। नुदेथां।

नि। शिशीतं। अत्त्रिणः॥ १

हे इंद्रासोमा। इंद्रश्च सोमश्चेंद्रासोमौ॥ देवताद्वंद्वे चेति पूर्वपदस्यानङ्। आमंत्रिताद्युदात्तत्वं॥ रक्षो रक्षांसि॥ जातावेकवचनं॥ युवां तपतं। संतापयतं॥ आमंत्रितं पूर्वमविद्यमानवदित्यविद्यमानवत्त्वात् तपतमिति तिङंतस्य निघाताभावः॥ तथोब्जतं। हिंस्तं॥ उब्जतिर्हिंसाकर्मा। तिङः परत्वन्निघाताभावः॥ हे वृषणा वृषणौ कामानां वर्षितारौ न्यर्पयतं। रक्षांसि नीचैष्ट्वं प्रापयतं। तमोवृधस्तमसावरकेणांधकारेण मायारूपेण वर्धमानान् तमसि रात्रौ वर्धमानान्वाचितो ज्ञानरहितान्मूढान्राक्षसान् पराशृणीतं। पराङ्मुखा यथा भवंति तथा हिंस्तं। तथा न्योषतं। नितरां दहतं॥ उष दाहे॥ हतं। तान्मारयतं। नुदेथां। अपसृतांस्तान् प्रेरयेथां। अत्त्रिणोऽदनशीलांस्तान्राक्षसानपि शिशीतं। नितरां तनूकुरुतं॥

॥ अथ द्वितीया ॥

इंद्रासोमा समघशंसमभ्य१घं तपुर्ययस्तु चरुरग्निवाँ इव।
ब्रह्मद्विषे क्रव्यादे घोरचक्षसे द्वेषो धत्तमनवायं किमीदिने॥ २

इंद्रासोमा। सं। अघऽशंसं। अभि। अघं। तपुः। ययस्तु।
चरुः। अग्निवान्ऽइव।
ब्रह्मऽद्विषे। क्रव्यऽअदे। घोरऽचक्षसे। द्वेषः। धत्तं।
अनवायं। किमीदिने॥ २

हे इंद्रासोमावघशंसमघस्यानिष्टस्य शंसितारमभ्यागत्य हंतारं राक्षसं सं सर्वेण। अभीति श्रुतेर्योग्यक्रियाध्याहारः। अभिभवतं। स च तपुर्यथोक्तं तथा तप्यमानो राक्षसोऽग्निवानिवाग्नियुक्तोऽग्नौ पच्यमानश्चरुरिव ययस्तु॥ यसु प्रयत्ने। केवलात्तय-माङ्पूर्वार्थे द्रष्टव्यः॥ आयस्यतु। आयासं प्राप्नोतु। पच्यमानमित्यर्थः। अपि च ब्रह्मद्विषे ब्राह्मणेभ्योऽस्मभ्यं द्वेष्ट्रे क्रव्यादे क्रव्यं मांसं भक्षयित्रे घोरचक्षसे घोरदर्शनाय

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तद्रूपभाविने वा किमीदिने किमिदानीमिति चरते पिशुनाय द्वेषो द्वेष्यभावमन॰ पायमव्ययायमनवरतं वैरं सर्वेण यथा भवति तथा धत्तं। दत्तं ॥

॥ अथ तृतीया ॥

इंद्रासोमा दुष्कृतो वव्रे अंतरनारंभणे तमसि प्र विध्यतं ।
यथा नातः पुनरेकश्चनोदयत्तद्वामस्तु सहसे मन्युमच्छवः ॥ ३ ॥

इंद्रासोमा । दुःऽकृतः । वव्रे । अंतः । अनारंभणे । तमसि ।
प्र । विध्यतं ।
यथा । न । अतः । पुनः । एकः । चन । उत्ऽअयत् । तत् ।
वां । अस्तु । सहसे । मन्युऽमत् । शवः ॥ ३

हे इंद्रासोमौ दुष्कृतो दुष्कर्मकारिणो राक्षसान् वव्रे वारकेऽन्तर्मध्येऽनारंभण आलंबनरहिते तमस्यंधकारे प्रविध्यतं। प्रवेश्य ताडयतं। यथा येन प्रकारेणैषां मध्ये एकश्चनैकोऽपि राक्षसोऽतोऽस्मात्तमसः पुनर्नोदयत् उद्गच्छेत् तथा विध्यतमित्यर्थः॥ एतेर्लङ्याडागमः। इतश्च लोप इतीकारलोपः। गुणायादेशौ॥ तत्प्रसिद्धं मन्युमत्क्रोधयुक्तं वां युवयोः शवो बलं सहसे रक्षसामभिभवनायास्तु। भवतु॥

॥ अथ चतुर्थी ॥

इंद्रासोमा वर्तयतं दिवो वधं सं पृथिव्या अघशंसाय तर्हणं ।
उत्तक्षतं स्वर्यं पर्वतेभ्यो येन रक्षो वावृधानं निजूर्वथः ॥ ४ ॥

इंद्रासोमा । वर्तयतं । दिवः । वधं । सं । पृथिव्याः ।
अघऽशंसाय । तर्हणं ।
उत् । तक्षतं । स्वर्यं । पर्वतेभ्यः । येन । रक्षः । ववृधानं ।
निऽजूर्वथः ॥ ४

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे इंद्रासोमौ दिवोंतरिक्षात् द्युलोकाद्वा वधं हननसाधनमायुधं संवर्तयतं । उत्पादयतं । पृथिव्या अस्मादपि लोकात्सर्वेषां हिंसकमायुधमघशंसायाघशंसनार्थं-स्थायंसकं राक्षसं हंतुमुत्पादयतं । तथा पर्वतेभ्यः पर्ववद्भ्यो मेघेभ्यः सकाशात्स्वर्यं ॥ स्वृ शब्दोपतापयोः ॥ उपतापकमशनिरूपमस्त्रं । उत्तक्षतं कुरुतं । येनायुधेन वावृधानं प्रवृद्धं वा रक्षो राक्षसं निजूर्वथः निजूर्थः.जुर्वी हिंसायां ॥ नितरां हिंस्थ इत्यर्थः ॥

॥ अथ पंचमी ॥

इंद्रासोमा वर्तयतं दिवस्पर्यग्नितप्तेभिर्युवमश्महन्मभिः ।
तपुर्वधेभिरजरेभिरत्रिणो नि पर्शाने विध्यतं यंतु निस्वरं ॥ ५

इंद्रासोमा । वर्तयतं । दिवः । परि । अग्निऽतप्तेभिः । युवं । अश्महन्मऽभिः ।
तपुःऽवधेभिः । अजरेभिः । अत्रिणः । नि । पर्शाने । विध्यतं । यंतु । निऽस्वरं ॥ ५

हे इंद्रासोमौ दिवोंतरिक्षात्परितः सर्वतो वर्तयतं । आयुधानि प्रेरयतं । युवं तौ युवामग्नितप्तेभिरग्निना संतप्तैस्तपुर्वधेभिस्तापकवधकारैरजरेभिर्जरारहितैरश्महन्मभिरश्मसारभूतस्यायसो विकारैर्हननसाधनैस्तैरायुधैरत्रिणो राक्षसस्य पर्शाने पार्श्वस्थाने निविध्यतं । निहतं । ते च राक्षसा निःस्वरं निःशब्दं यंतु । अपयंतु । निर्गच्छंतु ॥

॥ इति पंचमस्य सप्तमे पंचमो वर्गः ॥

॥ अथ षष्ठी ॥

इंद्रासोमा परि वां भूतु विश्वत इयं मतिः कक्ष्याश्वेव वाजिना ।
यां वां होत्रां परिहिनोमि मेधयेमा ब्रह्माणि नृपतीव
जिन्वतं ॥ ६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इंद्रासोमा। परि। वां। भूतु। विश्वतः। इयं। मतिः।
कक्ष्या। अश्वाऽइव। वाजिना।
यां। वां। होत्रां। परिऽहिनोमि। मेधया। इमा।
ब्रह्माणि। नृपती इवेति नृपतीऽइव। जिन्वतं॥६

हे इंद्रासोमावियमस्माभिः क्रियमाणा मतिर्मननीया स्तुतिर्वाजिना वाजिनौ बलवंतौ वां युवां विश्वतः सर्वतः परिभूतु। परिष्वजतु। व्याप्नोतु वा। तत्र दृष्टांतः। कक्ष्या। कक्ष्यं बंधनो रज्जुरश्वेव यथाश्वं परिष्वजति तद्वत्। यां होत्रां वाचं वां युवाभ्यां मेधया परिहिनोमि प्रेरयामि सेयं मतिरिति संबंधः। अपि चेमेमान्यस्माभिः कृतानि ब्रह्माणि स्तोत्राणि – – – यथा धनैः पूरयंति तथा जिन्वतं। फलैः पूरयतं॥

॥ अथ सप्तमी॥

प्रति स्मरेथां तुजयद्भिरेवैर्हतं द्रुहो रक्षसो भंगुरावतः।
इंद्रासोमा दुष्कृते मा सुगं भूद्यो नः कदा चिदभिदासति
द्रुहा॥७

प्रति। स्मरेथां। तुजयत्ऽभिः। एवैः। हतं। द्रुहः। रक्षसः।
भंगुरऽवतः।
इंद्रासोमा। दुःऽकृते। मा। सुऽगं। भूत्। यः। नः।
कदा। चित्। अभिऽदासति। द्रुहा॥७

हे इंद्रासोमौ तुजयद्भिस्त्वरमाणैरेवैर्गंतृभिरश्वैः प्रतिस्मरेथां। अभिगच्छतं॥ उपसर्गवशेन स्मरतिरत्रार्थांतरे वर्तते। यथा प्रहरणं प्रस्थानमिति॥ अभिगम्य च द्रुहो द्रोग्धॄन् भंगुरावतो भंजनवतो रक्षसो राक्षसान् हतं। हिंसतं। हे इंद्रासोमौ दुष्कृते पापकारिणे राक्षसाय सुगं सुखं मा भूत्। मा भवतु। द्रुहा द्रोहेण युक्तो यो नोऽस्मान् कदाचिदप्यभिदासति अभिहंति तस्मै दुष्कृत इत्यन्वयः॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथाष्टमी ॥

यो मा पाकेन मनसा चरन्तमभिचष्टे अनृतेभिर्वचोभिः ।
आप इव काशिना संगृभीता असन्नस्त्वासत इन्द्र वक्ता ॥ ८

यः । मा । पाकेन । मनसा । चरन्तम् । अभिऽचष्टे ।
अनृतेभिः । वचःऽभिः ।
आपःऽइव । काशिना । संऽगृभीताः । असन् । अस्तु ।
असतः । इन्द्र । वक्ता ॥ ८

पाकेन पक्वेन शुद्धेन मनसा चरन्तं वर्तमानं सत्यवादिनं यो मां राक्षसोऽनृतेभिरनृतैरसत्यैर्वचनैरभिचष्टे अभिवदति असत्यवचनमारोपयति हे इन्द्र काशिना मुष्टिना संगृभीता संगृहीता आप इव यथापो विशीर्णा भवन्ति तथासतोऽसत्यस्य वक्ता स राक्षसोऽसन्नस्तु । अविद्यमानो भवतु । नश्यत्वित्यर्थः ॥

॥ अथ नवमी ॥

ये पाकशंसं विहरन्त एवैर्ये वा भद्रं दूषयन्ति स्वधाभिः ।
अहये वा तान्प्रददातु सोम आ वा दधातु निर्ऋतेरुपस्थे ॥ ९

ये । पाकऽशंसम् । विऽहरन्ते । एवैः । ये । वा । भद्रम् ।
दूषयन्ति । स्वधाभिः ।
अहये । वा । तान् । प्रऽददातु । सोमः । आ । वा । दधातु ।
निःऽऋतेः । उपऽस्थे ॥ ९

ये राक्षसाः पाकशंसं परिपक्ववचनं सत्यभाषिणं मामेवैरेतव्यैः प्राप्तव्यैरात्मीयैः कामैश्चंचलभूतैर्विहरन्ते विशेषेण हरन्ति उपद्रवयन्ति । यथाकामं परिचरन्तीत्यर्थः । ये वा स्वधाभिर्बलैर्युक्ता भद्रं कल्याणवचनं मां दूषयन्ति दुष्टं कुर्वन्ति तान् सर्वान् सोमोऽहये वा सर्पाय वा प्रददातु । निर्ऋतेः पापदेवताया उपस्थे उत्संगे वादधातु । प्रक्षिपतु ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ दशमी ॥

यो नो रसं दिप्सति पित्वो अग्ने यो अश्वानां यो गवां यस्तनूनां।
रिपुः स्तेनः स्तेयकृद्दभ्रमेतु नि ष हीयतां तन्वा३ तना च ॥ १०

यः। नः। रसं। दिप्सति। पित्वः। अग्ने। यः। अश्वानां। यः। गवां। यः। तनूनां।
रिपुः। स्तेनः। स्तेयऽकृत्। दभ्रं। एतु। नि। सः। हीयतां। तन्वा। तना। च ॥ १०

हे अग्ने यो राक्षसो नोऽस्माकं पित्वोऽन्नस्य रसं सारं दिप्सति जिघांसति। यश्चाश्वानामस्मदीयानां रसं दिप्सति। यश्च गवां रसं दिप्सति। यश्च तनूनामस्मदीयानां शरीराणां रसं दिप्सति रिपुः शत्रुः स्तेनश्चोरः स्तेयकृदपहर्ता च सोऽयं रक्षो दभ्रं हिंसामेतु। प्राप्नोतु। अपि च स च पापकृत्तन्वा स्वकीयेन शरीरेण तना च तनयेन च निहीयतां। निहीनो भवतु ॥

॥ इति पंचमस्य सप्तमे षष्ठो वर्गः ॥

॥ अथैकादशी ॥

परः सो अस्तु तन्वा३ तना च तिस्रः पृथिवीरधो अस्तु विश्वाः।
प्रति शुष्यतु यशो अस्य देवा यो नो दिवा दिप्सति यश्च नक्तं ॥ ११

परः। सः। अस्तु। तन्वा। तना। च। तिस्रः। पृथिवीः। अधः। अस्तु। विश्वाः।
प्रति। शुष्यतु। यशः। अस्य। देवाः। यः। नः। दिवा। दिप्सति। यः। च। नक्तं ॥ ११

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

स राक्षसस्तन्वा तना च ॥ व्यत्ययेन तृतीया ॥ तन्वाः शरीरस्य तनयस्य च परः परस्तादस्तु । असंबद्धो भवतु । तथा विश्वाः सर्वाः तिस्रः पृथिवीस्त्रीन् लोकानधोऽस्तु । अधस्ताद्भवतु । लोकत्रयादपि प्रच्युतो भवत्वित्यर्थः । हे देवा अस्य यशोऽन्नं कीर्तिर्वा प्रतिशुष्यतु । यो राक्षसो नोऽस्मान्दिवाह्नि दिप्सति जिघांसति यश्च नक्तं रात्रौ जिघांसति तस्योभयविधस्य यशः प्रतिशुष्यत्विति संबंधः ॥

॥ अथ द्वादशी ॥

सुविज्ञानं चिकितुषे जनाय सच्चासच्च वचसी पस्पृधाते ।

तयोर्यत्सत्यं यतरदृजीयस्तदित्सोमोऽवति हंत्यासत् ॥ १२

सुऽविज्ञानं । चिकितुषे । जनाय । सत् । च । असत् । च ।

वचसी इति । पस्पृधाते इति ।

तयोः । यत् । सत्यं । यतरत् । ऋजीयः । तत् । इत् ।

सोमः । अवति । हंति । असत् ॥ १२

प्राचेतसवसिष्ठविषये राक्षसेन सह वसिष्ठस्य शपथः क्रियते । अत्र केचिदाहुः । हत्वा पुत्रशतं पूर्वं वसिष्ठस्य महात्मनः । वसिष्ठं राक्षसोऽसि त्वं वाशिष्ठं रूपमास्थितः ॥ अहं वसिष्ठ इत्येवं जिघांसू राक्षसोऽब्रवीत् । अत्रोत्तरा ऋचो दृष्टा वसिष्ठेनेति नः श्रुतमिति ॥ चिकितुषे विदुषे जनायेदं सुविज्ञानं विज्ञातुं सुशकं भवति । किं तत् । सच्चासच्च सत्यं चानृतं च । तयोः सत्यासत्ययोरूपे वचने पस्पृधाते । मिथः स्पर्धेते । तयोः सदसद्वाचोर्मध्ये यत्सत्यं यथार्थं वचनं । यतरच्च ऋजीयः ऋजुतममकुटिलं तदित्तदेवाकुटिलं सत्यवचनं सोमोऽवति । रक्षति । असदनृत-वितथवचनं हंति । हिनस्ति । एवं सत्यानृतयोर्मध्ये यतरोऽहमनृतमभाषीति निःशङ्कः शुचित्वमभिहितवान् ॥

॥ अथ त्रयोदशी ॥

न वा उ सोमो वृजिनं हिनोति न क्षत्रियं मिथुया धारयंतं ।

हंति रक्षो हंत्यासद्वदंतमुभाविंद्रस्य प्रसितौ शयाते ॥ १३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

न । वै । ऊं इति । सोमः । वृजिनं । हिनोति । न ।

क्षत्रियं । मिथुया । धारयंतं ।

हंति । रक्षः । हंति । असत् । वदंतं । उभौ । इंद्रस्य ।

प्रऽसितौ । शयाते इति ॥ १३

वृजिनं पापकारिणं राक्षसं सोमो देवो न वा उ न खलु हिनोति । प्रेरयति । गच्छ त्यजति न संचरति । तथा क्षत्रियं । क्षतं बलं । तद्वंतं मिथुया मिथ्याभूतं वचनं धारयंतं बिभ्रतमसत्यवादिनं पुरुषं न च हिनोति । न विसृजति । अपि तु रक्षो राक्षसं हंति । असद्वदंतमसत्यं वदंतं च हंति । हिनस्ति । उभौ राक्षसासत्यवादिनौ तौ सोमेन हमाविंद्रस्य संबंधिनि प्रसितौ बंधने शयाते । निवसतः । यद्वेंद्रस्येति तृतीयार्थे षष्ठी । इंद्रेणेश्वरेण सोमेन प्रसितौ बद्धौ ॥ षिञ् बंधने । अस्मात्कर्मणि निष्ठा । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं ॥

॥ अथ चतुर्दशी ॥

यदि वाहमनृतदेव आस मोघं वा देवाँ अप्यूहे अग्ने ।

किमस्मभ्यं जातवेदो हृणीषे द्रोघवाचस्ते निर्ऋथं सचंतां ॥ १४

यदि । वा । अहं । अनृतऽदेवः । आस । मोघं । वा ।

देवान् । अपि ऊहे । अग्ने ।

किं । अस्मभ्यं । जातऽवेद । हृणीषे । द्रोघऽवाचः । ते ।

निःऽऋथं । सचंतां ॥ १४

यदि वाहमनृतदेवः । अनृता असत्यभूता देवा यस्य तादृशो यद्यहमास अस्मि । अथवा मोघं वा निष्फलं वा देवानप्यूहे उपगच्छामि । अहं यद्यग्ने तादृशोऽस्मि हे अग्ने तर्हि मां बाधस्व । न ह्यहं तथाविधोऽस्मि । एवं सति हे जातवेदो जातानां वेदितरग्ने अस्मभ्यं किंकारणं हृणीषे क्रुध्यसि । तत्र क्रोधोऽस्मासु न कार्य इत्यर्थः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

क्रोधशापेऽन्तर्धानो राक्षसाख्ये तत्र निरुद्धं ॥ निःपूर्वो द्रुहिर्हिंसायां वर्तते ॥ निद्रुह्यं निःशेषेणास्मिन् हिंसां कुर्वतां । शेषं स्पष्टं ॥

॥ अथ पंचदशी ॥

अद्या मुरीय यदि यातुधानो अस्मि यदि वायुस्ततप पूरुषस्य ।
अधा स वीरैर्दशभिर्वि यूया यो मा मोघं यातुधानेत्याह ॥ १५

अद्य । मुरीय । यदि । यातुऽधानः । अस्मि । यदि । वा ।
आयुः । ततप । पुरुषस्य ।
अध । सः । वीरैः । दशऽभिः । वि । यूयाः । यः । मा ।
मोघं । यातुऽधान । इति । आह ॥ १५

इयमपि यथापूर्वैव । यद्यहं वसिष्ठो यातुधानो राक्षसोऽस्मि अद्यास्मिन्नेव दिने मुरीय । म्रियेय । अपि वा पुरुषस्य मनुष्यस्यायुर्जीवितं यद्यहं राक्षसो भूत्वा ततप हिंसितवानस्मि तर्ह्यप्यद्य म्रियेयेत्यन्वयः । अथात्वेवं स्यात् अहं वसिष्ठस्त्वं राक्षस इति वदति स त्वं दशभिर्वीरैः पुत्रैः । उपलक्षणमेतत् । सर्वैर्बंधुजनैर्वियूयाः । वियुक्तो भवेः । यो राक्षसो मा मां मोघं व्यर्थं हे यातुधान हे राक्षसेति संबोध्याह ॥

॥ इति पंचमस्य सप्तमे सप्तमो वर्गः ॥

॥ अथ षोडशी ॥

यो मायातुं यातुधानेत्याह यो वा रक्षाः शुचिरस्मीत्याह ।
इंद्रस्तं हंतु महता वधेन विश्वस्य जंतोरधमस्पदीष्ट ॥ १६

यः । मा । अयातुं । यातुऽधान । इति । आह । यः । वा ।
रक्षाः । शुचिः । अस्मि । इति । आह ।
इंद्रः । तं । हंतु । महता । वधेन । विश्वस्य । जंतोः ।
अधमः । पदीष्ट ॥ १६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यो राक्षसो मामयातुमराक्षसं सन्तं हे यातुधान हे राक्षसेति संबोध्याह ब्रूते। यो वा यश्च रक्षा राक्षसः शुचिरस्मि शुद्धो भवामीति न राक्षसोऽस्मीत्याह ब्रूते तमुभयविधं राक्षसं इन्द्रो महता वधेन महतायुधेन वज्रेण हन्तु। हिनस्तु। स च विश्वस्य सर्वस्य जन्तोर्जन्मनोऽधमो निकृष्टः सन् पदीष्ट। पततु॥

॥ अथ सप्तदशी ॥

प्र या जिगाति खर्गलेव नक्तमप द्रुहा तन्वं गूहमाना।
वव्राँ अनन्ताँ अव सा पदीष्ट ग्रावाणो घ्नन्तु रक्षस उपब्दैः॥१७

प्र। या। जिगाति। खर्गलाऽइव। नक्तं। अप। द्रुहा। तन्वं।
गूहमाना।
वव्रान्। अनन्तान्। अव। सा। पदीष्ट। ग्रावाणः। घ्नन्तु।
रक्षसः। उपब्दैः॥१७

या राक्षसी नक्तं रात्रौ द्रुहा द्रोहेण गुहा खर्गलेवोलूकीव प्रजिगाति प्रगच्छति। किं कुर्वती। तन्वं स्वकीयं शरीरमपगूहमानापह्नुवती प्रच्छादयन्ती सा राक्षसी अनन्तानपर्यन्तान् वव्रान् गर्तानवपदीष्ट। अवाङ्मुखी पततु। ग्रावाणः सोमाभिषवार्थाः ग्रावाण उपब्दैरभिषवशब्दै रक्षसो राक्षसान् घ्नन्तु। हिंसन्तु॥

॥ अथाष्टादशी ॥

वि तिष्ठध्वं मरुतो विक्ष्विच्छत गृभायत रक्षसः सं पिनष्टन।
वयो ये भूत्वी पतयन्ति नक्तभिर्ये वा रिपो दधिरे देवे अध्वरे॥१८

वि। तिष्ठध्वं। मरुतः। विक्षु। इच्छत। गृभायत।
रक्षसः। सं। पिनष्टन।
वयः। ये। भूत्वी। पतयन्ति। नक्तऽभिः। ये। वा। रिपः।
दधिरे। देवे। अध्वरे॥१८

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे मरुतो यूयं विक्षु प्रजासु वि तिष्ठध्वं। विविधं तिष्ठत। तत्र गुह्यान् राक्षसान् इच्छत। अन्विच्छत। तदनंतरं रक्षसो राक्षसान् गृभायत। गृह्णीत। गृहीत्वा च संपिनष्टन। चूर्णयत। ये राक्षसा वयः पक्षिणो भूत्वी भूत्वा नक्तभी रात्रिभी रात्रिषु पतयंति आगच्छंति। ये वा ये च देवे दीप्तेऽध्वरे यागे रिपो हिंसां दधिरे विदधिरे तान् राक्षसान् संपिनष्टनेत्यन्वयः ॥

॥ अथैकोनविंशी ॥

प्र वर्तय दिवो अश्मानमिंद्र सोमशितं मघवन्त्सं शिशाधि।
प्राक्तादपाक्तादधरादुदक्तादभि जहि रक्षसः पर्वतेन ॥ १९

प्र। वर्तय। दिवः। अश्मानं। इंद्र। सोमऽशितं। मघऽवन्। सं। शिशाधि।
प्राक्तात्। अपाक्तात्। अधरात्। उदक्तात्। अभि। जहि। रक्षसः। पर्वतेन ॥ १९

हे इंद्र दिवोऽन्तरिक्षादश्मानमशनिं प्रवर्तय। प्रेरय राक्षसान् हंतुं। तथा सोमशितं सोमेन तीक्ष्णीकृतं अशनिं हे मघवन् धनवन्निंद्र संशिशाधि। संस्कुरु। अपि च प्राक्तात् प्राच्या अपाक्तात् प्रतीच्या अधरात् दक्षिणस्या उदक्तादुत्तरस्याः सर्वस्मादपि दिग्भागात् स्थितो राक्षसान् पर्वतेन पर्वणा वज्रेणाभिजहि। मारय ॥

॥ अथ विंशी ॥

एत उ त्ये पतयंति श्वयातव इंद्रं दिप्संति दिप्सवोऽदाभ्यं।
शिशीते शक्रः पिशुनेभ्यो वधं नूनं सृजदशनिं यातुमद्भ्यः ॥ २०

एते। ऊं इति। त्ये। पतयंति। श्वऽयातवः। इंद्रं।
दिप्संति। दिप्सवः। अदाभ्यं।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

शिशीते । शक्रः । पिशुनेभ्यः । वधं । नूनं । सृजत् । अशनिं ।
यातुमत्ऽभ्यः ॥ २०

त्येत एते राक्षसाः श्वयातवः श्वभिः परिकरभूतैर्हिंसकैः श्वभिः सह यान्तो वा पतयंति । पतंति । ये दिप्सवो जिघांसवः संतोऽदाभ्यमहिंस्यमिंद्रं दिप्संति जिघांसंति तेभ्यः पिशुनेभ्यः पिशुनान् कपटान् हंतुं शक्तः शक्रः इंद्रो वधमायुधमशनिरूपं शिशीते । तीक्ष्णीकरोति । यातुमद्भ्यो राक्षसेभ्यो नूनं क्षिप्रमशनिं सृजात् । विसृजतु हननार्थं ॥

॥ इति पंचमस्य सप्तमेऽष्टमोः वर्गः ॥

॥ अथैकविंशी ॥

इंद्रो यातूनामभवत्पराशरो हविर्मथीनामभ्याविवासतां ।
अभीदु शक्रः परशुर्यथा वनं पात्रेव भिंदन्सत एति रक्षसः ॥ २१

इंद्रः । यातूनां । अभवत् । पराऽशरः । हविःऽमथीनां ।
अभि । आऽविवासतां ।
अभि । इत् । ऊं इति । शक्रः । परशुः । यथा । वनं ।
पात्राऽइव । भिंदन् । सतः । एति । रक्षसः ॥ २१

यातूनां हिंसकानां रक्षसामयमिंद्रः पराशरः परान्यिता हिंसिताभवत् । कीदृशानां । हविर्मथीनां हवींषि मथ्नतामभिमुखमाविवासतामागच्छतां । अपि चायं शक्र इंद्रो वनं वृक्षजातं परशुर्यथा छिंदन् कुठार इव पात्रेव मृन्मयानि पात्राणि भिंदन् मुद्गर इव च सतः । प्राप्नुवतः । यद्वा यास्कः । सितः सत इति प्राप्तस्येति । प्राप्तान्सतो राक्षसान् भिंदन् हिंसन् अभ्येति । अभिगच्छति । इदु पूरणे ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ द्वाविंशी ॥

उलूकयातुं शुशुलूकयातुं जहि श्वयातुमुत कोकयातुम् ।

सुपर्णयातुमुत गृध्रयातुं दृषदेव प्र मृण रक्ष इंद्र ॥ २२

उलूकऽयातुं । शुशुलूकऽयातुं । जहि । श्वऽयातुं । उत ।

कोकऽयातुं ।

सुपर्णऽयातुं । उत । गृध्रऽयातुं । दृषदाऽइव । प्र । मृण ।

रक्षः । इंद्र ॥ २२

उलूकयातुं । उलूकैः परिकरभूतैः सह यातयति हिनस्तीति याति गच्छतीति वोलूकयातुः । यद्वोलूकरूपी यातीत्युलूकयातुः । हे इंद्र तादृशं राक्षसं जहि । विनाशय ॥ तथा च बृहद्देवतायामुक्तं । उलूकयातुं जह्येतान् नानारूपान् निशाचरान् । स्त्रीपुंरूपांश्च तिर्यंचो जिघांसूनिंद्र मे जहीति ॥ एवमुत्तरत्रापि योज्यं । शुशुलूकयातुं । उलूका द्विविधाः । बृहदुलूका अल्पोलूकाश्चेति तत्रोलूकयातुमिति बृहदुलूकाभिप्रायेणोक्तं । शिशुरल्प उलूकः शुशुलूकः । तद्रूपेण वर्तमानं राक्षसं श्वयातुं श्वरूपेण वर्तमानं राक्षसमुतापि च कोकयातुं । कोकश्चक्रवाकः । तद्रूपेण वर्तमानं राक्षसं सुपर्णयातुं । श्येनः । तदाकारं यातुधानमुतापि च गृध्रयातुं गृध्ररूपं च यातुधानं । एतान् सर्वान्नानाकारान् हे इंद्र जहि । किं बहुना दृषदेव पाषाणेनेव वज्रेण रक्षो राक्षसमात्रं प्रमृण । मारय ॥

॥ अथ त्रयोविंशी ॥

मा नो रक्षो अभि नड्यातुमावतामपोच्छतु मिथुना या

किमीदिना ।

पृथिवी नः पार्थिवात्पात्वंहसोऽन्तरिक्षं दिव्यात्पात्वस्मान् ॥ २३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मा । नः । रक्षः । अभि । नट् । यातुऽमावतां । अप । उच्छतु । मिथुना । या । किमीदिना ।

पृथिवी । नः । पार्थिवात् । पातु । अंहसः । अंतरिक्षं । दिव्यात् । पातु । अस्मान् ॥ २३

रक्षो राक्षसजातिर्नोऽस्मान् माभिनट् । माभिव्याप्नोतु ॥ नशतेर्व्याप्तिकर्मणो लुङि मंत्रे घसेति च्लेर्लुक् । न माङ्योग इत्यडभावः । तथा यातुमावतां यातना-वतां राक्षसानां मिथुना मिथुनानि स्त्रीपुंरूपाणि युगलान्यपोच्छतु । उषा अपि विनाशयतु । अपवर्जयतु । या यानि मिथुनानि किमीदिना किमीदिनानि किमिदं किमिदमिति जिघांसया चरमाणानि भवंति । अपि च पृथिवी प्रथितेयं भूमिर्नोऽस्मान् पार्थिवात्पृथिव्या अंतरिक्षस्य संबंधिनोंऽहसः पापात्पातु । रक्षतु । अंतरिक्षं च दिव्याद्दिवि भवात्पापादस्मान् पातु । रक्षतु ॥

॥ अथ चतुर्विंशी ॥

इंद्र जहि पुमांसं यातुधानमुत स्त्रियं मायया शाशदानां ।

विग्रीवासो मूरदेवा ऋदंतु मा ते दृशंत्सूर्यमुच्चरंतं ॥ २४

इंद्र । जहि । पुमांसं । यातुऽधानं । उत । स्त्रियं । मायया । शाशदानां ।

विऽग्रीवासः । मूरऽदेवाः । ऋदंतु । मा । ते । दृशन् । सूर्यं । उत्ऽचरंतं ॥ २४

हे इंद्र पुमांसं पुंरूपधारिणं यातुधानं राक्षसं जहि । मारय । उतापि च मायया वंचनया शाशदानां हिंसंतीं स्त्रियं राक्षसीं च जहि । अपि च मूरदेवा मारणक्रीडा राक्षसा विग्रीवासो विच्छिन्नग्रीवाः संत ऋदंतु । नश्यंतु । ते तथाविधा राक्षसा उच्चरंतमुद्यंतं सूर्यमादित्यं मा दृशन् । मा द्राक्षुः ॥

उपाकरणोत्सर्जनयोर्मंडलादिदर्शहोमे ॥ति चक्रत्येषा । सूत्रितं च । यो नः स्वोऽरणो यश्च निष्ट्यः प्रति चक्ष्व । आ० गृ० ३, ५, । इति ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ एषा पंचविंशी ॥

प्रति चक्ष्व वि चक्ष्वेंद्रश्च सोम जागृतं ।

रक्षोभ्यो वधमस्यतमशनिं यातुमद्भ्यः ॥ २५

प्रति । चक्ष्व । वि । चक्ष्व । इंद्रः । च । सोम । जागृतं ।

रक्षःऽभ्यः । वधं । अस्यतं । अशनिं । यातुमत्ऽभ्यः ॥ २५

हे सोम त्वमिंद्रश्च प्रतिचक्ष्व । प्रत्येकं पश्य राक्षसान् । तथा वि चक्ष्व । विविधं पश्य । यथास्मान्न बाधेरन् तथा पश्येत्यर्थः । युवां च संहतौ जागृतं । जागरूकौ रक्षोवधोद्युक्तौ भवतं । यातुमद्भ्यो हिंसावद्भ्यो रक्षोभ्यो राक्षसेभ्योऽशनिमशनिरूपं वधमायुधमस्यतं । क्षिपतं ॥

॥ इति पंचमस्य सप्तमे नवमो वर्गः ॥

॥ इति सप्तमे मंडले षष्ठोऽनुवाकः । सप्तमं मंडलं समाप्तं ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अथाष्टमं मंडलं ।

अष्टमे मंडले दशानुवाकाः । तत्र प्रथमेऽनुवाके पंच सूक्तानि । तेषु मा चिदन्यदिति चतुस्त्रिंशदृचं प्रथमं सूक्तं । अत्रानुक्रम्यते । मा चिच्चतुस्त्रिंशन्मेधातिथिमेध्यातिथी ऐंद्रं पार्थरं द्विपगाथादि हित्रिष्टुबंतमाद्यं तृचं प्रगाथोऽपश्यत् स घोरः सन् भ्रातुः कण्वस्य पुत्रतामगात् प्लायोगिश्चासंगो यः स्त्रीभूत्वा पुमानभूत् स मेध्यातिथये दानं दत्वा स्तुहि स्तुहीति चतसृभिरात्मानं तुष्टाव पत्नी चास्यांगिरसी शश्वती पुंस्त्वमुपलभ्यैनं प्रीतांत्यया तुष्टावेति । अस्यायमर्थः । अस्य सूक्तस्य मेधातिथिमेध्यातिथिनामानौ द्वावृषी तौ च कण्वगोत्रौ । ऋषिश्चानुक्तगोत्रः प्राग्वत्काण्व इति परिभाषितत्वात् । आद्यस्य तृचस्य तु घोरस्य पुत्रः स्वकीयभ्रातुः कण्वस्य पुत्रतां प्राप्तत्वात्काण्वः प्रगाथाख्य ऋषिः । प्लयोगनाम्नो राज्ञः पुत्र आसंगाभिधानो राजा देवशापात् स्त्रीत्वमनुभूय पश्चात्तपोबलेन मेधातिथेः प्रसादात्पुमान् भूत्वा तस्मै बहु धनं दत्वा स्वकीयमात्मानं दत्तदानं स्तुहि स्तुहीत्यादिभिश्चतसृभिरस्तौत् । अतश्चासावासंगाख्यो राजा ऋषिः । अस्यासंगस्य भार्यांगिरसः सुता शश्वत्याख्या भर्तुः पुंस्त्वमुपलभ्य प्रीता सती स्वभर्तारमन्वस्य स्थूरमित्यनया स्तुतवती । अतस्तस्या ऋचः शश्वत्यृषिका । अंत्ये द्वे त्रिष्टुभौ द्वितीयाचतुर्थ्यौ सतोबृहत्यौ शिष्टा बृहत्यः । आद्यस्य सूक्तस्येंद्रो देवता । स्तुहि स्तुहीत्याद्याश्चतस्र आत्मकृतस्य दानस्य स्तूयमानत्वात्तद्देवताकाः । अन्वस्येत्यस्या आसंगाख्यो राजा देवता । या तेनोच्यते सा देवतेति सा देवतेति न्यायात् ॥ महाव्रते निष्केवल्ये बार्हत-तृचाशीतावादित एकोनत्रिंशद्विनियुक्ताः । तथैव पंचमारण्यके सूत्रितं । मा चिदन्यद्वि शंसतेत्येकया न स्त्रियं । ऐ० आ० ५. १०. । इति ॥ चातुर्विंशिकेऽहनि माध्यंदिनसवने मैत्रावरुणस्य मा चिदन्यदिति वैकल्पिकः स्तोत्रियः प्रगाथः । सूत्रितं च । मा चिदन्यद्वि शंसत यच्चिद्धि त्वा जना इम इति स्तोत्रियानुरूपौ । आ० ७. ४. । इति ॥ आद्यस्तोत्रियाख्या विनियुक्ता । सूत्रितं च । आ तू न इंद्र क्षुमंतं मा चिदन्यद्वि शंसत । आ० ५. १२. । इति ॥ उपाकरणोत्सर्जनयोर्मंडलादिहोमेऽप्येषा । सूत्यते हि । मा चिदन्यदाग्ने याहि स्वादिष्ठयेति ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तत्र प्रथमा ॥

मा चिदन्यद्वि शंसत सखायो मा रिषण्यत ।
इंद्रमित्स्तोता वृषणं सचा सुते मुहुरुक्था च शंसत ॥ १

मा । चित् । अन्यत् । वि । शंसत । सखायः । मा ।
रिषण्यत ।
इंद्रं । इत् । स्तोत । वृषणं । सचा । सुते । मुहुः । उक्था ।
च । शंसत ॥ १

हे सखायः समानख्यानाः स्तोतार इंद्रस्तोत्रादन्यत्स्तोत्रं मा चिद्विशंसत । नैवोच्चारयत । मा रिषण्यत । मा हिंसितारो भवत । अन्यदीयस्तोत्रोच्चारणेन वृथोपक्षीणा मा भवत । सुतेऽभिषुते सोमे वृषणं कामानां वर्षितारमिंद्रमिदिंद्रमेव हे स्तोत्रादयः सचा सह संघीभूय स्तोत । स्तुत । हे यजमानादय उक्था चोक्थानि शस्त्राणि चैंद्रविषयाणि सूक्तं मुहुः पुनः पुनः शंसत ॥

॥ अथ द्वितीया ॥

अवक्रक्षिणं वृषभं यथाजुरं गां न चर्षणीसहं ।
विद्वेषणं संवननोभयंकरं मंहिष्ठमुभयाविनं ॥ २

अवऽक्रक्षिणं । वृषभं । यथा । अजुरं । गां । न ।
चर्षणिऽसहं ।
विऽद्वेषणं । संऽवनना । उभयंऽकरं । मंहिष्ठं । उभयाविनं ॥ २

वृषभं यथा वृषभमिवावक्रक्षिणमवकर्षणशीलं शत्रूणां हिंसितारमजुरं जरारहितमहिंसितं वा गां न गामिव वृषभमिव चर्षणीसहं चर्षणीनां मनुष्याणां शत्रुभूतानामभिभवितारं विद्वेषणं विद्वेष्टारं शत्रूणां संवनना संवननं सम्यक् संभजनीयं स्तोतृभिरुभयंकरं निग्रहानुग्रहरूपयोरुभयोः कर्तारं मंहिष्ठं दातृतममुभयाविनं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दिव्यपार्थिवलक्षणेनोभयविधधनेनोपेतं । यद्वा स्थावरजंगमरूपेण द्विप्रकारेण रयिलक्षणेनोपेतं । अथवोभयविधैः स्तोतृभिर्यष्टृभिरुपेतं । एवंविधमिंद्रमित् स्तोतेत्यन्वयः ॥

चातुर्विंशिकेऽहनि माध्यंदिनसवने यच्चिद्धि त्वेति प्रगाथस्तु वैकल्पिकोऽनुरूपः प्रगाथः । सूत्रं तूदाहृतं ॥

॥ तत्राद्या सूक्ते तृतीया ॥

यच्चिद्धि त्वा जना इमे नाना हवंत ऊतये ।
अस्माकं ब्रह्मेदमिंद्र भूतु तेऽहा विश्वा च वर्धनं ॥ ३

यत् । चित् । हि । त्वा । जनाः । इमे । नाना । हवंते ।
ऊतये ।
अस्माकं । ब्रह्म । इदं । इंद्र । भूतु । ते । अहा । विश्वा ।
च । वर्धनं ॥ ३

इमे इज्यमानाः सर्वे जना हे इंद्र त्वामूतये रक्षणाय तर्पणाय वा नाना पृथक् पृथक् यच्चित् यद्यपि हवंते स्तुवंति । ह्वेति पूरणः । तथाप्यस्माकमिदं ब्रह्म स्तोत्रमेव हे इंद्र ते तव वर्धनं वर्धकं भूतु । भवतु । न केवलमिदानीमेवापि तु विश्वाहा सर्वाण्यहानि सर्वेष्वहःसु चेदमेव स्तोत्रं त्वां वर्धयत्वित्यर्थः ॥

॥ अथ चतुर्थी ॥

वि तर्तूर्यंते मघवन्विपश्चितोऽर्यो विपो जनानां ।
उप क्रमस्व पुरुरूपमा भर वाजं नेदिष्ठमूतये ॥ ४

वि । तर्तूर्यंते । मघऽवन् । विपःऽचितः । अर्यः । विपः ।
जनानां ।
उप । क्रमस्व । पुरुऽरूपं । आ । भर । वाजं । नेदिष्ठं ।
ऊतये ॥ ४

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे मघवन् धनवन्निंद्र विपश्चितो विद्वांसस्त्वदीयाः स्तोतारोऽर्योऽभिगंतारो जनानां शत्रूणां विपो वेपयितारः संतो वितर्तूर्यंते। आपदो वितरंति। अतिक्रामंति। तादृशस्त्वमुपक्रमस्व। उपगच्छास्मान्। पुरुरूपं बहुरूपं नेदिष्ठमंतिकतमं वाजमन्नमूतये तर्पणायाभराहर॥

॥ अथ पंचमी॥

महे चन त्वामद्रिवः परा शुल्काय देयां।
न सहस्राय नायुताय वज्रिवो न शताय शतामघ॥ ५

महे। चन। त्वा। अद्रिऽवः। परा। शुल्काय। देयां।
न। सहस्राय। न। अयुताय। वज्रिऽवः। न। शताय।
शतऽमघ॥ ५

हे अद्रिवो वज्रवन्निंद्र त्वा त्वां। चनेति निपातद्वयसमुदायो विभज्य योजनीयः। महे च महतेऽपि शुल्काय मूल्याय न परादेयां। न विक्रीणानि। हे वज्रिवो वज्रवन्निंद्र सहस्राय सहस्रसंख्याय च धनाय न परादेयां। अयुताय दशसहस्राय च शुल्काय न परादेयां। हे शतामघ बहुधनेंद्र शताय। बहुनामैतत्। अपरिमिताय च धनाय न परादेयां। न विक्रीणानि। बहुसंख्याकधनादपि त्वं मम प्रियतमोऽसीत्यर्थः॥

॥ इति पंचमस्य सप्तमे दशमो वर्गः॥

॥ अथ षष्ठी॥

वस्याँ इंद्रासि मे पितुरुत भ्रातुरभुंजतः।
माता च मे छदयथः समा वसो वसुत्वनाय राधसे॥ ६

वस्यान्। इंद्र। असि। मे। पितुः। उत। भ्रातुः।
अभुंजतः।
माता। च। मे। छदयथः। समा। वसो इति। वसुऽत्वनाय।
राधसे॥ ६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे इंद्र त्वं मे मदीयात्पितुर्जनकादपि वस्यान् वसीयान् वसुमत्तरोऽसि। उताभुंजतोऽपालयतो भ्रातुरपि वसीयान् त्वमधिकोऽसि। हे वसो वासकेंद्र मे मदीया माता च त्वं च समा समौ समानौ संतौ॥ पुमान् स्त्रियेति पुंशेषः॥ छदयथः। अर्चतिकर्मायं। मां पूजितं कुरुथः। किमर्थं। वसुत्वनाय व्यापनाय राधसे धनाय च। उभयोर्लाभायेत्यर्थः॥

॥ अथ सप्तमी ॥

क्वे॑यथ क्वे॑दसि पुरुत्रा चिद्धि ते मनं।

अलर्षि युध्म खजकृत्पुरंदर प्र गायत्रा अगासिषुः॥ ७

क्व॑। इयथ। क्व॑। इत्। असि। पुरुऽत्रा। चित्। हि। ते।

मनं।

अलर्षि। युध्म। खजऽकृत्। पुरंऽदर। प्र। गायत्राः।

अगासिषुः॥ ७

हे इंद्र क्व कुत्र देशे इयथ। गतवानसि पुरा। क्वेत् कुत्र चासि। भवसि। इदानीं वर्तसे। पुरुत्रा चिद्धि बहुषु हि यजमानेषु ते त्वदीयं मनः संचरति। हे युध्म युद्धकुशल खजकृत् युद्धस्य कर्तः हे पुरंदरासुरीणां पुरां दारयितः हे इंद्र अलर्षि। आगच्छ। गायत्रा गानकुशला अस्मदीयाः स्तोतारः प्रागासिषुः। प्रगायंति। स्तुवंति॥ अलर्षीत्येतद्दाधर्त्यादौ। पा० ७. ४. ६५.। इत्यत्र निपात्यते॥

॥ अथाष्टमी ॥

प्रास्मै गायत्रमर्चत वावातुर्यः पुरंदरः।

याभिः काण्वस्योप बर्हिरासदं यासद्वज्री भिनत्पुरः॥ ८

प्र। अस्मै। गायत्रं। अर्चत। ववातुः। यः। पुरंऽदरः।

याभिः। काण्वस्य। उप। बर्हिः। आऽसदं। यासत्।

वज्री। भिनत्। पुरः॥ ८

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

अस्मा इंद्राय गायत्रं गातव्यं साम गायत्रसंज्ञं वा प्रार्चत। प्रगायत पुरंदरः पुरां दारयिता य इंद्रो भाषात्सर्वैर्वननीयः संभजनीयः। यद्वा। भाषातः संभक्तः स्तोतव्यं इंद्र पुरंदरः शत्रुपुराणां दारयिता। याभिः स्तोभिः कण्वस्य कण्वपुत्रस्य मेधातिथेर्मेध्यातिथेश्च बर्हिषं यज्ञमुपासदः उपासत्तुमुपगंतुं यासत् गच्छेत् वज्री वज्रयुक्तः सन्। याभिश्च ऋग्भिः स्तूयमानः सन् पुरः शत्रुपुरीर्भिंदन् भिंद्यात् ताभिर्ऋग्भिः गायत्रं साम गायतेत्यर्थः॥

॥ अथ नवमी ॥

ये ते संति दशग्विनः शतिनो ये सहस्रिणः।
अश्वासो ये ते वृषणो रघुद्रुवस्तेभिर्नस्तूयमा गहि॥ ९

ये। ते। संति। दशऽग्विनः। शतिनः। ये। सहस्रिणः।
अश्वासः। ये। ते। वृषणः। रघुऽद्रुवः। तेभिः। नः। तूयं।
आ। गहि॥ ९

हे इंद्र दशग्विनो दशयोजनगामिनो येऽश्वास्ते तव संति विद्यंते ये चान्ये शतिनः शतसंख्याकाः सहस्रिणः सहस्रसंख्याकाः संति। ये ते त्वदीया अश्वासोऽश्वा वृषणः सेचनसमर्था युवानो रघुद्रुवः शीघ्रगामिनश्च तेभिस्तैः सर्वैरश्वैर्नोऽस्मान् तूयं क्षिप्रमागहि। आगच्छ॥

॥ अथ दशमी ॥

आ त्व१द्य सबर्दुघां हुवे गायत्रवेपसं।
इंद्रं॑। धेनुं सुदुघामन्यामिषमुरुधारामरंकृतं॥ १०

आ। तु। अद्य। सबःऽदुघां। हुवे। गायत्रऽवेपसं।
इंद्रं॑। धेनुं। सुऽदुघां। अन्यां। इषं। उरुऽधारां।
अरंऽकृतं॥ १०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

जनयेंद्रं धेनुरूपेण वृष्टिरूपेण च निरूपयन् स्तौति। अद्योदामीं धेनुं धेनुरूपमिंद्रं तु निपमाह्वये। आह्वये। कीदृशीं धेनुं। सबर्दुघां पयसो दोग्ध्रीं गायत्रवेपसं प्रशस्यवेगां सुदुघां सुखेन दोग्धुं शक्यां। अन्यामुक्तविलक्षणामुरुधारां बहूदकधाराविषमेंचयंतीं वृष्टिं। एतद्रूपेण वर्तमानमरंकृतमलंकर्तारं यथोप्रकारिणं चेंद्रं चाह्वये॥

॥ इति पंचमस्य सप्तम एकादशो वर्गः॥

॥ अथैकादशी॥

यत्तुदत्सूर एतशं वंकू वातस्य पर्णिना।

वहत्कुत्समार्जुनेयं शतक्रतुस्त्सरद्गंधर्वमस्तृतं॥ ११

यत्। तुदत्। सूरः। एतशं। वंकू इति। वातस्य। पर्णिना।

वहत्। कुत्सं। आर्जुनेयं। शतऽक्रतुः। त्सरत्। गंधर्वं।

अस्तृतं॥ ११

सूरः सूर्यं एतशपेनेत्येतन्नामकं राजर्षिं यदा यदा तुदत् अव्यथयत् तदानीमेतशं रक्षितुं वंकू वक्रगामिनौ वातस्य वायोः सदृशौ पर्णिना पर्णिनौ पतनवन्तावाशीघ्रगामिनावश्वौ शतक्रतुर्बहुविधकर्मेंद्र आर्जुनेयमर्जुन्याः पुत्रं कुत्समृषिं अवहत्। अवहत्। अनयत्। कुत्सेन सार्धं समानं रथमारुह्यैतशरक्षणायागच्छदित्यर्थः। तथा च निगमांतरं। प्रैतशं सूर्ये पस्पृधानं सौवश्व्ये सुष्विमावदिंद्रः। ऋग्वे० १. ६१. १५.। इति। गंधर्वं गवां रक्षितारं सूर्यमस्तृतं केनाप्यहिंसितं त्सरत्। अत्सरत्। छद्मगत्यागच्छत्। सूर्येण योद्धुं गतवानित्यर्थः॥

॥ अथ द्वादशी॥

य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः।

संधाता संधिं मघवा पुरूवसुरिष्कर्ता विह्रुतं पुनः॥ १२

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

यः। ऋते। चित्। अभिऽश्रिषः। पुरा। जत्रुऽभ्यः।
आऽतृदः।
संऽधाता। संऽधिं। मघऽवा। पुरुऽवसुः। इष्कर्ता।
विऽह्रुतं। पुनरिति॥ १२

य इंद्रोऽभिश्रिषोऽभिश्लेषणात्संधानद्रव्यादृते चित् विनापि जत्रुभ्यो ग्रीवाभ्यः सकाशादातृद आतर्दनात् आ रुधिरनिःस्रवणात् पुरा पूर्वमेव संधिं संधातव्यं तं संधाता संयोजयिता भवति मघवा धनवान् पुरूवसुर्बहुधनः स इंद्रो विह्रुतं विश्लिष्टं तं पुनरिष्कर्ता संस्कर्ता भवति॥

॥ अथ त्रयोदशी ।

मा भूम निष्ट्या इवेंद्र त्वदरणा इव।
वनानि न प्रजहितान्यद्रिवो दुरोषासो अमन्महि॥ १३
मा। भूम। निष्ट्याःऽइव। इंद्र। त्वत्। अरणाःऽइव।
वनानि। न। प्रऽजहितानि। अद्रिऽवः। दुरोषासः।
अमन्महि॥ १३

हे इंद्र त्वत्त्वत्तः सकाशात् निष्ट्या इव। नीचैर्भूता हीना निष्ट्याः। त इव वयं मा भूम। अरणा इवारणाः दुःखिन इव वयं मा भूम। अपि च प्रजहितानि प्रक्षीणानि शाखादिभिर्वियुक्तानि वनानि न वृक्षजातानीव वयं पुत्रादिभिर्वियुक्ता मा भूम। हे अद्रिवो वज्रवन्निंद्र दुरोषास आधितुमन्येर्दुर्धर्षा वयं दुर्गेषु गृहेषु निवसंतो वा वयममन्महि। त्वां स्तुमः॥

॥ अथ चतुर्दशी ॥

अमंमहीदनाशवोऽनुग्रासश्च वृत्रहन्।
सकृत्सु ते महता शूर राधसानु स्तोमं मुदीमहि॥ १४

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

अमन्महि। इत्। अनाशवः। अनुग्रासः। च। वृत्रऽहन्।

सकृत्। सु। ते। महता। शूर। राधसा। अनु। स्तोमं।

मुदीमहि॥ १४

हे वृत्रहन् वृत्रस्यासुरस्य हंतरिंद्र अनाशवोऽशीघ्रा अत्वरमाणा अनुग्रासोऽनुग्रा अनुद्गूर्णाश्च संतो वयं भक्तिश्रद्धापुरःसरं यज्ञैस्त्वामगन्महीत्। स्तुम एव। हे शूर वीर्यवन्निंद्र ते त्वदर्थं सकृदेकवारमपि महता प्रभूतेन राधसा धनेन हविर्लक्षणेन सह सु शोभनं स्तोमं स्तोत्रमनुमुदीमहि। अनुमोदेमहि। अनुमन्यामहीत्यर्थः॥

॥ अथ पंचदशी॥

यदि स्तोमं मम श्रवदस्माकमिंद्रमिंदवः।

तिरः पवित्रं ससवांस आशवो मंदंतु तुग्र्यावृधः॥ १५

यदि। स्तोमं। मम। श्रवत्। अस्माकं। इंद्रं। इंदवः।

तिरः। पवित्रं। ससऽवांसः। आशवः। मंदंतु।

तुग्र्यऽवृधः॥ १५

अयमिंद्रो मम मदीयं स्तोत्रं यदि श्रवत् शृणुयात् तदानीं तमिंद्रमस्माकमस्मदीया इंदवः सोमा मदंतु। मादयंतु। हर्षयंतु। कीदृशाः सोमाः तिरस्तिर्यगवस्थितं पवित्रं पवनसाधनं दशापवित्रं ससवांसः प्राप्नुवंतः। दशापवित्रेण पूता इत्यर्थः। आशवः शीघ्रं मदजनकास्तुग्र्यावृधस्तुग्र्याभिः वसतीवर्येकधनाख्याभिरद्भिर्वर्धमानाः॥

॥ इति पंचमस्य सप्तमे द्वादशो वर्गः॥

॥ अथ षोडशी॥

आ त्वाद्य सधस्तुतिं वावातुः सख्युरा गहि।

उपस्तुतिर्मघोनां प्र त्वावत्वधा ते वश्मि सुष्टुतिं॥ १६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आ। तु। अद्य। सधऽस्तुतिं। ववातुः। सख्युः। आ। गहि।

उपऽस्तुतिः। मघोनां। प्र। त्वा। अवतु। अध। ते। वश्मि।

सुऽस्तुतिं॥ १६

हे इंद्र वावातुः संभक्तुः त्वां संभजमानस्य सख्युः स्तोतुः सधस्तुतिमन्यैः स्तोतृभिः सह क्रियमाणां स्तुतिमद्येदानीं तु क्षिप्रमागहि। आगच्छ। मघोनां हविष्मता-मन्येषामपि यजमानानामुपस्तुतिः स्तोत्रं त्वा त्वां प्रावतु। प्रगच्छतु। प्रतर्पयतु वा। अधाधुना सुष्टुतिं शोभनां स्तुतिमहमपि वश्मि। कामये॥

॥ अथ सप्तदशी॥

सोता हि सोममद्रिभिरेमेनमप्सु धावत।

गव्या वस्त्रेव वासयंत इन्नरो निर्धुक्षन्वक्षणाभ्यः॥ १७

सोत। हि। सोमं। अद्रिऽभिः। आ। ईं। एनं। अप्ऽसु।

धावत।

गव्या। वस्त्राऽइव। वासयंत। इत्। नरः। निः। धुक्षन्।

वक्षणाभ्यः॥ १७

हे अध्वर्यवः अद्रिभिर्ग्रावभिः सोमं सोत। अभिषुणुतैव॥ एन-मिममप्सु वसतीवरीष्वाधावत। अप्सु सोमस्य मज्जनं कुरुत। यदाध्वर्यवः हिंकारादाहुत इत्यादिभिर्मंत्रैर्वसतीवरीष्वाधवनं सोमस्य क्रियते। न तु हुतेत्यर्थः। गव्या गवि भवानि वस्त्रेव वस्त्राण्याच्छादकानि चर्माणीव तैः मेषान् वासयंत इवाच्छादयंत इत् एव नरो नेतार इंद्रस्यानुचरा ऋत्विजो वक्षणाभ्यो नदीभ्यो नदीनामवयवेभ्यः निर्धुक्षन् उदकानि निर्दुहंति। क्षारयंति। यत एवमतः कारणादिंद्रयागाय सोममद्रि-भिरभिषुणुतैव। सोदारभिमतेत्यर्थः॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथाष्टादशी ॥

अध क्ष्मो अधं वा दिवो बृहतो रोचनादधि ।
अया वर्धस्व तन्वा गिरा ममा जाता सुक्रतो पृण ॥ १८

अध । क्ष्मः । अध । वा । दिवः । बृहतः । रोचनात् । अधि ।
अया । वर्धस्व । तन्वा । गिरा । मम । आ । जाता ।
सुक्रतो इति सुऽक्रतो । पृण ॥ १८

हे इंद्र अथाधुना क्ष्मः । क्षमंति गच्छंत्यस्यामिति क्ष्मा पृथिवी । तस्याः सकाशादथ वापि वा दिवोऽंतरिक्षाद्बृहतो महतो रोचनात् नक्षत्रैर्दीप्यमानात्स्वर्गाद्वागत्य । अधिः पंचम्यर्थानुवादी । अयानया तन्वा ततया विस्तृतया मम मदीयया गिरा स्तुत्या वर्धस्व । वृद्धो भव । हे सुक्रतो शोभनकर्मन्निंद्र जाता जातानस्मदीयान् जनान् पृण । अभिमतैः फलैरापूरय ॥

॥ अथैकोनविंशी ॥

इंद्राय सु मदिन्तमं सोमं सोता वरेण्यं ।
शक्र एनं पीपयद्विश्वया धिया हिन्वानं न वाजयुं ॥ १९

इंद्राय । सु । मदिन्ऽतमं । सोमं । सोत । वरेण्यं ।
शक्रः । एनं । पीपयत् । विश्वया । धिया । हिन्वानं । न ।
वाजऽयुं ॥ १९

हे अध्वर्यव इंद्रायेंद्रार्थं मदिन्तमं मादयितृतमं वरेण्यं वरणीयं संभजनीयं सोमं सु सोत । अभिषुत । कुत इत्यत आह । शक्र इंद्रो विश्वया धिया सर्वया क्रिययाग्निष्टोमादिलक्षणया हिन्वानं प्रीणयंतं वाजयुमन्नमात्मन इच्छंतमेनं यजमानं । नेति संप्रत्यर्थीयः संप्रति पीपयत् । वर्धयति । अतः कारणाद्यूयमा इंद्राय सोमं सुनुतेत्यर्थः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ विंशी ॥

मा त्वा सोमस्य गल्दया सदा याचन्नहं गिरा।
भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशानं न याचिषत्॥ २०

मा। त्वा। सोमस्य। गल्दया। सदा। याचन्। अहं। गिरा।
भूर्णिं। मृगं। न। सवनेषु। चुक्रुधं। कः। ईशानं। न।
याचिषत्॥ २०

हे इंद्र त्वां सवनेषु यज्ञेषु सोमस्य गल्दया गालनेनास्रावणेन गिरा स्तुत्या च युक्तोऽहं सदा सर्वदा याचन् याचमानः सन् मा चुक्रुधं मा क्रोधयानि। बहुशो याच्यमाने त्वयि क्रोधो जायते तं सोमस्य गालनेन स्तुत्या चापनयानीत्यर्थः। कीदृशं त्वां। भूर्णिं भर्तारं मृगं न सिंहमिव भीमं। स्वामिन इंद्रस्य याचने लौकिकन्यायं दर्शयति। लोके को वा पुरुष ईशानमीश्वरं स्वामिनं न याचिषत्। न याचेत। सर्व एव हि याचते। अतोऽहमपि त्वां स्वामिनं याच इति भावः॥

॥ इति पंचमस्य सप्तमे त्रयोदशो वर्गः॥

॥ अथैकविंशी ॥

मदेनेषितं मदमुग्रमुग्रेण शवसा।
विश्वेषां तरुतारं मदच्युतं मदे हि ष्मा ददाति नः॥ २१

मदेन। इषितं। मदं। उग्रं। उग्रेण। शवसा।
विश्वेषां। तरुतारं। मदऽच्युतं। मदे। हि। स्म।
ददाति। नः॥ २१

मदेन मादयित्रा स्तोत्रेषितं प्रेषितं मद मदकरं सोमसुत्रमुग्रमुग्रेणोद्गूर्णेनाधिकेन शवसा बलेन युक्त इंद्रः पिबतीति शेषः। पीत्वा च विश्वेषां सर्वेषां शत्रूणां तरुतारं तरीतारं जेतारं मदच्युतं मदस्य शत्रूणां गर्वस्य च्यावयितारं पुत्रं मदे सोमपानेन जनिते हर्षे सति नोऽस्मभ्यं ददाति खलु। अतः सोमं पिबत्वित्यर्थः॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ द्वाविंशी ॥

शेवारे वार्या पुरु देवो मर्ताय दाशुषे ।

स सुन्वते च स्तुवते च रासते विश्वगूर्तो अरिष्टुतः ॥ २२

शेवारे । वार्या । पुरु । देवः । मर्ताय । दाशुषे ।

सः । सुन्वते । च । स्तुवते । च । रासते । विश्वऽगूर्तः ।

अरिऽस्तुतः ॥ २२

शेवारे । शेवं सुखं । तस्य गमके यज्ञे दाशुषे चरुपुरोडाशादीनि दत्तवते यजमानाय पुरु पुरूणि बहूनि वार्याणि वरणीयानि धनानि देवो दानादिगुणयुक्त इंद्रो रासते । ददाति । स एव सुन्वते च सोमाभिषवं कुर्वते च स्तुवते च स्तोत्रं कुर्वते च धनानि रासते । कीदृशः सः । विश्वगूर्तो विश्वेषु सर्वेषु कार्येषूद्यतः अतः प्रवृत्तोऽरिष्टुतोऽरिभिः प्रेरयितृभिः प्रस्तुतः ॥

॥ अथ त्रयोविंशी ॥

एंद्र याहि मत्स्व चित्रेण देव राधसा ।

सरो न प्रास्युदरं सपीतिभिरा सोमेभिरुरु स्फिरं ॥ २३

आ । इंद्र । याहि । मत्स्व । चित्रेण । देव । राधसा ।

सरः । न । प्रासि । उदरं । सपीतिऽभिः । आ । सोमेभिः ।

उरु । स्फिरं ॥ २३

हे इंद्र आयाहि । आगच्छ । हे देव द्योतमान चित्रेण दर्शनीयेन राधसा धनेन सोमलक्षणेन मत्स्व । माद्य । सपीतिभिर्ऋत्विग्भिः सह पीयमानैः सोमेभिः सोमैरुरु विस्तीर्णं स्फिरं प्रवृद्धमात्मीयं जठरं सरो न सर इवाप्रासि । आपूरय ॥ प्रा पूरणेऽदादिकः ॥

चातुर्विंशिकेऽहनि माध्यंदिने [illegible] आ त्वेति सैकल्पिकः स्तोत्रियस्तृचः । सूत्र्यते हि । आ त्वा सहस्रमा शतं मम त्वा सूर उदित इति ब्राह्मणाच्छंसिनः । आ० ७. ४. । इति ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तत्र प्रथमा सूक्ते चतुर्विंशी ॥

आ त्वा सहस्रमा शतं युक्ता रथे हिरण्यये।

ब्रह्मयुजो हरय इंद्र केशिनो वहंतु सोमपीतये ॥ २४

आ। त्वा। सहस्रं। आ। शतं। युक्ताः। रथे। हिरण्यये।

ब्रह्मऽयुजः। हरयः। इंद्र। केशिनः। वहंतु। सोमऽपीतये॥२४

हे इंद्र त्वा त्वां सहस्रं सहस्रसंख्याका हरयस्त्वदीया अश्वा आवहंतु। आनयंत्व-ख्यत्र। तथा शतं शतसंख्याकाश्च त्वदीया अश्वास्त्वामावहंतु। यद्यपि द्वावेवास्य हरी तथापि तद्विभूतयोऽन्येऽपि बहवोऽश्वाः संति। ननु युगपदनेकैरश्वैः कथं यातुं शक्यत इत्यत आह युक्ता इति। हिरण्यये स्वर्णविकारे॥ हिरण्यशब्दाद्विकारार्थे विहितस्य मयट प्रत्ययस्य ऋत्व्यवास्त्व्येत्यादौ मलोपो निपात्यते॥ तादृशे रथे युक्ताः संबद्धाः। संबद्धाः। बहूनामश्वानां शीघ्रगमनाय रथे नियुक्तत्वाद्युगपदेव सर्वै रथैर्गंतुं शक्यत इति भावः। कीदृशा हरयः। ब्रह्मयुजो ब्रह्मणा परिवृढेनेंद्रेण युक्ताः। यद्वा ब्रह्मणास्मदीयेन स्तोत्रेणास्माभिर्दत्तेन हविषा वा युक्ताः केशिनः। केशाः केसराः। तैर्युक्ताः। किमर्थमिंद्रस्य वहनं तदाह। सोमपीतये सोमस्य पानाय। यथास्मदीयं सोमं पिबेत्तथा आवहंत्वित्यर्थः॥

॥ अथ पंचविंशी ॥

आ त्वा रथे हिरण्यये हरी मयूरशेप्या।

शितिपृष्ठा वहतां मध्वो अंधसो विवक्षणस्य पीतये ॥ २५

आ। त्वा। रथे। हिरण्यये। हरी इति। मयूरऽशेप्या।

शितिऽपृष्ठा। वहतां। मध्वः। अंधसः। विवक्षणस्य।

पीतये ॥ २५

पूर्वं हर्योर्विभूतिरूपा अश्वा इंद्रमावहंत्विति प्रार्थितं। अधुना तावेवेंद्रमावह-तामिति प्रार्थ्यते। हिरण्यये हिरण्मये रथे युक्तौ मयूरशेप्या मयूरशेपौ। मयूर-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पर्यंशेपो यथोक्तौ ॥ सुपां सुलुगिति विभक्तेर्डादेशः ॥ निनिष्टक्षा चेनष्टौ । एवंभूतावश्वौ हे इंद्र त्वामावहतां । किम॑ । अस्य अध्वरस्य हिंसारहितस्य यज्ञस्य अभिषुतस्य । यद्वा बोद्धव्यस्य प्राप्तव्यस्यांधसोऽन्नस्य सोमरूपस्य पीतये पानार्थं ॥

॥ इति पंचमस्य सप्तमे चतुर्दशो वर्गः ॥

॥ अथ षड्विंशी ॥

पिबा त्व१स्य गिर्वणः सुतस्य पूर्वपा इव ।
परिष्कृतस्य रसिन इयमासुतिश्चारुर्मदाय पत्यते ॥ २६

पिब । तु । अस्य । गिर्वणः । सुतस्य । पूर्वपाःऽइव ।
परिऽकृतस्य । रसिनः । इयं । आऽसुतिः । चारुः । मदाय । पत्यते ॥ २६

हे गिर्वणो गीर्भिर्वननीय स्तुतिभिः संभजनीयेंद्र सुतस्याभिषुतस्यास्य सोमस्य ॥ क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी ॥ इममभिषुतं सोमं तु क्षिप्रं पिब । तत्र दृष्टांतः । पूर्वपा इव । पूर्वः सर्वेभ्यो देवेभ्यो देवेभ्यः प्रथमभावी सन् पिबतीति पूर्वपा वायुः । स यथेंद्रवायवे ग्रहे यागे सर्वेभ्यो देवेभ्यः पूर्वं पिबेत्यर्थः । कीदृशस्य सोमस्य । परिष्कृतस्याभिषवादिभिः संस्कृतस्य ॥ संपर्युपेभ्य इति करोतेर्भूषणे सुट् । परिनिविभ्य इति सुटः षत्वं ॥ रसिनो रसवतः । अपि चेयमासुतिरयमासवो मदकरश्चारुः शोभनः सोमरसो मदाय हर्षाय हर्षजननाय पत्यते संपद्यते ॥ पत्लृ गतौ ॥ यद्वा पत्यतिरैश्वर्यकर्मा ॥ मदाय मदं पत्यते । ईष्टे । मदोत्पादने समर्थ इत्यर्थः ॥

॥ अथ सप्तविंशी ॥

य एको अस्ति दंसना महाँ उग्रो अभि व्रतैः ।
गमत्स शिप्री न स योषदा गमद्धवं न परि वर्जति ॥ २७

यः । एकः । अस्ति । दंसना । महान् । उग्रः । अभि । व्रतैः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

गमंत्। सः। शिप्री। न। सः। योषत्। आ। गमत्।

हवं। न। परि। वर्जति॥ २७

य इंद्र एकः केवलोऽसहाय एव व्रतैरात्मीयैः कर्मभिरभ्यस्ति गच्छन्नभिभवति। अथ दंसना कर्मणा महानधिकोऽस्ति एवोग्र उद्गूर्णबलः शिप्री। शिप्रं शिरस्त्राणं॥ प्रशंसायामिनिः॥ शोभनशिरस्त्राणः। यद्वा शिप्रे हनू नासिके वा। तद्वान् स इंद्रो गमत्। गच्छतु। प्राप्नोतु सर्वदा। स नाहमो न योषत्। न पृथग्भवतु। न वियुक्तो भवतु॥ गमेर्लेटि लेट्यडागमः। इतश्चलोप इतोकारलोपः। गमेर्बहुलं छंदसीति शपो लुक्। यौतेः सिब्बहुलमिति सिप्॥ अस्मदीयं स्तोत्रं चागमत्। अभिगच्छतु। प्राप्नोतु। न परिवर्जति। न परिवर्जयतु। न परित्यजतु। सर्वदाऽस्मदीयं स्तोत्रं चेंद्रः प्राप्नोत्विति यावत्॥

॥ अथाष्टाविंशी॥

त्वं पुरं चरिष्ण्वं वधैः शुष्णस्य सं पिणक्।

त्वं भा अनु चरो अध द्विता यदिंद्र हव्यो भुवः॥ २८

त्वं। पुरं। चरिष्ण्वं। वधैः। शुष्णस्य। सं। पिणक्।

त्वं। भाः। अनु। चरः। अध। द्विता। यत्। इंद्र।

हव्यः। भुवः॥ २८

हे इंद्र त्वं शुष्णस्य शोषकस्यासुरस्य चरिष्णुं चरणशीलं॥ वा छंदसीत्यमि पूर्वत्वस्य विकल्पितत्वाद्यणादेशः॥ पुरं निवासस्थानं वधैर्वज्रादिभिरायुधैः सं पिणक्। समचूर्णयः। अभांक्षीरित्यर्थः॥ पिनष्टेर्लङि मध्यमैकवचने रूपमेतत्॥ अधापि च भा भासमानस्त्वमनुचरः। तं शुष्णं हंतुमन्वगच्छः। यद्वाऽध शुष्णस्य पुरभेदननानंतरं भा दीप्तीस्त्वमनु चरः। अन्वगच्छः। प्राप्नवानित्यर्थः। हे इंद्र त्वं यस्मात् द्विता द्विधा द्विविधैः स्तोतृभिरृत्विग्भिश्च हव्यो ह्वातव्यो भुवः भवेः तदानीं त्वं शुष्णस्य पुरं सं पिणगित्यन्वयः॥ भवतेर्लेटि सिब्बहुलमित्याडागमः। छांदसः शपो लुक्। भूसुवोस्तिङीति गुणप्रतिषेधादुवङ्॥

माध्यंदिनसवने ब्रह्मयज्ञ एव स्तोत्रं ... पुरंदरा ...

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तत्र प्रथमा सूक्तैकोनत्रिंशी ॥

ममं त्वा सूर उदिते ममं मध्यंदिने दिवः ।
ममं प्रपित्वे अंपिशर्वरे वसवा स्तोमांसो अवृत्सत ॥ २९

ममं । त्वा । सूरें । उत्ऽइंते । ममं । मध्यंदिने । दिवः ।
ममं । प्रऽपित्वे । अपिऽशर्वरे । वसो इतिं । आ । स्तोमासः ।
अवृत्सत ॥ २९

सूरे सूर्ये उदिते उदयं प्राप्ते पूर्वाह्णसमये मम स्तोमासः स्तोत्राणि हे वसो वासकेंद्र त्वामावृत्सत । आवर्तयंतु । अस्मदभिमुखं गमयंतु । तथा दिवो दिवसस्य मध्यंदिने मध्याह्नेऽपि मदीया स्तोमास्त्वामावर्तयंतु । तथा प्रपित्वे प्राप्ते दिवसस्यावसाने सायाह्नेऽपि मदीयाः स्तोमास्त्वामावर्तयंतु । अपिशर्वरे । शर्वरी रात्रिरुपलक्षितः कालोऽपिशर्वरः । शार्वरे कालेऽपि मदीयाः स्तोमास्त्वामावर्तयंतु ॥

॥ अथ त्रिंशी ॥

स्तुहि स्तुहीदेते घां ते मंहिंष्ठासो मघोनां ।
निंदिताश्वः प्रपथी परमज्या मघस्यं मेध्यातिथे ॥ ३०

स्तुहि । स्तुहि । इत् । एते । घ । ते । मंहिंष्ठासः । मघोनां ।
निंदितऽअंश्वः । प्रऽपथी । परमऽज्याः । मघस्यं ।
मेध्यऽअतिथे ॥ ३०

आसंगो राजर्षिर्मेध्यातिथये बहु धनं दत्वा तमृषिं दत्तदानस्य स्वस्य स्तुतौ प्रेरयति । हे मेध्यातिथे यतः कारणात् एतादृशं प्रदं स्तुहि स्तुहीत् । पुनः पुनरस्मान् प्रशंसैव । नोदास्व । औदासीन्यं मा कार्षीः । एते च एते खलु वयं मघोनां धनवतां मध्ये ते तुभ्यं बहुस्य धनस्य मंहिष्ठासो दातृतमाः । अतोऽस्मान् स्तुहीत्यर्थः । काऽसौ स्तुतिः तामाह । निंदिताश्वः । यस्य रोषेण परेषामश्वा निंदिताः कुत्सिता भवंति

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तादृशः । प्रपथो । प्रसृष्टाः पंथाः प्रपथः । सद्वान् सन् । नार्गंधर्मीत्यर्थः । परमज्या उत्कृष्टज्यः । अनेन धनुरादिकं लक्ष्यते । उत्कृष्टायुधयुक्त इत्यर्थः । यद्वा परमानुत्कृष्टाञ्छत्रूञ्जिनाति हिनस्तीति परमज्याः ॥ ज्या वयोहानौ । पचादावजि ... षिच् ॥ एवंभूतोऽहमासंग इति स्तुहीत्यर्थः ॥

॥ इति पंचमस्य सप्तमे पंचदशो वर्गः ॥

॥ अथैकत्रिंशी ॥

आ यदश्वान्वनन्वतः श्रद्धयाहं रथे रुहं ।

उत वामस्य वसुनश्चिकेतति यो अस्ति याद्वः पशुः ॥ ३१

आ । यत् । अश्वान् । वनन्ऽवतः । श्रद्धया । अहं । रथे । रुहं ।

उत । वामस्य । वसुनः । चिकेतति । यः । अस्ति । याद्वः । पशुः ॥ ३१

वनन्वतो वननवतः संभजनवतोऽश्वांस्तुरगानहं प्रायोगिः श्रद्धयादरातिशयेन युक्तः सन् यद्यदा हे मेध्यातिथे त्वदीये रथ आरुहं आरोहयं ॥ रुहेर्लुङि ... इति च्लेरङादेशः ॥ तदानीं मामेवं स्तुहि । उतापि च । प्रसन्नस्तुत्यपेक्ष एष आसंगः । वामस्य वननीयस्य वसुनो धनस्य ॥ पूर्ववत्कर्मणि षष्ठी । ईदृशं धनं चिकेतति । एष आसंगो दातुं जानाति । याद्वो यदुवंशजः । यद्वा यदवो मनुष्याः । तेषु प्रसिद्धः पशुः ॥ लुप्तमत्वर्थमेतत् ॥ पशुमान् । यद्वा पशुः प्रष्टतः । ... द्रष्टा य आसंगोऽस्ति विद्वान् एव चिकेततीत्यन्वयः ॥

॥ अथ द्वात्रिंशी ॥

य ऋज्रा मह्यं मामहे सह त्वचा हिरण्यया ।

एष विश्वान्यभ्यस्तु सौभगासंगस्य स्वनद्रथः ॥ ३२

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यः । ऋज्रा । मह्यं । ममहे । सह । त्वचा । हिरण्ययां ।

एषः । विश्वानि । अभि । अस्तु । सौभंगा । आऽसंगस्यं ।

स्वनत्ऽरंथः ॥ ३२

एवमेवं मां स्तुहीत्यासंगो मेध्यातिथिं ब्रूते । य आसंगस्यात्मा ऋज्रा गमनशीलानि धनानि हिरण्यया हिरण्मय्या त्वचा चर्मणाच्छादनेन सह संचितानि मह्यं मेध्यातिथये ममहे ददौ ॥ मंहतिर्दानकर्मा ॥ एष आसंगस्यात्मा स्वनद्रथः शब्दायमानरथः सन् विश्वानि व्याप्तानि सौभगानि धनानि शत्रूणां स्वभूतान्यभ्यस्तु । अभिभवतु ॥

॥ अथ त्रयस्त्रिंशी ॥

अध प्लायोगिरति दासदन्यानासंगो अग्ने दशभिः सहस्रैः ।

अधोक्षणो दश मह्यं रुशंतो नळा इव सरसो निरतिष्ठन् ॥ ३३

अधं । प्लायोगिः । अति । दासत् । अन्यान् । आऽसंगः ।

अग्ने । दशऽभिः । सहस्रैः ।

अधं । उक्षणः । दश । मह्यं । रुशंतः । नळाःऽइव । सरसः ।

निः । अतिष्ठन् ॥ ३३

अथापि च प्लायोगिः प्रयोगनाम्नः पुत्र आसंगो नाम राजा दशभिर्दशगुणितैः सहस्रैः सहस्रसंख्याकैर्गवादिभिरन्यान्दातॄनतिदासत् । अतिक्रम्य ददाति । अथानंतरमुक्षणः सेचनसमर्था मह्यमासंगेन दत्ता रुशंतो दीप्यमाना दश दशगुणितसहस्रसंख्याकास्ते गवादयो नळा इव । नळाः कटाकरणार्हास्तृणविशेषाः । ते यथा सरसस्तटाकात्संघशो निर्गच्छंति तथैव मह्यं दत्ता गवादयोऽस्मादासंगान्निरतिष्ठन् । निर्गत्यास्मास्वस्थिषत । एवमेवंप्रकारेण मां स्तुहीति मेध्यातिथिं प्रत्युक्तानेनाशी पत्न्यास्तस्यां प्रायोगिरासंग ऋषिः स एव देवतेत्येतदुपपन्नं भवति ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ चतुस्त्रिंशी ॥

अन्वस्य स्थूरं ददृशे पुरस्तादनस्थ ऊरुरवरंबमाणः ।
शश्वती नार्यभिचक्ष्याह सुभद्रमर्य भोजनं बिभर्षि ॥ ३४

अनु । अस्य । स्थूरं । ददृशे । पुरस्तात् । अनस्थः । ऊरुः ।
अवऽरंबमाणः ।
शश्वती । नारी । अभिऽचक्ष्य । आह । सुऽभद्रं । अर्य ।
भोजनं । बिभर्षि ॥ २४

आसंगो राजा कदाचिद्देवशापेन नपुंसको बभूव । तस्य पत्नी शश्वती भर्तुर्नपुंसकत्वेन खिन्ना सती महत्तपस्तेपे । तेन च तपसा स च पुंस्त्वं प्राप । प्राप्तपुंव्यंजनं तं रात्रावुपलभ्य प्रीता शश्वत्यनया तमस्तौत् ॥ अस्यासंगस्य पुरस्तात्पूर्वभागे गुह्यदेशे स्थूरं स्थूलं वृद्धं सत्पुंव्यंजनमनुददृशे । अनुदृश्यते । अनस्थोऽस्थिरहितस्स चायवश्च जहद्वहर्विस्तीर्णोऽवरंबमाणोऽभिदोधूयमानो लंबमानः ॥ यद्वोरुः सुपां सुलुगिति द्विवचनस्य सुः ॥ ऊरू प्रलंबमानो भवति । शश्वती नामांगिरसः सुता नारी तस्यासंगस्य भार्याभिचक्ष्य पुंभूतमवयवं निशि दृष्ट्वा हे अर्य स्वामिन् भर्तः सुभद्रमतिशयेन कल्याणं भोजनं भोगसाधनं बिभर्षि धारयसीत्याह । ब्रूते ॥

॥ इति पंचमस्य सप्तमे षोडशो वर्गः ॥

इदं वसो इति द्विचत्वारिंशदृचं द्वितीयं सूक्तं काण्वस्य मेधातिथेरांगिरसस्य च प्रियमेधस्यार्षं । शिक्षा विभिंदो इत्यादिके द्वे मेधातिथेरेव । स्वादवः सोमा इत्येषानुष्टुप् शिष्टा गायत्र्यः । इंद्रो देवता । अंत्ये द्वे ऋचौ विभिंदोर्दानस्तुतित्वात्तद्देवताके । तथा चानुक्रांतं । इदं वसो द्विचत्वारिंशन्मेधातिथिरांगिरसश्च प्रियमेधः स्वादवोऽनुष्टुबंत्याभ्यां मेधातिथिर्विभिंदोर्दानं तुष्टावेति ॥ गतः सूक्तविनियोगः ॥ ज्योतिष्टोमे मरुत्वतीय आद्यस्तृचोऽनुचरः । सूत्रितं हि । इदं वसो सुतमंध इति मरुत्वतीयस्य प्रतिपदनुचरौ । आ० ५. १४. । इति ॥ द्वितीये रात्रिपर्याये ब्राह्मणाच्छंसिन एष स्तोत्रियस्तृचः । सूत्रितं च । इदं वसो सुतमंध इंद्रेहि मत्स्यंधसः । आ० ६. ४. । इति ॥ पृष्ठ्ये चतुर्थेऽहन्यपि मरुत्वतीयस्यानुचरस्तृचः । सूत्रितं च । तं त्वा यज्ञेभिरीमह इदं वसो सुतमंध इति मरुत्वतीयस्य प्रतिपदनुचरौ । आ० ७. ११. । इति ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तत्र प्रथमा ॥

इदं वसो सुतमंधः पिबा सुपूर्णमुदरं ।

अनाभयिन्ररिमा ते ॥ १

इदं । वसो इति । सुतं । अंधः । पिब । सुऽपूर्णं । उदरं ।

अनाभयिन् । ररिम । ते ॥ १

हे वसो वासयितरिंद्र इदं पुरो वर्तमानं सुतमभिषुतमंधोऽन्नं सोमलक्षणं पिब । यथोदरं त्वदीयं जठरं सुपूर्णमतिशयेन सुपूर्णं भवति तथेत्यर्थः । हे अनाभयिन् । आ समंताद्बिभेतीत्याभयी ॥ बिभेतेरौणादिक इनिः ॥ नाभय्यनाभयी । तादृश हे इंद्र ते तुभ्यं त्वदर्थं ररिम । अन्नलक्षणं सोमं दद्मः ॥ रा दाने । छांदसो लिट् ॥

॥ अथ द्वितीया ॥

नृभिर्धूतः सुतो अश्नैरव्यो वारैः परिपूतः ।

अश्वो न निक्तो नदीषु ॥ २

नृऽभिः । धूतः । सुतः । अश्नैः । अव्यः । वारैः । परिऽपूतः ।

अश्वः । न । निक्तः । नदीषु ॥ २

नृभिरध्वर्य्वादिभिर्नेतृभिर्धूतः आधूतोऽद्राव्यग्रथ आभवनेन संस्कृतोऽश्नै-रश्मभिर्ग्रावभिः करणभूतैः सुतोऽभिषुतः । अविभिरभिषुतोऽव्योऽवेर्मेषस्य वारैर्वालैः परि-पूतः । दशापवित्रस्य नाभिं कुर्वते शुक्रं पवस्व? पवित्रमतीत्य भवतीति । नदीषु नदनशीलास्वप्स्वश्वो न अश्व इव निक्तो निर्णिक्तः शोधितः । यथाश्वः स्नातोऽत्योप-गतमलः सन् दीप्तो भवत्येवं वसतीवरीभिरद्भिरभिषुतः सोमो दीप्तो भवतीत्यर्थः । ईदृशो यः सोमस्तं ते यवमित्युत्तरया संबंधः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ तृतीया ॥

तं ते॒ यवं॒ यथा॒ गोभिः॑ स्वा॒दुम॑कर्म श्री॒णन्तः॑ ।
इन्द्र॑ त्वा॒स्मिन्त्स॑ध॒मादे॑ ॥ ३

तं । ते॒ । यव॑म् । यथा॑ । गोभिः॑ । स्वा॒दुम् । अ॒क॒र्म॒ । श्री॒णन्तः॑ ।
इन्द्र॑ । त्वा॒ । अ॒स्मिन् । स॒ध॒ऽमादे॑ ॥ ३

तं पूर्वोक्तगुणं सोमं हे इंद्र ते त्वदर्थं यवं यथा यवमयं सवनीयपुरोडाशमिव गोभिर्गोविकारैः क्षीरादिभिः श्रयणद्रव्यैः श्रीणंतो मिश्रीकुर्वंतः स्वादुं रसेन स्वादनीयमकर्म। अकार्ष्म ॥ करोतेर्लुङि मंत्रे घसेति च्लेर्लुक् ॥ यस्मादेवं तस्मात् हे इंद्र त्वा त्वां तादृशं सोमं पातुमस्मिन्समाने सधमादे सहमदने यज्ञ आह्वयामीति शेषः ॥

महाव्रते निष्केवल्ये गायत्रतृचाशीताविंद्र इत्सोमपा इत्येतदादितृचशेषः शंसनीयः अंत्यास्तिस्रो वर्जयित्वा तत्रापि स्वादव इत्येतां परित्यज्य तत्र स्थाने न ह्य१न्यं बळाकरमित्येतामावपेत्। तथैव पंचमारण्यके सूत्रितं। इंद्र इत्सोमपा एक इत्येतस्याशीतीनां तिस्र उत्तमा उद्धरति। तासां स्वादवः सोमा आ याहीत्येतामुद्धृत्य न ह्य१न्यं बळाकरमित्येतां प्रत्यवदधाति। ऐ० आ० ५. ६. । इति ॥ पंचमेऽहनि मरुत्वतीय इंद्र इदित्यनुचरस्तृचः। सूत्र्यते हि। इंद्र इत्सोमपा एक इति मरुत्वतीयस्य प्रतिपदनुचरौ। आ० ७. १२. । इति॥

॥ तत्र प्रथमा सूक्ते चतुर्थी ॥

इन्द्र॑ इ॒त्सो॑म॒पा एक॒ इन्द्रः॑ सुत॒पा वि॒श्वायुः॑ ।
अ॒न्तर्दे॒वान्मर्त्यां॑श्च ॥ ४

इन्द्रः॑ । इत् । सो॒म॒ऽपाः । एकः॑ । इन्द्रः॑ । सु॒त॒ऽपाः ।
वि॒श्वऽआ॑युः ।
अ॒न्तः । दे॒वान् । मर्त्या॑न् । च॒ ॥ ४

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इंद्र इदिंद्र एव एवं देवान् मर्त्यान् मनुष्यांश्चांतरेण देवेषु च मध्ये सोमपाः सुतस्य सोमस्य पाता। नान्ये। ते इंद्रेण देवभाजः। अत एव सुमखाः सुतस्याभिषुतस्यास्मदीयस्य सोमस्य कार्त्स्न्येन पाता। इंद्र एक एव विश्वायुः। स चेंद्रः सर्वांगो भवति। धानाकरंभादिहवींषि सवनेष्विंद्रायैव क्रियंते तदभिप्रायेणेदमुच्यते। अत एवंविध इंद्रोऽस्मदीयं हविः स्वीकरोत्वित्यर्थः॥

॥ अथ पंचमी ॥

न यं शुक्रो न दुराशीर्न तृप्रा उरुव्यचसं।

अपस्पृण्वते सुहार्दं ॥ ५

न। यं। शुक्रः। न। दुःऽआशीः। न। तृप्राः। उरुऽव्यचसं।

अपऽस्पृण्वते। सुऽहार्दं ॥ ५

उरुव्यचसं विस्तीर्णव्यापनं सुहार्दं शोभनहृदयं यमिंद्रं शुक्रो रसाधिक्येन दीप्तः सोमो नापस्पृणुते॥ स्पृ प्रीतिपालनयोः। अत्रोपसर्गवशात् प्रीत्यभावे वर्तते॥ तस्मा च प्रीत्यभावो निवार्यते। न प्रीणयतीति न अपि तु प्रीणयत्येव। तथा दुराशीर्दुःखेन निष्पाद्याशीराश्रयणद्रव्यं यस्य तादृशोऽयमनिष्पन्नः सोमः सोऽपि यमिंद्रं नापस्पृणुते प्रीणयत्येव। तृप्रास्तर्पका अन्ये पुरोडाशादयश्च यमिंद्रं नापस्पृण्वते न न प्रीणयंति अपि तु प्रीणयंत्येव तमिंद्रं स्तुत इति शेषः। यद्वा अपेत्युपसर्गो धात्वर्थानुवादकः। त्वमिंद्रं शुक्रादयो नापस्पृण्वते न प्रीणयंति। उरुव्यचसमिति हेतुगर्भं विशेषणं। यतोऽयमिंद्र उरुव्यचा विस्तीर्णव्याप्तिकोऽतः कारणादपर्याप्ताः संतः शुक्रादयः प्रीणयितुं न शक्नुवंतीति भावः॥

॥ इति पंचमस्य सप्तमे सप्तदशो वर्गः ॥

॥ अथ षष्ठी ॥

गोभिर्यदीमन्ये अस्मन्मृगं न व्रा मृगयंते।

अभित्सरंति धेनुभिः ॥ ६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

गोभिः। यत्। ईं। अन्ये। अस्मत्। मृगं। न। व्राः।

मृगयंते।

अभिऽत्सरंति। धेनुऽभिः॥ ६

यद् येऽस्मदस्मत्तोऽन्य ऋत्विग्यजमाना ईमेनमिंद्रं गोभिर्गव्यैः क्षीरादिभिः संस्कृतैः सोमैः संगमयितुं मृगयंते अन्विष्यंति। तत्र दृष्टांतः। व्राः वरीतारो जालादिभिरावरितारो व्याधा मृगं न। यथा मृगमन्विष्यंति तद्वदनधिकारिण एव यजमाना इंद्रस्यान्वेषणे यतंत इत्यर्थः॥ मृग अन्वेषण इति धातुः॥ ये च जना धेनुभिः। धेनुरिति वाङ्नाम। वाग्भिः स्तुतिभिरभित्सरंति अभिमुखं कुटिलं गच्छंति। सम्यक् स्तोतुं न शक्नुवंतीत्यर्थः॥ त्सर छद्मगतौ॥ तथाविधा जना इंद्रं नोपलभंत इत्यर्थः॥

दशरात्रे तृतीयेऽहनि मरुत्वतीयस्य त्रय इंद्रस्येति तृचोऽनुचरः। सूत्रितं च। तं तमिद्राधसे महे त्रय इंद्रस्य सोमा इति मरुत्वतीयस्य प्रतिपदनुचरौ। आश्व० ७. १०.। इति॥

॥ तृचे प्रथमा सूक्ते सप्तमी॥

त्रय इंद्रस्य सोमाः सुतासः संतु देवस्य।

स्वे क्षये सुतपाव्नः॥ ७

त्रयः। इंद्रस्य। सोमाः। सुतासः। संतु। देवस्य।

स्वे। क्षये। सुतऽपाव्नः॥ ७

देवस्य दानादिगुणयुक्तस्येंद्रस्य पानार्थं त्रयः सवनत्रयरूपेण त्रिधा वर्तमानाः स्वे क्षये स्वकीये यज्ञगृहे सुतासोऽभिषुताः संतु। भवंतु। सुतपाव्नः। वेदगर्भ-विशेषणमेतत्। यस्मादयमिंद्रोऽभिषुतस्यैव सोमस्य पाता तस्मादभिषुताः संत्वित्यर्थः॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथाष्टमी ॥

त्रयः कोशासः श्चोतन्ति तिस्रश्चम्वः सुपूर्णाः।

समाने अधि भार्मन्।

त्रयः। कोशासः। श्चोतन्ति। तिस्रः। चम्वः। सुऽपूर्णाः।

समाने। अधि। भार्मन्॥ ८

त्रयस्त्रिसंख्याकाः कोशासः कोशाः सोमस्याश्रयभूता द्रोणकलशपूतभृदाधवनीयाख्याः श्चोतन्ति। क्षरन्ति। इंद्रार्थं सोमं स्रावयन्ति। तिस्रस्त्रिविधाः सवनत्रये वर्तमानाश्चम्वश्चमसाश्च सुपूर्णा इंद्रयागाय सोमैः सुपूरिता आसन्। एतत्सर्वं कुत्रेति चेत् उच्यते। समाने एकस्मिन्नेव भार्मन् भर्मणि भरणे ऋत्विग्भिः क्रियमाणे यज्ञे। अधि सप्तम्यर्थानुवादी॥

॥ अथ नवमी ॥

शुचिरसि पुरुनिष्ठाः क्षीरैर्मध्यत आशीर्तः।

दध्ना मंदिष्ठः शूरस्य॥ ९

शुचिः। असि। पुरुनिःऽस्थाः। क्षीरैः। मध्यतः। आऽशीर्तः।

दध्ना। मंदिष्ठः। शूरस्य॥ ९

हे सोम त्वं शुचिरसि। दशापवित्रेण शोधितो भवसि। स त्वं पुरुनिष्ठाः पुरुषु बहुषु पात्रेषु चमसचमसादिषु निःशेषेण स्थाता मध्यतो मध्ये [illegible] क्षीरैः पयःप्रभृतिभिः [illegible] मिश्रणेन संस्कृतश्चासि। तृतीये सवने दध्ना आशीर्तः। एवंभूतस्त्वं शूरस्य विक्रान्तस्येंद्रस्य मंदिष्ठो मादयितृतमो भव॥

॥ अथ दशमी ॥

इमे त इंद्र सोमास्तीव्रा अस्मे सुतासः।

शुक्रा आशिरं याचंते॥ १०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

इमे। ते। इंद्र। सोमाः। तीव्राः। अस्मे इति। सुतासः।

शुक्राः। आऽशिरं। याचंते॥ १०

हे इंद्र ते त्वदीया इमे सोमास्तीव्रास्तीव्रमदा अस्मे अस्माभिरध्वर्युभिः सुताः अभिषुताः शुक्राः शुभ्राः संत आशिरं क्षीरादिकं श्रयणद्रव्यं त्वां याचंते। तान् श्रीणीहीत्युत्तरत्रान्वयः॥

॥ इति पंचमस्य सप्तमेऽष्टादशो वर्गः॥

॥ अथैकादशी॥

ताँ आशिरं पुरोळाशमिंद्रेमं सोमं श्रीणीहि।

रेवंतं हि त्वा शृणोमि॥ ११

तान्। आऽशिरं। पुरोळाशं। इंद्र। इमं। सोमं।
श्रीणीहि।

रेवंतं। हि। त्वा। शृणोमि॥ ११

हे इंद्र तान् पूर्वोक्तान् सोमानाशिरं श्रयणद्रव्येण क्षीरादिना श्रीणीहि। मिश्रय यागार्थं। तदनंतरं पुरोळाशं धानाकरंभादिलक्षणं सवनीयपुरोडाशमिमं मदीयं सोमं च श्रीणीहि। मिश्रय। प्रथमं भक्षितं पुरोळाशं पश्चात्पीतेन सोमेन संयोजयेत्यर्थः। मम प्रार्थने को हेतुरिति चेत्। हि यस्माद्रेवंतं रयिमंतं॥ रयेर्मतौ बहुलमिति संप्रसारणं॥ बहुधनं त्वां शृणोमि त्वं बहुधन इति सर्वत्र श्रूयसे अतः कारणात् त्वामेव प्रार्थयामहे॥

॥ अथ द्वादशी॥

हृत्सु पीतासो युध्यंते दुर्मदासो न सुरायां।

ऊधर्न नग्ना जरंते॥ १२

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हृत्ऽसु। पीतासः। युध्यंते। दुःऽमदासः। न। सुरायां।

ऊधः। न। नग्नाः। जरंते॥ १२

हे इंद्र पीतासस्त्वया पीताः सोमा हृत्सु हृदयेषु त्वदीयेषु युध्यंते। परस्परं संप्रहारं कुर्वते। तत्र दृष्टांतः। सुरायां पीतायां जायमाना दुर्मदासो न दुष्टमदा यथा पातारं मादयंति मत्तुं मादयितुं परस्परं युध्यंत इत्यर्थः। अपि च नग्नाः। छंदांसि तानि न जहतीति नग्नाः स्तोतारः। ते ऊधर्न पयसा पूर्णं गवादेरूध इव सोमपूर्णं त्वां जरंते। स्तुवंति॥ जरतिः स्तुतिकर्मा॥

षष्ठेऽहनि यदि रैवतसामसाध्यं पृष्ठस्तोत्रं तदा निष्केवल्ये रेवाँ इदित्यनुरूपस्तृचः। सूत्र्यते हि। "रैवतीनः सधमादे रेवाँ इद्रेवतः स्तोतेति स्तोत्रियानुरूपौ। आ० ८. १.। इति॥

॥ तृचे प्रथमा सूक्ते त्रयोदशी॥

रेवाँ इद्रेवतः स्तोता स्यात्त्वावतो मघोनः।

प्रेदु हरिवः श्रुतस्य॥ १३

रेवान्। इत्। रेवतः। स्तोता। स्यात्। त्वाऽवतः। मघोनः।

प्र। इत्। ऊं इति। हरिऽवः। श्रुतस्य॥ १३

हे हरिवो हरिवन्॥ मतुवसो रुरिति नकारस्य रुत्वं॥ हरी अश्वौ। तद्वन्निंद्र रेवतो रयिमतो बहुधनोपेतस्य तव स्तोता रेवान् स्यात्। रयिमान् भवेत्। इच्छब्दोऽवधारणे। धनवान् भवेदेव न तु दारिद्र्यं प्राप्नोति। उक्तमेवार्थं कैमुतिकन्यायेन द्रढयति। त्वावतस्त्वत्सदृशस्य॥ युष्मदस्मदोः छंदसि सादृश्य उपसंख्यानमिति वतुप्॥ मघोनो मघवतो धनाढ्यस्य श्रुतस्य विश्रुतस्य सर्वत्र प्रख्यातस्यान्यस्यापि स्तोता प्रेदु स्यादित्यनुषज्यते। प्रस्यात्। प्रभवेदेव न तु निहीयते। किमु वक्तव्यं तव स्तोता धनवान् भवेदेवेति॥

॥ अथ चतुर्दशी॥

उक्थं चन शस्यमानमगोररिरा चिकेत।

न गायत्रं गीयमानं॥ १४

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उक्थं। चन। शस्यमानं। अगोः। अरिः। आ। चिकेत।

न। गायत्रं। गीयमानं॥ १४

गायतेर्गीः। अगोरस्तोतुररिः शत्रुरिंद्रः शस्यमानं होत्रा पठ्यमानमुक्थं चन शस्त्रमप्या चिकेत। आभिजानाति॥ कित ज्ञाने। छांदसो लिट्॥ नेति संप्रत्यर्थे। न संप्रति प्रस्तोत्रादिभिर्गीयमानं गायत्रं गातव्यं साम यद्वा गायत्राख्यमपि चिकेते-त्येव। अतः कारणाद्वयमपि तमिंद्रं स्तुम इत्यर्थः॥

॥ अथ पंचदशी॥

मा नं इंद्र पीयत्नवे मा शर्धते परा दाः।

शिक्षा शचीवः शचीभिः॥ १५

मा। नः। इंद्र। पीयत्नवे। मा। शर्धते। परा। दाः।

शिक्ष। शचीऽवः। शचीभिः॥ १५

हे इंद्र त्वं पीयत्नवे॥ पीयतिर्वधकर्मा॥ वधशीलाय हिंसाकारिणे शत्रवे नोऽस्मान्मा परादाः। मा परित्याक्षीः। मा च शर्धतेऽभिभवित्रेऽस्मान्मा परादाः॥ दद प्रयच्छन इति धातुः॥ अपि तु हे शचीवः शक्तिमन्निंद्र शचीभिरात्मीयैः कर्मभिः शिक्ष। अस्माननुशाधि। यद्वा शिक्षतिर्दानकर्मा। अभीष्टं धनमस्मभ्यं देहि। यद्वा शत्रून् जेतुं शिक्ष। शक्तान् कर्तुमिच्छ॥ शक्तेः सनंतस्य सनि मीमेती-त्यादिनाऽभ्यासलोपे च सति लोटि रूपमेतत्॥

॥ इति पंचमस्य सप्तम एकोनविंशो वर्गः॥

प्रथमे रात्रिपर्याये ब्राह्मणाच्छंसिनः वयमु त्वेति स्तोत्रियस्तृचः। सूत्रितं च। वयमु त्वा तदिदर्था वयमिंद्र त्वायवोऽभि। आ० ६. ४.। इति॥

॥ तत्र प्रथमा सूक्ते षोडशी॥

वयमु त्वा तदिदर्था इंद्र त्वायंतः सखायः।

कण्वा उक्थेभिर्जरंते॥ १६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वयं। ऊं इति। त्वा। तदित्ऽअर्थाः। इंद्र। त्वाऽयंतः।
सखायः।
कण्वाः। उक्थेभिः। जरंते॥ १६

हे इंद्र त्वायंतस्त्वामात्मन इच्छंतः सखायः समानख्याना वयं तदिदर्था यस्य त्वदुपयं स्तोत्रं तदित्तदेवार्थः प्रयोजनं येषां तादृशाः संतस्त्वा त्वां जरामहे। स्तुमहे। उ इति पूरणः। कण्वाः कण्वगोत्रोत्पन्ना अस्मदीयाः पुत्रादयश्चोक्थेभिरुक्थैः शस्त्रैर्जरंते। त्वां स्तुवंति॥

॥ अथ सप्तदशी ॥

न घेमन्यदा पपन वज्रिन्नपसो नविष्टौ।
तवेदु स्तोमं चिकेत॥ १७

न। घ। ईं। अन्यत्। आ। पपन। वज्रिन्। अपसः।
नविष्टौ।
तव। इत्। ऊं इति। स्तोमं। चिकेत॥ १७

हे वज्रिन् वज्रवन्निंद्र अपसोऽपस्विनः कर्मवतस्तव संबंधिनि नविष्टावभिनवे यागे वर्तमानोऽहमन्यत् त्वद्विषयादन्यत्स्तोत्रं न घ ईं नैवापपन। अभिष्टौमि॥ पनतिः स्तुतिकर्मा। उत्तमे णलि लिटि रूपं॥ अपि तु तवेदु तवैव स्तोमं स्तोत्रं चिकेत। अभिजानामि। त्वामेव सर्वदा स्तौमीत्यर्थः॥

॥ अथाष्टादशी ॥

इच्छंति देवाः सुन्वंतं न स्वप्नाय स्पृहयंति।
यंति प्रमादमतंद्राः॥ १८

इच्छंति। देवाः। सुन्वंतं। न। स्वप्नाय। स्पृहयंति।
यंति। प्रऽमादं। अतंद्राः॥ १८

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

शुष्मन्तं सोमाभिषवं कुर्वन्तं यजमानं देवा इन्द्रादयः सर्वं इच्छन्ति रक्षितुं। स्वप्नाय न स्पृहयन्ति। स्वप्नावस्थां तस्य शुष्यतो नक्षन्ति। सर्वदा प्रवृत्तमेव कुर्वन्तोत्यर्थः॥ स्पृहेरीप्सित इति कर्मणि चतुर्थी। स्पृह ईप्सायां चुरादिरदन्तः॥ यत एवमतः कारणादतन्द्रा अनालसा देवाः प्रमादं प्रकर्षेण मदकरं तदीयं सोमं यन्ति। प्राप्नुवन्ति॥

॥ अथैकोनविंशी॥

ओ षु प्र याहि वाजेभिर्मा हृणीथा अभ्यस्मान्।

महाँ इव युवजानिः॥ १९

ओ इति। सु। प्र। याहि। वाजेभिः। मा। हृणीथाः।

अभि। अस्मान्।

महान्ऽइव। युवऽजानिः॥ १९

हे इन्द्र वाजेभिर्वाजैरन्नैर्दानकैरश्वैः साकमस्मानभि आभिमुख्येन सु सुष्ठु प्रकर्षेण ओ आ च याहि। शीघ्रगमनायाह्वेय॥ आगच्छेत्। मा हृणीथाः। मा क्रुध्यस्व॥ हृणीयतिः क्रुध्यतिकर्मा। यद्वा मा लज्जां प्राप्नुहि॥ हृणीङ् लज्जायामिति कण्ड्वादौ पठ्यते॥ तत्र दृष्टान्तः। महानिव युवजानिः। युवतिर्जाया यस्य स तथोक्तः। जायाया निङिति समासान्तो निङादेशः॥ ईदृशो महान् गुणैरधिकोऽपि यथा स्वभार्यां प्रति निर्लज्जः सन् शीघ्रं गच्छति तद्वत्॥

॥ अथ विंशी॥

मो ष्वद्य दुर्हणावान्त्सायं करदारे अस्मत्।

अश्रीर इव जामाता॥ २०

मो इति। सु। अद्य। दुःऽहनावान्। सायम्। करत्।

आरे। अस्मत्।

अश्रीरःऽइव। जामाता॥ २०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दुर्ध्यायात्। परैर्दुःसहनं दुर्धर्षं। महानिंद्रोऽत्रेदानीमपदारेऽस्माकं समीप आगच्छतु। स एतु स्तुतिमदेन याचं दिग्मसुयव्रानं या अस्माकं यो ष्टरत्। गा आर्दीत्॥ करोतिमोङ्गि वृत्ति छन्दसत्विश्य इति पूरङ्गादेशः॥ आयाता। आयतः इति शो अपरम्। तस्य निर्याता दुर्दितुःमतिः। पशोर इव। न धीरश्चोः। मदछुश्लीव्वधोरः॥ गत्वधीयो रः॥ दुर्धर्षिषीनः कुत्सितो आयाता। सकृदाह्वय मानोऽप्याशयंकालं विलंबते। तद्वद् बहुकालविलंबं मा कुथा इत्यर्थः॥

॥ इति पंचमस्य सप्तमे विंशो वर्गः ॥

॥ अथैकविंशी ॥

विद्मा ह्य॑स्य वीरस्य॑ भूरिदाव॑रीं सुम॒तिं ।

त्रिषु जातस्य॒ मनां॑सि ॥ २१

विद्म । हि । अस्य । वीरस्य॑ । भू॒रि॒ऽदाव॑रीं । सुऽम॒तिं ।

त्रिषु । जातस्य॑ । मनां॑सि ॥ २१

अस्येंद्रस्य वीरस्य विक्रांतस्य भूरिदावरीं बहुधनस्य दात्रीं सुमतिं कल्याणीं मतिमनुग्रहबुद्धिं विद्मा हि। जानीमः खलु। तथा त्रिषु पृथ्व्यादिषु त्रिषु लोकेषु जातस्य सत्कार्यार्थं प्रादुर्भूतस्य मनांसि हृदयानि च जानीमः। अतस्तस्येंद्रस्य यथा प्रीतिर्जनिष्यते तथा स्तोमं कुर्व इत्यर्थः॥

॥ अथ द्वाविंशी ॥

आ तू षि॑ञ्च कण्व॑मंतं न घा॑ विद्म शवसा॒नात् ।

यशस्त॑रं शतमू॑तेः ॥ २२

आ । तु । सिंच । कण्व॑ऽमंतं । न । घ । विद्म । शवसानात् ।

यशःऽतरं । शतऽऊ॑तेः ॥ २२

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे अध्वर्यो कण्वमंतं ॥ कण्वास्तिः मन्त्रकर्ता ॥ कण्वाः स्तोतारः । यद्वा कण्वगोत्राः ऋषयः तैर्युक्तमिंद्रमुद्दिश्य तु चित्रमासिंच । सोमं जुहुधि । अवयवानात् । यदो मखं । तदिद्यावरतोऽतिवलात् यतस्मूतेः । यतं यंडुनामैनत् । यद्वात्र उभयो रक्षा यस्मिन् स यतमूतिः । तादृशादस्मादिंद्रादन्यत्परं यशस्वितरं पुरुषं न चनैन विद्मः । जानीमः । यतस्तमेवोद्दिश्य सोमं जुहुधीत्यर्थः ॥

॥ अथ त्रयोविंशी ॥

ज्येष्ठेन सोतरिंद्राय सोमं वीराय शक्राय ।

भरा पिबन्नर्याय ॥ २३

ज्येष्ठेन । सोतः । इंद्राय । सोमं । वीराय । शक्राय ।

भर । पिबत् । नर्याय ॥ २३

हे सोतरभिषोतरध्वर्यो वीराय विक्रांताय शक्राय शक्तियुक्ताय नर्याय नृभ्यो हितायेंद्राय ज्येष्ठेन मुख्येनैंद्रवायवग्रहेण । स हि धाराग्रहाणां मध्ये ज्येष्ठः । तेन सोमं भर । हर । आहर । वीर्यं प्रापय । स चेंद्रः पिबतु । तं सोमं पिबतु ॥

॥ अथ चतुर्विंशी ॥

यो वेदिष्ठो अव्यथिष्वश्वावंतं जरितृभ्यः ।

वाजं स्तोतृभ्यो गोमंतं ॥ २४

यः । वेदिष्ठः । अव्यथिषु । अश्वऽवंतं । जरितृऽभ्यः ।

वाजं । स्तोतृऽभ्यः । गोऽमंतं ॥ २४

य इंद्रोऽव्यथिष्वव्यथयितृषु सुखकरेषु स्तोतृषु वेदिष्ठोऽतिशयेन वेदिता लब्धा स्तोतृस्य दाता स इंद्रो जरितृभ्यः शंसितृभ्यः होत्रादिभ्यः स्तोतृभ्या उद्गात्रादिभ्यश्चाश्वावंतं बहुभिरश्वैरुपेतं गोमंतं बहुभिर्गोभिरुपेतं वाजं धनमन्नं बलं वा ददातीति शेषः ॥

अभीनां जगतेऽभिरात्रे प्रथमे पर्याये होतुः शस्त्रे यत्स्थं यत्रयिति स्तोत्रियस्तृचः । छंदोगैस्तस्य तृचस्य स्तूयमानत्वात् इंद्रायां प्रथमं सोमं स्तावत्य इति हि उक्तत्वात् ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तत्राद्या मन्त्रो पंचविंशी ॥

मन्द्यमन्द्यमिच्छ्रोतार आ धावत मद्याय ।

सोमं वीराय शूराय ॥ २५

मन्द्यंऽमन्द्यं । इत् । श्रोतारः । आ । धावत । मद्याय ।

सोमं । वीराय । शूराय ॥ २५

हे श्रोतारोऽभिषोतारोऽध्वर्यवो मद्याय मादयितव्याय वीराय विक्रांताय शूराय शौर्यवत इंद्राय मन्द्यं मन्द्यमित् सर्वत्र स्तुत्यमेव सोममाधावत । अभिगमयत प्रयच्छतेत्यर्थः ॥

॥ इति पंचमस्य सप्तम एकत्रिंशो वर्गः ॥

॥ अथ षड्विंशी ॥

पाता वृत्रहा सुतमा घा गमन्नारे अस्मत् ।

नि यमते शतमूतिः ॥ २६

पाता । वृत्रऽहा । सुतं । आ । घ । गमत् । न । आरे ।

अस्मत् ।

नि । यमते । शतंऽऊतिः ॥ २६

सुतमभिषुतं सोमं पाता पानशीलः ॥ ताच्छीलिकस्तृन् । न लोकाव्ययेति कर्मणि षष्ठ्याः प्रतिषेधः ॥ वृत्रहा वृत्रस्यासुरस्य हंतेंद्र आगमत् । घेत्यवधारणे ॥ आगच्छत्येव । अस्मदस्मत्त आरे दूरदेशे मा भवतु । आगत्य च शतसंख्याकैरूतिभिर्युक्त इंद्रो नियच्छतु । अस्मदीयान् शत्रून्नियच्छतु । निरस्करोतु । यद्वा धनान्यस्मभ्यं नियच्छतु । ददातु ॥

॥ अथ सप्तविंशी ॥

एह हरी ब्रह्मयुजा शग्मा वक्षतः सखायं ।

गीर्भिः श्रुतं गिर्वणसं ॥ २७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आ । इह । हरी इति । ब्रह्मऽयुजा । शग्मा । वक्षतः ।

सखायं ।

गीःऽभिः । श्रुतं । गिर्वणसं ॥ २७

(ब्रह्मयुजा ब्रह्मणा मंत्रेण स्तोत्रेण हविषा वा युज्यमानौ शग्मौ सुखकरौ शक्तौ वा ईदृशौ हरी अश्वाविहास्मिन्यज्ञे सखायं समानख्यानं मित्रभूतमिंद्रमावक्षतः । आवहतां । कीदृशमिंद्रं । गीर्भिः स्तुतिभिः श्रुतं प्रथितमाहात्म्यं गिर्वणसं गिरां संभक्तारं स्तुतिभिः संभजनीयं वा ॥)

॥ अथाष्टाविंशी ॥

स्वादवः सोमा आ याहि श्रीताः सोमा आ याहि ।

शिप्रिन्नृषीवः शचीवो नायमच्छा सधमादं ॥ २८

स्वादवः । सोमाः । आ । याहि । श्रीताः । सोमाः ।

आ । याहि ।

शिप्रिन् । ऋषिऽवः । शचीऽवः । न । अयं । अच्छं ।

सधऽमादं ॥ २८

हे शिप्रिन् । शिप्रं शिरस्त्राणं । यद्वा शिप्रे हनू नासिके वा । तद्वन् हे ऋषीव ऋषिभिः स्तोतृभिर्युक्त शचीवः शक्तिमन् । एवंभूत हे इंद्र अस्मदीया इमे सोमाः स्वादवः । अभिषवादिभिः संस्कृतत्वेनास्वादनार्हा जाताः । अतस्त्वमायाहि । आगच्छ । तथा ते सोमाः श्रीताः । पयआदिभिः श्रयणद्रव्यैर्मिश्रिताः संस्कृताः । अतोऽप्यायाहि । आगच्छ । नेति संप्रत्यर्थे । न संप्रत्ययं स्तोमा सधमादं सह मादयितव्यं आगच्छाभिमुखं करोतीति शेषः । अतोऽप्यायाहीत्यर्थः ॥

॥ अथैकोनत्रिंशी ॥

स्तुतश्च यास्त्वा वर्धंति महे राधसे नृम्णाय ।

इंद्र कारिणं वृधंतः ॥ २९

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

स्तुतः। च। याः। त्वा। वर्धंति। महे। राधसे। नृम्णाय। इंद्र। कारिणं। वृधंतः॥ २८

हे इंद्र कारिणं कर्मणां कर्तारं वृधंतो वर्धयंतो ये स्तुतः स्तोतारः। याश्च त्वदीया स्तुतयस्ता त्वां वर्धंति। किमर्थं। महे महते राधसे धनाय नृम्णाय बलाय च। उभयोः प्राप्त्यर्थं। ते तदुभयं लभंत इत्यध्याहारः। यद्वोत्तरत्र ते सत्रा दधिरे शवांसीति संबंधः॥

॥ अथ त्रिंशी ॥

गिरश्च यास्ते गिर्वाह उक्था च तुभ्यं तानि।
सत्रा दधिरे शवांसि॥ ३०

गिरः। च। याः। ते। गिर्वाहः। उक्था। च। तुभ्यं। तानि।
सत्रा। दधिरे। शवांसि॥ ३०

हे गिर्वाहो गीर्भिः स्तुतिभिर्वहनीयेंद्र ते तुभ्यं क्रियमाणा गिरश्च स्तुतिरूपाश्च वाचो याः संति। उक्था चोक्थानि च शस्त्ररूपाणि च वचांसि तुभ्यं त्वदर्थं क्रियमाणानि यानि संति तानि सर्वाणि सत्रा सहैव शवांसि बलानि दधिरे। तत्र विदधिरे॥

॥ इति पंचमस्य सप्तमे द्वात्रिंशो वर्गः॥

॥ अथैकत्रिंशी ॥

एवेदेष तुविकूर्मिर्वाजाँ एको वज्रहस्तः।
सनादमृक्तो दयते॥ ३१

एव। इत्। एषः। तुविऽकूर्मिः। वाजान्। एकः।
वज्रऽहस्तः।
सनात्। अमृक्तः। दयते॥ ३१

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

यथ एवेंद्रस्तुविकूर्मिर्बहुकर्मा। इदिति पूरकः। एकाः सर्वेषु देवेषु मुख्यो वज्रहस्तो वज्रबाहुः सनात् चिरकालादारभ्याषाळ्हः शत्रुभिरबाधितः। एवंभूतः स इंद्रो नानानतानि धनानि ना दयते। स्तोतृभ्यो ददाति॥

॥ अथ द्वात्रिंशी ॥

हंता वृत्रं दक्षिणेनेंद्रः पुरू पुरुहूतः ।

महान्महीभिः शचीभिः ॥ ३२

हंता। वृत्रं। दक्षिणेन। इंद्रः। पुरु। पुरुऽहूतः।

महान्। महीभिः। शचीभिः॥ ३२

अयमिंद्रो दक्षिणेन हस्तेनैकेनैव वृत्रमावरकमसुरं हंता साधु हतवान्॥ हंतेः साधुकारिणि तृन्। न लोकाव्ययेति षष्ठीप्रतिषेधः॥ पुरु पुरुषु॥ सुपां सुलुगिति विभक्तेर्लुक्॥ बहुषु देशेषु पुरुहूतो महीभिर्महतीभिः शचीभिः क्रियाभिः शक्तिभिर्वा महान् सर्वस्य उत्कृष्टः। एवंभूत इंद्रोऽस्मान्पात्वित्यर्थः॥

॥ अथ त्रयस्त्रिंशी ॥

यस्मिन्विश्वाश्चर्षणय उत च्यौत्ना ज्रयांसि च।

अनु घेन्मंदी मघोनः॥ ३३

यस्मिन्। विश्वाः। चर्षणयः। उत। च्यौत्ना। ज्रयांसि। च।

अनु। घ। इत्। मंदी। मघोनः॥ ३३

विश्वाः सर्वाश्चर्षणयः प्रजा यस्मिन्निंद्रे वर्तंते तदधीना भवंति। उतापि च च्यौत्ना च्यौत्नानि। बलनामैतत्। पृतन्युनिग्रहसाधनानि बलानि च ज्रयांसि शत्रुविषयाण्यभिभवनानि यस्मिन्निंद्रे वर्तंते॥ जि ज्रि अभिभवन इति धातुः॥ स इंद्रो मघोनः। मघं हविर्लक्षणं धनं। तद्वतो यजमानाननु मंद्यनुमोदको भवति। घेदिति पूरकौ। यद्वा मंदी स्तुत्यः स इंद्रस्तानस्तुवद्भ्य आसीदिति शेषः। अथवा यस्य मघोनो धनवत इंद्रस्य मंदी स्तोतानुकूलो भवति एष एतानोत्युत्तरत्रैकवाक्यता॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ चतुस्त्रिंशी ॥

एष एतानि चकारेंद्रो विश्वा योऽति शृण्वे ।

वाजदावा मघोनां ॥ ३४

एषः । एतानि । चकार । इंद्रः । विश्वा । यः । अति । शृण्वे ।

वाजऽदावा । मघोनां ॥ ३४

एष इंद्रो विश्वा विश्वानि व्याप्तान्येतानि दृश्यमानादीनि योऽति । यद्वा पृथिव्यादीनि भूतजातानि तानि चकार । जातवान् । य इंद्रो यज्ञैरतिशयितः शृण्वे श्रूयते सर्वत्र श्रूयते । अपि च स इंद्रो मघोनां हविष्मतां यजमानानां वाजदावा वाजस्यान्नस्य दाता भवति ॥

॥ अथ पंचत्रिंशी ॥

प्रभर्ता रथं गव्यंतमपाकाच्चिद्यमवति ।

इनो वसु स हि वोढा ॥ ३५

प्रऽभर्ता । रथं । गव्यंतं । अपाकात् । चित् । यं । अवति ।

इनः । वसु । सः । हि । वोढा ॥ ३५

प्रभर्ता प्रहर्ता प्रकर्षेण भर्तेव इंद्रो रथं रंहणं गव्यंतं गा इच्छंतं यं स्तोतारमपाकाद्विप्रकृष्टाद्देशात् । चिच्छब्दोऽनुक्तसमुच्चयार्थः । विप्रकृष्टादप्यवति रक्षति स हि स खलु स्तोतेन ईश्वरः सन् वसु धनं वोढा प्रापयिता भवति ॥ वोढेः साधुकारिणि तृन् । अतो न लोकाव्ययेति कर्मणि षष्ठ्याः प्रतिषेधः ॥

॥ इति पंचमस्य सप्तमे त्रयोविंशो वर्गः ॥

॥ अथ षट्त्रिंशी ॥

सनिता विप्रो अर्वद्भिर्हंता वृत्रं नृभिः शूरः ।

सत्योऽविता विधंतं ॥ ३६

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

सनिता। विप्रः। अर्वत्ऽभिः। हंता। वृत्रं। नृऽभिः। शूरः।

सत्यः। अविता। विधंतं ॥ ३६

विप्रो मेधावी इंद्रोऽर्वद्भिरश्वैर्वोढृभूतैः सनिता गंतव्यं संभक्ता। तथा शूरः शौर्योपेतः सन् नृभिर्नेतृभिर्मरुद्भिः सार्धं वृत्रमावरकमसुरं हंता हिंसकोऽभूत्। अपि च विधंतं परिचरंतं यजमानं सत्यः साधुरवितथस्वभावो वा स इंद्रोऽविता परिचरतो यजमानस्य रक्षिता भवति ॥ सर्वविधीनां छंदसि विकल्पितत्वादत्र कर्मणि षष्ठी न प्रवर्तते ॥

॥ अथ सप्तत्रिंशी ॥

यजध्वैनं प्रियमेधा इंद्रं सत्राचा मनसा।

यो भूत्सोमैः सत्यमद्वा ॥ ३७

यजध्व। एनं। प्रियऽमेधाः। इंद्रं। सत्राचा। मनसा।

यः। भूत्। सोमैः। सत्यऽमद्वा ॥ ३७

हे प्रियमेधाः। प्रियोऽत्युत्कृष्टो मेधो यज्ञो येषां ते तथोक्ताः। आत्मनि पूजार्थं बहुवचनं। प्रियमेधा अस्य ऋषिरात्मानं संबोध्य ब्रूते। हे प्रियमेधाः सत्राचा सहांचता स्तोतव्येनेंद्रेण सह वर्तमानेन मनसा चित्तेनैनमिंद्रं यजध्व। यजध्वं। हविःपूर्वकं यजेत्यर्थः॥ यजध्वैनमिति निपातेनाद्यवर्णलोपः॥ य इंद्रः सोमैः सारभूतैः सत्यमद्वा भूत् सत्यमदोऽवितथमदो भवति ॥

॥ अथाष्टात्रिंशी ॥

गाथश्रवसं सत्पतिं श्रवस्कामं पुरुत्मानं।

कण्वासो गात वाजिनं ॥ ३८

गाथऽश्रवसं। सत्ऽपतिं। श्रवःऽकामं। पुरुऽत्मानं।

कण्वासः। गात। वाजिनं ॥ ३८

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे कण्वासः कण्वपुत्रा मेधातिथयः। पूर्ववद्बहुवचनमात्मनः संबोधनं च। हे कण्वस्य पुत्रा मेधातिथयो यूयं गायत्रवसं गायत्र्यनसं सत्पतिं सतां पालयितारं अवक्षारं। अयःसत्सु शब्दितु कामोऽभिलाषो यस्य तादृशं। पुरूणां बहुनामां यद्वा पुरुषु पुरुषु प्रदेशेष्ववस्थितं गमनं गच्छन्तं वाजिनं वेगवन्तं। एवंगुणकमिन्द्रं गाय। गायत। स्तुध्वं॥

। अथैकोनचत्वारिंशी॥

य ऋते चिद्गाः पदेभ्यो दात्सखा नृभ्यः शचीवान्।

ये अस्मिन्काममश्रियन्॥ ३९

यः। ऋते। चित्। गाः। पदेभ्यः। दात्। सखा। नृऽभ्यः। शचीऽवान्।

ये। अस्मिन्। कामं। अश्रियन्॥ ३९

पणिभिर्देवगवीष्वपहृतासु पदेभ्यो गमनानां गवां मार्गे संलग्नेभ्योऽन्वेषणसाधनभूतेभ्य ऋते चित् ऋतेऽपि विनापि सखा मित्रभूतः शचीवान् कर्मवान् प्रशस्तकर्मा य इन्द्रो नृभ्यो नेतृभ्यो देवेभ्यो गाः पणिभिरपहृता दात् पुनर्दत्तवान्। देवे वा अस्मिन्निन्द्रे कामममभिलाषमश्रियन् अशिश्रियन् प्राप्नुवन्। तेभ्यो नृभ्य इत्यन्वयः। तमिन्द्रं गायतेति पूर्वेण सहैकवाक्यता॥

। अथ चत्वारिंशी॥

इत्था धीवन्तमद्रिवः काण्वं मेध्यातिथिं।

मेषो भूतोऽभि यन्नयः॥ ४०

इत्था। धीऽवन्तं। अद्रिऽवः। काण्वं। मेध्यऽअतिथिं।

मेषः। भूतः। अभि। यन्। अयः॥ ४०

इत्थमनेनोक्तेन प्रकारेण धीवन्तं स्तुतिमन्तं काण्वं कण्वपुत्रं मेधातिथिं यज्ञाद्धोतिथिमेतन्नामानमृषिं हे अद्रिवो वज्रिन्निन्द्र त्वं मेषो भूतो मेषरूपतां प्राप्तः अभियन् अभिगच्छन्॥ अ इत्यनुवर्तते। तद्योगात्तु तिङो निघाताभावः॥ यज्ञायतः

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आगमय: तं त्वां स्तुम इत्यर्थः। मेधातिथेर्मेषेति सुब्रह्मण्याया एकदेशस्य व्याख्यान-रूपं ब्राह्मणं छंदोगैरेवमाम्नायते। मेधातिथिं ह काण्वायनिं मेषो भूत्वोदाजहार। षड्विं० ब्रा० १. १.। इति। तदभिप्रायेणेयं स्तुतिः कृता॥

॥ अथैकचत्वारिंशी ॥

शिक्षा विभिंदो अस्मै चत्वार्ययुता ददत्।
_ _ _

अष्टा परः सहस्रा ॥ ४१
_ _ _ _

शिक्ष। विभिंदो इति विऽभिंदो। अस्मै। चत्वारि।
_ _ _ _ _ _

अयुता। ददत्।
_

अष्ट। परः। सहस्रा ॥ ४१
_ _ _

विभिंदुनाम्नो राज्ञः सकाशाद्बहु धनं लब्ध्वा तदीयं दानमिदमादिकेन तृचेन प्रशंसति। हे विभिंदो राजन् ददत् दाता त्वमस्मै मह्यमृषये चत्वार्ययुतान्ययुतानि दशसहस्राणि चत्वारिंशत्सहस्राणि शिक्ष। अशिक्षः। दत्तवानसि। परः पर-स्तादूर्ध्वं गतसंख्याकानि सहस्रा सहस्राणि च दत्तवानसि॥

॥ अथ द्वाचत्वारिंशी ॥

उत सु त्ये पयोवृधा माकी रणस्य नप्त्या।
_ _ _ _

जनित्वनाय मामहे ॥
_ _ _

उत। सु। त्ये इति। पयःऽवृधा। माकी इति। रणस्य।
_ _ _ _

नप्त्या।
_

जनिऽत्वनाय। ममहे ॥ ४२
_ _ _ _ _ _

उतापि च सु सुष्टु ये ते प्रसिद्धे पयोवृधा पयस उदकस्य वर्धयित्र्यौ माकी निर्मात्र्यौ भूतजातस्य रणस्य स्तोतव्यां नतु। स्तोतुर्नप्त्या नप्त्यौ न पातयित्र्यौ

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सर्वदानुपण्यीते द्वावाहंविध्यौ जनितनाय पूर्वोक्तधनस्य जननाय प्रादुर्भावाय बोधाय च मह्यं। स्तुतवानस्मि द्वावाहंविध्योः प्रजपयोरेवेदं दानं लभ्यते नान्यदेति दानमाहात्म्यप्रशंसाधिगंतव्या॥

॥ इति पंचमस्य सप्तमे चतुर्विंशो वर्गः॥

पिबा सुतस्येति चतुर्विंशत्यृचं तृतीयं सूक्तं काण्वस्य मेध्यातिथेरार्षं। चतुर्थ्यो द्वयोः युजः सतोबृहत्य एकविंश्यनुष्टुप् द्वाविंशीत्रयोविंश्यौ गायत्र्यौ चतुर्विंशी बृहती। एतासां चतसृणां कुरयाणस्य पुत्रस्य पाकस्थाम्नो राज्ञो दानस्तुतिप्रतिपादिकाः। अतस्तद्देवताकाः। शिष्टा ऐंद्र्यः। तथा चानुक्रांतं। पिबा चतुर्विंशतिर्मेध्यातिथिः प्रागाथं त्वनुष्टुप् गायत्र्यौ बृहती चांत्याः कौरयाणस्य पाकस्थाम्नो दानस्तुतिरिति॥ महाव्रते निष्केवल्ये चादावुत्तरशाखीयो दानस्तुतिविनेदं सूक्तं सप्रत्ययस्योपोद्धारः। तथैव पंचमारण्यके सूत्रितं। पिबा सुतस्य रसिन इति विंशतिः सप्तभीं चाष्टमीं चोद्धरति। ऐ० आ० ५. १०.। इति॥ ज्योतिष्टोमे निष्केवल्य आद्यो रथंतरसामप्रगाथः शंसनीयः। सूत्र्यते हि। पिबा सुतस्य रसिन इति सामप्रगाथः। आ० ५. १५.। इति॥ चातुर्विंशिकेऽहनि निष्केवल्येऽप्ययं प्रगाथः सूत्र्यते हि। अभी रथंतरस्तोत्रियं त्वामिद्धि न इति प्रगाथः। आ० ७. ३.। इति॥ एवमन्यत्रापि यदि रथंतरं पृष्ठं भवति तत्र सर्वत्रायं प्रगाथो द्रष्टव्यः॥ पंचमेऽहनि प्रउगशस्त्रे पिबा सुतस्येत्यैंद्रः प्रगाथः। सूत्रितं च। पिबा सुतस्य रसिनो देव देव योऽवसे। आ० ७. १२.। इति॥

॥ तत्र प्रथमा॥

पिबा सुतस्य रसिनो मत्स्वा न इंद्र गोमतः।
आपिर्नो बोधि सधमाद्यो वृधे३ऽस्माँ अवंतु ते धियः॥ १

पिब। सुतस्य। रसिनः। मत्स्व। नः। इंद्र। गोऽमतः।
आपिः। नः। बोधि। सधऽमाद्यः। वृधे। अस्मान्।
अवंतु। ते। धियः॥ १

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे इंद्र रसिनो रसवतो गोमतो गोविकारैः पयःप्रभृतिभिः श्रयणद्रव्यैर्मिश्रस्य नोऽस्मदीयस्य सुतस्याभिषुतस्य ॥ क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी ॥ ईदृशं सोमं पिब। पीत्वा च मत्स्व। तृप्तो भव। अपि च सधमाद्यः सह मादयितव्यः संभक्तैरस्माभिस्तर्पयितव्यस्त्वमापिरापयिता बंधुः सन् नोऽस्माकं वृधे वर्धनाय बोधि। बुध्यस्व। ते त्वदीया धियो बुद्धयोऽनुग्रहात्मिका अस्मान् स्तोतॄनवंतु। रक्षंतु ॥

॥ अथ द्वितीया ॥

भूयाम ते सुमतौ वाजिनो वयं मा नः स्तरभिमातये।
अस्मान् चित्राभिरवतादभिष्टिभिरा नः सुम्नेषु यामय ॥ २

भूयाम । ते । सुऽमतौ । वाजिनः । वयं । मा । नः । स्तः ।
अभिऽमातये ।
अस्मान् । चित्राभिः । अवतात् । अभिष्टिऽभिः । आ । नः ।
सुम्नेषु । यमय ॥ २

हे इंद्र ते तव सुमतौ शोभनायां मतावनुग्रहबुद्धौ वाजिनो हविष्मंतो वयं भूयाम। वर्तमाना भवाम। अभिमातये। अभिमन्यत इत्यभिमातिः शत्रुः। तस्मै तदर्थं नोऽस्मान्मा स्तः। मा हिंसीः॥ स्तृञ् हिंसायां। माङि लुङि छांदसो लुक् ॥ अपि च त्वमिष्टिभिरन्वेषणीयाभिः प्रार्थनीयाभिश्चित्राभिश्चायनीयाभिर्नानाविधाभिर्वा त्वदीयाभिरूतिभिरस्मानवतात्। अव। रक्ष। तथा नोऽस्मान् सुम्नेषु सुखेष्वायामय। आयतान् कुरु। सर्वदा सुखिन एव कुरु ॥

॥ अथ तृतीया ॥

इमा उ त्वा पुरूवसो गिरो वर्धंतु या मम।
पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत ॥ ३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इमाः। ऊँ इति। त्वा। पुरुवसो इति पुरुऽवसो। गिरः।

वर्धंतु। याः। मम।

पावकऽवर्णाः। शुचयः। विपःऽचितः। अभि। स्तोमैः।

अनूषत॥ ३

हे पुरूवसो बहुधनेन्द्र मम मदीया इमा गिरः स्तुतिरूपा वाचस्त्वां वर्धंतु। वर्धयंतु। तथा पावकवर्णा अग्निसमानतेजस्का अत एव शुचयः शुद्धा विपश्चितो विद्वांस उद्गातारश्च स्तोमैः स्तोत्रैस्त्रिवृत्पंचदशादिभिरभ्यनूषत। त्वामभिष्टुवंति॥ नू स्तुतौ कुटादिः॥

॥ अथ चतुर्थी॥

अयं सहस्रमृषिभिः सहस्कृतः समुद्र इव पप्रथे।

सत्यः सो अस्य महिमा गृणे शवो यज्ञेषु विप्रराज्ये॥ ४

अयं। सहस्रं। ऋषिऽभिः। सहःऽकृतः। समुद्रःऽइव। पप्रथे।

सत्यः। सः। अस्य। महिमा। गृणे। शवः। यज्ञेषु।

विप्रऽराज्ये॥ ४

अयमिंद्रः सहस्रं सहस्रसंख्याकैर्ऋषिभिरतीन्द्रियार्थदर्शिभिः स्तोतृभिः सहस्कृतः सहसा बलेन युक्तः कृतः। स्तुत्या हि देवताया बलं वर्धते। स चैवंभूतः सन् समुद्र इवोदधिरिव पप्रथे। प्रथितो विस्तीर्णो बभूव। अस्य चेंद्रस्य सत्योऽवितथः स प्रसिद्धो महिमा महत्त्वं शवो बलं च यज्ञेषु यागेषु विप्रराज्ये। राज्ञः कर्म राज्यं। विप्राणां स्तोतॄणां राज्ये स्तुतयज्ञसंघे गृणे। स्तूयते॥

चातुर्विंशिकेऽहनि निष्केवल्ये इंद्रमिद्देवतातय इति रैवतसामप्रगाथः शंसनीयः पृष्ठ्येऽहनि निष्केवल्ये अयं प्रगाथः। सूत्र्यते हि। इंद्रमिद्देवतातय इतीतरेषां पृष्ठ्य एवैकैकमन्वहं। आ० ७, ३,। इति॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तृचे प्रथमा सूक्ते पंचमी ॥

इंद्रमिद्देवतातय इंद्रं प्रयत्यध्वरे ।

इंद्रं समीके वनिनो हवामह इंद्रं धनस्य सातये ॥ ५

इंद्रं । इत् । देवऽतातये । इंद्रं । प्रऽयति । अध्वरे ।

इंद्रं । सम्ऽईके । वनिनः । हवामहे । इंद्रं । धनस्य । सातये ॥ ५

देवतातये । देवैः स्तोतृभिस्तायते विस्तार्यत इति देवतातिर्यज्ञः । तदर्थमिंद्रमित् देवेषु मध्ये इंद्रमेवाह्वयामहे । अध्वरे यज्ञे प्रयति प्रगच्छत्युपक्रांते सतींद्रं ह्वयामहे । तथा समीके उत्सन्नगते संपूर्णे च यागे वनिनः संभजमाना वयमिंद्रमेवाह्वयामहे । यद्वा समीकमिति संग्रामनाम । समीके संग्रामे इंद्रमाह्वयामहे । धनस्य सातये लाभायेंद्रमेवाह्वयामहे । अतः सोऽयमिंद्र आगच्छत्वित्यर्थः ॥

॥ इति पंचमस्य सप्तमे पंचविंशो वर्गः ॥

॥ अथ षष्ठी ॥

इंद्रो मह्ना रोदसी पप्रथच्छव इंद्रः सूर्यमरोचयत् ।

इंद्रे ह विश्वा भुवनानि येमिर इंद्रे सुवानास इंदवः ॥ ६

इंद्रः । मह्ना । रोदसी इति । पप्रथत् । शवः । इंद्रः ।

सूर्यं । अरोचयत् ।

इंद्रे । ह । विश्वा । भुवनानि । येमिरे । इंद्रे । सुवानासः ।

इंदवः ॥ ६

अयमिंद्रः शवः शवस आत्मीयस्य बलस्य मह्ना महिम्ना महत्त्वेन रोदसी द्यावापृथिव्यौ पप्रथत् । अप्रथयत् । विस्तारितवान् । तथा स्वर्भानुनाहतं सूर्यमयमिंद्रोऽरोचयत् । अदीपयत् । तद्धासुरस्य वधेन प्रकाशितवान् । अपि चेंद्र आश्रितेऽस्मिन्निंद्रे विश्वा विश्वानि व्याप्तानि भुवनानि भूतजातानि येमिरे । उपरमंते । इंद्रेण नियम्यंत इत्यर्थः । तथा सुवानासः सूयमाना अभिषूयमाणा इंदवः सोमा-श्चाश्रिताश्चेंद्र नियम्यंते । अंतर्भावितण्यर्थः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ज्योतिष्टोमो यदि रथंतरपृष्ठस्तदा निष्केवल्येऽभि त्वा पूर्वपीतय इति प्रगाथोऽस्तुरूपः । सूत्यते हि । अभि त्वा पूर्वपीतय इति प्रगाथो स्तोत्रियानुरूपौ । आ० ५. १५. । इति ॥ महाव्रतेऽपि निष्केवल्ये द्वितीयपटेऽयमेव प्रगाथः । सूत्रितं च । अभि त्वा पूर्वपीतय इति रथंतरस्य स्तोत्रियानुरूपौ प्रगाथौ । ऐ० आ० ५. ८. । इति ॥

॥ तत्र प्रथमा त्र्यृचे सप्तमी ॥

अभि त्वा पूर्वपीतय इंद्र स्तोमेभिरायवः ।

समीचीनास ऋभवः समस्वरन्रुद्रा गृणंत पूर्व्यं ॥ ७

अभि । त्वा । पूर्वऽपीतये । इंद्र । स्तोमेभिः । आयवः ।

सम्ऽईचीनासः । ऋभवः । सं । अस्वरन् । रुद्राः । गृणंत ।

पूर्व्यं । ७

हे इंद्र आयवो मनुष्याः स्तोतारः स्तोमेभिः स्तोत्रैस्त्वामभिष्टुवंति । किमर्थं । पूर्वपीतये सर्वेभ्यो देवेभ्यः पूर्वं प्रथमत एव सोमस्य पानाय । वषट्कृते हि प्रथम गणैरिंद्रस्यैव सोमो हूयते । तथा समीचीनासः संगता ऋभवः । प्रथमपानार्थेन मरुद्भिस्तयोऽप्युपलक्ष्यंते । स्तुतिविध्या वाचा स्तुतिभि च समस्वरन् । त्वामेव सम्यगस्तुवन् ॥ स्वृ शब्दोपतापयोः ॥ रुद्रा रुद्रपुत्रा मरुतश्च पूर्व्यं पुरातनं सर्वं त्वामेव गृणंत । अस्तुवन् । इत्यवसमये प्रहर भगवो जहि वीरयस्वेत्येवंरूपया वाचा त्वां स्तुतवंत इत्यर्थः ॥

। अथाष्टमी ॥

अस्येदिंद्रो वावृधे वृष्ण्यं शवो मदे सुतस्य विष्णवि ।

अद्या तमस्य महिमानमायवोऽनु ष्टुवंति पूर्वथा ॥ ८

अस्य । इत् । इंद्रः । ववृधे । वृष्ण्यं । शवः । मदे । सुतस्य ।

विष्णवि ।

अद्य । तं । अस्य । महिमानं । आयवः । अनु । स्तुवंति ।

पूर्वऽथा । ८

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अस्मदीयस्यैव यजमानस्य वृष्ण्यं प्रवृद्धं वीर्यं यशो बलं चेंद्रो नावतु । वर्धयति । सुतस्याभिषुतस्य सोमस्य पानेन विप्रादि तस्य देवस्य व्यापके मदे हर्षे सति तस्यैव यजमानस्य बलं वर्धयतीत्यर्थः । अद्यास्मिन् कालेऽस्मिन्नपि तमस्मद्गुणं महिमानं आयुधमायवो मनुष्या अनुष्टुवंति । आनुपूर्व्येण स्तुवंति । पूर्वथा ॥ पूर्वशब्दादिवार्थे प्रत्नपूर्वेत्यादिना थाल्प्रत्ययः ॥ यथा पूर्वस्मिन् कालेऽस्तुवन् एवमिदानीमपि तेनैव क्रमेण स्तुवंतीत्यर्थः ॥

ज्योतिष्टोमे माध्यंदिनसवने ब्रह्मशस्त्रे तत्त्वा यामीति प्रगाथोऽनुरूपः । सूत्रितं च । तत्त्वा यामि सुवीर्यमिति प्रगाथौ स्तोत्रियानुरूपौ । आ० ५. १६. । इति ॥ चातुर्विंशिकेऽहनि माध्यंदिनसवनेऽप्ययं प्रगाथस्तत्रैवानुरूपः । सूत्रितं च । तत्त्वा यामि सुवीर्यमभि प्र वः सुराधसं । आ० ७. ४. । इति ॥

॥ तत्र प्रथमा सूक्ते नवमी ॥

तत्त्वा यामि सुवीर्यं तद्ब्रह्म पूर्वचित्तये ।
येना यतिभ्यो भृगवे धने हिते येन प्रस्कण्वमाविथ ॥ ९

तत् । त्वा । यामि । सुऽवीर्यं । तत् । ब्रह्म । पूर्वऽचित्तये ।
येन । यतिऽभ्यः । भृगवे । धने । हिते । येन । प्रस्कण्वं ।
आविथ ॥ ९

हे इंद्र तत्सुवीर्यं शोभनवीर्यं त्वा त्वां यामि । याचामि ॥ छांदसो वर्णलोपः ॥ तथा तद्ब्रह्म परिवृढमन्नं पूर्वचित्तये पूर्वप्रज्ञानायान्येभ्यः पूर्वमेव लाभाय त्वां याचामि । धने हितेऽवस्थिते सति येन सुवीर्येण यतिभ्यः कर्मसूपरतेभ्योऽयष्टृभ्यो जनेभ्यः अक्षा धनमाहृत्य भृगवे महर्षये प्रयच्छसि । यद्वा कर्मसु नियता यं गरको यतयः । तेषामर्थं धनं प्रयच्छसि ॥ तादर्थ्ये चतुर्थी ॥ येन च ब्रह्मणा प्रस्कण्वं कण्वपुत्रं कण्वस्य पुत्रमृषिमाविथ ररक्षिथ तदुभयं याचामीत्यन्वयः ॥

॥ अथ दशमी ॥

येना समुद्रमसृजो महीरपस्तदिंद्र वृष्णि ते शवः ।
सद्यः सो अस्य महिमा न संनशे यं क्षोणीरनुचक्रदे ॥ १०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

येन । समुद्रं । असृजः । महीः । अपः । तत् । इंद्र ।
वृष्णि । ते । शवः ।
सद्यः । सः । अस्य । महिमा । न । संऽनशे । यं । क्षोणीः ।
अनुऽचक्रदे ॥ १०

हे इंद्र येनात्मीयेन बलेन समुद्रमब्धिं प्रति महीर्महतीरप उदकान्यसृजः व्यसृजः । महान् समुद्रो यावद्भिर्जलैः पूर्यते तावंति जलानि पुरा त्वं सृष्टवानित्यर्थः । ते त्वदीयं तच्छवो बलं वृष्णि वर्षकं । अभीष्टफलदमित्यर्थः । अस्येंद्रस्य स महिमा न संनशे । न सम्यगाप्नीयः । परैरप्राप्य इत्यर्थः ॥ नशेः व्याप्त्यर्थे लिट्यकः ॥ यं महिमानं क्षोणीः क्षोणी पृथिव्यनुचक्रदे अनुगच्छति । क्रंदिरत्र गत्यर्थः । यदधीना भवेत इत्यर्थः ॥

॥ इति पंचमस्य सप्तमे षड्विंशो वर्गः ॥

॥ अथैकादशी ॥

शग्धी नं इंद्र यत्त्वा रयिं यामि सुवीर्यं ।
शग्धि वाजाय प्रथमं सिषासते शग्धि स्तोमाय पूर्व्य ॥ ११

शग्धि । नः । इंद्र । यत् । त्वा । रयिं । यामि । सुऽवीर्यं ।
शग्धि । वाजाय । प्रथमं । सिसासते । शग्धि । स्तोमाय ।
पूर्व्य ॥ ११

हे इंद्र सुवीर्यं शोभनवीर्योपेतं ॥ बहुव्रीहौ वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं । रयिं धनं त्वां यामि याचामि ॥ छांदसो वर्णलोपः ॥ नोऽस्मभ्यं तद्धनं शग्धि । देहि ॥ शक्तिरत्र दानार्थः । बहुलं छंदसीति विकरणस्य लुक् । हुझल्भ्य इति हेर्धित्वं ॥ तथा सिषासते संभक्तुमिच्छते ॥ सनतेः सनि सनीवंतर्धेति विकल्पनादिडभावे जनसनखनामित्यात्वं ॥ वाजाय । वाज इत्यन्ननाम । तेन च तद्वान् लक्ष्यते । हविष्मते यजमानाय प्रथमं सर्वेभ्यः पूर्वमेव शग्धि । धनं प्रयच्छ । तथा

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वाजायेति द्वितीयार्थे चतुर्थी ॥ कर्मणि द्वितीया संभक्तुमिच्छते जनाय प्रथमं वाजाय वाजपदं यच्छ । देहि । यथा त्वोताय त्वोते हे पूर्व्य पूर्वस्मिन् काले भृगु चिरंतनेभ्य यच्छ । देहि ॥ त्वोतैः ... इत्यादिना ... ॥

॥ अथ द्वादशी ॥

शग्धी नो अस्य यद्ध पौरमाविथ धिय इंद्र सिषासतः ।
शग्धि यथा रुशमं श्यावकं कृपमिंद्र प्रावः स्वर्णरं ॥ १२

शग्धि । नः । अस्य । यत् । ह । पौरं । आविथ । धियः ।
इंद्र । सिसासतः ।
शग्धि । यथा । रुशमं । श्यावकं । कृपं । इंद्र । प्र । आवः ।
स्वःऽनरं ॥ १२

हे इंद्र धियः कर्माणि स्तोत्राणि वा सिषासतः संभक्तुमिच्छतो नोऽस्माकं संबंधि- नोऽस्य यजमानस्य तदनं यच्छ प्रदेहि यच येन त्वमनेन पौरः । पुरुर्नाम राजा । तस्य पुत्रमाविथ ररक्षिथ । अपि च हे इंद्र रुशमं श्यावकं कृपं चैतन्नामकानृषीन् यथा येन प्रकारेण प्रावः प्रारक्षः तथा स्वर्णरं स्वर्गस्य नेतारं प्रापयि- तारं । यद्वा स्वः स्वर्गं प्रति नेतव्यमिमं यजमानं शग्धि । यष्टुं कुरु । धनादिसंपन्ना- ... यथा यष्टो भवति तथा कुर्वित्यर्थः । इंद्रेत्यामंत्रितस्य पादादित्वेनाष्ट- मिकनिघाताभावे पाष्ठिकमामंत्रितमाद्युदात्तत्वं ॥

... इति ... । ... च । ... इति ॥ ... । आ० ७, ४, । इति ॥ ... । आ० ७, १, इति ॥

॥ तस्यावा ऋचो त्रयोदशी ॥

कन्नव्यो अतसीनां तुरो गृणीत मर्त्यः ।
नही न्वस्य महिमानमिंद्रियं स्वर्गृणंत आनशुः ॥ १३

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

कत् । नव्यः । अतसीनां । तुरः । गृणीत । मर्त्यः ।

नहि । नु । अस्य । महिमानं । इंद्रियं । स्वः । गृणंतः ।

आनशुः । १३

अतसीनामतंतीनां सततगामिनीनां स्तुतीनां तुरः प्रेरयिता नव्यो नवतरधनो नव्योऽभिनव उद्गाता नरः कत् को नाम स्तोता गृणीत । इंद्रं स्तुयात् । अस्य महिमानं इंद्रियं इंद्रः स्तोतुं न शक्यत इत्यर्थः । गॄ शब्दे । क्र्यादिकः । प्वादीनां ह्रस्व इति ह्रस्वत्वं ॥ नु पुरा पूर्वस्मिन्नपि काले विद्यमानाः स्वः सर्वे गृणंतः स्तोतारः । यद्वा स्वः सुष्ठु अरणीयं प्राप्तव्यमिंद्रं गृणंतः स्तुवंतो अस्य इंद्रियं । इंद्रियमिंद्रस्य लिंगमिंद्रसृष्टमित्यसाधारणं । अस्येंद्रस्य अधिपानं वीर्यं न ह्यानशुः । न खलु प्राप्नुवन् ॥ अश्नोतेर्लिटि व्यत्ययेन परस्मैपदं । अत आदेरित्यभ्यासस्यात्वं । अश्नोतेश्चेति नुट् । हि चेति निघातप्रतिषेधः ॥

॥ अथ चतुर्दशी ॥

कदु स्तुवंत ऋतयंत देवत ऋषिः को विप्र ओहते ।

कदा हवं मघवन्निंद्र सुन्वतः कदु स्तुवत आ गमः ॥ १४

कत् । ऊं इति । स्तुवंतः । ऋतऽयंत । देवता । ऋषिः ।

कः । विप्रः । ओहते ।

कदा । हवं । मघऽवन् । इंद्र । सुन्वतः । कत् । ऊं इति ।

स्तुवतः । आ । गमः । १४

हे इंद्र स्तुवंतः स्तोत्रं कुर्वंतः कदु कदा यज्ञ ऋतयंत देवता ॥ देवात्तलिति स्वार्थिकस्तल्प्रत्ययः । व्यत्ययेन प्रथमा ॥ देवं त्वामुद्दिश्य यज्ञमिच्छंत । यज्ञं करिष्यन्ति । त्वदीययागेच्छापि दुर्लभा दूरे त्वद्यागकथा । ऋषिरतींद्रियदर्शी विप्रो मेधावी कः स्तोता ओहते । वहति । त्वां स्तुतीः प्रापयति । न कश्चिदपि त्वां स्तोतुं शक्नोतीत्यर्थः । यत एवमतः कारणात् हे मघवन् धनवन्निंद्रानुग्रहबुद्ध्या त्वयैवागंतव्यं ॥ स त्वं कदा कस्मिन्काले सुन्वतः सोमाभिषवं कुर्वतो यजमानस्य हवमाह्वानं प्रत्यागमः । आगच्छः । कदु कदा

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

च कस्मिंश्च काले स्तुवतः कोमलं स्तोत्रं कुर्वतो यजमानस्य हवमाह्वानमागतः । अभ्यगच्छः ॥ स्तुवतः स्तुवन इत्युभयत्र शतुरनुम इति विभक्तेरुदात्तत्वं । गमेर्लुङि लृदित्वात् च्लेरङादेशः ॥

ज्योतिष्टोमे माध्यंदिनसवने ब्राह्मणाच्छंसिन उदु त्य इति प्रगाथोऽनुरूपानंतरं शंसनीयः । सूत्रितं च । उदु त्ये मधुमत्तमा इंद्रः पूर्भिद । आ० ५. १६. । इति ॥ चातुर्विंशिके माध्यंदिनसवने तस्यैव शस्त्रेऽयं प्रगाथो वैकल्पिकोऽनुरूपः । सूत्रितं च । उदु त्ये मधुमत्तमास्त्वमिंद्र प्रतूर्तिषु । आ० ७. ४. । इति ॥

॥ तत्राद्या सप्तमे पंचदशी ॥

उदु त्ये मधुमत्तमा गिरः स्तोमास ईरते ।

सत्राजितो धनसा अक्षितोतयो वाजयंतो रथा इव ॥ १५

उत् । ऊं इति । त्ये । मधुमत्ऽतमाः । गिरः । स्तोमासः ।

ईरते ।

सत्राऽजितः । धनऽसाः । अक्षितऽऊतयः । वाजऽयंतः ।

रथाःऽइव ॥ १५

त्ये ते प्रसिद्धा मधुमत्तमा अतिशयेन मधुरा गिरोऽप्रगीताः शस्त्ररूपा वाचः स्तोमासः प्रगीतानि बहिष्पवमानादीनि स्तोत्राणि चोदीरते । हे इंद्र त्वामुद्दिश्योच्चार्यंते । ऊर्ध्वं प्रसरंति ॥ ईर गतौ । अदादिकः ॥ सत्र इष्टांतः । सत्राजितः सत्रेण महत्त्वेन जयंतोऽत एव धनसा धनानि संभजंतः ॥ वन षण संभक्तौ । जनसनखनक्रमगमो विट् । विड्वनोरनुनासिकस्यादित्वं ॥ अक्षितोतयः । अक्षिताः अपरिक्षीणा ऊतयो रक्षा येषां ते तथोक्ताः ॥ क्षियो भावे निष्ठा । निष्ठायामण्यदर्थ इति पर्युदासाद्दीर्घाभावः । अत एव क्षियो दीर्घादिति निष्ठानत्वाभावश्च ॥ वाजयंतो वाजमन्नमिच्छंतः ॥ क्यचि न छंदस्यपुत्रस्येतीत्वदीर्घयोः प्रतिषेधः ॥ लंघयितुमिष्टा रथा इव । ते यथा विविधध्वनयः उच्चरंति तद्वदुदीरत इत्यर्थः ॥

॥ इति पंचमस्य सप्तमे सप्तविंशो वर्गः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ षोडशी ॥

कण्वा इव भृगवः सूर्या इव विश्वमिद्धीतमानशुः ।

इंद्रं स्तोमेभिर्महयंत आयवः प्रियमेधासो अस्वरन् ॥ १६

कण्वाःऽइव । भृगवः । सूर्याःऽइव । विश्वं । इत् । धीतं ।

आनशुः ।

इंद्रं । स्तोमेभिः । महयंतः । आयवः । प्रियऽमेधासः ।

अस्वरन् ॥ १६

कण्वा इव कण्वगोत्रोत्पन्ना ऋषय इव स्तुवंतो भृगवो भृगुगोत्रोत्पन्ना ऋषयो धीतमाध्यातं विश्वमित् व्याप्तं सर्वमेवं कृत्स्नमानशुः । व्यापुः । सूर्या इव । यथा सूर्यरश्मयः सर्वं जगद्व्याप्नुवंति तद्वत् । अपि च प्रियमेधासः प्रियमेधा एतत्संज्ञा आयवो मनुष्यास्त एवेंद्रं महयंतः पूजयंतः स्तोमेभिः स्तोमैरस्वरन् । अस्तुवन् ॥ स्वृ शब्दोपतापयोः । भौवादिकः ॥

॥ अथ सप्तदशी ॥

युक्ष्वा हि वृत्रहंतम हरी इंद्र परावतः ।

अर्वाचीनो मघवन्त्सोमपीतय उग्र ऋष्वेभिरा गहि ॥ १७

युक्ष्व । हि । वृत्रहन्ऽतम । हरी इति । इंद्र । पराऽवतः ।

अर्वाचीनः । मघऽवन् । सोमऽपीतये । उग्रः । ऋष्वेभिः ।

आ । गहि १७॥ १

हे वृत्रहंतम । वृत्रं घ्नतरान् वृत्रघ्ना अतिशयेन घ्नतरान् वृत्रहंतमः । यथा पुनर्नोत्तिष्ठति तथा घ्नतानित्यर्थः ॥ अनो नुडिति मतुपो नुट् ॥ हे माहेंद्र हरी त्वदीयावश्वौ युक्ष्व । हिरवधारणे । आत्मीये रथे योजय । हे मघवन् धनवन् उग्र उद्गूर्णबल सोमपीतये सोमपानार्थं ॥ दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं ॥ अर्वा॰

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पीनोऽभवदिन्द्रस्य यथा भिन्नं मेदं येनौषधं हविः सार्धं परावतः। दूरनामैतत्। दूरे वर्तमानाद्युलोकाद् गच्छ। आगच्छ॥ गर्भे जीर्णः सर्पिः। आंदसः यथो लुक्। अनुदात्तोपदेशेत्यनुनासिकलोपः। तस्मादित्युत्तरस्याः पादिरत्यविकल्पयेद् गमाद:॥

॥ अथाष्टादशी ॥

इमे हि ते कारवो वावशुर्धिया विप्रासो मेधसातये।

स त्वं नो मघवन्निंद्र गिर्वणो वेनो न शृणुधी हवं ॥ १८

इमे। हि। ते। कारवः। वावशुः। धिया। विप्रासः।

मेधऽसातये।

सः। त्वं। नः। मघऽवन्। इंद्र। गिर्वणः। वेनः। न।

न। शृणुधि। हवं॥ १८

कारवः कर्मणां कर्तारो विप्रासो मेधाविन इमे होमे खलु यजमाना धिया स्तुत्या हे इंद्र ते त्वां वावशुः। पुनरस्तुवन्॥ वाशृ शब्दे इत्यस्माद्व्यत्ययेनात्मनेपदम्॥ यद्वा वावशुः पुनः पुनरकामयंत॥ वश कांतौ। अस्माद्यङ्लुगंतात्लिटि व्यत्ययेनेति कित्त्वम्। वाश्ववशोऽभ्यासः। लिटि वा तुजादित्वादभ्यासदीर्घत्वं। हि चेति निघातप्रतिषेधः॥ किमर्थं। मेधसातये मेधस्य यागस्य संभजनार्थं॥ सनोतेः क्तिनि जनसनखनामित्यात्वं। दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं॥ हे मघवन् धनवन् गिर्वणो गीर्भिर्वननीय गोऽस्माकं हवं स्तोत्रं स त्वं पूर्वोक्तगुणस्त्वं शृणुधि। शृणु। बुध्यस्व। वेनो न॥ वेनतिः कांतिकर्मा॥ यथा कांतो जातामिलाषः पुरुषः कामयितव्यस्यैकामय्यैव शृणोति तद्वत्॥ श्रु श्रवणे शृणुपृकृवृभ्य इति हेर्धित्वं। अन्येषामपि दृश्यत इति संहितायां दीर्घः॥

॥ अथैकोनविंशी॥

निरिंद्र बृहतीभ्यो वृत्रं धनुभ्यो अस्फुरः।

निरर्बुदस्य मृगयस्य मायिनो निः पर्वतस्य गा आजः॥ १९

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

निः। इंद्र। बृहतीभ्यः। वृत्रं। धनुभ्यः। अस्फुरः।

निः। अर्बुदस्य। मृगयस्य। मायिनः। निः। पर्वतस्य।

गाः। आजः॥ १८

हे इंद्र त्वमावारकममुरं वृत्रं बृहतीभ्यो महद्भ्यः। लिंगव्यत्ययः॥ धनुभ्यो धनुर्भ्यः कोदंडेभ्यः॥ छांदसो रेफलोपः। हेतौ पंचमी॥ महद्भिर्धनुर्भिर्हेतुभिर्निरस्फुरः॥ स्फुरतिर्वधकर्मा॥ निरवधीः। निःशेषेण हतवानसि। यद्वा त्वमावारकं मेघं धनुभ्यः। धन्वंति गच्छंतीति धनव आपः। महतीभ्योऽद्भ्यः॥ तादर्थ्ये चतुर्थी॥ बृहतीनामपां लाभार्थं निरवधीः। अपि च मायिनो मायाविनोऽर्बुदस्यैतत्संज्ञकस्यासुरस्य मृगयस्यैतत्संज्ञकस्य च॥ उभयत्र कर्मणि षष्ठी॥ इमावप्यसुरौ निरस्फुरः। निःशेषेणावधीः॥ मायामब्दस्य व्रीह्यादिषु पाठात् व्रीह्यादिभ्यश्चेति मत्वर्थीय इनिः॥ तथा पर्वतस्य वलनाम्नोऽसुरस्य गवामदर्शनाय निहितस्य गिरेः संबंधिनीर्गा बलेनापहृता निराजः। निरगमयः॥ अज गतिक्षेपणयोः॥

। अथ विंशो ।

निरग्नयो रुरुचुर्निरु सूर्यो निः सोम इंद्रियो रसः।

निरंतरिक्षादधमो महामहिं कृषे तदिंद्र पौंस्यं॥ २०

निः। अग्नयः। रुरुचुः। निः। ऊं इति। सूर्यः। निः।

सोमः। इंद्रियः। रसः।

निः। अंतरिक्षात्। अधमः। महां। अहिं। कृषे। तत्।

इंद्र। पौंस्यं॥ २०

हे इंद्र महां महांतं कृत्स्नस्य जगतो व्यापकत्वेनाच्छादनशीलं वृत्रं यदा त्वमंतरिक्षादाकाशादधमो निरगमयः॥ धमतिर्गतिकर्मा। तत्तदानीं पौंस्यं वृत्रहननहेतुभूतं बलं कृषे। कुरुषे। पुरस्कुरुषे॥ करोतेश्छांदसो विकरणस्य लुक्॥ अग्नयश्च त्रिस्थानगतास्ता नो रुरुचुः। निःशेषेण दिदीपिरे। सूर्यः प्रेरक आदित्योऽपि

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

निःश्रेयेण दिदीपे। इंद्रिय इंद्रेण मेध्यो रथो रथाश्वादोऽस्तमयः सोमश्च निःश्रेयेण दिदीपे। अन्यादयः सर्वे पूर्वं इत्येषाद्वसत्वाभिःप्रचाः संत इदानीं तस्मिन्नायत्ते चर्त सव्यद् प्रकाशितत्यर्थः॥

॥ इति पंचमस्य सप्तमेऽष्टाविंशो वर्गः॥

॥ अथैकविंशो॥

यं मे दुरिंद्रो मरुतः पाकस्थामा कौरयाणः।

विश्वेषां त्मना शोभिष्ठमुपेव दिवि धावमानं॥ २१

यं। मे। दुः। इंद्रः। मरुतः। पाकऽस्थामा। कौरयाणः।

विश्वेषां। त्मना। शोभिष्ठं। उपऽइव। दिवि। धावमानं॥ २१

इत्यादिकेन चतुरृचेन कुरयाणपुत्रस्य पाकस्थाम्नो राज्ञो दानं लब्ध्वा मेध्यातिथिस्तदीयं दानं स्तौति। यं याचमानं धनरूपं मह्यमिंद्रो मरुतश्च दुः दत्तवंतः तादृशेन धनसमूहं कौरयाणः। कुरून् प्रति कुत्सितस्य न कृतं यानं प्रयाणादिकं येनासौ कुरयाणः। तस्य पुत्रः कौरयाणः। पाकस्थामा। निष्ठुरेणेति स्थाम बलं। परिपक्वबलः। एतत्संज्ञो राजा मह्यं प्रादात्॥ ददातेर्लुङि गातिस्थेति सिचो लुक्। अडभावश्छांदसः॥ कीदृशं धनसंघं। विश्वेषां सर्वेषां धनानां मध्ये त्मनात्मना स्वत एव शोभिष्ठमतिशयेन शोभायमानं॥ मंत्रेष्वाङ्याद्देरित्यात्मन आकारलोपः। शोभा- वच्छब्दादतिशायनिक इष्ठन्। विन्मतोर्लुक्। यस्येति लोपः॥ अतिशयेन शोभावदित्यर्थः। दिव्याकाश उपेव धावमानं प्रधावितं धीमगामिनं सूर्यमिव। शोभापत्तमित्यर्थः॥

॥ अथ द्वाविंशो॥

रोहितं मे पाकस्थामा सुधुरं कक्ष्यप्रां।

अदाद्रायो विबोधनं॥ २२

रोहितं। मे। पाकऽस्थामा। सुऽधुरं। कक्ष्यऽप्रां।

अदात्। रायः। विऽबोधनं॥ २२

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

पाकस्थामा राजा रोहितं लोहितवर्णं प्रयच्छन् मा मे मह्यमदात्। ददातेः। वोढवे। सुधुरं शोभनधुरं शोभनवहनसमर्थं॥ ऋक्पूरब्धूः। पा० ५.४.७४। इत्यकारः समासान्तः। नञ्सुभ्यामिति बहुव्रीहावुत्तरपदाद्युदात्तत्वं॥ कक्ष्यप्रां। कक्ष्या कक्षयोर्बाह्वोर्मूलयोर्बध्यमाना रज्जुः तस्याः प्रातारं पूरयितारं। पीवरमित्यर्थः॥ प्रा पूरणे॥ रायो धनस्य विबोधनं विशेषेण बोधकं। बहुधनप्राप्तिहेतुमित्यर्थः जञ्जिदक्षिवादिना रायो विभक्तिरुदात्ता॥

॥ अथ त्रयोविंशी॥

यस्मा अन्ये दश प्रति धुरं वहंति वह्नयः।

अस्तं वयो न तुग्र्यं॥ २३

यस्मै। अन्ये। दश। प्रति। धुरं। वहंति। वह्नयः।

अस्तं। वयः। न। तुग्र्यं॥ २३

पूर्वोक्त एवाश्वो विशेष्यते। यस्मै॥ षष्ठ्यर्थे चतुर्थी॥ यस्याश्वस्य संबन्धि वा धुरं वोढव्यं युगधुरमन्ये प्रकृतादश्वाद्व्यतिरिक्ता दशसंख्याका वह्नयो वोढारोऽश्वा बलीवर्दा वा प्रतिनियताः संतो धुरं वोढुं वहंति बिभ्रति। बहूनामेकत्र वहने दृष्टांतः। अस्तं। अस्यते क्षिप्यते तस्मिन्पदार्थजातमित्यस्तं गृहं। प्रति वयो न गंतारोऽश्वा यथा तुग्र्यं तुग्रपुत्रं भुज्युं समुद्रमध्यादवहन् तद्वत्। तादृशमश्वं मह्यं प्रादादिति पूर्वस्यास्यान्वयः॥ तुग्र्योमहयं च नावया भुज्युमूहथुः। ऋग्वे० १.११६.४.। इत्यादावनुसंधेयं। यद्वा यस्मा इति कर्मणि चतुर्थी। यं रथमन्ये दशसंख्याका वह्नयो वोढारोऽश्वा धुरं वहनप्रदेशं प्रति गताः संतो वहंति तादृशं रथमपि मह्यं ददावित्यर्थः॥

॥ अथ चतुर्विंशी॥

आत्मा पितुस्तनूर्वास ओजोदा अभ्यंजनं।

तुरीयमिद्रोहितस्य पाकस्थामानं भोजं दातारमब्रवं॥ २४

आत्मा। पितुः। तनूः। वासः। ओजःऽदाः। अभिऽअंजनं।

तुरीयं। इत्। रोहितस्य। पाकऽस्थामानं। भोजं।

दातारं। अब्रवं॥ २४

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

अयं पाकस्थामात्मा स्वं पितुरन्नस्य तनूस्तनयः। पिता यथा जन्मादिसंपत्तिस्तथा प्रयच्छ एवमयमपीत्यर्थः। तथा वासो वासयिता निवासयिता॥ वासयतेरौणादिकोऽसुन्॥ अभ्यंजनमभिव्यञ्जकं यथा भवति तथोजोदा ओजसो बलस्य दाता धारयिता वा। यद्वात्मा सततगामी। पितुरित्यन्ननाम। अन्नमन्नं येन दत्तं। तनूर्विस्तृतं वासो वस्त्रमभ्यंजनमभ्यंजनसाधनं घृततैलादिकं च येन दत्तं। यद्वौजोदा बलस्य दातारं पाकस्थामानं तुरीयं स्वकीयप्रपितामहापेक्षया चतुर्थं। यद्वा तुरीयं शत्रूणां तुर्वकं हिंसितारं भोजं शत्रूणां भोजयितारं रोहितस्य लोहितवर्णस्य पूर्वोक्तस्याश्वस्य दातारं। एवंगुणकं पाकस्थामानमब्रवं। उक्तेन प्रकारेणास्तौषं। इदिति पूरकः॥

॥ इति पंचमस्य सप्तमे एकोनत्रिंशो वर्गः॥

यदिंद्रेत्येकविंशत्यृचं चतुर्थं सूक्तं काण्वगोत्रस्य देवातिथेरार्षं। अन्त्या त्वियं पुरउष्णिक् विषमास्त्वयुजो बृहत्यो युजः सतोबृहत्यः। स्थूरं राध इत्यादिभिश्चतसृभिः कुरुंगदानस्य स्तूयमानत्वात्तास्तद्देवताकाः। तत्रांत्याः पादस्याद्याचतस्रः पूषदेवताका इंद्रदेवताका वा शिष्टा ऐंद्र्यः। तथा चानुक्रांतं। यदिंद्र सैका देवातिथिर्बार्हतोऽन्त्यः पुरउष्णिगंतः कुरुंगस्य दानस्तुतिस्तत्रांत्याश्चतस्रः पौष्ण्यो वेति॥ षष्ठाहे निष्केवल्ये बार्हतप्रगाथेष्वाद्याश्चतुर्दशर्चः शंसनीयाः। तथैव पंचमारण्यके। यदिंद्र प्रागपागुदगिति चतुर्दश। ऐ० आ० ५. १०। इति॥ चातुर्विंशिकेऽहनि माध्यंदिने सवनेऽच्छावाकशस्त्र आद्यः प्रगाथो वैकल्पिकः स्तोत्रियः। सूत्रितं हि। यदिंद्र प्रागपागुदङ्न्यग्वा गौरो यथा सतं। आ० ७. ४। इति॥

॥ तत्र प्रथमा॥

यदिंद्र प्रागपागुदङ्न्यग्वा हूयसे नृभिः।

सिमा पुरू नृषूतो अस्यानवेऽसि प्रशर्ध तुर्वशे॥ १

यत्। इंद्र। प्राक्। अपाक्। उदंक्। न्यक्। वा। हूयसे। नृऽभिः।

सिम। पुरु। नृऽसूतः। असि। आनवे। असि। प्रऽशर्ध। तुर्वशे॥ १

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे इंद्र यद् यदि प्राक् प्राच्यां दिशि वर्तमानैः ॥ सप्तम्यंताद्दिक्छब्दाद्दिगित्यस्तातेरंचेर्लुक् । पा० ५. ३. ३०. । इति लुक् ॥ अपाक् प्रतीच्यां दिशि वर्तमानैः । यदि वोदक् उदीच्यां दिशि वर्तमानैः । यद्वा न्यक् नीच्यां दिश्यधस्ताद्वर्तमानैः ॥ अधी इति नेः प्रकृतिस्वरत्वं । उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं ॥ एवंभूतैर्नृभिः स्तोतृभिस्त्वं हूयसे स्वरक्षायै आहूयसे हे शिप्र श्रेष्ठेंद्र । शिप्र इति वै श्रेष्ठमाचक्षत इति वाजसनेयकं । यद्यप्येवं बहुभिराहूयसे तथाप्यानवे । अनुर्नाम राजा । तस्य पुत्रे राजर्षौ पुरु बहुलं नृषूतो नृभिरस्मदीयैः स्तोतृभिः प्रेरितोऽसि भवसि । राज्ञो हितकरणे त्वां स्तोतारः प्रेरयंतीत्यर्थः ॥ षू प्रेरणे । अस्मात्कर्मणि निष्ठा । तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं ॥ अपि च हे प्रशर्ध प्रकर्षेण शर्धयितरभिभवितरिंद्र तुर्वशे एतन्नाम्नि च राजनि नृषूतोऽसि नृभिः प्रेरितो भवसि ॥

॥ अथ द्वितीया ॥

यद्वा रुमे रुशमे श्यावके कृप इंद्र मादयसे सचा ।

कण्वासस्त्वा ब्रह्मभिः स्तोमवाहस इंद्रा यच्छंत्या गहि ॥ २

यत् । वा । रुमे । रुशमे । श्यावके । कृपे । इंद्र । मादयसे । सचा ।

कण्वासः । त्वा । ब्रह्मऽभिः । स्तोमऽवाहसः । इंद्र । आ । यच्छंति । आ । गहि ॥ २

यद्वा यद्यपि रुमादिषु चतुर्षु राजसु हे इंद्र त्वं सचा सह मादयसे माद्यसि तथापि स्तोमवाहसः स्तोमानां स्तोत्राणां वोढारः कण्वासः कण्वगोत्रा ऋषयो ब्रह्मभिः परिवृढैः स्तोत्रैर्हविर्भिर्वा हे इंद्र त्वामायच्छंति । आगमयंति । यद्वा द्वितीयार्थे तृतीया । ब्रह्मभिरन्नानि हवींष्याभिमुख्येन प्रयच्छंति । ददति ॥ दाण् दाने । पाघ्राध्मादिना यच्छादेशः ॥ अतस्त्वमागहि । शीघ्रमागच्छ ॥ गमेर्लोटि छांदसः शपो लुक् ॥

चातुर्विंशिकेऽहनि माध्यंदिनसवनेऽच्छावाकशस्त्रे यद्वेति प्रगाथोऽनुरूपः । सूत्रितं च । यथा गौरो अपा कृतमित्यच्छावाकस्य । आ० ७. ४. । इति ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तत्र प्रथमा सूक्ते तृतीया ॥

यथा॑ गौ॒रो अ॒पा कृ॒तं तृष्य॒न्नेत्यवे॑रि॒णं ।

आ॒पि॒त्वे नः॑ प्रपि॒त्वे तूय॒मा ग॑हि॒ कण्वे॑षु॒ सु सचा॒ पिब॑ ॥ ३

यथा॑ । गौ॒रः । अ॒पा । कृ॒तं । तृष्य॑न् । एति॑ । अव॑ । इरि॑णं ।

आ॒ऽपि॒त्वे । नः॒ । प्र॒ऽपि॒त्वे । तूय॑ं । आ । ग॒हि॒ । कण्वे॑षु ।

सु । सचा॑ । पिब॑ ॥ ३

गौरो गौरमृगस्तृष्यन् पिपासन् अपा उदकैः ॥ 'व्यत्ययेनैकवचनं । उडिद-मित्यादिना विभक्तेराकारः' ॥ कृतं संपूर्णं जलपूरितं निकृष्टं तटाकदेशं यथा येन प्रकारेणावैति अवगच्छति । अवशब्दोऽधिकवदर्थे । अधिकतरः सन् शीघ्रं गच्छति तथापित्वे पंचुले प्रपित्वे प्राप्ते सति हे इंद्र त्वं नोऽस्मान् तूयं क्षिप्रमाण्मत् ! शीघ्रमागच्छ । आगच्छ । आगत्य च कण्वेषु अस्मत्पुत्रेष्वास्माकु सचा सहैकत्वेनैव पिबमानं सवं सोमं सु सुष्टु पिब ॥

॥ अथ चतुर्थी ॥

मंदं॑तु त्वा मघवन्निंद्रेंदवो॑ राधो॒देया॑य सुन्व॒ते ।

आ॒मुष्या॒ सोम॑मपिबश्च॒मू सु॒तं ज्येष्ठं॒ तद्द॑धिषे॒ सहः॑ ॥ ४

मंद॑तु । त्वा॒ । म॒घ॒ऽव॒न् । इं॒द्र॒ । इं॒दवः॑ । रा॒धः॒ऽदेया॑य ।

सु॒न्व॒ते ।

आ॒ऽमुष्य॑ । सोम॑ं । अ॒पि॒बः॒ । च॒मू इति॑ । सु॒तं । ज्येष्ठ॑ं ।

तत् । द॒धि॒षे॒ । सहः॑ ॥ ४

हे मघवन् धनवन्निंद्र इंदवः क्लिन्नाः सोमास्त्वा मंदंतु । मादयंतु हर्षयंतु ॥ मदेर्व्यत्ययेन परस्मैपदं ॥ [illegible] । सुन्वते सोमाभिषवं कुर्वते यजमानाय राधोदेयाय राधसो धनस्य दानार्थं ॥ ददातेर्भावे यदिति भावे यत् । ईद्यतीतीकारः । [illegible]

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इत्याद्युदात्तत्वं वेदुत्तरपदप्रकृतिस्वरत्वं। यद्वरत्तुम इति सुन्वच्चब्दात्परा विभक्ति- स्त्दात्ता॥ अपि च त्वं सोमपानुत्याभोषयं ऊ नर अदद्मपि यत्रापपञ्चत्वापिवः। पीतवानसि। स यस्मैशउं तत्या प्रावृषा सोमपानिवदिति श्रुतेः। कीदृशं सोमं। चमू। चम्वोरधिषवणफलकयोः सुतमभिषुतं। यद्वा चमूभ्यां चमसाभ्यां चोद्ध- वैवांसदपनू च संबंधिभ्यां मंखलाविवंधतोवरीभिः सुतमभिषुतं। यस्मादेवं तस्मात्सर्वात् ज्येष्ठं प्रशस्यतमं सुपमयं मा सखो बलं दधिषे। हे इंद्र त्वं धारयसि। अतो अदीया अपि सोमास्त्वां मादयंत्विति प्रार्थ्यते॥

॥ अथ पंचमी ॥

प्र चंक्रे सहसा सहो बभंज मन्युमोजसा।

विश्वे त इंद्र पृतनायवो यहो नि वृक्षा इव येमिरे॥ ५

प्र। चक्रे। सहसा। सहः। बभंज। मन्युं। ओजसा।

विश्वे। ते। इंद्र। पृतनाऽयवः। यहो इति। नि।

वृक्षाःऽइव। येमिरे॥ ५

स इंद्रः सहसालीवेनाभिभवेन वीर्यकर्मणा सहः शत्रूणामभिभवनं प्रचक्रे। प्रकर्षेण कृतवान्। तथौजसा बलेन मन्युं परकीयं क्रोधं बभंज। भग्नवान्। उत्तरोऽर्धर्चः प्रत्यक्षकृतः। हे यहो। महन्नामैतत्। हे महन्निंद्र विश्वे सर्वे पृतनायवो युद्धकामाः शत्रवस्ते त्वया वृक्षा इव वज्रेणा इव नियेमिरे। नियता आसन्। यथा वृक्षा निचलाश्चिरंति तद्वदित्यर्थापारा अभूवन्नित्यर्थः॥

॥ इति पंचमस्य सप्तमे त्रिंशो वर्गः॥

॥ अथ षष्ठी॥

सद्मेवेप सचते यवीयुधा वस्मा आनड्‌पंस्तुतिं।

पुत्रं प्रीणन् शंसते सुवीर्यं दाश्नोति नमउक्तिभिः॥ ६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सहस्रेणऽइव । सचते । यविऽयुधा । यः । ते । आनट् ।

उपऽस्तुतिं ।

पुत्रं । प्रावर्गं । कृणुते । सुऽवीर्ये । दाश्नोति । नमउक्तिऽभिः ॥ ६

हे इंद्र ते तवोपस्तुतिं स्तोत्रं यः पुरुष आनट् प्राप्नोति त्वां प्रापयति ॥ अश्नोतेर्लुङि व्यत्ययेन परस्मैपदं ॥ सचते । समवैति ॥ षच समवाये ॥ सहस्रेणैव यथा सहस्रसंख्येन धनेन संगच्छते इत्यर्थः ॥ यश्च यजमानो नमउक्तिभिर्नमस्कारवचनैः स्तोत्रैः सार्धं दाश्नोति हवींषि तुभ्यं ददाति ॥ दाशृ दाने । स यजमानं सुवीर्ये शोभनवीर्ययुक्ते संग्रामे प्रावर्गं प्रकर्षेण शत्रूणां वर्जयितारं पुत्रं कृणुते । करोति । उत्पादयति । त्वत्प्रसादाल्लभत इत्यर्थः ॥ प्रपूर्वाद्वृजेः कर्मण्युपपदे अन्तर्भावितण्यर्थात्कर्तरि घञ् । उपसर्गस्य घञ्यमनुष्ये इति दीर्घः । थाथादिनोत्तरपदान्तोदात्तत्वं ॥ यद्वा सुवीर्ये इत्येतत्पुत्रस्य विशेषणं ॥ द्वितीयार्थे सप्तमी ॥ शोभनवीर्यं पुत्रं ॥ वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं ॥

॥ अथ सप्तमी ॥

मा भेम मा श्रमिष्मोग्रस्य सख्ये तव ।
महत्ते वृष्णो अभिचक्ष्यं कृतं पश्येम तुर्वशं यदुं ॥ ७

मा । भेम । मा । श्रमिष्म । उग्रस्य । सख्ये । तव ।
महत् । ते । वृष्णः । अभिऽचक्ष्यं । कृतं । पश्येम । तुर्वशं ।
यदुं ॥ ७

हे इंद्र उग्रस्योद्गूर्णबलस्य तव सख्ये सखित्वे सति वयं मा भेम । मा भैष्म । कुतश्चिदपि शत्रोर्भीता मा भूम । मा श्रमिष्म । श्रांताः पीडिताश्च मा भूम । वृष्णः कामानां वर्षितुस्ते तव संबंधि महत्प्रभूतं कृतं वृत्रवधादिलक्षणं कर्माभिचक्ष्यं । अभितः ख्यापनीयं स्तोतव्यं । अतो महानुभावस्य तव सख्यं प्राप्तानां भीतिश्रमौ न जायेते इत्यर्थः । तत्कथमवगम्यत इति चेदुच्यते । तुर्वशमेतन्नामकं राजानं यदुमेतन्नामकं च त्वत्प्रसादात्सुखेन जीवंतौ पश्येम । दृश्यंतः खलु नरः । अतः कारणात्त्वत्सख्यं प्राप्तस्य भयादिकं न जायत इत्येतदुपपन्नमित्यर्थः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथाष्टमी ॥

सव्यामनु स्फिग्यं वावसे वृषा न दानो अस्य रोषति ।
मध्वा संपृक्ताः सारघेण धेनवस्तूयमेहि द्रवा पिब ॥ ८

सव्यां । अनु । स्फिग्यं । ववसे । वृषा । न । दानः । अस्य ।
रोषति ।
मध्वा । संऽपृक्ताः । सारघेण । धेनवः । तूयं । आ । इहि ।
द्रव । पिब ॥ ८

वृषा कामानां वर्षितेंद्रः सव्यां दक्षिणेतरां स्फिग्यं कटिप्रदेशमनु ॥ तृतीयार्थेऽनोः कर्मप्रवचनीयत्वं ॥ सव्यया स्फिग्या शरीरैकदेशेनैव वावसे । वस्ते । सर्वभूतजातमाच्छादयति । स्वयं कृत्स्नं जगदतीत्य वर्तत इत्यर्थः । निगमांतरं च भवति । यदन्यया स्फिग्या क्षाममस्याः । ऋग्वे० ३. ३२. ११. । इति । अपि च दानोऽवखंडयिता ॥ दान अवखंडने ॥ पचाद्यच् ॥ स चास्मिन्निंद्रं न रोषति । न हिनस्ति ॥ रिष रुष हिंसायां ॥ इंद्रं हिंसितुं शक्तः कश्चिदपि नास्तीत्यर्थः । यद्वा दानो हविषां दाता यजमानश्चास्येंद्रस्य न रोषति । रोषं न जनयति । सर्वदा हविर्भिः परिचरतीत्यर्थः । उत्तरोऽर्धर्चः प्रत्यक्षकृतः । सारघेण । सरघा मधुमक्षिका । तत्संभवेन मध्वा मधुना । लुप्तोपममेतत् । मधुनेव स्वादुतमेन क्षीरादिना गव्यद्रव्येण संपृक्ताः संस्कृताः संस्कृता धेनवो धेनुवत् प्रीतिजनका अस्मदीयाः सोमाः । यद्वा धिनोतेः प्रीणनार्थस्येदं रूपं । प्रीणयितार इत्यर्थः । यत एवमतः कारणात् हे इंद्र तूयं क्षिप्रमेहि । अस्मत्समीपमागच्छ । आगत्य च द्रव । सोमा यत्राभिषुताः तत्र वेदिलक्षणे स्थाने वर्तंते तं देशं शीघ्रं गच्छ ॥ द्रु गताविति धातुः । द्व्यचोऽतस्तिङ इति सांहितिको दीर्घः ॥ तदनंतरमध्वर्युणा दत्तं सोमं पिब । तेन सोमेन स्वकीयमुदरं पूरयेत्यर्थः ॥

। अथ नवमी ।

अश्वी रथी सुरूप इद्गोमाँ इदिंद्र ते सखा ।
श्वात्रभाजा वयसा सचते सदा चंद्रो याति सभामुप ॥ ९

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अश्वी । रथी । सुऽरूपः । इत् । गोऽमान् । इत् । इंद्र । ते ।
सखा ।
श्वात्रऽभाजा । वयसा । सचते । सदा । चंद्रैः । याति । सभां ।
उप ॥ ८

हे इंद्र ते तव सखा मित्रभूतः पुरुषोऽश्वादिगुणविशिष्ट एव भवति । इष्टकद्वः प्रत्येकमभिसंबध्यते । अश्वोत् यद्धभिरश्वैर्युक्त एव भवति । न कदाचिदश्वैर्वियुज्यते । रथी रथवानेव स भवति । सुरूप इत् शोभनरूपः शोभनावयव एव स भवति । गोमां इत् बह्वीभिर्गोभिर्युक्त एव स भवति । न कदाचिदेतैर्वियुज्यत इत्यर्थः । अपि च श्वात्रभाजा । श्वात्रमिति धननाम । आश्वनीयं शीघ्रं प्राप्तव्यं शोभनं धनं संभजतेऽन्नधनसंयुक्तेन वयसा । वयनामैतत् । अन्नेन स सर्वदा सचते । सगवैति । संगच्छते ॥ षच समवाये ॥ अत एव चंद्रः सर्वेषामाह्लादकः सन् सभां जनसंसद-मुपयाति । उपगच्छति ॥

। अथ दशमी ।

ऋश्यो न तृष्यन्नवपानमा गहि पिबा सोमं वशाँ अनु ।
निमेघमानो मघवन्दिवेदिव ओजिष्ठं दधिषे सहः ॥ १०

ऋश्यः । न । तृष्यन् । अवऽपानं । आ । गहि । पिब ।
सोमं । वशान् । अनु ।
निऽमेघमानः । मघऽवन् । दिवेऽदिवे । ओजिष्ठं । दधिषे ।
सहः ॥ १०

हे इंद्र ऋश्यो न ऋश्यसंज्ञो मृग इव तृष्यन् पिपासया व्याप्तः अवपानमवनीयं यद्वा-वनसादिषु पानीयमानीतं पातव्यं सोममागहि । अभिगच्छ । गत्वा च तमभसदीयं सोमं वशाँ अनु अनुकामं यथाकामं पिब । यावता पीतेन पर्याप्तिर्जायते तावता सोमेन स्वोदरं पूरयेत्यर्थः । अत एव सोमपानात् प्राप्तबलस्त्वं दिवे दिवे प्रतिदिवसं निमेघमानो यजमानाय सुखानि वृष्टिजलादीनि सिंचन् हे मघवन्निंद्र ओजिष्ठमोजस्वित-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मघवन् पंचसु सङ्घो बलं दधिषे। धारयसि॥ ओजस्वियद्वादिष्विति विभक्तेर्लुगिति विनो लुक्। टेरिति टिलोपः॥

॥ इति पंचमस्य सप्तम एकत्रिंशो वर्गः॥

॥ अथैकादशी॥

अध्व॑र्यो द्रावया॒ त्वं सोम॒मिंद्रः॑ पिपासति।

उप॑ नू॒नं यु॑युजे॒ वृष॑णा॒ हरी॒ आ च॑ जगाम वृत्र॒हा॥ ११

अध्व॑र्यो इति॑। द्रवय॑। त्वं। सोम॑म्। इंद्रः॑। पि॒पा॒स॒ति॒।

उप॑। नू॒नं। यु॒यु॒जे। वृष॑णा। हरी॒ इति॑। आ। च।

ज॒गा॒म। वृ॒त्र॒ऽहा॥ ११

हे अध्वर्यो अध्वरस्य नेतस्त्वं सोमं द्रावय। उत्तरवेदिस्थापनीयं स्थानं प्रापय। यद्वा रसात्मना द्रवणशीलं कुरु। अभिषुणु इत्यर्थः। किं कारणमिति चेत्, इंद्रः पिपासति। इमं सोमं पातुमिच्छति। तर्हि गच्छत्वागमनमिति चेत् तत्राह। वृषणा वर्षितारौ युवानौ वा हरी अश्वौ नूनमिदानीं युयुजे। उपगम्य सारथिर्नियुक्तवान्। वृत्रहा वृत्रस्य हंतेंद्र आजगाम। आगतवान्॥

॥ अथ द्वादशी॥

स्वयं॑ चि॒त्स मं॑न्यते॒ दाशु॑रि॒र्जनो॒ यत्रा॒ सोम॑स्य तृं॒पसि॑।

इ॒दं ते॒ अन्नं॒ युज्यं॒ समु॑क्षितं॒ तस्येहि॒ प्र द्र॑वा॒ पिब॑॥ १२

स्वयं॑। चि॒त्। सः। म॒न्य॒ते॒। दाशु॑रिः। जनः॑। यत्र॑।

सोम॑स्य। तृं॒पसि॑।

इ॒दं। ते॒। अन्न॑म्। यु॒ज्य॑म्। सम्ऽउ॑क्षितम्। तस्य॑। आ। इ॒हि॒।

प्र। द्र॒व॒। पिब॑॥ १२

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

दाशुरिदीश्वान् ॥ दाशतेरौणादिक उरिन् ॥ हविषां दाता स यजमानलक्षणो जनः स्वयं चित् स्वयमेवात्मनैव मन्यते । सर्वं जानाति । परायत्तप्रज्ञो न भवतीत्यर्थः । यत्र यस्मिञ्जने सोमस्य पानेन हे इंद्र त्वं तं पश्चि तस्य च ॥ तप तप्य तृपो । तौदादिकः । शे तृंफादीनां । पा० ७. १. ५९. १. । इति नुम् ॥ ते त्वदीयं युज्यं योग्यमिदमस्मदीयं सोमलक्षणमदं सहुषितं मध्यक् पात्रेष्वासिक्तं ॥ उच सेचने । कर्मणि निष्ठा । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं ॥ अतस्त्वं तादृशं सोममेहि । अभिगच्छ । प्रद्रव । शीघ्रं प्राप्नुहि । तदनंतरं पिब । पानं कुरु ॥

॥ अथ त्रयोदशी ॥

रथेष्ठायाध्वर्यवः सोममिंद्राय सोतन ।

अधि ब्रध्नस्याद्रयो वि चक्षते सुन्वंतो दाश्वध्वरं ॥ १३

रथेऽस्थाय । अध्वर्यवः । सोमं । इंद्राय । सोतन ।

अधि । ब्रध्नस्य । अद्रयः । वि । चक्षते । सुन्वंतः ।

दाशुऽअध्वरं ॥ १३

रथेष्ठाय । रथे तिष्ठतीति रथेष्ठः ॥ सुपि स्थ इति कप्रत्ययः । तत्पुरुषे कृति बहुलमिति सप्तम्या अलुक् ॥ एवंलक्षणायेंद्राय हे अध्वर्यवः सोमं सोतन । अभिषुणुत ॥ षुञ् अभिषवे । तप्तनप्तनथनाश्चेति तनबादेशः ॥ ब्रध्नस्य बुधस्य मूलस्याभिषवार्थं चर्मणि स्थापितस्योपरावस्य विस्तृतस्याश्मनोऽध्युपर्यद्रयोऽभिषवपाषाणास्तद्यु दिक्षु वर्तमाना दाश्वध्वरं दाश्वांदातृयजमानस्याध्वरो यागो येन निष्पद्यते तादृशं सोमं सुन्वंत स्वकीयेन ध्वनिरूपेण कर्मणा स्वयमेवाभिषुण्वंतो वि चक्षते । विशेषेण प्रकाशंते । सोमाभिषवेऽतिशयेनानुकूला वर्तंत इत्यर्थः । अथवात्रांद्रयः । अद्रिभिर्ग्रावभिरध्वर्यवः सोममभिषुण्वंतीति योज्यं ॥

॥ अथ चतुर्दशी ॥

उप ब्रध्नं वावाता वृषणा हरी इंद्रमपसु वक्षतः ।

अर्वाचं त्वा सप्तयोऽध्वरश्रियो वहंतु सवनेदुप ॥ १४

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उप । भ्रम । ववाता । वृषणा । हरी इति । इंद्रं । अपऽसु ।

वक्षतः ।

अर्वांचं । त्वा । सप्तयः । अध्वरऽश्रियः । वहंतु । सवना ।

इत् । उप ॥ १४

यभ्रम तदिदं वावाता संभक्तवंतौ ॥ वननेर्निष्ठायां छांदसं द्विर्वचनमिडभावः आत्वं धातुस्वरश्च । अन्येषामपि दृश्यत इति सांहितिकोऽभ्यासदीर्घः । यद्वा वावाता पुनःपुनर्गंतौ ॥ वा गतिगंधनयोः । अस्माद्यङ्लुगंतात्कर्तरि निष्ठा ॥ वृषणा वृषणौ सेक्तारौ हरी हरणशीलावश्वावुभयगुणौ संतावपस्सु फलदीयेषु कर्मसु ॥ अपस् शब्दः सकारांतः कर्मवचनः । धीरोपवसनानां छंदसि लोपो वक्तव्य इतीह सकारो लुप्यते ॥ तत्रेममिंद्रमुपवक्षतः । उपवहतां । उपानयतां ॥ वहतेर्लेट्यडागमः । सिब्बहुलमिति सिप् ॥ अपि चाध्वरश्रियोऽध्वरं श्रयमाणाः सप्तयः सर्पणशीला अन्येऽपि त्वदीया अश्वाः सवना सवनानि प्रातःसवनादीन्यस्मद्यागसंबंधीनि प्रति हे इंद्र त्वामर्वांच-मभिमुखमुपवहंतु । उपगमयंतु । इदिति पूरणः ॥

। अथ पंचदशी ।

प्र पूषणं वृणीमहे युज्याय पुरूवसुं ।

स शक्र शिक्ष पुरुहूत नो धिया तुजे राये विमोचन ॥ १५

प्र । पूषणं । वृणीमहे । युज्याय । पुरुऽवसुं ।

सः । शक्र । शिक्ष । पुरुऽहूत । नः । धिया । तुजे । राये ।

विऽमोचन ॥ १५

इदवाद्यास्तु चतस्र ऋचः पूष्ण इंद्रस्य च लिंगसद्भावादेता उभयथा व्याख्यायंते । पुरूवसुं बहुधनं पूषणं पोषकमिंद्रं यद्वैतन्नामकं देवं प्र वृणीमहे । प्रकर्षेण संभजामहे । किमर्थं । युज्याय । युंक्त इति युक् सखा । तस्य भावाय । सखित्वायेत्यर्थः । हे शक्र शक्त पुरुहूत बहुभिराहूत हे विमोचन पापाद्विमोचयितरिंद्र पूषन्वा स त्वं नोऽस्मान् धिया त्वदीयया बुद्ध्या शिक्ष । यतान् अनुशिक्ष । किमर्थं । राये धनाय

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

धनप्राप्त्यर्थं व्रजे शत्रून् तेजयितुं हिंसितुं ॥ तुज हिंसायां तस्मात्कृत्यार्थे केन्प्रत्ययः ॥ यद्वा राय इति क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी । जातायेकवचनं रायो धनानि धिया स्तुत्या प्रीतः सन् नोऽस्मभ्यं । पिश । देहि ॥ पिशतिर्दानकर्मा । छिदांमिति रायो विभक्तिरुदात्ता ॥

॥ इति पंचमस्य सप्तमे द्वात्रिंशो वर्गः ॥

॥ अथ षोडशी ॥

सं नः शिशीहि भुरिजोरिव क्षुरं रास्व रायो विमोचन ।
त्वे तन्नः सुवेदमुस्रियं वसु यं त्वं हिनोषि मर्त्यं ॥ १६

सं । नः । शिशीहि । भुरिजोःऽइव । क्षुरं । रास्व । रायः ।
विऽमोचन ।
त्वे इति । तत् । नः । सुऽवेदं । उस्रियं । वसु । यं । त्वं ।
हिनोषि । मर्त्यं ॥ १६

हे इंद्र पूषन्वा नोऽस्मान् सं शिशीहि । सम्यक् निश्य । तीक्ष्णबुद्धीन् कुरु । भुरिजोरिव । बाहुनामैतत् । नापितस्य बाह्वोरिव स्थितं क्षुरमिव । अपि च हे विमोचन पापाद्विमोचन पापाद्विमोचयितः रायो धनानि रास्व । अस्मभ्यं देहि ॥ रा दाने ॥ तत्कस्य हेतोः । त्वे त्वयि उस्रियं । उस्रा गावः । तत्संबद्धं तदस्य निवासकं धनं नोऽस्माकं सुवेदं सुलभं नान्येषु देवेषु । यं धनसमूहं मर्त्यं मनुष्यं स्तोतारं प्रति त्वं हिनोषि प्रेरयसि तद्धस्त्वयीत्यन्वयः । यस एवं तस्मात्प्रार्थ्यत इति योज्यं ॥

॥ अथ सप्तदशी ॥

वेमि त्वा पूषन्नृंजसे वेमि स्तोतव आघृणे ।
न तस्य वेम्यरणं हि तद्वसो स्तुषे पज्राय साम्ने ॥ १७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वेमि त्वा। पूषन्। ऋंजसे। वेमि। स्तोतवे। आघृणे।

न। तस्य। वेमि। अरणं। हि। तत्। वसो इति। स्तुषे।

पज्राय। साम्ने॥ १७

हे पूषन् पोषकेंद्र एतन्नामक वा देव त्वा त्वामृंजसे प्रसाधयितुं वेमि। कामये। आघृणे आगतदीप्ते स्तोतवे त्वां स्तोतुं वेमि। कामये। त्वद्व्यतिरिक्तं देवांतरं तस्य स्तोत्रं न वेमि। न कामये। कुत इति चेत्। हि यस्मादरणमरमणमसुखकरं। अतस्त्वामेव स्तोतुं कामय इत्यर्थः। हे वसो वासक स्तुषे स्तुवते पज्राय प्रार्जकाय स्तोतॄणां साम्ने। साम स्तोत्रं। सामर्थ्यादस्मान् लक्ष्यते। तद्वसे। वहा पज्र इति कक्षीवत आख्या। आम्नातं हि। यद्वां पज्रासो अश्विना हवंते। ऋग्वे० १. ११७. १०.। इति। तस्मै कक्षीवत इव मह्यं। सामर्थ्यादुपचारो लभ्यते। अपेक्षितं धनं देहीति शेषः॥

॥ अथाष्टादशी ॥

परा गावो यवसं कच्चिदाघृणे नित्यं रेक्णो अमर्त्य।

अस्माकं पूषन्नविता शिवो भव मंहिष्ठो वाजसातये॥ १८

परा। गावः। यवसं। कत्। चित्। आघृणे। नित्यं।

रेक्णः। अमर्त्य।

अस्माकं। पूषन्। अविता। शिवः। भव। मंहिष्ठः।

वाजऽसातये॥ १८

हे आघृणे आगतदीप्ते पूषन्निंद्र वा कच्चित् कस्मिंश्चित्कालेऽस्मदीया गावो यवसं तृणं भक्षितुं परा गच्छंति। हे अमर्त्य अमरण देव तदानीं रेक्णस्तद्गोरूपं धनं नित्यमविनाशं ध्रुवमस्तु। चोरव्याघ्रादिभिर्हिंसितं मा भूत्। अपि च हे पूषन् पोषयितरस्माकमविता रक्षिता भूत्वा शिवः सुखकरो भव। तथा वाजसातये वाजस्यान्नस्य बलस्य वा संभजनार्थं मंहिष्ठो दातृतमो भव॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथैकोनविंशी ॥

स्थूरं राधः शताश्वं कुरुङ्गस्य दिविष्टिषु ।

राज्ञस्त्वेषस्य सुभगस्य रातिषु तुर्वशेष्वमन्महि ॥ १९

स्थूरम् । राधः । शतऽअश्वम् । कुरुङ्गस्य । दिविष्टिषु ।

राज्ञः । त्वेषस्य । सुऽभगस्य । रातिषु । तुर्वशेषु ।

अमन्महि ॥ १९

इदमादिकेन तृचेन देवातिथिः कुरुङ्गनाम्नो राज्ञो दानं स्तौति। कुरुङ्गस्य। कुरून् जेतुं गच्छति कुरुं गच्छतीति वा कुरुङ्गः॥ डोऽन्यत्रापि दृश्यत इति गमेर्डः। पृषोदरादिः॥ एवंगुणस्य त्वेषस्य दीप्तस्य सुभगस्य शोभनधनस्यैवंभूतस्य राज्ञः संबन्धिनीषु दिविष्टिषु दिवः स्वर्गस्यैषणेषु प्राप्तिहेतुभूतासु यागक्रियासु रातिषु दानेषु दक्षिणारूपेषु सत्सु तुर्वशेषु। मनुष्यनामैतत्॥ निर्धारणे सप्तमी। मनुष्येषु मध्ये वयं स्थूरं स्थूलं प्रभूतं शताश्वमश्वानां शतेन युक्तं राधो धनमन्मन्महि। अमन्महि। अलभामहीत्यर्थः॥

॥ अथ विंशी ॥

धीभिः सातानि काण्वस्य वाजिनः प्रियमेधैरभिद्युभिः ।

षष्टिं सहस्रानु निर्मजामजे निर्यूथानि गवामृषिः ॥ २०

धीभिः । सातानि । काण्वस्य । वाजिनः । प्रियऽमेधैः ।

अभिद्युऽभिः ।

षष्टिम् । सहस्रा । अनु । निःऽमजाम् । अजे । निः । यूथानि ।

गवाम् । ऋषिः ॥ २०

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

काण्वस्य कण्वपुत्रस्य वाजिनो हविष्मतो मेधातिथेः संबंधिभिर्धीभिर्बुद्धिभिः स्तोतृभिः सातानि संभक्तान्यभिद्युभिरभिगतदीप्तिभिः प्रियमेधैरेतत्संज्ञैश्च ऋषिभिः सेवितानि नियुतां निःशेषेण युतानां गवां षष्टिं सहस्रा षष्टिसंख्याकानि सहस्राणि यूथान्यृषिरिदानीमिच्छन्ननु पश्चात् निरजे। निःशेषेणागच्छं। साकल्येन प्राप्तवानस्मि॥ अज गतिक्षेपणयोः॥ यथा प्रियमेधानां काण्वानां च गवां यूथानि राज्ञा दत्तानि तत्प्रविष्टहोतं एवं तेन दत्तानि मया प्रविष्टह्यंत इत्यर्थः॥

॥ अथैकविंशी॥

इच्छाश्चिन्मे अभिपित्वे अरारणुः।
गां भजंत मेहनाश्वं भजंत मेहना॥ २१

इच्छाः। चित्। मे। अभिऽपित्वे। अररणुः।
गां। भजंत। मेहना। अश्वं। भजंत। मेहना॥ २१

मे ममाभिपित्वे पूर्वोक्ते धनेऽभिप्राप्ते सति इच्छाश्चित् इच्छा अप्यरारणुः। अरमन्त। कथमिति तदाह। इम ऋषयो मेहना मंहनीयां प्रशस्तां गां भजंत। प्राप्नुवंत। अलभंत। मेहना मंहनीयमश्वं च भजंत। अलभंतेति॥ गामश्वमिति जात्यभिप्रायमेकवचनं॥ यद्वा मेहनेति च इह नेति पदत्रयात्मकमेकं पदं। यदाह यास्कः। यदिंद्र चित्रं मायनीयं मंहनीयं धनमस्ति। यन्म इह नास्तीति वा त्रीणि मध्यमानि पदानि॥ तदेवं व्याख्यातं। इम ऋषयो गामश्वं चाभजंत। इहास्मिन्राजनि प्रयच्छति धनस्य तद्दानं मम न शोभनं नासीदिति इच्छाप्रमुखा सर्वेऽपि जनाः प्रोचुरित्यर्थः॥

॥ इति पंचमस्य सप्तमे त्रयस्त्रिंशो वर्गः॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीरबुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये पंचमाष्टके सप्तमोऽध्यायः समाप्तः॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।

निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

अथाष्टमो व्याख्यानमारभ्यते । अष्टमे मंडले प्रथमेऽनुवाके चत्वारि सूक्तानि व्याख्यातानि । दूरादित्येकोनचत्वारिंशदृचं पंचमं सूक्तं कण्वगोत्रस्य ब्रह्मातिथेरार्षं । आदितः षट्त्रिंशद्गायत्र्यः । ततो द्वे बृहत्यौ । अंतिमानुष्टुप् । अंत्येषु पंचस्वृक्षु चैद्यपुत्रस्य कशुनाम्नो राज्ञो दानं स्तूयते । अतस्तद्देवताकाः । शिष्टा आश्विन्यः । तथा चानुक्रांतं । दूरादेकोनचत्वारिंशद्ब्रह्मातिथिराश्विनं द्विबृहत्यनुष्टुबंतं गायत्रं पंचाद्यंचोच्चैद्यस्य कशोर्दानस्तुतिरिति ॥ प्रातरनुवाक आश्विनशस्त्रयोराश्विने क्रतौ गायत्रे छंदस्यंत्यपंचवर्जमिदं सूक्तं । सूत्र्यते हि । दूरादिहैवेति तिस्र उत्तमा उद्धरेत् । आ० ४, १५, । इति ॥

॥ तत्र प्रथमा ॥

दूरादिहेव यत्सत्यरुणप्सुरशिश्वितत् ।

वि भानुं विश्वधातनत् ॥ १

दूरात् । इहऽइव । यत् । सती । अरुणऽप्सुः । अशिश्वितत् ।

वि । भानुं । विश्वधा । अतनत् ॥ १

दूरात् दूरे एव विप्रकृष्ट एव नभसः प्राक्प्रदेशे वर्तमानेऽप्येव समीप इव समीपे विद्यमानेव ॥ सत्येति वर्तरि अस्तेरल्लोप उगितश्चेति ङीप् । शतुरनुम इति नद्या उदात्तत्वं ॥ अरुणप्सुः आरोचमानरूपा । ईदृश्युषा यद्यदा अशिश्वितत् अश्वेतयत् ॥ श्विता वर्णे । अस्माण्ण्यंतात् लुङि चङि रूपं । यद्वृत्तान्नित्यमिति निघातप्रतिषेधः ॥ तदा भानुं दीप्तिं विश्वधा बहुविधं व्यतनत् । विस्तारितवती ॥ तनोतेर्व्यत्ययेन शप् ॥ ईदृशीमुषसं हे अश्विनौ सचेथे इत्युत्तरस्यैकवाक्यता । यद्वा प्रातरनुवाकस्य उपक्षेपेण कांडेनोषा स्तुता सती प्रादुर्बभूव । हे अश्विनौ युवां सेव्यमानमाश्विनं क्रतुं श्रोतुं युवामपि प्रादुर्भवतमित्यध्याहारेण वाक्यं पूरणीयं ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ द्वितीया ॥

नृवद्दस्रा मनोयुजा रथेन पृथुपाजसा ।
सचेथे अश्विनोषसं ॥ २

नृऽवत् । दस्रा । मनःऽयुजा । रथेन । पृथुऽपाजसा ।
सचेथे इति । अश्विना । उषसं ॥ २

हे दस्रा दस्रौ दर्शनीयौ शत्रूणामुपक्षपयितारौ वा ॥ सुपां सुलुगित्याकारः ॥ हे अश्विनावश्विनौ नृवत् नृभिर्नेतृभिस्तुल्यं यथा भवति तथा युवां ॥ तत्र तदर्हमिति द्वितीयार्थे वतिः ॥ यद्वा नृवन्तौ ॥ नृशब्दान्मतुपश्छांदसत्वं । रयुर्मिति मान्यादौ छंदसीर इति वत्वं । ङ्योपश्छांदसो लुक् । पथ्युत्क्रष्टं मतुविति मतुप उदात्तत्वं ॥ देवयोरुषसं रथेन स्तोयेन वाहनेन सचेथे । सम्यगागच्छथः ॥ सच समवाये ॥ यद्वा सचतिः सेवनार्थः । सचेथे । सेवेथे । तदाह यास्कः । सचस्वा नः स्वस्तये सेवस्व नः स्वस्तय इति । कीदृशेन रथेन । मनोयुजा मनसैव व्यापारान्तिरपेक्षेण अरणमात्रेणाश्वैर्युज्यमानेन पृथुपाजसा विस्तीर्णबलेन यद्वा वेगेन वा उषस ऽनंतर-मश्विनोः स्तूयमानत्वात्ताविश्विनौ गच्छत इत्युच्यते ॥

॥ अथ तृतीया ॥

युवाभ्यां वाजिनीवसू प्रति स्तोमा अदृक्षत ।
वाचं दूतो यथोहिषे ॥ ३

युवाभ्यां । वाजिनीवसू इति । वाजिनीऽवसू । प्रति ।
स्तोमाः । अदृक्षत ।
वाचं । दूत । यथा । ओहिषे ॥ ३

हे वाजिनीवसू । वाजो हविर्लक्षणमन्नं । तदाश्रया यागक्रिया वाजिनी । सैवास्ति धनं ययोरस्ति तौ तथोक्तौ । यद्वाश्वयुक्तं स्तोतृभ्यो देयं वसु धनं ययोरस्ति तादृशौ । हे अश्विनौ युवाभ्यां स्तोमा अस्माभिः कृतानि स्तोत्राणि प्रत्यदृक्षत ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रतिहर्य्यतां ॥ हर्येश्छांदसः कर्त्तरि तृच् । लिङ्सिचावात्मनेपदेष्विति किच्चात्गुण-
वृद्ध्योरित्यभावः । प्रत्ययस्वरत्वानि ॥ अच्छ च यथा येन प्रकारेण दूतः प्रेष्यो वाचं स्वामिनो वाक्यं याचते तथा । युवयोः प्रीतिपूर्वं कां याचमोऽच्छिषे ॥ पुरुषव्यत्ययः ॥ याचे ॥ चर्हिरंदीते याचन इत्यर्थः । व्यत्ययेनात्मनेपदं ॥ यद्वा दूतो यथा स्वामिनोक्तां वाचं विदेशस्थमन्यं प्रापयति एवमहमपि स्तुतिरूपां वाचमोऽच्छिषे । वदे । युवां प्रापयामि ॥ वदेर्व्यत्ययेन मध्यमः छांदसं संप्रसारणं । छंदस्युभयथेत्यार्द्धधातुकत्वादि-डागमः । यवभावो लघूपधगुणश्च । एङि पररूपमिति पररूपत्वं ॥

॥ अथ चतुर्थी ॥

पुरुप्रिया ण ऊतये पुरुमंद्रा पुरूवसू ।
स्तुषे कण्वासो अश्विना ॥ ४

पुरुऽप्रिया । नः । ऊतये । पुरुऽमंद्रा । पुरुवसू इति पुरुऽवसू ।
स्तुषे । कण्वासः । अश्विना ॥ ४

पुरुप्रिया बहूनां प्रियौ पुरुमंद्रा बहुमदौ बहूनां मादयितारौ वा । यद्वा पुरु बहुलं मादयंतौ पुरुवसू बहुधनौ । ईदृशावश्विनावश्विनौ नःऽस्माकमूतये रक्षणाय कण्वासः कण्वगोत्रा वयं स्तुषे । स्तुमहे ॥ पुरुषवचनयोर्व्यत्ययः ॥ यद्वा कण्वास इति पूजार्थं बहुवचनं । ऋषिरात्मानं संबोध्य ब्रूते । हे अंतरात्मन् कण्वासः कण्वगोत्रस्त्वं स्तुषे । अश्विनौ स्तुहि ॥

॥ अथ पंचमी ॥

मंहिष्ठा वाजसातमेषयंता शुभस्पती ।
गंतारा दाशुषो गृहं ॥ ५

मंहिष्ठा । वाजऽसातमा । इषयंता । शुभः । पती इति ।
गंतारा । दाशुषः । गृहं ॥ ५

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

मंहिष्ठा मंहिष्ठौ मंहनीयौ पूजनीयौ यद्वा दातृतमौ वाजसातमा । वाजोऽन्नं बलं वा । तस्यातिशयेन दातारौ । यद्वा । वाजो संग्रामस्तस्य संभक्तृतमौ ॥ सनोतेः सनतेर्वा जनसनखनेति विट् । विड्वनोरनुनासिकस्यात्वं ॥ इषयंता स्तोतृभ्य इषमन्नं कुर्वंतौ ॥ इट् तदाचष्टे तत्करोतीति णिच् । णेरिष्ठवद्भावेन टिलोपे प्राप्ते प्रकृत्यैकाजिति प्रकृतिभावः ॥ यद्वैषयंतैषयंतौ सर्वाणि प्रापयंतौ ॥ इष गतौ । अस्माद्धेतुमणिच् । संज्ञापूर्वकस्य विधेरनित्यत्वाद्गुणाभावः ॥ शुभः शोभनस्य धनस्य दक्षस्य या पती स्वामिनौ ॥ षष्ठ्याः पतिपुत्रेति विसर्जनीयस्य सत्वं ॥ दाशुषः हविःपुरोडाशादीनि दत्तवतो यजमानस्य गृहं गंतारा गमनशीलौ ॥ गमेस्ताच्छीलिकस्तृन् । अतो न लोकाव्ययेति कर्मणि षष्ठ्याः प्रतिषेधः ॥ ईदृशावश्विनौ स्तुम इति शेषः ॥

॥ इति पंचमस्याष्टमे प्रथमो वर्गः ॥

॥ अथ षष्ठी ॥

ता सुदेवाय दाशुषे सुमेधामवितारिणीं ।

घृतैर्गव्यूतिमुक्षतं ॥ ६

ता । सुऽदेवाय । दाशुषे । सुऽमेधां । अविऽतारिणीं ।

घृतैः । गव्यूतिं । उक्षतं ॥ ६

हे अश्विनौ ता तौ युवां सुदेवाय । शोभना देवा येन यष्टव्याः स तथोक्तः ॥ बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं ॥ तस्मै दाशुषे हवींषि दत्तवते यजमानाय ॥ तादर्थ्ये चतुर्थी ॥ ईदृग्यजमानार्थं सुमेधां शोभनप्रज्ञामवितारिणीं । वितरणं विगमनमपायः । तदनपायिनीं ॥ नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं ॥ ईदृशीं गव्यूतिं । गावो यूयंते संयुज्यंतेऽत्रेति गव्यूतिर्गोसंचारभूमिः ॥ गोर्यूतौ छंदसीत्यवादेशः ॥ तां घृतैः क्षरणशीलैरुदकैरुक्षतं । सिंचतं उक्ष सेचने ॥

॥ अथ सप्तमी ॥

आ नः स्तोममुप द्रवत्तूयं श्येनेभिराशुभिः ।

यातमश्वेभिरश्विना ॥ ७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आ। नः। स्तोमं। उपं। द्रवत्। तूयं। श्येनेभिः। आशुऽभिः।

यातं। अश्वेभिः। अश्विना॥ ७

हे अश्विनावश्विनौ नोऽस्माकं स्तोमं स्तोत्रमश्वेभिरश्वैः। द्रवत् तूयमित्युभे क्षिप्रनामनी। एकः पूरकः। तूयं क्षिप्रमुपायातं। उपगच्छतं। यद्वा द्रवदिति स्तोत्रविशेषणं। द्रवत् शीघ्रं प्रवर्तमानं स्तोत्रमित्यर्थः। कीदृशैरश्वैः। श्येनेभिः शंसनीयगामिभिः प्रशस्तगमनैराशुभिः शीघ्रगैः॥

॥ अथाष्टमी ॥

येभिस्तिस्रः परावतो दिवो विश्वानि रोचना।

त्रीँरक्तून्परिदीयथः॥ ८

येभिः। तिस्रः। पराऽवतः। दिवः। विश्वानि। रोचना।

त्रीन्। अक्तून्। परिऽदीयथः॥ ८

हे अश्विनौ तिस्रो दिवस्त्रीण्यहानि त्रीनक्तून् तिस्रो रात्रीश्च॥ अत्यन्तसंयोगे द्वितीया॥ एतावन्तं कालं विश्वानि सर्वाणि व्याप्तानि च रोचना रोचमानानि नक्षत्राणि देवच्छत्राणि परावतो दूरदेशान्येभिर्यैरश्वैः परिदीयथः परिगच्छथः॥ दीयतिर्गतिकर्मा॥ तैरश्वैः स्तोत्रमुपयातमिति पूर्वत्रान्वयः॥

॥ अथ नवमी ॥

उत नो गोमतीरिष उत सातीरहर्विदा।

वि पथः सातये सितं॥ ९

उत। नः। गोऽमतीः। इषः। उत। सातीः। अहःऽविदा।

वि। पथः। सातये। सितं॥ ९

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अन्यदपि च वै यच्छविंदा यज्ञो संभवितारौ । यद्वाद्रि प्रभातसमये वेदिमध्ये स्तोतव्यौ नेऽभ्यं गोमतीवंद्धुभिर्गोभिर्युक्ता इयोऽन्नानि दत्तमिति शेषः । अन्यदपि च सातौ संभजनीया दातव्या वा रायस्पोषमभ्यं दत्तं ॥ सनतेः सनं नेर्दा कर्त पि क्तिन् । जनसनखनामित्यात्वं । ऊतियूतीत्यादिना क्तिन उदात्तत्वं निपात्यते ॥ अपि चास्माकं सातय उक्तानां गवादीनां लाभाय संभजनाय वा पथस्तदुपायरूपान्मार्गान् पि सितं । निषेधेन यथेष्टं । यथान्ये न प्रविशंति तथा कुरुतमित्यर्थः ॥ षिञ् बंधने । छांदसो विकरणस्य लुक् । यद्वोपसर्गवशादयं धातुः स्वार्थविपरीते बंधनाभावे वर्तते । प्रसरणं प्रस्थानमिति यथा ॥ पथो मार्गान विसितं । वियुक्तं । प्रवर्तयतमित्यर्थः ॥ पथिन्शब्दोऽन्तोदात्तः । तस्य पथि टिलोप उदात्तनिवृत्तिस्वरेण यस उदात्तत्वं ॥

॥ अथ दशमी ॥

आ नो गोमंतमश्विना सुवीरं सुरथं रयिं ।

वोळ्हमश्वावतीरिषः ॥ १०

आ । नः । गोऽमंतं । अश्विना । सुऽवीरं । सुऽरथं । रयिं ।

वोळ्हं । अश्वऽवतीः । इषः ॥ १०

हे अश्विनाश्विनौ नोऽस्मभ्यं रयिं धनमावोळ्हं । आवहतं । आवहतं वहेर्लोटि छांदसः शपो लुक् । ढत्वधत्वष्टुत्वढलोपेषु कृतेषु सहिवहोरोदवर्णस्येत्योत्वं ॥ कीदृशं रयिं । गोमंतं बह्वीभिर्गोभिर्युक्तं सुवीरं । वीर्याज्जायंत इति वीराः पुत्राः । शोभनैस्तैरुपेतं । विविधमीरयंति शत्रूनिति वा वीराः शूराः । तैरुपेतं । सुरथं शोभनरथेन युक्तं । अपि चाश्वावतीरश्वयुक्ताः ॥ मंत्रे सोमाश्वेति मतौ दीर्घः ॥ इषः इष्यमाणान्यन्नानि चास्मभ्यमावहतं ॥

॥ इति पंचमस्याष्टमे द्वितीयो वर्गः ॥

द्विदेवत्यस्याश्विनग्रहस्य याष्टधानेत्येषा याज्या । सूत्रितं हि । होता यक्षदश्विना नासत्या याष्टधाना शुभस्पती । आ० ५, ५, । इति ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ सैषैकादशी ॥

वावृधाना शुभस्पती दस्रा हिरण्यवर्तनी ।
पिबतं सोम्यं मधु ॥ ११

वावृधाना । शुभः । पती इति । दस्रा ।
हिरण्यवर्तनी इति हिरण्यऽवर्तनी ।
पिबतं । सोम्यं । मधु ॥ ११

हे शुभस्पती शुभः शोभनस्यालंकारस्योदकस्य वा पती स्वामिनौ हे अश्विनौ ॥ सुबामंत्रित इति षष्ठ्यंतस्य परांगवद्भावात् षष्ठ्यामंत्रितसमुदायस्याष्टमिकं सर्वानुदात्तत्वं ॥ दस्रा दर्शनीयौ शत्रूणामुपक्षपयितारौ वा हिरण्यवर्तनी हिरण्मयमार्गौ । यद्वा वर्ततेऽस्मिन्निति वर्तनी रथः । हिरण्मयो रथो ययोस्तौ । यद्वा वर्तनि वर्तनमाचरणं । हितरमणीयाचरणौ । वावृधानौ प्रवृद्धौ ॥ वृधेर्लिटः कानच् ॥ ईदृशौ युवां सोम्यं सोममयं मधु माधुर्योपेतं मदकरं वा रसं पिबतं ॥

॥ अथ द्वादशी ॥

अस्मभ्यं वाजिनीवसू मघवद्भ्यश्च सप्रथः ।
छर्दिर्यंतमदाभ्यं ॥ १२

अस्मभ्यं । वाजिनीवसू इति वाजिनीऽवसू । मघवत्ऽभ्यः ।
च । सऽप्रथः ।
छर्दिः । यंतं । अदाभ्यं ॥ १२

हे वाजिनीवसू । वाजिनी हविर्युक्ता यागक्रिया । तस्यां वसु धनं हविर्भागलक्षणं ययोस्तथाविधौ हे अश्विनावस्मभ्यं स्तोतृभ्यो मघवद्भ्यः । मघं धनं हविर्लक्षणं । तद्वद्भ्यो यजमानेभ्यश्च सप्रथः सर्वतः पृथु विस्तीर्णमदाभ्यं केनाप्यहिंस्यं छर्दिः । छर्दिरिति गृहनामैतत् । गृहं यंतं । नियच्छतं दत्तमिति यावत् यमेश्छांदसः शपो लुक् । छंदस्युभयथेत्यार्धधातुकत्वेन ङित्त्वाभावादनुनासिकलोपाभावः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ त्रयोदशी॥

नि षु ब्रह्म जनानां याविष्टं तूयमा गतं।

मो ष्व१'न्याँ उपारतं॥ १३

नि। सु। ब्रह्म। जनानां। या। अविष्टं। तूयं। आ। गतं।

मो इति। सु। अन्यान्। उप। अरतं॥ १३

हे अश्विनौ या यौ युवां जनानां प्राणिनां मध्ये ब्रह्म ब्राह्मणजातिं सु सुष्ठु नि नितरामविष्टं अरक्षिष्टं। यद्वा जनानां यजमानानां ब्रह्म परिवृढं स्तोत्रं हविर्लक्षणमन्नं वा यौ युवां न्यविष्टं न्यगच्छतं॥ अवतिर्गत्यर्थः॥ तौ युवां तूयं क्षिप्रनामैतत्। क्षिप्रमस्मानभ्यागच्छतं। अन्यान् अस्मद्व्यतिरिक्तान्यजमानान् मो नैव सु उपारतं। उपगतं। कदाचिदपि नैव प्राप्नुतमित्यर्थः॥ अर्तेर्गतौ लुङि सर्तिशास्त्यर्तिभ्यश्चेति च्लेरङादेशः॥

आपराह्णिके पात्र्ये सवनेऽश्विनोरस्य पिबतमिति द्वितीया याज्या। सूत्रितं च। अस्य पिबतमश्विनेति च। प्रैषिको होता। आ० ४.७.। इति॥

॥ सैषा सूक्ते चतुर्दशी॥

अस्य पिबतमश्विना युवं मदस्य चारुणः।

मध्वो रातस्य धिष्ण्या॥ १४

अस्य। पिबतं। अश्विना। युवं। मदस्य। चारुणः।

मध्वः। रातस्य। धिष्ण्या॥ १४

हे अश्विनावश्विनौ हे धिष्ण्यौ। धिषणा स्तुतिः। तदर्हौ युवं युवां मदस्य मदकरस्य चारुणः शोभनस्य रातस्यास्माभिर्दत्तस्यास्य मध्वो मधुरस्य सोमस्य [illegible] तल्लक्षणं भागं पिबतं॥ यद्वा द्वितीयार्थे षष्ठी॥ इमं सोमं पिबतं॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ पंचदशी ॥

अग्ने आ वंहतं र॒यिं शतवंतं सहस्रिणं ।

पुरुक्षुं विश्वधायसं ॥ १५

अग्ने इतिं । आ । वहतं । र॒यिं । शतऽवंतं । सहस्रिणं ।

पुरुऽक्षुं । विश्वऽधायसं ॥ १५

हे अश्विनावस्मे अस्मभ्यं रयिं धनमावहतं । आनयतं । कथंभूतं । शतवंतं शतसंख्योपेतं सहस्रिणं सहस्रसंख्यापेतं च पुरुक्षुं बहुनिवासं यद्वा पुरुभिर्बहुभिः स्तुत्यं विश्वधायसं विश्वेषां सर्वेषामस्मदीयानां धारकं ॥ वहिष्ठाधाभ्यामस्यंदसीति दधातेरसुन् । पादित्यनुवर्तेर्युगागमः ॥

॥ इति पंचमस्याष्टमे तृतीयो वर्गः ॥

॥ अथ षोडशी ॥

पुरुत्रा चिद्धि वां नरा विह्वयंते मनीषिणः ।

वाघद्भिरश्विना गतं ॥ १६

पुरुऽत्रा । चित् । हि । वां । नरा । विऽह्वयंते । मनीषिणः ।

वाघत्ऽभिः । अश्विना । आ । गतं ।

हे नरा नरो नेतारौ धनस्य नेतारावश्विनौ मनीषिणो मनस ईशितारः स्तोतारो वां युवां पुरुत्रा चिद्धि बहुषु हि देशेषु विह्वयंते । विविधमाह्वयंति । तथा सति हे अश्विनौ वाघद्भिर्ऋत्विग्भिः स्तोतृभिस्तैरागतं । अस्मानेवागच्छतं ॥

॥ अथ सप्तदशी ॥

जनासो वृक्तबर्हिषो हविष्मंतो अरंकृतः ।

युवां हवंते अश्विना ॥ १७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

जनासः । वृक्तऽबर्हिषः । हविष्मंतः । अरंऽकृतः ।

युवां । हवंते । अश्विना ॥ १७

वृक्तबर्हिषः । वृक्तं छिन्नं बर्हिर्यैस्ते तथोक्ताः । हविष्मंतो हविर्भिर्युक्ता अरंकृतः पर्याप्तकारिणः । यद्वा हविरादीनामलंकर्तारो जनास ऋत्विग्लक्षणा जना हे अश्विनाश्विनौ युवां हवंते । आह्वयंति । अत आगच्छतमिति शेषः ॥

॥ अथाष्टादशी ॥

अस्माकमद्य वामयं स्तोमो वाहिष्ठो अंतमः ।

युवाभ्यां भूत्वश्विना । १८

अस्माकं । अद्य । वां । अयं । स्तोमः । वाहिष्ठः । अंतमः ।

युवाभ्यां । भूतु । अश्विना ॥ १८

अद्येदानीमस्माकमयं स्तोमोऽस्मदीयं स्तोत्रं हे अश्विनौ वां युवयोर्वाहिष्ठो वोढृतमः प्रापयितृतमः सन् युवाभ्यामंतमोऽतिकतमोऽतिशयेन समीपवर्ती भूतु भवतु ॥ तमे तादेशेऽस्त्यंतिकशब्दस्य नादिलुप् चांते । भवतेर्लोटि छंदसः शपो लुक् ॥

॥ अथैकोनविंशी ॥

यो ह वां मधुनो दृतिराहितो रथचर्षणे ।

ततः पिबतमश्विना । १९

यः । ह । वां । मधुनः । दृतिः । आऽहितः । रथऽचर्षणे ।

ततः । पिबतं । अश्विना ॥ १९

हे अश्विनाश्विनौ रथचर्षणे रथस्य गमने दृश्यमाने देशे यो दृतिर्मधुनो मधुरस्याभिषुतस्य सोमस्य संबंधी तेन मधुना पूर्ण आहितः स्थापितः अतस्तस्माद् दृतेः सकाशात्सोमं पिबतं ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ विंशी ॥

तेन नो वाजिनीवसू पश्वे तोकाय शं गवे ।

वहतं पीवरीरिषः ॥ २०

तेन । नः । वाजिनीवसू इति वाजिनीऽवसू । पश्वे । तोकाय ।

शं । गवे ।

वहतं । पीवरीः । इषः ॥ २०

हे वाजिनीवसू । वाजोऽन्नं बलं वा । तद्युक्तधनौ नोऽस्माकं पश्वे पशवेऽस्मादि-लक्षणाय ॥ जसादिषु छंदसि वावचनमिति घेर्ङितीति गुणस्य विकल्पितत्वादगुणः ॥ तोकाय पुत्राय गवे च । जात्यभिप्रायं सर्वत्रैकवचनं ॥ पश्वादिभ्यः शं सुखं यथा भवति तथा पीवरीः प्रवृद्धानीषोऽन्नानि तेन धनदानेन रथेन वहतं । आवहतं । प्रापयतं । इत्यर्थः ॥

॥ इति पंचमस्याष्टमे चतुर्थो वर्गः ॥

॥ अथैकविंशी ॥

उत नो दिव्या इषं उत सिंधूँरहर्विदा ।

अप द्वारेव वर्षथः ॥ २१

उत । नः । दिव्याः । इषः । उत । सिंधून् । अहःऽविदा ।

अप । द्वाराऽइव । वर्षथः ॥ २१

उतापि च हे अहर्विदा अह्नो लंभयितारौ । यद्वाह्नि यागाहःसु वेदितव्यौ स्तोतव्यावश्विनौ दिव्या दिवि भवा इष अन्नानि नोऽस्मदर्थं द्वारेव द्वाराणीव विवृतेनापवर्षथः । विवाहयथ युवां विजयथः । उतापि च सिंधून् स्यंदमाना नदीः पूर्वैः सेचकैरस्माकं ... अपवर्षथ इत्यर्थः ॥

॥ अथ द्वाविंशी ॥

कदा वां तौग्र्यो विधत्समुद्रे जहितो नरा ।

यद्वां रथो विभिष्पतात् ॥ २२

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

कदा। वां। तौग्र्यः। विधत्। समुद्रे। जहितः। नरा।

यत्। वां। रथः। विऽभिः। पतात् ॥ २२

हे नरा नरौ नेतारावश्विनौ तौग्र्यस्तुग्रपुत्रो भुज्युः समुद्रे जलधौ जहितो त्यक्तोऽसुरैः शत्रुभिः सन् कदा कस्मिन्काले वां युवां विधत्। अविधत्। स्तुतिभिः पर्यचरत्। यद्यदा वां युवयोर्विभिर्गन्तृभिरश्वैर्युक्तो रथः पतात् भुज्युमानेतुं पतेत् गच्छेत्। तदानीं भुज्युरस्तौदिति पूर्वार्धेन दृष्टस्य प्रतिवचनं ॥

॥ अथ त्रयोविंशी ॥

युवं कण्वाय नासत्यापिरिप्ताय हर्म्ये।

शश्वदूतीर्दशस्यथः ॥ २३

युवं। कण्वाय। नासत्या। अपिऽरिप्ताय। हर्म्ये।

शश्वत्। ऊतीः। दशस्यथः ॥ २३

हे नासत्या सत्यौ साधु सत्यौ। न सत्यावसत्यौ। न असत्यौ नासत्यौ॥ नभ्राण्नपा-दिति नञः प्रकृतिभावः॥ यद्वा सत्यस्य नेतारौ नासिकाप्रभवौ वा। उक्तं च भगवता यास्केन। सत्यावेव नासत्यावित्यौर्णवाभः। सत्यस्य प्रणेतारावित्याग्रायणः। नासिकाप्रभवौ वेति। तौ युवां कण्वायैतन्नाम्ने ऋषये हर्म्ये गृहे अपिरिप्ताया-व्याधिताय शश्वत् बह्वीर्युष्मदीया रक्षा दशस्यथः। दत्तवन्तौ। युवं कण्वायापिरि-प्ताय चक्षुः प्रत्यधत्तं। ऋग्वे० १. ११८. ७। इत्यत्रैतिह्य उक्तः। सोऽत्र द्रष्टव्यः॥

॥ अथ चतुर्विंशी ॥

ताभिरा यातमूतिभिर्नव्यसीभिः सुशस्तिभिः।

यद्वां वृषण्वसू हुवे ॥ २४

ताभिः। आ। यातं। ऊतिऽभिः। नव्यसीभिः। सुशस्तिऽभिः।

यत्। वां। वृषण्वसू इति वृषण्ऽवसू। हुवे। २०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे हमवसू वर्षं यधनो ॥ इयमस्त्रामयोरुपसंख्यानमिति इयण् भावो निपात्यते ॥ तदानीं ताभिः पूर्वोक्ताभिर्नव्यसीभिर्नवतराभिः सुष्टुतिभि सुप्रशस्ताभिः स्तुतिभी रक्षाभिः सार्धं यायातं । आ गच्छतं यद्यदा वां हुवे स्तुतिभिराह्वयामि ॥

॥ अथ पंचविंशी ॥

यथा चित्कण्वमावतं प्रियमेधमुपस्तुतं ।

अत्रिं शिंजारमश्विना ॥ २५

यथा । चित् । कण्वं । आवतं । प्रियऽमेधं । उपऽस्तुतं ।

अत्रिं । शिंजारं । अश्विना ॥ २५

हे अश्विनाश्विनौ यथा चिद्येन खलु प्रकारेण कण्वमेतन्नामानमृषिमावतं अरक्षतं । प्रियमेधं प्रिययज्ञमेतन्नामकं चोपस्तुतमेवंनामकं च शिंजारं शब्दयंतं स्तुवंतमत्रिमेता-न्नामानं येन प्रकारेणारक्षतं तथास्मानपि रक्षतमिति शेषः । यद्वैतावद्वा उपस्तुत-प्रभृतयैकवाक्यता ॥

॥ इति पंचमस्याष्टमे पंचमो वर्गः ॥

॥ अथ षड्विंशी ॥

यथोत कृत्व्ये धनेंऽशुं गोष्वगस्त्यं ।

यथा वाजेषु सोभरिं ॥ २६

यथा । उत । कृत्व्ये । धने । अंशुं । गोषु । अगस्त्यं ।

यथा । वाजेषु । सोभरिं ॥ २६

उतापि च यथा येन प्रकारेण धने कृत्ये कर्तव्ये प्राप्तव्ये सत्यंशुमेतन्नामकं स्तोतार-मावतं अरक्षतं । गोषु च लब्धव्यासु यथागस्त्यमृषिमरक्षतं । वाजेष्वन्नेषु लब्धव्येषु यथा येन प्रकारेण सोभरिमेतन्नामकमृषिं चारक्षतं अत्रापि पूर्ववद्वाक्यशेषेण समस्तयैकवाक्यता कार्या ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ सप्तविंशी ॥

एतावद्वां वृषण्वसू अतो वा भूयो अश्विना ।

गृणंतः सुम्नमीमहे ॥ २७

एतावत् । वां । वृषण्वसू इति वृषण्ऽवसू । अतः । वा ।

भूयः । अश्विना ।

गृणंतः । सुम्नं । ईमहे ॥ २७

हे वृषण्वसू वर्षकधनावश्विनाश्विनौ गृणंतः स्तुवंतो वयमेतावत् यथा चित् कण्वमित्यादिना यावदनुक्रांतमेतत्परिमाणं सुम्नं सुखमतो वास्मादा भूयो बहुतरम् अधिकं सुम्नं वा युवामीमहे । याचामहे ॥

॥ अथाष्टाविंशी ॥

रथं हिरण्यवंधुरं हिरण्याभीशुमश्विना ।

आ हि स्थाथो दिविस्पृशं ॥ २८

रथं । हिरण्यऽवंधुरं । हिरण्यऽअभीशुं । अश्विना ।

आ । हि । स्थाथः । दिविऽस्पृशं ॥ २८

हे अश्विनाश्विनौ हिरण्यवंधुरं । सारथिस्थानं वंधुरं हिरण्मयसारथिस्थानं हिरण्याभीशुं हिरण्मयप्रग्रहं दिविस्पृशमत्युन्नतत्वाद्दिवं स्पृशंतं ॥ स्पृशेः क्विन् । हविर्वद्धात् द्वितीयार्द्धे सप्तमी हृद्द्युभ्यां ङेरुपसंख्यानमित्यलुक् ॥ ईदृशं रथमा हि स्थाथः । युवामातिष्ठथ एव । हिरण्यसारथे । अस्मदीयां स्तुतिं श्रोतुं शीघ्रं रथमास्थायागतमिति भावः ॥ ष्ठा गतिनिवृत्तौ । लटि छांदसः शपो लुक् ॥

॥ अथैकोनत्रिंशी ॥

हिरण्ययी वां रभिरीषा अक्षो हिरण्ययः ।

उभा चक्रा हिरण्यया ॥ २९

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हिरण्ययीं। वां। रभिः। ईषा। अक्षः। हिरण्ययः।

उभा। चक्रा। हिरण्यया॥ २९

हे अश्विनौ वां युवयो रथिरा रथोपलंभनभूता रथस्येषा हिरण्ययी हिरण्मयी हिरण्यविकारा। अक्षश्च हिरण्ययो हिरण्मयो हिरण्यनिर्मितः। ईषा अक्षादिषु छंदसीति प्रकृतिभावः। अपि चोभाभे द्वे अपि चक्रा चक्रे रथचरणे हिरण्यया हिरण्मये सुवर्णनिर्मिते॥ सुपां सुलुगिति द्विवचनस्याकारः। ऋत्व्यवास्त्व्यवास्त्व-त्यादिना हिरण्यशब्दान्मयटो मलोपो निपात्यते॥

॥ अथ त्रिंशी॥

तेन नो वाजिनीवसू परावतश्चिदा गतं।

उपेमां सुष्टुतिं मम॥ ३०

तेन। नः। वाजिनीवसू इति वाजिनीऽवसू। पराऽवतः।

चित्। आ। गतं।

उप। इमां। सुऽस्तुतिं। मम॥ ३०

हे वाजिनीवसू अन्नवंतावश्विनौ य उक्तो हिरण्मयस्वभावो रथः तेन रथेन नोऽस्मान्परावतश्चित् दूरदेशादप्यागतं। आगच्छतं॥ गच्छतेश्छांदसः शपो लुक्। अनुदात्तोपदेशेत्यनुनासिकलोपः॥ इदानीमुक्तार्थपरं कथयदाह। मम मदीयामिमामिदानीं क्रियमाणां सुष्टुतिं शोभनां स्तुतिं चोपगच्छतं॥

॥ इति पंचमस्याष्टमे षष्ठो वर्गः॥

॥ अथैकत्रिंशी॥

आ वंह्येथे पराकात्पूर्वीरश्नंतावश्विना।

इषो दासीरमर्त्या॥ ३१

आ। वंह्येथे इति। पराकात्। पूर्वीः। अश्नंतौ। अश्विना।

इषः। दासीः। अमर्त्या॥ ३१

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे अमर्त्यावमरणावश्विनावश्विनौ दासीः । दासा उपक्षपयितारोऽसुरा । तत्संबंधिनीः पूर्वीः पुरीरश्नंतौ भक्षयंतौ भंजंतौ युवामिषोऽन्नानि परा परात्परागत्य दूरदेशादधत्थे । अस्मभ्यमाप्रापयथः । यद्वाश्नंतौ व्याप्नुवंतौ ॥ अशू व्याप्तौ । अस्माद्व्यत्ययेन श्ना परस्मैपदं च ॥ पूर्वीर्बह्वीर्दासीर्दासस्योपक्षपयितुः शत्रोः संबंधिनीरिषोऽन्नानि अस्मभ्यमपहृत्याप्रापयथः ॥

॥ अथ द्वात्रिंशी ॥

आ नो द्युम्नैरा श्रवोभिरा राया यातमश्विना ।

पुरुश्चंद्रा नासत्या ॥ ३२

आ । नः । द्युम्नैः । आ । श्रवःऽभिः । आ । राया ॥ यातं ।

अश्विना ।

पुरुऽचंद्रा । नासत्या ॥ ३२

हे पुरुश्चंद्रा बहुहिरण्यौ । यद्वा पुरूणां बहूनामाह्लादकौ ह्रस्वाच्चंद्रोत्तरपदे मंत्र इति सुट् । पादादित्वाभावादाष्टमिकमामंत्रितानुदात्तत्वं ॥ हे नासत्या सत्यस्वभावौ सत्यस्य नेतारौ नासिकाप्रभवौ वा ॥ आमंत्रितं पूर्वमविद्यमानवदिति पूर्वस्यामंत्रितस्याविद्यमानवत्त्वादिदमाद्यामंत्रिताद्युदात्तं । न च सामान्यवचने समानाधिकरण इत्यविद्यमानवत्त्वनिषेधः पुरुश्चंद्रेत्यस्य विशेषवचनत्वात् ॥ ईदृशौ हे अश्विनाश्विनौ द्युम्नैर्दीप्तिमद्भिर्दानैः सार्धं नोऽस्मानायातं । आगच्छतं । तथा श्रवोभिः श्रवणीयैर्यशोभिः सार्धमागच्छतं । तथा राया धनेन सार्धमागच्छतं ॥

॥ अथ त्रयस्त्रिंशी ॥

एह वां प्रुषितप्सवो वयो वहंतु पर्णिनः ।

अच्छा स्वध्वरं जनं ॥ ३३

आ । इह । वां । प्रुषितऽप्सवः । वयः । वहंतु । पर्णिनः ।

अच्छं । सुऽअध्वरं । जनं ॥ ३३

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

हे अश्विनाविष्टाश्विन्याते वा युवां शुचिव्रतः ॥ शुचिः शुद्धे धनकर्मा ॥ स्निग्धरूपाः पर्णिनः पक्षोपेताः । यद्वा श्येनोपममेतत् । पक्षिण इव शीघ्रगामिनो ऽश्वो संतारो ऽध्वः अध्वरं शोभनयज्ञं यजमानस्यार्थं जनपदा अभिमुखमागच्छंतु । आनयंतु ॥

॥ अथ चतुस्त्रिंशी ॥

रथं वाममनुगायसं य इषा वर्तते सह ।

न चक्रमभि बाधते ॥ ३४

रथं । वां । अनुऽगायसं । यः । इषा । वर्तते । सह ।

न । चक्रं । अभि । बाधते ॥ ३४

हे अश्विनौ यो रथोऽस्मभ्यं देयेनान्नेन सह वर्तते वां युवयोः संभूतमनुगायसं स्तोतृभिरनुगातव्यं तं रथं चक्रं परसैन्यं नाभिबाधते । नाभिहंति । यद्वा चक्रं वीर्यकर्मसाधनं ॥ अत्रार्थे कथिदानमिति कः । शत्रादीनां क इति द्विवचनं । अभिगपतेऽस्य मनुरिति कर्तृपदमध्याहर्तव्यं ॥

॥ अथ पंचत्रिंशी ॥

हिरण्ययेन रथेन द्रवत्पाणिभिरश्वैः ।

धीजवना नासत्या ॥ ३५

हिरण्ययेन । रथेन । द्रवत्पाणिऽभिः । अश्वैः ।

धीऽजवना । नासत्या ॥ ३५

हे धीजवना मनोवेगवंतौ ॥ आमंत्रिताद्युदात्तत्वं ॥ हे नासत्या सत्यस्वभावौ सत्यस्य नेतारौ वा ॥ आमंत्रितं पूर्वमविद्यमानवदिति पूर्वस्याविद्यमानत्वेन पदात्परत्वाद्दाष्टमिकनिघाताभावः । न च नामंत्रितविद्यमानवत्त्वनिषेधो धीजवनेत्यस्य विशेषणत्वेन सामान्यवचनत्वाभावात् । व्यावर्तकं हि विशेषणं ॥ ईदृशौ युवां द्रवत्पाणिभिः शीघ्रगमनपदैरश्वैर्युक्तेन हिरण्ययेन हिरण्मयेन स्वर्णमयेन रथेनागतमिति शेषः । यद्वा धीजवना नासत्येत्येतद्द्वयमपि प्रथमांतमेव नामंत्रितं । धियो जव इव जवो ययोस्तौ । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥ ईदृशेन रथेन शीघ्रगमनौ नासत्यावश्विनावागच्छतमिति शेषः ॥

॥ इति पंचमाष्टके सप्तमो वर्गः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ षट्त्रिंशी ॥

युवं मृगं जागृवांसं स्वदथो वा वृषण्वसू ।

ता नः पृङ्क्तमिषा रयिं ॥ ३६

युवं । मृगं । जागृऽवांसं स्वदथः । वा ।

वृषण्वसू इति वृषण्ऽवसू ।

ता । नः । पृङ्क्तं । इषा । रयिं ॥ ३६

वाशब्दः समुच्चये । अपि च हे वृषण्वसू वर्षणधनावश्विनौ युवं युवां जागृवांसं जागरणशीलं स्वकार्ये मदजननेऽप्यप्रमत्तं मृगं मृग्यमन्वेषणीयं सोमं स्वदथः । आस्वादयथः । यद्वा जागृवांसं जाग्रतं मृगं मृगनामानमसुरं स्वदथः । स्वादयथः । हिंस्थ इत्यर्थः । ता तौ युवां नोऽस्मदर्थमिषान्नेन रयिं धनं पृङ्क्तं । संपृङ्क्तं । कुरुतं ईदृशं धनमस्मभ्यं प्रयच्छतमित्यर्थः ॥

॥ अथ सप्तत्रिंशी ॥

ता मे अश्विना सनीनां विद्यातं नवानां ।

यथा चिच्चैद्यः कशुः शतमुष्ट्रानां ददत्सहस्रा दश गोनां ॥ ३७

ता । मे । अश्विना । सनीनां । विद्यातं । नवानां ।

यथा । चित् । चैद्यः । कशुः । शतं । उष्ट्रानां । ददत् ।

सहस्रा । दश । गोनां ॥ ३७

हे अश्विनाश्विनौ ता तादृशौ युवां नवानामभिनवानां स्तोतॄणां सनीनां संभजनीयानां धनानां ॥ कर्मणि षष्ठी ॥ ईदृशानि धनानि मे मह्यं दापयितुं विद्यातं । जानीतं । यथा चित् येन खलु प्रकारेण चैद्यश्चेदिपुत्रः कशुरेतत्संज्ञो राजोष्ट्राणां शतं तथा गोनां गवां दश सहस्रा दशसंख्यानि सहस्राणि ददत् दद्यात् तथा विद्यातमिति पूर्वत्रान्वयः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथाष्टात्रिंशी ॥

यो मे हिरण्यसंदृशो दश राज्ञो अमंहत।

अधस्पदा इच्चैद्यस्य कृष्टयश्चर्मम्ना अभितो जनाः॥ ३८

यः। मे। हिरण्यऽसंदृशः। दश। राज्ञः। अमंहत।

अधःऽपदाः। इत्। चैद्यस्य। कृष्टयः। चर्मऽम्नाः। अभितः।

जनाः। ८

यः कशुश्चैद्यो राजा मे मह्यं हिरण्यसंदृशो हिरण्यसंदर्शनान् हिरण्यवन्मानतेजस्कान् दश राज्ञोऽमंहत परिचरणार्थं दत्तवान्। दशसंख्याकान् राज्ञो युद्धे पराजितान् कृत्वा दासत्वेनास्मे दत्तवानित्यर्थः। ननु हिंसमाना बहुविधाना राज्ञां दान एकः कथं शक्नुयादिति तत्राह। कृष्टयः सर्वाः प्रजा अस्य चैद्यस्य चेदिपुत्रस्य कशोरधस्पदा इत् पादयोरधस्तादेव वर्तन्ते। न काचिदपि तत्समानस्तदधिको वा विद्यते। अभितः सर्वतो वर्तमाना जनाश्चर्मम्नाश्चर्ममयस्य कवचादेर्धारणे समाम्नाताः। यद्वा चर्माणि चरणसाधनान्युपानहादीनि वाहनानि। तेषु वर्तमानास्तथाविधा इति चर्मम्नाः॥ म्ना अभ्यासे। आतो मनिन्क्वनिब्वनिपश्च॥ सर्वे मनुष्यास्तस्य भटा इत्यर्थः॥

॥ अथैकोनचत्वारिंशी ॥

माकिरेना पथा गाद्येनेमे यन्ति चेदयः।

अन्यो नेत्सूरिरोहते भूरिदावत्तरो जनः॥ ३९

माकिः। एना। पथा। गात्। येन। इमे। यन्ति। चेदयः।

अन्यः। न। इत्। सूरिः। ओहते। भूरिदावत्ऽतरः।

जनः। ३९

येन मार्गेणेमे चेदयश्चेद्यस्य राज्ञः पितृपितामहादयो यन्ति गच्छन्ति एनानेन पथा मार्गेण माकिर्गात्। अन्यो न गन्तुं शक्नोति। अपि त्वस्मादन्योऽन्यो भूरिदावत्तरो बहुदातृतमः सूरिर्विद्वान् ननु जनो नेत् नैवोहते। वहति। स्तोतृभ्यो धनं

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

प्रापयति । यद्वा वसुदावने यो जनः कशुर्नाम अस्मादयः ॥ अत्ययेन प्रथमा ॥ न्यर्थं सूरिः स्तोता नेदीयते । नैव याचते । ओकिष्ठः कृता ॥ यद्यत्त्वं न याचते तथा वसु धनं प्रयच्छतीत्यर्थः ॥

॥ इति पंचमस्याष्टमेऽष्टमो वर्गः ॥

॥ इत्यष्टमे मंडले प्रथमोऽनुवाकः ॥

द्वितीयेऽनुवाके सप्त सूक्तानि । तत्र महाँ इंद्र इत्यष्टाचत्वारिंशदृचं प्रथमं सूक्तं काण्वस्य वत्सस्यार्षं गायत्रं । अंत्यस्तृचपर्श्वैंद्रं । तस्मिन्परशुनाम्नो राज्ञः पुत्रस्य तिरिंदिरस्य दानं स्तूयते । अतः स तद्देवताकः । तथा चानुक्रांतं । महाँ इंद्रोऽष्टाचत्वारिंशद्वत्सस्तृचोऽत्यस्तिरिंदिरस्य पारशव्यस्य दानस्तुतिरिति । महाव्रते गायत्रशस्त्राधीतावंस्तात्तृचवर्जमिदं सूक्तं । तथैव पंचमारण्यके सूत्रितं । महाँ इंद्रो य ओजसेति तिस्र उत्तमा उद्धरंति । ऐ० आ० ५. ८. । इति ॥ प्रातःसवने सोमातिरेके महानित्यादिकाः स्तोमातिशंसनार्थाः । सूत्रितं च । महाँ इंद्रो य ओजसा नो देवा अवंतु न इत्यैंद्रोभिर्वैश्वानरीभिश्च स्तोमानतिशंसेत् । आ० ६. ७. । इति ॥ तृतीये पर्याये होतुः शस्त्रे महाँ इंद्र इति तृचोऽनुरूपः । सूत्रितं च । महाँ इंद्रो य ओजसा । समस्य मन्यवे विश इति । आ० ६. ४. । इति ॥ अप्तोर्यामे अच्छावाकस्यातिरिक्त उक्थे अयमेव तृचोऽनुरूपः । सूत्रितं च । महाँ इंद्रो य ओजसा नूनमश्विना ऋषेः । आ० ९. ११. । इति ॥ दर्शे च महेंद्रयाजिनः सांनाय्यस्य महानित्येषानुवाक्या । सूत्रितं च । महाँ इंद्रो य ओजसा त्वमस्त्वमिंद्र ब्रह्मणा महान् । आ० १. ६. । इति ॥

॥ सैषा प्रथमा ॥

महाँ इंद्रो य ओजसा पर्जन्यो वृष्टिमाँ इव ।

स्तोमैर्वत्सस्य वावृधे ॥ १

महान् । इंद्रः । यः । ओजसा । पर्जन्यः । वृष्टिमान्ऽइव ॥

स्तोमैः । वत्सस्य । ववृधे ॥ १

य इंद्र ओजसा बलेन महान् सर्वेभ्योऽधिकः । क इव । वृष्टिमानिव । यथा वृष्ट्या युक्तः पर्जन्यो रसानां पालयिता देवो महान् स इवेत्यर्थः । स इंद्रो वत्सस्य पुत्रस्यात्मीयस्य स्तोतुर्वत्सनाम्न एव ऋषेः स्तोत्रैर्ववृधे । प्रवर्धते ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ द्वितीया ॥

प्रजामृतस्य पिप्रतः प्र यद्भरंत वह्नयः ।
विप्रा ऋतस्य वाहसा ॥ २

प्रऽजां । ऋतस्य । पिप्रतः । प्र । यत् । भरंत । वह्नयः ।
विप्राः । ऋतस्य । वाहसा ॥ २

ऋतस्य यज्ञस्य सत्यस्य वा प्रजां प्रकर्षेण जातमिंद्रं पिप्रतो नभसः प्रदेशान् पूरयंतो वह्नयो वाहका अस्य यदा प्र भरंत प्रकर्षेण भरंति वदंति तदा विप्रा मेधाविन ऋतस्य यज्ञस्य वाहसा प्रापकेण स्तोत्रेण तमिंद्रं स्तुवंतीति शेषः ॥

॥ अथ तृतीया ॥

कण्वा इंद्रं यदक्रत स्तोमैर्यज्ञस्य साधनं ।
जामि ब्रुवत आयुधं ॥ ३

कण्वाः । इंद्रं । यत् । अक्रत । स्तोमैः । यज्ञस्य । साधनं ।
जामि । ब्रुवते । आयुधं ॥ ३

कण्वाः । स्तोतृनामैतत् । स्तोतारः कण्वगोत्रा वेंद्रं स्तोमैः स्तोत्रैर्यज्ञस्य यागस्य साधनं साधयितारं निष्पादकं यदा अक्रत अकुर्वत ॥ करोतेर्लुङि मंत्रे घसेति च्लेर्लुक् ॥ तदानीमायुधं शत्रूणां हिंसकं वज्रादिकं जामि । अतिरेकनामैतत् । अतिरिक्तमहितं प्रयोजनरहितं ब्रुवते । कथयंति । आयुधसाध्यस्य सर्वकार्यस्येंद्रेण कृतत्वादायुधं निष्प्रयोजनमित्यर्थः । यद्वायुधमायोधनशीलमिंद्रं जामि जामिं भ्रातरं ब्रुवते । वदंति । सर्वकार्येषु भ्रातृवद्भवंतीत्यर्थः ॥

तृतीये पर्याये चोक्तः यद्के समस्य मन्यव इत्यस्या द्विचत्वारिंशदृचः । सूक्ते तु । समस्य मन्यवे विश इति द्विचत्वारिंशद्विनियुक्ते । आ० ६, ४, इति ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तत्र प्रथमा सूक्ते चतुर्थी ॥

सम॑स्य म॒न्यवे॒ विशो॒ विश्वा॑ नमंत कृ॒ष्टयः॑ ।

समु॒द्रायै॑व सिंध॑वः ॥

सं । अ॒स्य॒ । म॒न्यवे॑ । विशः॑ । विश्वाः॑ । न॒मं॒त॒ । कृ॒ष्टयः॑ ।

स॒मु॒द्राय॑ऽइव । सिंध॑वः ॥ ४

विशो निविष्टा विश्वाः सर्वाः कृष्टयः प्रजा अस्येंद्रस्य मन्यवे क्रोधाय । यद्वा मन्युर्मननसाधनं स्तोत्रं । तदर्थं संनमंत । सम्यक् स्तुत एव नमंति ॥ नमतेः कर्मकर्तरि छांदसो लङ् । न दुहस्नुनमां यक्चिणाविति यक्चिणोः प्रतिषेधः ॥ प्रह्वीभवंति । तत्र दृष्टांतः । समुद्रायेव । यथा समुद्रमब्धिं प्रति सिंधवः स्यंदनशीला नद्यः स्वयमेव नमंते तद्वत् ॥

॥ अथ पंचमी ॥

ओज॒स्तद॑स्य तित्विष उ॒भे यत्स॒मव॑र्तयत् ।

इंद्र॒श्चर्मे॑व रोद॑सी ॥ ५

ओजः॑ । तत् । अ॒स्य॒ । ति॒त्वि॒षे॒ । उ॒भे । इति॑ । यत् ।

स॒म्ऽअव॑र्तयत् ।

इंद्रः॑ । चर्म॑ऽइव । रोद॑सी॒ इति॑ ॥ ५

अस्येंद्रस्य तदोजो बलं तित्विषे । दिदीपे ॥ त्विष दीप्तौ ॥ यद् येनौजसायमिंद्र उभे रोदसी द्यावापृथिव्यौ चर्मेव समवर्तयत् सम्यग्वर्तयति । यथा कश्चित्किंचिच्चर्म कदाचिद्विस्तारयति कदाचित्संकोचयति एवं तदधीने अभूतामित्यर्थः ॥

॥ इति पंचमस्याष्टमे नवमो वर्गः ॥

॥ अथ षष्ठी ॥

वि चि॑द्वृ॒त्रस्य॒ दोध॑तो॒ वज्रे॑ण श॒तप॑र्वणा ।

शिरो॑ बिभेद वृ॒ष्णिना॑ ॥ ६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वि । चित् । वृत्रस्य । दोधतः । वज्रेण । शतऽपर्वणा ।

शिरः । बिभेद । वृष्णिना ॥ ६

चिच्छब्दोऽप्यर्थे । स च भिन्नक्रमः । वृत्रस्य चिदावरकस्यापि दोधतोऽन्यर्थं जगत्कंपयतः असुरस्य शिरो मूर्धानं शतपर्वणा शतसंख्यापर्वोपेत धारा यस्य ताडशेन वृष्णिना वीर्यवता वज्रेणेंद्रः विबिभेद । विच्छिन्नेद ॥

आभिप्लविकेषूक्थ्येषु तृतीयसवने प्रशास्तुः शस्त्रे इमा अभीति तृचो वैकल्पिकोऽनुरूपः । सूत्रितं च । इमा अभि प्र णोनुम इत्यथ ब्राह्मणाच्छंसिनः । आ० ७.८. । इति ॥

॥ तत्र प्रथमा सूक्ते सप्तमी ॥

इमा अभि प्र णोनुमो विपामग्रेषु धीतयः ।

अग्नेः शोचिर्न दिद्युतः ॥ ७

इमाः । अभि । प्र । नोनुमः । विपाम् । अग्रेषु । धीतयः ।

अग्नेः । शोचिः । न । दिद्युतः ॥ ७

विपां स्तोतृणामग्रेषु पुरस्ताद्दिश्यमाना धीतयो धियः स्तोत्राण्यभि प्र णोनुमः । आभिमुख्येन पुनः पुनः प्रब्रूमः ॥ णु स्तुतौ ॥ कीदृशीः स्तुतीः । अग्नेः शोचिर्न दीप्तिरिव दिद्युतो दीप्यमाना वदद्रूपाः ॥

॥ अथाष्टमी ॥

गुहा सतीरुप त्मना प्र यच्छोचंत धीतयः ।

कण्वा ऋतस्य धारया ॥ ८

गुहा । सतीः । उप । त्मना । प्र । यत् । शोचंत । धीतयः ।

कण्वाः । ऋतस्य । धारया ॥ ८

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

गुहा गुहायां सतीः सत्यो भवंत्यो यद् या धीतयः स्तुतयः कर्माणि वा त्मना-त्मना स्तोत्रेणेंद्र त्वोपगम्यमानाः प्रशोचंत प्रादीप्यंत । यद्वात्मना स्वत एवेंद्रमुपगच्छंतः प्रदीप्यंते ताः स्तुतीः कण्वाः कण्वगोत्रा ऋषयः ऋतस्योदकस्य सोमात्मकस्य धारया वर्धिताः कुर्वंतीति शेषः ॥

॥ अथ नवमी ॥

प्र तमिंद्र नशीमहि रयिं गोमंतमश्विनं ।

प्र ब्रह्म पूर्वचित्तये ॥ ९

प्र । तं । इंद्र । नशीमहि । रयिं । गोऽमंतं । अश्विनं ।

प्र । ब्रह्म । पूर्वऽचित्तये ॥ ९

हे इंद्र गोमंतं गोभिर्युक्तमश्विनमश्वैरुपेतं तं प्रसिद्धं रयिं त्वदीयं धनं प्रनशीमहि । प्राप्नवाम । तथा ब्रह्म परिवृढमन्नं च पूर्वचित्तयेऽन्येभ्यः पूर्वमेव ज्ञानाय प्राप्नवाम ॥

॥ अथ दशमी ॥

अहमिद्धि पितुष्परि मेधामृतस्य जग्रभ ।

अहं सूर्य इवाजनि ॥ १०

अहं । इत् । हि । पितुः । परि । मेधां । ऋतस्य । जग्रभ ।

अहं । सूर्यःऽइव । अजनि ॥ १०

पितुः पालकस्य ऋतस्य सत्यस्यावितथस्येंद्रस्य मेधामनुग्रहात्मिकां बुद्धिमहमिदहमेव परिजग्रभ । परिगृहीतवानस्मि नान्ये । हि यस्मादेवं तस्मादहं सूर्य इवाजनि सूर्यो यथा प्रकाशमानः सन् प्रादुर्भवति तथाजनिषं । प्रादुरभूवं ॥

॥ इति पंचमस्याष्टमे दशमो वर्गः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथैकादशी ॥

अहं प्रत्नेन मन्मना गिरः शुंभामि कण्ववत्।

येनेंद्रः शुष्ममिद्दधे ॥ ११

अहं। प्रत्नेन। मन्मना। गिरः शुंभामि। कण्वऽवत्।

येन। इंद्रः। शुष्मं। इत्। दधे ॥ ११

कण्ववत् मम जनकः कण्व इवाहं प्रत्नेन नित्येन वेदरूपेण मन्मना मननसाधनेनेंद्रविषयेण स्तोत्रेण गिरो वाचः शुंभामि। अलंकरोमि यदा ऐंद्रविषये प्रयुज्यंते तदानीं यथार्थत्वाद्वाचोऽलंकृता भवंति। येन खलु स्तोत्रेणेंद्रः शुष्मं शत्रूणां शोषकं बलं दधे इत् धत्त एव धारयत्येव। यत्स्तोत्रमिंद्र ईदृशं बलसमर्थं जनयति तेन मन्मनेत्यर्थः॥

॥ अथ द्वादशी ॥

ये त्वामिंद्र न तुष्टुवुर्ऋषयो ये च तुष्टुवुः।

ममेद्वर्धस्व सुष्टुतः ॥ १२

ये। त्वां। इंद्र। न। तुस्तुवुः। ऋषयः। ये। च। तुस्तुवुः।

मम। इत्। वर्धस्व। सुऽस्तुतः ॥ १२

हे इंद्र ये जनास्त्वां न तुष्टुवुः न स्तुवंति। ये च ऋषयो मंत्राणां द्रष्टारो जनास्तुष्टुवुः त्वां स्तुवंति उभयेषां मध्ये ममेत् ममैव स्तोत्रेण सुष्टुतः शोभनं स्तुतः सन् वर्धस्व। वृद्धो भव॥

॥ अथ त्रयोदशी ॥

यदस्य मन्युरध्वनीद्वि वृत्रं पर्वशो रुजन्।

अपः समुद्रमैरयत् ॥ १३

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

यत्। अस्य। मन्युः। अध्वनीत्। वि। वृत्रं। पर्वऽशः।
रुजन्।
अपः। समुद्रं। ऐरयत्॥ १३

अस्येंद्रस्य मन्युः क्रोधो वृत्रमाहत्य निर्गच्छन्तं मेघं वा पर्वशः पर्वणि पर्वणि वृत्रं विरुजन् विभंजन् यद्यदाध्वनीत् शब्दमकरोत् तदानीं समुद्रं समुंदनीयमुदधिं प्रत्यपो वृष्ट्युदकान्यैरयत्। स इंद्रः प्रेरितवान्॥

॥ अथ चतुर्दशी ॥

नि शुष्ण इंद्र धर्णसिं वज्रं जघंथ दस्यवि।
वृषा ह्युग्र शृण्विषे॥ १४

नि। शुष्णे। इंद्र। धर्णसिं। वज्रं। जघंथ। दस्यवि।
वृषा। हि। उग्रा। हि। उग्र। शृण्विषे॥ १४

हे इंद्र शुष्णे शोषक एतन्नाम्नि दस्यवि उपक्षपयितरि असुरे धर्णसिं धारयितव्यं वज्रं कुलिशं त्वं निजघंथ। निहतवानसि। वज्रेण तमसुरं व्यवधीरित्यर्थः। हे उग्रोद्गूर्णबलेंद्र वृषा कामानां वर्षितेति हि यस्मात्त्वं शृण्विषे श्रूयसे। अतोऽस्मदपेक्षितं धनं देहीति शेषः॥

॥ अथ पंचदशी ॥

न द्याव इंद्रमोजसा नांतरिक्षाणि वज्रिणं।
न विव्यचंत भूमयः॥ १५

न। द्यावः। इंद्रं। ओजसा। न। अंतरिक्षाणि। वज्रिणं।
न। विव्यचंत। भूमयः॥ १५

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

द्यावो द्युलोका इममिंद्रमोजसा बलेन न विव्यचंत । न व्याप्नुवंति । द्युलोकेभ्योऽप्ययं बलाधिक इत्यर्थः । तथांतरिक्षाद्यंतरा स्थितानि द्यावापृथिव्योर्मध्ये वर्तमाना लोका वज्रिणं वज्रवंतमिमं न व्याप्नुवंति । तथा भूमयो भूलोकाश्च तमिंद्रं व्याप्नुवंति । तयो वा इमा त्रिवृतो लोकाः इति ब्राह्मणादेकैकस्य लोकस्य त्रित्वं । तिस्रो भूमीः । ऋग्वे० २. २७. ८. । इत्यादिनिगमाच्च ॥

॥ इति पंचमस्याष्टम एकादशो वर्गः ॥

॥ अथ षोडशी ॥

यस्तं इंद्र महीरपः स्तंभूयमान आशंयत् ।

नि तं पद्यासु शिश्नथः ॥ १६

यः । ते । इंद्र । महीः । अपः । स्तभुऽयमानः । आ ।

अशंयत् ।

नि । तं । पद्यासु । शिश्नथः ॥ १६

हे इंद्र ते तव संबंधिनीर्महीर्महतीरप आंतरिक्षाण्युदकानि यो वृत्रः स्तभूयमानः स्तंभयन् यथापो न पतंति तथा कुर्वन् आशयत् आशयानोऽभूत् तमसुरं पद्यासु गमनशीलास्वप्सु मध्ये निशिश्नथः । श्नथिर्हिंसार्थः ॥ श्नथ हिंसार्थः ॥ वज्रेण तमसुरं हत्वा नदीषु पातितवानित्यर्थः ॥

॥ अथ सप्तदशी ॥

य इमे रोदंसी मही संमीची समजंग्रभीत् ।

तमोभिरिंद्र तं गुहः ॥ १७

यः । इमे इति । रोदंसी इति । मही इति ।

समीची इति सम्ऽईची । सम्ऽअजंग्रभीत् ।

तमःऽभिः । इंद्र । तं । गुहः ॥ १७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यो वृत्रो महीः महत्यौ विष्वीर्ये समीची संगते इमे परस्पर उपलभ्यमाने रोदसी द्यावापृथिव्यौ समजग्रभीत् सम्यगग्रहीत्। आच्छादितवानित्यर्थः। तमसुरं हे इंद्र त्वं तमोभिरंधकारैर्गूढः। संवृतमकरोः। अनाद्यनंतं मरणलक्षणं तमः प्रावेशय इत्यर्थः॥

॥ अथाष्टादशी ॥

य इंद्र यतंयस्त्वा भृगंवो ये चं तुष्टुवुः।

ममेदुंग्र श्रुधी हवं॥ १८

ये। इंद्र। यतंयः। त्वा। भृगंवः। ये। च। तुस्तुवुः।

ममं। इत्। उग्र। श्रुधि। हवं॥ १८

हे इंद्र ये यतयो नियता अंगिरसस्त्वां तुष्टुवुः। ये च भृगवो भृगुगोत्रास्त्वां तुष्टुवुः स्तुवंति तेषु मध्ये ममेत् ममैव हवं स्तोत्रं हे उग्रौजस्विन्निंद्र श्रुधि। शृणु॥

॥ अथैकोनविंशी ॥

इमास्तं इंद्र पृश्नंयो घृतं दुंहत आशिरं।

एनामृतस्यं पिप्युषीः॥ १९

इमाः। ते। इंद्र। पृश्नंयः। घृतं। दुहते। आऽशिरं।

एनां। ऋतस्यं। पिप्युषीः॥ १९

हे इंद्र ते त्वदीया इमाः पृश्नयः प्राष्टवर्णा गावो घृतं क्षरणशीलमेनामाशिरमा-श्रयणद्रव्यं पयो दुहते दुहंति धारयंति। कीदृश्यः पृश्नयः। ऋतस्य गंतुरादित्य-स्येंद्रस्य यज्ञस्य वा पिप्युषीर्वर्धयित्र्यः।

॥ अथ विंशी ॥

या इंद्र प्रस्वंस्त्वासा गर्भमचंक्रिरन्।

परि धर्मेव सूर्यं॥ २०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

याः । इंद्र । प्रऽस्वः । त्वा । आसा । गर्भं । अचंक्रिरन् ।

परि । धर्मऽइव । सूर्यं ॥ २०

हे इंद्र प्रस्वः । प्रसुवते गर्भं विसृजंतीति प्रस्वः ॥ सूतेः सत्सु द्विषेति क्विप् । हेऽस्मा या गाव आसास्येन त्वा त्वदीयं वीर्यं हवस्थानंतरमोषध्यादिरूपेण परिणतं भक्षयित्वा गर्भमचक्रिरन्न अकुर्वन् त्वदीयं वीर्यमंतर्धारयन् । तत्र दृष्टांतः । सूर्यं परितः सूर्यमंडलस्योपरि धर्मेव धारकं पोषकमुदकं यथा रश्मयो गर्भरूपेण बिभ्रति तद्वत् । यद्वा पति धर्मेव परितो धारयितारं सूर्यमिव । यथा सूर्यः परितः सर्वं जगदत्ते तद्वत् । कस्तस्य जगतो धारकमिंद्रस्य वीर्यमित्युच्यते । ओषध्यादिरूपेण परिणतस्येंद्रवीर्यस्य गोभिरात्मनि धारणमिंद्रस्य वत्रं जघ्नुष इत्यारभ्य तैत्तिरीयके विस्पष्टमाम्नात । तत्पयस ओषधीभ्योऽध्यात्मन समनयन् तत्प्रत्यदुह-न्निति । पयोरूपेण परिणतं तद्वीर्यमिमा गाव आशिराथं दुहत इति पूर्वस्या-मृच्यन्वयः ॥

॥ इति पंचमस्याष्टमे द्वादशो वर्गः ॥

वाजपेयेऽतिरिक्तोक्थे त्वामिच्छवसस्पत इत्येषा । सूत्रितं च । त्वामिच्छवसस्पते तं प्रत्नथा । आ० ९. ९. । इति ॥

॥ सैषैकविंशी ॥

त्वामिच्छवसस्पते कण्वा उक्थेन वावृधुः ।

त्वां सुतास इंदवः ॥ २१

त्वां । इत् । शवसः । पते । कण्वाः उक्थेन । ववृधुः ।

त्वां । सुतासः । इंदवः । २१

हे शवसस्पते बलस्य स्वामिन्निंद्र त्वामेव कण्वाः स्तोतारः कण्वगोत्रा वा एतच उक्थेन शस्त्रेण च वहृधुः । वर्धयंति । सुतासोऽध्वर्युभिरभिषुता इंदव सोमाश्च त्वामेव वर्धयंति ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ द्वाविंशी ॥

तवेदिंद्र प्रणीतिषूत प्रशंस्तिरद्रिवः।

यज्ञो वितंतसाय्यः॥ २२

तव। इत्। इंद्र। प्रऽनीतिषु। उत। प्रऽशंस्तिः। अद्रिऽवः।

यज्ञः। वितंतसाय्यः॥ २२

उतापि च हे अद्रिवः। आदृणात्यनेनेत्यद्रिर्वज्रः। तद्वन्निंद्र तवेत् तवैव प्रणी-तिषु प्रकृष्टेषु नयनेषु धनप्रदानेषु सत्सु प्रशस्तिः प्रकृष्टा स्तुतिः क्रियते। तथा वितंतसाय्यो विस्तृततमः॥ तनोतेर्भ्वादत्वःसनतद्रूपं। यद्वा तंतसिः कंड्वादिः दृश्यः। तस्मादौणादिक आय्यप्रत्ययः॥ यज्ञो यज्ञश्च तवैव क्रियते॥

॥ अथ त्रयोविंशी ॥

आ नं इंद्र महीमिषं पुरं न दर्षि गोमंतीं।

उत प्रजां सुवीर्यं॥ २३

आ। नः। इंद्र॥ महीं। इषं। पुरं। न। दर्षि। गोऽमंतीं।

उत। प्रऽजां। सुऽवीर्यं॥ २३

हे इंद्र नोऽस्मभ्यमस्मदर्थं महीं महतीं गोमतीं गोभिर्युक्तामिषमन्नमादर्षि। आदियसि। दातुं कामयसे। नयस्त्वर्थे। पुरं न। पालनं पूः। पालनं रक्षणं चाप्यस्यं कर्तुमाद्रियसे॥

॥ अथ चतुर्विंशी ॥

उत त्यदाश्वश्व्यं यदिंद्र नाहुषीष्वा।

अग्रे विक्षु प्रदीदंयत्॥ २४

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

उत । त्यत् । आशुऽअश्व्यं । यत् । इंद्र । नाहुषीषु । आ ।
ऊर्ज॑ । विक्षु । प्रऽदीदयत् ॥ २४

हे इंद्र नाहुषीषु । नहुषा इति मनुष्यनाम । तत्संबंधिनीषु । यद्वा नाहुषो नाम कश्चिद्राजा । तदीयासु विक्षु प्रजासु यत् पुरस्ताद्यदाश्वश्व्यं शीघ्रगाश्वसंघात्मकं यत् प्रदीदयत् प्राद्दीयत तदपि च त्यत्तदपसमभ्यं देहीति शेषः । आकारः पूरकः ॥

॥ अथ पंचविंशी ॥

अभि व्रजं न तत्निषे सूर उपाकचक्षसं ।
यदिंद्र मृळयासि नः ॥ २५

अभि । व्रजं । न । तत्निषे । सूरः । उपाकऽचक्षसं ।
यत् । इंद्र । मृळयासि । नः ॥ २५

न संप्रत्यर्थे । न संप्रतीदानीं हे इंद्र सूरः प्राज्ञस्त्वं व्रजं गोष्ठमुपाकचक्षसं । उपाक इत्यंतिकनाम । अंतिके द्रष्टव्यमभितत्निषे । अभितनोषि । अभिविस्तारयसि । गोभिः पूर्णं करोषीत्यर्थः ॥ तनोतेश्छांदसे लिटि सिनिपत्योश्छंदसीत्युपधालोपः । यद्यदा हे इंद्र त्वं नोऽस्मान् मृळयासि मृळयसि सुखयसि ॥

॥ इति पंचमस्याष्टमे त्रयोदशो वर्गः ॥

॥ अथ षड्विंशी ॥

यदंग तविषीयस इंद्रं प्रराजसि क्षितीः ।
महाँ अपार ओजसा ॥ २६

यत् । अंग । तविषीऽयसे । इंद्र । प्रऽराजसि । क्षितीः ।
महान् । अपारः । ओजसा ॥ २६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

र्थंगे यभिमुखीकरणे । हे इंद्र यत् यदा त्वं नविपीनवे । तविषीति बलनाम । बलमिवाचरसि । इत्यश्वरणादिकं बलं॰ यथा सर्वं बलजातं भनक्ति तदात्मबलाया एव सन् सर्वमेव बलजातं धारयसीत्यर्थः । यच त्वं चितीः । मनुष्यनामैतत् । मनुष्यान् पराजासि प्रकर्षेणोपेयिषे ॥ राजतिरैश्वर्यकर्मा ॥ अत्रापि यद्वृत्तयोगान्न निघातः॰॥ स इंद्र ओजसा बलेन महान् सर्वस्मादधिकः । अत एवापारः पारराहितः केनाप्यवसानं प्रापयितुमशक्य इत्यर्थः ॥

॥ अथ सप्तविंशी ॥

तं त्वा हविष्मतीर्विश उपं ब्रुवत ऊतये ।

उरुज्रयसमिंदुभिः ॥ २७

तं । त्वा । हविष्मतीः । विशः । उपं । ब्रुवते । ऊतये ।

उरुऽज्रयसं । इंदुऽभिः ॥ २७

हे इंद्र तं पूर्वोक्तगुणयुक्तमुरुज्रयसं विस्तीर्णवेगयुक्तं त्वा त्वां हविष्मतीर्हविर्भिर्युक्ताः पुरोडाशादिहविर्युक्ताः विशः प्रजा उप ब्रुवते । उपेत्य स्तुवंति । किमर्थं । इंदुभिः सोमैः ऊतये रक्षणाय । यद्वेंदुभिः सोमैरुरुज्रयसं विस्तीर्णवेगयुक्तं त्वां रक्षणाय स्तुवंति ॥

॥ अथाष्टाविंशी ॥

उपह्वरे गिरीणां संगथे च नदीनां ।

धिया विप्रो अजायत ॥ २८

उपऽह्वरे । गिरीणां । संऽगथे । च । नदीनां ।

धिया । विप्रः । अजायत ॥ २८

गिरीणां पर्वतानामुपह्वरे उपह्वरसंज्ञे स्थाने नदीनां सरितां संगमे संगथे च । ईदृग्विधे देशे क्रियमाणया धिया यागक्रियया स्तुत्या वा विप्रो मेधावीन्द्रोऽजायत । प्रादुर्भवति । अतो यद्यपि तादृशे देशे यजामः स्तुमो वेति भावः ॥ गिरीणामित्यत्र नामन्यतरस्यामिति नाम उदात्तत्वं ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथैकोनत्रिंशी ॥

अतः समुद्रमुद्वतश्चिकित्वाँ अव पश्यति ॥

अतो विपान एजति । २९

अतः । समुद्रं । उत्ऽवतः । चिकित्वान् । अव । पश्यति ॥

अतः । विपानः । एजति ॥ २९

यतो यस्मिन् द्युलोके विपानो व्याप्नुवन् विविधपानयुक्तो वेन्द्र एजति चेष्टते उद्वत उद्गतात् ॥ उपसर्गाच्छन्दसि धात्वर्थे इति वतिः ॥ अतोऽस्माद्द्युलोकात् चिकित्वान् जानन् स इन्द्रः समुद्रं समुन्दनशीलं जगदार्द्रीयमाणं सोमकमवपश्यति । अधस्तात्सन् ईक्षते । यद्वा सूर्यात्मनेन्द्रः स्तूयते । यस्मिन्नभसि विपानो व्याप्नुवन् सूर्यात्मेन्द्र एजति वर्तते चिकित्वान् जानन् विद्वान्स इन्द्र उद्वत उद्गतादतोऽस्मादन्तरिक्षात्समुद्रं । उपलक्षणमेतत् । समुद्रोपलक्षितं सर्वं जगदवपश्यति । अधस्थं प्रसृतैः किरणैः प्रकाशयति ॥

॥ अथ त्रिंशी ॥

आदित्प्रत्नस्य रेतसो ज्योतिष्पश्यन्ति वासरं ।

परो यदिध्यते दिवा ॥ ३०

आत् । इत् । प्रत्नस्य । रेतसः । ज्योतिः । पश्यन्ति । वासरं ।

परः । यत् । इध्यते । दिवा ॥ ३०

परो दिवा दिवः परस्तात् द्युलोकस्योपरि यद्यदायमिन्द्रः सूर्यात्मनेध्यते दीप्यते आदिदनन्तरमेव प्रत्नस्य चिरंतनस्य रेतसो गंतुः ॥ री गतिरेषणयोः । अस्मात् सुरीभ्यां तुट् चेत्यसुन् तुडागमश्च ॥ यद्वा रेत इत्युदकनाम । रेतस्विन उदकवतः । सोमस्यान्नं लयों लक्ष्यते । ईदृशस्येन्द्रस्य सूर्यात्मनो वासरं निवासकं वासरस्य निवासस्य हेतुभूतं वा ज्योतिर्द्योतमानं तेजः पश्यन्ति सर्वे जनाः । यद्वा वासरमित्यत्यन्तसंयोगे द्वितीया । सर्वमहरहरप्रत्यस्तमयनं यावत् ज्योतिष्पश्यंति ॥ इन्द्रसोः सामर्थ्ये इति विसर्जनीयस्य षत्वं ॥

॥ इति पंचमस्याष्टमे षड्विंशो वर्गः ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथैकत्रिंशी ॥

कण्वास इंद्र ते मतिं विश्वे वर्धंति पौंस्यं ।

उतो शविष्ठ वृष्ण्यं ॥ ३१

कण्वासः । इंद्र । ते । मतिं । विश्वे । वर्धंति । पौंस्यं ।

उतो इति । शविष्ठ । वृष्ण्यं ॥ ३१

हे इंद्र ते त्वदीयां मतिं बुद्धिं पौंस्यं । बलनामैतत् । बलं च विश्वे सर्वे कण्वासः कण्वाः स्तोतारः कण्वगोत्रा वा ऋषयो यजन्ति । वर्धयंति ॥ छंदस्युभयथेति यया आर्धधातुकत्वात् णेरनिटीति णिलोपः ॥ उतो अपि च हे शविष्ठ बलवत्तम बलवत्तम ॥ शिवातोर्वृष्णम् । टेरिति टिलोपः ॥ हे इंद्र वृष्ण्यं त्वदीयं वीर्यं बलं च कण्वासो वर्धयंत्येव ॥

॥ अथ द्वात्रिंशी ॥

इमां म इंद्र सुष्टुतिं जुषस्व प्र सु मामव ।

उत प्र वर्धया मतिं ॥ ३२

इमां । मे । इंद्र । सुऽस्तुतिं । जुषस्व । प्र । सु । मां । अव ।

उत । प्र । वर्धय । मतिं ॥ ३२

हे इंद्र इमां पुरोवर्तिनीं मे मदीयां सुष्टुतिं शोभनां स्तुतिं जुषस्व । सेवस्व ॥ सेवित्वा च स्तोतारं मां सु शोभनं प्राव । प्रकर्षेण रक्ष । उतापि च मतिमस्मदीयां बुद्धिं प्रवर्धय । प्रवृद्धां कुरु । यथा बह्वर्थदर्शिनो भवति तथा कुर्वित्यर्थः ॥

॥ अथ त्रयोस्त्रिंशी ॥

उत ब्रह्मण्या वयं तुभ्यं प्रवृद्ध वज्रिवः ।

विप्रा अतक्ष्म जीवसे ॥ ३३

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उत। ब्रह्मण्या। वयं। तुभ्यं। प्रऽवृद्ध। वज्रिऽवः।

विप्राः। अतक्ष्म। जीवसे॥ ३३

उतापि च हे प्रवृद्ध स्तुतिभिः प्रकर्षेण वृद्धिं प्राप्त हे वज्रिवो वज्रवन्निंद्र॥ एतो मत्वर्थीयोऽनुवादः। यदा वज्रोऽस्यास्तीति वज्री इत्यतः। तद्वान्। छंदसीर इति मतुपो वत्वं। मतुवसो रुरिति नकारस्य रुत्वं॥ ईदृशेन्द्र तुभ्यं त्वदर्थं विप्रा मेधाविनो ब्रह्मण्या ब्रह्माणि स्तोत्राणि हविर्लक्षणान्यन्नानि वा॥ सुपां सुलुगिति सुपो याजादेशः॥ जीवसे जीवनार्थं अतक्ष्म। अकार्ष्म॥ तक्षू तनूकरणे लङि छांदसः शपो लुक्॥

॥ अथ चतुस्त्रिंशी॥

अभि कण्वा अनूषतापो न प्रवता यतीः।

इंद्रं वनन्वती मतिः॥ ३४

अभि। कण्वाः। अनूषत। आपः। न। प्रऽवता। यतीः।

इंद्रं। वनन्ऽवती। मतिः॥ ३४

कण्वाः कण्वगोत्रा ऋषयोऽभ्यनूषत। इंद्रमभिष्टुवंति॥ णू स्तुतौ। कुटादिः॥ प्रवता प्रवणेन मार्गेण यतीर्गच्छंत्य आपो न आप इव॥ मतिर्मननीया कण्वैः क्रियमाणा स्तुतिः स्तुत्यमिंद्रं वनन्वती स्वयमेव संभजनवती भवति॥

॥ अथ पंचत्रिंशी॥

इंद्रमुक्थानि वावृधुः समुद्रमिव सिंधवः।

अनुत्तमन्युमजरं॥ ३५

इंद्रं। उक्थानि। ववृधुः। समुद्रंऽइव। सिंधवः।

अनुत्तऽमन्युं। अजरं॥ ३५

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उक्थानि शस्त्राण्युक्थैः शस्यमानानीन्द्रं वर्धयंति। सिंधवः स्यंदनशीला नद्यः समुद्रमिव समुद्रं जलधिं यथा वर्धयंति तद्वत्। कीदृशमिंद्रं। अनुत्तमन्युं। अनुत्तोऽप्रेरितः परैरनभिभूतो मन्युः क्रोधो यस्य तादृशं॥ नुदविदोन्दत्रे इत्यादिना। पा० ८. २. ५६.। निष्ठानत्वाभावः॥ अजरं जरारहितं॥ बहुव्रीहौ नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं॥

॥ इति पंचमस्याष्टमे पंचदशो वर्गः॥

॥ अथ षट्त्रिंशी॥

आ नो याहि परावतो हरिभ्यां हर्यताभ्याम्।

इममिंद्र सुतं पिब॥ ३६

आ। नः। याहि। पराऽवतः। हरिऽभ्यां। हर्यताभ्यां।

इमं। इंद्र। सुतं। पिब॥ ३६

हे इंद्र परावतः परागतात् दूरे वर्तमानात् द्युलोकाद्धर्यताभ्यां कांताभ्यां हरिभ्यामश्वाभ्यां नोऽस्मानायाहि। आगच्छ। आगत्य चेममस्मदीयं सुतमभिषुतं सोमं पिब॥

॥ अथ सप्तत्रिंशी॥

त्वामिद्वृत्रहंतम जनासो वृक्तबर्हिषः।

हवंते वाजसातये॥ ३७

त्वां। इत्। वृत्रहन्ऽतम। जनासः। वृक्तऽबर्हिषः।

हवंते। वाजऽसातये॥ ३७

हे वृत्रहंतम अतिशयेन वृत्राणामावरकाणां शत्रूणां हंतस्त्वामित्त्वामेव वृक्तबर्हिषः। वृक्तं यागार्थं छिन्नं बर्हिर्यैस्ते तथाविधोक्ताः। ऋत्विजो जनासो जना ऋत्विग्लक्षणा हवंते। आह्वयंति॥ ह्वेञः अपि बहुलं छंदसीति संप्रसारणं॥ क्रियणं। वाजसातये वाजस्यान्नस्य बलस्य वा सातये लाभाय। यद्वा संग्रामनाम वाजः। वाजस्य सातिर्यस्मिन् संग्रामे तत्र साहाय्याय त्वामाह्वयंतीत्यर्थः॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथाष्टात्रिंशी ॥

अनु॑ त्वा रोद॑सी उ॒भे च॒क्रं न व॒र्त्ये॑त॒शं।

अनु॑ सुवा॒नास॒ इंद॑वः ॥ ३८

अनु॑। त्वा॒। रोद॑सी॒ इति॑। उ॒भे इति॑। च॒क्रं। न। व॒र्ति॒।

एत॑शं।

अनु॑। सु॒वा॒नासः॑। इंद॑वः ॥ ३८

हे इंद्र त्वा त्वामुभे रोदसी द्यावापृथिव्यावनुवर्तेते। त्वदधीने भवत इत्यर्थः। तत्र दृष्टांतः। चक्रं न। यथा रथचक्रमेतशं। अश्वनामैतत्। पुरो गच्छंतमश्वमनुवर्तते तद्वत्। अपि च सुवानास ऋत्विग्भिरभिषूयमाणा इंदवः सोमाश्च त्वामनुवर्तंते॥

॥ अथैकोनचत्वारिंशी ॥

मंद॑स्वा॒ सु स्व॑र्णर उ॒तेंद्र॑ श॒र्य॑णावति।

मत्स्वा॒ विव॑स्वतो म॒ती ॥ ३९

मंद॑स्व। सु। स्वः॑ऽनरे। उ॒त। इं॒द्र॒। श॒र्य॑णाऽवति। मत्स्व॑।

विव॑स्वतः। म॒ती ॥ ३९

उतापि च हे इंद्र शर्यणावति। शर्यणः नाम कुरुक्षेत्रवर्तिनो देशाः। तेषामदूरभवः सरः शर्यणावत्। मध्वादिभ्यश्चेति चातुर्थिको मतुप्। मतौ बह्वचः इति दीर्घः। संज्ञायामिति वत्वं॥ तस्मिन् सरसि विद्यमाने स्वर्णरे सर्वैर्नरैः स्तुत्यमने तस्मिन् यज्ञे सु सुष्ठु मंदस्व हृष्टो भव। अपि च विवस्वतः परिचरणवतो यजमानस्य मती मत्या च मत्स्व। मदं प्राप्नुहि॥ मतिशब्दात्तृतीयायाः सुपां सुलुगिति पूर्वसवर्णदीर्घः॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ चत्वारिंशी ॥

वावृधान उप द्यवि वृषा वज्र्यरोरवीत् ।

वृत्रहा सोमपातमः ॥ ४०

वावृधानः । उप । द्यवि । वृषा । वज्री । अरोरवीत् ।

वृत्रऽहा । सोमऽपातमः ॥ ४०

वावृधानो वृद्धो वज्री वज्रवान् अत एव वृत्रहा वृत्रस्य मेघस्यासुरस्य वा हंता सोमपातमोऽतिशयेन सोमस्य पातेंद्रो वृषोदकानां वर्षिता द्यवि द्युलोकेऽन्तरिक्षे उप समीपे यथास्माभिः श्रूयते तथारोरवीत् । भृशं स्तनयित्नु लक्षणं शब्दमकरोत् । उप समीपे यथास्माभिः श्रूयते तथारोरवीत् । भृशं स्तनयित्नुलक्षणं शब्दमकरोत् । मेघेन वज्रप्रक्षेपेणेदृशं शब्दमचीकरदित्यर्थः ॥

॥ इति पंचमस्याष्टमे षोडशो वर्गः ॥

॥ अथैकचत्वारिंशी ॥

ऋषिर्हि पूर्वजा अस्येक ईशान ओजसा ।

इंद्र चोष्कूयसे वसु ॥ ४१

ऋषिः । हि । पूर्वऽजाः । असि । एकः । ईशानः । ओजसा ।

इंद्र । चोष्कूयसे । वसु ॥ ४१

हे इंद्र पूर्वजाः सर्वेभ्यो देवेभ्यः पूर्वं जात उत्पन्नः । यद्वा यज्ञेषु प्रथमतमेन प्रादुर्भूतस्त्वमृषिर्हि द्रष्टा सर्वज्ञः खल्वसि । भवसि । अपि च सर्वेषु देवेषु मध्ये एको मुख्य ओजसा बलेनेशान ईश्वरो भवसि । यद्वैकोऽसहाय एव सन् ओजसात्मीयेनैव बलेनेशानः सर्वस्य जगत ईश्वरो भवसि । स त्वं वसु धनं चोष्कूयसे । पुनः पुनः स्तोतृभ्यो ददासि ॥ स्कूञ् आप्रवणे इह दानार्थः ॥ तथा चोक्तं चोष्कूयमाण इंद्र भूरि वामं ददरिंद्र वसु वननीयं । नि० ६, २२, । इति ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ द्विचत्वारिंशी ॥

अस्माकं त्वा सुताँ उप वीतपृष्ठा अभि प्रयः।

शतं वहंतु हरयः॥ ४२

अस्माकं। त्वा। सुतान्। उप। वीतऽपृष्ठाः। अभि। प्रयः।

शतं। वहंतु। हरयः॥ ४२

हे इंद्र अस्माकमस्मदीयान् सुतानुपलक्ष्य प्रयः। अन्ननामैतत्। धानाकरंभादि-हविर्लक्षणमन्नं चाभिलक्ष्य वीतपृष्ठाः प्रगल्भपरिभागाः शतं शतसंख्याका हरयोऽश्वास्त्वा वहंतु। प्रापयंतु॥

॥ अथ त्रिचत्वारिंशी ॥

इमां सु पूर्व्यां धियं मधोर्घृतस्य पिप्युषीं।

कण्वा उक्थेन वावृधुः॥ ४३

इमां। सु। पूर्व्यां। धियं। मधोः। घृतस्य। पिप्युषीं।

कण्वाः।

उक्थेन। ववृधुः॥ ४३

इमामिदानीं क्रियमाणां सु सुष्ठु पूर्व्यां पूर्वैः पित्रादिभिः कृतां मधोर्मधुरस्य घृतस्य क्षरणशीलस्योदकस्य पिप्युषीं वर्धयित्रीं। यद्वा मधुरेण घृतेनाज्येन प्रवृद्धां धियं यागक्रियां कण्वाः कण्वगोत्रा ऋषय उक्थेन शस्त्रेण वावृधुः। एंद्राग्नं वर्धयंति। कण्वैर्हि यागो वर्धते। अग्निष्टोमादिषूत्तरासु संस्थासु शस्त्रवृद्धिदर्शनात्। यद्वा पूर्व्यां चिरंतनामिमामिंद्रस्य प्रियमनुष्ठानरूपां धियं क्षरणशीलेन मधुरेण सोमेन पिप्युषीं वर्धनीयामुक्थेन स्तोत्रेण वावृधुः। वर्धयंति॥

॥ अथ चतुश्चत्वारिंशी ॥

इंद्रमिद्विमहीनां मेधे वृणीत मर्त्यः।

इंद्रं सनिष्युरूतये॥ ४४

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पूर्वं । इत् । विऽसंहीनां । मेधे । वृणीत । मर्त्यः ।

इंद्र । सनिष्युः । ऊतये ॥ ४४

विसहीनां विशेषेण महतां देवानां मध्य इंद्रमिदिंद्रमेव मेधे यज्ञे मर्त्यो मनुष्यो होतां वृणीत । स्तुतिभिः संभजते । तथा सनिष्युर्धनकामश्च होतोतये रक्षणा-र्थेंद्रमेव वृणीते । स्तुत्या संभजते ॥

॥ अथ पंचचत्वारिंशी ॥

अर्वांचं त्वा पुरुष्टुत प्रियमेधस्तुता हरी ।

सोमपेयाय वक्षतः ॥ ४५

अर्वांचं । त्वा । पुरुऽस्तुत । प्रियमेधऽस्तुता । हरी इति ।

सोमऽपेयाय । वक्षतः ॥ ४५

हे पुरुष्टुत बहुभिः स्तुतेंद्र प्रियमेधस्तुता प्रियमेधैः प्रिययज्ञैर्ऋषिभिः स्तुतौ ॥ तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं । सुपां सुलुगित्याकारः ॥ इंद्रयो हरी अश्वौ सोमपेयाय सोमपानार्थं त्वामर्वाग्गमनमस्मदभिमुखं वक्षतः । वहतां ॥

॥ अथ षट्चत्वारिंशी ॥

शतमहं तिरिंदिरे सहस्रं पर्शावा ददे ।

राधांसि याद्वानां ॥ ४६

शतं । अहं । तिरिंदिरे । सहस्रं । पर्शौ । आ । ददे ।

राधांसि । याद्वानां ॥ ४६

ऋषिर्दानादिकेन तृचेन तिरिंदिरस्य राज्ञो दानं स्तूयते । पर्शौ पर्शुनाम्नः पुत्रे ॥ उपचाराज्जन्ये जनकशब्दः ॥ तिरिंदिर एतत्संज्ञे राजनि याद्वानां । यदुरिति मनुष्यनाम । यद्व एव याद्वाः ॥ स्वार्थिकस्तद्धितः ॥ तेषां दत्तेऽहं शतं शतसंख्याकानि सहस्रं सहस्रसंख्याकानि च राधांसि धनान्याददे । स्वीकरोमि । यद्वा याद्वानां यदुकुलजानामन्येषां राज्ञां स्वभूतानि राधांसि बलादपहृतानि तिरिंदिरे वर्तमानान्यहं प्राप्नोमि ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ सप्तचत्वारिंशी ॥

त्रीणि शतान्यर्वतां सहस्रा दश गोनां ।

ददुष्पज्राय साम्ने ॥ ४७

त्रीणि । शतानि । अर्वतां । सहस्रा । दश । गोनां ।

ददुः । पज्राय । साम्ने ॥ ४७

पूर्वस्मिन्नृचि स्वप्रदानकं दानमुक्तं। अधुनान्येभ्योऽप्यृषिभ्यस्तिरिंदिरी यद्दानं दत्तवानित्याह। अर्वतां गंतॄणामश्वानां त्रीणि शतानि गोनां गवां दश दशगुणितानि सहस्रा सहस्राणि च पज्राय स्तुतीनां पार्जकाय साम्ने एतन्नामकाय ऋषये। यद्वा साम्ने। साम स्तोत्रं। तद्वते पज्राय पज्रकुलजाताय कक्षीवते ददुः। तिरिंदिराख्या राजानो दत्तवंतः॥

॥ अथाष्टाचत्वारिंशी ॥

उदानट्ककुहो दिवमुष्ट्रान् चतुर्युजो ददत् ।

श्रवसा याद्वं जनं ॥ ४८

उत् । आनट् । ककुहः । दिवं । उष्ट्रान् । चतुःऽयुजः । ददत् ।

श्रवसा । याद्वं । जनं ॥ ४८

अयं राजा ककुह उच्छ्रितः सन् श्रवसा कीर्त्या दिवं स्वर्गमुदानट्। उत्कृष्टतरं व्याप्नोत्। किं कुर्वन्। चतुर्युजश्चतुर्भिः स्कंधभारं युंजानानुष्ट्रान् ददत् प्रयच्छन्। तथा याद्वं जनं च दासत्वेन प्रयच्छन्॥

॥ इति पंचमस्याष्टमे सप्तदशो वर्गः ॥

प्र यद्व इति षट्त्रिंशदृचं द्वितीयं सूक्तं कण्वगोत्रस्य पुनर्वत्सस्यार्षं मारुतं गायत्रं। तथा चानुक्रांतं। प्र यद्वः षट्त्रिंशत्पुनर्वत्सो मारुतमिति॥ व्यूढे दशरात्रे प्रथमे छंदोम आग्निमारुतशस्त्र इदं सूक्तं मारुतनिविद्धानं। सूत्रितं च। प्र यद्वस्त्रिष्टुभमिषं न इत्याग्निमारुतं। आ० ८. ९. । इति॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ तत्र प्रथमा ॥

प्र यद्वस्त्रिष्टुभमिषं मरुतो विप्रो अक्षरत्।

वि पर्वतेषु राजथ ॥ १

प्र। यत्। वः। त्रिऽस्तुभं। इषं। मरुतः। विप्रः। अक्षरत्।

वि। पर्वतेषु। राजथ ॥ १

हे मरुतो मितराविणो मितरोचिनो वा एतत्संज्ञा माध्यमिका देवगणाः ॥ पादादित्वादपादादाविति षष्ठ्यामाद्युदात्तनिघाताभावे षाष्ठिकमामंत्रिताद्यु-दात्तत्वं ॥ यो युष्मभ्यं विप्रो मेधावी स्तोता त्रिष्टुभं त्रिषु सवनेषु प्रयुक्ता त्रिभिर्देवैः स्तुतां वा। यद्वा त्रिष्टुप्छंदस्का संपन्ना माध्यंदिनसवनिक्रीणियं सोमलक्षणमन्नं यद्यदा प्राक्षरत् प्रासिंचत् अग्नौ प्राक्षिपत्। यद्वा त्रिष्टुभं त्रिष्टुप्छंदस्कं स्तोत्रियं स्तोमं चेति योज्यं। तदानीं यूयं पर्वतेषु पर्ववत्सु गिरीशृंगेषु वि राजथ। तेन सोमेन लब्धबलाः संतो विशेषेण दीप्ता भवथ ॥

॥ अथ द्वितीया ॥

यदंग तविषीयवो यामं शुभ्रा अचिध्वं।

नि पर्वता अहासत ॥ २

यत्। अंग। तविषीऽयवः। यामं। शुभ्राः। अचिध्वं।

नि। पर्वताः। अहासत ॥ २

हे तविषीयवः। तविषीति बलनाम। तां कामयमानाः। यद्वा बलयुक्ता हे शुभ्राः शोभमाना अंग हे मरुतो यामं। याति गच्छतीति यामो रथः। तं यद्य-दा अचिध्वं समचिनुध्वं अश्वादिभिः साधनैः संचितं संश्लिष्टं कुरुथ गमनार्थं तदानीं पर्वता गिरयोऽपि न्यहासत। नितरां गच्छंति। युष्मद्भयेन भीताः संतः स्वस्थाना-त्प्रचलंति ॥ ओहाङ् गतौ। छांदसो लुङ् ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ तृतीया ॥

उदीरयंत वायुभिर्वाश्रासः पृश्निमातरः ।

धुक्षंत पिप्युषीमिषं ॥ ३

उत् । ईरयंत । वायुऽभिः । वाश्रासः । पृश्निऽमातरः ।

धुक्षंत । पिप्युषीं । इषं ॥ ३

वाश्रासो वाशनशीलाः शब्दकारिणः पृश्निमातरः । पृश्निर्नानावर्णा वाक् । सा माता जननी येषां ते तथोक्ताः ॥ छन्दसि वेति कपः प्रतिषेधः ॥ ईरया गमनेन वायुभिः । यांति गच्छंतीति वायवः पृषत्यः । पृषतीभिर्वा ज्ञातभूताभिः स्वायत्तभूतैर्वायुभिरेव चोदीरयंत । उद्गमयंति मेघादिकं । तथा पिप्युषीं वर्धयित्रीमिषमन्नं च स्तोतृभ्यो धुक्षंत । दुहंति ॥

॥ अथ चतुर्थी ॥

वपंति मरुतो मिहं प्र वेपयंति पर्वतान् ।

यद्यामं यांति वायुभिः ॥ ४

वपंति । मरुतः । मिहं । प्र । वेपयंति । पर्वतान् ।

यत् । यामं । यांति । वायुऽभिः ॥ ४

मरुत एतन्नामका देवा मिहं वृष्टिं वपंति । विकिरंति । विक्षिपंति । तथा पर्वतान् गिरीन् प्रवेपयंति । प्रकंपयंति । चलनं कुर्वंति चेत् । यद्यदा वायुभिः सार्धं यामं रथं गमनं वा यांति प्राप्नुवंति तदानीमित्यर्थः ॥

॥ अथ पंचमी ॥

नि यद्यामाय वो गिरिर्नि सिंधवो विधर्मणे ।

महे शुष्माय येमिरे ॥ ५

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

नि । यत् । यामाय । वः । गिरिः । नि । सिंधवः । विऽधर्मणे ।

महे । शुष्माय । येमिरे ॥ ५

हे मरुतो वो युष्माकं यामाय रथाय गमनाय वा गिरिः ॥ सुपां सुलुगिति जसः सुः ॥ गिरयः पर्वता यद्यदा नियेमिरे स्वयमेव नियच्छंते । तथा सिंधवः स्यंदनशीलाः समुद्रा नद्यो वा विधर्मणे विधरणाय महे महते शुष्माय शोषकाय युष्मदीयाय बलाय नियेमिरे स्वयमेव नियच्छंते । गिरयो नद्यश्च युष्मद्यामाद्भयाच्च ओत्यंतमेकस्थाने नियता वर्तंत इत्यर्थः । तदानीं वर्षंति मरुतो विभ्रमिति शेषः ॥ यमेः कर्मकर्तरि लिट् । यद्वृत्तान्नित्यमिति निघातप्रतिषेधः ॥

॥ इति पंचमस्याष्टकस्याष्टादशो वर्गः ॥

॥ अथ षष्ठी ॥

युष्माँ उ नक्तमूतये युष्मान्दिवा हवामहे ।

युष्मान्प्रयत्यध्वरे ॥ ६

युष्मान् । ऊँ इति । नक्तं । ऊतये । युष्मान् । दिवा । हवामहे ।

युष्मान् । प्रऽयति । अध्वरे ॥ ६

हे मरुतो युष्माँ उ युष्मानेव नक्तं रात्रावूतये रक्षणार्थं हवामहे । दिवाह्नि च युष्मानेवाह्वयामहे । अध्वरं । ध्वरो हिंसा तदभावादित्यध्वरो यागः ॥ नक्तसुभ्यामित्युत्तरपदांतोदात्तत्वं । यागे प्रयति प्रगच्छति प्रवर्तमाने सति रक्षणार्थं युष्मानेवाह्वयामहे ॥

॥ अथ सप्तमी ॥

उदु त्ये अरुणप्सवश्चित्रा यामेभिरीरते ।

वाश्रा अधि ष्णुना दिवः ॥ ७

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उत् । ऊं इति । त्ये । अरुणऽप्सवः । चित्राः । यामेभिः ।
ईरते ।
वाश्राः । अधि । स्नुना । दिवः ॥ ७

त्ये ते पूर्वोक्तगुणा अरुणप्सवोऽरुणवर्णरूपाश्चित्राश्चायनीया आश्चर्यभूता वा वाश्राः शब्दकारिण एवंभूता मरुतो यामेभिर्यामैर्यानैर्दिवोऽधि द्युलोकस्योपरि स्नुना सानुना समुच्छ्रितप्रदेशेनोदीरते। उद्गच्छंति। उ इति पूरणः॥ पदादिषु मांस्पृन्नस्नूनामुपसंख्यानमिति सानुशब्दस्य स्नु भावः॥

कारीर्यां सौर्यस्य हविषः सृजंति रश्मिमित्येषानुवाक्या। सूत्र्यते हि। सृजंति रश्मिमोजसा मरुद्भिरिंद्रस्त्वावि तंतुं। आ० २. १३. । इति ॥

॥ सैषाष्टमी ॥

सृजंति रश्मिमोजसा पंथां सूर्याय यातवे ।
ते भानुभिर्वि तस्थिरे ॥ ८

सृजंति । रश्मिं । ओजसा । पंथां । सूर्याय । यातवे ।
ते । भानुऽभिः । वि । तस्थिरे ॥ ८

अत्राप्यस्तुतेर्यच्छब्दाध्याहारः। ये मरुतः सूर्याय सूर्यस्य॥ षष्ठ्यर्थे चतुर्थी वक्तव्येति चतुर्थी॥ यातवे गंतुं रश्मिं व्याप्तं॥ अशे रश च इत्यश्नोतेरौणादिको मिप्रत्ययो रशादेशश्च॥ यद्वा रश्मिभिस्तेजोभिर्युक्तं पंथां पंथानमोजसा बलेन सृजंति उत्पादयंति। वृत्रादिभिरावृतं सूर्यपथमावरकस्य वृत्रादेरपनयनेन जनयंतीत्यर्थः। ते मरुतो भानुभिस्तेजोभिर्वितस्थिरे। कृत्स्नं जगद्व्याप्यावतिष्ठंते॥

॥ अथ नवमी ॥

इमां मे मरुतो गिरमिमं स्तोममृभुक्षणः ।
इमं मे वनता हवं ॥ ९

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

इमां । मे । मरुतः । गिरं । इमं । स्तोमं । ऋभुक्षणः ।

इमं । मे । वनत । हवं ॥ ८

हे मरुत इमां पुरो वर्तिनीं मे मम गिरं शब्दरूपां वाचं वनत । संभजत । हे ऋभुक्षणः । महन्नामैतत् । महांतः ॥ जसोलोऽप्रथमान्नामस्यान इत्यकारः । वा छंदसि निगम इति दीर्घाभावः ॥ ते यूयमिमं स्तोमं स्तोत्रं प्रगीतमंत्रसाध्यं । मे ममेमं पुरो वर्तिनं हवमाह्वानरूपं च याज्ञं वनत । संभजत । सेवध्वं ॥

॥ अथ दशमी ॥

त्रीणि सरांसि पृश्नयो दुदुह्रे वज्रिणे मधु ।

उत्सं कवंधमुद्रिणं ॥ १०

त्रीणि । सरांसि । पृश्नयः । दुदुह्रे । वज्रिणे । मधु ।

उत्सं । कवंधं । उद्रिणं ॥ १०

पृश्नयो मरुन्मातृभूता गावो वज्रिणे वज्रवत इंद्राय ॥ तादर्थ्ये चतुर्थी ॥ इंद्रार्थं मधु मधुरं चीरादिकमाश्रयणद्रव्यं त्रीणि सरांसि सर इव सोमैः पूरितानि त्रीणि सवनानि त्रिष्वपि सवनेषु श्रयणार्थं दुदुह्रे । दुदुहिरे । यद्वा मधु मधुरं सोमं वज्रिणे वज्रयुक्ताय इंद्राय त्रीणि सरांसि द्रोणकलशाधवनीयपूतभृल्लक्षणानि प्रति पृश्नयो माध्यमिका वाचो दुदुह्रे । दुहिद्वारा दुहंति । यद्वा पृश्नय इति माध्यमिका शब्देन पुत्रा उच्यंते । पृश्निमातरो मरुत इंद्रार्थं त्रीणि सरांसि द्रोणकलशादीनि मधु मधुना सोमेन पूरयितुमुत्सं उत्सरणशीलं कवंधमुदकमुद्रिणं उदकवंतं मेघं दुदुह्रे । दुहते ॥ दुहेश्छांदसो लिट् । इरयो रे इति रेभावः । पादादित्वादनिघातः ॥

॥ इति पंचमस्याष्टम एकोनविंशो वर्गः ॥

॥ अथैकादशी ॥

मरुतो यद्ध वो दिवः सुम्नायंतो हवामहे ।

आ तू न उप गंतन ॥ ११

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

मरुतः। यत्। ह। वः। दिवः। सुम्नऽयंतः। हवामहे।

आ। तु। नः। उप। गंतन॥ ११

हे मरुतो यद्ध यदा खलु वो युष्मान् सुम्नायंतः सुम्नं सुखमात्मन इच्छंतो वयं दिवो द्युलोकादवामहे स्तुतिभिराह्वयामहे आ तु अनंतरमेव शीघ्रं नोऽस्मानुपागंतन। उपगच्छत॥ गमेर्लोटि तप्तनप्तनथनाश्चेति तनबादेशः॥

॥ अथ द्वादशी॥

यूयं हि ष्ठा सुदानवो रुद्रा ऋभुक्षणो दमे।

उत प्रचेतसो मदे॥ १२

यूयं। हि। स्थ। सुऽदानवः। रुद्राः। ऋभुक्षणः। दमे।

उत। प्रऽचेतसः। मदे॥ १२

उतापि च हे सुदानवः शोभनदाना हे रुद्रा रुद्रपुत्राः॥ पादादित्वादामंत्रितनिघाताभावः॥ हे ऋभुक्षणो महांत उरुतेजस्का वा। ईदृशा हे मरुतो यूयं हि खलु दमे यज्ञगृहे मदे मदकरे सोमे पीते सति प्रचेतसः स्थ। प्रकृष्टज्ञाना भवथ॥

॥ अथ त्रयोदशी॥

आ नो रयिं मदच्युतं पुरुक्षुं विश्वधायसं।

इयर्ता मरुतो दिवः॥ १३

आ। नः। रयिं। मदऽच्युतं। पुरुऽक्षुं। विश्वऽधायसं।

इयर्त। मरुतः। दिवः॥ १३

हे मरुतो नोऽस्माकं रयिं धनं दिवो द्युलोकादियर्त। आगमयत॥ ऋ गतावित्यस्मादन्तर्भावितण्यर्थाज्जुहोत्यादिकाल्लोटि तस्य तप्तनप्तनेति तबादेशः। अदुपदेशात्तं चेत्यभ्यस्ताद्युदात्तत्वं॥ कीदृशं रयिं। मदच्युतं मदं क्षरंतं। यद्वा शत्रूणां मदस्य च्यावयितारं पुरुक्षुं बहुनिवासं बहुभिः स्तूयमानं वा विश्वधायसं विश्वेषां सर्वेषामस्मदीयानां धारणाय पोषणाय पर्याप्तं॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ चतुर्दशी ॥

अधीव यद्गिरीणां यामं शुभ्रा अचिध्वं ।

सुवानैर्मंदध्व इंदुभिः ॥ १४

अधिऽइव । यत् । गिरीणां । यामं । शुभ्राः । अचिध्वं ।

सुवानैः । मंदध्वे । इंदुऽभिः ॥ १४

हे शुभ्राः शोभमाना मरुतो गिरीणां पर्वतानामधीवोपरीव यद्यदा यामं युष्मदीयं रथगमनमचिध्वं गमनसाधनैरश्वादिभिरुपचितं कुरुथ तदानीं सुवानैरभिषूयमाणैरिंदुभिः सोमैर्मंदध्वे। मादयध्वे ॥

॥ अथ पंचदशी ॥

एतावतश्चिदेषां सुम्नं भिक्षेत मर्त्यः ।

अदाभ्यस्य मन्मभिः ॥ १५

एतावतः । चित् । एषां । सुम्नं । भिक्षेत । मर्त्यः ।

अदाभ्यस्य । मन्मऽभिः ॥ १५

मर्त्यो मनुष्यः स्तोता मन्मभिः स्तोत्रैः सुम्नं सुखं धनं वैषां मरुतां सम्भूतं भिक्षेत। याचेत। इदानीं गणाभिप्रायेणैकवद्भावः। एतावतश्चित् यत्परिमाणस्य अदाभ्यस्य केनापि हिंसितुमशक्यस्य मरुद्गणस्य सुम्नं भिक्षेत ॥ एतच्छब्दात् यत्तदेतेभ्य इति परिमाणेऽर्थे वतुप्। आ सर्वनाम्न इत्यात्वं ॥

॥ इति पंचमस्याष्टमे विंशो वर्गः ॥

॥ अथ षोडशी ॥

ये द्रप्सा इव रोदसी धमंत्यनु वृष्टिभिः ।

उत्सं दुहंतो अक्षितं ॥ १६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

ये। द्रप्साःऽइव। रोदसी इति। धमन्ति। अनु। वृष्टिऽभिः।

उत्सं। दुहन्तः। अक्षितं॥ १६

ये मरुतो द्रप्सा इवोदबिन्दव इव रोदसी द्यावापृथिव्यौ वृष्टिभिर्वर्षणैरनुधमन्ति अनुगच्छन्ति साकल्येन व्याप्नुवन्ति। यद्वानुध्मातेत्युच्छ्वसितावयवे कुर्वन्ति। किं कुर्वन्तः। अक्षितमक्षीणमुदकवन्तमुत्सं मेघं दुहन्तः पूरयन्तो मेघादपाङ्मुखं पातयन्तः॥ दुहेर्लक्षणहेत्वोः। पा० ३. २. १२६.। इति हेतौ शतृप्रत्ययः॥ यत एवं दुहन्ति ततो रोदसी अनुधमन्तीत्यर्थः॥

॥ अथ सप्तदशी॥

उदु स्वानेभिरीरत उद्रथैरुदु वायुभिः।

उत्स्तोमैः पृश्निमातरः॥ १७

उत्। ऊं इति। स्वानेभिः। ईरते। उत्। रथैः। उत्।

ऊं इति। वायुऽभिः।

उत्। स्तोमैः। पृश्निऽमातरः॥ १७

स्वानेभिः स्वानैः शब्दैरीरत उदीरते। उद्गच्छन्ति॥ स्वन शब्दे। स्वनहसोर्वा। पा० ३. ३. ६२.। इत्यपो विकल्पितत्वात्पक्षे घञ्। कर्षात्वत इत्यन्तोदात्तत्वं। बहुलं छन्दसीति भिस ऐसभावः। उ इति पूरणः। तथा रथैः रथप्रयुक्तैर्घोषैरुदीरते। पृश्निमातरः - - - ॥

। अथाष्टादशी।

येनाव तुर्वशं यदुं येन कण्वं धनस्पृतं।

राये सु तस्य धीमहि॥ १८

येन। अव। तुर्वशं। यदुं। येन। कण्वं। धनऽस्पृतं।

राये। सु। तस्य। धीमहि॥ १८

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

येनात्मीयेन रक्षणेन तुर्वशमेतन्नामकं यदुमेतन्नामकं च राजर्षिमाप्यं रक्षितवंतः स्थ॥ अवतेर्लिटि मध्यमबहुवचने रूपमेतत्॥ येन च धनस्पृतं धनकामं काण्वमृषिं रक्षितवंतः स्थ तस्य युष्मदीयं रक्षणं राये धनार्थं सु धीमहि। शोभनं ध्यायाम॥

॥ अथैकोनविंशी॥

इमा उ वः सुदानवो घृतं न पिप्युषीरिषः।

वर्धान्काण्वस्य मन्मभिः॥ १९

इमाः। उं इति। वः। सुऽदानवः। घृतं। न।

पिप्युषीः। इषः।

वर्धान्। काण्वस्य। मन्मऽभिः॥ १९

हे सुदानवः शोभनदाना मरुतो घृतं न घृतमिव पिप्युषीर्वर्धयित्र्यः शरीरपुष्टिहेतुभूता इमा इदानीं प्रदीयमाना इषोऽन्नानि सोमलक्षणानि काण्वस्य कण्वगोत्रस्य मम संबंधिभिर्मन्मभिः स्तोत्रैः सार्धं वो युष्मान् वर्धान् वर्धयंतु॥ वृधेर्ण्यंताल्लेटि रूपमेतत्। उ इति पूरणः॥

॥ अथ विंशी॥

क्व नूनं सुदानवो मदथा वृक्तबर्हिषः।

ब्रह्मा को वः सपर्यति॥ २०

क्व। नूनं। सुऽदानवः। मदथ। वृक्तऽबर्हिषः।

ब्रह्मा। कः। वः। सपर्यति॥ २०

मरुदागमनस्य विलंबमसहमान ऋषिरनया विमर्शयति। सुदानवः शोभनदाना हे वृक्तबर्हिषः। वृक्तं छिन्नं स्तरणं प्रति बर्हिर्येषां ते वृक्तबर्हिषः। यज्ञा वृक्तबर्हिषः। वृक्तः प्रवृक्तो यज्ञो येषां ते तथोक्ताः। हे देवा मरुतः क्व नूनं देवे

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

नूनमिदानीं मदथ । माद्यथ ॥ मदो हर्षे । व्यत्ययेन शप् ॥ कत्र ब्रह्मा ब्राह्मणः स्तोता वो युष्मान् सपर्यति । परिचरति । किंकृत्यं मरुतः स्तुतेरपि मध्यमिदानीं नागच्छत इति न जानीमः ॥

॥ इति पंचमस्याष्टम एकविंशो वर्गः ॥

॥ अथैकविंशी ॥

नहि ष्म यद्ध वः पुरा स्तोमेभिर्वृक्तबर्हिषः ।

शर्धाँ ऋतस्य जिन्वथ ॥ २१

नहि । स्म । यत् । ह । वः । पुरा । स्तोमेभिः । वृक्तऽबर्हिषः ।

शर्धान् । ऋतस्य । जिन्वथ ॥ २१

पूर्वया चित्तवृत्तिमिदानीं निश्चिनोति । हे वृक्तबर्हिषः प्रवृक्तयज्ञका मरुतो नहि स्म तत्र खलु संभवति । यो यूयं पुराकल्पः पूर्वमेव कृतैः स्तोमैरन्यदीयैः स्तोत्रैर्ऋतस्योदकस्य सत्यस्य यज्ञस्य वा संबंधिनः शर्धानात्मीयानि बलानि जिन्वथ प्रीणयथेति यद्ध यत्खलु तत्र संभवत्येव । अतः शीघ्रमागच्छतेत्यर्थः । यद्वा वृक्तबर्हिष ऋत्विक्संबोधनम् । हे ऋत्विजः यो युष्माकं सर्वेभिः स्तोमैरपि स्तोत्रैर्ऋतस्य यज्ञस्य संबंधिनो यागार्हान् शर्धान् मारुतानि बलानि पुराऽन्येभ्यः स्तोतृभ्यः पूर्वमेव न खलु यद्यस्मात्कारणात् जिन्वथ यूयं प्रीणयथ ॥ जिविः प्रीणनार्थः ॥ तस्मादन्यदीयैः स्तोत्रैस्ते मरुतो नाभिभवंतीत्यर्थः ॥

प्रथमे गवाशिरे पयस्योरामिक्षयोः समु त्ये महतीरप इत्येषानुवाक्या । सूत्रितं हि । आमिक्षयोः समु त्ये महतीरप इति मध्यमोरमादायोस्विष्टकृत् । आ० ४. ७. । इति ॥

॥ अथ द्वाविंशी ॥

समु त्ये महतीरपः सं क्षोणी समु सूर्यम् ।

सं वज्रं पर्वशो दधुः ॥ २२

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

सं। ऊं इति। त्ये। महतीः। अपः। सं। क्षोणी इति॥

सं। ऊं इति। सूर्यं।

सं। वज्रं। पर्वऽशः। दधुः॥ २२

त्ये ते पूर्वोक्तगुणा मरुतो महतीर्महतीरपो वृष्ट्युदकानि सम् उ दधुः संदधति। अंतरिक्षादिभिः संयोजयंति। यद्वा वर्षकाले सूर्यरश्मिभिर्हृतम्। उपरि सम्यक् धारयंति॥ इडन्तस्मृतोऽपसंख्यानमिति मरुतः परस्य शसो उदात्तत्वं। ऊडिदंपदादि-त्यादिनाप्युदात्तत्वं। तथा क्षोणी क्षोण्यौ द्यावापृथिव्यौ च ते मरुतः संदधुः। यथा स्वे स्वे स्थानेऽवतिष्ठेते तथा धारयंति। सूत्रात्मना वायुना सर्वं जगद्धार्यते। तथा च श्रूयते। वायुर्वै गौतम तत्सूत्रं वायुना वै गौतम सूत्रेणायं च लोकः सर्वाणि च भूतानि संदृब्धानि भवंति। बृहदा० उ० ६. ७. २.। इति। तथा सूर्यं सर्वस्य प्रेरकमादित्यं चांतरिक्षे सं दधुः। सम्यग्धारयंति। उशब्दः समुच्चये। किंचायं मरुतो वज्रमात्मीयमायुधं पर्वशः पर्वणि पर्वणि वृत्रस्य ऊर्वैरवयवसंबंधिषु पतनार्थं संदधुः। समयूयुजन्॥

॥ अथ त्रयोविंशी ॥

वि वृत्रं पर्वशो ययुर्वि पर्वताँ अराजिनः।

चक्राणा वृष्णि पौंस्यं॥ २३

वि। वृत्रं। पर्वऽशः। ययुः। वि। पर्वतान्। अराजिनः।

चक्राणाः। वृष्णि। पौंस्यं॥ २३

अराजिनो राज्ञा केनचिदप्यनधिष्ठिताः। यद्वा राजा दीप्यमानः न विद्यते राजा येषां ते। तद्युक्ता वृष्णि वीर्यवत् पौंस्यं बलं चक्राणाः कुर्वाणा मरुतो वृत्रनामकमसुरं मेघं वा पर्वशः पर्वणि पर्वणि भेदेन वि ययुः। विभिन्नं कृत्वा अगमयन्। तथा पर्वतान् गिरींश्च विभिन्नं पथं प्रापयन्॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

॥ अथ चतुर्विंशी ॥

अनु त्रितस्य युध्यतः शुष्ममावन्नुत क्रतुम् ।

अन्विन्द्रं वृत्रतूर्ये ॥ २४

अनु । त्रितस्य । युध्यतः । शुष्मम् । आवन् । उत । क्रतुम् ।

अनु । इंद्रं । वृत्रऽतूर्ये ॥ २४

त्रितस्यैतन्नामकस्य ऋषेर्युध्यतः शत्रून् संप्रहरतो राजर्षेः शुष्मं परेषां शोषकं बलं मरुतोऽन्वावन् । शत्रुभ्यो युद्धमन्वगच्छन् । युद्धकाले युद्धमुपचरन् । उतापि च क्रतुं तदीयं कर्म चारक्षन् । अपि च वृत्रतूर्ये वृत्रवधार्थे संग्रामे इंद्रं चान्वावन् । अरक्षन् ॥

॥ अथ पंचविंशी ॥

विद्युद्धस्ता अभिद्यवः शिप्राः शीर्षन्हिरण्ययीः ।

शुभ्रा व्यंजत श्रिये ॥ २५

विद्युत्ऽहस्ताः । अभिऽद्यवः । शिप्राः । शीर्षन् । हिरण्ययीः ।

शुभ्राः । वि । अंजत । श्रिये ॥ २५

विद्युद्धस्ता विद्योतमानायुधहस्ता अभिद्यवोऽभिगतदीप्तयः शुभ्रा शोभमाना मरुतः शीर्षन् शीर्षसु शिरस्त्राणीयेषु शिरःसु हिरण्ययीर्हिरण्मयीः स्वर्णमयानि शिप्राः शिरस्त्राणानि श्रिये शोभार्थं व्यंजत । व्यंजयंति । व्यक्तीकुर्वंति । धारयंतीत्यर्थः ॥

॥ इति पंचमस्याष्टमे द्वाविंशो वर्गः ॥

॥ अथ षड्विंशी ॥

उशना यत्परावत उक्ष्णो रंध्रमयातन ।

द्यौर्न चक्रदद्भिया ॥ २६

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

उशनां । यत् । पराऽवतः । उक्ष्णः । रंध्रं । अयातन ।

द्यौः । न । चक्रदत् । भिया ॥ २६

हे मरुत उशनाः ॥ व्यत्ययेन प्रथमा ॥ उशनसा काव्येन यदिवा स्तूयमाना यूयं ॥ यद्वोशनस् शब्दः सुपां सुलुगिति जसः लुः ॥ उशनसः स्तोतुः कामयमाना यूयमुक्ष्णः वृक्षः कामानां वर्षितुरात्मीयस्य रथस्य द्यावापृथिव्योरंतरिक्षस्य वा रंध्रं अद्य परावतो दूरदेशाद्युद्वदायातन आगच्छत ॥ यातेर्लोटि मध्यमबहुवचनस्य तप्तनप्तनथनाश्चेति तनादेशः ॥ तदानीं द्यौरंतं । अत्र द्युशब्देन तत्रत्यो जनसंघो लक्ष्यते । द्युलोके वर्तमानो जनसंघ एव पार्थिवमपि सर्वं भूतजातं भिया युष्मदागमनभि-सतया भीत्या चक्रदत् । अक्रंदयत् अकंपत वा ॥

॥ अथ सप्तविंशी ॥

आ नो मखस्य दावनेऽश्वैर्हिरण्यपाणिभिः ।

देवास उप गंतन ॥ २७

आ । नः । मखस्य । दावने । अश्वैः । हिरण्यपाणिऽभिः ।

देवासः । उप । गंतन ॥ २७

हे देवासो दानादिगुणयुक्ता मरुतो नोऽस्माकं मखस्य यज्ञस्य दावने दानाय ॥ ददातेरौणादिको भावे वनिः ॥ हिरण्यपाणिभिः सुवर्णमयपादैः स्वर्णालंकृतैर्हिंसर-हितैर्वा अश्वैरुपगंतन । उपागच्छत । प्राप्नुत ॥ गमेर्लोटि छांदसः शपो लुक् । तप्तनप्तनथनाश्चेति तनबादेशः । अत एव ङित्त्वाभावादनुनासिकलोपो न क्रियते ॥

॥ अथाष्टाविंशी ॥

यदेषां पृषती रथे प्रष्टिर्वहति रोहितः ।

यांति शुभ्रा रिणन्नपः ॥ २८

यत् । एषां । पृषतीः । रथे । प्रष्टिः । वहति । रोहितः ।

यांति । शुभ्राः । रिणन् । अपः ॥ २८

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

एषां मरुतां रथे पृषती: पृषद्भिः श्वेतबिन्दुभिर्युक्ता मृग्यो यदा वहन्ति । यदा च प्रष्टिः प्राप्तः शोभमानो । यद्वा प्रकर्षेण युज्यमानः सन् रोहितः पृषतः पृषद्भि-र्युक्तो मृगो वहति तदानीं शुभ्राः शोभमाना मरुतो यान्ति । गच्छन्ति । तेषां गमने च तस्य उदकानि प्रतिबन्धकानि रिणन् । अरिणन् । अगच्छन् । प्रवहन्ति ॥ री गतिरेषणयोः । क्र्यादिकः । प्वादीनां ह्रस्वः । छान्दसोऽडभावः । समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्या इति वचनादत्र पूर्वपदस्य वाक्यान्तर-गतत्वात्तत्कृतनिघातनिमित्ताभावः ॥

॥ अथैकानत्रिंशी ॥

सुषोमे शर्यणावत्यार्जीके पस्त्यावति ।
ययुर्निचक्रया नरः ॥ २९

सुऽसोमे । शर्यणाऽवति । आर्जीके । पस्त्याऽवति ।
ययुः । निऽचक्रया । नरः ॥ २९

सुषोमे शोभनसोमयुक्त आर्जीके । ऋजीका नाम देशः । तत्संबन्धिनि शर्यणावति कुरुक्षेत्रस्य जघनार्धे शर्यणावन्नाम सरोऽस्ति । पस्त्यावति । गृहवति अन्तरिक्ष... यज्ञगृहोपेते सोमपानाय नरो नेतारो मरुतो निचक्रया नीचीनचक्रयावरोहणं प्रवर्तमानया रथकक्ष्यया ययुः । यान्ति । गच्छन्ति ॥ यातेश्छान्दसो लिट् ॥ यद्वा नरो नेतार ऋत्विज ऋज्वीकपरिमिते शर्यणावति यज्ञभागाय सोमपानाय निचक्रया नीचीनचक्रया शकट्या ययुः । गच्छन्ति ॥

॥ अथ त्रिंशी ॥

कदा गच्छाथ मरुत इत्था विप्रं हवमानं ।
मार्डीकेभिर्नाधमानं ॥ ३०

कदा । गच्छाथ । मरुतः । इत्था । विप्रं । हवमानं ।
मार्डीकेभिः । नाधमानं ॥ ३०

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे मरुतः इत्थेत्थमनेन प्रकारेण हूयमानमाह्वयन्तं स्तुवन्तं नाधमानं याचमानं विप्रं मेधाविनं स्तोतारं मां कदा कस्मिन्काले मार्डीकेभिः सुखहेतुभिर्धनैः सार्धं गच्छाथ । गच्छथ । विलम्बं मा कुरुत शीघ्रमागच्छतेति भावः ॥ २३ ॥

(इति पञ्चमस्याष्टमे त्रयोविंशो वर्गः)

कद्ध नूनं कधप्रियो यदिन्द्रमजहातन ।
को वः सखित्व ओहते ॥३१॥

कत् । ह । नूनं । कधऽप्रियः । यत् । इन्द्रं । अजहातन ।
कः । वः । सखिऽत्वे । ओहते ॥३१॥

हे कधप्रियः कथया स्तुत्या प्रीयमाणाः ॥ कथ वाक्यप्रबन्धने । अस्माद्भावे चिन्तिपूजीत्यादिनाङ् । ततष्टाप् । उत्तरपदे ङ्यापोः संज्ञाच्छन्दसोरिति ह्रस्वत्वं । धत्वं छान्दसं ॥ ईदृशा हे मरुतः वृत्रेण सह युध्यमानमिन्द्रं नूनं सत्यमजहातन पर्यत्यजतेति यदेतत् तत्कद्ध कदा खलु कस्मिन् काले जातं । न कदाचिदपीत्यर्थः । तथा च ब्राह्मणं । मरुतो हैनं नाजहुः प्रहर भगवो जहि वीरयस्व । ऐ० ब्रा० ३, २० । इति । वृत्रस्य त्वा श्वसथादीपमाणाः । ऋ० ८, ९६, ७ । इत्यादि च निगमान्तरं । यत एवमतः कारणाद्वो युष्माकं सखित्वे ॥ व्यत्ययेन सप्तमी ॥ सखिभावं कः स्तोतौहते । याचते । यद्वा । वहते । प्राप्नोति । ईदृशमनपायं युष्मत्सखित्वं दुर्लभमित्यर्थः ॥

सहो षु णो वज्रहस्तैः कण्वासो अग्निं मरुद्भिः ।
स्तुषे हिरण्यवाशीभिः ॥३२॥

सहो इति । सु । नः । वज्रऽहस्तैः । कण्वासः । अग्निं । मरुत्ऽभिः ।
स्तुषे । हिरण्यऽवाशीभिः ॥३२॥

वज्रहस्तैर्वज्रबाहुभिर्हिरण्यवाशीभिः । हिरण्मयी वाशी तक्षणसाधनमायुधं येषामस्ति तादृशैः । मरुद्भिः सहो सहैव वर्तमानमग्निं नोऽस्मदीया हे कण्वासः कण्वाः स्तोतारः कण्वगोत्रा वयंः यूयं स्तुषे । स्तुध्वं । यद्वा । न इति प्रथमार्थे द्वितीया । नो वयं कण्वगोत्राः ॥ अस्मदो द्वयोश्च । पा० १, २, ५९ । इत्येकस्मिन् बहुवचनं । सविशेषणस्य प्रतिषेधः । का० १, २, ५९, १ । इति तु व्यत्ययेन प्रवर्तते ॥ स्तुषे । स्तुवे ॥ स्तौतेरुत्तमैकवचने सिब्बहुलमिति सिप् ।

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

ओ षु वृष्णः प्रयंज्यूना नव्यंसे सुवितायं ।
ववृत्यां चित्रवांजान् ॥ ३३ ॥

ओ इतिं । सु । वृष्णंः । प्रऽयंज्यून् । आ । नव्यंसे । सुवितायं ।
ववृत्यां । चित्रऽवांजान् ॥३३॥

वृष्णो वर्षितॄनभीष्टफलदान् प्रयज्यून् प्रकर्षेण यष्टव्यान् चित्रवाजान् विचित्रगमनान् विचित्रबलान् विचित्रधनान्वा एवंभूतान्मरुतः सु सुष्ठु आ उ ववृत्यां । आवर्तयामि । अस्मदभिमुखं यथा गच्छन्ति तथा करोमि । अपि च नव्यसे नवीयसे नवतरायात्यन्तं प्रशस्ताय सुविताय सुष्ठु प्राप्तव्याय धनाय च ताना ववृत्यां । आवर्तयामि ॥

गिरयंश्चिन्नि जिंहते पर्शांनासो मन्यंमानाः ।
पर्वंताश्चिन्नि येमिरे ॥ ३४ ॥

गिरयंः । चित् । नि । जिहते । पर्शांनासः । मन्यंमानाः ।
पर्वंताः । चित् । नि । येमिरे ॥३४॥

मरुत्स्वागच्छत्सु गिरयश्चिद्गिरयोऽपि शिलोच्चया अपि पर्शानासः पीड्यमानाः । यद्वा । मरुद्भिः स्पृश्यमानाः । अत एव मन्यमाना अभिमन्यमाना बाध्यमानाः सन्तो नि जिहते । नितरां गच्छन्ति । मरुद्वेगेन स्थानात् प्रच्यवन्ते । तथा पर्वताश्चित् पर्ववन्तो मेघा अपि तदीयेन गमनेन नि येमिरे । नियम्यन्ते । यद्वा । गिरयः क्षुद्राः शिलोच्चया महान्तः पर्वताः ॥

आक्ष्णयावांनो वहन्त्यन्तरिंक्षेण पतंतः ।
धातांरः स्तुवते वयंः ॥ ३५ ॥

आ । अक्ष्णऽयावांनः । वहन्ति । अन्तरिंक्षेण । पतंतः ।
धातांरः । स्तुवते । वयंः ॥ ३५ ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अक्ष्णयावानोऽक्ष्णं व्याप्तं गच्छन्तः । यद्वा । अक्ष्णश्चक्षुषोऽपि शीघ्रं यान्तीत्यक्ष्णयावानः ॥ यातेरातो मनिन्क्वनिति वनिप् । ईदृशा अदवा अन्तरिक्षेणाकाशमार्गेण पततो गच्छतो मरुत आ वहन्ति । आनयन्ति । यद्वा । पतत इत्यश्वानां विशेषणं । अन्तरिक्षे नभसि पततो गच्छन्तः ॥ छान्दसो नुमभावः ॥ किं कुर्वन्तः । स्तुवते स्तोत्रं कुर्वते जनाय वयोऽन्नं धातारो विधातारः कुर्वाणाः ॥

अ॒ग्निर्हि जानि॑ पू॒र्व्यश्छन्दो॒ न सूरो॑ अ॒र्चिषा॑ ।
ते भा॒नुभि॒र्वि त॑स्थिरे ॥ ३६ ॥
अ॒ग्निः । हि । जनि॑ । पू॒र्व्यः । छन्दः॑ । न । सूरः॑ । अ॒र्चिषा॑ ।
ते । भा॒नुऽभिः॑ । वि । त॒स्थि॒रे॒ ॥ ३६ ॥

अग्निरग्निः खल्वर्चिषा तेजसा पूर्व्यः सर्वेषु देवेषु मुख्यो जनि । अजायत ॥ दीपजनेत्यादिना । पा० ३, १, ६१ । कर्तरि लुङि च्लेश्चिणादेशः ॥ तत्र दृष्टान्तः । छन्द उपच्छन्दनीयः सूरो न सूर्य इव । तदनन्तरं ते पूर्वोक्तगुणा मरुतो भानुभिर्दीप्तिभिर्वि तस्थिरे । विविधमवतिष्ठन्त । आग्निमारुते ह्यग्निः पूर्वं स्तूयते पश्चान्मरुतः । तदपेक्षया च पूर्वोत्तरयोरर्धर्चयोः क्रमेणाग्निर्मरुतश्च स्तूयन्ते ॥ २४ ॥

(इति पञ्चमस्याष्टमे चतुर्विंशो वर्गः)

आ नो विश्वाभिरिति त्रयोविंशत्यृचं तृतीयं सूक्तं सध्वंसाख्यस्य काण्वस्यार्षमानुष्टुभं । एतदादीनि त्रीणि सूक्तान्यश्विदेवत्यानि । तथा चानुक्रान्तं । आ नस्त्र्यधिका सध्वंस आश्विनं ह्यानुष्टुभं त्विति ॥ प्रातरनुवाक आश्विने क्रतावानुष्टुभे छन्दस्याश्विनशस्त्रे चैतत्सूक्तं । सूत्र्यते हि । आ नो विश्वाभिरस्थं चिदग्निमित्यानुष्टुभं । आ० ४, १५ । इति ॥ अप्तोर्यामे प्रशास्तुरतिरिक्तोक्थेऽप्येतत् । सूत्रितं च । आ नो विश्वाभिः प्रातर्यावाणा । आ० ९।११ । इति ॥ चतुर्थेऽहनि प्रउगशस्त्र आ नो विश्वाभिरित्याश्विनस्तृचः । सूत्रितं च । आ नो विश्वाभिरूतिभिरस्त्ययमु वो अप्रहणं । आ० ७, ११ । इति ॥

आ नो॒ विश्वा॑भिरू॒तिभि॒रश्वि॑ना॒ गच्छ॑तं युवं ।
दस्रा॒ हिर॑ण्यवर्तनी॒ पिब॑तं सो॒म्यं मधु॑ ॥ १ ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आ । नः । विश्वाभिः । ऊतिऽभिः । अश्विना । गच्छंतं । युवं ।
दस्रां । हिरंण्यवर्तनी इति हिरंण्यऽवर्तनी । पिबंतं । सोम्यं ।
मधुं ॥ १ ॥

हे अश्विनाश्विनावश्नुवानौ सर्वं जगद्व्याप्नुवन्तौ यद्वाश्वैर्युक्तौ युवं युवां विश्वाभिः सर्वाभिर्व्याप्ताभिर्वोतिभी रक्षाभिर्दातव्याभिः साधं नोऽस्मानागच्छतं । आगत्य च हे दस्रा दस्रौ दर्शनीयौ शत्रूणामुपक्षपयितारौ वा हे हिरण्यवर्तनी हिरण्मयरथौ हितरमणीयाचरणौ वा ईदृशौ हे अश्विनौ सोम्यं सोममयं मधु पिबतं ।

आ नूनं यातमश्विना रथेन सूर्यत्वचा ।
भुजी हिरंण्यपेशसा कवी गम्भीरचेतसा ॥ २ ॥

आ । नूनं । यातं । अश्विना । रथेन । सूर्यऽत्वचा ।
भुजी इतिं । हिरंण्यऽपेशसा । कवी इतिं । गम्भीरऽचेतसा ॥२॥

हे भुजी हविषां भोक्तारौ यद्वा स्तोतृभिरन्नानां भोजयितारौ सर्वस्य जगतः पालकौ वा हे हिरण्यपेशसा हिरण्मयालङ्कारौ हिरण्मयावयवौ वा हे कवी क्रान्तदर्शिनौ स्तोतव्यौ वा हे गम्भीरचेतसा प्रशस्तज्ञानौ ईदृशौ हे अश्विनाश्विनौ सूर्यत्वचा सूर्यवद्भासमानेन रथेन नूनमवश्यमस्माना यातं । आगच्छतं ॥

आ यातं नहुंषस्पर्यान्तरिक्षात्सुवृक्तिभिः ।
पिबाथो अश्विना मधु कण्वानां सवने सुतं ॥ ३ ॥

आ । यातं । नहुंषः । परि । आ । अन्तरिक्षात् । सुवृक्तिऽभिः ।
पिबाथः । अश्विना । मधुं । कण्वानां । सवने । सुतं ॥ ३ ॥

अश्विनौ नहुषस्परि । नहुष इति मनुष्यनाम । सामर्थ्याच्चात्र तत्सम्बद्धो लोको लक्ष्यते । मानुषात्तस्माल्लोकात् ॥ परि पञ्चम्यर्थानुवादी ॥ सुवृक्तिभिः सुष्ठु दोषवर्जिताभिः सुप्रवृत्ताभिर्वा स्तुतिभिर्हेतुभूताभिरा यातं । आगच्छतं । तथान्तरिक्षादन्तरा क्षान्तान्मध्यमाल्लोकादप्यागच्छतं । आगत्य च कण्वानां कण्वगोत्राणामस्माकं सवने यज्ञे प्रातःसवनादौ सुतमभिषुतं मधु मधुरं सोमं हे अश्विनौ पिबाथः । पिबतं ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आ नों यातं दिवस्पर्यान्तरिक्षादधप्रिया ।
पुत्रः कण्वंस्य वामिह सुषाव सोम्यं मधुं ॥ ४ ॥

आ । नः । यातं । दिवः । परिं । आ । अन्तरिक्षात् । अधऽप्रिया ।
पुत्रः । कण्वंस्य । वां । इह । सुसाव । सोम्यं । मधुं ॥ ४ ॥

हे अश्विनौ दिवस्परि दिवोऽधि द्युलोकान्नोऽस्माना यातं । आगच्छतं ॥ पञ्चम्याः परावध्यर्थं इति विसर्जनीयस्य सत्वं ॥ हे अधप्रियाधोऽधस्तादस्मिँल्लोके विद्यमानेन सोमेन प्रीयमाणौ । यद्वा । कधप्रिया ॥ छान्दसो वर्णलोपः ॥ कथया स्तुत्या प्रीयमाणौ । हे ईदृशावश्विनौ अन्तरिक्षादप्यागच्छतं । इहास्मिन्यज्ञे कण्वस्यर्षेः पुत्रः सोम्यं सोममयं मधु वां युवाभ्यां युवयोरर्थं सुषाव । अत आयातमित्यन्वयः ॥

आ नों यातमुपंश्रुत्यश्विंना सोमंपीतये ।
स्वाहा स्तोमंस्य वर्धना प्र कंवी धीतिभिर्नरा ॥५॥

आ । नः । यातं । उपंऽश्रुति । अश्विंना । सोमंऽपीतये ।
स्वाहां । स्तोमंस्य । वर्धना । प्र । कवी इतिं । धीतिऽभिः ।
नरा ॥ ५ ॥

हे अश्विनाश्विनौ नोऽस्माकमुपश्रुति । श्रूयत इति श्रुत् स्तुतिः । उपगता श्रुद्यस्मिन् तस्मिन्यज्ञे सोमपीतये सोमपानाया यातं । आगच्छतं । हे वर्धना वर्धनौ कवी क्रान्तदर्शिनावश्विनौ स्वाहा स्वाहाकृतौ स्वाहाकारेण सम्यगिष्टौ सन्तौ । यद्वा । स्वाहेति वाङ्नाम । स्तुतिरूपया वाचा स्तुतौ वाचा स्तोमस्य स्तोतुः प्रवर्धकौ भवतं । तथा हे नरा नेतारावश्विनौ धीतिभिः कर्मभिर्यष्टुश्च प्रवर्धकौ भवतं । यद्वा । स्वाहेत्यादीन्यामन्त्रितानि । हे स्वाहा स्वाहाकृतौ स्तोमस्य स्तोत्रस्य स्तोतुर्वा हे प्रवर्धना प्रवर्धयितारौ हे कवी क्रान्तदर्शिनौ धीतिभिर्बुद्धिभिरात्मीयैः कर्मभिर्वा हे नरा सर्वेषां नेतारावश्विनौ सोमपानाया यातमित्येकमेव वाक्यं । अस्मिन्पक्षे धीतिभिरित्यपराङ्गवत्त्वाभावश्छान्दसः ॥ यद्वा । धीतिभिर्ध्यातव्याभिर्युष्मदीयाभिरूतिभिः सार्धमा यातमिति क्रियया सम्बन्धः ॥२५॥

(इति पञ्चमस्याष्टमे पञ्चविंशो वर्गः)

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यच्चिद्धि वां पुर ऋषयो जुहूरेऽवसे नरा ।
आ यातमश्विना गतमुपेमां सुष्टुतिं मम ॥ ६ ॥

यत् । चित् । हि । वां । पुरा । ऋषयः । जुहूरे । अवसे । नरा ।
आ । यातं । अश्विना । आ । गतं । उप । इमां । सुऽस्तुतिं । मम ॥६॥

हे नरा नेतारावश्विनौ यच्चिद्धि यदा खलु वां युवां पुरा पूर्वस्मिन्काल ऋषयोऽतीन्द्रियार्थदर्शिनः स्तोतारोऽवसे रक्षणाय जुहूरे जुहुविरे स्तुतिभिराह्वयन् । ह्वयतेर्लिट्यभ्यस्तस्यचेति सम्प्रसारणं । हल इति दीर्घः । इरयो र इति रेभावः ॥ तदानीं हे अश्विनौ आ यातं । आगच्छतं । आगतवन्तौ स्थः । अतो मम मदीयामिमां सुष्टुतिं शोभनां स्तुतिमप्युपा गतं । उपागच्छतं ॥

दिवश्चिद्रोचनादध्या नो गन्तं स्वर्विदा ।
धीभिर्वत्सप्रचेतसा स्तोमेभिर्हवनश्रुता ॥७॥

दिवः । चित् । रोचनात् । अधि । आ । नः । गन्तं । स्वः॒ऽविदा ।
धीभिः । वत्सऽप्रचेतसा । स्तोमेभिः । हवनऽश्रुता ॥ ७ ॥

हे स्वर्विदा स्वः सूर्यस्य द्युलोकस्य वा लम्भयितारावश्विनौ दिवश्चिद्द्युलोकाच्च रोचनादधि रोचमानादन्तरिक्षाच्च नोऽस्माना गन्तं । आगच्छतं ॥ पूर्ववदधिः पञ्चम्यर्थानुवादकः ॥ हे वत्सप्रचेतसा वत्से स्तोतरि प्रकृष्टज्ञानौ । यद्वा । वत्सं निवासकं वेदितव्यं वा प्रकृष्टं चेतो ज्ञानं ययोस्तौ तथोक्तौ । तौ युवां धीभिरात्मीयाभिर्बुद्धिभिः सहागच्छतं । हे हवनश्रुता हवनस्यास्मदीयस्याह्वानस्य स्तोत्रस्य श्रोतारौ स्तोमेभिः स्तोत्रैरस्मत्कृतैर्युज्यमानौ सन्तावागच्छतं ॥

किमन्ये पर्यासतेऽस्मत्स्तोमेभिरश्विना ।
पुत्रः कण्वस्य वामृषिर्गीर्भिर्वत्सो अवीवृधत् ॥ ८ ॥

किं । अन्ये । परि । आसते । अस्मत् । स्तोमेभिः । अश्विना ।
पुत्रः । कण्वस्य । वां । ऋषिः । गीःऽभिः । वत्सः । अवीवृधत् ॥८॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अस्मदस्मत्तोऽन्ये व्यतिरिक्ताः स्तोतारः स्तोमेभिः स्तोत्रैरश्विनावश्विनौ देवौ किं पर्यासते । अस्मद्व्यतिरिक्ताः केऽप्यश्विनौ स्तोतुं न शक्नुवन्तीत्यर्थः । कण्वस्यर्षेः पुत्र ऋषिर्मन्त्रद्रष्टा वत्सो गीर्भिः स्तुतिभिर्हे अश्विनौ वां युवामवीवृधत् । अवर्धयत् ॥

आ वां विप्र इहावसेऽह्वत्स्तोमेभिरश्विना ।

अरिप्रा वृत्रहन्तमा ता नो भूतं मयोभुवा ॥ ९ ॥

आ । वां । विप्रः । इह । अवसे । अह्वत । स्तोमेभिः । अश्विना ।

अरिप्रा । वृत्रहन्ऽतमा । ता । नः । भूतं । मयःऽभुवा ॥९॥

हे अश्विनाश्विनौ विप्रो मेधावी स्तोतेहास्मिन्यागेऽवसे रक्षणार्थं स्तोमेभिः स्तोत्रैर्वां युवामाह्वत् । आहूतवान् ॥ ह्वयतेर्लुङि लिपिसिचिह्वश्चेति च्लेरङादेशः ॥ हे अरिप्रा । रिप्रमिति पापनाम । अपापौ हे वृत्रहन्तमा वृत्राणां शत्रूणां हन्तृतमौ ता तौ तादृशौ युवां नोऽस्माकं मयो भुवा सुखस्य भावयितारौ भूतं । भवतं ॥

आ यद्वां योषणा रथमतिष्ठद्वाजिनीवसू ।

विश्वान्यश्विना युवं प्र धीतान्यगच्छतं ॥ १० ॥

आ । यत् । वां । योषणा । रथं । अतिष्ठत् । वाजिनीवसू इति वाजिनीऽवसू ।

विश्वानि । अश्विना । युवं । प्र । धीतानि । अगच्छतं ॥ १० ॥

हे वाजिनीवसू । वाजिनी हविष्मती यागक्रिया । तस्यां विद्यमानत्वाद्व-लक्षणधनावश्विनौ योषणा योषित्सूर्याभिधावनेन ध्रियमाणा सती वां युवयो रथं यद्यदातिष्ठत् आस्थितवती आरूढवती तदा हे अश्विनाश्विनौ युवं युवां धीतानि ध्यातान्यभिलषितानि विश्वानि सर्वाणि प्रकर्षेणागच्छतं । प्रापतं ॥ २६ ॥

(इति पञ्चमस्याष्टमे षड्विंशो वर्गः)

अतः सहस्रनिर्णिजा रथेना यातमश्विना ।

वत्सो वां मधुमद्वचोऽशंसीत्काव्यः कविः ॥११॥

अतः । सहस्रऽनिर्निजा । रथेन । आ । यातं । अश्विना ।

वत्सः । वां । मधुऽमत् । वचः । अशंसीत् । काव्यः । कविः ॥११॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे अश्विनाश्विनौ येषु लोकेषु यत्र वर्तेथे अतोऽस्मात्स्थानात्सहस्रनिर्णिजा। निर्णिगिति रूपनाम। स्वर्णमयतया बहुविधरूपयुक्तेन रथेना यातं। आगच्छतं। काव्यः कवेः पुत्रः कविर्मेधावी वत्स ऋषिर्वां युवाभ्यां युवयोरर्थं मधुमन्माधुर्योपेतं वचो वचनमुक्थमशंसीत्। शंसितवान्। यत एवमत आगच्छतमित्यर्थः॥

पुरुमन्द्रा पुरूवसू मनोतरा रयीणां।
स्तोमं मे अश्विनाविममभि वह्नी अनूषातां ॥१२॥

पुरुऽमन्द्रा। पुरूवसू इति पुरुऽवसू। मनोतरा। रयीणां।
स्तोमं। मे। अश्विनौ। इमं। अभि। वह्नी इति। अनूषातां ॥१२॥

पुरुमन्द्रा बहुमदौ बहुभिः सोमैर्मादयितव्यौ वा पुरूवसू बहुधनौ बहूनां निवासकौ वा रयीणां धनानां मनोतरा मन्तारौ दातारौ॥ मन्यतेस्तृचि पृषोदरादित्वाद्रूपसिद्धिः। नामन्यतरस्यामिति रैशब्दान्नाम उदात्तत्वं॥ वह्नी कृत्स्नस्य जगतो वोढारौ ईदृशावश्विनौ मे ममेमं स्तोमं स्तोत्रमभ्यनूषातां। सम्यक्स्तुतमिति प्राशंसिषातां॥ णु स्तुतौ॥ यद्वा। नुवतिरत्र श्रवणार्थे वर्तते। अभिप्रासावश्रौष्टां॥

आ नो विश्वान्यश्विना धत्तं राधांस्यह्रया।
कृतं न ऋत्वियावतो मा नो रीरधतं निदे ॥ १३ ॥

आ। नः। विश्वानि। अश्विना। धत्तं। राधांसि। अह्रया।
कृतं। नः। ऋत्वियऽवतः। मा। नः। रीरधतं। निदे ॥१३॥

हे अश्विनाश्विनौ अह्रयाह्रयाण्यह्रीतिकरणान्यलज्जाहेतूनि प्रशस्तानि विश्वानि सर्वाणि राधांसि धनानि नोऽस्मभ्यमा धत्तं। प्रयच्छतं। अपि च नोऽस्मानृत्वियावतः। ऋतौ काले भवं प्रजोत्पादनरूपं कर्म ऋत्वियं। तद्वतः कृतनं। तथा निदे निन्दायै निन्दकाय वा नोऽस्मान्मा रीरधतं। मा वशं नैष्टं॥

यन्नासत्या परावति यद्वा स्थो अध्यम्बरे।
अतः सहस्रनिर्णिजा रथेना यातमश्विना ॥ १४ ॥

यत्। नासत्या। पराऽवति। यत्। वा। स्थः। अधि। अम्बरे।
अतः। सहस्रऽनिर्निजा। रथेन। आ। यातं। अश्विना ॥१४॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे नासत्या सत्यस्वभावौ सत्यस्य नेतारौ नासिकाप्रभवौ वाश्विनौ यद्यदि परावति दूरदेशे स्थः । यद्वा यदि चावरे । अन्तिकनामैतत् । समीपे स्थः भवथः । अधिः सप्तम्यर्थानुवादी ॥ अतोऽस्मात्सर्वस्मात्स्थानात्सहस्रनिर्णिजा बहुविधरूपेण रथेन हे अश्विनौ आगच्छतं ॥

यो वां नासत्यावृषिर्गीर्भिर्वत्सो अवीवृधत् ।
तस्मै सहस्रनिर्णिजमिषं धत्तं घृतश्चुतं ॥ १५ ॥

यः । वां । नासत्यौ । ऋषिः । गीःऽभिः । वत्सः । अवीवृधत् ।
तस्मै । सहस्रऽनिर्निजं । इषं । धत्तं । घृतऽश्चुतं ॥ १५ ॥

हे नासत्यौ यो वत्साख्य ऋषिर्वां युवां गीर्भिः स्तुतिभिरवीवृधत् अवर्धयत् तस्मा ऋषये सहस्रनिर्णिजं बहुविधरूपं घृतश्चुतं घृतं क्षरन्तीमिषमन्नं धत्तं । प्रयच्छतं ॥ २७ ॥

(इति पञ्चमस्याष्टमे सप्तविंशो वर्गः)

प्रास्मा ऊर्जं घृतश्चुतमश्विना यच्छतं युवं ।
यो वां सुम्नाय तुष्टवद्वसूयाद्दानुनस्पती ॥ १६ ॥

प्र । अस्मै । ऊर्जं । घृतऽश्चुतं । अश्विना । यच्छतं । युवं ।
यः । वां । सुम्नाय । तुस्तवत् । वसुऽयात् । दानुनः । पती इति ॥ १६ ॥

हे अश्विनाश्विनौ अस्मै स्तोत्रे घृतश्चुतं घृतधारया युक्तामूर्जं बलकरमन्नरसं युवं युवां प्र यच्छतं । दत्तं । हे दानुनस्पती दानस्याधिपती वां युवां सुम्नाय सुखार्थं यस्तुष्टवत् स्तुयात् । यश्च वसूयात् वसु धनमात्मन इच्छेत् । अस्मा इत्यन्वयः ॥

आ नो गन्तं रिशादसेमं स्तोमं पुरुभुजा ।
कृतं नः सुश्रियो नरेमा दातमभिष्टये ॥ १७ ॥

आ । नः । गन्तं । रिशादसा । इमं । स्तोमं । पुरुऽभुजा ।
कृतं । नः । सुऽश्रियः । नरा । इमा । दातं । अभिष्टये ॥ १७ ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे रिशादसा रिशतां हिंसतां निरसितारौ यद्वा रिशानां हिंसकानामत्तारौ भक्षितारौ हे पुरुभुजा बहुलस्य हविषो भोक्तारौ बहूनां पालकौ वा हे अश्विनौ नोऽस्माकमिमं स्तोमं स्तोत्रमा गन्तं । अभिगच्छतं । आगत्य च हे नरा नेतारौ नोऽस्मान् सुश्रियः सुश्रीकाञ्छोभनया सम्पदा युक्तान् कृतं । कुरुतं । तदर्थमिमेमानि पुरो वर्तमानानि पार्थिवान्यभिष्टयेऽभिप्राप्तये दातं । दत्तं ॥ ददातेर्लोटि च्छन्दसः शपो लुक् ॥

आ वां विश्वाभिरूतिभिः प्रियमेधा अहूषत ।
राजन्तावध्वराणामश्विना यामहूतिषु ॥ १८ ॥

आ । वां । विश्वाभिः । ऊतिऽभिः । प्रियऽमेधाः । अहूषत ।
राजन्तौ । अध्वराणां । अश्विना । यामऽहूतिषु ॥ १८ ॥

हे अश्विनाश्विनौ यामहूतिषु यामानां यातॄणां देवानां हूतिराह्वानं येषु यागेषु तेषु प्रियमेधा प्रिययज्ञा एतत्संज्ञा ऋषयोऽध्वराणां यज्ञानां राजन्तावीश्वरौ । राजतिरैश्वर्यकर्मा । अश्विनौ हि देवानामध्वर्यू आस्तामिति हि ब्राह्मणं । ईदृशौ विश्वाभिः सर्वाभिरूतिभी रक्षाभिः सहितौ वां युवामाहूषत । आह्वयन् । अस्तुवन्नित्यर्थः ॥

आ नो गन्तं मयोभुवाश्विना शम्भुवा युवं ।
यो वां विपन्यू धीतिभिर्गीर्भिर्वत्सो अवीवृधत् ॥ १९ ॥

आ । नः । गन्तं । मयःऽभुवा । अश्विना । शंऽभुवा । युवं ।
यः । वां । विपन्यू इति । धीतिऽभिः । गीःऽभिः । वत्सः । अवीवृधत्

हे अश्विनाश्विनौ मयोभुवा मयसः सुखस्य भावयितारौ शम्भुवा रोगाणां शमस्य भावयितारौ युवं युवां नोऽस्माना गन्तं । आगच्छतं । हे विपन्यू स्तुत्यावश्विनौ यो वत्सः स्तोता वां युवां धीतिभिः कर्मभिः परिचरणैर्गीर्भिः स्तुतिभिश्चावीवृधत् अवर्धयत् तानस्मानिति पूर्वत्रान्वयः ॥

याभिः कण्वं मेधातिथिं याभिर्वशं दशव्रजं ।
याभिर्गोशर्यमावतं ताभिर्नोऽवतं नरा ॥ २० ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

याभिः । कण्वं । मेधऽअतिथिं । याभिः । वशं । दशऽव्रजं ।
याभिः । गोऽशर्यं । आवतं । ताभिः । नः । अवतं । नरा ॥२०॥

हे अश्विनौ याभिरूतिभिः कण्वमृषिं मेधातिथिं चावतं अरक्षतं । याभिश्च वशमेतत्संज्ञं चावतं । याभिश्च गोशर्यं । शीर्णा गौर्यस्य स गोशर्यः शयुः । तथा चाम्नातं । शयवे चिन्नासत्या शचीभिर्जसुरये स्तर्यं पिप्यथुर्गाम् । ऋ० १,११६,२२ । इति ईदृशं गोशर्यं शयुमावतं अरक्षतं । हे नरा नेतारौ ताभिरूतिभिर्नोऽस्मानवतं । रक्षतं ॥ २८ ॥

(इति पञ्चमस्याष्टमेऽष्टाविंशो वर्गः)

याभिर्नरा त्रसदस्युमावतं कृत्व्ये धने ।
ताभिः ष्व१स्माँ अश्विना प्रावतं वाजसातये ॥ २१ ॥
याभिः । नरा । त्रसदस्युं । आवतं । कृत्व्ये । धने ।
ताभिः । सु । अस्मान् । अश्विना । प्र । अवतं । वाजऽसातये ॥२१॥

हे नरा नेतारावश्विनौ धने कृत्व्ये कर्तव्ये प्राप्तव्ये सति त्रसदस्युमेतत्संज्ञं पुरुकुत्सपुत्रमृषिं याभिरूतिभिरावतं अरक्षतं हे अश्विनौ ताभिरूतिभिः सु सुष्ठ्वस्मान् प्रावतं । प्ररक्षतं । किमर्थं । वाजसातये वाजस्यान्नस्य बलस्य वा सातये सम्भजनार्थं ॥

प्र वां स्तोमाः सुवृक्तयो गिरो वर्धन्त्वश्विना ।
पुरुत्रा वृत्रहन्तमा ता नो भूतं पुरुस्पृहा ॥ २२ ॥
प्र । वां । स्तोमाः । सुऽवृक्तयः । गिरः । वर्धन्तु । अश्विना ।
पुरुऽत्रा । वृत्रहन्ऽतमा । ता । नः । भूतं । पुरुऽस्पृहा ॥२२॥

हे अश्विनौ स्तोमाः प्रगीतमन्त्ररूपाः स्तुतयः सुवृक्तयः सुप्रवृत्ताः सुष्ठु दोषवर्जिता वा गिरः शस्त्ररूपा वाचश्च वां युवां प्रवर्धन्तु । प्रवर्धयन्तु । अपि च हे पुरुत्रा बहूनां त्रातारौ हे वृत्रहन्तमा वृत्राणां शत्रूणां हन्तृतमौ ईदृशौ हे अश्विनौ ता तौ युवां नोऽस्माकं पुरुस्पृहा पुरु बहुलं स्पृहणीयावीप्सितव्यौ भूतं । भवतं ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

त्रीणि पदान्यश्विनोराविः सन्ति गुहा परः ।
कवी ऋतस्य पत्मभिरर्वाग्जीवेभ्यस्परि ॥ २३ ॥

त्रीणि । पदानि । अश्विनोः । आविः । सन्ति । गुहा । परः ।
कवी इति । ऋतस्य । पत्मऽभिः । अर्वाक् । जीवेभ्यः । परि ॥ २३ ॥

त्रीणि त्रिसंख्याकान्यनयोरश्विनोर्देवयो रथस्य सम्बन्धीनि पदानि चक्राणि गुहा गुहायां वर्तमानान्येतावन्तं कालमदृश्यमानानि परो गुहायाः परस्ताद्दृष्टिगोचरे देश आविः सन्ति । आविर्भवन्ति ॥ सांहितिकश्छान्दसो दीर्घः । व्यत्ययेन निघाताभावः । यद्वा । सन्तीत्येतदस्तेः शतरि जसि रूपं ॥ आविर्भूतानि दृश्यन्ते । आश्विनस्य रथस्य चक्रत्रयोपेतत्वं च रथस्त्रिचक्रः परिवर्तते । ऋ० ४, ३६, १ । इत्यादि निगमान्तरे प्रसिद्धं । कवी क्रान्तदर्शिनावश्विनावृतस्य सत्यस्योदकस्य यज्ञस्य वा हेतुभूतैः पत्मभिर्यैः पदैर्जीवेभ्यस्परि । परिरूपर्यर्थः ॥ पञ्चम्याः परावध्यर्थं इति सत्वं ॥ जीवानामुपरि जीवेष्वस्मास्वर्वागभिमुखं । आगच्छतमिति शेषः । तानि पदानीदानीमुपलभ्यन्त इत्यन्वयः ॥ २९ ॥

(इति पञ्चमस्याष्टमैकोनत्रिंशो वर्गः)

आ नूनमित्येकविंशत्यृचं चतुर्थं सूक्तं शशकर्णस्यार्षमश्विदेवत्यं । त्रिंश्येकविंश्यौ द्वितीयातृतीये चेति चतस्रो गायत्र्यः प्रथमा चतुर्थी षष्ठी चतुर्दशी पञ्चदशी चेति पञ्च बृहत्यः पञ्चमी ककुप् मध्यमश्चेत्ककुप् । अनु० ५, ३ । इत्युक्तलक्षणसद्भावात् । दशमी त्रिष्टुबेकादशी विराड्द्वादशी जगती शिष्टा अनुष्टुभः । तथा चानुक्रान्तं । आ नूनं सैका शशकर्णोऽन्त्ये गायत्र्यावुपाद्ये चाद्या चतुर्थी षष्ठी चतुर्दश्याद्ये च बृहत्यः पञ्चमी ककुब्दशम्याद्यास्त्रिष्टुब्विराड्जगत्य इति ॥ अप्तोर्यामे ब्राह्मणाच्छंसिनोऽतिरिक्तोक्थ्य इदं सूक्तं । सूत्र्यते हि । आ नूनमश्विना तं वां रथं । आ० ९, ११ । इति ॥

आ नूनमश्विना युवं वत्सस्य गन्तमवसे ।
प्रास्मै यच्छतमवृकं पृथु च्छर्दिर्युयुतं या अरातयः ॥ १ ॥

आ । नूनं । अश्विना । युवं । वत्सस्य । गन्तं । अवसे ।
प्र । अस्मै । यच्छतं । अवृकं । पृथु । छर्दिः । युयुतं । याः । अरातयः ॥ १ ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे अश्विनावश्विनौ युवं युवां वत्सस्य स्तोतुर्ममावसे रक्षणार्थं नूनमवश्यमागन्तं । आगच्छतं । आगत्य चास्मा ऋषयेऽवृकं बाधकरहितं पृथु विस्तीर्णं छर्दिर्गृहं प्र यच्छतं । प्रदत्तं । तथा या अरातयोऽदानशीलाः शत्रुभूताः प्रजास्ता युयुतं । स्तोतृभ्यः पृथक्कुरुतं ॥

यदन्तरिक्षे यद्दिवि यत्पञ्च मानुषाँ अनु ।

नृम्णं तद्धत्तमश्विना ॥ २ ॥

यत् । अन्तरिक्षे । यत् । दिवि । यत् । पञ्च । मानुषान् । अनु ।

नृम्णं । तत् । धत्तं । अश्विना ॥ २ ॥

अन्तरिक्षे गन्धर्वादिभिः सेविते मध्यमे लोके यन्नृम्णं धनमस्ति । दिवि द्युलोके च यदस्ति । पञ्च पञ्चसंख्याकान्मानुषान्मनुष्याननु ॥ लक्षणेऽनोः कर्मप्रवचनीयत्वं । कर्मप्रवचनीययुक्त इति द्वितीया ॥ पञ्चविधा मनुष्या निषादपञ्चमाश्चत्वारो वर्णा यत्र वर्तन्ते तत्र चेह लोके यन्नृम्णं धनमस्ति । हे अश्विनौ तत्त्रिविधं नृम्णं धनं धत्तं । अस्मभ्यं प्रयच्छतं ॥

ये वां दंसांस्यश्विना विप्रासः परिमामृशुः ।

एवेत्काण्वस्य बोधतं ॥ ३ ॥

ये । वां । दंसांसि । अश्विना । विप्रासः । परिऽमम्रृशुः ।

एव । इत् । काण्वस्य । बोधतं ॥ ३ ॥

हे अश्विनौ वां युवयोः सम्बन्धीनि दंसांसि कर्माणि परिचरणात्मकानि ये विप्रासो विप्रा मेधाविनो यजमानाः परिमामृशुः परिमृशन्ति पुनः पुनः स्पृशन्ति । अनुतिष्ठन्तीत्यर्थः । यथा तदीयानि परिचरणानि युवां जानीथः एवेदेवमेव काण्वस्य कण्वपुत्रस्य मम परिचरणं बोधतं । अवगच्छतं ।

अयं वां घर्मो अश्विना स्तोमेन परि षिच्यते ।

अयं सोमो मधुमान्वाजिनीवसू येन वृत्रं चिकेतथः ॥ ४ ॥

अयं । वां । घर्मः । अश्विना । स्तोमेन । परि । सिच्यते ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अयं । सोमः । मधुऽमान् । वाजिनीवसू इति वाजिनीऽवसू ।
येन । वृत्रं । चिकेतथः ॥ ४ ॥

हे अश्विनौ वां युवयोः सम्बन्ध्ययं घर्मः प्रवर्ग्यं स्तोमेन स्तोत्रेण ऋक्सामरूपेण परि षिच्यते । आर्द्रीक्रियते । यथा युवयोस्तृप्तिकरो भवति तथा क्रियत इत्यर्थः । यद्वा । घर्मस्य हविष आधारभूतो महावीरो घर्मः । स स्तोमेन स्तोतव्येन पयसा परि षिच्यते । आसिच्यते वां युवयोरर्थं । अपि च हे वाजिनीवसू अन्नवद्धनौ अयं सोमस्तार्तीयसवनिको मधुमान्माधुर्यवान् युवाभ्यां दीयते । येन युवां वृत्रमावरकं शत्रुं चिकेतथः हन्तव्यतया जानीथः । अयं घर्मः सोमश्चेत्युभयत्रान्वयः ॥

यदप्सु यद्वनस्पतौ यदोषधीषु पुरुदंससा कृतं ।
तेन माविष्टमश्विना ॥ ५ ॥

यत् । अप्ऽसु । यत् । वनस्पतौ । यत् । ओषधीषु ।
पुरुऽदंससा । कृतं । तेन । मा । अविष्टं । अश्विना ॥ ५ ॥

हे पुरुदंससा बहुकर्माणावश्विनौ अप्सूदकेषु यद्भेषजं कृतं युवामकार्ष्टं ॥ करोतेर्लुङि मन्त्रे घसेत्यादिना च्लेर्लुक् ॥ तथा वनस्पतौ । वनानां पतिर्वनस्पतिः ॥ पारस्करादित्वात्सुट् । उभे वनस्पत्यादिष्विति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वं । जातौ चेदमेकवचनं ॥ वनस्पतिषु वृक्षेषु यच्च भेषजं युवामकुरुतं । ओषधीषु । ओषः पाक आसु धीयत इत्योषधयो व्रीह्यादयः ॥ कर्मण्यधिकरणे चेति दधातेरधिकरणे किप्रत्ययः । दासीभारादिषु पठितत्वात्पूर्वपदप्रकृतिस्वरत्वं । ओषधेश्च विभक्तावप्रथमायामिति दीर्घः ॥ व्रीह्यादिष्वोषधीषु च यद्भेषजं कृतं युवामकार्ष्टं । हे अश्विनाश्विनौ तेन सर्वेण भेषजेन मा मामविष्टं । रक्षतं ॥ अवतेर्लोटि सिब्बहुलमिति बहुलग्रहणात्सिप् । तत इट् ॥ ३० ॥

(इति पञ्चमस्याष्टमे त्रिंशो वर्गः)

यन्नासत्या भुरण्यथो यद्वा देव भिषज्यथः ।
अयं वां वत्सो मतिभिर्न विन्धते हविष्मन्तं हि गच्छथः ॥६॥

यत् । नासत्या । भुरण्यथः । यत् । वा । देवा । भिषज्यथः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

अयं । वां । वत्सः । मतिऽभिः । न । विन्धते । हविष्मन्तं ।
हि । गच्छथः ॥ ६ ॥

हे नासत्या सत्यस्वभावावश्विनौ यौ युवां भुरण्यथः सर्वं जगत्पोषयथः ॥ भुरण् धारणपोषणयोः । कण्ड्वादिः ॥ हे देवा दानादिगुणयुक्तावश्विनौ ॥ छान्दसः सांहितिको ह्रस्वः ॥ यद्वा । यौ च युवां भिषज्यथः सर्वस्य प्राणिजातस्य भैषज्यं रोगोपशमनं कुरुथः ॥ भिषज् चिकित्सायां । अयमपि कण्ड्वादिः ॥ तौ वां युवामयं वत्सः स्तोता मतिभिर्मननीयैः केवलैः स्तोत्रैर्न विन्धते । न विन्दते । न लभते ॥ वर्णविकारश्छान्दसः ॥ कुत इति चेत् उच्यते । हविष्मन्तं हविर्भिर्युक्तं स्तोतारं हि युवां गच्छथः । तस्माद्युवां हविर्भिर्युक्तैः स्तोत्रैः प्रसीदथ इति भावः ॥

प्रवर्ग्ये महावीरे गोपयस्यासिच्यमान आ नूनमित्येषानुवक्तव्या । सूत्र्यते हि । आ नूनमश्विनोर्ऋषिरिति गव्य आ सुते सिञ्चत श्रियमित्याज्ये ॥ आ० ४, ४ । इति ॥

आ नूनमश्विनोर्ऋषिः स्तोमं चिकेत वामया ।
आ सोमं मधुमत्तमं घर्मं सिञ्चादथर्वणि ॥ ७ ॥

आ । नूनं । अश्विनोः । ऋषिः । स्तोमं । चिकेत । वामया ।
आ । सोमं । मधुमत्ऽतमं । घर्मं । सिञ्चात् । अथर्वणि ॥७॥

हे अश्विनौ यदा युवामागच्छेयाथां तदानीं युवयोरश्विनोः स्तोमं स्तोत्रमृषिर्मन्त्रद्रष्टा वामया वननीययोत्कृष्टया बुद्ध्या नूनमवश्यमा चिकेत । अभिजानीयात् ॥ कित ज्ञाने । छान्दसो लिट् ॥ तथा मधुमत्तममतिशयेन मधुरं सोमं घर्मं प्रवर्ग्यसम्बन्धि घर्माख्यं हविश्चाथर्वण्यहिंसकेऽग्नौ । यद्वा । अथर्वा ऋषिः । तेन निर्मथितोऽग्निरुपचारादथर्वेत्युच्यते । अथर्वणा निर्मथनं च त्वामग्ने पुष्करादधि । ऋ० ६, १६, १३ । इत्यादिनिगमान्तरेऽवगम्यते । तस्मिन्नग्नावा सिञ्चात् । आसिञ्चेत् । प्रक्षिपेत् । अतः शीघ्रमागच्छतमित्यर्थः ॥

आ नूनं रघुवर्तनिं रथं तिष्ठाथो अश्विना ।
आ वां स्तोमा इमे मम नभो न चुच्यवीरत ॥ ८ ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

आ । नूनं । रघुऽवर्तनिं । रथं । तिष्ठाथः । अश्विना ।
आ । वां । स्तोमाः । इमे । मम । नभः । न । चुच्यवीरत ॥८॥

हे अश्विनौ रघुवर्तनिं लघुवर्तनं शीघ्रगमनं रथं नूनमवश्यमिदानीमेवा तिष्ठाथः । आतिष्ठतं । अधिरोहतं ॥ वालमूललघ्वलमिति लघोर्लकारस्य रेफः ॥ मम मदीया इमे स्तोमाः स्तोत्राणि नभो न सूर्यमिव तेजस्विनौ वां युवामा चुच्यवीरत । आच्यवन्ते । अभिगच्छन्ति । यद्वा । च्यवतिरत्रान्तर्भावितण्यर्थः । आच्यावयन्ति । युवामभिप्रापयन्ति ॥

यदद्य वां नासत्योक्थैराचुच्युवीमहि ।
यद्वा वाणीभिरश्विनेवेत्काण्वस्य बोधतं ॥ ९ ॥
यत् । अद्य । वां । नासत्या । उक्थैः । आऽचुच्युवीमहि ।
यत् । वा । वाणीभिः । अश्विना । एव । इत् । काण्वस्य ।
बोधतं ॥ ९ ॥

हे नासत्यौ अद्येदानीमुक्थैः शस्त्रैर्यद्यथा येन प्रकारेण वां युवामाचुच्युवीमहि आगमयेम हे अश्विनौ यद्वा यथा वाणीभिरुक्थव्यतिरिक्ताभिरपि वाग्भिः स्तुतिभिर्युवामागमयेम एवेदेवमेव तथैव काण्वस्य मम तदुक्थादिकं बोधतं । अवगच्छतं ॥

यद्वां कक्षीवाँ उत यद्व्यश्व ऋषिर्यद्वां दीर्घतमा जुहाव ।
पृथी यद्वां वैन्यः सदनेष्वेवेदतो अश्विना चेतयेथां ॥ १० ॥
यत् । वां । कक्षीवान् । उत । यत् । विऽअश्वः । ऋषिः । यत् । वां ।
दीर्घऽतमाः । जुहाव । पृथी । यत् । वां । वैन्यः । सदनेषु ।
एव । इत् । अतः । अश्विना । चेतयेथां ॥ १० ॥

हे अश्विनौ वां युवां कक्षीवानृषिर्यद्यथा जुहाव तुष्टाव । उतापि च व्यश्व एतत्संज्ञ ऋषिश्च यद्यथा जुहाव । यद्यथा च वां युवां दीर्घतमा ऋषिर्जुहाव । सदनेषु यज्ञगृहे वैन्यो वेनस्य पुत्रः पृथ्येतत्संज्ञो राजर्षिर्वा युवां यद्यथा जुहाव

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

तुष्टाव । एवेदेवमेव स्तुवतो ममात इदं स्तोत्रं ॥ इदंशब्दाद्द्वितीयार्थे तसिः ॥ हे अश्विनौ चेतयेथां । जानीतं ॥ ३१ ॥

(इति पञ्चमस्याष्टमैकत्रिंशो वर्गः)

यातं छर्दिष्पा उत नः परस्पा भूतं जगत्पा उत नस्तनूपा ।
वर्तिस्तोकाय तनयाय यातं ॥ ११ ॥

यातं । छर्दिःऽपौ । उत । नः । परःऽपा । भूतं ।
जगत्ऽपौ । उत । नः । तनूऽपा ।
वर्तिः । तोकाय । तनयाय । यातं ॥ ११ ॥

हे अश्विनौ छर्दिष्पौ । छर्दिरिति गृहनाम । तस्यास्मदीयस्य पालकौ सन्तौ युवां यातं । आगच्छतं । उतापि च नोऽस्माकं परस्पा परमतिशयेन पालकौ भूतं । भवतं ॥ पारस्करादित्वात्सुट् ॥ तथा जगत्पौ सर्वस्य जगतो जङ्गमस्य प्राणिजातस्यास्मदीयस्य पालकौ भवतं । उतापि च नोऽस्माकं तनूपा तनूनां शरीराणां तनयानां वा पालकौ भवतं । एतत्सर्वार्थं तोकाय तोकस्य पुत्रस्य तनयाय तनयस्य पौत्रस्य चास्मदीयस्य वर्तिर्गृहं यातं । गच्छतं ॥

यदिन्द्रेण सरथं याथो अश्विना यद्वा वायुना भवथः समोकसा ।
यदादित्येभिर्ऋभुभिः सजोषसा यद्वा विष्णोर्विक्रमणेषु तिष्ठथः ॥

यत् । इन्द्रेण । सऽरथं । याथः । अश्विना । यत् । वा ।
वायुना । भवथः । संऽओकसा ।
यत् । आदित्येभिः । ऋभुऽभिः । सऽजोषसा । यत् । वा ।
विष्णोः । विऽक्रमणेषु । तिष्ठथः ॥ १२ ॥

हे अश्विनौ इन्द्रेण सह सरथं समानमेकं रथमास्थाय यद्यदि याथः गच्छथः । यद्वा यदि वा वायुना सह समोकसा समाननिवासौ भवथः । यद्यदि वादित्येभिरदितिपुत्रैर्मित्रादिभिरृभुभिश्च सजोषसा सह प्रीयमाणौ वर्तेथे । यद्वा यदि वा विष्णोर्विक्रमेषु विष्णुना देवेन विक्रान्तेषु त्रिषु लोकेषु तिष्ठथः । अतः सर्वस्मादपि स्थानादागच्छतमिति शेषः ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यदुद्याश्विनावहं हुवेय वाजसातये ।
यत्पृत्सु तुर्वणे सहस्तच्छ्रेष्ठमश्विनोरवः ॥ १३ ॥

यत् । अद्य । अश्विनौ । अहं । हुवेयं । वाजऽसातये ।
यत् । पृत्ऽसु । तुर्वणे । सहः । तत् । श्रेष्ठं । अश्विनोः । अवः ॥ १३ ॥

यद्यदाहमश्विनौ वाजसातये संग्रामार्थं हुवेय आह्वयेय अद्येदानीं तावागच्छत-मिति शेषः । पृत्सु पृतनासु संग्रामेषु तुर्वणे शत्रूणां हिंसने यत्सहः शत्रूणामभि भवितृ रक्षणमश्विनोः तदवो रक्षणं श्रेष्ठं प्रशस्यतमं । अतस्तावाह्वयामीति भावः ॥

आ नूनं यातमश्विनेमा हव्यानि वां हिता ।
इमे सोमासो अधि तुर्वशे यदाविमे कण्वेषु वामथ ॥ १४ ॥

आ । नूनं । यातं । अश्विना । इमा । हव्यानि । वां । हिता ।
इमे । सोमासः । अधि । तुर्वशे । यदौ । इमे । कण्वेषु ।
वां । अथ ॥ १४ ॥

हे अश्विनौ नूनमवश्यमा यात । आगच्छतं । इमेमानि पुरोवर्तीनि हव्यानि हवींषि वां युवाभ्यां हिता हितानि । यद्वा । युवयोरर्थं विहितानि कृतानि । इमे च सोमासः सोमास्तुर्वशे यदौ च वर्तमानाः । वां युवाभ्यां युवयोरर्थे संस्कृता वा ॥ अधिः सप्तम्यर्थानुवादकः ॥ अथापि च कण्वेषु कण्वपुत्रेष्वस्मासु चेमे सोमा वां युवाभ्यां दत्ताः । अत आयातमित्यर्थः ॥

यन्नासत्या पराके अर्वाके अस्ति भेषजं ।
तेन नूनं विमदाय प्रचेतसा छर्दिर्वत्साय यच्छतं ॥ १५ ॥

यत् । नासत्या । पराके । अर्वाके । अस्ति । भेषजं ।
तेन । नूनं । विऽमदाय । प्रऽचेतसा । छर्दिः । वत्साय । यच्छतं ॥ १५ ॥

हे नासत्यावश्विनौ पराके दूरदेशेऽर्वाके समीपे च यद्युवयोः सम्बन्धि भेषजं रोगोपशमनकारणमस्ति तेन भेषजेन सहितं छर्दिर्गृहं हे प्रचेतसा प्रकृष्टज्ञाना-

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

वश्विनौ विमदाय । लुप्तोपममेतत् । एतत्संज्ञायेवर्पंये वत्साय नूनमवश्यं प्रयच्छतं ॥ ३२ ॥

(इति पञ्चमस्याष्टमे द्वात्रिंशो वर्गः)

अभुंत्स्यु प्र देव्या साकं वाचाहमश्विनोंः ।
व्यावर्देव्या मतिं वि रातिं मर्त्येभ्यः ॥ १६ ॥

अभुंत्सि । ऊं इतिं । प्र । देव्या । साकं । वाचा । अहं । अश्विनोंः ।
वि । आवः । देवि । आ । मतिं । वि । रातिं । मर्त्येभ्यः ॥ १६ ॥

अश्विनोः सम्बन्धिन्या देव्या द्योतमानया वाचा स्तुतिरूपया साकं सहाहं प्राबुत्सि । प्रबुद्धोऽस्मि । उ इति पूरणः । हे देवि द्योतमान उषः त्वं च मतिं मया कृतां स्तुतिमाभिलक्ष्य व्यावः । तमांसि विवृणु । अपगमय । प्रकाशयेत्यर्थः ॥ वृणोतेश्छान्दसे लुङि मन्त्रे घसेत्यादिना च्लेर्लुक् । छन्दस्यपि दृश्यत इत्याडागमः ॥ अपि च मर्त्येभ्यो मनुष्येभ्यः स्तोतृभ्योऽस्मभ्यं रातिं धनं व्यावः । प्रकाशय ॥

प्र बोधयोषो अश्विना प्र देवि सूनृते महि ।
प्र यज्ञहोतरानुषक्प्र मदाय श्रवो बृहत् ॥ १७ ॥

प्र । बोधय । उषः । अश्विना । प्र । देवि । सूनृते । महि ।
प्र । यज्ञऽहोतः । आनुषक् । प्र । मदाय । श्रवः । बृहत् ॥ १७ ॥

हे उषः अश्विनौ देवौ प्रबोधयास्मत्स्तोत्रस्य श्रवणार्थं । हे देवि दानादिगुणयुक्ते हे सूनृते सुष्ठु नेत्रि हे महि महति इत्थंमहाभागा त्वमश्विनौ प्र बोधय । हे यज्ञहोतर्यज्ञानां यष्टव्यानां देवानामाह्वातर्होतर्वा आनुषगनुषक्तं सन्ततं यथा भवति तथाश्विनौ स्तुतिभिः प्र बोधय । तथा मदायाश्विनोर्मदोत्पादनार्थं बृहन्महच्छ्रवः श्रवणीयं सोमलक्षणमन्नमस्माभिः कल्पितं ॥

यदुषो यासि भानुना सं सूर्येण रोचसे ।
आ हायमश्विनो रथो वर्तिर्याति नृपाय्यं ॥ १८ ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यत् । उषः । यासि । भानुना । सं । सूर्येण । रोचमे ।
आ । ह । अयं । अश्विनोः । रथः । वर्तिः । याति । नृऽपाय्यं ॥

हे उषः भानुना दीप्त्या सह यद्यदा यासि गच्छसि तदानीं सूर्येण सं रोचसे । सम्यग्दीप्यसे । अपि च तस्मिन्समयेऽश्विनोरयं रथो नृपाय्यं यन्नृभिर्नेतृभिऋत्विग्भिः पालनीयं वर्तिर्यज्ञगृहमा याति ह । आगच्छति खलु ॥

यदापीतासो अंशवो गावो न दुह्र ऊधभिः ।
यद्वा वाणीरनूषत प्र देवयन्तो अश्विना ॥ १९ ॥

यत् । आऽपीतासः । अंशवः । गावः । न । दुह्रे । ऊधऽभिः ।
यत् । वा । वाणीः । अनूषत । प्र । देवऽयन्तः । अश्विना ॥ १९ ॥

यद्यदापीतास आ समन्तात्पीतवर्णा अंशवः सोमलता ऊधभिर्गावो न गाव इव दुह्रे रसं दुहते ॥ लोपस्त आत्मनेपदेष्विति तलोपः । बहुलं छन्दसीति रुडागमः ॥ यद्वा यदा च देवयन्तो देवान्कामयमाना ऋत्विजो वाणीर्वाचः स्तुतीरनूषत अस्तुवन् । अकुर्वन्नित्यर्थः । तदाश्विनौ प्रावतं । प्ररक्षतं ॥

प्र द्युम्नाय प्र शवसे प्र नृषह्याय शर्मणे ।
प्र दक्षाय प्रचेतसा ॥ २० ॥

प्र । द्युम्नाय । प्र । शवसे । प्र । नृऽसह्याय । शर्मणे ।
प्र । दक्षाय । प्रऽचेतसा ॥ २० ॥

प्रचेतसा प्रकृष्टज्ञानावश्विनौ द्युम्नाय द्योतमानायान्नाय यशसे वा ॥ तादर्थ्ये चतुर्थी ॥ द्युम्नार्थमस्मान् प्ररक्षतं । शवसे बलाय च प्ररक्षतं । नृषह्याय नृभिः सोढव्याय शर्मणे सुखाय च प्ररक्षतं । दक्षाय वृद्ध्यर्थं प्ररक्षतं । यद्वा ॥ द्युम्नायेत्यादौ क्रियाग्रहणमपि कर्तव्यमिति कर्मणः सम्प्रदानत्वाच्चतुर्थी ॥ द्युम्नादीन्यस्मभ्यं प्रयच्छतमित्यर्थः ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यन्नूनं धीभिरश्विना पितुर्योना निषीदथः ।
यद्वा सुम्नेभिरुक्थ्या ॥ २१ ॥

यत् । नूनं । धीभिः । अश्विना । पितुः । योना । निऽसीदथः ।
यत् । वा । सुम्नेभिः । उक्थ्या ॥ २१ ॥

हे अश्विनौ पितुः पालयितुर्द्युलोकस्य सम्बन्धिनि योना योनौ स्थाने यद्यदि धीभिः कर्मभिः सह निषीदथः निवसथः । यद्वा यदि वा हे उक्थ्योक्थ्यौ प्रशस्यौ सुम्नेभिः सुम्नैः सुखैः सह निवसथः । तदास्माभिः स्तुतौ सन्तावागच्छतमिति शेषः । अथवा । पितुः पालयितुर्यजमानस्य सम्बन्धिनि योनौ यज्ञगृहे धीभिः स्तुतिभिः सार्धं यदि निवसथः यदि च सुम्नैः सुखकरैर्हविर्भिश्च सह निवसथः तर्ह्यागच्छतं । नूनमिति पदपूरणः । उक्तं च यास्केन । अथापि पदपूरणः । नूनं सा ते प्रति वरं जरित्रे । नि० १, ७ । इति ॥ २२ ॥

(इति पञ्चमस्याष्टमे त्रयस्त्रिंशो वर्गः)

यत्स्थ इति षडृचं पञ्चमं सूक्तं कण्वपुत्रस्य प्रगाथस्यार्षमाश्विनं । आद्या बृहती । द्वितीया मध्येज्योतिस्त्रिष्टुप् यतोऽष्टकस्ततो ज्योतिः । अनु० ९,८ । इत्युक्तलक्षणसद्भावात् । तृतीयानुष्टुप् । चतुर्थ्यास्तारपङ्क्तिः । अन्त्यौ चेत्प्रस्तारपङ्क्तिः । अनु० ८,७ । इति हि तल्लक्षण । पञ्चमी बृहती षष्ठी सतोबृहती । तथा चानुक्रान्तं । यत्स्थः षट् प्रगाथोऽपश्यद्बृहती मध्येज्योतिरनुष्टुबास्तारपङ्क्तिः प्रगाथ इति ॥ प्रातरनुवाकाश्विने क्रतौ बार्हते छन्दस्याश्विनशास्त्रे चेदं सूक्तं । सूत्र्यते हि । द्युम्नी वां यत्स्थ इति बार्हतं । आ० ४,१५ । इति ॥

यत्स्थो दीर्घप्रसद्मनि यद्वादो रोचने दिवः ।
यद्वा समुद्रे अध्याकृते गृहेऽत आ यातमश्विना ॥ १ ॥

यत् । स्थः । दीर्घऽप्रसद्मनि । यत् । वा । अदः । रोचने । दिवः ।
यत् । वा । समुद्रे । अधि । आऽकृते । गृहे । अतः । आ । यातं । अश्विना ॥ १ ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे अश्विनौ दीर्घप्रसद्मनि । प्रसीदन्त्येषु देवा इति प्रसद्मानो यज्ञगृहाः । दीर्घा आयताः प्रसद्मानो यस्मिन् तस्मिँल्लोके यद्यदि स्थः भवथः वर्तेथे । यद्वा यदि वादोऽमुर्ष्मन्दिवो द्युलोकस्य सम्बन्धिनि रोचने रोचमाने स्थाने भवथः । यद्वा यदि वा समुद्रेऽन्तरिक्षे । समुद्द्रवन्त्यस्मादाप इति समुद्रमन्तरिक्षं । तस्मिन् । आकृते निर्मिते गृहेऽधिदसथः । अतोऽखिलतयाद्यपि स्थानात् हे अश्विनौ आ यातं । आगच्छतं ॥

यद्वां यज्ञं मनवे संमिमिक्षथुरेवेत्काण्वस्य बोधतं ।
बृहस्पतिं विश्वान्देवाँ अहं हुव इन्द्राविष्णू अश्विनाशुहेषसा ॥ २ ॥

यत् । वा । यज्ञं । मनवे । संऽमिमिक्षथुः । एव । इत् । काण्वस्य । बोधतं ।
बृहस्पतिं । विश्वान् । देवान् । अहं । हुवे । इन्द्राविष्णू इति । अश्विनौ । आशुऽहेषसा ॥ २ ॥

हे अश्विनौ यद्वा यथा वा येन वा प्रकारेण मनवे प्रजापतये यजमानाय यज्ञं संमिमिक्षथुः संसिक्तवन्तौ युवां कृतवन्तौ एवेदेवमेव काण्वस्य कण्वगोत्रस्य मम यज्ञं कर्तुं बोधतं । अवगच्छतं । अपि च बृहस्पतिं बृहतां देवानां पतिं देवपुरोहितं विश्वान् सर्वान्मित्रादीन्देवांश्चेन्द्राविष्णु चाशुहेषसा शीघ्राश्वौ । यद्वा ॥ हेषृ शब्दे ॥ शीघ्रं सर्वत्र शब्द्यमानौ स्तूयमानावश्विनौ चाहं हुवे । आह्वये ॥

त्या न्वश्विना हुवे सुदंससा गृभे कृता ।
ययोरस्ति प्र णः सख्यं देवेष्वध्याप्यं ॥ ३ ॥

त्या । नु । अश्विना । हुवे । सुऽदंससा । गृभे । कृता ।
ययोः । अस्ति । प्र । नः । सख्यं । देवेषु । अधि । आप्यं ॥ ३ ॥

त्या त्यौ पूर्वोक्तगुणावश्विनौ नु क्षिप्रमहं हुवे । आह्वयामि । कीदृशौ । सुदंससा शोभनकर्माणौ गृभे ग्रहे ग्रहणायास्माभिर्दत्तानां हविषां स्वीकरणायास्मभ्यं धन-

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

दानाय वा कृता कृतौ प्रादुर्भूतौ देवेषु मध्ये ॥ अधिः सहस्यर्थानुवादी ॥ ययोरश्विनोराप्यमास्यं नोऽस्माकं सख्यं सखित्वं प्राशिन प्रभवति उत्कर्षेण वर्तते तौ हुव इत्यन्वयः ।

ययोरधि प्र यज्ञा असूरे सन्ति सूरयः ।
ता यज्ञस्याध्वरस्य प्रचेतसा स्वधाभिर्या पिबतः सोम्यं मधु ॥४॥

ययोः । अधि । प्र । यज्ञाः । असूरे । सन्ति । सूरयः ।
ता । यज्ञस्य । अध्वरस्य । प्रऽचेतसा । स्वधाभिः । या ।
पिबतः । सोम्यं । मधु ॥ ४ ॥

ययोरश्विनोरध्युपरि यज्ञा ज्योतिष्टोमादयः सर्वे यागाः प्र सन्ति प्रभवन्ति । छिन्नस्य यज्ञशिरसोऽश्विभ्यां सन्धानात् । तथा च यज्ञस्य शिरोऽच्छिद्यतेत्युपक्रम्य तैत्तिरीयकं । तावेतद्यज्ञशिरः प्रत्यधत्तां यदाश्विनो गृह्यते यज्ञस्य निष्कृत्यै । तै० सं० ६, ४, ९, ५ । इति । असूरे स्तोत्ररहितेऽपि देशे ययोश्च सूरयः स्तोतारः सन्ति तावश्विनावध्वरस्य हिंसारहितस्य यज्ञस्य ज्योतिष्टोमादेः प्रचेतसा प्रकृष्टं ज्ञातारौ स्वधाभिर्यज्ञहेतुभिः स्तुतिभिराह्वयामीति शेषः । या यावश्विनौ सोम्यं सोममयं मधु मधुरं सोमरसं पिबतः ॥

यदद्याश्विनावपाग्यत्प्राक्स्थो वाजिनीवसू ।
यद्द्रुह्यव्यनवि तुर्वशे यदौ हुवे वामथ मा गतं ॥ ५ ॥

यत् । अद्य । अश्विनौ । अपाक् । यत् । प्राक् । स्थः ।
वाजिनीवसू इति वाजिनीऽवसू ।
यत् । द्रुह्यवि । अनवि । तुर्वशे । यदौ । हुवे । वां ।
अथ । मा । आ । गतं ॥ ५ ॥

हे अश्विनौ अद्येदानीं यद्यदपाक् प्रतीच्यां दिशि स्थः भवथः वर्तेथे । हे वाजिनीवसू अन्नवन्तौ यद्यदि प्राक् प्राच्यां दिशि स्थः भवथः । यद्यदि वा द्रुह्युप्रभृतिषु चतुर्षु स्तोतृषु सन्निहितौ भवथः । एवं सर्वत्र सन्निहितौ वां युवां हुवे । अहमाह्वयामि । अथानन्तरमेव मा मामा गतं । आगच्छतं ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

यदन्तरिक्षे पतथः पुरुभुजा यद्वेमे रोदसी अनु ।
यद्वा स्वधाभिरधितिष्ठथो रथमत आ यातमश्विना ॥ ६ ॥

यत् । अन्तरिक्षे । पतथः । पुरुऽभुजा । यत् । वा । इमे इति ।
रोदसी इति । अनु ।
यत् । वा । स्वधाभिः । अधिऽतिष्ठथः । रथं । अतः । आ ।
यातं । अश्विना ॥ ६ ॥

हे पुरुभुजा बहूनां पालयितारौ बहुलहविषो भोक्तारौ वा यद्यन्तरिक्षे पतथः गच्छथः । यद्वा यदि वेमे रोदसी द्यावापृथिव्यावनुलक्ष्य गच्छथः । यद्वा यदि वा स्वधाभिरात्मीयैस्तेजोभिर्बलैर्वा सार्धं रथमधितिष्ठथः रथ उपविशथः ॥ अधिशीङ्स्थासामित्याधारस्य कर्मसंज्ञा ॥ अतः सर्वस्मात्स्थानात् हे अश्विनौ आ यातं । आगच्छतं ॥ ३४ ॥

(इति पञ्चमस्याष्टमे चतुस्त्रिंशो वर्गः)

त्वमग्न इति दशर्चं षष्ठं सूक्तं कण्वगोत्रस्य वत्सस्यार्षमाग्नेयं । आद्या प्रतिष्ठा-गायत्री अष्टकसप्तकषट्कोपेतत्वात् । द्वितीया वर्धमाना षट्कसप्तकाष्टकोपेतत्वात् । तथा चोक्तं । षट्कसप्तकाष्टकैव वर्धमाना विपरीता प्रतिष्ठेति । दशमी त्रिष्टुप् शिष्टा गायत्र्यः । तथा चानुक्रान्तं । त्वमग्ने दश वत्स आग्नेये गायत्रेऽन्त्या त्रिष्टुबाद्या प्रतिष्ठोत्तरा वर्धमानेति ॥ प्रातरनुवाकस्याग्नेये क्रतौ गायत्रे छन्दस्या-श्विनशस्त्रे चोत्तमावर्जमेतत्सूक्तं । सूत्र्यते हि । त्वमग्ने व्रतपा इत्युत्तमामुद्धरेत् । आ० ४, १३ । इति व्रतपस्यामाद्यानुवाक्या । सूत्रितं च । त्वमग्ने व्रतपा असि यद्वो वयं प्रमिनाम व्रतानि । आ० ३, १३ ॥ इति ॥

त्वमग्ने व्रतपा असि देव आ मर्त्येष्वा ।
त्वं यज्ञेष्वीड्यः ॥ १ ॥

त्वं । अग्ने । व्रतऽपाः । असि । देवः । आ । मर्त्येषु । आ ।
त्वं । यज्ञेषु । ईड्यः ॥ १ ॥

हे अग्ने देवो द्योतमानस्त्वं मर्त्येष्वा मनुष्येषु च देवेषु च मध्ये व्रतपा

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

असि । व्रतानां कर्मणां रक्षिता भवसि । अतः कारणाद्यज्ञेषु त्वमीड्यः स्तुत्योऽसि ॥

त्वमसि प्रशस्यो विदथेषु सहन्त्य ।
अग्ने रथीरध्वराणां ॥ २ ॥
त्वं । असि । प्रऽशस्यः । विदथेषु । सहन्त्य ।
अग्ने । रथीः । अध्वराणां ॥ २ ॥

हे सहन्त्य शत्रूणामभिभवितरग्ने विदथेषु यज्ञेषु त्वं प्रशस्यः स्तुत्योऽसि । अध्वराणां यागानां रथीर्नेता च भवसि ॥

स त्वमस्मदप द्विषो युयोधि जातवेदः ।
अदेवीरग्ने अरातीः ॥ ३ ॥
सः । त्वं । अस्मत् । अप । द्विषः । युयोधि । जातऽवेदः ।
अदेवीः । अग्ने । अरातीः ॥ ३ ॥

हे जातवेदो जातानां वेदितरग्ने स पूर्वोक्तगुणस्त्वमस्मदस्मत्तो द्विषो द्वेष्टॄञ्छत्रूनप युयोधि । पृथक्कुरु । अदेवीरासुरीररातीः शत्रुसेनाश्च पृथक्कुरु ॥

अन्ति चित्सन्तमह यज्ञं मर्तस्य रिपोः ।
नोप वेषि जातवेदः ॥ ४ ॥
अन्ति । चित् । सन्तं । अह । यज्ञं । मर्तस्य । रिपोः ।
न । उप । वेषि । जातऽवेदः ॥ ४ ॥

हे जातवेदः अन्ति चिदन्तिकेऽपि सन्तं भवन्तं समीपे विद्यमानमपि रिपोरस्मच्छत्रोर्मर्तस्य मनुष्यस्य यज्ञं नोप वेषि । अहशब्दोऽवधारणे । नैव कामयसे ॥

मर्ता अमर्त्यस्य ते भूरि नाम मनामहे ।
विप्रासो जातवेदसः ॥ ५ ॥

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

मर्ताः । अमर्त्यस्य । ते । भूरि । नाम । मनामहे ।
विप्रासः । जातऽवेदसः ॥ ५ ॥

मर्ता मनुष्या विप्रासो मेधाविनो वयं हे अग्ने जातवेदसो जातानां वेदितु रमर्त्यस्य मरणरहितस्य देवस्य भूरि विस्तृतं नाम स्तोत्रं मनामहे जानीमः । कुर्म इति यावत् ॥ ३५ ॥

(इति पञ्चमस्याष्टमे पञ्चत्रिंशो वर्गः)

विप्रं विप्रासोऽवसे देवं मर्तास ऊतये ।
अग्निं गीर्भिर्हवामहे ॥ ६ ॥
विप्रं । विप्रासः । अवसे । देवं । मर्तासः । ऊतये ।
अग्निं । गीःऽभिः । हवामहे ॥ ६ ॥

विप्रासो मेधाविनो मर्तासो मर्ता मनुष्या वयं विप्रं मेधाविनं देवं दानादि-गुणयुक्तमग्निमवसे हविर्भिस्तर्पयितुमूतयेऽस्माकं रक्षणार्थं च गीर्भिर्हवामहे । आह्वयामहे ॥

आभिप्लविकेषूक्थ्येषु तृतीयसवन आ ते वत्स इति वैकल्पिकः स्तोत्रियस्तृचः । सूत्रितं च । आ ते वत्सो मनो यमदग्ने स्थूरं रयिं भर । आ० ७,८ । इति ॥

आ ते वत्सो मनो यमत्परमाच्चित्सधस्थात् ।
अग्ने त्वांकामया गिरा ॥ ७ ॥
आ । ते । वत्सः । मनः । यमत् । परमात् । चित् । सधऽस्थात् ।
अग्ने । त्वांऽकामया । गिरा ॥ ७ ॥

हे अग्ने वत्स ऋषिस्ते तव मनः परमाच्चिदुत्कृष्टादपि सधस्थात्सहस्थाना-द्द्युलोकादा यमत् । आयमयति । केन साधनेन । त्वांकामया त्वामभिलषन्त्या गिरा स्तुत्या ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

पुरुत्रा हि सदृङ्ङसि विशो विश्वा अनु प्रभुः ।
समत्सु त्वा हवामहे ॥ ८ ॥

पुरुऽत्रा । हि । सऽदृङ् । असि । विशः । विश्वाः । अनु । प्रऽभुः ।
समत्ऽसु । त्वा । हवामहे ॥ ८ ॥

हे अग्ने पुरुत्रा हि बहुषु देशेषु त्वं सदृङ्ङसि । समानं द्रष्टा भवसि । अत एव विश्वाः सर्वा विशः प्रजा अनुलक्ष्य प्रभुरीश्वरो भवसि । ईदृशं त्वां समत्सु संग्रामेषु रक्षणार्थं हवामहे । आह्वयामहे ॥

समत्स्वग्निमवसे वाजयन्तो हवामहे ।
वाजेषु चित्रराधसं ॥ ९ ॥

समत्ऽसु । अग्निं । अवसे । वाजऽयन्तः । हवामहे ।
वाजेषु । चित्रऽराधसं ॥ ९ ॥

समत्सु सहमदनेषु सङ्ग्रामेषु वाजयन्तो बलमिच्छन्तो वयमवसे रक्षणार्थमग्निं हवामहे । कीदृशं । वाजेषु सङ्ग्रामेषु चित्रराधसं चायनीयधनं ॥

प्रत्नो हि कमीड्यो अध्वरेषु सनाच्च होता
नव्यश्च सत्सि ।
स्वां चाग्ने तन्वं पिप्रयस्वास्मभ्यं च
सौभगमा यजस्व ॥ १० ॥

प्रत्नः । हि । कं । ईड्यः । अध्वरेषु । सनात् । च । होता ।
नव्यः । च । सत्सि ।
स्वां । च । अग्ने । तन्वं । पिप्रयस्व । अस्मभ्यं । च ।
सौभगं । आ । यजस्व ॥ १० ॥

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

हे अग्ने अध्वरेषु यज्ञेष्वीड्यः स्तुत्यस्त्वं प्रत्नो हि चिरन्तनः खलु भवसि । कमिति पूरकः । तथा सनाच्चिरकालादारभ्य होता देवानामाह्वाता च सन्नव्यः स्तुत्यश्च सन् सत्सि । यज्ञेषु निषीदसि । हे अग्ने देवानां हविर्वहंस्त्वं स्वां च तन्वमात्मीयं च शरीरं पिप्रयस्व । त्वदीयेन हविर्भागेन तर्पय । अस्मभ्यं स्तोतृभ्यश्च सौभगं सुभगत्वं चा यजस्व । प्रदेहि ॥ सुभगशब्दाद्भावार्थे सुभगान्मन्त्र इत्युद्गात्रादिषु पाठादञ्प्रत्ययः ॥ १६ ॥

(इति पञ्चमस्याष्टमे षट्त्रिंशो वर्गः)

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तक-
श्रीवीरबुक्कभूपालसाम्राज्यधुरन्धरेण
सायणाचार्येण विरचिते माधवीये
वेदार्थप्रकाशे ऋक्संहिताभाष्ये
पञ्चमाष्टकेऽष्टमोऽध्यायः
समाप्तः ॥

श्री मन्नालाल 'अभिमन्यु' एम० ए०
इत्येतैः संशोधितः ।

पुस्तकप्राप्तिस्थानम्—
मास्टर खेलाड़ीलाल ऐण्ड सन्स
'संस्कृत बुकडिपो'
कचौड़ीगली, बनारस सिटी ।

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CCO. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri

CC0. Vasishtha Tripathi Collection. Digitized by eGangotri